कृपया इस ग्रन्थ को अन्तिम अङ्कित तिथि वा उससे पूर्व वापस करें ।
विलम्ब करने पर ५ नये पैसे की दर से प्रतिदिन दण्ड दातव्य होगा ।

३१-१२-८८		

LXXV
33

thus, it cannot be said that when, in the absence of any reflecting medium, the expanding sunlight is shining in the sky but not brightly, its brightness is increased by an increase in its volume, owing to a lustrous mirror or other medium blocking the passage of the rays of light—though indeed a stream of water flowing to a lower level is increased in volume by the action of a dam; nor can it be said, further, that more voluminous than this light is that to which is added the lustre from the reflecting medium.

And even if the illustration be granted to be just, the application of it would imply that Absolute Bliss is present to our consciousness in a *lesser* degree, just as the sunlight diffused through the sky is less vivid; whereas the Bliss disclosed by the vṛtti in the form of pleasure is present in a *greater* degree, just as the sunlight becomes more vivid when acted on by a reflecting medium. And hence it would follow logically that the present life of bondage is more worthy of our regard than is Final Release itself.

And the argument just recited will suffice to refute the position that, during the transmigratory life, Bliss is present to consciousness, though indistinctly as being obscured by our false knowledge and by the mental residua left behind thereby, just as the light of a lamp flickers indistinctly in a strong wind: whereas, in the state of final release, Bliss is present in its true and full nature; for then error, and the impressions left behind by error, have ceased to exist. Because when Bliss, which is essentially an undifferenced entity, is shining forth, there can be no question of degree as regards the Bliss, which present in the state of final release is s.

not to shine distinctly owing to the defects of Nescience. Thus the conclusion is that it is incorrect to suppose that the Bliss which is the Witness is not concealed by Nescience.

(b) It is not concealed by Nescience: nor does this view overthrow the distinction between Bondage and Release.

The writer of the *Advaitavidyā* teaches as follows: When a single object of pure whiteness is reflected on many mirrors that have been tarnished in various degrees, the decreasing shades of whiteness are supposed to be visible in the reflexion of the object, in correspondence with the degrees of tarnishing in the adjuncts i.e. the mirrors; so when the one absolute Bliss, which in its real ature is an undifferenced unity, appears to have become he Bliss which is the Witness (साक्ष्यानन्द) by being re- ected in the many inner organs; and so also when it ppears to have become Bliss in the form of a sense- bject (विषयानन्द) by being reflected in the vṛttis which ave taken the form of pleasure* and to which belong uccessive degrees of purity, i. e. a greater or a lesser egree of the *sattva* element—such purity being due to ontact with a definite kind of object, *viz.* one that has nore or less *sattva* in itself, and this contact being the natured result of good deeds done in former births,— hen, in these two (the sākṣyānanda and the viṣayānanda) less and less degree of Bliss is erroneously imagined to xist, as having been brought under the influence of the

* अन्तःकरणगतसत्त्वांशपरिणामरूपाः वृत्तयः स्वरूपानन्दगोचरा जायन्ते जा- ानाश्च ता अप्युत्कर्षापकर्षापेता एव जायन्ते तासु आनन्दप्रतिबिम्बो विषयानन्द ते इति । Ṭī.

tamas element,[1] which is also present in varying degrees as an adjunct to the vṛttis of the inner organ.

Thus, although the principle of Bliss is present to our consciousness during the life of bondage, we are dissatisfied because we erroneously imagine degrees of Bliss; but when true knowledge has arisen, all desire is at an end, for we no longer erroneously imagine that degrees of Bliss really exist. And since the distinction between the life of bondage and final release[2] can thus be consistently maintained, this writer concludes that the Bliss principle as the Witness is present to our consciousness as the object of unbounded love and is assuredly not concealed by Nescience.

(c) The Bliss principle is concealed by Nescience; but Bondage and Release are logically distinguishable.[3]

Other writers declare that the Bliss principle eve

Page 36.

when shining forth, is indeed concealed b Nescience; for one's own consciousness, ex pressed in the words—'Bliss does not exist for me, not perceived by me'—is a direct proof of such concea ment. And since under the influence of Nescience differ ent characteristics may be surmised erroneously in th Witness which is really a unity, the concealment by Nescience of the Witness in its character as Bliss is com-

1. अन्तःकरणस्य सत्त्वरजस्तमोगुणात्मकत्वात् तद्वृत्तिष्वपि तमोगुणरूपोपाधि रिनुवर्त्तते तत्कृतो यो मालिन्यतारतम्यदोषः अपकर्षतारतम्यात्मको वृत्तिगतदोष इति यावत्। तस्माद्दोषादपकर्षः सत्त्ववृत्तिप्रतिबिम्बरूपे विषयानन्दे ऽध्यस्यत इत्यर्थः। Ṭī.

2. विशेषोपपत्तेरिति। मुक्तिसंसारयोरिति शेषः। Ṭī.

3. इदानीं तस्य स्वरूपानन्दस्य आवृतत्वमुपेत्यैव विशेषं मुक्तिसंसारयोर्वद सिद्धान्तं दर्शयति 'अन्येतु' इति। Ṭī.

patible with the non-concealment of it in its character as Intelligence. And since Absolute Intelligence does not put an end to the concealing power of Nescience, its shining forth is compatible with its concealment by Nescience at the same time;[1] for such concealment in regard to a presented object is a matter of common experience as expressed in the words—'I do not know clearly the thing that you say.'[2] Nor is it right to say that in such a case the concealment by Nescience (*viz.* the consciousness of our own ignorance) of the special character of a given object is perceived in so far as it is determined by our consciousness of the general character of the object.[2] For such a rule would extend too far so as to mply that the consciousness of our ignorance of A was letermined by our ignorance of B, (i. e. would necessarily mply that we were ignorant of B also).

Against this it cannot be argued that the determinig rule, in such a case, is the relation between the pecial and the general character of a thing, and therepre the rule does not unduly extend to the case of A nd B between which no such relation exists. For since his so-called relation of special to general is nothing but he well-known relation of *vyāpti* (i. e. invariable conomitance proved by induction as existing between the less general or vyāpya and the more general the vyāpaka),

1. तस्य स्वरूपप्रकाशस्य आवरणासाधकत्वात् । Ṭi

2. तत्र त्वद्वाक्यस्यास्ति कश्चिदर्थ इति जानामि आप्तवाक्यत्वात् विशेषं तु न जानामि इति व्यवहारदर्शनादवगतो यस्तद्वाक्यार्थत्वलक्षणः सामान्याकारः स एव विशेषावरकाज्ञानस्य विषयतया प्रकाशते । तथाच त्वदुक्तमर्थं न जानामीत्यनुभवे ज्ञानविशेषणतया प्रकाशमानसामान्याकारस्यावरणविषयत्वाभावादावरणविषयस्य विशेषस्य प्रकाशमानत्वाभावात् प्रकाशमानस्यावृतत्वे नायमनुभवः प्रमाणमिति दूते 'न च तत्र' इति । Ṭi.

it would follow that my consciousness of my ignorance expressed in 'I do not perceive fire,' would imply m consciousness of my ignorance of smoke (whereas, inference, I pass from the perceived smoke, vyāpya, to knowledge of the unperceived fire, vyāpaka). Hence when Nescience *as concealing a certain thing* is present to our consciousness, then that thing is indeed a 'concealed' thing; and thus it is logically consistent to hold that a thing, even while present to consciousness, can be an object for Nescience (to conceal). And just as Nescience conceals Intelligence (Brahman) without affecting the Witness, so it also conceals Bliss without touching that Bliss which consists in the vṛttis of pleasure. And this is what is meant by the overcoming of the Nescience which conceals Bliss in the form of sense-objects (cf. pp. 77, 85.) This 'overcoming' is present in different degrees as depending on the character of the vṛttis; and this character, again, is due to the special character of the causes, *viz.* the various forms which Bliss has taken in sense-objects. Just as the dark shades of things seen in the grey dawn are overcome by the different degrees of light. Thus, conclude these writers, the difference between Absolute Bliss and that Bliss which sense-objects are, and also the varieties of the latter form of Bliss have been satisfactorily accounted for.*

The point common to the views thus discussed is that the Principle of Intelligence as the Witness illumines

* तथा च विद्यया आवरणनिवृत्तौ सत्यां प्रकाशमानानन्दः स्वरूपानन्द आवरणानिवृत्तिदशायां वृत्तिसम्बन्धात्प्रकाशमानानन्दो विषयानन्द इति स्वरूपानन्दविषयानन्दयोर्भेदो ज्ञातव्यस्तथा वृत्तिभेदाभ्युपगमाद्विषयानन्दानां परस्परभेदसिद्धिश्चावकल्प्यत इत्यर्थः । Ṭi.

the Inner Organ (अहङ्कार) and its attributes, but does not need the mediation of any vṛtti to overcome concealing Nescience,[1] since under no circumstances is the Witness concealed by Nescience.

A general objection is now stated: If it be held that no vṛtti is needed by the Witness (एवम्), then it becomes impossible to explain how a reproduction in the form of memory (अनुसन्धान) can take place in regard to the Inner Organ and its attributes; for while presentation continues (ज्ञाने सति) the mental retentum (संस्कार), i. e. a subtile form of the presentation, could not arise, because it could not be produced by the Witness, which is an eternal presentative consciousness.

Some writers reply to this as follows:—The Inner Organ, while it is ever illumined by the Witness which is in contact with it, is also illumined by that other form of the Witness which is present to the Inner Organ when the latter has become a vṛtti and has taken the form of an external object: now since this other form of the Witness (तस्य) is not an eternal presentation (but a temporary product, janya), it can produce a mental retentum of the Inner Organ and its attributes, just as it produces a retentum of external objects. Nor, say these writers, is there a restrictive rule to the effect that only the Witness present to a vṛtti of the given object can give rise to a mental retentum of that object; for if such a rule were admitted, then a representation in the form of memory (स्मरण) of a given vṛtti could not arise because a mental retentum of that vṛtti would be impossible—to provide for the possibility of the retentum,

1. This common point is technically stated as केवलसाक्षिभास्यत्वमहङ्कारादीनाम् । Cf. p. 75 n.

en vṛtti would have to b
lead to an infinite reg
the view ... presentation needs a second to
known (अनुव्यवसाय) must be rejected and along
t the view that a vṛtti needs a second vṛtti. On
contrary, the only restrictive rule is to this effect:—
mental retentum is produced by means of a vṛtti of
those objects which are illumined by the Intelligence
derlying that vṛtti. And in accordance with this rule,
e production of a mental retentum of the various at-
butes of the Inner Organ, viz. cognition, pleasure,
in, &c. may justly be accounted for:—each of these at-
ributes is illumined by that Intelligence which as underlying each of them may be regarded as the non-eternal Witness of each; just as each spark flying out of a red-hot mass of iron is illumined by the fire present in each spark.

Page 37.

Then as to the view of the Kūṭasthadīpa chapter of the Pañcadaçī which regards cognition as a predicate of the cognised object (i. e. as a result produced in the cognised object) and illumined by Brahman underlying that object:—thus verse 4—" Intelligence reflected in the vṛtti, which has taken the form of an external object, can illumine only that object. Brahman, Absolute Intelligence, illumines the object *as a cognised object*";[1]—and also as regards the view of the Tattvapradīpikā that Cognition, Desire and the other attributes of the Inner Organ are illumined by absolute Intelligence as the eternal Witness, the view of both these

1. ज्ञातता नाम ज्ञानविषयत्वं विषयतासम्बन्धेन विषयनिष्टं ज्ञानमित्यर्थः। तच्च ज्ञानं विषयस्य विशेषणं ज्ञातो घट इत्यनुभवादिति भावः। Ṭī:

...ust be held to be that th... ...ation with the vṛtti; for ...mediate presentative consciousn... ...at thing is in relation with it; and as defined by its rela... these things this Intelligence is regarded as a non-e... entity; and hence there is no logical difficulty in accoun... for the production of a mental retentum of these thing...

Other writers explain how a mental retentum of ... consciousness expressed by I arises, by premising that vṛtti of Nescience in the form of the I exists, as indeed vṛtti of Nescience in the form of pleasure &c.[1] has to ... assumed as existing, during dreamless sleep, in order ... account for that recollection of pleasure &c. which accrues to the man on his awaking from dreamless sleep.[2] Nor if this view be accepted (sc. that recollection is brought about by the vṛttis of Nescience in the form of the *I*) is it logically impossible to explain how a recollection of the *I* is produced—even though the *I* was presented along with a continuous presentation of some other object, as when a man expresses his consciousness in the words—'*I* continued to see this object through this length of time'—. Just as pleasure and pain may occur simultaneously as being determined by different parts of the physical body; so two vṛttis may occur together without either overthrowing the other: hence it is possible for a continuous series of vṛttis of Nescience to exist in the form of the *I*, even along with a continuous presentation of some other object.

1. उत्थितस्य अविद्याद्यनुसन्धानसिद्धये सुषुप्तौ कल्पितामविद्यादिगोचरामविद्यावृत्तिमिव अहमाकारामविद्यावृत्तिमङ्गीकृत्य इति वाक्यं योजनीयम्। यथाश्रुते सुषुप्तौ यदविद्याद्यनुसन्धानं तत्सिद्धये इति भ्रान्तिः स्यात्। सन्निधानात् तथासुषुप्तौ कल्पितायाः एवाविद्यावृत्तेरहमाकारत्वमङ्गीकृतम् इति भ्रान्तिः स्यादिति बोध्यम्। Ṭi.

2. अविद्यादि इत्यादिपदं सुखसुषुप्त्योः संग्रहार्थम्। Ṭi.

॥ श्रीः ॥

न्यायसिद्धाञ्जनम् ।

भगवद्बोधायनमतानुवर्तिनां श्रीसंप्रदायानुयायिनामभिमतपदार्थनिरूपणपरं प्रकरणम् ।

श्रीदेवेदान्ताचार्यापराभिधेन कवितार्किककेसरिणा सर्वतन्त्रस्वतन्त्रधिषणेन श्रीदेवेङ्कटनाथदेशिकेन प्रणीतम् ।

सत्संप्रदायाचार्येण सर्वतन्त्रस्वतन्त्रपं. स्वामिश्रीराममिश्रशास्त्रिणा पूर्वाचार्यपरिचर्यायै परिशोधितम् ।

NYĀYASIDDHĀNJANAM

BY

VENKAṬANĀTHA DEŚIKA.

EDITED BY

S. S. A. S. T. S. P. S. M. M. RÁMA MISRA SÁSTRI,

PROFESSOR, SANSKRIT COLLEGE, BENARES.

काश्याम् ।

मेडिकल् हाल् नामकमुद्रालये मुद्रयित्वा प्रकाशितम् ।

१९५८ वैक्रमाब्दे । १९०१ ईस्वी ।

—No. 12, Vol. XXIII.—December, 1901.

७६५

॥ श्रीः ॥


श्रियै नमः ।

श्रीपतये नमः ।

श्रीमते रामानुजाय नमः ।

नमोनमो यामुनाय यामुनाय नमोनमः ।

नमोनमो यामुनाय यामुनाय नमोनमः ।



यस्मिंश्चिरन्तनगिरामिह तत्परत्व-
तत्तत्प्रलम्भनविमूर्छितशोकहानम् ।
आयत्तमस्ति भववारिधिपोतपादो
रामानुजार्यमुनिरेष जयत्यजस्रम् ॥

॥ श्रीः ॥

श्रियै नमः ।

श्रीधराय नमः ।

श्रीमते रामानुजाय नमः ।

भूमिका ।

अद्यत्वेऽपि सन्ति निखिललोकविश्रुतयशसः सर्वविद्यापारदृश्वानस्त्रयीत्राणकृतपरिकराः कवितार्किककेसरिणः श्रीभाष्यकारसत्संप्रदायमहाध्वजे पट्टपटायितातिप्रौढप्रकटपाण्डित्या दण्डायमानदीर्घकीर्त्तयश्च प्रणीताऽष्टोत्तरशतमहानिबन्धा गद्यपद्यप्रणयनाद्याचार्याः, यदुपज्ञं यदुपक्रमं वा दार्शनिकदीक्षाशिक्षाः प्रथन्ते भारतावान्तरदेशेषु, तेऽमी प्रातःस्मरणीयसुनामानः श्रीमन्तो वेङ्कटनाथदेशिकाः, याञ्जगति गुरुनामाग्रहणस्मृतिस्मृत्या जनास्तद्विदोऽन्वर्थतया गुणग्राहितया च श्रीवेदान्ताचार्या इत्यभिदधाना गौरवेण नामाग्रहणेऽपि स्वीयां वाचं प्रायः पुनन्ति । तेषामेवैष बुद्धिवैभवविलसितस्पन्दायितो न्यायसिद्धाञ्जननामा संदर्भः । यं ते महर्षेर्बोधायनस्य सारस्वतमहोदधौ तत्रभवतां श्रीरामानुजभगवत्पादानां शिष्यसंप्रदायवाङ्मयमहोर्मिषु वा अञ्जसा प्रवेष्टुकामान् यथासुखं तत्र नेतुमररचन् ।

भवन्ति चात्र ग्रन्थे षट् प्रकरणानि जडद्रव्यपरिच्छेदः, जीवपरिच्छेदः, ईश्वरपरिच्छेदः, नित्यविभूतिपरिच्छेदः, बुद्धिपरिच्छेदः, षष्ठश्चाद्रव्यपरिच्छेदः अत्र परिच्छेदे सामान्यचिन्तनान्तो ग्रन्थो वर्तते अत्रैव च ग्रन्थावसानं जातं तदनन्तरं कोशे न मिलति दक्षिणप्रदेशेष्वपि

न मिलति यत्रैतद्ग्रन्थस्य प्राचुर्येण प्राप्तिः संभाविता । अत एव तद्देशीयपुस्तकेषु ।

न क्वाप्यतः परमदृश्यत कोषशेष-
स्तच्छेषपूरणकृतिः परिहासहेतुः ।
ज्ञातव्यमन्यदपि तैर्निरणायि सम्यग्-
ग्रन्थान्तरेष्विति न किंचिदिहास्ति चिन्त्यम् ॥

इत्यन्ते लिखितमस्ति । अस्ति चैष ग्रन्थितुः प्रमेयनिरूपणप्रचुरो ग्रन्थो यथा तेषामेव प्रमाणनिरूपणप्रचुरो न्यायपरिशुद्धिसंदर्भः परपराकरणप्रचुरश्च तत्त्वमुक्ताकलापसत्संदर्भः । यथोक्तं तैरिहैव ग्रन्थे आदौ ।

यन्न्यायपरिशुद्ध्यन्ते संग्रहेण प्रदर्शितम् ।
पुनस्तद्विस्तरेणात्र प्रमेयमभिदध्महे ॥ इति,

ततश्च प्रमेयनिरूपणप्रचुरेऽस्मिन् ग्रन्थे सामान्यचिन्तनग्रन्थोऽपि चेद्विकलस्तर्हि षष्ठपरिच्छेदे अर्द्धाधिको ग्रन्थोऽग्रेतनो न मिलतीत्यनुमिमीमहे ।

अस्तु किमप्येतत्तथाऽपि प्रेक्षावतां प्राचीनाचार्यसंदर्भेषु निगूढतत्त्वमनुसंधित्सतां सतां सर्वथाऽयं ग्रन्थो भवत्युपादेयः, न हि भोगभाजः खण्डेऽप्यवर्तुलेऽपि च खण्डलड्डुके उपेक्षावन्तः । अस्माभिः पूर्वंमुद्रितेषु लेखप्रसादेनाठिनेष्वपि महाकरग्रन्थेषु अतिगभीरयुक्तिगर्भतया गोष्व्याघ्रभूतेषु जनानां निरपायसंश्रयदानार्थमयमुपक्रमोदीयः । पूर्वं हि भारते वर्षे हेत्वाभासमहोदधिमन्थनमरायमाणमतयो, विविधोपाधिलक्षणातिविशदगहनह्रदावगाहनातिप्रथितवक्रनक्रा वाग्गुम्फिशक्रा निग्रहसमुद्भावनाकुण्ठकण्ठीरवरवाः प्रतिवादिभैरवा व्युत्पमहासंपद्वशीकृतसर्वार्थरहस्या युक्ता इव योगिनोऽचिन्ति

तोपस्थितसर्वार्था अभूवन्नभङ्गुरगुणगणा गणेयतमा वेङ्कटनाथसदृशा द्वित्रा अपि अबाधितव्युत्पत्तिभाजो विद्वांस इति तेषां श्रीभाष्यादिप्रमेयप्रचुरग्रन्थेष्वभग्नाऽभवद् व्युत्पत्तिः। अधुनातनास्तु प्रायः पूर्वोक्तसाधनोदासीना इत्यक्षरार्थज्ञानमात्रतृप्ता वाक्यार्थज्ञाने मनोऽनुनयनमप्यनर्पयन्तो यथाकथंचिदेव तृप्यन्तीति मा स्म ते विस्मरन्नाकरग्रन्थकाठिन्यं तत एव चोपाददीरन्नन्ततः प्रकरणग्र... हाय्यं यतो न भवेदर्थावबोधवैधुर्यं न चान्यथाऽर्थाख्यातिरिति दूरदेशेभ्यः साम्प्रदायिकप्रकरणानि यथासमयं संग्राहंसंग्राहं विस्तृणीमहे, आशास्महे चैतद्देशीयानां न्यायसिद्धाञ्जनादिप्रकरणसाहाय्येन श्रीभाष्यादिसुगहनगभीरार्थगर्भग्रन्थेष्वचलां सुदृढां च व्युत्पत्तिम् ॥

कमिव चोपमिनुयामिममकारणसहजसुहृदं विद्याविवर्द्धनं साम्प्रदायिकरत्नं मथुरास्थश्रीरामानुजपाठशालालङ्करणभूतं लक्ष्मणाचार्यं यो ऽप्रार्थितानिङ्गितावबुद्धानस्मदर्थान् भृशं पूरयितुमनाः स्वहस्तेनावदधानस्तैलङ्गाक्षरकोशान्न्यायसिद्धाञ्जनपुस्तकं देवाक्षरेष्ववतार्य्य विशोध्य यत्नसिद्धसुयशोमात्रभाजनं मां व्यधत्त। तदेष एवैतस्य सकार्यस्याविकलं यशो लप्सीष्ट, वरिषीष्ट चैनमेवैवंविधशुभकर्मानुष्ठानजाऽदृष्टश्रीर्दासीष्ट चैकतममपि स एव ऽभिमतं पुण्यस्यांशं स्वीयशयेन मह्यमपीति सस्पृहमीहे ॥

अस्मि च विशेषतः कृतज्ञोऽधुना देवैः सहासीनस्य ...गीकपण्डितप्रियस्य दीनेषु पुरस्कृतदयस्य विविधविद्या...कायाः वाराणस्या वररत्नस्य, सुख्यातेडीक्टरलाज़रस*...शयस्य येन स्वीयं लाभमप्यनभ्यर्थ्य आर्थिकी क्षति-

* E. J. Lazarus & Co of Benares.

मप्यक्षुण्णमनसा ऽविगणय्य आपवर्गिकातिचिरप्रख्याता-र्चिरादिमार्गस्य अवातभीता अतैलस्नेहपूराः सततमुज्ज्व-लन्तो विद्यासामर्थ्यानुनीतदिव्यपुरुषानुमोदिता ब्रह्मवि-द्यावर्त्तिकाः सत्पात्रलब्धपदा धन्याध्वनीनानां वाह्याभ्य-न्तरध्वान्तध्वंसना एतावन्तः श्रीसाम्प्रदायिका ग्रन्थाः प्रकाशमुपयापिताः ।

आशासे च स संयुत्तीष्ट सुमनोभिः सुजनैः स्पर्द्धि-षीष्ट चासनार्द्धलब्धये सुत्राम्णाऽपि, वर्द्धिषीष्टालौकिकै-र्भोगैः, विपत्सीष्ट क्लेशकलिलैर्निवर्तिषीष्ट सांसारिकाधि-जालैः, किं बहुना नावर्तिषीष्ट सोऽस्माल्लोकादमुं लोकं क्लेशकषायबहुलमित्यभ्यर्थये भगवन्तं सर्वकामफलप्रदं सुरासुरगुरुं सर्वसमाराध्यं देवतासार्वभौममनादिनिधनं नारायणं देवम् ॥

इति, काश्यामगस्त्यमुन्याश्रमाश्रमः,

स्वामिश्रीराममिश्रशास्त्री,

श्रावणशुक्लप्रतिपदि गुरौ । सं. १६५८

श्रीः

श्रियै नमः

श्रीधराय नमः

॥ श्रीमते रामानुजाय नमः ॥

न्यायसिद्धाञ्जनशुद्धिपत्रम् ।

अशुद्धम्	शुद्धम्	पृ	पं
क्षयोऽपि	क्षयोऽपि	५ ।	५
श्रीविष्ण	श्रीविष्णु	१६ ।	६
चक्षषः	चक्षुषः	२० ।	६
भिचक्ष	भिक्षाव	२८ ।	६
सवरूप	सर्वरूप	२६ ।	४
सिद्धापा	सिद्धोपा	३० ।	७
पञ्चभैा	पाञ्चभैा	३० ।	६
निर्वृत्तरपि	निर्वृत्तेरपि	३० ।	५
दिवाभा	दिवाभौ	३० ।	६
मायास्तत्त्व	मायातस्तत्त्व	३८ ।	११
नाताव	नातीव	३८ ।	१
ब्रह्माण	ब्रह्माणं	४४ ।	२
स्वभाव	स्वभावं	४६ ।	१
पूर्वभा	पूर्वं भा	५० ।	६
धृष्टव	धृष्टवु	५५ ।	५
एव	अतएव	६७ ।	१०
प्रायश्चितन वा	प्रायश्चित्तेन वा	७४ ।	८
चाहत्सु	चाहेत्सु	८० ।	१०
सिद्ध्यारिष्ट	सिद्ध्योरिष्ट	८६ ।	१२
युक्तति	युक्तेति	८६ ।	१३
सर्वध्यासा	सर्वाध्यासा	६७ ।	४
सिद्धः	सिद्धेः	१०१ ।	८
प्रतिपान	प्रतिपादन	१०४ ।	८

निर्गतः पाठः

दवस्थाश्रय उपादानम् आगन्तुकोऽपृथक्सिद्धोधर्मोऽवस्था विशेषतस्तूत्तरोत्तरावस्थाविशिष्टस्वरूपापेक्षया तदनुगुणनियतपूर्वभाव्यवस्थाविशिष्ट तदेव वस्तूपादानं यथा घटत्वावस्थाविशिष्टमद्द्रव्यापेक्षया पिण्डत्वावस्थाविशिष्टं तदेव द्रव्यं तदनुगुणशब्देन प्रतिसर्गावस्थाव्यवच्छेदः परिणामिन्मुख्यातिरिक्तेनाकारेणापेक्षितं कारणं निमित्तम् ।

१०४ पत्रे अन्तिमपंक्तौ अन्तिमाक्षरानन्तरम् ।

अशुद्धम्	शुद्धम्	पृ०	पं०
असमवायात्य	असमवायीत्य	१०५ ।	१
जागरदि	जागरादि	१२२ ।	८
सर्वदेस	सर्वदेश	१२४ ।	१
सुषप्त्या	सुषुप्त्या	१२८ ।	२
मानेवृत्ति	मनोवृत्ति	१२८ ।	१२
ज्ञातर्वि	ज्ञातुर्वि	१२८ ।	२
व्यनो	व्यानो	१२६ ।	३
न्यायमसप्त	न्यायमन्यत्सप्त	१२६ ।	४
दुःखज्ञा	दुःखाज्ञा	१२६ ।	१
गुणा वा	गुणं वा	१३२ ।	४
त्वमेव	त्वामेव	१४० ।	६
भट्टपभा	भट्टप्रभा	१४० ।	१३

शुद्धिपत्रम् ।

अशुद्धम्	शुद्धम्	पृ.	पं.
धर्म्यति	धर्म्यंति	१४१	१
व्यवाहा	व्यवहा	१४४	७
शातव	शीतव	१५६	६
निबन्धनः न तद	निबन्धनः तद	१५९	१३
एवप्र	एवंप्र	१६८	१
केवलविरुद्धदि-गिन्तांशेभ्यः	केवलविरुद्धदि-गन्तांशेभ्यः		
कोणवि	कोणविरुद्ध-दिगन्तांशेभ्यः कोणवि	१७२	१०

इतः परमस्मिन् देशे दक्षिणप्रदेशेषु चावशिष्टोग्रन्थो न मिलति शम् ।

॥ श्रीः ॥ ॥ श्रीः ॥ ॥ श्रीः ॥ ॥ श्रीः ॥ ॥ श्रीः ॥

द्रूयासुर्भावुकाय भगवन्तो भगवतोऽन्तरङ्गपारिषद्याः पूर्वाचार्या जनस्यास्या-
सहायस्य साहसिकेष्वन्यतमस्य सर्वथाऽतिक्रान्तसत्पथस्य तथाऽपि
मोक्षमाकाङ्क्षतोहसतीयेषु कनिष्ठिकाधिष्ठितस्य ॥

श्रीः

श्रियै नमः

श्रीधराय नमः

॥ श्रीमते रामानुजाय नमः ॥

न्यायसिद्धाञ्जनविषयसूचीपत्त्रम् ।

द्वितीये जीवपरिच्छेदे ।

हकारः प्रथमं कर्त्तव्यत्वेन प्राप्तमपि कटाहं बहुकालसाध्यत्वात्परित्यज्य पश्चात्कर्त्तव्यतया प्राप्तामपि स्वल्पकालसाध्यां सूचीं पूर्वमुत्पादयति तथा प्रकृते ऽपि १० । १९ ॥

उद्देश्यविधेयार्थानां संख्यासाम्ये यथाक्रमं संबन्ध इति विवक्षायां यथासंख्यन्यायो यथासंख्यमनुदेशः समानामिति पाणिनिसूत्रसिद्धः प्रयुज्यते । यथा टाङसिङसामिनात्स्या इत्यादिषु पाणिनीयेषु सूत्रेषु टाङसिङसादीनुद्दिश्येनात्स्यप्रभृतयो विधीयन्ते ते च यथाक्रमं प्रथमः प्रथमेन द्वितीयो द्वितीयेनेत्यन्वयं प्राप्नुवन्ति तथा द्वे वाव ब्रह्मणो रूपे मूर्त्तं चामूर्त्तं चेत्युद्दिश्य विधीयते अथात आदेशो नेति नेतीति । तत्र हि क्रमेण मूर्त्तयोर्निषेधद्वयमन्वेति । अन्यथोभयत्र निषेधद्वयान्वये मूर्त्तामूर्त्तयोरनिषेधप्रसङ्गेन द्वैतापत्तिः स्यात् ब्रह्मण्यपि वा निषेधान्वये शून्यवादप्रसङ्गः । अयं च न्यायः उद्देश्यविधेयहीनेष्वपि समसंख्येषु क चित्प्रवर्त्तते । यथा भोज्यान्नाऽसने दोषवन्तःसमासमाभ्यां विषमसमे पूजात इति स्मृतौ । न ह्यत्रोदेश्यविधेयभावो ऽस्ति विद्यते च यथासंख्यमन्वयः एवं पृथिव्यम्भसोर्गन्धरसावित्यादावपि बोध्यम् ११ । २० ॥

सर्वसाधारण्येन प्राप्तो ऽर्थ उच्यमानो यत्र स्वेन सह प्राप्तेतरपरिसंख्यायां पर्यवस्यति तत्राऽभक्षन्यायावतारः । यथा ऽभक्षो ऽयं द्विज इत्युक्तिरभक्षणस्यान्नादिभक्षेष्वपि सत्त्वादस्मिंस्तदितरभक्षणनिषेधे पर्यवस्यति १२ । २१ ॥

वायुभक्षन्या० १३ । २२ ॥

कुम्भीधान्यन्यायश्चापीदृशः । यथा कुम्भीधान्याय विप्रायेयं धेनुर्देयेत्यत्र विशेषणसाफल्याय कुम्भ्यां धान्यं यस्येति विगृह्यते । तथा तं त्वौपनिषदं पुरुषं पृच्छामीत्यत्रौ-

पनिषदमिति उपनिषन्मात्रगम्यमिति विगृह्यताम् । अन्यथा विपुलधान्यराशिमतामपि सर्वेषां विप्राणां कुम्भ्यां धान्यसंभवेन कुम्भीधान्यायेति विशेषणवैयर्थ्यवज्जीवतदुपाध्यादेरप्यौपनिषदबोधविषयत्वसंभवेन विशेषणवैयर्थ्यापातात् । एवं चोदनालक्षणो ऽर्थो धर्म इत्यादावपि बोध्यम् १४ । २३ ॥

यत्र सामान्यवाचकं पदं स्वयुक्तविशेषवाचकपदबलात्तदर्थान्यविशेषपरतया नीयते तत्र ब्राह्मणपरिव्राजकन्यायः यथा ब्राह्मणा भोज्यन्तां परिव्राजकाश्चेत्यत्र परिव्राजकानामपि ब्राह्मणत्वाद्ब्राह्मणपदं परिव्राजकेतरपरम् । तथा एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेति श्रुतावन्तरिन्द्रियस्य मनसः समभिव्याहारात्सर्वेन्द्रियाणीति पदं तदन्यसर्वेन्द्रियपरम् । इदमुदाहरणं मनइन्द्रियत्ववादिमते । मतान्तरे तु तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायतइत्यादि बोध्यम् १५ । २४ ॥

ब्राह्मणवसिष्ठन्यायो ऽपीह बोध्यः । ब्राह्मणा आयाता वसिष्ठो ऽप्यायात इत्यत्रापि सामान्यपदस्य विशेषपदसमवधानात्तदितरविशेषपरत्वात् १६ । २५ ॥

गोबलीवर्दन्यायो ऽपीदृशः । एतावांस्तु विशेषः यत्र विशेषेणोपात्तस्य प्राशस्त्यमभिप्रेतं तत्र पूर्वन्यायद्वयप्रवृत्तिः यत्र तन्नास्ति तत्रैतस्य प्रसिद्ध्यप्रसिद्धिनिबन्धनश्चायं गोपदस्य हि स्त्रीव्यक्तौ प्रसिद्धिर्न पुंव्यक्तौ । अत एव गामानय बलीवर्दं चेति प्रयुज्यते । उदाहरणं तु देवा मनुष्याः पशवो वयांसि सिद्धाः सयक्षोरगदैत्यसंघाः । प्रेताः पिशाचास्तरवः समस्ता ये चान्नमिच्छन्ति मया प्रदत्तमित्यादि । अत्र हि विद्याधराप्सरोयक्षरक्षोगन्धर्वकिंनराः । पिशाचो गुह्यकः सिद्धो भूतो ऽमी देवयोनय

इत्यभिधानात्सिद्धादीनामपि देवत्वेन देवपदस्य सिद्धादीतरदेवपरत्वं विद्यते। न चेन्द्राद्यपेक्षया तेषां प्राशस्त्यमस्ति न च देवपदस्य पिशाचादौ प्रसिद्धरस्तीति सर्वमनवद्यम्। १७। २६।

विशिष्टवाचकानामपि पदानां सति पृथग्विशेषणवाचकपदसमवधाने विशेष्यमात्रपरतायां करिबृंहितन्यायः। बृंहितं करिगर्जितमिति कोशाद्विशिष्टवाचकस्य बृंहितपदस्य तत्र स द्विरदबृंहितशङ्कीत्यादौ विशेषणवाचिद्विरदपदसमवधानाद्यथा गर्जितरूपविशेष्यमात्रपरत्वं तथा स्वप्ने स जीवः सुखदुःखभोक्तेति श्रुतौ सुखदुःखसाक्षात्कारकर्तृत्वस्य भोक्तृत्वाद्विशिष्टवाचकस्यापि भोक्तृपदस्य सुखदुःखशब्दसमभिव्याहारात्साक्षात्कर्तृरूपविशेष्यमात्रपरत्वमिति १८। २७।

एतेन न्यायषट्कं व्याख्यातं बोध्यम्। गजघटान्या० १९। २८।

नीलेन्दीवरन्या० २०। २९।

पर्वताधित्यकान्यायः २१। ३०।

पर्वतोपत्यकान्यायः २२। ३१।

वाजिमन्दुरान्यायः। २३। ३२।

मृगवागुरान्यायश्च। करिणां घटना घटा इन्दीवरं नीलेऽस्मिन्। उपत्यकाद्रेरासन्ना भूः तस्योर्द्ध्वमधित्यका वाजिशाला तु मन्दुरा। वागुरा मृगबन्धनीति कोशाद्विशिष्टवाचकानामपि घटादिपदानां नैवान्यत्र मदान्धसिन्धुरघटा नीलेन्दीवरलोचनः अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लमित्यादौ विशेषणपदसमभिव्याहाराद्विशेष्यमात्रपरत्वादिति। २४। ३३।

यत्र विशेषशास्त्रोद्देश्यविशेषधर्मावच्छिन्नवृत्तिसामान्यधर्मावच्छिन्नोद्देश्यकशास्त्रस्य विशेषशास्त्रेण बाधस्तत्र येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवतीति न्यायो ऽवतरति। प्राप्तइति भावे क्तः। येन नाप्राप्तइत्यस्य यत्कर्तृकावश्यप्राप्तावित्यर्थः नञ्द्वयस्य प्रकृतयर्थदार्ढ्यबोधकत्वात्। सामान्यशास्त्राप्राप्तियोग्ये ऽचारितार्थ्यं हि विशेषशास्त्रस्य बाधकत्वे बीजम्। ब्राह्मणा भोज्यन्तां माठरकौण्डिन्यौ परिवेविष्टामित्यत्र यथा भोजनकर्तृकावश्यप्राप्तौ परिवेषणविधेरारब्धत्वात्तेन सामान्यशास्त्राप्राप्तियोग्ये शूद्रादावचरितार्थेन विशेषविधिना स्वोद्देश्यमाठरत्वादिविशेधर्म्मावच्छिन्नवृत्तिब्राह्मणत्वलक्षणसामान्यधर्मावच्छिन्नोद्देश्यकस्य ब्राह्मणा भोज्यन्तामिति शास्त्रस्य बाधः। तथा न हिंस्यात्सर्वा भूतानीति हिंसानिषेधकर्तृकावश्यप्राप्तावग्नीषोमीयं पशुमालभेतेत्याद्याग्नीषोमीयादिपश्वालम्भनविधेरारब्धत्वात्तेन सामान्यशास्त्राप्राप्तियोग्ये पुरोडाशादावचरितार्थेन विशेषविधिना स्वोद्देश्याग्नीषोमीयत्वादिविशेषधर्मावच्छिन्नवृत्तिभूतत्वलक्षणसामान्यधर्मावच्छिन्नोद्देश्यकस्य न हिंस्यादिति शास्त्रस्य बाधः। एवं वाजपेये सुराग्रहादिष्वपि द्रष्टव्यम्। न सुरां पिबेदित्यादिनिषेधस्य विहितेतरविषयत्वात्। तथा वर्णिनां हि वधो यत्र तत्र साद्यनृतं वदेदित्यत्रापि ज्ञेयम्। न च तत्पावनाय निर्वाप्यश्चरुः सारस्वतो द्विजैरिति प्रायश्चित्तविधानात्तस्य निषिद्धत्वं निर्धार्यते इति शङ्क्यं निषिद्धत्वनिर्धारणात्प्रायश्चित्तित्वनिश्चये प्रायश्चित्तविधानाच्च निषद्धत्वनिर्धारणे ऽश्वभृत्यन्यायेनान्योन्याश्रयान्निषिद्धत्वानिर्णये प्रायश्चित्तानिर्णयात्। तद्विधानस्य त्वश्वग्रहेष्टिवद्विधानवन्नैमित्तकत्वेनाप्युपपत्तेरनृतजाघनाशा-

र्थत्वकल्पनायोगात्। विधित एव प्रवृत्त्युपगमेनात्र रागतोऽप्रवृत्तेरिति दिक्। इति येन नाप्राप्तिन्यायः। २५। ३४।

अत्र प्रासङ्गिकोऽश्वभृत्यन्यायः। यथा कस्यायमश्वो यस्याहं भृत्यः त्वं भृत्यः कस्य यस्यायमश्व इत्यत्र यथा न वस्तुनिर्णयस्तथा प्रकृतेऽपीत्यर्थः। १। ३५।

यत्रान्योन्याश्रयो न दोषाय यथा देहादृष्टादौ तत्र बीजवृक्षन्यायः। २। ३६।

अण्डकुक्कुटीन्यायश्च प्रवर्त्तते। अयं ह्युत्पत्तावन्योन्याश्रयः प्रवाहानादित्वान्न दोषावहः। ३। ३७।

यत्रोद्वाह्योद्वाहकभावे स न दोषस्तत्र नौनाविक-न्यायः। ४। ३८।

आत्माश्रयस्य दोषत्वविवक्षायां न हि सुशिक्षितोऽपि वटुः स्वस्कन्धमारोढुं पटुरिति न्यायः प्रवर्त्तते। ५। ३९।

कर्त्तारं विना करणस्य कार्याक्षमत्वविवक्षायां तु न हि सुतीक्ष्णा ऽप्यसिधारा स्वयं छेत्तुमाहितव्यापारेति न्यायः। इति येन नाप्राप्तिन्यायान्तर्गतास्तेन संगताश्च न्यायाः। ६। ४०।

तक्रकौण्डिन्यन्यायो ऽपि सामान्यशास्त्रप्राप्तस्य विशेषशास्त्रेण बाध एव प्रवर्त्तते। यथा ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेत्यत्र कौण्डिन्यस्यापि ब्राह्मणत्वात्सामान्यशास्त्रेणास्यापि दधिदानं प्राप्तं तच्च विशेष-विहितेन तक्रदानेनापोद्यते। एवमाहवनीये जुहोतीति सामान्यशास्त्रप्राप्तस्याहवनीयाधिकरणकहोमस्य पदे जुहोतीति विशेषविहितेन पदहोमेन बाधः। तथा यतो वा इमानि भूतानि जायन्ते इति श्रुत्या बोधितस्य भूतेषु साक्षाद्ब्रह्मकार्यत्वस्य तस्माद्वा एतस्मादात्मन आकाशः

संभूतः आकाशाद्वायुरित्यादिविशेषश्रुत्या बाधः । न चैकविज्ञानात्सर्वविज्ञानश्रुतिविरोधः व्योमादेर्ब्रह्मानन्यतया तद्भावापन्नब्रह्मजन्यत्वेन तद्विज्ञानाद्विज्ञानसंभवात् । न चैवमेतयोर्वाक्ययोर्नैतन्न्यायोदाहरणत्वम् । आकाशादिभावानापन्नब्रह्मकार्यत्वस्य सामान्यश्रुत्या बोधितस्य बाधान्न्यायसंगतेः । न चानयोर्न्याययोः साङ्कर्यं शङ्क्यम् । विरोधात्सामान्यशास्त्रस्य विशेषशास्त्रेण बाधे पूर्वन्यायस्य फलसाम्यात्तेन तस्य बाधे तूत्तरस्य प्रवृत्तेः समकालिकभोजनपरिवेषणयोर्हिंसातत्प्रतिषेधयोश्च विरोधः स्पष्टः । दधितक्रयोस्त्वोदनसेकरूपस्य तृप्तिरूपस्य वा फलस्य साम्यात् बाध्यबाधकता । दधिफलस्य तक्रेणैव जनितत्वाद् दध्नो निवृत्तिः । अत एव ब्राह्मणेभ्यो दधि दीयतां कम्बलः कौण्डिन्यायेत्यत्र न बाध्यबाधकभावः । एवं होमयोरपि क्रतूपकारलक्षणस्य फलस्यैक्याद् बाध्यबाधकतेति तक्रकौण्डिन्यन्यायः । २६ । ४१ ।

केचिन्न्याया व्याकरणमात्रगोचरास्तदुदाहरणस्यान्यशास्त्रे ऽनुपलम्भाद् व्याकरणोदाहरणस्य त्वत्रानुपयुक्तत्वात्तत्स्वरूपं बीजं च प्रदर्श्यते ।

पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते नोत्तरानिति न्यायः । अवश्यं स्वपरस्मिन् बाध्ये प्रथमोपस्थितानन्तरबाधेन चारितार्थ्ये पश्चादुपस्थितस्य ततः परस्य बाधे मानाभावः । आकाङ्क्षानिवृत्तेर्विप्रतिषेधशास्त्रबाधे मानाभावाच्चेत्येतस्य बीजम् । २७ । ४२ ।

मध्ये ऽपवादाः पूर्वान्विधीन्बाधन्ते नोत्तरानिति न्यायः । पूर्वोपस्थितबाधेन नैराकाङ्क्ष्यमस्य बीजम् । २८ । ४३ ।

पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गा इति न्यायः । लब्धैकचक्षुष्को ह्यपवादविषयं पर्यालोच्य तद्विषयत्वाभावनिश्चये उत्सर्गेण तत्तल्लक्ष्यं संस्करोति अन्यथा विकल्पापत्तेरित्यर्थः । अभिनिविशन्त इत्यस्य बुद्ध्यारूढा भवन्तीत्यर्थः । २९ । ४४ ।

प्रकल्प्यापवादविषयं तत उत्सर्गो ऽभिनिविशतइति न्यायः । तत इत्यस्यापवादशास्त्रपर्यालोचनात्प्रागपीत्यर्थः प्रकल्प्येत्यस्य परित्यज्येत्यर्थः । ततश्च लब्धैकचक्षुष्कस्तत्तच्छास्त्रपर्यालोचनं विना ऽप्यपवादविषयं परित्यज्योत्सर्गेण संस्करोतीति न्यायार्थः ।

ये त्वाहुर्येन नाप्राप्तन्याये प्रदर्शितविधिनिषेधवाक्ययोर्न सामान्यविशेषभावः न हि यथा होममात्राधिकरणतया प्राप्तस्याहवनीयस्य विशेषविहितेन पदहोमेन संकोचस्तथेह हिंसामात्रविषयतया निषेधः प्रवर्त्तते येन विशेषणसंकोचः स्यात्किं तु रागप्राप्तहिंसायामेव तावता ऽपि निषेधोपपत्तौ न क्रतुप्रकरणे ऽपि निषेधप्रवृत्तिः प्रमाणाभावात् प्रत्युत पदार्थाप्रवृत्तिस्तदर्थः प्रतिषेध इति न्यायेनानृतवदनादिनिषेधस्येवास्यापि क्रत्वर्थत्वं स्यात्तथा चानयोर्विधिनिषेधयोर्ग्रहणाग्रहणवद्विकल्पः स्यादित्यनर्थपरंपरापत्तिरिति तेषां तदप्यस्योदाहरणं बोध्यम् । ३० । ४५ ।

उपजनिष्यमाणनिमित्तो ऽप्यपवादः संजातनिमित्तमप्युत्सर्गं बाधतइति न्यायः । अस्य तु भवति शास्त्रे ऽप्युदाहरणम् । तथा हि । ज्योतिष्टोमे बहिष्पवमानाख्यस्तोत्रं कर्त्तुं क्रमेण पृष्ठतो हस्तेन संस्पृश्योपसर्पतामृत्विजां मध्ये उद्गातुरपच्छेदे यद्युद्गाता ऽपच्छिद्येतादक्षिणं

यज्ञमिष्ट्वा तेन पुनर्यजेतेति श्रुतिजन्या तन्निमित्ता प्रायश्चित्तकर्त्तव्यताबुद्धिः पश्चात्प्रतिहर्त्रपच्छेदे यदि प्रतिहर्त्ताऽपच्छिद्येत सर्ववेदसं दद्यादिति श्रुतिजन्यया प्रायश्चित्तान्तरकर्त्तव्यताधिया बाध्यते। अत्रोपजनिष्यमाणनिमित्तान्तरे क्रतौ पूर्वनिमित्तकप्रायश्चित्तस्याङ्गत्वादि प्रागेव बाध्यते अन्यथा ऽस्य निमित्तान्तररहितक्रतुवत्तदननुष्ठाने वैकल्यप्रसङ्गादुत्सर्गापवादत्वं चात्र बाध्यबाधकभावेनोपचारादिति संक्षेपः। ३१। ४६।

पूर्वात्परबलीयस्त्वन्यायः। ३२। ४७।

स्थावरजङ्गमविषन्यायश्चेह बोध्यः। रजतादिज्ञानतद्बाधज्ञानयोः सर्पवत्सनाभादिरूपजङ्गमस्थावरविषयोश्चोत्तरेण पूर्वबाधः प्रसिद्धो यथा तथा प्रकृते ऽपि। इयांस्तु विशेषः यत्पूर्वस्मिन्पूर्वोत्तरभावस्य नियतत्वाद्बाध्यबाधकभावो ऽपि नियतः। अतस्तत्र तादृशयोर्जगतः सत्यत्वमिथ्यात्वज्ञानयोरुदाहरणत्वं बोध्यम्। द्वितीये त्वनियतपूर्वापरभावप्रयुक्तबाध्यबाधकभावस्यानियतत्वात्तादृशयोरुद्गातृप्रतिहर्त्रपच्छेदयोरुदाहरणत्वमिति। ३३। ४८।

अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति न्यायः। अयमपि व्याकरणमात्रगोचरः। न हन्यादित्यादावव्यवधानेन नञर्थस्य धात्वर्थेनान्वयाद्यजेन्न हन्यादित्यस्योदाहरणमिति चेन्नाव्यवधाने ऽपि धात्वर्थस्य प्रत्ययार्थोपसंर्जनत्वेनोपस्थितस्य नञर्थेनान्वयानुपपत्तेः। एवं चाव्यवधाने ऽपि नञर्थो न धात्वर्थेन संबध्यते किं तु प्रत्ययार्थेन तस्य प्राधान्यादिति दिक्। ३४। ४९।

एवमन्ये ऽप्यव्यविकादयो न्याया व्याकरणमात्रगोचराः सन्ति दिङ्मात्रमिह दर्शितम्।

कृदभिहितो भावो द्रव्यवत्प्रकाशते इति न्यायस्य तु प्रमाणप्रमेयेति गोतमीयसूत्रान्तर्गतमधिगम इति पदमुदाहरणं बोध्यम् । तथा च तत्त्वज्ञानान्निःश्रेयसाधिगम इत्यस्याधिगम्यमानं निःश्रेयसं तत्त्वज्ञानाद्भवतीत्यर्थः । अन्यथा ज्ञानस्य मोक्षं प्रत्यहेतुत्वापत्तेरिति । ३५ । ५० ।

तक्रकौण्डिन्यन्याये प्रदर्शितायास्तस्माद्वा एतस्मादात्मन इति श्रुतेर्वीचीतरङ्गन्यायोदाहरणत्वमपि बोध्यम् । तथा हि । वीचीतरङ्गशब्दौ हि पर्यायौ । भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिरिति कोशात् । एवं च यथा वाय्वादिसंयुक्ताद् ह्रदाद्वीचिर्जायते तद्भावापन्नाच्च तस्मात्तरङ्गान्तरं तद्भावापन्नाच्च तस्मात्तरङ्गान्तरम् । तथा मायोपहिताद्ब्रह्मणः खमुत्पद्यते तद्भावापन्नाच्च तस्माद्वायुरित्यादि । तार्किकास्तु शब्दोत्पत्तावेतमवतारयन्ति भेरीदेशे जातः शब्दो वीचीतरङ्गन्यायेन स्वसंनिहितं शब्दान्तरमारभते स च शब्दः शब्दान्तरमिति क्रमेण श्रोत्रदेशे जातः शब्दः श्रोत्रेण गृह्यतइति । ३६ । ५१ ।

तदेकदेशिनस्तु कदम्बमुकुलन्यायमिहावतारयन्ति । यथा हि कदम्बमुकुलात्कालविशेषनिमित्तेन सर्वासु दिक्षु युगपद्बहूनि केसराण्युत्पद्यन्ते तथा भेर्यादिदण्डसंयोगेन वंशादिदलद्वयविभागेन वा निमित्तेन भेर्यादिदेशावच्छिन्नआकाशे दशसु दिक्षु दश शब्दा जायन्ते एतावन्मात्र एष दृष्टान्तः । अग्रे तु पूर्वोक्तप्रकारेण स्वसंनिहितानन्यशब्दानारभन्तइत्यादि ज्ञेयम् । ३७ । ५२ ।

अन्योन्यनाश्यनाशकभावविवक्षायां सुन्दोपसुन्दन्यायः । यथा हि सुन्दोपसुन्दसंज्ञौ सहोदरावसुरौ तिलोत्तमार्थं परस्परं वध्यघातकभावेनोभावपि नष्टाविति भा-

रते प्रसिद्धम्। तथा वीचीतरङ्गन्यायेनोत्पन्नानां कार्यशब्दनाश्यानामन्त्योपान्त्यशब्दौ परस्परेण नाश्यावन्त्यउपान्त्येनोपान्त्यश्चान्त्येनेति केचित्ताकिकाः। तदयुक्तमित्यपरे उपान्त्येन द्विक्षणावस्थायिनान्त्यस्य द्वितीयक्षणवृत्तिध्वंसप्रतियोगिना तृतीयक्षणउत्पद्यमानान्त्यध्वंसजननायोगात् तस्मादुपान्त्यनाश इति। किं तर्ह्येतन्न्यायोदाहरणमिति चेत्सत्प्रतिपक्षावित्यवेहि तौ हि परस्परानुमितिप्रतिबन्धकत्वेनानुमितिकरणत्वरूपानुमानत्वनिरासकौ भवतः। इदमेव तयोरितरेतरनाशकत्वं नामेति। ३८। ५३।

अयं तुल्यबलयोर्विरोधे प्रसरति प्रबलनिर्बलविरोधे सबलेन निर्बलबाधविवक्षायां तु मात्स्यन्यायावतारः। अयं प्रायः इतिहासपुराणादिषु दृश्यते। यथा हि वासिष्ठे प्रह्लादाख्याने तत्समाधिं प्रस्तुत्योक्तम्। एतावता ऽथ कालेन तद्रसातलमण्डलम्। बभूवाराजकं तीक्ष्णं मात्स्यन्यायकदर्थितमिति। यथा प्रबला मत्स्या निर्बलांस्तान्नाशयन्ति तथा ऽराजके ऽमुकदेशे प्रबला जना निर्बलान्नाशयन्ति स्मेति न्यायार्थः। प्राग्दर्शित आगमेन प्रत्यक्षादिबाधो ऽप्यस्योदाहरणं बोध्यम्। प्रबलश्रुत्यादिप्रमाणैर्निर्बललिङ्गादिप्रमाणबाधे ऽप्ययं बोध्यः। तथा हि विधिविशेषस्य सहकारीणि षट् प्रमाणानि श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यारूपाणि। विध्यन्तरस्य च श्रुत्यर्थपाठस्थानमुख्यप्रवृत्त्याख्यानि। तेषु पूर्वपूर्वस्य प्रबलत्वेनानेन न्यायेनोत्तरोत्तरबाधकत्वमग्रे वक्ष्यामस्तावत्तदुपोद्धातत्वेन विधिभेदाः संक्षेपतो निरूप्यन्ते। अप्राप्तं फलवन्तं चार्थं यः स्वसामर्थ्येन प्रकाशयति स विधिरुत्पत्त्यादिभिर्धर्मैर्युक्तः सन्नुत्पत्तिविधिर्विनियोगविधिः प्रयोगविधिरधिकारविधिश्चेति चतुर्विधो भवति। तत्र कर्मस्वरूपमात्रबोधको

विधिः प्रथमः। यथा ऽग्निहोत्रं जुहोतीति। अङ्गसम्बन्धबोधको विधिर्विनियोगविधिः। यथा दध्ना जुहोतीति। स हि तृतीयया प्रतिपन्नाङ्गभावस्य दध्नो होमसंबन्धं विधत्ते दध्ना होमं भावयेदिति। दध्यादीनामङ्गत्वं नाम परोद्देशप्रवृत्तकृतिव्याप्यत्वं पारार्थ्यं तच्चानेन विधिना ज्ञाप्यते। प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः। स चाङ्गवाक्यैकवाक्यतामापन्नः प्रधानविधिरेव। स हि साङ्गं प्रधानमनुष्ठापयन्विलम्बे मानाभावादविलम्बापरपर्यायं प्रयोगप्राशुभावं विधत्ते। न च विलम्बवदविलम्बे ऽपि मानाभावः। विलम्बे ऽङ्गप्रधानविध्येकवाक्यतावगततत्साहित्यानुपपत्तेः। न हि विलम्बेन कृतयोः पदार्थयोः सह कृतमिति साहित्यं व्यवहरन्ति। स चाविलम्बो नियते क्रमे आश्रीयमाणे भवति। अन्यथा किमेतदनन्तरमेतत्कर्त्तव्यमेतदनन्तरं वेति प्रयोगविक्षेपापत्तेः अतः प्रयोगविधिरेव स्वविधेयप्रयोगप्राशुभावसिद्ध्यर्थं नियतं क्रममपि पदार्थविशेषणतया विधत्ते। तत्र क्रमो नाम विततिविशेषः पौर्वापर्यरूपो वेति। फलस्वाम्यबोधको विधिरधिकारविधिः। फलस्वाम्यं च कर्मजन्यफलभोक्तृत्वम्। स च यजेत स्वर्गकाम इत्येवंरूपः। अनेन हि स्वर्गमुद्दिश्य यागं विदधता स्वर्गकामस्य यागजन्यफलभोक्तृत्वं बोध्यते। तच्च स्वाम्यं तस्यैव यो ऽधिकारिविशेषणविशिष्टः। अधिकारिविशेषणं च तदेव यत्पुरुषविशेषणत्वेन श्रुतम्। अत एव राजा राजसूयेन स्वाराज्यकामो यजेतयनेन स्वाराज्यमुद्दिश्य राजसूयं विदधता ऽपि न स्वाराजकाममात्रस्य तत्फलभोक्तृत्वं बोध्यते किं तु राज्ञः सतस्तत्कामस्य। किं चित्तु पुरुषविशेषणत्वेनाश्रुतमप्यधिकारिविशेषणं भवति। यथा ऽध्ययनविधिसिद्धा विद्या अग्निसाध्येषु च कर्मस्वाधान-

सिद्धाग्निमत्ता । एवं सामर्थ्यस्याप्यधिकारिविशेषणत्वम् । आख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणीति न्यायात् । असमर्थं प्रति विध्यप्रवृत्तेश्च । एवमर्थित्वादेरपि बोध्यमिति दिक् । तत्सिद्धं फलस्वाम्यबोधको ऽधिकारविधिरिति । तदेवं निरूपितश्चतुर्विधो विधिः । उत्तरकाण्डे ऽप्युपलभ्यते सः । तथा हि । तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्येत्यादिरुत्पत्तिविधिः । मन्तव्य इत्यादिर्विनियोगविधिः । तद्विजिज्ञासस्वेत्यादिना तु सन्प्रत्ययवाच्याया इच्छायाः प्रकृत्यर्थभूतस्य ज्ञानस्य चानुष्ठातुमशक्यतया सन्प्रत्ययेन विचारं लक्षयित्वा प्रकृत्या च फलीभूतज्ञानं लक्षयित्वा ऽद्वितीयब्रह्मज्ञानाय तत्कर्त्तव्यता विधीयते ब्रह्मसाक्षात्कारकामो वेदान्तविचारं कुर्यादिति । अतो ऽयमधिकारविधिः साधनचतुष्टयसम्पन्नो ऽधिकारी जिज्ञासुः साङ्गं वेदान्तश्रवणं कुर्यादिति प्रयोगविधिः कल्प्य इति । चतुर्विधो ऽप्ययं विधिः पुनः प्रकारान्तरेण त्रिविधः । स च विधिर्वा स्यादपूर्वत्वाद्वादमात्रं ह्यनर्थकम् । उदत्त्वं चापूर्वत्वात् विधिस्तु धारणे अपूर्वत्वात् नियमार्था पुनः श्रुतिरुच्यते ऽपि तु संख्येत्येवमादिषु भगवतो जैमिनेः सूत्रेषु व्यवहृतः । भट्टपादैश्चान्योन्यासंकीर्णतया सलक्षणो विस्पष्टमुपपादितः । विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयतइति । अस्यार्थः यस्य यदर्थत्वं मानान्तरेणाप्राप्तं तस्य तदर्थत्वेन यो विधिः सो ऽपूर्वविधिः । यथा यजेत स्वर्गकामः व्रीहीन्प्रोक्षतीत्यादिः । नात्र यागस्य स्वर्गार्थताया व्रीहीणां प्रोक्षणस्य च संस्कारकर्मणो विधिं विना कथमपि प्राप्तिरस्ति अतो ऽयमपूर्व एव विधिः । पक्षप्राप्तस्याप्राप्तांशपरिपूरणफलो विधिर्नियमविधिः । यथा व्रीहीनवहन्तीति । अत्र

विध्यभावे ऽपि पुरोडाशप्रकृतिद्रव्याणां तण्डुलनिष्पत्त्याक्षेपादेवावहननप्राप्तिरस्ति। किं तु तद्वदेव लोकावगतकारणत्वाविशेषान्नखविदलनादिरपि पक्षे प्राप्नुयादित्यवहननाप्राप्तांशसंभवात्तदंशपरिपूरणफलः। उभयत्रैकस्योभयोर्वैकत्र युगपत्प्राप्तावन्यतरनिवृत्तिफलो विधिः परिसंख्याविधिः। यथा चयने ऽश्वगर्दभरशनयोर्ग्रहणे युगपदनुष्ठेये सामर्थ्याविशेषात्प्राप्तस्येमामगृभ्णन् रशनामिति मन्त्रस्याश्वाभिधानीमादत्तइति गर्दभरशनाग्रहणव्यावृत्तिमात्रफलको विधिः। एवं पञ्च पञ्चनखा भक्ष्या इत्यपि परिसंख्याविधिः। इद हि न भक्षणपरं तस्य रागतः प्राप्तत्वात् किं त्वपञ्चपञ्चनखभक्षणनिवृत्तिपरमिति। न च नियमपरिसंख्ययोः फलतो न विशेषः। यतो नियमस्य विधेयावघातनिष्ठत्वात्सन्निहितमप्राप्तांशपूरणमेव फलं नखावदलनादिनिवृत्तिस्त्वार्थिकीति।

अथ श्रोतव्य इति को विधिरिति विचार्यते। तत्र केचिच्छ्रवणं श्रोतव्यार्थसाक्षात्कारहेतुरिति सामान्यनियमस्य धर्मश्रवणे व्यभिचारादसिद्धेः ब्रह्मश्रवणं ब्रह्मसाक्षात्कारहेतुरिति विशेषनियमस्यापीदानीं केषु चिद्वामदेवे चान्वयव्यतिरेकव्यभिचारादसिद्धेः अलौकिके ब्रह्मसाक्षात्कारे लौकिकोपायाप्राप्तेश्च यद्युपायान्तरेण सह विकल्पेन समुच्चयेन वा श्रवणं मानान्तरेण प्राप्तं स्यात्तदा नियमः परिसंख्या वेति संभावना स्यान्न तु तथा ऽस्तीत्यपूर्वविधिरेवायमिति मन्यन्ते।

अपरे तु विचारमात्रे विचार्यनिर्णयहेतुत्वस्य लोकसिद्धत्वादपरोक्षार्थविषयमानावच्छेदेनापरोक्षहेतुत्वस्य ग्रन्थकृद्भिः शाब्दापरोक्षवादे व्यवस्थापनाच्च यत्साक्षादपरोक्षाद् ब्रह्मेति श्रुतिर्नित्यापरोक्षब्रह्मप्रमाणविचारितवे-

दान्तरूपश्रवणस्यापि ब्रह्मसाक्षात्कारहेतुत्वमर्थप्राप्तमेव परं त्वात्मतत्त्वजिज्ञासोरेतद्विष्यभावे मनोगोचरे स्वस्मिन् श्रुतिबोधितसूक्ष्मतमविशेषावधारणाय मनस एव सप्रणिधानव्यापारे ऽद्वैतशास्त्रश्रवणे वा मेधाविनो गुरुनिरपेक्षवेदान्तविचारे मन्दव्युत्पन्नस्य भाषाप्रबन्धश्रवणे प्रवृत्तिप्रसक्तिरस्तीति साधनत्वभ्रान्तिप्राप्तेर्मनःप्रणिधानादिभिर्गुर्वधीनाद्वितीयात्मपरवेदान्तश्रवणस्य पाक्षिकत्वप्रसक्तौ नियमविधिरयमित्याहुः ।

चिकित्साज्ञानार्थं चरकादिग्रन्थश्रवणे प्रवृत्तस्येव ब्रह्मज्ञानार्थं वेदान्तश्रवणे प्रवृत्तस्यापि मध्ये मध्ये प्रवृत्त्यन्तरप्रसक्तौ तन्निवृत्तिफलकः परिसंख्याविधिरयमित्यन्ये ।

आगमाचार्यवाक्यजं ज्ञानमेव श्रवणं तस्मिंश्च विषयप्रमाणतन्त्रे ऽयोग्ये शिलादौ क्षुरधारेव श्रूयमाणो विधिः कुण्ठीभवतीति नात्र विधित्रयस्याप्यवकाश इतीतरे ।

परे तु विचारे ऽपि विचार्यनिर्णयहेतुत्वस्य लौकिकमानसिद्धत्वाद्गुरूपसदनविधेर्दृष्टार्थवत्त्वाय गुरुपूर्वकत्वनियमसिद्धेरीशानुग्रहलभ्याद्वैतशास्त्रश्रद्धाहीनस्य श्रवणविधावपि द्वैतात्मश्रवणपरत्वधीसंभवादिति न कस्यापि विधेरवकाश इत्याहुः । अलं प्रपञ्चेन । तदेवं संक्षेपतो विधिभेदा निरूपिताः । तत्र विनियोगविधेः सहकारीणि पूर्वोक्तानि श्रुत्यादिषट्प्रमाणानि निरूप्यन्ते । तत्र निरपेक्षो रवः श्रुतिः सा च त्रिधा विधात्री अभिधात्री विनियोक्त्री चेति । तत्र विधात्री लिङाद्यात्मिका अभिधात्री व्रीह्यादिश्रुतिः यस्य च शब्दस्य श्रवणादेव संबन्धः प्रतीयते सा विनियोक्त्री । सा च त्रिविधा विभक्तिरूपा एकाभि-

धानरूपा एकपदरूपा चेति। तत्र व्रीहिभिर्यजेतेति तृतीयाश्रुत्या व्रीहीणां यागाङ्गत्वम्। पशुना यजेतेत्यत्रैकत्वपुंस्त्वयोः समानाभिधानश्रुत्या कारकङ्गत्वं यजेतेत्याख्याताभिहितसंख्याया भावनाङ्गत्वं समानाभिधानश्रुतेरेव। पदश्रुत्या च यागाङ्गत्वं परिगणनं च प्रायोऽभिप्रायं तेन शान्तो दान्त उपरतस्तितिक्षुः समाहितः श्रद्धावित्तो भूत्वा ऽऽत्मन्येवात्मानं पश्येदित्यत्र क्त्वाश्रुत्या शमादेरात्मदर्शनाङ्गत्वमिति वृद्धोक्तिः संगच्छते। एवं रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वेत्यादावपि बोध्यम्। सामर्थ्यं लिङ्गं सामर्थ्यं सर्वभावानां लिङ्गमित्यभिधीयतइत्युक्तेः तेनाङ्गत्वं यथा बर्हिर्देवसदनं दामीत्यस्य मन्त्रस्य लवनाङ्गत्वम्। स हि लवनं प्रकाशयितुं समर्थः। तच्च लिङ्गं द्विविधं सामान्यसंबन्धबोधकमानान्तरापेक्षं तदनपेक्षं च तत्र यदन्तरेण यन्न संभवत्येव तस्य तदङ्गत्वं तदनपेक्षम्। यथा ऽर्थज्ञानस्य कर्मानुष्ठानाङ्गत्वम्। लवनं हि मन्त्रं विना ऽप्युपायान्तरेण स्मृत्वा कर्तुं शक्यते अतो न मन्त्रो लवनस्वरूपार्थः संभवति किं त्वपूर्वसाधनभूतलवनप्रकाशनार्थः। तत्त्वं च सामर्थ्यमात्रादवगम्यते लवनप्रकाशनमात्रे सामर्थ्यात्। अतो ऽवश्यं प्रकरणादि सामान्यसंबन्धबोधकमुपेयं दर्शपूर्णमासप्रकरणे मन्त्रस्य पाठादेवमवगम्यते अनेन मन्त्रेण दर्शपूर्णमासापूर्वसंबन्धि किंचित्प्रकाश्यतइति। अन्यथा प्रकरणपाठवैयर्थ्यप्रसङ्गात्। किं तदपूर्वसंबन्धि प्रकाश्यमित्याकाङ्क्षायां सामर्थ्याद्बर्हिर्लवनमित्यवगम्यते। समभिव्याहारो वाक्यम्। समभिव्याहारो नाम साध्यत्वादिवाचकद्वितीयाद्यभावे वस्तुतः शेषशेषिणोः सहोच्चारणं यथा यस्य पर्णमयी जुहूर्भव-

तीति । अत्र न द्वितीयादिविभक्तिः श्रूयते किं तु पर्णता-जुह्वोः समभिव्याहारमात्रम् । तस्मादेव च पर्णताया जुह्वङ्गत्वं प्रतीयते न चानर्थक्यम् जुहूशब्देनापूर्वलक्षणात । तदयं वाक्यार्थः । पर्णतया ऽवत्तहविर्धारणद्वारा यदपूर्व-साधनं तद्भावयेदिति । एवं च पर्णतया यदि जुहूः क्रियते तदैव तत्साध्यमपूर्वं भवति नान्यथेति गम्यतइति न पर्णताया वैयर्थ्यम् । उभयाकाङ्क्षा प्रकरणम् । यथा प्रयाजादिषु समिधो यजतीत्यत्र हीष्टविशेषस्यानिर्देशात्समिद्यागेन भावयेत् किमित्यस्त्युपकार्याकाङ्क्षा दर्शपूर्णमासवाक्ये ऽपि दर्शपूर्णमासाभ्यां स्वर्गं भावयेत्कथमित्यप्युपकारार्थाकाङ्क्षा अत उभयाकाङ्क्षायां प्रयाजादीनां दर्शपूर्णमासाङ्गत्वं सिध्यति । महाप्रकरणावान्तरप्रकरणभेदादिदं द्विविधम् । तत्र फलभावनायाः प्रकरणं महाप्रकरणं तच्च प्रयाजादेर्ग्राहकं तत्पुनः प्रकृतावेव । यत्र समग्राङ्गोपदेशः सा प्रकृतिः । यथा दर्शपूर्णमासादि तत्रैवोभयाकाङ्क्षारूपं प्रकरणं संभवति आकाङ्क्षाऽनुपरमात् विकृतौ तु न प्रकरणम् । यत्र समग्राङ्गोपदेशो नास्ति सा विकृतिः । फलभावनाया अन्तराले यदङ्गभावनायाः प्रकरणं तदवान्तरप्रकरणम् । तच्चाभिक्रमणादीनां प्रयाजादिषु विनियोजकम् । उभयविधं प्रकरणं क्रियाया एव विनियोजकं न द्रव्यगुणयोरिति स्थितम् । देशसामान्यं स्थानम् । तच्च द्विविधं पाठसादेश्यमनुष्ठानसादेश्यं चेति । पाठसादेश्यमपि द्विविधम् । यथासंख्यपाठः सन्निधिपाठश्चेति तत्रैन्द्राग्नमेकादशकपालं निर्वपेद्वैश्वानरं द्वादशकपालं निर्वपेदित्येवं क्रमविहितास्विष्टिषु इन्द्राग्नी रोचना दिव इत्यादीनां याज्याऽनुवाक्यामन्त्राणां यथासंख्यं प्रथमस्य प्रथमं द्वितीयस्य द्वितीयमित्येवं यो विनियोगः स

आप्तस्य भ्रमादिशून्यपुरुषस्य परमेश्वरादेर्य उपदेशोऽस्माच्छब्दादयमर्थो बोद्धव्य इत्यादिसङ्केतः शक्तिपरिभाषारूपस्तेन सामर्थ्यं बोधौपयिकत्वं यस्य तादृशादेव शब्दादर्थ एकपदार्थे ऽपरपदार्थस्य सम्प्रत्ययोऽनुमित्यादिविजातीयबोध इत्यर्थः । एवकारेण व्याप्तिज्ञानापेक्षा निरस्ता । एवं च वृत्त्या पदज्ञानजन्यपदार्थोपस्थित्या आकाङ्क्षादिज्ञानसहकृतया जायमानो बोधः शाब्दबोध इत्यर्थः । तादृशपदज्ञानजन्यतावच्छेदकतयैव तत्र शाब्दत्वसिद्धिः । व्याप्तिज्ञानाजन्यत्वेनानुमितित्वनिरासः । यद्वा आप्तं प्राप्तं यदुपदेशसामर्थ्यं शाब्दबोधौपयिकाकाङ्क्षादि ततस्तत्सहकृतादित्यर्थः । यद्वा आप्तोपदेशो भ्रमादिशून्यस्य शब्दस्तत्सामर्थ्यमाकाङ्क्षासत्त्वं तत इत्यर्थः ॥ ५१ ॥

ननु व्याप्[illegible]त्वज्ञानं विना शब्दादर्थबोधो न जायत एवेत्यत आह ।

पूरणप्रदाहपाटनानुपपत्तेश्च सम्बन्धाभावः(१) ॥ ५२ ॥

शब्दे ऽर्थस्य सम्बन्धाभावो व्याप्यत्वाभावः । हेतुमाह । पूरणेत्यादि । तदर्थश्च अन्नाग्निवासिशब्दवत्यपि मुखे पूरणप्रदाहपाटनाभावानुमितान्नाग्निवासिविरहादिति । तथा च व्यभिचारान्न व्याप्तिरिति भावः ॥ ५२ ॥

ननु शब्दार्थयोरसम्बन्धे कथं तस्माच्छाब्दबोधोऽन्यथाऽतिप्रसङ्ग इत्याशङ्कते ।

शब्दार्थव्यवस्थानादप्रतिषेधः(२) ॥ ५३ ॥

(१) एतत्सूत्रव्याख्यावसरे इति सूत्रार्थ इति लिखितं न्यायतत्त्वालोके वाचस्पतिमिश्रैः ।

(२) आक्षेपसूत्रम् । शब्दार्थव्यवस्थानादप्रतिषेध इति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

शब्दार्थयोर्व्यवस्थानाच्छब्दविशेषार्थविशेषयोर्बोध्यबोधकभावादप्रतिषेधः शब्दविशेषार्थविशेषयोर्न सम्बन्धप्रतिषेधः। तथा च येन सम्बन्धेन यादृशशब्दवत्त्वज्ञानेन यादृशार्थप्रतीतिर्जायते न त्वन्यथा तादृशसम्बन्धेनैव शब्दार्थयोर्व्याप्यव्यापकभावो वर्तते तेन न व्यभिचार इति भावः। ननु शब्दार्थयोः सम्बन्धो वृत्तिरूपः न च तेनापि सम्बन्धेन शब्दस्यार्थव्याप्यत्वं गोशब्दादिमति वाक्यादौ प्राणिविशेषगवादेरभावात्। न च गोपदसमभिव्याहृतानुस्वारपदादिना कर्मत्वादौ गवीयत्वादिकमनुमेयमिति वाच्यम्। वाक्यीयकर्मत्वादौ व्यभिचारादिति चेत्। न। पदश्रवणानन्तरं पदार्थस्मरणे एते पदार्थाः परस्परं संसर्गवन्त आकाङ्क्षायोग्यतासत्तिमत्पदस्मारितत्वाद् दण्डेन गामभ्याजेतिपदस्मारितपदार्थवदित्यनुमाने एतानि पदानि स्मारितपदार्थसंसर्गज्ञानपूर्वकाणि आकाङ्क्षादिमत्पदकदम्बत्वादित्यनुमाने वा तात्पर्यादिति॥५३॥

समाधत्ते।

न सामयिकत्वाच्छब्दार्थसम्प्रत्ययस्य(१)॥५४॥

शब्दार्थसम्प्रत्ययस्य शब्दाधीनार्थबोधस्य नानुमितित्वं सामयिकत्वात् समयः शक्तिस्तद्ग्रहाधीनत्वात्। न चाप्तोपदेशेतिसूत्रेण पौनरुक्त्यं पूर्वोक्तदोषावारणं चेति वाच्यम्। उक्तस्य पुनरुक्तेर्नियमबोधकत्वात्। तथा चायं भावः। शक्तिग्रहस्तात्पर्यग्रहाद्युपलक्षकः तत्सत्त्वे च पदार्थसंसर्गबोधो जायते न त्वन्यथा न हि तत्र कदाचिद्व्याप्त्यादिग्रहविलम्बेन पदार्थसंसर्गबोधविलम्बो दृष्ट इति

(१) क्वचिच्चकाररहितः सूत्रपाठः। समाधिसूत्रम्। न सामयिकत्वादित्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः।

व्याप्तिज्ञानविनाकृतशक्तिज्ञानादितो विजातीयो बोधः स्वीकार्य इति । यद्वा सामयिकत्वात् कालविशेषोत्पन्नत्वाद् व्याप्तिज्ञानशून्यशब्दज्ञानादिकालाव्यवहितोत्तरोत्पन्नत्वेनानुभूतत्वादिति यावत् । तथा च व्याप्तिज्ञानाजन्यत्वेनानुमितित्वाभावस्तत्रेति भावः । यत्तु सामयिकत्वाच्छक्तिग्रहाधीनत्वात् तथा चार्थे शक्तिरूपसम्बन्ध एव शब्दस्य स च वृत्त्यनियामक इति न तेन सम्बन्धेन शब्दस्य व्याप्तिमत्त्वमिति । शब्दशक्यत्वस्यैव व्याप्यत्वं जातिविशेषे चानियमादित्यनेन निरास्यमिति । तच्चिन्त्यम् ॥ ५४ ॥

ननु व्याप्तिज्ञानापेक्षशक्त्यादिज्ञानादुत्पन्नस्य कथं नानुमितित्वमित्यत आह ।

जातिविशेषे चानियमात्[१] ॥ ५५ ॥

जातिविशेषे ऽनुमितित्वरूपे ऽनियमान्नियामकाभावादिति । यद्वा जातिविशेषे धर्मविशेषे निरुक्ताकाङ्क्षादिमत्पदस्मारितत्वरूपे आकाङ्क्षादिमत्पदकदम्बत्वरूपे च अनियमाच्च निरुक्तसाध्यव्याप्यत्वाभावाच्च । इत्थं चाद्ये पयसा सिञ्चतीत्यादावन्वयप्रयोजकरूपयोग्यताकपदस्मारिते स्थिरजले सेककरणत्वबाधाद्व्यभिचारः । न च तत्पदार्थे तत्पदार्थ एव योग्यता तादृशयोग्यताशालित्वेन विशेषणेन न व्यभिचार इति वाच्यम् । तादृशयोग्यतायाः शाब्दबोधपूर्वमनिश्चयेन तद्घटितहेतोः पक्षधर्मत्वानिश्चयात् । योग्यतासंशयस्यापि शाब्दबोधहेतुतया नास्मन्मते दोषः भवन्मते हेतुतावच्छेदकयोग्यतासंशये हेतोरपि पक्षे संशय इति ततो नानुमितिसम्भवः कथञ्चित् तन्निर्णये सिद्धसाध-

(१) न्यायसूचीनिबन्धे दर्शनात् न्यायतत्त्वालोके व्याख्यातत्वात् जाति-त्र इति तात्पर्यटीकायां सूत्रप्रतीकधारणरीतिदर्शनाच्चास्य सूत्रत्वमवधीयते ।

नाच्च। संसर्गयोग्यत्वस्य साध्यत्वे च न पदार्थसंसर्गसिद्धिः। द्वितीये हेतौ आकाङ्क्षारूपं हेतुविशेषणं तस्याः स्वरूपसत्या एव शाब्दबोधहेतुत्वं न तु तज्ज्ञानस्येति तस्या हेतुघटकत्वे तज्ज्ञानमात्रापेक्षणेन तदसत्त्वे ऽपि बोधापत्तेः तत्सत्त्वे तज्ज्ञानाभावे ऽपि शाब्दबोधस्यानुभविकत्वाच्च। आकाङ्क्षा च समभिव्याहृतपदस्मारितपदार्थजिज्ञासा घटमित्युक्ते आनय पश्येति आनयेत्युक्ते घटं पटं वेतिजिज्ञासोदयात्। इत्थं च योग्यतासहितासत्तिरेव हेतुर्वाच्या तस्यां च सत्यामयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यत्र राजपदपुरुषपदयोर्व्यभिचारादनियम इति। यदाहुराचार्याः।

अनैकान्तः परिच्छेदे सम्भवे च न निर्णयः।
आकाङ्क्षा सत्तया हेतुर्योग्यासत्तिरबन्धना॥ इति[१]।

परिच्छेदे एकपदार्थे ऽपरपदार्थसंसर्गस्य साध्यत्वे। सम्भवे संसर्गस्वरूपयोग्यत्वस्य साध्यत्वे। न निर्णयो न संसर्गसिद्धिः। अबन्धना व्याप्तिशून्या। केचित्तु जातिविशेषे चानियमादिति। शब्दस्यार्थेन सह यः सम्बन्धस्तस्य जातिविशेषे ऽनियमाच्छब्दस्यानियतार्थकत्वदर्शनात्। आर्या हि यवशब्दाद्दीर्घशूकविशेषं प्रतियन्ति म्लेच्छास्तु कङ्गुमिति नियमे तु सर्वः सर्वं प्रतीयात्। आपाततश्चेदम्। नानाशक्ताविव यत्र यस्य शक्तिग्रहस्तस्य तदर्थोपस्थितेरित्याहुः। अन्ये तु जातिविशेषे आकाङ्क्षादिजन्यतावच्छेदकतया अनुव्यवसायबलेन च सिद्धे शाब्दत्वरूपजातिविशेषे। अनियमात् तादृशजात्यधिकरणे बोधे ऽनुमितित्वानियमादनुमितित्वाभावादिति यावत्। साधकविरहादनुव्यवसायरूपबाधकसत्त्वाच्चेति भावः। अनुव्य-

(१) न्यायकुसुमाञ्जलौ तृतीयस्तवके १३ कारिका।

वसायश्च शब्दश्रवणानन्तरजातबोधे ऽयमर्थः श्रुतो नानुमित इममर्थं शृणोमि शाब्दयामि नानुमिनोमीत्यादिरूप इति प्राहुः ॥ ५५ ॥

समाप्तं शब्दप्रामाण्यपरीक्षाप्रकरणम् ॥

शब्दस्य दृष्टादृष्टार्थकत्वेन द्वैविध्यमुक्तं तत्र दृष्टार्थकस्य संवादिप्रवृत्त्यादिजनकबोधजनकतया प्रामाण्यावधारणं स्फुटमिति अदृष्टार्थकस्य वेदस्य प्रामाण्यं परीक्षयितुं पूर्वपक्षयति ।

तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः(१) ॥ ५६ ॥

तस्यादृष्टार्थकस्य वेदस्याप्रामाण्यमनृतत्वादिदोषात् । तत्रानृतत्वं बाधितार्थकत्वम् । तच्च क्वचित् पुत्रेष्टिकारीर्यादौ कृते ऽपि तत्फलस्य पुत्रवृष्ट्यादेरनुत्पाददर्शनात् तत्फलरूपेष्टसाधनत्वस्य बाधनिर्णयान्निर्णीतम् । व्याघातः पूर्वापरविरोधः । यथा उदिते जुहोति अनुदिते जुहोति समयाध्युषिते जुहोतीतिश्रुत्या उदितहोमादौ बलवदनिष्टाननुबन्धीष्टसाधनत्वं बोध्यते अनयोक्त्या श्यावोऽस्याहुतिमभ्यवहरति य उदिते जुहोति शबलोऽस्याहुतिमभ्यवहरति योऽनुदिते जुहोति श्यावशबलावस्याहुतिमभ्यवहरतः यः समयाध्युषिते जुहोतीत्यादिश्रुत्या उदितादिहोमकर्तुः प्रायश्चित्तहोमबोधिकया उदितहोमादावनिष्टसाधनत्वमाक्षिप्यत इति श्रुत्योः परस्परविरोधादबोधकतयाऽप्रामाण्यमिति भावः । पौनरुक्त्यमुक्तार्थस्य बोधे जाते पुनस्तदर्थबोधे

(१) तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्य इति सूत्रमिति वार्त्तिकम् । पूर्वपक्षसूत्रम् । तदप्रामाण्यमित्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

निराकाङ्क्षत्वम् । तेन दोषेण उक्तस्य पुनरुक्तेर्वेदभागस्याप्रामाण्यमित्यर्थः । यथा त्रिः प्रथमामन्वाह त्रिरुत्तमामन्वाहेत्यत्रोत्तमत्वस्य प्रथमत्वपर्यवसानात् त्रिःकथनेन पौनरुक्त्यम् । एतेषामप्रामाण्ये तद्दृष्टान्तेन वेदत्वेन हेतुना वेदसामान्ये ऽप्रामाण्यं साधनीयमिति भावः ॥ ५६ ॥

अनृतत्वं वारयति ।

न कर्मकर्तृसाधनवैगुण्यात्(१) ॥ ५७ ॥

न पुत्त्रेष्ट्यादिविधायकवेदस्यानृतत्वम् । हेतुमाह । कर्मकर्तृसाधनवैगुण्यात् फलाभावोपपत्तेः । यद्वा यथोक्तकर्मकर्तृसाधने वैगुण्यं विशिष्टफलजनकत्वं यस्य कर्मणः पुत्त्रेष्ट्यादेस्तस्मात् । बोधकतासम्बन्धेन तादृशकर्मवत्त्वं हेतुरिति फलितम् । तथा च यत्र पुत्त्रेष्ट्यादौ न फलोत्पत्तिस्तत्र कर्माद्येकतरस्य समस्तस्य वा वैकल्यमस्तीति तत्रान्वयव्यभिचारे ऽपि वेदबोधितपुत्त्रेष्ट्यादेः फलजनकताया नानुपपत्तिरिति । अथवा इदं कर्म न वेदबोधितं कर्मादिवैगुण्यादिति । तत्र कर्मवैगुण्यमयथाविधिकृतत्वम् । कर्तृवैगुण्यमशुचित्वादि । साधनवैगुण्यं हविरादेरप्रोक्षितत्वादि । न च यथोक्तकर्मादिस्थले ऽपि फलानुत्पत्तिर्दृश्यत इति वाच्यम् । तथापि कर्मादिवैगुण्यमस्ति किं तु तदज्ञानं दोषादेवेतिनिर्णयात् । तत्र व्यभिचारसंशये ऽपि तस्य कारणताग्रहाविरोधित्वात् । अनेकत्र पुत्त्रेष्ट्यादितः पुत्त्रादिफलदर्शनात् तादृशकार्यकारणभावग्रहोत्तरं फलादर्शनेन कर्मादिवैगुण्यमनुमीयत इति भावः ॥ ५७ ॥

(१) न्यायसूचीनिबन्धे दर्शनेन न्यायतत्त्वालोके व्याख्यातत्वेन विश्वनाथवृत्तौ सिद्धान्तसूत्रत्वेनोल्लेखदर्शनेन चास्य सूत्रत्वमवसीयते । तात्पर्यटीकायां च एवं पूर्वपक्षमुक्त्वा सिद्धान्तमुपक्रममाणः प्रथमं तावदनृतत्वं दूषयति । न क-त् । इति लिखितम् । दूषयतीति सूत्रकार इति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः ।

व्याघातं परिहरति ।

अभ्युपेत्य कालभेदे दोषवचनात्(१) ॥ ५८ ॥

न व्याघात इतिशेषः । अभ्युपेत्य प्राक्तनश्रुत्या बोधमभ्युपेत्य कालभेदे विहितकालमतिक्रम्य कृते दोषवचनात् । यथा अग्न्याधानकाले उदितहोमादिकमभ्युपगतं तत्रानुदितहोमादिकरणे दोषकथनान्न विरोध इति । कालभेद इत्युपलक्षणम् । अधिकारान्तरभेदमादायापि विरुद्धार्थकथनात् । दोषपदस्य विरुद्धार्थपरत्वात् । यथा अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीतिश्रुत्योर्विरोधः षोडशिग्रहणतद्ग्रहणयोर्विकल्पपरतया निरस्यते । एवं जायमानो ह वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वाऽनृणो यः पुत्त्री यज्वा ब्रह्मचारी वासितेतिश्रुत्या ब्रह्मचर्यादेव प्रव्रजेद् यदहरेव विरज्येत तदहरेव प्रव्रजेत् अथ पुनरव्रती वा व्रती वा किमर्था वयमत्यधीमहे किमर्था वयं यक्ष्यामहे किं प्रजया करिष्यामो याज्ञवल्क्यः प्रवव्राज ये प्रजामीषिरे ते श्मशानानि भेजिरे ये प्रजां नेषिरे ते ऽमृतत्वं हि भेजिर इत्यादिश्रुतेर्विरोधः । प्राक्श्रुतेरविरक्तपरतया समाधीयते । एवमन्योऽपि विरोधः परिहरणीयः ॥ ५८ ॥

पौनरुक्त्यं परिहरति ।

अनुवादोपपत्तेश्च(२) ॥ ५९ ॥

चः पुनरर्थे । अनुवादोपपत्तेः पुनर्न पुनरुक्तम् । निष्प्र-

---

(१) तात्पर्यटीकाकृता तदेवं वेदाप्रामाण्यहेतूनुद्धृत्य प्रामाण्यसम्भवहेतुः सूत्रकारेण वक्तव्य इति लिखितम् तेन ज्ञायते न कर्मकर्तृसाधनवैगुण्यादित्यादीनि वाक्यानि सूत्रकृदुक्तानीति । व्याख्यातानि चैतानि न्यायतत्त्वालोके । न्यायसूचीनिबन्धे चैतानि सूत्राणि दृश्यन्ते ।

(२) पूर्वसूत्रटिप्पणी द्रष्टव्या ।

योजनत्वे हि पौनरुक्त्यं दोष उक्तस्थले त्वनुवादस्योपपत्तेः प्रयोजनस्य सम्भवात्। एकादशसामधेनीनां प्रथमोत्तमयोस्त्रिरभिधाने पञ्चदशत्वं सम्भवति। तथा च पञ्चदशत्वं श्रूयते। इदमहं भ्रातृव्यं पञ्चदशावरेण वाग्वज्रेण बाधे योऽस्मान् द्वेष्टि यं च वयं द्विष्म इति। वस्तुतस्तु पूर्वपक्षसूत्रे तदप्रामाण्यमित्यनेन वेदाप्रामाण्यमुक्तं तत्र हेतुत्रयमुक्तं तत्र क्रमेण सूत्रत्रयेण हेतुत्रयं निराकृतम्। तत्र प्रथमसूत्र एव नेत्युक्तं तस्य वेदाप्रामाण्यं नेत्यर्थः। तत्रैव हेतुत्रयम्। कर्मकर्तृसाधनवैगुण्यादित्येकम्। कर्मादिवैगुण्येन फलानुत्पादसम्भवेनानृतत्वाभावादिति तदर्थः। अभ्युपेत्य कालभेदे दोषवचनादित्यपरम्। अभ्युपेत्य अभ्युपगतार्थस्य कालभेदे कालभेदादिकमादाय दोषवचनात् तद्विरुद्धार्थकथनाद् व्याघाताभावादिति शेष इति तदर्थः। हेत्वन्तरं च। अनुवादोपपत्तेश्चेति। अनुवादस्य पुनरुक्तविशेषस्य उपपत्तेरर्थविशेषाकाङ्क्षया सम्भवादिति तदर्थः। अत्रोक्तानुक्तसमुच्चायकश्चकारः। अनुक्तसमुच्चायकता यथा। ऐन्द्रया गार्हपत्यमुपतिष्ठत इतिश्रुतावैन्द्रीपदमृग्विशेषे रूढम्। सा च ऋगिन्द्रप्रकाशिका तथा च गार्हपत्योपस्थापने विरोधस्तत्र मन्त्रस्थेन्द्रपदस्य गार्हपत्ये लक्षणास्वीकारेण विरोधपरिहारात्। न च गार्हपत्यपद एव लक्षणा शक्येनैन्द्रीपदेनेन्द्रप्रकाशकमन्त्रपरेण तथैव कल्पनादिति वाच्यम्। योगादर्थतो रूढ्या बलवत्त्वेन ऐन्द्रीपदेन मन्त्रविशेषत्वेनोपस्थितौ तस्य शक्तया गार्हपत्यपदोपस्थापिते योग्यतया प्रथमत एवान्वयादनन्तरं चोपस्थिते मन्त्रपद एव लक्षणेतिस्वीकारादेवमन्यदप्यूह्यम् ॥ ५६ ॥

अनुवादस्य साकाङ्क्षत्वं लोकसिद्धमित्याह ।

वाक्यविभागस्य चार्थग्रहणात्[1] ॥ ६० ॥

चो हेतौ । तथा च वाक्यविभागस्य विध्यनुवादकादिभेदेन वाक्यविभागस्यार्थग्रहणादर्थविशेषभेदेन स्वीकारात् । शिष्टैरिति शेषः । शिष्टा हि विधायकानुवादादिभेदेन वाक्यमर्थभेदेन विभजन्त इत्यनुवादस्याप्यर्थविशेषो वर्तते तदाकाङ्क्षयैव तदुक्तिसम्भवादिति भावः ॥ ६० ॥

ननु वेदे कथं वाक्यविभाग इत्यत आह ।

विध्यर्थवादानुवादवचनविनियोगात्[2] ॥ ६१ ॥

विधिवचनत्वादिना विनियोगाद् विभजनादित्यर्थः । ननु निषेधरूपमपि न कलञ्जं भक्षयेदित्यादि वाक्यं वेदेऽस्तीति कथं त्रिधा विभाग इति चेत् सत्यं तदादाय चतुर्धैव विभागः प्रसिद्धः । इदानीं पुनरुक्तस्यानुवादतया प्रामाण्यार्थं प्रवृत्तिप्रयोजकवाक्यविभागकरणात् । विधिरपि चतुर्विध उत्पत्तिविधिर्विनियोगविधिरधिकारविधिः प्रयोगविधिश्चेति । तत्रोत्पत्तिविधिः कर्मादेः प्राथमिकप्राप्तिर्यतः सः । प्राथमिकप्राप्तेरुत्पत्तिरूपत्वात् । यथा अग्निहोत्रं जुहोति सोमेन यजेतेत्यादि । विनियोगविधिश्च विनियोगेन परार्थतयाऽन्यविधिः । यथा ऐन्द्रया गार्हपत्यमुपतिष्ठत इत्यादि । अत्र ऐन्द्र्याख्यमन्त्रस्य गार्हपत्योपस्थापने विनियोगात् । न च स्वर्गकामो यजेतेत्यादिविधेरपि विनियोगविधित्वापत्तिस्तत्र क्रियायाः पुरुषार्थेष्टसाधनत्वरूपपरार्थतया विधानादिति वाच्यम् ।

(१) न्यायसूचीनिबन्धे दर्शनान्न्यायतत्त्वालोके व्याख्यातत्वाच्च सूत्रमिति प्रतीयते।

(२) येषां शब्दानां वाक्यविभागोदृष्टप्रदर्शनाय? सूत्रम् । विध्यर्थवादानुवादेत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

इष्टत्वात्। क्रियायाः कृतिसाध्यतया विधानमादायोत्पत्ति-विधित्वाविरोधात्। न चोत्पत्तिविधित्वेन विभागो व्यर्थस्तस्य विनियोगविध्यन्तर्भावादिति वाच्यम्। अहरहः सन्ध्यामुपासीतेत्यादौ प्रथमतः फलानुपस्थित्या कृतिसाध्यतयैव बोधनात् तादृशबोधस्यैव प्राथमिकतया तमादायोत्पत्तिविधित्वमनन्तरं च किमर्थोऽयं विधिरित्यपेक्षया अर्थवादिकफलोपस्थित्या तत्साधनतया बोधनाद् विनियोगविधित्वं सामान्यलक्षणगमनं चेत्यर्थभेदात् तयोर्विभागकरणादिति। न च कृतिसाध्यताबोधकत्वमेव सामान्यलक्षणं कर्तव्यमिति वाच्यम्। पाकं करोतीत्यादिलौकिकवाक्ये ऽतिव्याप्तेरिति। विनियोगविधिरपि त्रिविधः। अपूर्वविधिनियमविधिपरिसङ्ख्याविधिभेदात्। तदुक्तम्।

विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते॥ इति।

अत्यन्तमप्राप्तौ सत्यां यत् प्रवृत्तिप्रयोजकं वाक्यं स विधिरपूर्वविधिरित्यर्थः। अत्यन्तपदं सत्यामितिक्रियायां विशेषणमप्राप्तावेव वेति। यथा व्रीहीन् प्रोक्षतीत्यादि। व्रीहिसाधकपुरोडाशद्रव्यकयागजन्यापूर्वाद्यर्थिनां व्रीहिप्रोक्षणादौ प्रवर्तकत्वादेतद्विधिं विना तत्र प्रवृत्त्यभावादप्रोक्षितैर्व्रीहिभिरपि पुरोडाशसम्भवात्। पाक्षिके सति विधिं विना प्रवृत्तेः पक्षिकत्वे सति रागादिसत्त्वे स्वत एव प्रवृत्तिस्तदसत्त्वे न प्रवृत्तिरित्यनियमे सति यो नियमेन प्रवर्तकः स नियम इति। यथा ऋतौ स्वदारानुपेयादित्यादि। तत्र चान्यत्र चेति। यत्रोद्देश्ये यस्य विधानं तदन्यस्मिन्नपि तत्सम्बन्धस्य तस्मिन् वा तदन्यसम्बन्धस्य रागाद्यधीनप्रवृत्तितः प्रसक्तौ तद्विरोधी

अनियतप्रवर्तकः परिसंख्येत्यर्थः । यथा पञ्च पञ्चनखान् भुञ्जीतेत्यादि । याजनाध्यापनप्रतिग्रहैर्ब्राह्मणो धनमर्जयेदित्यादि च ॥ ६१ ॥

तत्र विधिलक्षणमाह ।

विधिर्विधायकः(१) ॥ ६२ ॥

विदधाति प्रवर्तयति यद्वाक्यं तद्विधिरितिव्युत्पत्त्या प्रवृत्तिजनकेष्टसाधनताबोधक इत्यर्थः पर्यवसितः । न चेष्टसाधनताबोधकतदादिपदघटितलौकिकवाक्येऽतिव्याप्तिरिति वाच्यम् । आश्रयतासम्बन्धेनेष्टसाधनताप्रकारकबोधजनकोपस्थितिजनकप्रत्ययघटितवाक्यत्वस्य विवक्षणात् । न कलञ्जं भक्षयेदित्यादिनिषेधातिव्याप्तिवारणायाश्रयतासम्बन्धेनेति । तत्र बलवदनिष्टाननुबन्धीष्टसाधनत्वाभावस्य धात्वर्थेऽन्वयात् प्रतियोगितासम्बन्धेनैवाभावे इष्टसाधनताबोधनात् । न चाहरहः सन्ध्यामुपासीतेत्यादौ फलाश्रवणात् कुत इष्टसाधनताबोध इति वाच्यम् । तत्राप्यार्थवादिकफलोपस्थित्या तत्साधनताबोधकत्वात् । स्फुटमुदाहरणं तु स्वाराज्यकामो वाजपेयेन यजेतेत्यादि । विश्वजिता यजेतेत्यादौ साक्षात् फलाश्रवणेऽपि काम्यप्रकरणपाठात् सामान्यतः स्वर्गसाधनतायाः स्वीकारात् ॥ ६२ ॥

अर्थस्य विध्यर्थे साक्षात् परम्परया वाऽनन्वितार्थस्य वादः कथनमर्थवादः । न च क्वचिद्विधिनाऽर्थवादस्यैकवाक्यतया विध्यर्थान्वयित्वमपि तादृशार्थवादस्येति वाच्यम् । यत्र फलश्रुतिर्नास्ति तत्रापि सामान्यत एव विधिप्रत्ययेन

(१) विधिर्विधायकः । कृतिजनकचिकीर्षाजनकज्ञानजनकशब्द इति सूत्रार्थ इति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

इष्टसाधनता बोध्यते ऽनन्तरं च किमिष्टमित्याकाङ्क्षया अर्थवादप्रयोगात् तदिष्टेनैवार्थवादिकफलस्यान्वयात् । अथवा आर्थवादिकफलोपस्थितौ तत्कामपदादिकमध्याहार्य विधिवाक्येन बोधोपगमात् । एतल्लक्षणस्य स्फुटतया तदनुक्तैव विभजते ।

स्तुतिर्निन्दा परकृतिः पुराकल्प इत्यर्थवादः(१) ॥ ६२ ॥

स्तुतिर्विध्यर्थप्रशंसावचनम् । यथा रात्रीर्जुहोतीत्यादिविध्यनन्तरं प्रतितिष्ठन्ति ह वै य एता रात्रीरुपयन्तीत्यादि । तथा क्वचिद् विधिकल्पकमपि भवति । यथा तरति शोकं तरति ब्रह्महत्यां योऽश्वमेधेन यजेतेत्यादि । निन्दावाक्यं द्विविधं विहितप्रवर्तकं निषिद्धनिवर्तकं चेति । तत्राद्यं यथा न चेदवेदीन्महती विनष्टिरित्यादि । अत्रात्मनो ज्ञानाभावे ऽतिशयविनाशश्रवणादात्मा द्रष्टव्य इत्यादिविधिविहितप्रवर्तकत्वम् । द्वितीयं यथा पापकारी पापो भवतीत्यादि । अथ य इह कपूयाचरणा अभ्यासो यत्ते कपूयां योनिमापद्येरन्नित्यादि च । कपूयाचरणाः कुत्सिताचरणाः । पुरुषविशेषनिष्ठमिथोविरुद्धकथनं परकृतिः । यथा हुत्वा वपामेवाग्रे ऽभिघारयन्ति अथ पृषदाज्यं तदुह चरकाध्वर्यवः पृषदाज्यमेवाग्रे ऽभिघारयन्त्यग्नेः प्राणाः पृषदाज्यमित्यभिदधतीति । प्रसिद्धाचरिततया कीर्तनं पुराकल्पः । यथा यज्ञेन यज्ञमयजन्त देवा इत्यादि । अयं च चतुर्धा विभागो विधिसहितवाक्या-

(१) स्तुतिर्निन्देत्यादिसूत्रं विधिविहितस्येत्यादिसूत्रं च न्यायसूचीनिबन्धे दृश्यते व्याख्याते चैते न्यायतत्त्वालोके परं तु सूत्रत्वेन नावधारिते । स्तुतिर्निन्दा परकृतिः पुराकल्प इत्यर्थवादः । एषामुदाहरणानि भाष्य इति वार्त्तिकम् ।

७४८

नाम् । तेन गुणवादभूतार्थवादयोरपि ग्रहणम् । तत्र गुणवादो गुणार्थवादः । यथा यजमानः प्रस्तर इत्यादि । तत्र यजमानस्यास्तरणकुशरूपप्रस्तरपदार्थान्वये बाधात् प्रस्तरपदस्य तत्सदृशे लक्षणा तत्प्रयोजनं च यथा प्रस्तरस्य यज्ञाङ्गत्वं तथा यजमानस्यापीति । एतदुक्तातिरिक्तो भूतार्थवादः । यथा सर्वं खल्विदं ब्रह्मेत्यादि ॥ ६३ ॥

अनुवादलक्षणमाह ।

विधिविहितस्यानुवचनमनुवादः(१) ॥ ६४ ॥

विधेर्विहितस्य चानुवचनं पुनर्वचनमनुवाद इत्यनुवादद्वैविध्यमुक्तम् । तत्राद्यं प्रागुदाहृतम् । द्वितीयं यथा दध्ना जुहोतीत्यादि । अत्र विहितमग्निहोत्रमनूद्य दधिकरणकत्वं विहितमिति ॥ ६४ ॥

भ्रमेण शङ्कते ।

नानुवादपुनरुक्तयोर्विशेषः शब्दाभ्यासोपपत्तेः(२) ॥ ६५ ॥

शब्दाभ्यासस्यैकार्थकशब्दस्यैकजातीयस्य वा योऽभ्यासः पुनःप्रयोगस्तेनोपपत्तेः समत्वादित्यर्थः । तथा चानुवादोऽपि निराकाङ्क्ष इति भावः ॥ ६५ ॥

भ्रमं निराकृत्य समाधत्ते ।

शीघ्रतरगमनोपदेशवदभ्यासान्नाविशेषः(३) ॥ ६६ ॥

(१) पूर्वसूत्रटिप्पणी द्रष्टव्या । तात्पर्यटीकायां विधि-वादः इति सूत्रप्रतीकधारणरीतिर्दृश्यते ।

(२) नानुवादपुनरुक्तयोर्विशेषः शब्दाभ्यासोपपत्तेः । कोऽस्य सूत्रस्यार्थ इति वार्त्तिकम् । एतत्सूत्रव्याख्यानान्ते इति सूत्रार्थ इति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

(३) न्यायसूचीनिबन्धे दर्शनेन न्यायतत्त्वालोके व्याख्यातत्वेन तात्पर्यटीकायां शीघ्र-षः इति सूत्रप्रतीकधारणरीतिदर्शनेन चास्य सूत्रत्वमवसीयते ।

अनुवादो निराकाङ्क्षपुनरुक्तान्नाविशेषो भिन्न इत्यर्थः। शीघ्रतरगमनोपदेशवदभ्यासात्। तुल्यता च सप्रयोजनत्वादिना। तथाहि यथा लोके गम्यतामित्युक्त्वा गम्यतांगम्यतामिति शीघ्रगमनबोधार्थमनुवदति तथाऽधिकार्थलाभाय गुणविशेषविधानाय वात्रानुवाद इति भावः ॥ ६६ ॥

बाधकं निरस्य साधकमाह।

मन्त्रायुर्वेदवच्च तत्प्रामाण्यमाप्तप्रामाण्यात्[1] **॥ ६७ ॥**

तस्य वेदस्य प्रामाण्यमाप्तस्य भ्रमप्रमादशून्यस्य तत्कर्तुः प्रामाण्याद् यथार्थोपदेशकत्वाद् यथार्थज्ञानवत्त्वात्। प्रमाणपदस्य कर्तृव्युत्पत्त्या प्रमाश्रयपरत्वात्। तथा च वेदः प्रमाणमाप्तोक्तत्वादिति वेदत्वावच्छेदेन प्रामाण्यसाधने तत्सामानाधिकरण्येन दृष्टान्तमाह। मन्त्रायुर्वेदवच्चेति। मन्त्रो विषादिनाशक आयुर्वेदो रोगनिदानादिज्ञापकवेदभागविशेषः। चकारात् ज्योतिर्वेदादिः। तत्र प्रामाण्यग्रहः संवादेनेति। न च वेदस्याप्तोक्तत्वमेव नास्तीति वाच्यम्। वेदः पौरुषेयो वाक्यत्वादित्याद्यनुमानात्। वेदकर्तुरनाप्तत्वे महाजनपरिग्रहानुपपत्तेः। एतेन वेदार्थानामतीन्द्रियत्वात् तत्कर्तृत्वं जीवानां न सम्भवतीति वेदकर्तृत्वेन परमेश्वरसिद्धिर्वेदप्रामाण्ये सिध्येत। परमेश्वरोपासनादिकमपि निःश्रेयसहेतुरित्यादिकं सूचितम्। मन्त्रा-

(१) अनन्तरसूत्रावतरणपरं भाष्यं किं पुनः प्रतिषेधेतीति वेदप्रामाण्यं तु सूत्रोक्तम् मन्त्रा–त्। सूत्रं व्याचष्टे यथा मन्त्रायुर्वेदवाक्यानीतीति च तात्पर्यटीका। उदयनाचार्या अपि कुसुमाञ्जलौ चतुर्थस्तबके यद्येवमाप्तप्रामाण्यादितिसूत्रविरोध इत्युक्तवान्। वरदराजोऽप्यस्य सूत्रत्वमाह। वार्त्तिकादौ मन्त्रायुर्वेदप्रामाण्यवदिति पाठः।

७४८

देरर्थवादाद्यन्तर्गतत्वान्न विभागव्याघातः । यद्वा मन्त्रब्राह्मणभेदेन वेदो द्विविधः । तत्र ब्राह्मणस्यैव विभागः प्राङ्निरुक्त इति । केचित्तु आप्तप्रामाण्यादित्यस्य महाजनपरिग्रहादित्यर्थमाहुः । अन्ये तु मन्त्रादिकर्तृजन्यत्वेन वेदस्य प्रामाण्यमनुमेयमिति समुदिततात्पर्यार्थ इत्याहुः ॥ ६७ ॥

इति समाप्तं शब्दविशेषवेदपरीक्षाप्रकरणम् ॥

इति न्यायसूत्रे द्वितीयाध्यायस्याद्यमाह्निकम् ॥

इति न्यायसूत्रविवरणे द्वितीयाध्यायीयसाङ्गप्रमाणपरीक्षणाद्याह्निकविवरणम् ॥

ननु प्रमाणानां चतुर्धा विभागः कृतस्तन्न सङ्गच्छते ऐतिह्यादीनामपि प्रमाणान्तरत्वादित्याशङ्कते ।

न चतुष्ट्वमैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात्[१] ॥ १ ॥

प्रामाणानां न चतुष्ट्वं प्रमाणत्वं न प्रत्यक्षादिचतुष्टयमात्रवृत्ति न प्रत्यक्षाद्यन्यतमत्वव्याप्यमिति यावत् । हेतुमाह । ऐतिह्येत्यादि । ऐतिह्यमिह वृक्षे यक्षः प्रतिवसतीति लोकप्रसिद्धिः । तत्र मूलवक्तृनिर्देशेनाप्तोक्तत्वानिश्चयेन तादृशनिश्चयस्य शाब्दबोधहेतुतया नास्य शब्दप्रमाणे ऽन्तर्भावः । अर्थापत्तिरनुपपत्तिज्ञानम् । यथा जीवी देवदत्तो गृहे नास्तीतिज्ञानानन्तरं जीवित्वविशिष्टदेवदत्तस्य गृहासत्त्वं बहिःसत्त्वं विनाऽनुपपन्नमितिज्ञानाद् बहिःसत्त्वसिद्धिः । अत्र च व्याप्त्यभावान्नानुमानान्तर्भावः । सम्भवो भूयःसहचरितत्वज्ञानम् । यथा सम्भवति ब्राह्मणे विद्या यथा वा खार्यां द्रोणाढकप्रस्थावगमः । अत्रापि व्याप्त्यनपेक्षितत्वेन नानुमानान्तर्भावः । अभावस्तु विरोध्यभावज्ञानं तच्च विरोध्यन्तरकल्पकम् । यथा नकुलाभावज्ञानं नकुलविरोधिसर्पग्राहकम् । यद्वा ज्ञातेन कारणाभावादिना कार्याभावादिज्ञानात् कारणाभावोऽपि मानान्तरम् । वस्तुतः प्रतियोग्यनुपलब्धिरेव ज्ञाताभावं ग्राहयतीति प्रतियोगिग्रहाभाव एवाभावग्राहकमानान्तरमिति ॥ १ ॥

---

(१) पूर्वपक्षसूत्रम् । न चतुष्ट्वमित्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः । सूत्रं तु संशयार्थम् । न चतुष्ट्वं निश्चेतुं शक्यं कस्मात् । ऐतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात् परैरभ्युपगतादस्माकं संशयादिति सूत्रार्थ इति तात्पर्यटीका ।

149 and 150. The nature of doer etc. is not inherent in the soul, because we know by direct perception what the nature of the soul is.[1] The proofs for the existence of matter cannot be applied in the case of the Supreme and omniscient Self, in the same way as a firebrand cannot set fire to fire itself.

151. The relation of seer and seen, which obtains with reference to the material world, can never be applied to the thing which is the seer itself and whose nature is pure enjoyment.[2]

152. How can one thing (the self) be cognised by that method of knowledge by which we perceive the not-self, such as the enjoyed, the doer, etc., which are constituted by things entirely different (from the self)?

153. So, too, let not desire, hatred, etc., be deemed to be the properties of the self; for, they are known to be the properties of the mind (*manas*), from the passage, 'Desire is wish (or volition).'

154. The assumption that the soul (*sva*), or the supreme self (*para*), or both, is the cause of desire, hatred etc., leads to the conclusion that liberation is impossible.[3] Hence a careful consideration shows that they are the effects of nescience alone.

155. If the soul be the cause of desire etc., how can the knowing soul inflict injury on itself as on an

[1] The true nature of the soul is चैतन्य or pure consciousness The opponent says that the idea of 'I,' such as 'I do' etc., shows by direct perception that the soul is also of the nature of doer and so on. Verse 150 is an answer to this.

[2] *i.e.* there can be no seer of the seer.

[3] This is explained in the three following verses. स्वम् is used for जीवात्मन्, and पर for परमात्मन्.

enemy? Hence it is not right that the soul is their cause.

156. In the same way, if the supreme self (*para*) is their cause, then, since the evil is not (necessarily) cured, the reward (i. e. liberation), like the remedy for disease etc., will not be permanent (*ēkāntika*).[1]

157. How can the liberated soul (*dṛiṣi*), which has neither a body (*karaṇa*) nor composition (*samhati*), get out of the evil? In the same way, if both be said to be the cause, there will be no permanent reward.

158. Since the will of the Supreme Self is unrestrainable, there will be no certainty of liberation. But there is no such fallacy if we suppose their source to be nescience which is without a cause; for, nescience is destroyed (on liberation) through the instrumentality of the Supreme Self (*prasiddha*).[2]

159. The knowledge to be derived from the authority of Vedantic utterances is of the same nature as that which is admitted to be derived from proofs by which objects of sense etc. are perceived.[3]

160. If anything else (than the non-dual *Brahman*) be supposed (to be the object of knowledge), the Vedantas would lose all authority (as regards *Brahman*). Therefore no other object (of knowledge) should be assumed.

161. Even then, does not the injunction of ritual[4]

[1] This is because the supreme self that causes desire etc., for the soul in bondage may do the same after liberation.

[2] Anandagiri explains प्रसिद्ध as प्रत्यगात्मा स्वप्रकाशत्वेन प्रसिद्धः

[3] परागर्थप्रमेयेषु ॥ पराञ्चः शब्दादयो ऽर्थायेषां प्रमेयास्तानि प्रत्यक्षादिप्रमाणानि परागर्थप्रमेयाणि तेषु फलत्वेन संमतायां संवित् ॥ Anandagiri.

[4] i. e. the *Karmakānda*.

lose its authority? Hence, it would surely follow that the Vedantas, too, cease to be authoritative.

162. It is not so, for, all proofs continue to be proofs, only until the realisation of the Supreme Self since all proofs merge therein.

163. After that, no proofs will remain, since they are obliterated by the mere unity of Self, in the same way as the injunction of hawk-sacrifice etc. is rendered nugatory by the injunction of non-killing.

164. Hence, ritual is ordained only for the person who has nescience, and not for the *Brāhmaṇa* who has uprooted every spring of action.

165. Therefore, from the reasoning heretofore advanced, it follows that the duty (*adhikāra*) of the discriminating individual is to renounce all rites, but not, in the least, to perform rites.

166. As long as we speak of a doer, the stainless soul (*vastu*) cannot be realised; and, if the pure soul is realised, all talk of a doer must likewise cease.

167. Like light and darkness, the two ideas of doer and non-doer, being opposed to each other, cannot exist in the same thing and at the same time.

168. It cannot be said that, like standing and walking, the one follows the other in succession and that they are therefore not inconsistent, because, the knowledge of Self has for its object the Supreme Soul.[1]

169. Fire that is felt to be hot cannot, either by degrees or suddenly, grow cold of its own accord, but may do so if acted upon by some agent.[2]

[1] Sureṣvara admits the transition from doer to non-doer, but denies the contrary. Knowledge of Self leads to *Brahman* and not to *karman*.

[2] But the Self cannot be made to change its nature.

170. If you say that there is no inconsistency because the same object (Self) may appear differentiated or undifferentiated, it is not logical, since your statement is in itself contradictory.

171. The many cannot logically be one, nor the one, many; for, knowledge is only of what is real. If it be otherwise, it will be false knowledge.

172. How it is contradictory, will be explained later on The only object of knowledge (*mēya*) is the unity of Self, since that alone remains unknown.

173. Things that differ from each other are known by reasoning based on absence[1] (*abhāvēna pramāṇēna*). Hence your statement is contradictory.

174. Whether duality (*samsṛiti*) be supposed to be different from or identical with *Brahman*, it would follow that *Brahman* is not-*Brahman*, or, in the same way, that knowledge is fruitless and *Brahman* is divisible.

175. It is a fatal fallacy if you say that *Brahman* is possessed of nescience; and, if it is not possessed of nescience, it follows that knowledge is fruitless.[2]

176. It cannot be ignorantly contended that *Brahman* has nescience; for, *Brahman*, as actually seen, negatives all idea of nescience.

177. Since nescience is the result of experience, like the experience "I am *Brahman*,"[3] therefore, even

[1] *i. e.* one can be perceived only in the absence of another, since, being different, both cannot be simultaneously perceived.

[2] Since the *jīva* too, which is identical with *Brahman*, would likewise be free from nescience. This is to explain the latter part of the preceding verse.

[3] नतावदविद्यामानविषयः......................आत्मज्ञाने नित्यानुभवसिद्धम् ॥ Anandagiri.

nescience, when destroyed by knowledge derived from Scripture (*māna*), becomes of the nature of Self.

178. As long as *Brahman* is not known, it cannot be learnt by perc ption (*bodhāt*) that it has nescience. And, if it is accurately known, false knowledge (*mrishādhīh*) will not remain unaffected (or undestroyed).

179. He who has nescience is not capable of discerning that nescience himself. Hence, considering the true nature of things, nescience is not perceived as such.

180. It is not proper that knowledge should extend to things which have no actual existence (*vastunah anyatra*); and nescience is not a thing that really exists, since it cannot stand the test of (accurate) knowledge (*māna*).

181. That nescience is no more than nescience (or false), is established by this one criterion alone, namely, that it cannot stand the test of (true) knowledge.

182. In your argument, numerous assumptions will have to be made, all of them being opposed to correct knowledge. But in my argument, only nescience has to be assumed, and that, too, is dependent on actual experience.

183. On the mere springing-up of accurate knowledge derived from passages like 'That thou art,' etc., nescience and its effects will cease to have existed, to exist, or to come into existence.

184. Hence it is impossible to see, by any method of knowledge,[1] that there is nescience in him (*Brahman*), or what is the nature of such nescience, or whence it is; for it is exclusively the result of experience.

[1] *i. e.* प्रत्यक्ष, अनुमान, शब्द.

185. 'Let things like deities, materials, doer, etc., be not non-dual (or dual), since it is clearly seen to be so everywhere and since, also, their non-duality is not commonly known.'[1]

186. This is not sound, for, their is no proof known as 'being known everywhere' (*sarvalōka*), among the (established) methods of proof, upon the strength of which you argue in this manner.

187. Moreover where a belief exists in the mind of everyone that a certain fact is directly perceived,[2] such a belief is declared to be illusive.[3]

188. Just as objects near and within our sight are more longed for than things out of sight, so is the case with knowledge, derived from Scripture, which completely transcends everything, in its application to the Supreme Self.[4]

189. Direct perception, etc., exist only as dependent on self-experience. And, since such experience is its own proof, where is the necessity for proving the existence of Self?

190. And, since a thing is directly perceived not by itself but only on the strength of self-experience, the unity of Self spoken of in the Vedantas must be understood to be knowable by the Self alone.

[1] This is to refute the latter portion of verse 183, where 'nescience and its effects etc.' implies that duality is an illusion and only temporary.

[2] *i. e.* if सर्वलोक be included in प्रत्यक्ष.

[3] *e. g.* in the passage वाचारम्भणं विकारः etc.

[4] That is, though Scripture intends only *Brahman*, yet as *Brahman* transcends all, nescience makes it apply to such things only as are actually seen.

191 and 192. With reference to your arg[illegible] that, because the Vedas and Smṛitis are based on rites, therefore there is no means of liberation apart from rites, who ever maintained that rites do not also form a means of liberation? Have you not heard the Vedic passage, '*tam etam* etc.,' and the *Smṛiti*, '*samskārāh* etc.'[1]

193. Though the knowledge of the unity of Self is not directly inculcated by *Ṣruti* and *Smṛiti*, yet it is not foreign to these two, for, these two alone [illegible] about the Self.

194. Your argument[2] that the Vedas [illegible] us the true nature of the Self (*vastu*) has already been exploded[3] and will also be refuted later on.

195. Your contention,[4] too, that, in the absence of injunction, the passage (about knowledge of *Brahman*) ceases to have any force, will also be refuted with skill later on by arguments both clear and logical.

196. You have also said: "By the sole reason of their declaring the real nature of Self, we cannot conclude that the Vedantas aim at liberation (*pumartha*), for they are seen to abound in narratives[5] (*ākhyāna*).

197. "From the mere declaration that there was a king called Rama, it cannot be gathered in any case, in the absence of an injunctory passage,[6] that liberation is the object.

---

[1] ....इत्येतेचत्वारिंशत्संस्कारायस्य सब्रह्मणः सायुज्यं जयति ॥

[2] See verse 33.

[3] By verse 123.

[4] See verses 34 and 35.

[5] Such as stories of fights between gods and demons. And every such narrative does not preach liberation.

[6] Liberation, as forming one of the four *purushārthās*, must depend on an injunction, and cannot be implied from a mere assertion.

198. "Also, knowledge is seen throughout to be subservient to the other (viz. ritual), and, having gathered knowledge from the passage enjoining rites, the wise man performs sacrifice."

199. This has already[1] been, and will hereafter be, met by the argument that the fruit of knowledge is an object of direct perception.

200. 'But the declaration in Scripture that the fr... of everyone ...nowledge) is the destruction of misery etc., such a belief ...atement in praise of the soul (which is the ... ...ence your argument[3] is purely a product of ...our fancy.'

201 and 202. This is my answer; leaving aside the it which is intended by the context and implied by the passage, why do you, like an ignorant person, extract from it the secondary meaning of praise, which is neither supported by Scripture nor intended by the context?

203. Nor is there any unity of object (*ēkavishaya-tva*) between direct perception and Scripture; for, Scripture itself has, in various places, by passages referring to the non-attachment of the soul, pointed out the distinction by alluding to the passing through the states of dream etc.[4]

---

[1] See verse 129.

[2] The opponent says that passages like तरतिशोकमात्मवित् refer to the कर्माधिकृतात्मन, and are no authority as to the efficacy of *jṇāna*.

[3] That the fruit of knowledge is the object of direct perception.

[4] The opponent argues that the direct perception such as 'I am miserable' etc., is opposed to the Vedic declaration that misery ceases. The answer is that the two refer to two distinct objects, misery being connected with the three states of waking, dream and sleep, with which the *pratyagātman* is entirely unconnected and of which it is a mere onlooker. Hence there is no विरोध, as there is no एकविषयत्व.

न्तयोरपि दर्शयितव्यम् । कथं तर्हि प्र
त्वात् कार्यसम इतिसूत्रसङ्घटना । किमत्र
त्नस्य कार्यो विषयः हेयोपादेयतया व्यवह
यावत् । तस्यानेकत्वं पारमार्थिकापारमार्थि
तस्मात् प्रत्यवस्थानमिति । यद्वा प्रयत्नविषय
कत्वं जन्यत्वाभिव्यङ्ग्यत्वाभ्यां नानात्वम् । तस्मा
कान्तिकत्वेन प्रत्यवस्थानमित्युदाहरणविशेषपरं यो-
जनीयम् । बौद्धास्तु

साध्येनानुगमात् कार्यसामान्येनापि साधने ।
सम्बन्धिभेदाद्भेदोक्तिदोषः कार्यसमो मतः ॥

आद्ये व्याघातः द्वितीये परस्पराश्रयत्वम् अतः पक्षदृष्टा
न्तावसिद्धौ तत्साधकं च शब्दघटौ प्रध्वंससम्बन्धयोग्यौ
पूर्वत्रिकान्तर्भूतत्वात् व्यतिरेके च सामान्यवदित्यनु
मानम् तच्चात्मादावनैकान्तिकम् अतस्तयोरसिद्धि
स्थैवेत्यादिकं द्रष्टव्यमित्यर्थः । उक्तार्थस्य सौत्रत्वं न
शङ्कते । कथं तर्हीति । प्रथमं सकलानुमान
सूत्रार्थमाह । प्रयत्नस्य कार्यो विषय इति । हाने
व्यवहाररूपानुमानवाक्यगोचरस्य लिङ्गादेः सिद्धत्व
सिद्धत्ववतः प्रत्यवस्थानं कार्यसम इति सूत्रस्याहत्यार्थः
शब्दानित्यत्वानुमानपरमर्थान्तरमाह । यद्वेति । साध्येना
नित्यत्वेनाव्याप्तत्वात् कार्यत्वहेतुना शब्दस्यानित्यत्व
साधने कृते सपक्षे साध्येन व्याप्तो हेतुः पक्षे नास्तीति प
वर्तमानो हेतुर्नास्त्यतोऽसिद्धोऽसाधारणो वा स्यात् ॥

198. "Also, knowledge is seen throughout to be subservient to the other (viz. ritual), and, having gathered knowledge from the passage enjoining rites, the wise man performs sacrifice."

199. This has already[1] been, and will hereafter be, met by the argument that the fruit of knowledge is an object of direct perception.

200. 'But the declaration in Scripture that the
of everyone nowledge) is the destruction of misery etc.,
such a belief atement in praise of the soul (which is the
ence your argument[3] is purely a product of
our fancy.'

201 and 202. This is my answer; leaving aside the it which is intended by the context and implied by the passage, why do you, like an ignorant person, extract from it the secondary meaning of praise, which is neither supported by Scripture nor intended by the context?

203. Nor is there any unity of object (*ēkavishayatva*) between direct perception and Scripture; for, Scripture itself has, in various places, by passages referring to the non-attachment of the soul, pointed out the distinction by alluding to the passing through the states of dream etc.[4]

---

[1] See verse 129.

[2] The opponent says that passages like तरतिशोकमात्मवित् refer to the कर्माधिकृतात्मन, and are no authority as to the efficacy of *jṇāna*.

[3] That the fruit of knowledge is the object of direct perception.

[4] The opponent argues that the direct perception such as 'I am miserable' etc., is opposed to the Vedic declaration that misery ceases. The answer is that the two refer to two distinct objects, misery being connected with the three states of waking, dream and sleep, with which the *pratyagātman* is entirely unconnected and of which it is a mere onlooker. Hence there is no विरोध, as there is no एकविषयत्व.

दिति । अपरं च व्याप्तिलक्षणमुक्ताङ्गहानिप्रदर्शनपरं सूत्रम् दृष्टान्ते साध्यसाधनभावेन प्रतिज्ञातस्य धर्मस्य हेतुत्वात् तस्य उभयथा भावान्नाविशेष इति ॥ २७ ॥

धर्मस्य तदतद्रूपविकल्पानुपपत्तितः ।
धर्मिणस्तद्विशिष्टत्वभङ्गो नित्यसमो भवेत् ॥ २८ ॥

विवक्षितस्य कस्यचिद्विशेषणधर्मस्य तद्रूपत्वमतद्रूपत्वं वेति विकल्प्योभयथाप्यनुपपत्त्यभिधानेन धर्मिणस्तद्विशिष्टत्वखण्डनं नित्यसमः उपलक्षणनामैतत् अन्वर्थसञ्ज्ञा तूपरञ्जकसमेति । ततश्च नित्यानित्यभिन्नाभिन्नकार्याकार्याश्रितानाश्रितसत्यासत्यसदसत्स्थिरास्थिरैकानेकानुवृत्ताननुवृत्तविशेषणाविशेषणसापेक्षानपेक्षक्रमाक्रमवाच्यावाच्यपरोक्षापरोक्षवर्तमानावर्तमानहेयाहेयसहितासहितविरुद्धाविरुद्धज्ञाताज्ञातेष्टानिष्टद्विष्टाद्विष्टकृताकृतशक्ताशक्तो-

षेध्येन वादिवाक्येन जातिवादिवाक्यस्य प्रतिज्ञाद्यवयवयोगित्वसाधर्म्यसद्भावेन स्वव्याघातकत्वादिति सूत्रार्थः। दृष्टान्ते साध्येन व्याप्तत्वेन भूयोदृष्टस्य कृतकत्वादिधर्मस्य हेतुत्वात् तथाविधहेतोः जातिवाक्ये ऽभावान्नोभयोः साम्यमतो जातिवाक्यं व्याप्त्याख्ययुक्ताङ्गहीनमिति सूत्रान्तरार्थः ॥ २७ ॥

उपरञ्जकधर्मः संसर्गिधर्मः विषयविषयिधर्मः अनुपलब्धिसमायामुक्तः इह तु विषयसंसृष्टधर्मा इति विशेषो द्रष्टव्यः ततश्च नित्यसम इत्युपलक्षणनामत्वात्। न पश्चाद-

यदि महानससाधर्म्यादग्निमान् पर्वतः तर्हि तत्सा- धर्म्यात् त्रैलोक्यमप्यग्निमद्भवेदित्यादि । अविशेष- समायां तु पक्षादेरविशेषमात्रोपपादनम् इह तु विपक्षस्य सपक्षत्वापादने तात्पर्यमिति न तया सह संकरः । परिकरस्तु तद्वदेव बोद्धव्यः । उद्धारस्तु नेदं विवक्षितार्थसाधकम् असाधकसाधर्म्यात् अस्ति च तद- स्य घटधर्मत्वमिति वा तस्यामेव प्रतिज्ञायां समानध- र्मत्वात् सत्त्ववदिति वा तयोरेव पक्षदृष्टान्तयोर्घट- धर्मत्वादिति वा जातिवाक्यार्थः । सर्वत्र स्वोक्ति- व्यापनाद् व्याघातः । प्रथमे तावदिदमपि वाक्यं विवक्षितमर्थं न प्रतिपादयेत् तदप्रतिपादकसाध- र्म्यात् । अस्ति च तदस्य प्रतिज्ञाद्यवयवयोगित्वं स्थापनावाक्येनेति व्याघातः । द्वितीये ऽपि तस्यामेव प्रतिज्ञायां समानधर्मत्वात् स्थापनावाक्यवदिति । तृतीये नेदं प्रतिषेधकम् आकाशधर्मत्वात् स्थापना- वाक्यवदिति व्याघातः । तदेतत् सर्वं मनसि कृत्य साधर्म्यादसिद्धेः प्रतिषेधासिद्धिः प्रतिषेध्यसाधर्म्या-

णरहितत्वात् तत्साधर्म्यात्(?)। परिकरस्त्विवति। कस्यचि- द्धर्मस्य किञ्चित् प्रत्यसाधकत्वमस्या उत्थानबीजं हेतोरसा- धकत्वमारोप्यमित्यर्थः । असाधकसाधर्म्यात् अनित्यत्व- साधकेन घटत्वादिना घटधर्मरूपत्वरूपसाधर्म्ययुक्तत्वादि- त्यर्थः । स्थापनावाक्येन असाधकत्वेनाभिमतवादिवा- क्येन । असिद्धेः साध्यसिद्ध्यनङ्गस्य घटत्वादेः साधर्म्यात् घटधर्मत्वादेर्हेतोः वादिवाक्यप्रतिषेधो न सिद्ध्यति प्रति-

त्पन्नानुत्पन्नव्यवहृताव्यवहृतघटाघटसन्दिग्धासन्दिग्धेत्याद्यपीतरविकल्पोपक्रमाः संगृहीता भवन्ति। एवमियं प्रवर्तते अनित्यः शब्द इति प्रतिज्ञायां तावदाह। अत्र साध्यमनित्यत्वम् अनित्यं नित्यं वा। तत्र अनित्यत्वे कदाचित् तदभावाच्छब्दो नित्यः स्यादिति न पश्चादनित्यत्वावकाशः। अथ नित्यं चेदनित्यत्वधर्मस्य नित्यत्वात् तद्धर्मिणोऽपि शब्दस्य नित्यता स्यादनाश्रयधर्मावस्थानासम्भवात्। तदिदमुक्तं नित्यमनित्यभावादनित्यस्योपपत्तेर्नित्यसम इति। अनित्यतया साध्ये शब्दे नित्यमनित्यत्वस्य भावाच्छब्दनित्यत्वोपपत्त्यभिधानेन प्रत्यवस्थानं नित्यसम इत्यर्थः। किं चेदमनित्यत्वं नित्यं चेत् तर्हि नित्यो धर्मः कथं धर्मिणमनित्यं कुर्यात्। न हि रक्तजपाकुसुमयोगात् स्फटिको नीलः स्यात्। अनित्येन नित्यत्वेन योगादनित्यः शब्दः स्यादिति चेत् तर्हि रक्तजपाकुसुमसंसर्गनिबन्धनस्फटिकारुणिमवद्भ्रातत्वप्रसङ्गः। तदाकारवस्तु सम्बन्धात् तदाकारत्वे घटाकारद्रव्यसम्बन्धात् पटस्यापि घटत्वप्रसङ्गश्च स्यात्। अपि च अनित्यमनित्यत्वान्तरयोगादनित्यं स्वभावतो वा पूर्वत्रान-

---

नित्यत्वावकाशः धर्मिग्राहकप्रमाणबाधितत्वादनित्यत्वसाधनमयुक्तमित्यभिप्रायः। अस्यां प्रकारान्तरेण प्रत्यव-

वास्था उत्तरत्रातत्स्वभावानां घटादीनामनित्यता न स्यात् । तेषां चानित्यत्वस्वभावत्वे द्रव्यत्वव्याघात इत्यादिः सरूपेण प्रवृत्तिः । विरूपेण तु नित्यः शब्द इति प्रतिज्ञायां नित्यत्वयोगान्नित्यः । तच्च धर्मिणो-भिन्नमभिन्नं वा भिन्नं चेत् भिन्नत्वयोगात् तदपि भिन्न-त्वान्तरयोगादित्यनवस्थापातः । नित्यत्वधर्मस्य धर्मि-णः शब्दादभिन्नत्वे धर्मधर्मिणोरन्यतर एवावशिष्यते तत्र धर्ममात्रस्थितावाश्रयासिद्धिः । धर्मिमात्रस्थितौ साध्याभावेन कालातीतप्रसङ्गः । तथा अनित्यः शब्द इत्युक्ते अनित्यत्वं कार्यमकार्यं वा । कार्यमपि शब्देन सहोत्पद्यते ततः पूर्वं पश्चाद्वा । न प्रथमः कल्पः धर्मिणः समवायिकारणत्वेन पूर्वं भावावश्यम्भावात् । अत एव न द्वितीयः न च तृतीयः अनित्यत्वधर्मोत्पत्तेः

स्थानमाह । किञ्चेदमिति । अतत्स्वभावानां स्वभावतो नित्यानित्यत्वधर्मविलक्षणानां द्रव्यत्वव्याघातः अनि-त्यत्वं नाम नित्यत्वाभावः ततस्तत्स्वभावानां भावरूप-द्रव्यत्वं व्याहतमित्यर्थः । सरूपेण वृत्तिः अनित्यत्वादि-साध्यधर्मसजातीयपरम्परया प्रत्यवस्थानप्रकार एवमुक्त इत्यर्थः । विरूपेण साध्यधर्मविजातीयभिन्नत्वादिपरम्प-रया प्रत्यवस्थानरीतिः वक्ष्यत इति शेषः । भिन्नत्वयो-गात् भेदधर्मसंसर्गाद् भिन्नः स्यात् । तदपीति । तदपि भिन्नत्वं स्वधर्मेणानित्यात् भिन्नाश्च तस्यैतद्योगात् भिन्न-त्वान्तरेण भिन्नं भवेदेवं तदप्यनवस्थापात इत्यर्थः । धर्म-मात्रस्थितौ धर्मपरिशेषे । अत एवेति । धर्मिणः पूर्वसि-

पूर्वं शब्दो नित्यः स्यात् । तथा च नानित्यत्वावकाशः अनित्यत्वस्याकार्यत्वे तु धर्मिणोऽप्यकार्यत्वान्नित्यत्वापातः । तथा घट इत्युक्ते घटत्वयोगाद् घटः तत्किं नित्यमनित्यं वा नित्यत्वे घटोऽपि नित्यः स्यात् । नित्यधर्माश्रयत्वात् नित्यपरममहत्त्वाश्रयव्योमवत् । अनित्यत्वे सामान्यरूपताव्याघात इत्यादिसूत्रतात्पर्यार्थः । अस्या धर्मधर्मिभावो द्वारं प्रतिकूलतर्क आरोप्यः । उद्धारसूत्रं तु । प्रतिषेध्यनित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेः प्रतिषेधाभाव इति । अनित्यः शब्दो न भवति नित्यभूतानित्यत्वधर्माश्रयत्वात् । नित्यपरममहत्त्वाश्रयव्योमवदिति जात्युत्तरार्थः । तत्रानित्यतया प्रतिषेध्ये शब्दे नित्यमनित्यभावादिति हेतुः सिद्धश्चेत् तदा नित्यमनित्यत्वस्य स्वीकारादनित्ये नित्यत्वप्रसङ्गाभिधानेन कृतस्य प्रतिषेधस्याभावः । हेत्वङ्गीकारे प्रतिज्ञाव्याघातात् प्रतिज्ञाङ्गीकारे हेतुव्याघातादिति सूत्रोत्तरार्थः । यथायोगं व्याघातमात्रोपलक्षणं तात्पर्यार्थः । तथाहि यदुक्तम् ।

ऽवश्यम्भावादेव सहोत्पत्तिरयुक्त इत्यर्थः । तत्सरूपविरूपप्रवृत्तिप्रकाराणां सूत्रे ऽवकाश इत्याह । सूत्रतात्पर्यार्थ इति । प्रतिकूलतर्कशब्देन तद्धारकाश्रयासिद्धिप्रमाणबाधश्च गृह्यते । यथायोगमिति । एवं नित्यत्वाद्युपरञ्जकधर्मेषु साध्यमानेष्वपि प्रतिज्ञाहेत्वोरन्योन्यव्याघातमात्रं सूत्रतात्पर्यार्थ इत्यर्थः । तदेवोपपादयति ।

अतदाकारो वा धर्मो न धर्मिणस्तदाकारतामापादयतीति । तन्न धर्म एव हि धर्मिण आकारः न तु तेनापाद्यमर्थान्तरमस्ति ततश्चायुक्ताङ्गत्वं तदाकारापादकत्वस्यायुक्तस्याङ्गीकारात् । कथं धर्मिणो भिन्न आकारः स्यादिति चेत् न भिन्नस्यैवाकारत्वात् । न चातिप्रसङ्गः स्वभावतो व्यवस्थानात् । काल्पनिकं धर्मधर्मिभावमभ्युपगच्छतापि काल्पनिकस्यापि भेदस्यावश्याभ्युपगमनीयत्वात् । न हि स्वयमेव स्वस्य धर्मो भवति आत्माश्रयत्वप्रसङ्गात् स्वव्याघातश्च । इदमसाधकमित्यत्रासाधकत्वयोगादसाधकं तत्किं तदाकारमतदाकारं वा भिन्नमभिन्नं वा कार्यमकार्यं वेत्यादिविकल्पप्रवृत्तेर्दुर्वारत्वात् । एवं हेतुदृष्टान्त-

तथाहीत्यादिना । अतदाकार इति । अनित्यत्वादिधर्मरहितस्तद्भिना अनित्यत्वादिधर्मो न धर्मिणमनित्यत्वादियुक्तं करोतीति तदुक्तं पूर्वमित्यर्थः । कथं धर्मिण इति स्वरूपशब्दपर्यायः ततो न विरोध इत्यर्थः(?) । भिन्नस्याकारत्वे सर्वस्य सर्व एवाकारः स्यादित्यत्राह । न चातिप्रसङ्ग इति । स्वभावत इति । शरीरिणो भिन्नस्य शरीरत्वे ऽपि यथा घटपटादीनां शरीरत्वाभावः एवं भिन्नेषु कश्चिदेवाकारो न तु सर्व इति भावः । काल्पनिकमिति । धर्मधर्मिणोः भेदानवस्थानादभेदे धर्मधर्मिभावाभावान्न वास्तवः कश्चिद्धर्मधर्मिभावोऽस्ति किं तु काल्पनिक इति वदता बौद्धादिनेत्यर्थः । भेदानभ्युपगमे बाधमाह । न हि स्वयमेवेति । आत्माश्रयत्वप्रसङ्गात् आत्माश्रयं स्वमाश्रित्य स्वस्याव-

योरपि योज्यम् । एवमन्य आकारो न भवत्यन्यत्वादित्यादावपि दर्शयितव्यम् । अत्र सर्वत्र धर्मधर्मिभावानभ्युपगमे तत्रापि न हेतुसाध्ये स्याताम् । तदभ्युपगमे वा न प्रतिषेध इति सर्वत्रापि व्याप्तिहान्या युक्ताङ्गहानिश्च दर्शयितव्या । उपलब्धियोगादुपलब्धस्तत्रापि तथेति युक्तियोगाद्युक्तस्तत्रापि तथेति कृतियोगात् कार्यं तत्रापि तथेत्यादाविष्टप्रसङ्गत्वम-

स्थानप्रसङ्गात् । एवं हेतुदृष्टान्तयोरपीति । इदमसाधकमसिद्धत्वात् शब्दानित्यत्वे चाक्षुषत्ववत् इत्यत्रासिद्धियोगादसिद्धत्वं सा च तदाकारवृत्त्यादिकं चक्षुःसम्बन्धाचाक्षुषत्वं स च सम्बन्धस्तदाकारोतदाकारो वेत्यादिकं चोहनीयमित्यर्थः । अन्य आकार इति । अन्यत्वादिकं शब्दादेराकारो न भवितुमर्हति तदन्यत्वात् घटस्य पटवदित्याद्यनुमाने ऽपि प्रतिज्ञाहेतुदृष्टान्तेषु पूर्वोक्तरीत्या व्याघातो दर्शयितव्य इत्यर्थः । पुनरप्यसाधारणदोषमाह । अत्र सर्वत्रेति । सर्वत्र जातिवादिनोतदाकारस्तदाकारो वेत्यादिसर्वानुमानेषु न हेतुसाध्ये स्यातां हेतुसाध्ययोरपि धर्मिणो धर्मत्वाद्धर्मधर्मिभावानभ्युपगमे ते ऽपि न स्त इत्यर्थः । तदभ्युपगमे चेति । अनुमानसिद्ध्यर्थं धर्मधर्मिभावाभ्युपगमे वातदा[कार]स्तदाकारो वेत्यादिना वादिवाक्यप्रतिषेधो न सिद्ध[्ये]दित्यर्थः । व्याप्तिहान्या जातिवादिना तत्रतत्रोक्तप्रतिकूलतर्काणां दूषणव्याप्त्यभावेनेत्यर्थः । केषुचिदुपरञ्जकधर्मेषु तर्कस्याङ्गान्तरहानिमाह । उपलब्धियोगादिति । इष्टप्रसङ्गत्वम् उपलब्धिकृतीनामुपलब्धत्वोक्तस्वकार्यत्वसहभावात् तत्प्रयोगोस्मदिष्ट इत्य-

प्यस्तीति सर्वेषामपि प्रसङ्गानां यथायथं तर्काङ्गपञ्च-
कान्यतमहानिरूहनीया । एतामेव जातिमवष्टभ्य
शुष्कतर्कवादिनां बौद्धचार्वाकवेदान्तिनां बालजनस-
म्मोहनहेतवः कण्ठकोलाहला इति संक्षेपः ॥ २८ ॥

असिद्धतां वादिहेतोरुत्क्रान्तं साधयेत् स्वयम् ।
तद्दूषणान्मूलहेतुभङ्गः कार्यसमो मतः ॥ २९ ॥

हेतुशब्दोत्र साधनाङ्गोपलक्षणार्थः तेन पक्ष-
हेतुदृष्टान्तानामन्यतमस्य साधनाङ्गस्यासिद्धत्वमुद्भा-
व्य तत्साधकत्वेन स्वयमेवोत्प्रेक्षया किञ्चिदभिधाय
स्वोत्प्रेक्षितदूषणेन वादिसाधनभङ्गापादनं कार्यस-
मः । अनित्यः शब्दः कार्यत्वादित्युक्ते प्रत्यवतिष्ठते ।
असिद्धं तावत् कार्यत्वं तत्साधकं च प्रयत्नानन्तरी-
यकत्वं तच्चाभिव्यक्तौ कूपोदकादिभिरनैकान्तिकम् ।
ततश्च कार्यत्वासिद्धिस्तदवस्थैवेति । एवं पक्षदृष्टा-

र्थः । सर्वेषामपीति । नित्यानित्यत्वादिसर्वोपरञ्जकधर्म-
मुद्दिश्य ये प्रसङ्गाख्यास्तर्का उक्ताः तेषु केचिदव्याप्ताः
केचित् प्रतितर्कपराहताः केचिदिष्टार्थाय पर्यवसानहीनाः
केचिदिष्टरूपाः केचिदनुकूलाः अतः सर्वे तर्काभासा इत्यू-
हनीयमित्यर्थः । बालजनसम्मोहना न्यायतत्त्वानभिज्ञ-
बालजनभ्रामिका ॥ २८ ॥

तत्साधकं चेति । शब्दः कार्यो भवितुमर्हति प्रयत्नान-
न्तरभावित्वात् घटवत् प्रमाणात् कार्यत्वहेतुसिद्धिरित्य-
र्थः । एवं पक्षदृष्टान्तयोरपीति । शब्दघटयोरनित्यत्वं नाम
प्रध्वंसनं तयोः सम्बन्धो विद्यमानकाले ऽपि नष्टकाले वा ।

ing the fact that the person as knower is conscious of the body, sense-organs etc. as the *I*, as *Mine*. What then is the ground for this statement? The ground is that, as regards the personal consciousness, no feeling of assurance has arisen as to its being a case of false predication; whereas, in the other common instances e. g. the false silver and the double moon, an immediate assurance of their falsity has arisen. Again, this assurance arises after Nescience has been destroyed (bādhe); but, in the case of personal consciousness, the destruction of Nescience has not taken place. Hence it is logically proper, first to state a definition of false predication; and then to shew that the thing as thus defined really exists.

But even so, it may be argued, all that need be shewn in this context is the real existence of the thing defined. For when the existence of a thing has been ascertained through some organ of knowledge, no doubt as to the possibility of its existence can arise; and when no such doubt has arisen to be removed, it is unnecessary to shew further that the existence of the thing is possible. So far true, we reply. But the fact is that a certain kind of thing, e. g. a cavity of evil omen sometimes observed in the sun, or the swallowing of palaces by a magician, is rejected as a sheer impossibility, on the testimony of some organ of knowledge found trustworthy and applicable without exception to all our experience, and this in spite of the fact that an object of this kind is present to our consciousness:—the reason being that, though searching with all care, we have failed to discover any conditions which operating as defects could have brought about this unusual consciousness. Similarly, a person might

argue that false predication in regard to the Self should be rejected as an impossibility, being an error of which no faulty condition is perceived as the cause—since the Self (as described in the Vedānta system) is not an object of knowledge, is unrelated and without any conditions that could cause a false predication; and also because it can annul a false predication in regard to anything else, as being itself the pure Principle of Intelligence. Hence, to meet such an argument, it is necessary to make a distinct statement as to the possibility of false predication, apart from the proof of its existence. And this is it is that the Bhāṣya passage enounces. The sentence—WHAT IS THIS FALSE PREDICATION?—is enounced as a *tantra*, i.e. though uttered but once, it conveys more than one meaning, because the pronoun *what* may imply a mere question and also an objection; and both senses are possible in the present context. The Bhāṣya-writer first answers the question by stating the definition of false predication; and then premising a doubt as to the possibility of its existence, he resolves that doubt. To aid the understanding of learners in regard to such a subject-matter, teachers adopt this method—first, an imaginary opponent is introduced, and the teacher, supposing that the opponent and the pupil are urging an objection and asking a simple question, respectively, in the one sentence, replies thereto: then the opponent further expounds his position—in this way learned teachers introduce counter arguments and refute them. Such is the invariable method of elucidation adopted in composing passages of such a nature.*

* Cf. Text: p. 17, ll. 2, 4.

THE PRESENTATION OF SOMETHING PREVIOUSLY KNOWN ELSEWHERE, AS IF IT WERE A REMEMBERED THING—these words give a definition of adhyāsa, which word occurs in the preceding question—WHAT THEN IS THIS ADHYĀSA? The word *elsewhere* paratra, implies that a presentation *of something else*, parasya, had taken place. And it is of this *something* that the words—AS IF IT HAD THE CHARACTER OF A REMEMBERED thing—are predicated. The word smṛti here means a thing remembered; for even when not forming a name, the suffixes ghañ etc. can be applied to denote the syntactical object or the instrument, though not the agent, of the verbal root. This *other something* appears as if it were, while really it is not, a remembered thing; for it is clearly known as an object now directly present to consciousness. The fact of its having a character *like* that of a remembered thing is demonstrated by the words—A PRESENTATION OF SOMETHING PREVIOUSLY KNOWN. For in the case of a man who has not previously known what silver is, silver is not presented to his consciousness when a mother-of-pearl shell is in contact with his sense-organs. And hence the single definition of adhyāsa will apply equally to the presentation and to the thing presented*—such being the force of the sentence conveying the definition.

Page 7.

We explain how this is possible. The character of this presentation is like that of remembrance but it is not remembrance; for it does not re-present any individual object that had been presented previously through some organ of knowledge. But why is this presentation said to be like remembrance? Because it is mediated by the prior

* Cf. p. 10, n. 1.

activity of some organ of knowledge. The presentation of an object, which is not now in relation to some sense-organ, cannot arise except as being mediated by the prior activity of some organ directed towards that object.

But an opponent may urge: If, while the organ of vision is in relation with a certain object, a knowledge of some other object results, this knowledge is certainly remembrance, though its re-presentative character is for our consciousness obscured. The remembrance of that definite object is aroused as the result of some particular defect attaching to the sense-organs and to the other sources of knowledge. And, owing to this defect, the sense-organ is unable to make known the special object with which it really is in relation. Thus, owing to a defective sense-organ, we fail to distinguish, in such cases, between the presentative element (darçana) and the re-presentative (smaraṇa) which succeeds to it without any break; and as a consequence results the error of regarding them as numerically *one* consciousness, although they are not so presented. Compare here the case of two trees which seen from a great distance appear to be one tree, though not presented as one.

If, again, it be asked how a bitter taste arising in regard to a sweet object and due to some defect of the bile can be a re-presentation, in the case of an infant who has never had experience of a bitter flavour:—The opponent replies that the bitter taste must have been experienced by the child in some previous stage of existence. For if such previous experience be denied, no reason can be given why a *seventh* kind of flavour* is not perceived

* Flavours are of *six* kinds only.

by the infant, since equally with the bitter flavour this seventh kind has never been experienced, being in itself a sheer non-entity. Hence bile as a defect is the sole cause of the sweet flavour not being perceived and of the re-presentative nature of the bitter flavour being obscured: for the existence of a particular cause has to be inferred from the nature of the results produced.* Summing up the opponent's view:—in all cases where a sense-organ is in relation with a certain object, and a consciousness of some other object arises, this consciousness must be explained as a re-presentation followed by the obscuring of its re-presentative nature.

To all this we reply by asking the opponent to explain what he means by 'our consciousness of remembrance as re-presentative' (which character is *obscured*, he says, in certain cases.) He certainly cannot mean that we are now conscious of remembrance as a something bound up with (and thus defined by) a prior presentation; for, when a presentation has lapsed, it cannot reappear in consciousness to qualify the very thing which it had made known as object, in the first instance. Hence what remembrance makes known is the bare thing, and not the thing as bound up with the prior presentation of it. And this explains the fact that no presentation of a thing takes place when the latter is re-called to mind by means of its proper name. Otherwise it would follow that a word denoted not only a thing but also our consciousness of that thing. Again, our remembrance of some pleasant spot, as when we say—that is the place to live in—brings up the place merely and not our knowledge

* Cf. Viv. p. 23. ll. 4, 5.

of the place. And, further, many remembrances do occur which do not bring up the prior presentations.

Page 8. Nor, again, does this 'consciousness of remembrance' present itself as a distinct and self-defined (svagata) variety of cognition in general. For nothing, whether it be cognition, which is always a matter of inference, or anything else, is known as a merely self-defined entity. Hence the statement (of the Çābarabhāṣya I. 5.) :—"We infer that cognition as a form-less something exists." By *form-less* is meant that the special form of cognition cannot be described, its specific property is not made clear. So, then, this *consciousness of remembrance* cannot be a self-determined entity (स्वतः i. e., independent of the objects remembered).

Nor can it be said that this 'consciousness of remembrance' is due to a special kind of object i. e. to the object as remembered; for the latter is neither more nor less than the object which was perceived, in the first instance, by some organ of sense. Nor can it be due to a special kind of result i. e. a change wrought in the Intelligential Principle when remembrance takes place); for this result is determined by the same objects that wrought a change in the Intelligential Principle through the organs of knowledge. On the other hand, the knowledge expressed in—'I remember this or that object as one perceived elsewhere and at some other time'—is due to the connexion between words and the things signified; just as the judgment—'this thing is a cow'—is due to the connexion between the word *cow* and an individual thing with definite bodily parts. Hence remembrance, as being

itself the result of a mental relic of the object previously made known by some organ of knowledge, is confined to making known the said object. Then again, whether from the point of view of knowledge or of the thing known, there exists no further element in regard to which an obscuring might be supposed to occur as being due to the result of a defect in some organ of sense. Nor can it be argued that, in the case in question, re-presentation takes place of that o[illegible]g. silver, which had been already presented through some organ of knowledge; for, as we have said, that object is clearly known as something now present to consciousness. Hence we conclude that the knowledge which arises in regard to a certain object, while the sense-organ is in contact with some other object, is not remembrance, but is a distinct kind of presentation termed adhyāsa or false knowledge.

But the opponent may rejoin that, if such false knowledge is to be regarded as a distinct kind of presentation, a contradiction will arise as between the statement that false silver is presented to consciousness and the statement that the real pearl-shell is the real object of perception; and that such a contradiction cannot be agreeable to those who profess to follow the deliverances of consciousness. And if, by way of counter-reply, it be said that the pearl-shell even when presented as such is termed a *real* object in the sense only that it is something capable of being dealt with in that character which the presentation of it determines; that the shell certainly appears at the present moment as if it could be treated as silver, and hence there is no reason why, in this sense, it should not be termed the real object of percepti

then, urges the opponent, let the question be whether this presentation of the shell as silver is true or false. If this were a true presentation, no negation of it could occur as expressed in the judgment—this thing is not silver—as indeed no negation of the pearl-shell is found to occur. But as a fact of experience, silver is denied in such cases. Hence (says the opponent) this view is without logical support.

Again, it may be argued that, owing to some defect operating as a cause, a material change is produced in the pearl-shell so that it takes the form of silver. But this view, the opponent rejects, as equally unsound; his grounds are that in regard to the substance curds, which is a material product of milk, we are not conscious of it as milk, in the first instance, nor do we subsequently say that the perceived thing is not curds; whereas both these points hold in regard to the silver in question: he argues further that if the pearl-shell is materially changed into silver, just as the substance of milk changes into curds, then it should continue to exist in the form of silver even after the *defect* which brought about the change had ceased to operate. To meet this latter point, it may be urged that just as the heat of the sun is observed to be the cause both of the opening of the lotus flower and of its continuing open—the flower being seen to close when

Page 9. the heat is removed; so the silver ceases to exist, when the defect which brought it into existence has ceased to operate. But, rejoins the opponent, this illustration is not apposite, for, as in the case of the lotus, so in the case of the silver you ought to be conscious of it as having returned to its earlier condition

(viz. that of the shell); you ought not to deny, as you do in fact deny, that the silver is the pearl-shell.

On the other hand, some one may argue that the false silver is produced simply out of that presentation which was effected through a defective organ of sense. This view also is rejected as by no means correct. The silver cannot be an object for that presentation out of which it is said to be produced; because it does not exist in the same time as that of the presentation, which as cause is necessarily prior to its product, the silver. Nor again, will it suffice to say that the silver is the object of a presentation other than that out of which it is said to have been produced; for, if this be granted, logic would require that the silver be perceived also by an on-looker (and this is not the case). It may be rejoined that there is no reason why an on-looker should perceive the unreal silver (—his sense-organs being in a healthy condition); whereas the silver is the object of a presentation that was effected through some defective conditions. But this rejoinder is of no avail. For a second presentation, similar to the first in point of its defective origin, would complete its function in producing a second unreal silver; just as the first presentation is said to have produced unreal silver. Hence, as not being an object for either the first or the succeeding presentation, the silver would be in the same position as if it had not been produced at all i. e. would be unperceived. Thus, sums up the opponent, by a logical process of exclusion the conclusion has been reached that, in regard to the knowledge of silver, a certain obscuring of its re-presentative character does indeed take place.

But the opponent starts again: You hold, says he, that an obscuring of remembrance is not possible: similarly, the followers of another system have defined remembrance as a form of knowledge that does not appropriate any objects other than those which have been previously presented (Yogasūtra I. 11.): What explanation, then, is to be given of the fact that, while the sense-organ is in contact with the pearl-shell, the silver is presented to consciousness?

We reply: Remembrance, which is the result of a mental relic, and which is not recognized as remembrance, is not something produced independently of the knowledge gained through a sense-organ; but it is a single concrete form of knowledge produced by a sense-organ as aided by a mental relic. And how this happens, we explain. A defect in the cause is able not only to hinder the power of the cause to produce its appropriate effect but also to awaken some one definite mental relic; for what a defect in the cause can do must be inferred from the results actually observed in any given case. And, so in the present case, the necessary pre-condition or cause is but one, i. e. the presence of a mental relic and a defective sense-organ taken together. This single cause produces but one result, viz. a single concrete cognition. And unreal silver in the place of the pearl-shell is presented quite consistently as the object of this cognition, which was produced by a defective sense-organ aided by a definite mental relic. Hence by *false knowledge*, mithyājñana, is meant knowledge whose object is unreal. Falsity cannot belong to knowledge in itself; for there is no means of proving knowledge to be false. (Cf. p. 29.)

But here the opponent may object that the cause of the cognition in question consists of two specifically distinct factors (as above explained), and it cannot therefore produce a single concrete cognition. Our view, however, is faultless. It is commonly observed, for example, in the case of an inference, that two distinct factors, viz., perception of the logical reason (liṅga e. g. smoke) and the mental relic (of the observed connexion between smoke and fire) combine to produce an inferential knowledge of the thing to be proved (liṅgin e. g. fire). In a similar manner is produced the recognition of the identity of an object. In both cases, from a sense-organ and a mental relic conjoined is produced but the one concrete presentation, which carries remembrance within itself and which is termed pramāṇajñāna i. e. cognition by means of an instrument of knowledge. And since no such cognition takes place if the mental relic has not been awakened, the latter is held to be a cause. Hence it must be said that the perception of the logical reason, e. g. smoke, awakens the mental relic of the relation observed between smoke and fire, and, then, aided by this mental relic it produces an inferential knowledge of the thing to be proved e. g. the unperceived fire. And similar reasoning applies to the case of recognition of the identity of an object. Nor, on the other hand, can the opponent adduce any proof of his view that, in such cases, there are two distinct cognitions (produced successively by two separate and independent causes). Against his view may be cited the instance of the single concrete perception of a variously coloured object, where the causes of this percep-

Page 10.

But the opponent starts again: You hold, says he, that an obscuring of remembrance is not possible: similarly, the followers of another system have defined remembrance as a form of knowledge that does not appropriate any objects other than those which have been previously presented (Yogasūtra I. 11.): What explanation, then, is to be given of the fact that, while the sense-organ is in contact with the pearl-shell, the silver is presented to consciousness?

We reply: Remembrance, which is the result of a mental relic, and which is not recognized as remembrance, is not something produced independently of the knowledge gained through a sense-organ; but it is a single concrete form of knowledge produced by a sense-organ as aided by a mental relic. And how this happens, we explain. A defect in the cause is able not only to hinder the power of the cause to produce its appropriate effect but also to awaken some one definite mental relic; for what a defect in the cause can do must be inferred from the results actually observed in any given case. And, so in the present case, the necessary pre-condition or cause is but one, i. e. the presence of a mental relic and a defective sense-organ taken together. This single cause produces but one result, viz. a single concrete cognition. And unreal silver in the place of the pearl-shell is presented quite consistently as the object of this cognition, which was produced by a defective sense-organ aided by a definite mental relic. Hence by *false knowledge*, mithyājñana, is meant knowledge whose object is unreal. Falsity cannot belong to knowledge in itself; for there is no means of proving knowledge to be false. (Cf. p. 29.)

But here the opponent may object that the cause of the cognition in question consists of two specifically distinct factors (as above explained), and it cannot therefore produce a single concrete cognition. Our view, however, is faultless. It is commonly observed, for example, in the case of an inference, that two distinct factors, viz., perception of the logical reason (liṅga e. g. smoke) and the mental relic (of the observed connexion between smoke and fire) combine to produce an inferential knowledge of the thing to be proved (liṅgin e. g. fire). In a similar manner is produced the recognition of the identity of an object. In both cases, from a sense-organ and a mental relic conjoined is produced but the one concrete presentation, which carries remembrance within itself and which is termed pramāṇajñāna i. e. cognition by means of an instrument of knowledge. And since no such cognition takes place if the mental relic has not been awakened, the latter is held to be a cause. Hence it must be said that the perception of the logical reason, e. g. smoke, awakens the mental relic of the relation observed between smoke and fire, and, then, aided by this mental relic it produces an inferential knowledge of the thing to be proved e. g. the unperceived fire. And similar reasoning applies to the case of recognition of the identity of an object. Nor, on the other

Page 10.

hand, can the opponent adduce any proof of his view that, in such cases, there are two distinct cognitions (produced successively by two separate and independent causes). Against his view may be cited the instance of the single concrete perception of a variously coloured object, where the causes of this percep-

tion, viz. the various colours and so forth, are specifically different. But there is a difference to be noted, and it is this:—inferential knowledge, recognition of identity and the perception of a spotted object are effected by untainted causes and are, therefore, true presentations; whereas the perception of the silver in question proceeds from a tainted cause and is therefore a false presentation. Nor does our view conflict with the direct testimony of consciousness, for what this testifies to is only the silver as it presents itself. And thus we term the silver a product of Māyā (मायामयं). On the other hand, if the silver were real, it would be perceived by all the onlookers. For of course real silver, in order to be perceived, does not require the operation of a tainted cause. Otherwise it would follow that the knowledge of real silver could not be produced, if a tainted cause happened to be absent; just as colour is not perceived in the absence of light. But if the silver be held to be a product of Māyā, we can consistently hold that only those persons whose organs are tainted can see the silver; just as persons whose eyes are under some magic charm can see the magic object. Moreover, the denial (which results on the perception of the real shell and which is expressed in the words—'this thing is not silver'—implies that the silver is *a product of Māyā*. We explain how this is so. This very denial (तेन) implies the unreality (mithyātva) of the silver (तस्य) as a consequence of the statement as to the inexplicable character (nirupākhyatā) of the silver; for this denial means that—'this thing is not silver; the silver appeared in an inexplicable manner, mithyā i. e. it was unreal.' And this unreality would not hold

good, if the silver could be explained as a positive entity (रूपवत्त्वे) with some one definite predicate or another; just as the (real) pearl-shell which is in contact with a sense-organ cannot be held to be unreal; or as the cognition, which makes known an unreal object, cannot itself be held to be unreal (i. e. the judgment—'this thing is silver'—is something real, though the silver which it makes known, is unreal).

But here it may be objected that the definition of 'false predication' (given in the Bhāṣya) is not wide enough, since it cannot apply to the conditions of sleep and of sorrow for an absent object. In these conditions there is no contact of sense-organs with the perceived objects; so that there can be no presentation of something previously known elsewhere (which the definition requires). Hence also 'false predication' is remembrance, it is not a presentation like remembrance, for over and above the mental relic there is no cause to produce it. We reply that it is not remembrance, because the thing known is known as directly present to consciousness. Nor can it be something *like remembrance*, retorts the opponent, for it is nothing but a product of the mental relic that resulted from the prior activity of some organ directed towards the object known. We reply that, as already declared, the nature of remembrance is confined to making known an object that had been presented at some previous time by means of some sense-organ. Hence, in the case of a dream, the inner organ gives rise to a knowledge of an unreal object: the inner organ at this time is tainted by certain defects of the sleeping condition, and its activity corresponds to the character of those mental

traces which are now awakened by that (most general) cause of activity termed Adṛṣṭa or the unseen power of previous actions: Intelligence, self-presented, is the reality underlying that knowledge of an unreal object; in this Intelligence resides a certain power of Nescience; and it is this Nescience that seems to change materially into the unreal object of that knowledge, i. e. into the unreal silver. But, argues the opponent; if this is so, the presentation of dream-objects should be of a purely inward or subjective character. Well, we certainly do not deny this character. But, the opponent rejoins, in dreaming as in waking we perceive spatial limits; and this is not possible of dream-objects, if these belong to a purely subjective consciousness. He continues: if you hold that space also is of this subjective character, how is it that relation with such a space gives rise to a knowledge of a limit between an inner consciousness and an object outside consciousness? Here then is another weak point in your position. But we reply that this is not a weak point: For even in the waking condition, the *immediacy* that belongs to the perception of an external object is not something different in kind from that inner and immediate consciousness which is usually termed knowledge (of an object) gained through an organ

Page 11. (प्रमाणज्ञानात्): Illumination, i. e. knowledge, is of one kind only: Hence, even during the waking condition, an external object is perceived only in so far as it becomes enveloped within our inner and immediate consciousness; in no other way is knowledge possible of a thing which in itself lacks the nature of intelligence: And the case here is like that of the earthen vessel

६६२

traces which are now awakened by that (most general) cause of activity termed Adṛṣṭa or the unseen power of previous actions: Intelligence, self-presented, is the reality underlying that knowledge of an unreal object; in this Intelligence resides a certain power of Nescience; and it is this Nescience that seems to change materially into the unreal object of that knowledge, i. e. into the unreal silver. But, argues the opponent; if this is so, the presentation of dream-objects should be of a purely inward or subjective character. Well, we certainly do not deny this character. But, the opponent rejoins, in dreaming as in waking we perceive spatial limits; and this is not possible of dream-objects, if these belong to a purely subjective consciousness. He continues: if you hold that space also is of this subjective character, how is it that relation with such a space gives rise to a knowledge of a limit between an inner consciousness and an object outside consciousness? Here then is another weak point in your position. But we reply that this is not a weak point: For even in the waking condition, the *immediacy* that belongs to the perception of an external object is not something different in kind from that inner and immediate consciousness which is usually termed knowledge (of an object) gained through an organ

Page 11. (प्रमाणज्ञानात्): Illumination, i. e. knowledge, is of one kind only: Hence, even during the waking condition, an external object is perceived only in so far as it becomes enveloped within our inner and immediate consciousness; in no other way is knowledge possible of a thing which in itself lacks the nature of intelligence: And the case here is like that of the earthen vessel

being enveloped by darkness cannot come into until it has been enveloped by the light of a : Then as to the presentation of a limit i. e. *inside* and an *outside*, that is something wrought Māyā even during our waking life; for all this anifold world has its sole basis of reality in the Intel-igential Principle, and to this Principle, which is without parts, no such spatial limits can pertain: and it is as seemingly divided into parts by this manifold world t the Principle of Intelligence shines forth as if it ere *outside* and *inside*.

Or (to meet another group of objections) let it be granted that space and ether exist as two substances, which we know only through the mind (i. e. by inference, and not by sense-perception) and which (as being of infinite extent themselves) are the two realities of which in every case of false predication something else is predicated: if this be granted, then the word *elsewhere* is consistently employed (in the definition of false predication.)

Here the opponent asks how it is that (in many Vedic passages) Brahman is predicated of Name and other things; and, when asked for the ground of his question, he explains that in a predication of this kind we have not to deal with a tainted organ of knowledge or with the presentation of an unreal object (both Veda as organ of knowledge and Brahman as object are real). True enough, we reply: this predication we hold to be a *form of mental activity* and not a form of knowledge; because it has its source in a Vedic injunction (prescribing that Brahman should be pondered as being this or

al) that thing), and because as an activity this predi of or pondering of Brahman may be performed, o.e-performed, by the individual man as he may desire ; unreal thing can be made known by a tainted organ ; knowledge can be neither produced nor destroyed by t desire of a man, since it depends for its existence entirel on its cause sc. an organ of knowledge; hence human desire cannot enter in to determine knowledge.

Against this it may be argued that it is an observed fact that knowledge in the form of remembrance produced by a straining of the mind and is checked by a checking of the mind. True enough, we reply : this straining and this checking of the mind (which depend on a man's desire) are directly concerned in bringing about remembrance or in checking it ; on the other hand, the man's desire, though directly concerned in urging or preventing the activity of the organ of knowledge, e. g. in opening or closing his eyes (as he may choose to look at the object or not), is not directly concerned in producing knowledge (i. e. the man can no longer choose to see or not to see when once the visual organ has started into activity). Hence our regarding Brahman as this or that thing is simply a form of unreal predication, which has its origin in a Vedic injunction and is to be made with a view to obtaining a certain result ; just as a man is told to regard the wife of another as if she were his own mother in order to get rid of his sensual thoughts. Hence, in conclusion, a faultless definition of adhyāsa was given in the Bhāṣya, viz. THE PRESENTATION OF SOMETHING PREVIOUSLY KNOWN ELSEWHERE, AS IF IT WERE A REMEMBERED THING.

वद, तव वा कथम् न ममैवैष भरः सर्वो हि कालः सर्वमित्यादिषु बहुष्वपि शब्दैक्यं मन्यत इत्युक्त्वा

वाच्यस्वरूपेऽथ तदीयरूपे दूरादुपाधिष्वथवैकभावात् ।
सादृश्यभेदाग्रहतोऽथवैषु वाच्येष्विहैकीकरणं मतं तत् ॥

इति चन्द्रः सूर्य इत्यादौ वाच्यस्वरूपैक्यात् घटः पट इत्यादौ तदाकारैक्यादित्यादि तत्र न तावन्मुख्यमेवाकारैक्यं विवक्षितं जातिनिराकरणात्, अत एकाकारविकल्पयोग्यसंस्थानविशेषवत्त्वमभिमतमिति मन्यामहे। तच्चेदं सामान्यमापाततः क्वचित् प्रत्यक्षीक्रियते यथा घटत्वादि, क्वचित्सहकारिविशेषापेक्षया यथा विलीनघृतादौ गन्धग्रहणापेक्षया घृतत्वादि, मातापितृसंबन्धस्मृत्याद्यपेक्षया ब्राह्मणत्वादि, तदुक्तं भगवद्यामुनमुनिभिरागमप्रामाण्ये ।

ततश्च संततिस्मृत्याऽनुगृहीतेन चक्षुषा ।
विज्ञायमानं ब्राह्मण्यं प्रत्यक्षत्वं न मुञ्चति ॥
तथा च दृश्यते नानासहकार्यपेक्षया ।
चक्षुषो जातिविज्ञानजनकत्वं यथोदितम् ॥

इत्यादि ॥

सन्तु जगन्मङ्गलविग्रहाः पूर्वाचार्या लोकद्वयनिखिलमङ्गलाय नः इति साञ्जलिबन्धमभ्यर्थयामहे भगवन्तं लक्ष्मीसहचरं, तानपि च जगच्छुभकामनया विरचितानेकनिबन्धान् ॥

गोगवययोरविशेषेण गोशब्दवाच्यत्वं स्यात्, न स्यात् सौसादृश्यस्य सामान्यत्वात् यादृशसौसादृश्यं सामान्योपलक्षणं भवतां तदेव तदिति नियमनसिद्धेः, सादृश्यातिरिक्तं सौसादृश्यं नाम किमिति चेत् आपाततः समानधर्मातिरेकः अन्ततः स्वरूपविशेषः। यत्तु नारायणार्यैरुक्तं संस्थानमेव जातिः तत्प्रतिपिण्डं भिन्नत्वेऽपि द्वितीयादिपिण्डेषु सौसादृश्यात् प्रतिसंधीयमानं स्वाश्रयेषु वस्तुष्वेकबुद्धिशब्दनिबन्धनं भवति तदेव प्रतिसंधीयमानं सौसादृश्यमनुवृत्तिरिति चोच्यत इत्यादि। यच्च वरदविष्णुमिश्रैरुक्तं प्रत्यक्षाश्रयवर्तिसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसादृश्यानि प्रत्यक्षाणि उपमानं प्रमाणान्तरं चोक्तम् इदं च सादृश्यं गुणः अनुमानेन गुणत्वावधारणात् कार्यभूतसंख्याशक्तिसादृश्यानि गुणाः द्रव्यकर्मान्यत्वे सति आश्रितकार्यत्वात् घटगतशौक्ल्यवदिति तत्तेषां तथाऽभिमतमित्येकदेशिमतं मन्तव्यम्। यत्तु भट्टपराशरपादैरुक्तम्—

भूयोऽवयवसामान्यं सादृश्यं बहवोविदुः।
पृथक् प्रमेयं तदिति प्रमेये दर्शयिष्यते॥

इति तत्किमभिप्रायमिति न जानीमः, उत्तरत्र प्रमेयनिरूपणस्य विच्छिन्नत्वात्, अस्तु वा सादृश्यमन्यत् तन्मतेनापि, अस्माकं त्वेषा रुचिः तदत्र संस्थानमाकृतिरिति पर्यायाः तदेव परस्परनिरूपितवेषेण सौसादृश्यं जातिः सामान्यमिति च गीयते नान्यदुपलब्धम्। यत्तु भट्टपराशरपादैरुक्तं ननु द्रव्यत्वपृथिवीत्वशुक्लत्वपाकत्वादेः सामान्यस्यानाश्रयणे वाच्यानां स्वप्रवृत्तिनिमित्तानां च संतत्यवस्थादीनामनेकत्वादेकप्रयोजकाभावे कथमेकशब्दं

पलक्षणमिति चेत् किं तत्प्रतीतिरिति चेन्न आत्माश्रयप्रसङ्गात् अस्माकं तु तदेवैकीकरणमिति नोपद्रवः। उपलक्षणनिर्बन्धो नास्तीति चेत् अस्माकमपि माभूत्संस्थाननिर्बन्धः, द्विविधं हि सादृश्यं प्रतीतिसिद्धं धर्मसादृश्यं स्वरूपसादृश्यं चेति द्रव्येषु प्रायशो धर्मसादृश्यादेकरूपप्रतीतिव्यवहारौ तावदपेक्षया च श्रीविष्णुचित्तैरुक्तं भूयोऽवयवसामान्यमेव प्रतियोग्यपेक्षया सादृश्यशब्दवाच्यमिति धर्मान्तरशून्येषु स्वरूपसादृश्यादेव, एतावदभिप्रेत्य भगवता भाष्यकारेणोक्तं संस्थानं नाम स्वासाधारणं रूपमिति यथावस्तु संस्थानमनुसंधेयमिति। अत्र यदुक्तं विवरणे तत्तद्वस्तु पश्यतां तत्तदवयवविन्यासविशेषलक्षणं संस्थानमवभासते। ननु प्रतिव्यक्ति भेदात् संस्थानस्य कथं व्युत्पत्तिः, अथैक्यं तर्हि नासाधारणता नैतत् उपाधितोऽपि व्युत्पत्तेः यथा बालधितः पशुशब्दस्य, सादृश्यं चोपाधिरित्यादि तत्रावयवविन्यासेत्युदाहरणपरम् अन्यथा रूपादिषु रूपत्वं जातिरित्यादिव्यवहारभङ्गप्रसङ्गात् सादृश्यं चोपाधिरित्यादि त्वतिरेकपक्षस्वरसमप्यतिरेकपक्षानुपपत्तेः स्वरूपमात्रपरम्। ननु यदि स्वरूपमेव सादृश्यं स्वरूपमात्रत्वाविशेषात् सर्वमपि सर्वेण सदृशं स्यात् रूपं रूपान्तरेण सदृशमिति सहप्रयोगश्च न स्यादिति चेत् तदिदमतिरिक्तपक्षेऽपि तुल्यम् यदि तत्र सादृश्यं भवेत् सर्वेणापि तत्सदृशं भवेत् अविशेषात्, यदि तु तावत्प्रतियोगिकमेव सादृश्यं तत्रोपलम्भव्यवस्थाप्यं तर्हि तदेव स्वरूपं तावत्प्रतियोगिकं तत एव व्यवस्थाप्यतामविशेषात्, न च सहप्रयोगानुपपत्तिः, प्रतियोगिनिरूपितवेषेण सदृशशब्दविषयत्वात् अन्यथा विषयादिशब्दैरपि सह प्रयोगानुपपत्तेः, ननु यदि सादृश्यमेव सामान्यं तदा

षु भवद्भिरपि तथा निर्वाहात्, न हि तत्रानुगतं घटत्वमभ्युपगतं जातिसंकरभयात् व्यावृत्तजातिद्वयाभ्युपगमेऽनभ्युपगमेऽप्यनुवृत्तप्रतीतिव्यवहारयोः संस्थानसादृश्यमेव निबन्धनम् एवं सति तदेवास्तु सर्वत्रापि । नन्ववयवसामान्यानुवृत्त्याऽवयविन्यनुवृत्तप्रतीतिव्यवहारनिर्वाह इति चेन्न यतः कपालत्वादेरपि पूर्ववत् संकरादिदोषः समानः अस्तु तर्हि संकराभ्युपगमेनानुवृत्तं सामान्यमिति चेन्न अन्यथा प्रतीतिनिर्वाहे कल्पनायोगात् व्यावृत्तसंस्थानादेरनुवृत्तधीहेतुत्वेऽतिप्रसङ्गादिति चेत् व्यावृत्तानां संस्थानानामनुवृत्तव्यञ्जकत्वे कथं नातिप्रसङ्गः, तावतामेव तथाविधस्वभावत्वादिति चेत् तुल्यं तावतामेव तथाविधप्रत्ययहेतुत्वादिति वक्तुं शक्यत्वात् केवलमुपलम्भातिक्रमो गौरवं च भवन्मते, एवं पञ्चमोऽपि पञ्चतां गतः, तत्र ह्येक इति शब्देनानुविद्धप्रतीतिर्वा एकेन गवादिशब्देनानुविद्धप्रतीतिर्वा विवक्षिता आद्यो न कल्पते एकव्यक्तिरिति विवक्षायामसिद्धेः एकजातीयमिति व्यवहारस्य तत्तदुपाधिविशेषेणोपपत्तेः राशिसैन्यपरिषदरण्यादिष्वैक्यव्यवहारादिवत्, उपाधिश्चायमनेकेषामेकस्मृतिसमारोहः । नापि द्वितीयः तस्यानेकार्थेषु शब्देष्वपि समत्वात्, अनेकार्थव्यावृत्तः कश्चिद्विशेषोऽस्तीति चेन्न तस्यापि स्वरूपविषयादिशब्दवदुपपत्तेः स्वरूपविषयादिशब्दा हि नानारूपेष्वेवार्थेषु प्रवर्तमानाः केनचिदाकारेण साधारणाः केनचिदसाधारणश्च दृश्यन्ते तद्वद्गोशब्दोऽपि सलिलसरस्वतीकिरणाङ्कुरमाल्यादिषु साधारणः प्रकरणादिवशाद्विशेषमापद्यत इति विलक्षणनिमित्तकल्पनानवकाशात् । ननु यदि संस्थानमेव सामान्यं तर्हि तद्रहितेषु रूपरसादिषु कथं निर्वाहः, तव वा कथमुपलक्षणरहितेषु तेषु लक्षणमेवो-

यत्र सामान्यवत्त्वे सति संयोगविभागकार्यद्वयाभावः स गुण इति चेन्न यत्र तदुभयाभावः स्वोत्पादकसजातीयोत्पादकत्वतद्विजातीयत्वद्वयस्य चाभावः स गुण इति लक्षणकरणेन संस्कारस्यापि पृथक्करणप्रसङ्गात्, एवमन्यदपि चिन्त्यम् अतो द्रव्यमद्रव्यमित्येव विभागः ॥

अथ सामान्यं चिन्त्यते नित्यमेकमनेकसमवायि सामान्यमिति वैशेषिकादयः, तथा हि अनेकेष्वेकप्रतीतिव्यवहारो न निमित्तमन्तरेणोपपपद्यते तच्च न ज्ञानाकारः आत्मख्यातिभङ्गात् अर्थे च प्रवृत्त्यनुपपत्तेः भेदाग्रहस्य चायोगात्। नाप्यलीकम् असत्ख्यातिभङ्गात् तथा प्रतीतौ च प्रवृत्त्यनुपपत्तेः, अतथा प्रतीतावन्यथाख्यातिप्रसङ्गात सदसदादिविकल्पितस्य भेदस्यानुपपत्त्या तदग्रहस्यात्रायोगात् नाप्यपोहात्मकं विधिरूपेणैव प्रतीतेः पूर्ववत्प्रवृत्त्यनुपपत्तेश्च एतदन्यतयाऽन्यस्मिन् तदन्यतया चास्मिन्निरूप्यमाणेऽन्योन्याश्रयणात्, निष्प्रतियोगिकापोहस्य चायोगात् तदितरापोह इत्यत्र तच्छब्देन व्यक्त्युपादाने व्यक्त्यन्तरस्य वैजात्यप्रसङ्गेनाननुगतिप्रसङ्गात् तज्जातीयत्वेनोपादाने जातिस्वीकारात्। नापि संस्थानसादृश्यात्मकं तत्रानुवृत्तिव्यावृत्तिविकल्पायोगात् अतोऽनुवृत्तमस्त्वेकं सामान्यमिति। अत्रोच्यते केयमेकप्रतीतिर्नाम एकव्यक्तित्वप्रतीतिर्वा एकजातित्वप्रतीतिर्वा एकजातीयत्वप्रतीतिर्वा एकाकारधर्मवत्त्वप्रतीतिर्वा. एकशब्दानुविद्धप्रतीतिर्वा, न प्रथमद्वितीयौ अन्यतरपरिशेषादिप्रसङ्गात्, न तृतीयः असिद्धेः, एष्वनुवृत्तमिदमिति विकल्पानुदयात् घटस्य घटत्वमित्यादिव्यवहारस्य कालस्य कालत्वमित्यादिवदुपपत्तेः, नापि तुरीयः गोत्वाद्यपलापप्रसङ्गात् संस्थानमात्रस्यैवास्मदभिमतस्य तथात्वात् मृन्मयहिरण्मयघटादि-

क्षत्वं ब्रूम इत्युपक्रम्य तस्माद्देशाद्देशान्तरप्राप्तिर्लिङ्गमिति न मन्यामहे अपि तु तदेव तदिति मन्यामहे कल्पनालाघवादित्यादि । यत्तु भट्टपराशरपादैरुक्तम्—

इन्द्रियैरर्थ्यमानत्वाज्ज्ञायमानोऽर्थ उच्यते ।
द्रव्यं जातिर्गुणः कर्मेत्यसावर्थश्चतुर्विधः ॥

इति, तथा जातिगुणकर्मसु सामान्यसमाश्रयणे संयुक्तसमवेतसमवायसंभवादित्यादि तत्त्वैरेवान्तर्भावितसामान्यपृथग्गणनवत्, अत एव हि तैरेवोक्तं द्रव्यस्य धर्मिणोऽन्तरङ्गोधर्मविशेषो जातिः, जात्यनुप्राणितस्य विशेषकः सिद्धो धर्मविशेषो गुणः, तथाविधः साध्यः क्रिया, तद्धर्मकं द्रव्यमिति स्थविष्ठानि लक्षणानि, सौक्ष्म्येण तु विवेक्ष्यन्ते प्रमेयेष्विति । अथान्यः पक्षः न विभागपूर्वकसंयोग एव कर्म एकेन जलधरेण विभज्यमाने जलधरान्तरेण तेन वा पुनः संयुज्यमाने शिलोच्चये चलतीति प्रत्ययप्रसङ्गात् देशविभागसंयोगौ कर्मेति चेन्न महाप्रवाहपतितनिष्कम्पमकरे चलतीति प्रत्ययप्रसङ्गात् न प्रवाहो देशः किं त्वाकाशभूम्यादय इति चेत् देशप्रतीतिव्यवहारयोस्तत्रापि समत्वात् स्थिरदेशसंयोगविभागौ कर्मेति चेत् तर्हि स्थिरास्थिरविभागस्य संयोगाद्यतिरिक्तेन निर्वाह्यत्वात् सिद्धमतिरिक्तं कर्मेति । उक्तं च मानयाथात्म्यनिर्णये प्रत्यक्षलक्षणानन्तरं वरदविष्णुमिश्रैः तच्च द्रव्यगुणकर्मविषयं सकलपदार्थजातस्य त्रिष्वेवान्तर्भावात् तत्र द्रव्यलक्षणं संयोगीति, अकर्मा संयोगी गुण इति गुणलक्षणमित्यादि, प्रत्यक्षत्वं च कर्मणोऽन्यत्रापि तैरुक्तं कर्मणस्तु चाक्षुषद्रव्यवर्तिनश्चाक्षुषत्वमित्यादिना तच्च संयोगाद्यतिरिक्तमनतिरिक्तं वास्तु तृतीयकोट्यनुप्रवेशो न युक्त इति वयं मन्यामहे इष्टव्यतिरेकेण लक्षणकरणस्य सर्वत्र शक्यत्वात्

सिद्धः, जलधरशिखरिणोश्चलाचलरूपेण प्रतीतेरिति चेत् तर्हि सिद्धं नः समीहितम्, विभागपूर्वकेण संयोगेन कर्मानुमानमिति चेत् तर्हि जलधरान्तरेण विभज्यमाने जलधरान्तरेण संयुज्यमाने कर्मानुमानं स्यात्, यदि च कार्येण जातेन प्रतीतेन व्याप्यतयाऽनुसंहितेन च कर्मानुमानं चलतीति वर्तमानबोधो न स्यात् चिरनिवृत्तत्वात्तस्य, अस्माकं तु सत्ताक्षण एवेन्द्रियेण संबध्यते तावतैव च पदार्थान्तरेष्विवात्रापि वर्तमानप्रत्ययोपपत्तिः तदेवं प्रत्यक्षयोग्येषु प्रायशः प्रत्यक्षश्चलतीति धीविषयः, स च संप्रतिपन्नविभागपूर्वकसंयोगमात्ररूपो वा तत्कारणभूतोऽन्यो वेति सयूथ्यविवादः। तत्रैवमेकः पक्षः कर्महेतुतयैवाभ्युपगतैः प्रयत्नादृष्टादिभिः कर्मजन्यतयाऽभ्युपगतविभागपूर्वकसंयोग एव जन्यताम् न च मध्ये किमपि विशदमुपलब्धं येन गौरवपरिहारः स्यात् चन्द्रतारकादीनां विभागपूर्वकसंयोगदृष्टावपि संयोगसंतानानैरन्तर्याप्रतीतेश्चलतीति प्रत्ययाभावः यथा भ्रमणे सत्यपि प्रत्येकं कर्मक्षणेषु न भ्रमतीति प्रत्ययः किं तु निरन्तरतयाऽनुसंधीयमानेष्विति भवद्भिरपि स्वीकार्यं तथात्रापि संतोष्टव्यं, न च कर्मणा संयुज्यत इति पृथग्व्यपदेशाद्भेदसिद्धिः कर्मशब्दनिर्दिष्टस्य पूर्वसंयोगविश्लेषस्यैवोत्तरसंयोगारम्भकत्वाद्भेदव्यपदेशोपपत्तेः, न चोत्तरसंयोगे स्थिरे वर्तमाने यावत्तद्विनाशकालं चलतीति प्रत्ययप्रसङ्गः, विभागपूर्वकसंयोगारम्भक्षणमात्रस्य क्षणिकनिरन्तरतत्संतानस्य वा कर्मत्वात्, उक्तं च न्यायतत्त्वे प्रथमाधिकरणे यदि गमनपचनादीनां क्षणिकत्वं ज्ञायेत न हि ते क्षणिकाः संयोगवियोगविशेषत्वात्तेषामित्यादि, द्वितीयाधिकरणे चोक्तं गमनं नाम देशाद्देशान्तरप्राप्तिरिति प्रमातृपादे प्रसङ्गेनोक्तं वयं तु क्रियायाः प्रत्य-

विशेषो दृष्टः येन गुणान्तरकल्पने कुतूहलमत्र भवताम्। परत्वापरत्वे विना संयुक्तसंयोगभूयस्त्वाल्पीयस्त्वयोरेव दुर्निरूपत्वमिति चेत् तर्ह्यन्योन्याश्रयः व्यावृत्ततया निरूपितयोरेव तयोः परत्वापरत्वनिमित्तत्वं तदुत्पन्नाभ्यामेव परत्वापरत्वाभ्यां तन्निरूपणमिति अनिरूपितयोरेव तयोरुत्पादकत्वमिति चेत् तारानिशाकरादिष्वपि तथा प्रत्ययः स्यात् दूरत्वेनान्तरालाग्रहणान्नैवमिति चेत् त्यज तर्हि सत्तया कारकत्वं तथा च सिद्धं नः समीहितमिति। यत्तु प्रमेयसंग्रहे श्रीविष्णुचित्तैरुक्तं दूरे कथमिति चेत् तत्र कुशलमेव द्युमणिगगनादीतरव्यावृत्तमेव हि रूपं परिमाणपृथक्त्वदेशकालकृतपरत्वापरत्वादि चेन्द्रिययोग्यं सर्वं सहैव ज्ञायत इति तदपि न तत्त्वान्तरपरं विशिष्टप्रतिसंबन्धिमात्रपरमेव वैशिष्ट्यस्य चास्मदुक्तप्रक्रिययाऽप्युपपत्तेः, उपादानमात्रस्य तत्त्वान्तरत्वप्रतिपादकत्वाभावात् तथा हि तत्रैवमुक्तम् अन्धकारे स्थूणापिशाचस्त्रीपुंसादिसंशयास्तदवान्तरा एव नक्तं हि द्युमणिदीपमहीगगनस्वात्मादिव्यावृत्तिरपि न ज्ञायत इति न शक्यं वक्तुं न हि देहात्मभ्रममन्तरेण क्वचिद् द्रष्टृदृश्यसंस्कारोऽप्यस्तीति किमत्र पृथगुपादानमात्रेण स्थाणुपिशाचादयः पदार्थान्तरं भवन्ति अस्तु वा परमतेनैकदेशिभेदेन वा व्यवहारः तथापि विशिष्टोपलम्भनप्रतिपादनपरत्वान्न दोषः॥

अथ कर्म, चलनप्रत्ययविषयः कर्मः तत्प्रत्यक्षं करतलादिषु तथोपलम्भात् न त्वनुमेयं तदसिद्धिप्रसङ्गात् कार्यस्योभयाभ्युपेतकर्मसामग्रीमात्रेणैवोपपत्तेः अतिप्रसङ्गाच्च, कार्येण हि गिरिजलधरसंयोगेन गिरावपि कर्म कल्प्येत अन्यतरकर्मजनितोऽयं संयोग इति चेत् तत्केन सिद्धं, तत्रापि जलधरकर्मजनितोऽयमिति नियमश्च कुतः

योऽभ्युपगत एव भवद्भिः असंयुक्ताविति संयोगप्रागभावात्, ननु ध्वंसोऽपि भावान्तरमेव भवतामिति शब्दान्तरेण विभागः स्वीकृत इति चेन्न उत्तरसंयोगादिमात्रात्मकत्वात् सजातीयस्यैव कथं विरोधित्वमिति चेत् अभावनिरूपणं यावदेतच्चोद्यं मास्म विस्मरः, प्रत्ययस्तु वियुक्तो विघटितो विश्लिष्टो विनष्टः संयोगो विभक्तो विप्रकृष्टो देशान्तरगत इति तुल्यरूप एव जायते, एतदखिलमभिसंधायोक्तं न्यायतत्त्वे प्रमेयपादसप्तमाधिकरणे वियोगो न वक्तव्य इति, तत्रैव पश्चादप्युक्तम् अत्यन्तसामीप्यं संयोगः, दूरत्वं वियोग इति, अनेन संयोगोऽप्यपलपितः स्यादिति चेत् सामीप्यस्य समीपदेशसंयोगात्मकत्वेनैव निरूप्यत्वात् तथा चादेशादेशिनोरविशेषेण द्वयोरपि संयोगसिद्धिः, दूरत्वमपि देशविशेषसंयोग एवेति न ततोऽतिरिक्तो विभाग इति ॥

दिक्कालापेक्षया परापरधीहेतुगुणौ परत्वापरत्वे इति, परे ते अपि दिक्कालसंबन्धविशेषान्नातिरिक्ते लाघवात् अप्रत्यक्षपदार्थसंयोगः कथं प्रत्यक्ष इति चेत् न दिक्कालयोरपि प्रत्यक्षत्वस्य समर्थितत्वात्, यादृशोपाध्यवच्छिन्नदिक्कालसंबन्धः परत्वापरत्वोत्पादको भवतां तथाविध एव ऽस्माकं व्यवहारविषय इति नातिप्रसङ्गगन्धोऽपि, पूर्वस्मिं च व्यवहारनिर्वाहके सिद्धेऽपि परापरप्रत्ययमात्रात् पपदार्थान्तरक्लृप्तिः परापरजातिपरापरपरिमाणपरापरज्ञानशक्त्यादिष्वपि तादृशगुणकल्पनप्रसङ्गः अविशेषात् न्यूनाधिकव्यक्तिवृत्तिन्यूनाधिकदेशावच्छेदादिभिस्तत्र निर्वाह इति चेत् अत्रापि न्यूनाधिकदिक्कालसंबन्धात्तन्निर्वाह इत्युक्तमेव । भवद्भिरपि प्राक्त्वप्रत्यक्त्वादयः पूर्वोत्तरत्वादयो दिक्कालसंयोगमात्ररूपा निर्वाह्याः, तदत्र को नाम

संयोगविरोधी गुणो विभाग इति परे, तदयुक्तं नोदनपाटनादीनामेव संयोगविध्वंसकत्वात् विभागजनकतयाऽभ्युपगतानामेव तद्ध्वंसकत्वोपपत्तेः। न च संयोगजनकजातीयत्वादिनाऽनुकूलस्य कर्मादेस्तद्ध्वंसकत्वमुपपन्नमिति वाच्यम्, रूपादिजनकतयाऽभ्युपगताग्निसंयोगादिजातीयानां रूपादिनाशकत्वाभ्युपगमात् स्वजन्यव्यक्तेरपि स्वनाश्यत्वमिष्टं किं पुनरन्यस्याः उत्पाद्यमानघटादिषु शब्दोत्पादकतया कश्चिद्गुणः कल्प्यत इति चेन्न तत्रापि विभागजनकस्य पाटनादेरेव तज्जनकत्वोपपत्तेः तस्य च संयोगविशेषरूपत्वात् विभक्तप्रत्ययस्य च संयोगाभावविषयतयोपपत्तेः। तर्हि मेरुविन्ध्ययोरपि विभक्तप्रत्ययः किं न स्यादिति चेन्न तस्य विध्वंसात्मकत्वात् संयोगाभावमात्रनिबन्धनश्च विभक्तप्रत्ययस्तत्रापि केषांचिज्जायते उपचाराच्च तन्निर्वाहो भवतामपि, एवं क्वचित्स्वरूपभेदनिबन्धनो विभक्तप्रत्ययो निर्वाह्यः क्षणिकस्य विभागस्य स्थिरध्वंसात्मकत्वं कथमिति चेन्न तस्य परिभाषामन्तरेण क्षणिकत्वे प्रमाणाभावात् प्रतियोगिस्मरणादौ तद्विभागवानयमिति प्रत्ययस्य यावत्पुनःसंयोगमुत्पत्तेः प्रध्वंसात्मकत्वे पुनःसंयोगे सत्यपि विभक्तबुद्धिः स्यादिति चेन्न भवतामपि पूर्वसंयोगप्रध्वंसस्य विद्यमानत्वेनासंयुक्तप्रत्ययप्रसङ्गात् यावदुत्पन्नसंयोगध्वंसे सति तदातदा तत्तत्प्रतियोगिकतया तथा प्रतीतिरिति चेत् तुल्यम् द्रव्यद्वयनिष्ठतया प्रतीयमानस्य संयोगवद्गुणत्वमुचितमिति चे[illegible] अहो महावैशेषिकोऽसि यदभावस्य [illegible]ियोग्याधारिणः स्वतोमिलितत्वमभ्युपगच्छतामेवमभिमन्य[illegible] उभयनिरूप्यप्रतियोगिकतया हि संयोगप्रध्वंसस्योभयनिष्ठत्वप्रत्य-

तस्य स्वरूपसंस्थाननीलपीतादिभिर्निर्वाहात्, अपर्यायबुद्ध्युपाधिना तेषु सर्वेषु भेदशब्दव्युत्पत्तेः स्वरूपादिशब्दवत् तस्यैव चान्योन्याभावत्वात् इदमिदं न भवतीत्यत्रावधिनिरूप्यत्वमन्योन्याभावस्य न दृष्टमिति चेन्न शब्दविशेषात्तथोपपत्तेः पृथक्त्वाख्यगुणवाचकान्यशब्दपर्यायसंबन्धे पञ्चमी पाणिनेर्विवक्षितेति चेत् कथमन्योन्याभावपर्यायविवक्षायां घटात्पटो न भवतीत्यपि प्रयोगप्रसङ्गादिति चेन्न धर्मिपर्यन्तेष्विति विशेषात्, पृथक्त्वमिति निर्देशे कथमिति चेन्न तस्यापि धर्मिणमुल्लिख्यैव धर्मबोधकत्वात्, अमा नो नादयस्त्वसत्त्वे वर्तमाना नावध्याकाङ्क्षिणः। यद्वा तेषां समानाधिकरण एवावधिरिति सिद्धं भेदमात्रमेव पृथक्त्वमिति । उक्तं च भेदसमर्थनानन्तरं भट्टपराशरपादैः तदेवं क्लृप्तैरेव द्रव्यजातिगुणकर्मभिर्धर्मैरशेषाणामपुनरुक्तवित्तिव्याहारव्यवहाराणामुपपत्तेर्भेदो नाम न धमान्तरमपूर्वं कल्प्यम्, अत एव वैशेषिकपरिक्लृप्ताः पृथक्त्वविशेषादयोऽपि प्रोत्सारिता इत्यादि, भेदस्यैकानेकगतत्वविकल्पपरिहारे चोक्तम्-

नीलिमश्वेतिमानावप्यनेकावेव धर्मिणम् ।
नीलं शुभ्रं च भिन्दानौ स्फुटं ह्युपलभामहे ॥
ये विशेषपृथक्त्वादि सापेक्षं कल्पयन्ति ते ।
बिभ्यत्वात्माश्रयादिभ्यो न वयं दृष्टवादिनः ॥

इति, तदेवं स्वरूपधर्मौ यथासंभवं पृथक्शब्देन भिन्नादिशब्देन च व्यपदिश्येते उक्तं च न्यायतत्त्वे प्रमेयपादसप्तमाधिकरणे अतिरेकव्यतिरेकभेदेन द्विविधो भेद इति, अत्रातिरेको धर्म्यन्तरेष्वसन् धर्मः, व्यतिरेको धर्मधर्म्यादेः स्वरूपम् । यत्तु तस्मिन्नेवाधिकरणे ऐक्यं साकल्येन संयोगः तदभावो भेद इत्युक्तं तद्विभागाभिप्रायम् ।

सारितचूर्णपुञ्जेऽपि हि तथा दृश्यते, एवं महत्त्वबहुत्वाभ्यामपि देशव्याप्तिविशेष एवारभ्यते न ततोऽन्यदान्तरालिकमनुपलभ्यमानमिति । उक्तं च भगवद्यामुनमुनिभिः परिमाणं हि नाम देशावच्छेद इति, भगवन्नाथमुनिभिरपि प्रमेयपादसप्तमाधिकरणे संख्यान्तर्भूतं परिमाणमित्याद्युक्त्वा अनन्तरं चोक्तं दूरत्वं दैर्घ्यं सामीप्यं ह्रस्वत्वं तिर्यग्दूरत्वं स्थौल्यं तिर्यक्सामीप्यं कार्श्यं स्वांशस्याग्रे स्वांशस्थितिरार्जवं स्वांशस्य स्वांशस्थितिर्वक्रता एकदिक्स्थान्त्यावयवानां विरुद्धदिक्स्थान्त्यावयवदूरत्वसामीप्यसाम्यं वृत्तत्वं, केवलविरुद्धदिगन्तांशेभ्यः कोणविरुद्धदिगन्तांशानां दूरत्वसामीप्यसाम्यं चतुरश्रत्वमिति किंचिदन्तरमतिक्रम्य चोक्तम् अनेकव्याप्तिर्महत्ता तदभावो मन्दत्वमिति, देशकालसंख्योन्मानादिसर्वसाधारणपरिमाणमात्रस्य च स्वरूपमुक्तं समस्तभावतदात्मा परिमाणमिति । अत्रेदं तत्त्वम् आयामविस्तारघनभेदेन त्रिविधं परिमाणं यथासंभवं प्राक्प्रत्यगुदग्दक्षिणोत्तरोर्ध्वाधःपर्यवसितं चैतत् तत्र त्रिष्वपि दिग्द्वन्द्वेषु यत्राधिक्यं स आयामः, यत्र मध्यमत्वं स विस्तारः, यत्र न्यूनत्वं तद्घनमिति, त्रयाणामप्येषां सङ्करतारतम्यभेदाद्बहुविधो व्यवहारः, विभुद्रव्येषु कार्त्स्न्यापेक्षायां परिमाणं नास्ति तत्तदवच्छेदापेक्षायां यथासंभवं व्यवहार इति ॥

पृथक्त्वं पृथग्व्यवहारकारणं पृथग्गुण इति काणादादयः, तदिदं भेदमात्रान्नातिरिच्यते प्रत्ययस्य तावन्मात्रेण विश्रान्तेः कल्पकानां चान्यथासिद्धेः, भिन्नशब्देन च सहप्रयोगादर्शनात् भेदावध्यवधिकतया द्रव्येष्विवाद्रव्येषु च पृथक्त्वधीव्यवहारदर्शनात्, सा भ्रान्तिरिति चेन्न बाधकाभावात् भेदशब्दार्थ एव पृथक्त्वाख्यगुणोऽस्त्विति चेन्न

परिमाणं देशपरिच्छेदस्तु तद्धेतुक इत्यादि । अथान्यन्मतं परिमाणमेव तत्त्वान्तरं नास्ति तथा हि देशव्याप्तिविशेष एव तत्तत्प्रतिसंबन्धिनिरूपितवेषेण तत्तत्परिमाणं तत्त्वान्तरवादिनापि चैतत्परिमाणाविनाभूतमभ्युपगतं ततस्तदधिकस्वीकारे गौरवं भवेत् । ननु न तावद्देशसंयोगमात्रं परिमाणमतिप्रसङ्गात् ततोऽवच्छिन्नदेशविशेष इति वाच्यं न चावच्छेदो येन केनापि किं तु परिमाणविशेषविशिष्टेनेति वाच्यम् अतस्तदुपजीविना देशावच्छेदेन तदपन्हवो न युज्यते, देशपरिमाणं च देशान्तराधीनमित्यनवस्था च स्यात् तस्मात्स्थितं तत्त्वान्तरं परिमाणमिति तन्न एवं ह्यवच्छेदनिरूपणं यत्संयुक्तं देशं देशान्तरं च युगपदाक्रमितुं शक्तं तत्ततोऽधिकपरिमाणं यत्संयुक्तं देशमखिलमेकदैव यदाक्रमितुं न शक्तं तत्ततो न्यूनपरिमाणमिति तथा एकदिगार्जवावच्छेदेनाधिक्यं दैर्घ्यं, तेनैव न्यूनभावो ह्रस्वत्वं, बहुदिगवच्छेदेनाधिक्यं महत्त्वं, तेनैव न्यूनभावोऽणुत्वम् । न चैतदधिकमणुत्वमस्तीत्यणुनिराकरणादपि सिद्धं चतुर्विधमप्येतदेकस्मिन्नपि घटते यथा स्तम्भविशेषे एव स्तम्भान्तरापेक्षया स्थूलाणुत्वदीर्घह्रस्वत्वव्यवहार इति, एवं च सति नात्रावच्छेदके किंचित्परिमाणं निर्दिष्टं येनोपजीव्यविरोधानवस्थादिदोषः स्यात् ।

एतेन देशस्यापि न्यूनाधिकत्वे व्याख्याते न्यूनाधिकदेशसंयोगभेद एव स्वरूपातिरिक्तं परिमाणविशेषमन्तरेण न घटत इति चेन्न राश्यादिषु दृष्टत्वात् तत्र भागसंख्याधिक्यनिबन्धनः स इति चेन्न तर्हि सर्वत्र तत एवास्तु प्रशिथिलसंयोगवति समभागवत्त्वेऽपि परिमाणभेदो दृष्ट इति चेत् सत्यं तथापि प्रशिथिलसंयोगादेव परिमाणविशेषोत्पादकतया ऽभिमतात्तावद्देशव्याप्तिरेवाऽस्तु समूढप्र-

संख्यादिसद्भाव उक्तः गुणाश्रितसंख्यादीनां संयुक्ताश्रितत्वेन ग्रहणमिति एतदपि परमताभिप्रायेणेति मन्तव्यम् । यत्तु भट्टपराशरपादैः प्राकट्यनिराकरणादिप्रसङ्गेषु संख्या तु द्वितीयक्षण एव ज्ञायते सा संख्या समवायिनोऽस्तित्वविरोध इत्यादिषु प्रदेशेषु संख्याभ्युपगमनं व्यवहृतं तत्किं स्वितस्वाभ्युपगमेन अथ वा पराभ्युपगमेनेति न संविद्मः प्रमेयनिरूपणविच्छेदात् ॥

परिमाणप्रत्ययविषयः परिमाणं, तच्चतुर्धा अणुमहद्दीर्घह्रस्वभेदात् चत्वार्यपि परिमाणानि प्रतियोगिनिरूपितवेषाण्येव इदमितोऽणु इदमितो महत् इदमितो ह्रस्वं दीर्घमित्येव प्रतीतेः, अत्र च विभुद्रव्येषु परिमाणं नास्तीत्येके अपरिमितप्रत्ययात्, उक्तं हि श्रीवेदार्थसंग्रहव्याख्याने अनन्तपदव्याख्यानदशायां श्रीराम*मिश्रैः वस्तुपरिच्छेदो वस्तुनः परिमाणं देशपरिच्छेदस्तु तत्कार्यं इत्युक्त्वा अपरिच्छेदस्तु न गुण इत्यादि, उक्तं च भगवद्यामुनमुनिभिरागमप्रामाण्ये पूर्वपक्षे यदपि वियति परिमाणमिह निदर्शितं तदपि विमर्शनीयमिव–परिमाणं हि नाम देशावच्छेदः इयत्ता परितोभाववेष्टनमिति यावत् न च नभसि तदस्तीति कथमिव तदिह निदर्शनतया निर्दिश्यत इति । अन्ये तु इत इदमधिकमित्येवंरूपस्य परिमाणस्य तत्राप्युपपत्तेरस्त्येव तत्रापि परिमाणम् अपरिमितव्यवहारस्तु संकुचितपरिमाणप्रतिक्षेपपर इत्याहुः इदं च परिमाणाख्यं गुणान्तरं विवरणकारादिभिः स्वीकृतं, जन्माद्यधिकरणे विवरणेऽपि ह्युक्तं वस्तुपरिच्छेदो वस्तु

* एते श्रीराममिश्राचार्याः श्रीभाष्यकारानन्तरसमुद्भूता वेदार्थसंग्रहव्याख्यातृत्वादेवं सति श्रीराममिश्रद्वयम् । परे तु अस्मदाचार्यमहामालायां मेरुमणिस्वरूपाः श्रीभाष्याचार्येभ्यः प्राचीनाः ॥

प्रकृत्यादावपीति चिन्त्यं निरवयवगतमैक्यमप्येवं तथाप्येकक्रियान्वयेन समप्रधानतया समुच्चीयमानवस्त्वन्तरप्रतिपत्तिविधुरवस्तुमात्रप्रतिपत्तिविषयत्वमेकत्वम्, एतेनायमेकोऽयमप्येक इति व्यवहारोऽपि निर्व्यूढः समुच्चये सत्यप्येकक्रियान्वयित्वसमप्रधानन्याययोरभावात्, न चात्रोपलम्भादिविरोधः येन गौरवमपि सह्येत तदेवं गुणादावपि तत्त्वान्तरमन्तरेणापि संख्या प्रतीयमाना समानाकारेण निर्व्यूढा उपलम्भसाम्येऽपि वैरूप्यकल्पनमत्र भवतामधिकम् असंख्यातव्यवहारोऽप्येवंविधसंख्याप्रतिक्षेपकः अन्यथा भवतोऽपि विरोधात् ईश्वरादिबुद्ध्या सर्वसमुच्चयसद्भावेऽपि शतसहस्रायुतादिवदवच्छेदाभावादेवासंख्यातत्वमानन्त्यम् अनन्तेष्वपि न्यूनाधिकभावो विद्यत एव यथातीतकल्पदिवसादिसमुदायादीनां यथा च द्रव्यत्वपार्थिवत्वघटत्वादिव्यक्तीनाम् । यत्तु एकत्वमेकसंख्यावच्छेद इति भाष्यं तदपि न संख्यायास्तत्त्वान्तरत्वाभिसन्धिपूर्वकं निर्विशेषवस्तुवादिनं प्रति विशेषप्रसङ्गमात्रपरत्वात् अस्मदुक्तसंख्याया अपि विशेषत्वाविशेषात् । यत्तु भगवद्यामुनमुनिभिरात्मसिद्धौ द्वित्वादेरपि यावदाश्रयभावित्वमुक्तं तदपि वैशेषिकप्रक्रियाबीभत्सामात्रादिति मन्यामहे । उक्तं हि भगवन्नाथमुनिभिः प्रमेयपादसप्तमाधिकरणे संयोगान्तर्भूता संख्येति समस्ततद्गात्मा संख्येति च अस्यार्थ उच्यते बुद्धिविशेषसंबन्धोवनिर्दिसंख्यात्वेनोपपादितः स च संयोग एव । यद्वा संघात्याद्यभिप्रायं तदिदं मन्तव्यम् । वरदविष्णुमिश्रादिस्यात्त्वात्मसिद्धिवचनानुसारेणातिरिक्तसंख्याऽभ्युपगता ...क्तं प्रत्यक्षाश्रयवर्तिसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसादृश्यानि प्रत्यक्षाणीति, गुणेषु च

मिका तावतैव लङ्कायां तदवस्थानसिद्धेः सर्वत्र स्थापनासंभवाच्चान्यत्र स्थापनं स्वयमेव निवर्त्तत इति न्यायार्थमाहुः । सर्वथा ऽपि प्रकृतोदाहरणसंगतेर्न क्षतिः । तथा ऽयं पट एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी अवयवित्वात्पटान्तरवदित्यत्रावयवित्वेन स्वाधिष्ठानवृत्त्यत्यन्ताभावप्रतियोगित्वलक्षणमिथ्यात्वरूपसाध्ये सिद्ध दृश्यत्वादिति हेतुर्विद्यमानो ऽपि तत्प्रयोगस्य पिष्टपेषणन्यायेनायोग्यत्वात् मिथ्यात्वस्य सिद्धत्वेन साध्यत्वाभावाच्च स्वयमेव निवर्त्तते । पूर्वं कस्य चित्प्रयोगे चेच्छैव नियामिकेति दिक् । ८ । १२ ।

अत्र पिष्टेति प्रासङ्गिकः १ । १३ ।

मृतमारणन्यायो ऽपीह बोध्यः । २ । १४ ॥

जलमन्थनन्या० । ३ । १५ ।

काकदन्तपरीक्षान्या० ४ । १६ ॥

गर्दभरोमगणनन्या० । इदं न्यायत्रयं वैयर्थ्यमात्रे बोध्यम् । ५ । १७ ॥

एवं पटे मिथ्यात्वे निश्चिते घटादिषु स्थालीपुलाकन्यायेन तन्निश्चेयम् । पुलाकाः सूक्ष्मधान्यविशेषाः यथा प्रज्वलितचुल्ल्यधिरोहितस्थाल्यन्तर्गतेषु एकस्मिन्पक्वे निश्चिते सर्वे पक्वा इति निश्चीयन्ते तद्वत्प्रकृते ऽपीत्यर्थः ६ । १८ ॥

अनेकेषु वाक्येषु पदेषु वा व्याख्येयेषु प्रथमपठितमिति न्या- दनु पू-
वाक्यं पदं वा बहु वक्तव्यं परित्यज्य मध्ये अन्ते वा पठितं देहस्य
स्वल्पवक्तव्यं पूर्वं व्याख्यायते यत्तत्सूचीकटाहन्यायेन । पूर्व-
ज्ञेयम् । यथा लोहकारं प्रति पूर्वं कश्चित्तेन कटाहोत्पादनार्थी
नार्थी आगतः पश्चात्सूच्युत्पादनार्थी प्राप्तः । तत्र यथा लो-

६७६

हश्च शरीरस्य। किंच सांख्यैः प्रकृतिपुरुषविवेकान्मोक्षं वदद्भिः प्रकृतिरपि तदर्थं ज्ञेयेति स्वीक्रियते न चात्राव्यक्तं ज्ञेयत्वेनोच्यते। तथा च ज्ञेयत्वावचनानुसारेणाव्यक्तपदेन न प्रधानं ग्रहीतुं शक्यम्। तद्ग्रहे तु तदनुसारित्वत्यागः। किंच कठवल्ल्यामग्निजीवपरमात्मनामेव पूर्वोत्तरवाक्यपर्यालोचनया वक्तव्यत्वेनोपन्यासस्तद्विषय एव प्रश्नश्च दृश्यते न प्रधानस्य येनास्याव्यक्तपदवाच्यत्वं स्यात्। तथा चैतदनुसारेणापि नेदमव्यक्तपदवाच्यं तदुपगमे तु तदनुसारित्वत्यागोऽपि प्रसज्यतइति। ६।

विषं मृत्युरिति न्यायोऽत्र प्रासङ्गिकः। १। ७।

लाङ्गलं जीवनमिति। २। ८।

आयुर्घृतमिति। ३। ९।

दधिपयसी प्रत्यक्षो ज्वर इति च न्यायोऽनेन तुल्यः। ४। १०।

यस्तु त्यजेदेकमिति न्यायं नानुसरति सः अल्पस्य हेतोर्बहु हातुमिच्छन्विचारमूढः प्रतिभासि मे त्वमिति न्यायविषयतां नातिवर्त्तते। ७। ११।

एकस्मिन्साध्येऽनेकेषु साधनेषु सत्स्वप्यादावेकस्मिन्प्रयुक्ते सति साध्यसिद्धावन्यप्रयोगेऽर्थाभावात्तत्स्वयमेव निवर्त्तते। पूर्वं कस्य चित्प्रयोगे चेच्छैव नियामिकेति विवक्षायामशोकवनिकान्यायः प्रयुज्यते। यथा रावणो लङ्कायां सीतां नीत्वा राक्षसीभ्य आज्ञप्तवान्। अशोक-
तद्
वनि कायां स्थाप्येति। ताश्च तत्र बह्व्यः सन्ति तत्रैकस्यां
स्था पिता चेत्तावतैव तदाज्ञायाः परिपालितत्त्वात्सर्वत्र
स्था यितुमशक्यत्त्वाच्चेतरत्र स्थापनं स्वयमेव निवर्त्तते।

केचित्तु यथा रावणेन सीता नीता चेदशोकवनिकायामेव कुतः स्थापिता नान्यत्रेत्यत्र रावणेच्छैव निया-

अत्र विशिष्टवैशिष्ट्यन्यायो व्याख्यातः । ४ ।

नाज्ञातविशेषणा विशिष्टबुद्धिर्विशेष्यं संक्रामतीत्यपि न्यायः पूर्वैरुदाहृतः विशेषणज्ञानस्य विशिष्टज्ञानहेतुत्वान्न तदन्तरेण तत्सिद्धिः । न हि दण्डज्ञानं विना दण्डीति ज्ञानं संभवति न चाज्ञातविशेषणं तद्विशेष्यं विषयीकरोतीति तदर्थः । ५ ।

यत्रोभयकोटिकसंशये एकत्र बह्वर्थहानिः द्वितीयस्वीकारे त्वेकार्थहानिस्तत्र द्वितीयपक्षः स्वीकर्त्तव्य इति विवक्षायां त्यजेदेकं कुलस्यार्थे इति न्यायः प्रसरति । तद्यथा कठवाक्यम् । आत्मानं रथिनं विद्धि शरीरं रथमेव तु । बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च । इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् । आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः । सो ऽध्वनः परमाप्नोति तद्विष्णोः परमं पदमित्यनियतेन्द्रियादेः पुंसः संसारित्वमन्यस्य च परं पदं श्रावयित्वा किं तदित्याकाङ्क्षायां तेभ्य एवेन्द्रियादिभ्यः परमात्मानं विष्णोः पदं दर्शयति । इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः । महतः परमव्यक्तमव्यक्तात्पुरुषः परः । पुरुषान्न परं किं चित्सा काष्ठा सा परा गतिरिति । तत्र संशयः । किमव्यक्तशब्देन प्रधानमुच्यते उत पूर्ववाक्यसंदर्भे प्रकृतं शरीरमिति । तत्र द्वितीयपक्षस्वीकारे ऽव्यक्तपदमुख्यवृत्तिमात्रत्यागः प्रसज्यते । अत्र हि विषं मृत्युरिति न्यायात्प्रकृतिवाचिशब्देन विकारो लक्ष्यते । न च कथं देहस्य महतः परत्वम् । अविद्यानिष्ठपरत्वस्यात्रोपचारात् । पूर्वकल्पस्वीकारे तु परिशेषाद् न्याय्यत्वेन प्राप्तग्रहस्य शरीरस्य परित्यागः प्रसज्यते पूर्ववाक्येऽवश्रुतस्य प्रधानस्य परिग्र-

इति सकलकल्याणगुणभूरुहारण्यश्रीनानकसद्वंशसन्मौक्तिकश्रीरामदयालुशिष्येण सोमवंशीयविन्दरायकुलोत्तंसश्रीगुलाबरायवत्मीत्मजेनोदासीनावस्थेन रघुनाथवर्मणा विरचिते लौकिकन्यायसंग्रहे प्रमेयनिरूपणपरः पूर्वभागः ।

अथ प्रमाणनिरूपणप्रचुरो भागः प्रारभ्यते । 'अत्रैव च प्रसङ्गात्पूर्वोक्तार्थो ऽपि दृढीक्रियते । यदा हि तरति शोकमात्मविदित्यादौ प्राचीनतार्किकमतमाश्रित्याखिलपदार्थस्मरणाद्युगपदेव विशेष्ये विशेषणं तत्र विशेषणान्तरमिति न्यायेन सर्वपदार्थानामन्योन्यं क्रियाकर्मभावेनान्वयरूपः शाब्दबोधः स्वीक्रियते तदा खलेकपोतन्यायो ऽवतरति । यथा ऽऽहुः वृद्धा युवानः शिशवः कपोताः खले यथा ऽमी युगपत्पतन्ति । तथैव सर्वे युगपत्पदार्थाः परस्परेणान्वयिनो भवन्तीति । अत्र वृद्धयुवशिशुभिः कपोतैश्चिरतरचिरसन्निहितकालोक्तानां पदार्थानां साम्यं बोध्यम् । न चोत्तरपदार्थस्मरणेन पूर्वपदार्थस्मरणनाशात्कथं युगपत्सर्वपदार्थस्मरणमिति शङ्क्यम् । प्रत्येकपदार्थानुभवजन्यसंस्कारैरन्त्यस्य तावद्विषयकस्मरणस्योदयसंभवात् । एतेन विशेष्ये विशेषणमिति न्यायो ऽपि व्याख्यातः । यदि तु स्वार्थोपस्थितिविषयो भवति तेन तेनैवान्वितः स्वार्थः पदैः प्रथममनुभाव्यते । अनन्तरं च महावाक्यार्थबोध इति नवनैयायिकमतमाश्रित्य विशिष्टस्य वैशिष्ट्यार्थाकाङ्क्षितं योग्यं च यद्यत्स्वमिति न्यायेन शाब्दबोधो ऽङ्गीक्रियते तदा राजपुरप्रवेशन्यायः प्रवर्त्तते । तत्र हि क्रमेणैव बहूनां पुरुषाणां प्रवेशो भवति न युगपत् । अस्मिन्मते पूर्वोक्तं समूहालम्बनात्मकं स्मरणं विना ऽपि निर्वाह इति संक्षेपः २ ।

भोक्त्रपेक्षा । पुरुषस्तु मोक्षार्थं प्रधानमपेक्षते । तथा हि भोग्येन हि प्रधानेन संबद्धः पुरुषस्तद्गतं दुःखत्रयमात्मन्यभिमन्यमानः मोक्षं प्रार्थयते स च सत्त्वपुरुषान्यताख्यातिनिबन्धनः न च सा प्रधानं विनेति भवति पुरुषस्य मोक्षाय प्रधानापेक्षा । अनादित्वाच्च संबन्धपरंपराया भोगाय संबद्धो ऽपि मोक्षाय पुनः संयुज्यतइति युक्तम् । यथा चान्धपङ्गुसंयोगः स्वजन्यगमनादिकं विना नेष्टफलाप्तये इति स एव तदर्थं गमनादिकमुत्पादयति तथा प्रकृतिपुरुषसंबन्धो ऽपि न भोगाय न मोक्षाय च पर्याप्त इति स एव तदर्थं करोतीति दिक् । ११४ । १५९ ॥

ननु सांख्यैः प्रधानस्य स्वतन्त्रस्य प्रवृत्त्युपगमात् पुरुषस्य च प्रवर्त्तकत्वास्वीकारात् तथा च तेषामपसिद्धान्तः स्यात् कथं चोदासीनः पुरुषः प्रधानं प्रवर्त्तयेत् । पङ्गुरपि ह्यन्धं वागादिभिः प्रवर्त्तयति । नैवं पुरुषस्य कश्चित्प्रवर्त्तनव्यापारो ऽस्ति निष्क्रियत्वान्निर्गुणत्वाच्चेति शङ्कानिरासाय लोहचुम्बकन्यायो ऽवतरति । यथा चुम्बकमणिः स्वयमप्रवर्त्तमानो ऽपि लोहं प्रवर्त्तयति तथा पुरुषः प्रधानं प्रवर्त्तयिष्यतीति । अयं न्यायो ब्रह्मवादिमते ऽपि प्रवर्त्तते । इयांस्तु विशेषः यद्ब्रह्मवादिभिरनिर्वचनीयस्याध्यासिकस्य मायाब्रह्मसंबन्धस्याङ्गीकारान्न तन्मते को ऽपि दोषः ब्रह्मणि प्रवर्त्तकत्वस्याध्याविद्यकत्वाङ्गीकारान्न कौटस्थ्यहानिरपि । सांख्यमते तु चुम्बकस्यानित्यसंनिधिरेव व्यापारः प्रधानपुरुषसन्निधेस्तु नित्यत्वेन व्यापारत्वायोगः । तुष्यतु दुर्जन इति न्यायान्नित्यस्यापि व्यापारत्वोपगमे प्रधानप्रवृत्त्यविच्छेद इत्यादयो दोषा वज्रलेपवदनिवार्या इति दिक् । ११५ । १६० ॥

तुष्यत्विति न्यायः प्रासङ्गिकः । ११६ । १६१ ॥

यथा कूर्मदेहे सन्त्येवाङ्गानि निःसरन्ति विभज्यन्ते इदं कूर्मशरीरमेतान्येतस्याङ्गानीति। एवं निविशमानानि तत्राव्यक्तीभवन्ति । तथा मृत्पिण्डाद्धेमपिण्डाद्वा घटमुकटादीनि इति प्रदीपन्यायः ११० । १५५ ।

कूर्माङ्गन्यायश्च तत्राद्यो निगदव्याख्यातः शिष्टं न्यायत्रयं तु स्वस्थाने व्याख्यातम् । १११ । १५६ ॥

वातादिन्यायो ऽपीह बोध्यः। वातपित्तश्लेष्माणो हि अन्योन्यविरोधिनो ऽपि देहधारणलक्षणैककार्यकृत इति प्रसिद्धम् । ११२ । १५७ ॥

भ्वादिन्यायस्तु यदा भूसत्तायामित्यादयो धातवो गृह्यन्ते तदैकस्योपाधिभेदेन नानात्वविवक्षायां प्रवर्त्तन्ते । यथैक एव धातुरुपसर्गप्रत्ययरूपोपाधिभेदेन नानात्वं भजति तद्यथा करणं क्रिया कर्त्तेत्यादौ प्रत्ययभेदेन पराभवो ऽनुभव इत्यादौ चोपसर्गभेदेन रूपार्थभेदः प्रतीयते तथैकमेव ब्रह्मोपाधिभेदेन तानेवावभासतइति। यदि तु भ्वादिशब्देन पृथिव्यादयो विवक्षितास्तदा तूक्तविषय एवास्य प्रवृत्तिः प्रसिद्धं हि परस्परविरुद्धानामपि तेषां संभूयैककार्यकारित्वमिति भ्वादिन्यायः । ११३ । १५८ ॥

यत्रोभयोरुपकार्योपकारिभावेनान्योन्यापेक्षया संबन्धे सति कार्योदयस्तत्रान्धपङ्गुन्यायः । यथा हि कश्चित्पुरुषो दृक्शक्तिसंपन्नः प्रवृत्तिविहीनः पङ्गुरन्यं पुरुषं प्रवृत्तिमन्तं दृक्शक्तिरहितमन्धमाश्रित्य प्रवर्त्तयति किंचित्फलमुद्दिश्य । तथा चेतनः पुरुषः स्वयमप्रवर्त्तमानः प्रवृत्तिशक्तिमदचेतनं प्रधानं प्रवर्त्तयति तत्र प्रधानं स्वकर्मकपुरुषकर्तृकदर्शनार्थं पुरुषमपेक्षते भोग्यं हि प्रधानं न च भोक्तारं विना भोग्यस्य भोग्यत्वं संभवतीति युक्ता ऽस्य

दिनामसंकेतं कृत्वा शास्त्रेण तन्न्यूनताद्युक्त्या शिवादिस्तुतिः क्रियतइति भावः । ७९ । १२४ ।

न हि निन्दा निन्दितुं प्रवर्त्तते अपि तु विधेयं स्तोतुमिति न्या० केवलायां निन्दायां प्रयोजनाभावाद् भावाभावपरत्वे वाक्यभेदप्रसङ्गाच्चेति भावार्थो ऽस्य प्रागेवोक्तः अक्षरार्थस्तु स्पष्टः । ८० । १२५ ।

यत्रोभयोः समो दोष इति न्या० । ८१ । १२६ ।

उपवासाद्वरं भिक्षेतिन्या० । वरमिति सामान्ये नपुंसकम् एवमग्रे ऽपि । ८२ । १२७ ।

शालिसमृद्धौ कोद्रवाशनत्यागन्या० । ८३ । १२८ ।

कूपखानकन्या० । यथा कूपखानके पतितं पङ्कादि कूपान्निःसृतेनाम्भसा प्रक्षाल्यते तथा तत्तद्विग्रहावच्छिन्नेशभेदबुद्धिजो दोषस्तदुपासनाजन्यसुकृतमहिम्नोत्पन्नेनाद्वैतबोधेन समूलं निवर्त्त्यतइति ज्ञेयम् । ८४ । १२९ ।

निम्नगाप्रवाहन्या० । अयं स्वस्थाने स्पष्टं प्रतीयते । ८५ । १३० ।

शते पञ्चाशदितिन्या० । ८६ । १३१ ।

यादृशो यक्षस्तादृशो बलिरिति न्या० । ८७ । १३२ ।

यादृशं मुखं तादृशी चपेटेति न्यायो ऽपीह बोध्यः । ८८ । १३३ ।

मारणाय गृहीतोऽङ्गच्छेदं स्वीकरोतीति न्या० । ९० । १३४ ।

मरणाद्वरं व्याधिरिति न्यायो ऽपीह ज्ञेयः । १३५ ।

एकाकिनी प्रतिज्ञा हीतिन्या० । ९१ । १३६ ।

न हि प्रतिज्ञामात्रेणार्थसिद्धिरिति न्यायो ऽपीह

द्वारात्स्रुघ्नपथः पृष्ट इत्यादौ काष्ठपुरुषादीनामुष्ट्रद्वारादिनिष्ठत्वादुष्ट्रद्वारादिशब्दविषयत्वं यथा तथा प्रकृते ऽपीत्यर्थः । यजमानपञ्चमा इडां भक्षयन्तीत्यप्यस्योदाहरणं बोध्यम् । ७४ । ११९ ।

एकं संधित्सतो ऽपरं प्रच्यवतइति न्या० । यथैकं कांस्यपात्रावयवादि संन्धातुमिच्छतो ऽपरं तदत्यन्तानलसंयोगादेः प्रच्यवते । ७५ । १२० ।

सुतजनिमृतिन्यायो ऽपीदृशः । यथा कश्चित्कं चिद्देवमाराध्य ततः पुत्रं लब्ध्वा चान्यपुत्रलाभाय देवान्तरमाराध्य ततस्तं लब्ध्वा तज्जन्मक्षणएव च पूर्वदेवकोपात्पूर्वमरणं तथा प्रकृते ऽपि जातमित्यर्थः । ७६ । १२१ ।

सार्वजनीनस्तुल्यायव्ययन्यायो ऽपीह बोध्यः । ७७ । १२२ ।

पतन्तमनुधावतो बद्धो ऽपि गत इति न्या० । पतन्तं कथं चिज्जालान्निःसृत्योड्डीय गच्छन्तं पक्षिणमनुधावतो जीवान्तकस्य बद्धो ऽपि पक्षी यथा गतस्तथा प्रकृते ऽपीत्यर्थः । ७८ । १२३ ।

श्यालशुनकन्या० । इत्थं हि लौकिकी गाथा कश्चित्कुतुकी स्वसद्मस्थे शुनि श्यालनामसंकेतं कृत्वा स्वस्त्रीकोपोत्पादाय तं गालीर्ददौ सा च तं भ्रातरं मत्वा ऽतिकोपपरीतात्मतया ऽतिदुःखिता बभूवेति । तथा च यथा स्वाभ्रातरि शुनि भ्रातृताभ्रान्तिमत्या भार्यायाः कोपनाय भर्त्रा श्वनिन्दा क्रियते तथा ऽत्यन्ताभिन्ने ऽपि तत्तद्विग्रहावच्छिन्ने परात्मनि भेदभ्रमवतां कोपोत्पादाय शास्त्रेण तद्विष्टविग्रहावच्छिन्नेशनिन्दाव्याजेनान्यविग्रहावच्छिन्नेशस्तुतिः क्रियते । अथ वा कार्यब्रह्मणि विष्णवादौ विष्णवा-

लक्षणम्। रज उपष्टम्भकं संश्लेषजनकं सत्त्वतमसी स्वयमक्रियतया स्वकार्यप्रवृत्तिं प्रत्यवसीदन्ती रजसोपष्टभ्येते। अवसादात्प्रच्याव्य स्वकार्ये प्रयत्नं कार्यैते। चलं च रजः चलत्वं च सक्रियत्वम्। एवं च प्रवृत्तिहेतुत्वं रजसः। तथा च स्मृतिः। रजसो लोभ एव चेति। लोभस्य च प्रवर्त्तकत्वं प्रसिद्धमेव दुःखकारणं च रजः रजः कर्माणि भारतेति स्मृतेः। कर्मणो दुःखहेतुत्वं च सर्वानुभवसिद्धं कष्टं कर्मेति न्यायसिद्धम्। तथा च प्रेरकत्वे सति सक्रियत्वे च सति दुःखहेतुत्वं रजोलक्षणम्। तमस्तु गुरु आवरकं मोहकरं च भवति। तथा च गुरुत्वे सत्यावरकत्वे च सति मोहकत्वं तल्लक्षणम्। एतेनैतेषां विरुद्धत्वं प्रतीयते विद्यते चैषां संभूयैककार्यजनकत्वम्। तत्र रज उभयोः स्वकार्ये प्रवर्तकं तच्च परितस्त्रैगुण्यं चालयद्गुरुणा आवृण्व तमसा तत्र तत्र प्रवृत्तिप्रतिबन्धकेन क्वचिदेव प्रवर्त्यते ततस्ततो व्यावृत्त्येति तमसो नियामकत्वम्। सत्त्वं च प्रवृत्तिविषयद्रव्याद्यवभासकम्। न हि मृद्घटादिज्ञानं विना तद्विषया प्रवृत्तिः। तस्मात्त्रयाणामन्योन्यं विरुद्धानामपि संभूयैकप्रवृत्त्यादिकार्यहेतुत्वम्। तथा देहादिषु सर्वकार्येष्वपि ज्ञेयम्। तथा हि सुखदुःखमोहाः परस्परं विरोधिनः स्वानुरूपाणि सुखादीनि निमित्तानि कल्पयन्ति। तद्यथा एकैव नाम्ना भामती स्त्री रूपयौवनादिसंपन्ना धवं सुखाकरोति दुःखाकरोति च सपत्नीः मोहयति च नरान्तरम्। तत्कस्य हेतोः तं प्रति तस्यास्तत्तद्रूपसमुद्भवात्। एतेन भामतीन्यायो व्याख्यातः न चैकस्य त्रिरूपत्वमयुक्तम्। वह्निन्यायेनोपपत्तेः यथा ह्येकस्याग्नेर्दाहकत्वं पाचकत्वं प्रकाशत्वं च तथा सत्त्वादेरपि किं न स्यादिति। कार्यजातं च कारणे सदेव कूर्माङ्गन्यायेन निःसरति पुनश्च तत्रैव लीयते।

प्रत्यक्षे किमनुमानमिति न्यायश्चैतत्कल्पः।
१०६। १५१।

भक्षिते ऽपि लशुनइति न्या० १०७। १५२।

रज्जुसर्पन्या० यथा रज्जोर्ज्ञातायाः सर्पाद्यात्मना भानं ज्ञातायास्तु स्वरूपेण तथा ब्रह्मणो ऽनवबुद्धस्य प्रपञ्चत्वेन बुद्धस्य निष्प्रपञ्चत्वेन भानं न मानान्तरविरुद्धमित्यर्थः। १०८। १५३।

नाहमीश्वर इति प्रत्यक्षविरोधपरिहारायौपाधिकाकाशभेदन्यायावतारः। यथौपाधिकाकाशभेदविषयं मानं सविशेषेणे हीति न्यायेनोपाधिगोचरं तथा जीवेशभेदप्रत्यक्षादि तदुपाधिभेदविषयमिति न तेन तदैक्यपरागमविरोध इति दिक्। १०९। १५४।

इति वृक्षप्रकम्पनन्यायान्तर्गतास्तैः संगताश्च न्याया व्याख्याताः। कैश्चित्तु प्रचालनेति पठ्यते तदस्तु नामार्थे तु नाणुरपि विशेषो ऽस्ति प्रचलनेत्यपि क चित्पाठः। यत्रान्योन्यविरुद्धानामपि संभूयैककार्यकारित्वं तत्र प्रदीपन्यायावतारः। यथाहि वर्त्तितैले अग्निविरोधिनी अग्न्युपरि तैलपाते ऽग्निनाशात्। वर्त्तिरपि स्वल्पकालेनाग्निनाशिका। स च तस्याः अथ च संभूय प्रकाशलक्षणमेकं कार्यं कुर्वन्ति। तथा सत्त्वरजस्तमांसि परस्परं विरुद्धान्यपि संभूयैकं देहादिकं प्रीत्यादिकं च कार्यं जनयन्ति। तथा हि सत्त्वमेव लघु। तत्र हि कार्योद्गमने हेतुर्धर्मो लाघवं यतो ऽग्नेरूर्द्ध्वज्वलनं जीवानां चोर्द्ध्वं गच्छन्ति सत्त्वस्था इति स्मृतिसिद्धमूर्द्ध्वगमनम्। प्रकाशकं च सत्त्वात्संजायते ज्ञानमिति स्मृतेः। सुखकारणं च सत्त्वं सुखे सञ्जयतीति स्मृतेः। तथा च लघुत्वे सति ज्ञानसुखहेतुत्वं सत्त्व-

र्णानां शरमयादिभिः सहोत्थिताकाङ्क्षाविरहे ऽप्युत्थापिताकाङ्क्षया ऽन्वय इति संक्षेपः । ९७ । १४२ ।

सविशेषणे हि वर्त्तमानौ विधिनिषेधौ सति विशेष्यबाधे विशेषणमुपसंक्रामत इति न्या० । घटाकाशमानय न मण्याकाशमित्यानयनविषयौ विधिनिषेधौ विशेष्ये आकाशे बाधाद् घटादिरूपं विशेषणमुपसंक्रामतस्तथा प्रकृते ऽपि । न च निषेधस्य कथं बाधः तस्य प्रसक्तिपूर्वकतया तदभावे ऽनुपपत्तेः । किं चात्र विधिनिषेधशब्दौ भावाभावमात्रबोधकौ तथा च घटाकाशो ऽत्रानीतो न मण्याकाशः घटाकाश उत्पन्नः शरावाकाशो विनष्ट इत्यादौ भावाभावौ विशेष्ये बाधाद्विशेषणमुपसंक्रामतस्तथा प्रकृते ऽपि विशेष्ये बाधाद्विशेषणे तयोः पर्यवसानमित्यर्थः । ९८ । १४३ ।

सावकाशनिरवकाशन्यायः स्वस्थाने स्पष्टः । ९९ । १४४ ।

अहिकुण्डलन्या० । १०० । १४५ ।

प्रकाशाश्रयन्या० । इदं न्यायद्वयं स्वस्थाने व्याख्यातम् । १०१ । १४६ ।

गुडजिह्विकान्या० । यथा तत्कटुताभीत्या निम्बपानमकुर्वाणस्य बालस्य जिह्वायां गुडलेपनं कृत्वा तं निम्बं पाययन्ति तथा ऽर्थवादवाक्यानि कष्टे कर्मण्यप्रवर्त्तमानं पुरुषं स्वर्गाद्यक्षय्यत्वादिकं श्रावयित्वा तस्मिन्प्रवर्त्तयन्तीति संक्षेपः । १०२ । १४७ ।

यत्कृतकं तदनित्यमिति न्या० । १०३ । १४८ ।

नहि दृष्टे ऽनुपपन्नं नामेति न्या० १०४ । १४९ ।

न हि करकङ्कणदर्शनायादर्शापेक्षेति न्यायः । १०५ । १५० ।

प्रत्यक्षे किमनुमानमिति न्यायश्चैतत्कल्पः। १०६। १५१।

भक्षिते ऽपि लशुनइति न्या० १०७। १५२।

रज्जुसर्पन्या० यथा रज्जोर्ज्ञातायाः सर्पाद्यात्मना भानं ज्ञातायास्तु स्वरूपेण तथा ब्रह्मणो ऽनवबुद्धस्य प्रपञ्चत्वेन बुद्धस्य निष्प्रपञ्चत्वेन भानं न मानान्तरविरुद्धमित्यर्थः। १०८। १५३।

नाहमीश्वर इति प्रत्यक्षविरोधपरिहारायौपाधिकाकाशभेदन्यायावतारः। यथौपाधिकाकाशभेदविषयं मानं सविशेषेणे हीति न्यायेनोपाधिगोचरं तथा जीवेशभेदप्रत्यक्षादि तदुपाधिभेदविषयमिति न तेन तदैक्यपरागमविरोध इति दिक्। १०९। १५४।

इति वृक्षप्रकम्पनन्यायान्तर्गतास्तैः संगताश्च न्याया व्याख्याताः। कैश्चित्तु प्रचालनेति पठ्यते तदस्तु नामार्थे तु नाणुरपि विशेषो ऽस्ति प्रचलनेत्यपि क्व चित्पाठः। यत्रान्योन्यविरुद्धानामपि संभूयैककार्यकारित्वं तत्र प्रदीपन्यायावतारः। यथाहि वर्त्तितैले अग्निविरोधिनी अग्न्युपरि तैलपाते ऽग्निनाशात्। वर्त्तिरपि स्वल्पकालेनाग्निनाशिका। स च तस्याः अथ च संभूय प्रकाशलक्षणमेकं कार्यं कुर्वन्ति। तथा सत्त्वरजस्तमांसि परस्परं विरुद्धान्यपि संभूयैकं देहादिकं प्रीत्यादिकं च कार्यं जनयन्ति। तथा हि सत्त्वमेव लघु। तत्र हि कार्योद्गमने हेतुर्धर्मो लाघवं यतो ऽग्नेरूर्द्ध्वज्वलनं जीवानां चोर्द्ध्वं गच्छन्ति सत्त्वस्था इति स्मृतिसिद्धमूर्द्ध्वगमनम्। प्रकाशकं च सत्त्वात्संजायते ज्ञानमिति स्मृतेः। सुखकारणं च सत्त्वं सुखे सञ्जयतीति स्मृतेः। तथा च लघुत्वे सति ज्ञानसुखहेतुत्वं सत्त्व-

र्णानां शरमयादिभिः सहोत्थिताकाङ्क्षाविरहे ऽप्युत्थापिताकाङ्क्षया ऽन्वय इति संक्षेपः । ९७ । १४२ ।

सविशेषणे हि वर्त्तमानौ विधिनिषेधौ सति विशेष्यबाधे विशेषणमुपसंक्रामत इति न्या० । घटाकाशमानय न मण्याकाशमित्यानयनविषयौ विधिनिषेधौ विशेष्ये आकाशे बाधाद् घटादिरूपं विशेषणमुपसंक्रामतस्तथा प्रकृते ऽपि । न च निषेधस्य कथं बाधः तस्य प्रसक्तिपूर्वकतया तदभावे ऽनुपपत्तेः । किं चात्र विधिनिषेधशब्दौ भावाभावमात्रबोधकौ तथा च घटाकाशो ऽत्रानीतो न मण्याकाशः घटाकाश उत्पन्नः शरावाकाशो विनष्ट इत्यादौ भावाभावौ विशेष्ये बाधाद्विशेषणमुपसंक्रामतस्तथा प्रकृते ऽपि विशेष्ये बाधाद्विशेषणे तयोः पर्यवसानमित्यर्थः । ९८ । १४३ ।

सावकाशनिरवकाशन्यायः स्वस्थाने स्पष्टः । ९९ । १४४ ।

अहिकुण्डलन्या० । १०० । १४५ ।

प्रकाशाश्रयन्या० । इदं न्यायद्वयं स्वस्थाने व्याख्यातम् । १०१ । १४६ ।

गुडजिह्विकान्या० । यथा तत्कटुताभीत्या निम्बपानमकुर्वाणस्य बालस्य जिह्वायां गुडलेपनं कृत्वा तं निम्बं पाययन्ति तथा ऽर्थवादवाक्यानि कष्टे कर्मण्यप्रवर्त्तमानं पुरुषं स्वर्गाद्यक्षय्यत्वादिकं श्रावयित्वा तस्मिन्प्रवर्त्तयन्तीति संक्षेपः । १०२ । १४७ ।

यत्कृतकं तदनित्यमिति न्या० । १०३ । १४८ ।

नहि दृष्टे ऽनुपपन्नं नामेति न्या० १०४ । १४९ ।

न हि करकङ्कणदर्शनायादर्शापेक्षेति न्यायः । १०५ । १५० ।

त्तेरन्यस्मिन्नभिव्यक्तिलक्षणे कार्ये प्रय
ति । कुतः सत एव शब्दस्यानुपलब्धिव
र्हि तथा स्यात् । न चास्यानुपलब्धिकार
स्ति आवरणाद्यसम्भवस्योक्तत्वादिति भावः
कार्यः शब्दः अनभिव्यञ्जकप्रयत्नानन्तरोपल
हेत्वसिद्धिपरिहारः सूत्राक्षरार्थः । निर्विशे
प्रयत्नानन्तरीयकत्वादिति हेतोर्व्यभिचारः । सवि
शेषणस्य न दोषमावहतीत्यविषयवृत्तित्वमुक्तमेव ।
दूषणस्य विषयो नानुक्त इत्यविषयवृत्तित्वं चार्थतो
दर्शितमिति ॥ २९ ॥

जातेः सप्ताङ्गानि दर्शयति ।

लक्ष्यं लक्षणमुत्थानं पातनावसरौ फलम् ।
मूलमित्यङ्गमेतासाम् ।

तानि तर्हि प्रतिजाति व्याक्रियन्तामिति चेत्
तत्राह ॥

तत्रोक्ते लक्ष्यलक्षणे ॥ ३० ॥

हेतुतया । आवरणादीत्यादिशब्देनायोग्यत्वमसंस्कार्यत्वं
च गृह्यते । न दोषमावहतीत्यविषयवृत्तित्वमिति । अत्रा-
न्यथा स्वव्याघातप्रसङ्ग इति वाक्यमध्याहार्यम् । तात्प-
र्यतोऽस्य विषयवृत्तित्वमाह । उक्तमेवेति ॥ २९ ॥

जातेः सप्ताङ्गानीति । एवं चतुर्विंशतिजातिरुक्त्वा
इदानीं सकलजातिसाधारणानि सप्ताङ्गान्युद्दिशति मूल-
ग्रन्थकार इत्यर्थः ॥ ३० ॥

REPRIN

न्यायसू

श्रीराधामोहनविद्यावा
भट्टाचार्यविरचितं
वाराणसीस्थराजकीयसंस्कृतपाठशालीयेन
ध्यापकेन तर्कतीर्थोपाधिधारिणा श्रीसुरेन्द्रला
गोस्वामिभट्टाचार्येण संस्कृतम् ।

THE

NYÁYASÚTRAVIVARAṆAM

BY

RA'DHA' MOHAN VIDYA'VA'CHASPATI
GOSWA'MI BHATTA'CHA'RYA

EDITED BY

SURENDRALÁL TARKATIRTHA GOSWÁMI BHATTÁCHÁRYA
PROFESSOR, SANSKRIT COLLEGE, BENARES.

BENARES:
PRINTED AT THE MEDICAL HALL PRESS.

1903.

त्तेरन्य ...ा जातीः सदुत्तरेणानुवृ
ति ...ागेन वादे तत्त्वनिर्णयलक्ष
हिं ...न तदसम्भवात्। न च
स्ति ...व्यवस्था उभयोरपि
काय ...वन्निष्प्रयोजन
हेत ...ारः शिष
प्रयत्न ...
शेष ...

अनुमानखण्डे जगदीशगदाधरादिकृतग्रन्थोपरि यथोक्तगो-स्वामिभट्टाचार्यविरचितानि क्रोडपत्राणीति । नोपलभ्यते चैवंलक्षणाक्रान्तो राधामोहनगोस्वामीत्याख्यया प्रसिद्धः [illegible]श्चिदन्यो विद्वानिति ।

एकादशीतत्त्वटीकादीपप्रणेतुर्न्यायसूत्रविवरणप्रणेतृ-[illegible]स्वीकारे महामहोपाध्यायश्रीयुक्तहरप्रसादशास्त्रिम-[illegible]यवाक्यास्वीकारेऽपि अस्मिन् न्यायसूत्रविवरणे ३२ [illegible] १८ पङ्क्तौ "बाधादिग्रन्थे जगदीशैरप्युक्तत्वादिति" [illegible]लेखदर्शनात् तत्त्वचिन्तामणिटीकादीधितिव्याख्या-तृजगदीशतर्कालङ्कारभट्टाचार्यात् पश्चाद्भावी राधामोह-नगोस्वामिभट्टाचार्य इत्यत्र नास्ति विवादः ।

वाराणसीस्थमेडिकल्हाल्नामकयन्त्रालयमुद्रितस-टीकप्रशस्तपादभाष्यपुस्तकविज्ञापने वाराणसीस्थराजकी-यसंस्कृतपाठशालापुस्तकालयाध्यक्षैः श्रीयुक्तविन्ध्येश्वरी-प्रसादद्विवेदिमहाशयैः "जगदीशभट्टाचार्यकृतशब्दशक्ति-प्रकाशिकापुस्तकस्य १६२४ शालिवाहनशकलिखितस्योप-लम्भात् तत्समयात् पूर्वं तद्ग्रन्थकर्तुः स्थितिरिति सुव्य-क्तम् ।" इति लिखितम् ।

तत्त्वचिन्तामणिव्याख्यातृमथुरानाथस्य दीधितिका-रानन्तर्यं व्याप्तिपञ्चकग्रन्थे "तच्चागुणवत्त्वमितिसाधर्म्य-व्याख्यानावसरे गुणप्रकाशरहस्ये तद्दीधितिरहस्ये च स्फु-ट"मिति "अत एव निविशतां वा वृत्तिमत्त्वं साध्यसामा-नाधिकरण्यं वेति केवलान्वयिग्रन्थे दीधितिकृत" इत्यादि-लेखदर्शनात् पक्षताग्रन्थे संशयपक्षताव्याख्यानावसरे दी-धितिकृद्व्याख्यानस्य मथुरानाथेन भट्टाचार्यास्त्वित्यादिना [illegible]दर्शनात् दीधितिग्रन्थोपरि मथुरानाथकृतटीकोपलम्भा-[illegible]गम्यते । व्यधिकरणधर्मावच्छिन्नाभावग्रन्थीयमथुरा-

सम्भाव्यते चेदं न्यायसूत्रविवरणप्रणेतुरेव राधामोहनगोस्वामिभट्टाचार्यस्य एकादशीतत्त्वटीकाप्रणेतृत्वम् । यतः स एव कुत्रचित् "इति श्रीराधामोहनगोस्वामिभट्टाचार्यविरचित" इति लिखतिस्म क्वचिच्च "इति श्रीराधामोहनविद्यावाचस्पतिगोस्वामिभट्टाचार्यविरचित" इ लिखतिस्म क्वचिच्चाद्वैतवंशसम्भवादिशब्देन स्वोत्कीर्त कृतवान् । यथा अस्मिन्नेव न्यायसूत्रविवरणे प्रथमाध् यायाद्याह्निकान्ते "इति श्रीराधामोहनगोस्वामिभट्टा विरचितन्यायसूत्रविवरणे प्रथमाध्यायस्याद्याह्निकवि णम् ।" इति लिखितवानिति पञ्चमाध्यायान्ते च "इति श्रीराधामोहनविद्यावाचस्पतिगोस्वामिभट्टाचार्यविरचिते गोतमसूत्रविवरणे पञ्चमाध्यायविवरणम् ।" इति लिखितवानिति । हरिदासकृतकुसुमाञ्जलिकारिकाटीकोपरि राधामोहनगोस्वामिभट्टाचार्येण टीका कृता (१) । तत्र द्वितीयस्तवकान्ते च "इति श्रीराधामोहनविद्यावाचस्पतिगोस्वामिभट्टाचार्यविरचिता हरिदासीयकुसुमाञ्जलिद्वितीयस्तवकव्याख्या समाप्ता ।" इति लिखतिस्मेति च दृश्यते । तथैव एकादशीतत्त्वटीकान्ते ऽपि विद्यावाचस्पतिपदं विहाय कलियुगपावनादिपदानि योजयित्वा लिखितवानिति नासम्भवः । तथात्वे चास्य नदियाप्रदेशान्तर्गतशान्तिपुरग्रामनिवासित्वमायाति यतोऽद्वैतवंशसम्भूता गोस्वामिनः शान्तिपुरनिवासिनः । प्रवादोऽप्येवमेव शान्तिपुरनिवासी राधामोहनगोस्वामिभट्टाचार्य एव न्याये धर्मशास्त्रादौ च बहुधा ग्रन्थान् रचितवानिति । उपलभ्यन्ते च

(१) तत्रायमाद्यश्लोकः ।
शिशुरसि दुग्धमुखस्त्वं कलयसि मुरलीं कुतोऽतिचित्रम् ।
इति गोपीस्मितवचनैः सुस्मितवदनो हरिः पातु ॥ इति ।

बाबूराजेन्द्रलालमित्र एल्. एल्. डि., सी. आई. ई. महोदयकृतनोटिस्अव्दि संस्कृतमेनुस्कृप्ट्स्नामकपुस्तके १० खण्डे ११३ पृष्ठे महामहोपाध्यायश्रीयुक्तहरप्रसादशास्त्रिमहाशयैः एकादशीतत्त्वदीपपुस्तकस्य निरूपणं कृतम्। तत्र—

"लिखितैकादशीतत्त्वटीका भारतशर्मणा।
पञ्चवेदाब्धिभूमाने(१) ऽब्दे पीताम्बरदेशतः॥

१७४२" इति लिपिकालो दत्तः। तत्रैव शास्त्रिमहोदयैः कोलब्रूक्साहबमहाशयस्य मित्रं राधामोहनगोस्वामिभट्टाचार्य आसीदिति लिखितम्।

कलिकातानगरमुद्रितामरादिकोषचतुष्टयपुस्तके—

"श्रीमदमरकृतकोषः पुरुषोत्तमकृतत्रिकाण्डशेषश्च।
हारावल्यभिधानं मेदिनीकरस्य नानार्थः॥ १॥
नगरे कलिकात्ताख्ये कोलब्रूक्साहबाज्ञया।
श्रीविद्याकरमिश्रेण कृतसूचीसमन्वितः॥ २॥
वेदर्त्वष्टकलानाथसम्मिते विक्रमाब्दके।
मुद्राक्षरेण विप्रेण बाबूरामेण लेखितः॥ ३॥"

इति दृश्यते।

एतेन १८६४ विक्रमसंवत्सरे कोलब्रूक्साहबसमय आयाति। एकादशीतत्त्वटीकाप्रणेतुर्न्यायसूत्रविवरणप्रणेतृत्वस्वीकारे महामहोपाध्यायश्रीयुक्तहरप्रसादशास्त्रिमहाशयवाक्यस्य सप्रमाणत्वे च १८६४ विक्रमसंवत्सरे राधामोहनगोस्वामिभट्टाचार्य आसीदिति लभ्यते।

(१) यद्यपि गणितशास्त्रे ऽब्धिशब्देन समुद्रशब्दपर्यायेण चत्वार इति व्यवह्रियते। परं तु चतुष्कग्रहणे लेखक एव प्राचीनस्तदा ग्रन्थकारः कुत्र तिष्ठेदिति सप्त समुद्रा एवाब्धय इत्यनुसृतं लेखकेन।

॥ श्रीगणेशाय नमः ॥

न्यायसूत्रविवरणस्य विज्ञापनम् ।

रघुनन्दनभट्टाचार्यविरचितैकादशीतत्त्वग्रन्थस्य राधामोहनगोस्वामिभट्टाचार्यविरचितदीपाख्यटीकायामादौ—

"भवे ऽस्मिन् कान्तारे मुहुरटनदुःखैकविकलः
समीहे संलब्धं तव चरणपाथोजशरणम् ।
न योगो ज्ञानं वा भजनमपि वा यद्यपि हरे
तथाप्याशा दीर्घा तव च करुणा किं न कुरुते ॥
वन्दे श्रीकृष्णमानन्दघनं परममीश्वरम् ।
राधास्वर्णलतासङ्गतमालरुचिविग्रहम् ॥
श्रीराधामोहनो दीपं करोति शुभदर्शनम् ।
एकादश्यादितत्त्वानां पूर्वाचार्यमतेच्छया ॥" इति ।

तत्रान्ते च—"इति कलियुगपावनावतारश्रीमदद्वैतवंशसम्भवश्रीराधामोहनगोस्वामिभट्टाचार्यविरचितैकादशीतत्त्वटिप्पणी सम्पूर्णा । शकः १७५० ।

शाके व्योमसुताद्रिचन्द्रपरिमे शम्भुं मुहुः संस्मरन्
भाद्रे सूर्यजवासरे कृततिथौ पक्षे च कृष्णेतरे ।
राधामोहनशर्मणः कृतिमिमां टीकां मुदैकादशी-
तत्त्वस्यैव धरामरो हरिहरो यत्नादु व्यलेखीत् स्वयम् ॥" इति ।

इदं तु कुमूलिबुधोदययन्त्रालयमुद्रितैकादशीतत्त्वपुस्तके दृश्यते ।

काया अनेकेषु स्थलेषूद्धृतत्वाच्च । तथाहि नैषधगूढार्थदीपिकायां १ सर्गे कथं विधातर्मयि पाणिपङ्कजात् तव प्रियाशैत्यमृदुत्वशिल्पिन इति १३८ श्लोकव्याख्याने "कथमिति । हे विधातः भो विधे मयि विषये तव ब्रह्मणः पाणिर्हस्तः" "लिपिरक्षरपङ्क्तिः तवेत्यस्य विशेषणमिति नृहरिः ।" "जीवातुस्तु पाणेर्विशेषणमिति ।" इ[illegible] भगीरथः ।

पण्डितजीवानन्दविद्यासागरमुद्रिते जीवा[illegible] नैषधचरितपुस्तके ५५ पृष्ठे "कथमिति । हे विधातः यायाः वरटायाः शैत्यमृदुत्वशिल्पिनस्तादृकूतरङ्गशैत्यमा[illegible] र्दवनिर्माणकात् तव पाणिपङ्कजात्" इति ।

खितेषु वाक्येषु कुण्डलनां विधाय तदर्थबोधकैरेव पदान्तरैरपूर्वाणि वाक्यानि लिखितानि अनेकेषां टीकाकाराणां मतानि पत्रपार्श्वभागे टिप्पणरूपेण लिखितानीतीदं पुस्तकं टीकाकारेणैव शोधितं समालोचितं वेत्यनुमीयते। अत्र नृहरि—लक्ष्मण—नारायण—विश्वेश्वर—जगद्गुरु—ताण्डव—मुकुट—जीवातुप्रभृतिभिः शब्दैष्टीकान्तराणि प्रमाणयति । क्वचित् प्रकारान्तरैरनेकानर्थान् वर्णयति टीकाकारः । अस्मदवलोकितासु भवदत्त—गदाधर—नरहरि—नारायण—मल्लिनाथ—महेश्वर—भगीरथ—रामचन्द्र—प्रेमचन्द्र—भावार्थदीपिकाकारकृतासु टीकासु सर्वापेक्षया महती सर्वोत्तमा इयमेव टीका । अस्यां प्रतिसर्गमन्ते "इति श्रीकूर्माचलेन्द्रश्रीरुद्रचन्द्रगोत्रापत्यकल्पद्रुमसदृशराजर्षिवर्यश्रीमदुद्द्योतचन्द्रात्मजश्रीज्ञानचन्द्राश्रितपुरोहितसोमयाजिपण्डितबलभद्रगोत्रापत्यश्रीहर्षदेवात्मजावसथ्यभगीरथविरचितायां"मिति पुष्पिका वर्तते । अपि च

"अध्यापकं विना यो नैषधगूढार्थदीपिकां टीकाम् ।
पश्यति रसनाग्रे तु वाग्देवी तस्य स्फुरति भृशम्(?)॥" इति ।

बहुखेदितोऽस्मि यदिदं पुस्तकं खण्डितमिति ।

नैषधगूढार्थदीपिकायां १ सर्गे अयि स्वयूथ्यैरिति १३६ श्लोकव्याख्याने "पुनः प्रियां प्रत्याह । अयीति । अयि प्रिये संबुद्धिरिति नृहरिः । अपीति पाठ इति जीवातुः । अपि चेत्यपेरर्थः ।"

पण्डितजीवानन्दविद्यासागरमुद्रिते जीवातुसहिते नैषधचरितपुस्तके ५५ पृष्ठे । "अपीति । अपि चेत्यपेरर्थः ।"

रघु॰ नैषधगूढार्थदीपिकायां १ सर्गे तवापि हाहा विरहनगोरक्षुधाकुला इति १४१ श्लोकव्याख्याने "तेषु प्रसि-" "स्वसम्पादितेषु तेषु इति जीवातुः ।"

पण्डितजीवानन्दविद्यासागरमुद्रिते जीवातुसहिते नैषधचरिते ५६ पृष्ठे "क्षुधाकुलाः क्षुत्पीडिताः तेषु स्वसम्पादितेष्वित्यर्थः ।"

नैषधगूढार्थदीपिकायां २ सर्गे स गरुद्धनदुर्गदुर्ग्रहान् इति ४ श्लोकव्याख्याने "ह्रस्वान्तं पृथक्पदमिति जीवातुः । यत्तु गोस्त्रियोर्ह्रस्व इति तेनोक्तं तन्न स्त्रीप्रत्ययान्तत्वाभावात् अतो ह्रस्वो नपुंसके इति ह्रस्व इत्याहुः" ॥

पण्डितजीवानन्दविद्यासागरमुद्रिते जीवातुपुस्तके ६० "पृष्ठे तनुकण्डु यथा तथा गोस्त्रियोरुपसर्जनस्येति ह्रस्वः । नुनदे निवारितवान् स्वरितञित इत्यात्मनेपदम् ।"

एवमग्रे ऽपि अनेकस्थलेषु वर्तन्ते ।

यद्यपि माघे मेघे गतं वय इति मल्लिनाथविषयककिंवदन्त्याऽनुमीयते वृद्धावस्थायां तेन नैषधचरितं व्याख्यातम् तथापि रघुवंशादिटीकास्विवानेकानाचार्याननेकान् ग्रन्थांश्च प्रमाणयति । तद्यथा मनुः विष्णुपुराणं महाभारतं सामुद्रिकं वैजयन्तीकोशः हलायुधकोशः वर्द्धमानः काव्यप्रकाशः क्षीरस्वामी पाणिनिः अमर-

कोशः वृत्तरत्नाकरः विश्वकोशः हलायुधकोशः तार्किकः उपाध्यायविश्वेश्वरभट्टारकः(१) एवमन्ये ऽपि ।

मल्लिनाथेन तार्किकरक्षाटीकायां ७६ पृष्ठे "प्रशस्तपादभाष्यनिकषटीकायामस्माभिर्व्याख्यातार्थौ(२) द्रष्टव्य" एवमेव १३६ पृष्ठे ऽप्युक्तत्वात् प्रशस्तपादभाष्यमपि विस्तरतो व्याख्यातमिति निष्पन्नम् ।

मल्लिनाथकृतामरकोशटीकाभट्टिकाव्यटीकैकावलीटीकादयो ग्रन्था न समालोचिता मयेति ।

वात्स्यायनापरनामधेयो मल्लिनागस्तु(३) नामत भिन्नो महर्षिरित्येतत् सर्वं न्यायवार्त्तिकभूमिकायां विस्तरेण निरूपयिष्यत इत्युपरम्यते ॥

वाराणसीस्थराजकीय-
संस्कृतपाठशालीयपुस्तकालये
२२ जनवरी १९०३ ।

विन्ध्येश्वरीप्रसादद्विवेदी

(१) विश्वेश्वरभट्टारको नैषधचरितटीकाकारः ।

(२) आदर्शपुस्तके "प्रशस्तपादभाष्यनिष्कषटिकायामिति" पाठो दृश्यते स च प्रामादिकः १४२ पृष्ठे "निकषे द्रष्टव्य" इत्यस्य वर्तमानत्वात् ।

(३) क्वचित् मल्लनाग इति पाठः ।

एगनास्य

अथ सटीकतार्किकरक्षायाः

शुद्धिपत्त्रम्[१] ।

पृष्ठे	पङ्क्तौ	अशुद्धम् ।	शुद्धम् ।
३	१४	गृह्यत	गृह्यते
४	१६	निःप्रयोजन	निष्प्रयोजन
४	२२	दोषेष	दोषेषु
६	८	प्रमाणसम्बन्ध	प्रमासम्बन्ध
७	११	मत्त्वा	मत्वा
७	२१	स्कन्दनीति	स्कन्दतीति
९	२९	यथार्थं	याथार्थ्य
१०	१५	व्यक्तुं	व्यङ्क्तुं
१०	१७	प्रधान्यात्	प्राधान्यात्
११	१०	प्रमेति	प्रमेत्यनेन
१२	१९	प्रमाणलक्षण	प्रमालक्षण
१३	२०	पूर्वादुप	प्रपूर्वादुप
१७	२२	प्रसक्तेन	प्रसक्तेर्न
१८	५	तत्र वा	तत्रैव
२०	१५	स्मृतीति	स्मृतीति ।
२०	१५	ज्ञापनाय ।	ज्ञापनाय
२०	१८	करणत्वा	कारणत्वा
२२	२२	मात्रंशयो	मात्रांशयो
२४	१४	नातीव युक्ति	नातीवयुक्ति
३६	९	त्स्वरदेवेत्या	त्स्वरवदित्या
३८	२३	वैय	वैयर्थ्य
४१	१५	त्तांश	त्तांश
४२	८	शाखागते	शाखाविहिते

(१) यासामशुद्धीनां दर्शनमात्रादेव बोधो भवति तासां नात्र समुल्लेखः कृतः यथा ३ पृष्ठे १३ पङ्क्तौ "व्याऽपिकस्य चित्" । एव मग्रे ऽपि ज्ञेयम् ।

पृष्ठे	पङ्क्तौ	अशुद्धम् ।	शुद्धम् ।
४९	६	तरद्रव्य	तरद्रव्यं
५६	२१	मत्वति	मत्वेति
५७	१४	स्पुटार्थम्	स्फुटार्थम्
६५	२२	व्याप्तिरिति	व्याप्तीति
६८	१८	। तत्	तत् ।
७५	१६	साधन	साध्य
७५	१९	साधन	साध्य
७६	७	कस्यचि	क्वचि
[illegible]	९	व्यवह्राय	व्यवह्रिय
[illegible]	९	धर्मवत्त्वेति	धर्मवत्त्वेनेति
८३	११	द्वीतीय	द्वितीय
८४	१६	दानां	दानीं
८५	८	तूद्दश	तूद्देश
९३	१५	साध्यविशि	साध्याविशि
१०१	१०	बहिष्ठेषु	बहिष्ठेषु
१०६	२२	जन्य ऐन्द्रिय	जन्यमैन्द्रिय
१०९	७	स्येन्द्रिय	स्यैन्द्रिय
११४	११	सर्वबुद्धु	सर्वबुद्धु
११६	८	अभावोभाव	अभावो न भाव
११८	७	मोक्षश्चद्वा	मोक्षश्चाद्वा
१२४	१७	स्पर्शन	स्पार्शन
१२५	१४	पल्ल	षड्ल
१२५	१६	सूत्रकाराक्त	सूत्रकारोक्तं
१२५	१६	नन्वी	नन्वि
१२९	१४	चारत	चरित
१३०	२१	प्रादु	प्रादुः
१३३	२२	भावाभाव	भाभाव
१३४	१५	भावमेव	अभावमेव
१३४	२१	सिद्धेर्भाव	सिद्धेरभाव

पृष्ठे	पङ्क्तौ	अशुद्धम् ।	शुद्धम् ।
१३५	१०	भूर्विकारत्वात्	भूविकारत्वात्
१३५	११	भूर्विकारत्वम्	भूविकारत्वम्
१३५	१४	स्याथकथन	स्यार्थकथन
१३७	१७	दनलनव	दनलव
१३८	१६	यल्ल	यङ्ल
१३९	१	यत्	यतः
१४१	४	दृद्विष्टा	दृद्विष्टा
१४३	१२	व्य्र्भि	व्यभि
१४५	७	पेक्षाया	पेक्षया
१४६	२१	रूपं करोत्यर्थभूत	रूपकरोत्यर्थभूता
१४६	२२	प्रयत्नलिङ्गा	प्रयत्नात्मिका लिङ्गा
१६४	१४	येतरयन्थे	येतनयन्थे
१६४	२२	गतत्वा	गता त्वा
१६५	२२	न्थेनासङ्	न्थेन सह्
१६६	२१	क्रोटीत्यर्थः	करोतीत्यर्थः
१७१	२०	सर्वत	सर्वत्र त
१७२	१२	सकर्तृ	कर्तृ
१७५	६	त्यानिष्ठ	त्यातिष्ठ
१७५	१०	इति । वइते	इति वदते
१७६	८	सिद्ध	सिद्धं
१७६	२३	समार्ष्टौ	सम्मार्ष्टौ
१७७	५	तकत्वमिक्ष	क्षतकत्वमि
१८३	१७	न भवति	न प्रभवति
१८४	१४	कारणानां	करणानां
२०२	१६	सिद्धं	सिद्धान्त-
२१३	१६	जिगीषवो	जिगीषो

पृष्ठे	पङ्क्तौ	अशुद्धम् ।	शुद्धम् ।
२१५	१७	तस्या	तस्याः
२१६	२०	शङ्का	शङ्को
२२०	८	हतु	हेतु
२२२	१९	निर्णयाथ	निर्णयार्थं
२३१	७	ज्ञाननस्य	ज्ञानानस्य
२३२	१६	स्तनु	तदनु
२३७	११	यथाऽनित्यः	यथा नित्यः
[illegible]	१९	साधर्म्यवैधर्म्यसम	साधर्म्यसमवैधर्म्यसमेति
२५३	१८	अजाती	जाती
२५३	१९	नन्तरभा	नन्तर्भा
२५३	२०	लक्षणेक	लक्षणैका
२५४	१६	ल्लक्षणप	ल्लक्ष्यलक्षणप
२५४	१७	समाहृत्य	समाहृत्य
२५४	१८	दूषणासक्तं	दूषणाशक्तं
२५४	१८	सह उक्त	सदुक्त
२५५	२०	नाचिकेत	नाचिकेत
२५५	२१	गमादनित्यः	गमात् नित्यः
२५६	२०	साध्यन्द्धि-	साध्यसिद्धि-
२५७	१५	कर्तृमत्वे	कर्तृमत्त्वे
२५७	१८	तस्मात्	न तस्मात्
२५९	१९	शब्दनित्य	शब्दानित्य
२५९	२०	साध्यपक्ष इति	साध्यापकर्षेति
२५९	२४	सिद्धत्व	ऽसिद्धत्व
२५९	२४	मारोप्य	मारोप्यम्
२५९	२४	उत्कर्षसमव	उत्कर्षसमाव
२६०	१९	असिद्धार्थे	सिद्धार्थे

११४

वाद्युक्तमर्थं जानतापि यत्रोत्तरं न प्रतिपद्यते तत्राप्रतिभानामनिग्रहस्थानमित्यर्थः । न (चात्राननुभाषणस्यावश्यकत्वात् तदेव दूषणमस्त्विति वाच्यम् । परोक्ता)ननुवादे हि तत् परोक्तमनूद्यापि यत्र नोत्तरं प्रतिपद्यते तत्रासाङ्कर्यात् । वस्तुतस्तु यत्र परोक्तमनूद्यापि सभाक्षोभादिना नोत्तरं दीयते उत्तरप्रतिपत्तिश्च वर्तते (तत्राननुभाषणम् । एवं चाननुभाषण)लक्षणे उत्तरप्रतिपत्तिशालिनेति प्रतिवादिविशेषणं देयमिति ॥ १८ ॥

विक्षेपं लक्षयति ।

कार्यव्यासङ्गात् कथाविच्छेदो विक्षेपः[1] ॥ १९ ॥

कार्यव्यासङ्गा(दिति ल्यब्लोपे पञ्चमी । कार्यव्यासङ्गमुद्भाव्येत्यर्थः । कार्यव्यासङ्गश्चासम्भवत्कालान्तरकत्वेनारोपितस्तेन तादृशकथाविच्छेदो विक्षेप इत्यर्थः)॥ १९ ॥[2]

मतानुज्ञां लक्षयति ।

स्वपक्षे दोषाभ्युपगमात् परपक्षे दोषप्रसङ्गो मतानुज्ञा[3] ॥ २० ॥

दोषाभ्युपगमो दोषाभ्युपगमज्ञापकदोषानुद्धरणम् । अप्रतिषिद्धमनुमतं भ(वतीति न्यायात्**) । यथा शब्दो नित्यः श्रावणत्वादित्युक्ते ध्वनावनैकान्तिकत्वेन दूषयित्वा तेनैव हेतुना शब्दस्यानित्यत्वे साधिते ध्वनेरप्यनि-

(१) अप्रतिभावद्विक्षेपस्यापि कथानिरूप्यत्वात् तदनन्तरं विक्षेपलक्षणं सूत्रम् । कार्यव्यासङ्गात् कथाविच्छेदो विक्षेप इत्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

(२) अत्र न्यायसूचीनिबन्धे इति चतुर्भिः सूत्रैरुत्तरविरोधिनिग्रहस्थानचतुष्कप्रकरणमिति दृश्यते ।

(३) सूत्रम् । स्वपक्षे दोषाभ्युपगमादित्यादि अन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः । क्वचित् स्वपक्षदोषाभ्युपगमादिति पाठः ।

त्यत्वान्न दोष इत्युक्तौ तत्राप्यसिद्धत्वादयो द्रष्ट(व्या इति सोऽयं मतानुज्ञया निगृहीतः स्यादिति ॥ २० ॥

पर्यनुयोज्योपेक्षणं) लक्षयति ।

निग्रहस्थानप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणम्(१) ॥ २१ ॥

निग्रहस्थानं प्राप्तवतोऽनिग्रहः निग्रहस्थानानुद्भावनमित्यर्थः । यत्र त्वनेकनिग्रहस्थानपातस्तत्रैके(नोद्भावने न पर्यनुयोज्योपेक्षणं यावन्तो)दोषास्तावन्त एकदोद्भाव्या इतिनियमाभावात् तथा चावसरे निग्रहस्थानोद्भावनत्वावच्छिन्नाभावः पर्यनुयोज्योपेक्षणमिति फलितम् । इदं मध्य(स्थेनैवोद्भाव्यम् । तेन वादिना स्वकीयदोषोद्भावनासम्भवे ऽपि न क्षतिः । वादे तु स्वयमप्युद्भा)व्यमिति ॥ २१ ॥

निरनुयोज्यानुयोगं लक्षयति ।

अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः(२) ॥ २२ ॥

अनिग्रहस्थाने तन्निग्रहस्थान(रहिते तन्निग्रहस्थानस्याभियोगो निरनुयोज्या)नुयोग इति । अवसरे यथार्थनिग्रहस्थानोद्भावनातिरिक्तनिग्रहस्थानोद्भावनमिति फलितम् । तेनैकनिग्रहस्थानस्थले निग्रहस्थानान्तरोद्भावनस्य (सङ्ग्रहः । स चतुर्धा छलं जातिराभासोऽनवसरग्रहणं

---

(१) मतानुज्ञाया उद्भावननिरूप्यनिग्रहस्थानत्वमितिसङ्गत्या सूत्रम् । निग्रहस्थानप्राप्तस्येत्यादि अन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

(२) अनुयोगनिरूप्यत्वसङ्गत्या सूत्रम् । अनिग्रहस्थान इत्यादि अन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

च।) आभासो व्यभिचारादावसिद्ध्याद्युद्भावनम्। अनवसरग्रहणं चाकाल एवोद्भावनम् ॥ २२ ॥[१]

अपसिद्धान्तं लक्षयति ।

सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्तः[२] ॥ २३ ॥

सिद्धान्तं स्वशास्त्राभ्युपगतं वक्तव्यमिति नियममङ्गीकृत्य। अनियमात् तन्नियममतिक्रम्य कथनमपसिद्धान्तः। अपसिद्धान्तं दूषणं सौगतो न मन्यत इत्यन्यदेतत् ॥२३॥

क्रमप्राप्ततया हेत्वाभासलक्षणे करणीये पूर्वोक्तमेव स्मारयति ।

हेत्वाभासाश्च यथोक्ताः[३] ॥ २४ ॥

यथोक्ता यथावदुक्ताः । बहुवचनेन सामान्यविशेषलक्षणानि ज्ञापितानि । चकारश्चानुक्तसमुच्चायक इति ॥ २४ ॥[४]

समाप्तं पञ्चमाध्यायस्याद्यमाह्निकम् ॥

ग्रन्थावसाने स्वशास्त्रस्य फलमुपसंहरति ।

आम्नायार्थेत्यादि[५] ॥

---

(१) अत्र न्यायसूचीनिबन्धे इति त्रिभिः सूत्रैर्दोषनिरूप्यमतानुज्ञादिनिग्रहस्थानत्रिकप्रकरणमिति दृश्यते ।

(२) सूत्रम् । सिद्धान्तमभ्युपेत्येत्यादि अन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

(३) हेत्वाभासाश्च यथोक्ताः । हेत्वाभासा यथा येन प्रकारेणोक्ता लक्षितास्तथैव तेनैव रूपेण निग्रहस्थानानि तथा येन रूपेणासिद्धित्वादिना तेषां हेतुदूषकत्वं तदेव रूपं पुरस्कृत्य हेत्वाभासप्रयोक्तृतया कथकासत्त्वुच्चयनमपीति सूत्रार्थ इत्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

(४) अत्र न्यायसूचीनिबन्धे इति द्वाभ्यां सूत्राभ्यां कथकान्योक्तिनिरूप्यनिग्रहस्थानद्वयप्रकरणमिति दृश्यते ।

(५) भाष्यवार्त्तिकतात्पर्यटीकाविश्वनाथकृतवृत्तिन्यायसूचीनिबन्धादिषु पर्यालोचितेष्वपि नेदं तेषु दृश्यते भाष्येऽप्येतादृशं प्रतीकं न दृश्यत इति किमिदं कुतस्त्यमिति चिन्तनीयम् ।

आम्नायो वेदः तस्यार्थः विधिनिषेधादिलक्षणस्तद्विरोधेन न्यायस्य जीवात्मपरमात्ममननानुकूलपञ्चावयववाक्यस्य चर्चां मदेतच्छास्त्रानुसारेणानुसन्धानं यः साधकः करोति तेन निःश्रेयसं मोक्षरूपं प्राप्यते अन्यथा वेदार्थविरोधेन न्यायचर्चायां गोमायुयोनिः शृगालयोनिः प्राप्यत इत्यर्थः। एतेनान्वीक्षिकीमधीयानः शार्गाली योनिमाप्नुयादिति भगवता श्रीरामेण जावालिमृषिं प्रति दत्तः शापो वेदाननुसरण एवेति सूचितम् ॥

इति श्रीराधामोहनविद्यावाचस्पतिगोस्वामिभट्टाचार्यविरचिते गोतमसूत्रविवरणे
पञ्चमाध्यायविवरणम् ॥

समाप्तश्चायं ग्रन्थः ॥

॥ श्रीहरिः ॥

'*sat*'[1] imply mere existence, since it expresses the relation "the Self is *Brahman*" (*sa ātmā*).

704. Hence, for us, the words "*sad* etc." in Scripture signify by clear implication (*lakshanā*) the Self which is not within the scope of words or other proofs.

705. Even if mere existence which is amenable to proof is implied, then too the fact that Scripture treats of *Brahman* cannot be gainsaid.

706. A passage which reveals a thing knowable by another proof, does not nevertheless cease to be a proof in secular practice, as, for example, the words of a trustworthy friend.

707. The words of a trustworthy friend "I have understood that thing" do not lose their authority, being independent of other proof. But it will not be authoritative by itself, if the hearer himself is to understand that thing.

708. The words of an incredible friend are not authority at all, though connected with other proofs. Hence, since the words of a trustworthy friend are authority, though connected with other proofs, they will be authority similarly for the thing itself.

709 and 710. This being so, since the *Vēdāntas* teach some superhuman knowledge which becomes clear on the destruction of all duality, how can they, like the words of a trustworthy friend, be said to be of no authority for that reason? And if their authority is established, the thing they treat of is established too, and hence nothing more need be said about it.

[1] in सदेवसोम्य etc.

711. Further, if other proofs are to be assumed in the case of the unity of Self, by reason of its being established (*siddha*), are they not likewise to be assumed in the case of injunction because the latter is of the nature of something to be done?

712. Injunction is as much a thing to be done as commands and entreaties. Only in this way is it implied by the potential mood, &c.

713. Injunction is of the nature of a thing to be done, because it depends on something else for its accomplishment. And this is not affected by results derivable from other proofs.

714. If it be said that injunction is a result in a special sense, then, such speciality is not absent even in secular acts.

715. If the meaning is that it is cognisable by special knowledge, nothing can prevent the same being said of any thing whatsoever.

716. Only this much depends on Scripture, namely, it teaches what is its object and what not. What ought or ought not to be done depends, not on Scripture, but on reasoning.[1]

717. As for the objection[2] about the unity of Self in consequence of its being established, the same objection applies even to an injunction when it is accomplished.

718. It cannot be said that injunction is not established if its object such as sacrifice etc. is not per-

[1] *i. e.* whether the act will be a means to achieve the end or not.

[2] That it is knowable by other proofs. See verse 711 *supra*.

formed. For, if it is not established, the injunctory passages of Scripture will become fruitless.[1]

719. What proof can convey more instruction than the Vedic passage which alone is able to express clearly the true nature of things, namely, the unity of Self?[4]

720. The need for other proofs is only in cases where the springing of knowledge depends on a knower etc., and not where all difference is destroyed.

721. "In *Vēdānta* too, the connection between the meanings of words is dependent on an injunctory meaning. In secular practice, the connection, being the result of arrangement, is derived from other proofs.

722. "The arrangement of words is preceded by an intention to speak. And an intention to speak has reference solely to an object which is knowable by other proofs.

723. "Hence the derivation of any meaning from the *Vēdānta* in the absence of injunction is a delusion, like the mistaking of a marsh for a lake."

724. Listen now to what is to be said to meet this argument.

725. Why should the dependence on injunction be accepted for the congruity of word-meanings? Why should not the dependence on other word-meanings be assumed?

---

[1] The injunction must first be established before anything is done on its authority.

[2] viz. the sentence तत्वमसि. The unity of Self is not amenable to other proofs.

711. Further, if other proofs are to be assumed in the case of the unity of Self, by reason of its being established (*siddha*), are they not likewise to be assumed in the case of injunction because the latter is of the nature of something to be done?

712. Injunction is as much a thing to be done as commands and entreaties. Only in this way is it implied by the potential mood, &c.

713. Injunction is of the nature of a thing to be done, because it depends on something else for its accomplishment. And this is not affected by results derivable from other proofs.

714. If it be said that injunction is a result in a special sense, then, such speciality is not absent even in secular acts.

715. If the meaning is that it is cognisable by special knowledge, nothing can prevent the same being said of any thing whatsoever.

716. Only this much depends on Scripture, namely, it teaches what is its object and what not. What ought or ought not to be done depends, not on Scripture, but on reasoning.[1]

717. As for the objection[2] about the unity of Self in consequence of its being established, the same objection applies even to an injunction when it is accomplished.

718. It cannot be said that injunction is not established if its object such as sacrifice etc. is not per-

[1] *i. e.* whether the act will be a means to achieve the end or not.

[2] That it is knowable by other proofs. See verse 711 *supra*.

formed. For, if it is not established, the injunctory passages of Scripture will become fruitless.[1]

719. What proof can convey more instruction than the Vedic passage which alone is able to express clearly the true nature of things, namely, the unity of Self?[2]

720. The need for other proofs is only in cases where the springing of knowledge depends on a knower etc., and not where all difference is destroyed.

721. "In *Vēdānta* too, the connection between the meanings of words is dependent on an injunctory meaning. In secular practice, the connection, being the result of arrangement, is derived from other proofs.

722. "The arrangement of words is preceded by an intention to speak. And an intention to speak has reference solely to an object which is knowable by other proofs.

723. "Hence the derivation of any meaning from the *Vēdānta* in the absence of injunction is a delusion, like the mistaking of a marsh for a lake."

724. Listen now to what is to be said to meet this argument.

725. Why should the dependence on injunction be accepted for the congruity of word-meanings? Why should not the dependence on other word-meanings be assumed?

---

[1] The injunction must first be established before anything is done on its authority.

[2] viz. the sentence तत्त्वमसि. The unity of Self is not amenable to other proofs.

726. Thus, if connection between word-meanings is established even without injunction, then injunction would become fruitless for want of an object.

727. This fault of meaninglessness extends also to other words.[1] If it be said that they convey their own particular meaning, even the other words[2] may be said to do so.

728. This being so, tell me why injunction is not fruitless, sharing, as it does, the same fate with words which are not injunctory.[3]

729. "I shall explain. The injunctory word implies what cannot be known by any other proof. And the one purpose it serves is the implication of connection between words.[4]

730. "Such implication does not arise from words which are not injunctory, since they mean things established by other proofs and are therefore merely explanatory."

731. The injunctory meaning is understood even when no connection is apparent. If the connection is known, the injunctory word will express what is already established.

732. If all knowledge of connection be ignored, the word will forfeit its very nature.[5] Hence, every-

[1] Such as nouns etc.

[2] viz. verbs etc.

[3] If other words depend on the potential mood for their meaning, the latter equally depends on the former for its own.

[4] See verse 721 *supra*.

[5] The nature of a word is to express its own meaning in connection with other words. The nature of a sentence is otherwise.

where, a word expresses its meaning only when its connection is known.

733. Any other assumption would lead to inconsistency throughout. If the relation of signifier and signified be confined only to the connection between a sentence and its meaning, then, since each sentence refers only to one particular object, there will be no idea of any connection whatever.

734. A particular thing, such as the quality of a cow, cannot have any application to another particular thing. No connection is discovered, since each is established independently.

735 and 736. Even that connection which is inferred from the curiosity of the hearer following on the understanding of a word, is not clearly discernible. For, how can it be implied only by the word, being defined as it is by some action on the part of the hearer?

737. If it is said to be understood from the word before any inference, why should not the understanding of the word be preceded by inference?

738. Even in the case of a hearer who acts after understanding an injunction from the word, his knowledge of the meaning of the word is derived from inference alone.

739. Since injunction is to be inferred from an act which is an object of direct perception, it too, like all objects of direct perception, assumes a secular nature.

740. If injunction is not an effect (*kārya*), what benefit is to be derived from the performance of sacrifices?

In that event, even the injunctory passage would teach what is already established.

741. Further, as between the word and the inference, priority is hardly discoverable, as between the seed and its products. Hence the priority of the word cannot be assumed.

742. Or, inference may rightly be said to precede the word, since a word whose connection is unknown, cannot be expressive, but only explanatory.

743. He who is taught by inference[1] does not know what is taught by the word. The knowledge of another knower either of the same or of a different object, does not, by reason thereof, become secondary (*anuvādaka*).

744. Only the reason of the action can be inferred from the action itself. And since this is established by secular proofs, there is no proof to establish any Scriptural injunction.

745. Every action is not the exclusive consequence of the idea that something should be done; for, action is seen to result at the sight of things like serpents etc.

746. The fruit of human endeavour is action; and the cause of such endeavour is the action implied by the injunction. The cause of the endeavour cannot be its fruit. All these (contradictory) statements are made by yourself.

747. In the case of attempts to run away from serpents etc., the action is not the fruit, for, there is only

[1] *e. g.* a child.

an absence of danger, and mere negation cannot anywhere be a fruit.

748. "Injunction is of the nature of proof, being expressed by the injunctory word. Without being in need of any other proof, it is itself a proof by implication."[1]

749. The implication is derived neither from the word nor from any other proof. Further, there will be the fallacy of an unoriginated activity.[2]

750. You have thus to abandon unwittingly the very theory you contended for.[3] Let the injunctory Scripture be a proof for anything whatsoever. Of what use is it?

751. Of what is it the proof? Not of sacrifice etc. which are proved by their respective words. Nor is the secular connection of things (*samsarga*) dependent on injunction, for the hearer understands the connection even in the absence of injunction from a passage which is not injunctory.[4]

752. If it be said that the capacity to bear fruit depends on injunction, it is not so, for, even there, its importation by the word itself cannot be gainsaid.

753. Therefore the connection between things, like

---

[1] *i. e.* an injunction itself implies means, doer, fruit etc.

[2] नियोगस्य मानान्तरागम्यत्वे लिङादेस्तत्र शक्त्यग्रहादज्ञातशक्तेरपि पुरुषो लिङादिश्रवणात्प्रवर्तेत ॥ Anandagiri.

[3] For, all action based on a word can take place only after the word is understood.

[4] *e. g.* from the sentence "he is the king's servant."

any other connection, is not dependent upon an injunctory, meaning. Thus knowledge can result even without injunction.

754. Thus all words, placed together in accordance with their respective dependence (*ākāmkshā*), imply a particular meaning by virtue of their mutual relation.[1]

755. "Let there be an injunction of the knowledge of Self to bring about such knowledge, in the same way as ritual injunction brings about ritual.

756. "Activity here will also result in the same way as activity in rituals; for, just as a thing not yet done is done, so too, a thing yet unknown is known."[2]

757. Thus do some who are fond of injunction impose an injunction even on a thing which does not admit of any injunction. This is to be said against them.

758. The scope of injunction is not the understanding of the nature of the rite, but the connection of the enjoined rite with its fruit.

759. The idea of agency is inconsistent with the knowledge of Self, for the Self which is the agent cannot be the subject of injunction.[3]

760. Grain etc., for example, though carefully examined and understood by direct perception, convey no reference to any rite.

[1] Not by virtue of any injunction.

[2] The opponent supposes two kinds of injunction in the *Vedas*.

[3] Even supposing that the *jīvātman* or *paramātman* is the doer, neither depends on injunction for a true understanding of its nature, being self-established.

REPRINT FROM THE PANDIT.

तार्किकरक्षा ।

श्रीमदाचार्यवरदराजविरचिता ।

तत्कृतसारसङ्ग्रहाभिधव्याख्यासहिता ।

महोपाध्यायकोलाचलश्रीमल्लिनाथसूरिविरचितया
निष्कण्टकाख्यया व्याख्यया ज्ञानपूर्णनिर्मितया
लघुदीपिकाख्यया टीकया च समन्विता ।

वाराणसीस्थराजकीयप्रधानसंस्कृतपाठशालीयपुस्तका-
लयाध्यक्षेण पण्डितविन्ध्येश्वरीप्रसाद-
द्विवेदिना संस्कृता ।

वाराणस्याम्
मेडिकल्हाल्नामकयन्त्रालये
१९०३ ईसवीयवर्षे
मुद्रिता ।

॥ श्रीः ॥

ॐ नमः परमात्मने ।

सटीकतार्किकरक्षायाः भूमिका ।

माधवाचार्याणां सर्वदर्शनसङ्ग्रहे(१) पूर्णप्रज्ञदर्शननिरूपणे(२)

---

(१) एशियाटिकसोसाइटीसमादेशेन कलिकातानगरे मुद्रिते सर्वदर्शनसङ्ग्रहपुस्तके तन्मूलतया मुद्रिते पुस्तकान्तरे ऽपि समाप्तावेवं लिखितमस्ति । "इतः परं सर्वदर्शनशिरोमणिभूतं शाङ्करदर्शनमन्यत्र लिखितमित्यत्रोपेक्षितमिति ।" इदमेवावलम्ब्येदानीं विद्वांसः कल्पयन्ति यत् शाङ्करदर्शनं पञ्चदशीग्रन्थे तथा विवरणप्रमेयसङ्ग्रहग्रन्थे च माधवाचार्येण संन्यासाश्रमे नाम्ना विद्यारण्यस्वामिना लिखितं तस्मात् सर्वदर्शनसंग्रहस्य पञ्चदशीग्रन्थेन विवरणप्रमेयसङ्ग्रहेण च सम्बन्ध इति । किं तु वाराणसीनिवासिश्रीयुक्तबाबूगोविन्ददासमहोदयानां निकटे वर्तमाने सर्वदर्शनसङ्ग्रहान्तिमभागे पातञ्जलदर्शननिरूपणानन्तरं शाङ्करदर्शननिरूपणस्य विद्यमानत्वादनुमीयते मुद्रितपुस्तकमूलभूतलिखितादर्शपुस्तकस्य परमादर्शपुस्तकस्य वा खण्डितत्वात् "इतः परं सर्वदर्शनशिरोमणिभूत"मित्यादिलेखो लेखकशोधककल्पितः, सर्वदर्शनसंग्रहलेखशैलीभिन्नशैलीकत्वात् पञ्चदशीविवरणप्रमेयसंग्रहसम्बन्धो ऽप्यसङ्गत एवेति ।

केचित्तु तार्किकशिरोमणिरघुनाथकृतं सर्वदर्शनशिरोमणिग्रन्थं माधवाचार्यकृतसर्वदर्शनसङ्ग्रहस्य व्याख्यानमिति वर्णयन्ति । तदप्यदर्शनमूलकम् यत एलएल. डी., सी. आई. ई. उपाधिधारिणा राजेन्द्रलालमित्रेण नोटिसेस् आफ संस्कृतमेनुस्क्रिप्ट्सपुस्तके १८४७ संख्यायां तद्ग्रन्थस्य वर्णनं लिखितमिति । सो ऽपि ग्रन्थो माधवाचार्यकृतसर्वदर्शनसंग्रहवदेव बोध्यः ।

(२) एशियाटिकसोसाइटीमुद्रितपुस्तके ७० पृष्ठे ।

"तार्किकरक्षायां[१] च।

धर्मस्य तदतद्रूपविकल्पानुपपत्तितः।
धर्मिणस्तद्विशिष्टत्वभङ्गो नित्यसमो भवेत् ॥"

इति लेखदर्शनात् कोऽसौ तार्किकरक्षाग्रन्थः केन चाचार्येण रचितो यो हि वेदभाष्यादेः प्रणेतृभिर्माधवाचार्यै-[२]रुद्धृत इति पर्यालोचयता मया चिरं तदन्वेषणे कृते भूतपूर्वैर्वाराणसीस्थैर्विद्वद्वरैः श्रीहरिकृष्णव्यासैः सम्पादितं तज्ज्येष्ठसूनुश्रीविद्याधरव्यासेन दत्तं वरदराजाचार्यकृततार्किकरक्षापुस्तकं[३] तत्कृततद्व्याख्यानसारसङ्ग्रहपुस्तकं[४]

(१) अत्र मुद्रितपुस्तके पृष्ठे ३०० ।

(२) सर्वदर्शनसङ्ग्रहारम्भे ।

"श्रीमत्सायणदुग्धाब्धिकौस्तुभेन महौजसा ।
क्रियते माधवार्येण सर्वदर्शनसङ्ग्रहः ॥
पूर्वेषामतिदुस्तराणि सुतरामालोड्य शास्त्राण्यसौ
श्रीमत्सायणमाधवः प्रभुरुपन्यास्यत् सतां प्रीतये ॥" इत्यादि।

सायणमाधवाचार्येणैव वेदभाष्यपराशरमाधवव्यवहारमाधवकालमाधवजैमिनीयन्यायमालाविस्तरादिग्रन्थाः प्रणीता इति नैव तिरोहितमस्ति विदुषाम् ।

(३) पुस्तकमिदं कागजाख्याधारे प्राचीनदेवनागराक्षरैः कुटिलेतिप्रसिद्धैर्लिखितं विशुद्धं मूलमात्रं सम्पूर्णम् ।

(४) इदमपि पूर्ववत् । अत्र लेखकेन लिपिकाल एवं लिखितः "संवत् ५७ श्रावणसुदि २" परन्तु संवत् १४५७ इति बोध्यः निरूप्यमाणलघुदीपिकापुस्तकान्ते लेखकेन लिपिकालस्य "संवत् १४५९ वर्षे वैशाख(ख)शु० २" एवंलिखितत्वात् तयोः कागजाख्याधारस्य लिपेश्चैकाकारत्वादेकलेखकलिखितत्वाच्च ।

ज्ञानपूर्णविरचितलघुदीपिकाख्यतट्टिप्पणपुस्तकं(१) च लब्धम् ।

तल्लब्ध्या जातोत्साहेन मया व्याख्यानान्तरान्वेषणे कृते एकस्य वृद्धस्यास्मत्सम्बन्धिनो गृहे ब्राह्मणसम्पादनीयत्वेन(२) स्थापितेषु वस्तुषु संख्यापूरकत्वेन निक्षिप्तेषु दुर्दशापन्नेषूत्तमेषु हस्तलिखितपुस्तकेषु हठादाकर्षितेषु भूयोभूयो निवार्यमाणेन मया कोलाचलमल्लिनाथसूरिकृतस्य निष्कण्टकाभिधस्य सारसङ्ग्रहानुगततार्किकरक्षाव्याख्यानस्य पुस्तकं प्रथमपरिच्छेदमात्रं(३) लब्धम् । तदनन्तरमस्यैव ग्रन्थस्य पुस्तकान्तरमपि वाराणस्यामेवैकस्य संन्यासिनो निकटे वर्तमानं कृमिभक्षितसर्वदेशं विशीर्णमन्ते खण्डितं च (४) लब्धम् । अनन्तरं वाराणसीस्थराजकीयाङ्गलपाठ-

(१) इदमपि सम्पूर्णं किन्त्वनेकस्थलेष्वलग्नपाठमशुद्धं च ।

(२) अध्ययनाध्यापनादिर्ब्राह्मणधर्मः स च पुस्तकेन विना न भवतीति पुस्तकं शालग्रामशिलासमीपे स्थाप्यं वा गङ्गायां प्रक्षेपणीयमिति तस्य वृद्धस्य सिद्धान्तः ।

(३) इदं पुस्तकं कागजाख्याधारे देवनागराक्षरैर्लिखितं जीर्णं त्रुटितपार्श्वभागं स्पर्शानर्हमशुद्धम् । अत्र यद्यपि लेखकेन लिपिकालो न लिखितस्तथापि जीर्णत्वाद्याकारेणानुमीयते यत् वर्षसार्द्धशतद्वयात् पूर्वं लिखितमिति ।

(४) अत्रारम्भपत्रस्य पूर्वपृष्ठे एवं लिखितमस्ति । "श्रीसर्वविद्यानिधानकवीन्द्राचार्यसरस्वतीनां वरदराजीयटीकानिष्कण्टकापुस्तकम् ॥" एवं हस्ताक्षरमुद्राचिह्नितान्यनेकानि पुस्तकानि वाराणस्यां क्वचिद्देशान्तरेष्वपि महापुस्तकालयेषु वर्तमानानि दृश्यन्ते । तस्मादनुमीयते यत् वाराणस्यां कोऽपि महान् पुस्तकालय उक्तमहात्मन आसीदिति ॥

शालाध्यापकेन पण्डितगणेशदत्तत्रिपाठिना प्रदत्तं सारसङ्ग्रहसहितं तार्किकरक्षापुस्तकं प्रथमपरिच्छेदमात्र(१)मन्यच्च पण्डितवरगौरीनाथशास्त्रिणा समर्पितं तदपि प्रथमपरिच्छेदमात्रं(२) प्राप्तम् ।

एतेषां पुस्तकानां प्राप्त्यातीवमुदितचित्तोहममुं निबन्धोत्तमं सटीकं मुद्रणद्वारा प्रकाशयितुं समुत्सुको वाराणसीस्थराजकीयसंस्कृतपाठशालाप्रधानाध्यक्षाणां प्रभुवराणां श्रीमतां आर्थरवेनिससाहबमहाशयानां निदेशं समधिगम्य पूर्वं विजयनगरसंस्कृतसीरीज्नामकपुस्तकावल्यां मुद्रयितुं प्रवृत्तः किं तु तस्या विश्रान्तत्वात् काशीविद्यासुधानिधिनामके मासिकपत्त्र इदानीं मुद्रितवान् । मुद्रणारम्भश्च येन प्रकारेण जातः स चोक्तमहाशयैरेव पुस्तकारम्भे ऽङ्गलभाषया सङ्क्षेपतः प्रकाशितः ।

पूर्वोक्तेषु पुस्तकेष्वसन्निकटे वर्तमानेष्वपि संशोधनस्य सम्यक्त्वसम्पादनेच्छया मया श्रीयुक्तरामकृष्णगोपालभाण्डारकर एम्. ए. पीएच्. डी., महाशयसम्पादितं निष्कण्टकापुस्तकं पुण्यग्राम(पूना)स्थडेकन्कालेज्पुस्तकालयस्थमुक्तमहाशयैः कृपया प्रदत्तं समानायितम् । तेन खण्डितेनाशुद्धेनापि परमादर्शस्थैः कतिपयगुणैर्युक्तत्वादुपयोगः सम्पादितः ।

---

(१) अत्र लेखकेन लिपिकाल एवं लिखितः । संवत् १६६१ वर्षे । आश्विनवदि १४ चतुर्दश्यां लिखितमदः पुस्तकं कृष्णभट्टात्मजेन माधवभट्टेन वशिष्ठगोत्रिणा स्वपाठार्थं परपाठार्थं च ।

(२) अत्र यद्यपि लेखकेन लिपिकालो न लिखितस्तथापि जीर्णत्वाक्षराकारेणानुमीयते वर्षशतद्वयात् पूर्वं लिखितमिदं प्रायः शुद्धम् ।

अत्र वाराणसीस्थराजकीयसंस्कृतपाठशालीयन्यायाध्यापकेन तर्कतीर्थोपाधिधारिणा श्रीसुरेन्द्रलालगोस्वामिना प्रूफ्पत्त्रसमालोचनया उपकृतोऽस्मि ।

एतावतापीदं मुद्रितं पुस्तकं विशुद्धं जातमिति वक्तुमशक्यं किं त्वस्मिन् कार्ये ऽननुभूतपूर्वजातीयो महानाऽऽयासः कृतो मयेति ।

प्रथमपरिच्छेदस्य ज्ञानपूर्णकृता लघुदीपिकाटीका त्वन्ते मुद्रिता भविष्यतीत्यादर्शपुस्तकस्यापाततो दर्शनेन पूर्वं प्रतिज्ञातम् । किं तु पश्चात् सम्यक्समालोचनेनादर्शपुस्तकस्यात्यन्ताशुद्धत्वं छिन्नस्थलेषु ग्रन्थत्रुटिं चावगम्येदानीं तन्मुद्रणं साहसं मन्यमानेन मयोपेक्षितमित्यादर्शान्तरदानेनानुग्राह्योऽहमुत्साहवर्धकैर्देशोपकारपरैः पुस्तकान्वेषकैः पुस्तकोद्धारकैर्विद्वद्वरैर्यतो द्वितीयसंस्करणे तत्सम्पन्नं भवेदिति ।

दुर्लभेन पुरातनेन न्यायदर्शनानुरागिजनानन्दवर्धकेनामुना निबन्धेन मनस्तावद् विनोदयन्तो विद्वद्वरा मामकीनं परिश्रममिदानीं सफलयन्तु इति जगदीश्वरं प्रार्थय इति ॥

सटीकतार्किकरक्षायाः प्रणेता आचार्यवरदराजश्च(१) कस्मिन् देशे कस्मिन् काले आसीदितीदानींपर्यन्तं

---

(१) अपरोऽपि वरदराजो वैयाकरणसिद्धान्तकौमुदीप्रणेतॄणां भट्टोजिदीक्षितानां शिष्य आसीत् । अनेन सारसिद्धान्तकौमुदी लघुसिद्धान्तकौमुदी मध्यसिद्धान्तकौमुदी च रचिता । यथाह मध्यसिद्धान्तकौमुद्याम् ।

"नत्वा वरदराजः श्रीगुरून् भट्टोजिदीक्षितान् ।
करोति पाणिनीयानां मध्यसिद्धान्तकौमुदीम् ॥"

सारसिद्धान्तकौमुदीपुष्पिकायां "श्रीचटविटिकपिटवरदराजभट्ट-विरचिता सारसिद्धान्तकौमुदी समाप्ता" अत्र चटविटिकपटीत्युक्त्या तैलङ्गोऽयमित्यनुमीयते। अयं च भट्टोजिदीक्षितानां समय एवासीत्। भट्टोजिदीक्षितसमयश्च १६७६—१७१६ संवत्सरात्मकः यतस्तस्मिन्नेव काले वाराणस्यामेव निवसता जगन्नाथपण्डितराजेन सम्राट्जगन्नाथापरनामधेयेन* भट्टोजिदीक्षितकृतप्रौढमनोरमाग्रन्थस्य कुचमर्दननामकः खण्डनग्रन्थः कृतः तत्पुस्तकं च काव्यप्रकाशटीकाकारस्य भट्टवामनाचार्यस्य निकटे वर्तत इति मुम्बईनगरे द्वितीयावृत्तिमुद्रिते काव्यप्रकाशपुस्तके भूमिकायां २४ पृष्ठे लिखितम्। अत एव भट्टोजिदीक्षितेन स्वपाण्डित्यप्रख्यापनाय मनोरमाग्रन्थो जगन्नाथपण्डितराजस्य समीपे प्रेषित इति किंवदन्ती सङ्गच्छत इति॥

अपि च नागेशभट्टेन महाभाष्यप्रदीपोद्द्योतारम्भे "हरिदीक्षितपादाब्जसेवनाल्लब्धसन्मति"रिति वैयाकरणमञ्जूषायामपि "अधीत्य फणिभाष्याब्धिं सुधीन्द्रहरिदीक्षितादि"त्युक्तं तस्मात् नागेशभट्टो हरिदीक्षितशिष्यः। लघुशब्दरत्ने "भट्टोजिदीक्षितपौत्रहरिदीक्षितविरचिते लघुशब्दरत्ने" इति लेखदर्शनात् हरिदीक्षितो भट्टोजिदीक्षितानां पौत्रः तत्समानकालिको नागेशभट्टस्तेन च वैयाकरणबृहन्मञ्जूषाग्रन्थो रचितस्तत्पुस्तकं च १७६३ संवत्सरलिखितमस्मन्निकटे वर्तते। तस्मिन् अनेकानि क्रोडपत्राणि वर्तन्ते ऽनेकस्थलेषु एकः पाठः पूर्वं लिखितोऽनन्तरं कुण्डलनां कृत्वा तदर्थबोधकैः शब्दान्तरैरेव लाघवेन स एव पाठो लिखित

* वाराणसेयराजकीयसंस्कृतपाठशालीयपुस्तकालये सम्राट्जगन्नाथकृतरेखागणितपुस्तकमस्ति तच्च पुस्तकं ग्रन्थकर्तुराज्ञया लिखितं तथाहि।

युगवसुनगभूवर्षे १७८४ शुचिशुक्ले युगतिथौ रवेर्वारे।

अलिखल्लोकमणिः किल सम्राजामाज्ञया पुस्तम्॥

विंशतिवर्षसवयस्केन जगन्नाथेन महत्पाण्डित्यं सम्पादितमिति गणकतरङ्गिण्यां निरूपितं महामहोपाध्यायसुधाकरद्विवेदिभिः।

महामहोपाध्यायदुर्गाप्रसादस्तु काव्यमालामुद्रितरसगङ्गाधरभूमिकायां २ पृष्ठे ॥१६२८—१६६६ खृस्ताब्दे शाहजहाभिधयवनसार्वभौमसमये जगन्नाथसमाजो भिचस्य जगन्नाथपण्डितराजस्य स्थितिं निरूपयति। अनेनैव कुचमर्दननामकं खण्डनं कृतमिति।

सम्यङ्निश्चयो न भवति किं तु ग्रन्थान्ते

"आलोक्य दुस्तरगभीरतरान् निबन्धान्
वाचस्पतेरुदयनस्य तथापरेषाम् ।
सारो मयात्र समगृह्यत वावदूकै-
र्नित्यं कथासु विजिगीषुभिरेष धार्यः ॥"(१)

इत्युक्तत्वादुदयनाचार्यकृतात्मतत्त्वविवेकन्यायकुसुमाञ्जलिप्रबोधसिद्धि(२)ग्रन्थानामनेकत्रोद्धृतत्वात् उदय-

---

एवं पद्याङ्का अपि भिन्नक्रमा वर्तन्ते तस्मात् तत्पुस्तकं नागेशभट्टपरिशोधितमुपबृंहितं चेत्यनुमीयते । एतेनापि १६७६—१७१६ संवत्सरकाले भट्टोजिदीक्षितानां स्थितिरासीदिति सुवचम् ।

अपरं च वाराणसीस्थराजकीयाङ्गलपाठालयाध्यापकपण्डितगणेशदत्तत्रिपाठिनो निकटे वर्तमाने सिद्धान्तकौमुदीपुस्तके लेखकलिखितेन लिपिकालेन संवत् १७३८ एतदात्मकेन पूर्वोक्ता स्थितिरविरुद्धैव ।

सामवेदीयकल्पसूत्रव्याख्याकारो वरदराजो भिन्नः । यथाह "इति वामनाचार्यसूनुः कौशिकान्वयसम्भवो वरदराजः कल्पसंवत्सरकल्प(?)-व्याख्यां चक्रे' पाठोऽयं वाराणसीस्थराजकीयसंस्कृतपाठशालीयपुस्तके ८३ पत्रे वर्तते ।

अन्योऽपि वरदराजो येन मीमांसाशास्त्रे नयविवेकटीकाख्यो महानिबन्धो रचितो यथाह "आत्रेयस्य श्रीसुदर्शनाचार्यस्य शिष्यस्य श्रीरङ्गनाथसूनोर्वरदराजस्य कृतौ नयविवेकटीकाया"मित्यादि । इदं पुस्तकं वर्षचतुःशत्याः पूर्वं लिखितमिवाभाति वाराणसीस्थराजकीयसंस्कृतपाठशालीयपुस्तकालये खण्डितं भग्नं तृतीयाध्यायमात्रं वर्तते ॥

(१) अस्मिन् मुद्रितपुस्तके ३६४ पृष्ठे ।

(२) आत्मतत्त्वविवेकः १७९ । १८९ । १९४ । २०३ । पृष्ठेषु । न्यायकुसुमाञ्जलिः १०७ पृष्ठे । प्रबोधसिद्धिः १८९ । ३०८ । ३५७ । पृष्ठेषु ।

नाचार्येण लक्षणावलीग्रन्थस्य ९०६ शाकवर्षे (१०४१ संवत्सरे) प्रणयनात्[१] ज्ञानपूर्णकृततार्किकरक्षाटिप्पणलघुदीपिकापुस्तकस्य १४५९ संवत्सरलिखितस्यास्मन्निकटे वर्तमानत्वात् १४५९ संवत्सरात् पूर्वं १०४१ संवत्सरतश्च पश्चात् तार्किकरक्षाकर्तृवरदराजस्य स्थितिरासीदित्यत्र नास्ति वादावकाशः ।

विशेषजिज्ञासायां तु ज्ञानपूर्णेन लघुदीपिकासमाप्तौ "विष्णुस्वामिगुरुं नुमः" इत्युक्तत्वात् विष्णुस्वामिनः शिष्य इति कथितं भवति । यज्ञेश्वरभट्टेन आर्यविद्यासुधाकरे २३१ पृष्ठे "ततः शङ्करमतानुयायिना यादवनाम्ना[२] मातुलेनाध्यापितोऽयं रामानुजोऽभिनववैष्णवसम्प्रदायप्रवर्तको बभूव । अयमाचार्यो विष्णुस्वामिशिष्यसन्ताने गृहीतजन्मनो बिल्वमङ्गलस्य[३] पश्चादि"त्यादि लिखितम् । प्रपन्नामृतनामधेये रामानुजचरिते तु १०१२ शाकवर्षे (११४७ संवत्सरे) यादवाद्रिपर्वते नारायणप्रतिमा स्थापिता रामानुजाचार्येणेति प्रतिपादितम्[४] । अपि

---

(१) बनारससंस्कृतसीरीजमुद्रिते ऽस्मच्छोधिते प्रशस्तपादभाष्यपुस्तके २ खण्डे ऽन्ते ।

तर्काम्बराङ्कप्रमितेष्वतीतेषु शकान्ततः ।
वर्षेषूदयनश्चक्रे सुबोधां लक्षणावलीम् ॥

(२) यो हि यादवप्रकाश इति पूर्णनाम्ना प्रसिद्धः ।

(३) बिल्वमङ्गलस्य लीलाशुक इति नामान्तरम् । अनेन श्रीकृष्णकर्णामृतं काव्यं रचितम् ।

(४) प्रपन्नामृते ४४-४८ अध्यायेषु । अथ भक्तनगरे सार्द्धं शिष्यसङ्घेन निवसतस्तस्य स्वप्नदर्शनानन्तरं भगवन्मूर्त्युद्धरणार्थं यादवाद्रिग-

च आर्यविद्यासुधाकरे २२८ पृष्ठे, विष्णुस्वामिन इतिहासनिरूपणप्रसङ्गे इदमपि लिखितम् "अयं च शङ्कराचार्यादर्वाचीनः ।" "यतोऽनेनाद्वितीयनिराकारब्रह्मप्रतिपादकं शङ्करसम्मतवेदान्तसिद्धान्तं प्रतिक्षिप्य साकारब्रह्मप्रतिपादकं स्वमतं प्रवर्तितमिति माधवीयसर्वदर्शनसंग्रहाभिधग्रन्थाल्लभ्यते ।"

नीलकण्ठभट्टकृतशङ्करमन्दारसौरभे तु
"प्रासूत तिष्यशरदामतियातवत्या-
मेकादशाधिकशतोनचतुःसहस्र्याम् ।"

इत्युक्त्या ३८८९ कलिवर्षे ८४५ वैक्रमसंवत्सरे शङ्कराचार्याविर्भावः सिद्ध्यति (१) । एतेन ८४५ संवत्सरस्य च पश्चात् ११४७ संवत्सरात् पूर्वं विष्णुस्वामिनः स्थितिरिति (२) सिद्धम् । अपरं च लक्षणावलीग्रन्थात् १०४१ संव-

---

मतकथनम् १०१२ शकाब्दे चैत्रशुक्लचतुर्दश्यां रामानुजाचार्यस्तत्र नारायणप्रतिमां प्रतिष्ठापितवानित्यादि सर्वं निरूपितम् ।

(१) प्रस्थानत्रयभाष्यकर्तुः शिवावतारस्य श्रीशङ्कराचार्यस्याविर्भावजीवनचरितादिविषये बहवो विकल्पा इदानीं दृश्यन्ते ते च परीक्षापूर्वकं न्यायवार्त्तिकभूमिकायां निरूपयिष्यन्तेऽस्माभिरास्तां तावत् ।

(२) यज्ञेश्वरभट्टेन आर्यविद्यासुधाकरे पृष्ठे २३४ "विक्रमसंवत्सरकालस्य त्रयोदशे शतके मध्वाचार्यः समभवत् । गुर्जराधिपतेः कुमारपालाभिधस्य राज्ञो राज्यसमये सम्प्रदायप्रदीपकृता मध्वाचार्यस्य समुद्भवकथनात् । विक्रमार्कसमयात् प्रगतेषु ११९९ नवनवत्यधिकैकादशशतीमितेषु संवत्सरेषु कार्त्तिकशुक्लदशम्यां कुमारपालस्य राज्याभिषेको बभूवेति प्रबन्धचिन्तामणिग्रन्थे मेरुतुङ्गाचार्येण लिखितत्वाच्च ।" इति लिखितम् ।

भविष्यपुराणपरिशिष्टे भगवद्भक्तमाहात्म्ये २१ अध्याये तु

नाचार्येण लक्षणावलीग्रन्थस्य ९०६ शाकवर्षे (१०४१ संवत्सरे) प्रणयनात्[१] ज्ञानपूर्णकृततार्किकरक्षाटिप्पणलघुदीपिकापुस्तकस्य १४५६ संवत्सरलिखितस्यास्मन्निकटे वर्तमानत्वात् १४५६ संवत्सरात् पूर्वं १०४१ संवत्सरतश्च पश्चात् तार्किकरक्षाकर्तृवरदराजस्य स्थितिरासीदित्यत्र नास्ति वादावकाशः ।

विशेषजिज्ञासायां तु ज्ञानपूर्णेन लघुदीपिकासमाप्तौ "विष्णुस्वामिगुरुं नुमः" इत्युक्तत्वात् विष्णुस्वामिनः शिष्य इति कथितं भवति । यज्ञेश्वरभट्टेन आर्यविद्यासुधाकरे २३१ पृष्ठे "ततः शङ्करमतानुयायिना यादवनाम्ना[२] मातुलेनाध्यापितोऽयं रामानुजोऽभिनववैष्णवसम्प्रदायप्रवर्तको बभूव । अयमाचार्यो विष्णुस्वामिशिष्यसन्ताने गृहीतजन्मनो बिल्वमङ्गलस्य[३] पश्चादि"त्यादि लिखितम् । प्रपन्नामृतनामधेये रामानुजचरिते तु १०१२ शाकवर्षे (११४७ संवत्सरे) यादवाद्रिपर्वते नारायणप्रतिमा स्थापिता रामानुजाचार्येणेति प्रतिपादितम्[४] । अपि

(१) बनारससंस्कृतसीरीजमुद्रिते ऽस्मच्छोधिते प्रशस्तपादभाष्यपुस्तके २ खण्डे ऽन्ते ।

तर्काम्बराङ्कप्रमितेष्वतीतेषु शकान्ततः ।
वर्षेषूदयनश्चक्रे सुबोधां लक्षणावलीम् ॥

(२) यो हि यादवप्रकाश इति पूर्णनाम्ना प्रसिद्धः ।

(३) बिल्वमङ्गलस्य लीलाशुक इति नामान्तरम् । अनेन श्रीकृष्णकर्णामृतं काव्यं रचितम् ।

(४) प्रपन्नामृते ४४-४८ अध्यायेषु । अथ भक्तनगरे सार्द्धं शिष्यसङ्घेन निवसतस्तस्य स्वप्नदर्शनानन्तरं भगवन्मूर्त्युद्धरणार्थं यादवाद्रिग-

च आर्यविद्यासुधाकरे २२८ पृष्ठे, विष्णुस्वामिन इतिहासनिरूपणप्रसङ्गे इदमपि लिखितम् "अयं च शङ्कराचार्यादर्वाचीनः ।" "यतोऽनेनाद्वितीयनिराकारब्रह्मप्रतिपादकं शङ्करसम्मतवेदान्तसिद्धान्तं प्रतिक्षिप्य साकारब्रह्मप्रतिपादकं स्वमतं प्रवर्तितमिति माधवीयसर्वदर्शनसंग्रहाभिधग्रन्थाल्लभ्यते ।"

नीलकण्ठभट्टकृतशङ्करमन्दारसौरभे तु
"प्रासूत तिष्यशरदामतियातवत्या-
मेकादशाधिकशतोनचतुःसहस्र्याम् ।"

इत्युक्त्या ३८८९ कलिवर्षे ८४५ वैक्रमसंवत्सरे शङ्कराचार्याविर्भावः सिद्ध्यति (१) । एतेन ८४५ संवत्सरस्य च पश्चात् ११४७ संवत्सरात् पूर्वं विष्णुस्वामिनः स्थितिरिति (२) सिद्धम् । अपरं च लक्षणावलीग्रन्थात् १०४१ संव-

---

मनकथनम् १०१२ शकाब्दे चैत्रशुक्लचतुर्दश्यां रामानुजाचार्यस्तत्र नारायणप्रतिमां प्रतिष्ठापितवानित्यादि सर्वं निरूपितम् ।

(१) प्रस्थानत्रयभाष्यकर्तुः शिवावतारस्य श्रीशङ्कराचार्यस्याविर्भावजीवनचरितादिविषये बहवो विकल्पा इदानीं दृश्यन्ते ते च परीक्षापूर्वकं न्यायवार्त्तिकभूमिकायां निरूपयिष्यन्तेऽस्माभिरास्तां तावत् ।

(२) यज्ञेश्वरभट्टेन आर्यविद्यासुधाकरे पृष्ठे २३४ "विक्रमसंवत्सरकालस्य त्रयोदशे शतके मध्वाचार्यः समभवत् । गुर्जराधिपतेः कुमारपालाभिधस्य राज्ञो राज्यसमये सम्प्रदायप्रदीपकृता मध्वाचार्यस्य समुद्भववर्णनात् । विक्रमार्कसमयात् प्रगतेषु ११९९ नवनवत्यधिकैकादशशतीमितेषु संवत्सरेषु कार्त्तिकशुक्लदशम्यां कुमारपालस्य राज्याभिषेको बभूवेति प्रबन्धचिन्तामणिग्रन्थे मेरुतुङ्गाचार्येण लिखितत्वाच्च ।" इति लिखितम् ।

भविष्यपुराणपरिशिष्टे भगवद्भक्तमाहात्म्ये २१ अध्याये तु

"विष्णुस्वामी प्रथमतो निम्बादित्यो द्वितीयकः ।
मध्वाचार्यस्तृतीयस्तु तुर्यो रामानुजः स्मृतः ॥"

इति लिखितत्वात् रङ्गरामानुजात् पूर्वं विक्रमवर्षीयां त्रयोदशशतके मध्वाचार्यस्तस्मादपि पूर्वं निम्बादित्यस्तस्मात् पूर्वं विष्णुस्वामीति क्रमोऽपि १०४१ संवत्सरात्परं ११४७ संवत्सरात् पूर्वं विष्णुस्वामिनः स्थितिं न विरोधयति । तुर्यो रामानुजः स्मृत इति भविष्यपुराणपरिशिष्टं तु उपनिषद्भाष्यकाररङ्गरामानुजपरं बोध्यमन्यथा तस्मिन्नेव पुराणे सम्प्रदायप्रवर्तकरामानुजस्याग्रे वर्णनीयत्वादुन्मत्तप्रलापापत्तेरिति* ।

मध्वाचार्याणामितिहासस्तु विस्तरतो महाभारतीयभविष्यत्पर्वणि निरूपितः । यद्यपि शङ्कराचार्याणामितिहासो माधवीयशङ्करविजयादौ प्रसङ्गादन्येषामाचार्याणामपि तत्रैव, रामानुजाचार्याणां प्रपन्नामृते वल्लभाचार्याणां वल्लभदिग्विजये निरूपित एव तथापि न पर्याप्तः किं तु महाभारतस्य पूरको हरिवंशो वर्तत एव तदनन्तरमपि भविष्यत्पर्व वर्तते, एवं भविष्यपुराणपूरकं भविष्योत्तरपुराणं तस्यापि पूरकं भविष्यपुराणपरिशिष्टं वर्तत इति चित्रम् ॥

---

* वाराणसीस्थराजकीयसंस्कृतपाठशालाध्यापकपण्डितभागवताचार्यास्तु तुर्यो रामानुजः स्मृत इत्यस्याभिप्रायं वक्ष्यमाणरीत्या निरूपयन्ति ।

द्वापरान्ते कलेरादौ प्रोक्तः सङ्कर्षणेन य इति महाभारतादिप्रोक्तविधया ऽवतीर्णोऽनन्तमूर्त्तिर्भगवान् रामानुजमुनिरार्षब्रह्ममीमांसासिद्धान्तप्रत्यवस्थानेन श्रीशङ्कराचार्येण सूत्राभिप्रायसंवृत्या स्वाभिप्रायप्रकाशनादिति तत्पूर्व्यभास्कराचार्याद्युक्तरीत्या युक्त्यवष्टम्भेन ब्रह्मसूत्राणि बोधायनसिद्धान्तपराकरणमुद्रया व्याचक्षाणेनार्षनिबद्धान्प्रतिबिम्बवादावच्छेदवादाभासवादप्रमुखानर्थान् कार्त्स्न्येन निरस्य भगवद्बोधायनकृतां ब्रह्मसूत्रवृत्तिमित्यादिप्रतिज्ञानुसारं तं प्रतिष्ठापयितुकामो व्याचकारेति तुर्यो रामानुज इति न क्रमाभिप्रायं तुर्यत्वमपि तु विष्णुस्वामिप्रभृतिभिरपाकृततत्तदर्थजातपराकर्तृतया सिद्धान्तप्रतिष्ठापनपर्याप्त्यभिप्रायम् । यथान्यदीयग्रन्थकारा अपि रामानुजःश्रीपद्गणनायोर्निनिम्ब बिम्बप्रतिबिम्बवादमित्यादि स्वस्वग्रन्थेष्वधिकमपेक्षमाणैः श्रीभाष्यमालोकनीयमिति तात्पर्येण सनिर्भरमाहुः । रङ्गरामानुजाचार्यास्तु संप्रदायप्रवर्तकत्वाभावेन न व्यपदेशमर्हन्ति । तुर्यो नाम संन्यस्तवानिति आश्रमानुसार्यपि क्रमस्सर्वांशे न प्रमाणसिद्ध इति ।

त्सरे उदयनाचार्याणां स्थितिरासीदित्यप्युक्तम् । तस्मात् "वाचस्पतेरुदयनस्य तथापरेषा"मिति वदतस्तार्किकरक्षाकर्तुरुदयनाचार्यसमयपश्चाद्भाविनो वरदराजाचार्यस्य तथा अस्मात् किञ्चित्पश्चाद्भाविन एतत्समानकालिकस्य वा तार्किकरक्षाटीकालघुदीपिकाकर्तुर्विष्णुस्वामिशिष्यस्य ज्ञानपूर्णस्य च १०४१ संवत्सरादनन्तरं ११४७संवत्सरात् पूर्वं स्थितिरासीदित्यनुमीयते ॥

वरदराजाचार्येण "आलोड्य दुस्तरगभीरतरान् निबन्धान्" इत्याद्युक्तत्वात् तार्किकरक्षाग्रन्थसमालोचनात् मल्लिनाथेन चोपोद्धाते "इह खलु तत्रभवान् बालानुकम्पी वरदराजः सकलन्यायशास्त्ररहस्योपदिदिक्षया स्वविरचिततार्किकरक्षाश्लोकव्याख्यानाय सारसङ्ग्रहं नाम प्रकरणमारभमाण" इत्याद्युक्तत्वात् सिद्धं भवति यत् सूत्राणामतिसंक्षिप्तत्वात् भाष्यवार्त्तिकादिग्रन्थानां विस्तृतत्वाद्दुरूहत्वाच्च न्यायसिद्धान्तसिद्धान् प्रमाणादिपदार्थान् प्रथमतः श्लोकात्मकेन ग्रन्थेन निबबन्ध पश्चात् तस्याप्यस्फुटार्थत्वं विचार्य सारसंग्रहटीकाग्रन्थेन व्याख्यातवान् ।

केचित्तु तार्किकरक्षाग्रन्थं तर्ककारिकानाम्ना व्यवहृतवन्तोऽदः पुरातनं न्यायप्रकरणं वरदराजाचार्येण स्वकृतया सारङ्ग्रहाभिधटीकया विशदीकृतमिति वदन्ति । तन्मन्दम् ज्ञानपूर्णेन लघुदीपिकायाम्

"पुरा वरदराजेन न्यायशास्त्रार्थसंग्रहः ।
कृतः परत्वतो बुद्ध्वा (?) पद्यानां दुर्ग्रहार्थताम् ॥
तेनैव रचिता व्याख्या सा च शास्त्रपदं गता ।
ततस्तदर्थसिद्ध्यर्थं करोमि लघुदीपिकाम् ॥"

इत्याद्युक्तत्वात् ।

"विष्णुस्वामी प्रथमतो निम्बादित्यो द्वितीयकः ।
मध्वाचार्यस्तृतीयस्तु तुर्यो रामानुजः स्मृतः ॥"

इति लिखितत्वात् रङ्गरामानुजात् पूर्वं विक्रमवर्षाणां त्रयोदशशतके मध्वाचार्यस्तस्मादपि पूर्वं निम्बादित्यस्तस्मात् पूर्वं विष्णुस्वामीति क्रमोऽपि १०४१ संवत्सरात्परं ११४७ संवत्सरात् पूर्वं विष्णुस्वामिनः स्थितिं न विरोधयति। तुर्यो रामानुजः स्मृत इति भविष्यपुराणपरिशिष्टं तु उपनिषद्भाष्यकाररङ्गरामानुजपरं बोध्यमन्यथा तस्मिन्नेव पुराणे सम्प्रदायप्रवर्तकरामानुजस्याग्रे वर्णनीयत्वादुन्मत्तप्रलापापत्तेरिति* ।

मध्वाचार्याणामितिहासस्तु विस्तरतो महाभारतीयभविष्यत्पर्वणि निरूपितः । यद्यपि शङ्कराचार्याणामितिहासो माधवीयशङ्करविजयादौ प्रसङ्गादन्येषामाचार्याणामपि तत्रैव, रामानुजाचार्याणां प्रपन्नामृते वल्लभाचार्याणां वल्लभदिग्विजये निरूपित एव तथापि न पर्याप्तः किं तु महाभारतस्य पूरको हरिवंशो वर्तत एव तदनन्तरमपि भविष्यत्पर्व वर्तते, एवं भविष्यपुराणपूरकं भविष्योत्तरपुराणं तस्यापि पूरकं भविष्यपुराणपरिशिष्टं वर्तत इति चित्रम् ॥

---

* वाराणसीस्थराजकीयसंस्कृतपाठशालाध्यापकपण्डितभागवताचार्यास्तु तुर्यो रामानुजः स्मृत इत्यस्याभिप्रायं वक्ष्यमाणरीत्या निरूपयन्ति ।

द्वापरान्ते कलेरादौ प्रोक्तः सङ्कर्षणेन च इति महाभारतादिप्रोक्तविधया ऽवतीर्णोऽनन्तमूर्त्तिर्भगवान् रामानुजमुनिरार्षब्रह्ममीमांसासिद्धान्तप्रत्यवस्थानेन श्रीशङ्कराचार्येण सूत्राभिप्रायसंवृत्या स्वाभिप्रायप्रकाशनादिति तत्सयूथ्यभास्कराचार्याद्युक्तरीत्या युक्त्यवष्टम्भेन ब्रह्मसूत्राणि बोधायनसिद्धान्तपराकरणमुद्रया व्याचक्षाणेनोपनिबद्धान्यतिबिम्बवादावच्छेदवादाभासवादप्रमुखानर्थान् कार्त्स्न्येन निरस्य भगवद्बोधायनकृतां ब्रह्मसूत्रवृत्तिमित्यादिप्रतिज्ञानुसारं तं प्रतिष्ठापयितुकामो व्याचकारेति तुर्यो रामानुज इति न क्रमाभिप्रायं तुर्यत्वमपि तु विष्णुस्वामिप्रभृतिभिरपाकृततत्तदर्थजातपराकर्तया सिद्धान्तप्रतिष्ठापनपर्याप्त्यभिप्रायम् । यथान्यदीयग्रन्थकारा अपि रामानुजः शिष्टगणाग्रणयो निनिन्द बिम्बप्रतिबिम्बवादमित्यादि स्वस्वग्रन्थेष्वधिकमपेक्षमाणैः श्रीभाष्यमालोकनीयमिति तात्पर्येण सनिर्भरमाहुः । रङ्गरामानुजाचार्यास्तु संप्रदायधुर्यपुरुषत्वाभावेन न व्यपदेशमर्हन्ति । तुर्यो नाम संन्यस्तवानिति आश्रमानुसार्यपि क्रमस्सर्वांशे न प्रमाणसिद्ध इति ।

त्सरे उदयनाचार्याणां स्थितिरासीदित्यप्युक्तम् । तस्मात् "वाचस्पतेरुदयनस्य तथापरेषा"मिति वदतस्तार्किकरक्षाकर्तुरुदयनाचार्यसमयपश्चाद्भाविनो वरदराजाचार्यस्य तथा अस्मात् किञ्चित्पश्चाद्भाविन एतत्समानकालिकस्य वा तार्किकरक्षाटीकालघुदीपिकाकर्तुर्विष्णुस्वामिशिष्यस्य ज्ञानपूर्णस्य च १०४१ संवत्सरादनन्तरं ११४७ संवत्सरात् पूर्वं स्थितिरासीदित्यनुमीयते ॥

वरदराजाचार्येण "आलोड्य दुस्तरगभीरतरान् निबन्धान्" इत्याद्युक्तत्वात् तार्किकरक्षाग्रन्थसमालोचनात् मल्लिनाथेन चोपोद्घाते "इह खलु तत्रभवान् बालानुकम्पी वरदराजः सकलन्यायशास्त्ररहस्योपदिदिक्षया स्वविरचिततार्किकरक्षाश्लोकव्याख्यानाय सारसङ्ग्रहं नाम प्रकरणमारभमाण" इत्याद्युक्तत्वात् सिद्धं भवति यत् सूत्राणामतिसंक्षिप्तत्वात् भाष्यवार्त्तिकादिग्रन्थानां विस्तृतत्वाद्दुरूहत्वाच्च न्यायसिद्धान्तसिद्धान् प्रमाणादिपदार्थान् प्रथमतः श्लोकात्मकेन ग्रन्थेन निबबन्ध पश्चात् तस्याप्यस्फुटार्थत्वं विचार्य सारसंग्रहटीकाग्रन्थेन व्याख्यातवान् ।

केचित्तु तार्किकरक्षाग्रन्थं तर्ककारिकानाम्ना व्यवहृतवन्तोऽदः पुरातनं न्यायप्रकरणं वरदराजाचार्येण स्वकृतया सारङ्ग्रहाभिधटीकया विशदीकृतमिति वदन्ति । तन्मन्दम् ज्ञानपूर्णेन लघुदीपिकायाम्

"पुरा वरदराजेन न्यायशास्त्रार्थसंग्रहः ।
कृतः परत्वतो बुद्ध्वा (?) पद्यानां दुर्ग्रहार्थताम् ॥
तेनैव रचिता व्याख्या सा च शास्त्रपदं गता ।
ततस्तदर्थसिद्ध्यर्थं करोमि लघुदीपिकाम् ॥"

इत्याद्युक्तत्वात् ।

ग्रन्थोऽयमतीवोपयुक्तो यतो विस्तृतदुरूहशङ्का-समाधिवाग्जालाकाण्डताण्डवादिराहित्येन सरलरीत्या न्यायसूत्रभाष्यादिप्रतिपादिताः प्रसङ्गात् कणादसूत्रप्रशस्तपादभाष्यप्रतिपादिता अपि सर्वे प्रमाणादयः पदार्था द्रव्यादयश्च पदार्था अत्र परिच्छेदत्रये निरूपिताः। तत्र प्रथमपरिच्छेदे प्रमाणादयश्छलान्ताः पदार्था निरूपिताः। द्वितीयपरिच्छेदे जातिपदार्थो निरूपितः। तृतीये निग्रहस्थानपदार्थ इति। अत्रत्या विशेषविषयास्तु मुद्रितात् पदार्थनिरूपणक्रमसूचीपत्त्रादवगन्तव्या इति।

वरदराजाचार्येण न्यायकुसुमाञ्जलिटीकापि रचिता मल्लिनाथेन तार्किकरक्षाटीकायां ४६ पृष्ठे उक्तत्वादिति।

सटीकतार्किकरक्षाटिप्पणलघुदीपिकाकारस्य ज्ञानपूर्णस्य समयस्तु यथोपलब्धं निरूपितप्राय एव प्राक्। इदानीं निष्कण्टकाकर्तुः कोलाचलमल्लिनाथसूरेर्जीवनचरितविषयो यथोपलब्धि निरूप्यते।

तत्र तावदनेके मल्लिनाथनामानो विद्वांसो बभूवुः। तथाहि भोजप्रबन्धे(१)।

"अन्यदा राजा क्रीडोद्याने रममाणः श्रान्तः चिरेण सहकारतरोरधस्तात् तस्थौ। ततस्तत्र सहकारतरुमूले

(१) वाराणसीस्थराजकीयसंस्कृतपाठशालीयलिखितपुस्तके १७२ संख्यके १२५ पत्रे लेखोऽयं वर्तते। अस्मिन् पुस्तके लेखकेन लिपिकाल एवं लिखितः॥ "श्रीसंवत् १८५४ आषाढसुदि पूर्णमासी वार शनि लिखितं भोजप्रबन्ध धनीराम ब्राह्मण।"

पण्डितजीवानन्दविद्यासागरेण कलिकातानगरे प्रकाशिते पुस्तकेऽपि ६७ पृष्ठे पाठोऽयं वर्तत इति।

रत्नकम्बलमध्यासीनं भूपालं वीक्ष्य कोऽपि मल्लिनाथकविरागत्य स्वस्तीत्युक्त्वा प्राह ।

शाखाशतचितवियतः
सन्ति कियन्तो न कानने तरवः ।
परिमलभरमिलदलिकुल-
दलितदलाः शाखिनो विरलाः ॥ १० ॥

ततो राजा श्रुत्वा तुष्टः पाणिवलयं ददौ । ततः कोशाधिकारी कवये पाणिवलयं दत्तं ज्ञात्वा धर्मपत्रे लिखति स्म ।

सहकारतरोर्मूले वर्णिते शाखिनां कुले ।
मल्लिनाथाय धारेन्द्रः स्वपाणिवलयं ददौ ॥"इति ।

भोजप्रबन्धग्रन्थश्च मिथिलादिदेशाधिपतिमहाराजलक्ष्मणसेनपुत्रेण बल्लालसेनेन(१) भोजराजीयधर्मपत्र(२)सङ्ग्रहमवलम्ब्य रचितः । बल्लालसेनसमयश्च तत्कृताद्भुतसागरग्रन्थस्थ"भुजवसुदशमितशाके १०८२ श्रीमद्बल्लालसेनराज्यादौ" इत्यादिलेखदर्शनात् १२१७ संवत्सरः, अस्मात् पूर्वं १०७९ संवत्सरासन्ने धाराधिपभोज-

(१) इतिहाससंशोधकास्तु बल्लालसेनस्य पुत्रो लक्ष्मणसेन इति निरूपयन्ति । तच्च सङ्गच्छते ऽद्भुतसागरे "लक्ष्मणसेनात्मजबल्लालसेनविरचिते ऽद्भुतसागरे"इति लेखस्य वर्तमानत्वात् । अपि च मिथिलादेशप्रचलितेन ल० सं० इत्याकारकेण लक्ष्मणसेनसंवत्सरेण १०३० शकाब्दे लक्ष्मणसेनराज्यकालस्य सर्वजनसुप्रसिद्धत्वात् । विस्तरस्तु न्यायवार्त्तिकभूमिकायामनुसन्धेयः ।

(२) विक्रमादित्यस्यापि धर्मपत्रसंग्रह आसीदिति तत्रैव सूचितम् ।

राजसमये[१] मल्लिनाथकविरासीदित्येको मल्लिनाथकविः।

केचित्तु

"मल्लिनाथकविः सोयं मन्दात्मानुजिघृक्षया।
व्याचष्टे कालीदासीयं काव्यत्रयमनाकुलम्॥"

इति रघुवंशटीकास्थश्लोकदर्शनात् कविशब्दसाम्याद् भोजराजकालिक एव रघुवंशादिकाव्यटीकाकारो मल्लिनाथ इत्याहुः। तन्मन्दम् रघुवंशादिटीकासूद्धृतानां ग्रन्थानां नवीनत्वात्। तच्चाग्रे निरूपयिष्यामः।

अथापरोऽपि मल्लिनाथ आसीत् तथाहि सरस्वतीतीर्थकृतायां काव्यप्रकाशटीकायाम्[२]।

"विधातुकामः सुकृतं गरीयः
क्षमातलं स्वर्ग इवावतीर्णः।

---

(१) भोजराजसमयस्तु ९६४ शककाल इति महामहोपाध्यायसुधाकरद्विवेदिना गणकतरङ्गिण्यां ३१ पृष्ठे लिखितम्। भट्टवामनाचार्यकृतटीकासहिते मुम्बईनगरे द्वितीयावृत्तिमुद्रिते काव्यप्रकाशपुस्तके भूमिकायां ५ पृष्ठे "भोजराजस्य स्थितिकालस्तु खुस्त ९९६ वत्सरादारभ्य १०५१ वत्सरपर्यन्तः" "१०२२ मिते खुस्तवत्सरे भट्टगोविन्दसुताय धनपतिभट्टाय ब्राह्मणाय दत्तं दानपत्रमपि भोजराजस्य पूर्वोक्तमेव स्थितिकालं स्पष्टं कथयति। तच्च दानपत्रं महामहोपाध्यायदुर्गाप्रसादेन प्राचीनलेखमालायामङ्कयित्वा प्रसिद्धिं प्रापितमिति।" तच्च ताम्रपत्रं धाराधिपभोजराजस्यैवेति तद्दर्शनादेव व्यक्तं भवतीति॥

(२) भट्टवामनाचार्यकृतटीकासहिते मुम्बईनगरे द्वितीयावृत्तिमुद्रिते काव्यप्रकाशपुस्तके भूमिकायां २८ पृष्ठे लेखोऽयं वर्तते। नायं मल्लिनाथो रघुवंशादिकाव्यटीकाकार इत्यपि निरूपितं तत्रैव भट्टवामनाचार्यैः।

श्रीगणेशाय नमः ॥

न्यायसूत्रविवरणोक्तसूत्राणामकारादिवर्णानुक्रमेण सूचीपत्त्रम् ।

आ

६४

श.

॥ श्रीहरिः ॥

श्रीगणेशाय नमः ।

न्यायसूत्रविवरणोक्तसूत्रसम्बन्धिप्रकरणानां सूचीपत्रम् ।

प्रथमाध्याये प्रथमाह्निके ।

प्रथमाध्याये द्वितीयाह्निके ।

द्वितीयाध्याये प्रथमाह्निके ।

द्वितीयाध्याये द्वितीयाह्निके ।

तृतीयाध्याये प्रथमाह्निके ।

तृतीयाध्याये द्वितीयाह्निके ।

(१) विवरणकृता पञ्चमाध्यायद्वितीयाह्निके प्रकरणोल्लेखो न कृत इति न्यायसूचीनिबन्धानुसारेणात्र प्रकरणसन्निवेशोऽस्माभिः कृत इति बोध्यम् ।

॥ श्रीहरिः ॥

श्रीगणेशाय नमः ।

न्यायसूत्रविवरणोक्तविषयाणामकारादि-वर्णानुक्रमेण

सूचीपत्रम् ।

relic of external objects. For just as in the case of an object not present to any sense-organ, so also in the case of an external object present to a sense-organ, the 'illumination' can be explained as due entirely to the Witness, which is in relation with a vṛtti that has not moved outwards from the body of the observer. Nor on this view is it impossible to explain the difference between perceptional and non-perceptional knowledge; since this difference can be explained as due to a difference in the vṛtti according as the latter was produced by this or that particular instrument of knowledge: such indeed is the explanation given of the difference between *verbal* knowledge (in which the word is the instrument) and *inferential* knowledge (in which induction is the instrument).*

Page 45.

A. Two relations postulated:

(*a*) Tādātmya, Identity of Being;

(*b*) Svarūpa, Inexplicable nature of a thing.

In regard to these points some writers hold as follows: In a case of perceptional knowledge, the light that illumines the object is that Intelligence which underlies the object; for as being the reality that supports the object, that Intelligence *is* the object. And since the relation termed *identity*, tādātmya, is directly possible in this case, it is improper to postulate the indirect relation termed *nature of a thing*, svarūpa, or any other relation. Hence also the outward movement of the vṛtti may be justly affirmed as having its function in *disclosing* the

* That is to say, *perceptional* knowledge has a sense-organ as its instrument, and *non-perceptional* knowledge has some instrument other than a sense-organ :—इन्द्रियजन्यज्ञानं प्रत्यक्षं तदन्यज्ञानं परोक्षम् ।

Intelligence underlying the object (i. e. in removing the Nescience that conceals this Intelligence). But in a case of non-perceptional knowledge, the vṛtti cannot be in contact with the object, e. g. with the fire which, though not present to a sense-organ, is inferred to exist: nor are we aware of a cause which operates to make the vṛtti move outwards in such a case, and whose operancy can be proved by the inductive methods of presence and absence; by which methods, a sense-organ for example, is proved to be a cause of knowledge: on these grounds, therefore, we are compelled to assume that, in the case of non-perceptional knowledge, the Intelligence or Witness underlying a vṛtti that has not moved outwards (from the observer's body) illumines into consciousness the object by means of the relation termed *the nature of a thing.**

* The argumentation of the above paragraph proceeds on the lines of the Nyāya System, from which are borrowed the terms tādātmya-sambandha and svarūpa-sambandha, though with some difference of meaning. Agreeing with the Naiyāyika, the Vedāntin here argues that "illumination" or cognition of an object must be due to some *relation* between the knower and the object known. In the case of a presented object i. e. one that has been brought into immediate contact with the psychological apparatus by means of the outward movement of the vṛtti of the Inner Organ, the relation may be regarded as that of identity, tādātmya, in a metaphysical sense, or identity of essence: for (as already described pp. 76-77 note) the Being (sattā) of the external object is nothing but the Being of the knower, viz. the Intelligential Principle as it underlies the vṛtti that moving outwards has fused with the object; that is to say, in such a case, the knower and object known are in essence one. And this relation is said to be direct (sākṣāt), bacause there are really not two co-relates but only the one Intelligential Principle which appears as if it were two. Then, as to the case of a non-presented object or one that has not been brought into

B. Only one relation, viz. Tādātmya, Identity of Being, need be postulated.

Other writers teach that since it has been proved that our direct consciousness of the Inner Organ and its attributes viz. pleasure, pain &c. is due to all these objects being in direct relation with the Principle of Intelligence underlying them; it must also follow that the cause of our direct consciousness of external objects is only that Intelligence which is in direct relation with such objects, and that, therefore, the outward movement of the vṛtti is necessary to disclose the Intelligence that underlies these external objects.

C. The peculiar vividness of a directly presented object explained as due to Tādātmya and movement of the Vṛtti.

Some other writers maintain the following: In the case of an object directly perceived through the senses we are conscious of a certain *vividness* as compared with an object which we may have come to know through inference or through the verbal testimony of some other person: thus, although a trustworthy person may describe to me a hundred times the peculiar sweetness of a mango, the *vividness* of the direct sensation of taste is

immediate contact with the psychological apparatus, e. g. the fire not seen but *inferred*, the Vedāntin finds himself compelled to fall back on the ultimate fact that *by its own nature* the Witness can and does illumine into consciousness such a non-presented object. This 'nature of a thing' he follows the Nyāya in describing as a relation (svarūpa-sambandha), which he further terms indirect, because he conceives of it not as an identity of essence but as a relation between two co-relates (or dharmins), viz. the Witness and the object known.

absent, for I still wish to know what that peculiar sweetness is. Nor will these writers admit the counter-argument that 'the wish to know the peculiar taste of a mango' arises duly in such a case, because although the verbal description can make known the mere sweetness, it cannot make known the characteristic sweetness of the mango, since no word exists to express this characteristic, or, if such a word exists, the hearer fails to connect it with the said characteristic. For, say these writers, the verbal description, viz.,—In the mango resides a *special kind* of sweetness, very sweet—makes known the fact of a special characteristic belonging to this fruit. Nor can it be said that the word *special* makes known a special characteristic as belonging to the mango though it really belongs to some other thing; for if this were the case, the said verbal description would be altogether untrustworthy. Nor, again, can it be said that the word *special* makes known a characteristic sweetness as common to many fruit but does not define it in the case of the individual fruit; and hence arises the desire to know the peculiar taste of this mango. For since also direct perception through the senses makes known sweetness as the common predicate of a sweet tasting thing but does not make known the differentia of this common characteristic, the desire to know the peculiar taste of this mango should continue to be present even after the individual fruit has been tasted. But (say these writers) the *vividness* belonging to an object directly perceived through the senses is due to the fact that the self-luminous, unchanging Principle of Intelligence, which is *disclosed* (by the vṛtti that has moved outwards), is identical

in essence with the object perceived;* hence this *vividness* can put an end to the desire for further knowledge: whereas to an object known through verbal testimony or inference no such *vividness* pertains, because no vṛtti has moved outwards to the object and disclosed the identity of the object with the Intelligential Principle. Thus is to be understood the distinction between the vivid and the non-vivid character of objects of knowledge. Hence also there is a vivid conciousness of pleasure, pain and the other attributes of the Inner Organ which are things illumined by the Witness. Then, of Brahman, even though it is an object of verbal knowledge, there is a non-vivid consciousness, while, prior to *pondering* and the other means prescribed, the Nescience concealing Brahman continues undestroyed; whereas a vivid consciousness results after the concealing Nescience has been destroyed by *pondering* and the other means prescribed. Thus, finally, do these writers prove that the vṛtti of the Inner Organ moves outwards to the object.

Page 46.

But it may be argued that the conclusion reached so far, viz. that an outward movement of the vṛtti is necessary for the destruction of the Nescience concealing the object, is an unsound conclusion.† For the same reasoning may be extended,

* अनेन विषयगतस्पष्टताप्रयोजकीभूता या विषयचैतन्याभिव्यक्तिरावरणनिवृत्तिरूपा तस्या सिद्धये वृत्तिनिर्गमनमपेक्षितमिति सूचितम् । Ṭī. The necessary condition (prayojaka) of vividness in the object is disclosure (abhivyakti) of the viṣayacaitanya; this abhivyakti = āvaraṇanivṛtti or removal of the concealing Nescience; and this again can be accounted for only on the supposition that the vṛtti moves outwards to the external object.

† नन्वेतावतापि इति । अत्र केचिदाहुः इत्यादिना मतत्रयोपन्यासात्मकग्रन्थेनापीत्यर्थः ॥ Ṭī.

and not unduly, to prove that a vritti, without moving outwards, can destroy the Nescience which pertains to and conceals the Intelligential Principle that underlies the object of knowledge.

Nor can it be replied that if such be the case, then M's knowledge of a certain object should destroy N's ignorance of that object, since in this case both the knowledge and the ignorance pertain to the one identical object. For here knowledge and ignorance pertain to distinct substrates, i. e. to the Intelligence underlying the *I* (in M's case) and to that underlying the object (in N's case); and hence the fact of pertaining to the one identical substrate cannot be adduced as the cause of knowledge and ignorance being destructive of each other.

But this latter argument should be rejected (it may be said), because *the fact of pertaining to the one identical substrate* is not a necessary factor in the case, inasmuchas the real principle of opposition between knowledge and ignorance requires a separate enunciation in this form.—The Nescience which conceals a certain object from a certain person M can be destroyed only by that knowledge which makes known that object to the person M.—and enunciation in this form is necessary, because, even if the fact of knowledge and ignorance pertaining to the one identical substrate be admitted to be the cause of their being destructive of each other, and also if the outward movement of the vṛtti be admitted, even then the vṛtti which in M's case has taken the form of a certain object, and the ignorance which in N's case conceals the given object, would both pertain to the one substrate, viz. to the Intelligential Principle which is the reality

underlying the given object, and so it should follow logically that M's knowledge should destroy N's ignorance.

To all this some reply as follows: If the outward movement of the vṛtti be not admitted, no cause can be assigned for the fact that knowledge and ignorance are destructive of each other. Nor will the principle suffice as already enounced, viz. *the Nescience which conceals a certain object from a certain person M.* &c.; for it would then follow logically that non-perceptional knowledge also could destroy in M's case the Nescience that conceals the peculiar character of the object (whereas, in fact, although M has gained an indirect knowledge of the object, he still desires to know its peculiar character).

And if it be said that *immediateness* must be inserted (in the above enunciation) as being a necessary characteristic of that knowledge which destroys Nescience, then the logical character of this *immediateness* must be stated. *Immediateness* cannot be said to be a real Universal or eternal Essence. To take an example—This M. is the person who *was* (but is not now) carrying a staff in his hand—here is visual perception of the man as an object *plus* a knowledge of his staff which is reproduced by means of a mental relic: If *Immediateness* were a real Universal, it must be present in the said knowledge of the staff, whence it should follow that the Nescience concealing the staff would be destroyed and there would ensue an immediate consciousness of the staff as a present object, finding expression in the judgment—I directly perceive the staff. But this is not the case. If, on the other hand, while denying an immediate consciousness of the staff, you premise that the mediating

process is the mental relic of the staff previously seen in M's hand, and then you go on to infer the presence of the staff on the ground that the said knowledge of it must be due to an actual relation between the staff and the organ of vision; then, also you will have to admit the actual presence of an *inferred* object, e. g. fire; for in such a case too you premise a mediating process, viz. the knowledge of the relation between fire and smoke.

If, on the other hand, there is not a direct knowledge of the staff, the *immediateness* (postulated above) cannot be a real Universal, whose very nature is such that it is necessarily present in the whole extent of an individual and not merely in a part of it (vyāpyavṛttitva). But even if this nature of a real Universal be denied, the *immediateness* in question cannot be a Universal present merely in a part of the individual (cognition); for no determining predicate, whether essential or accidental, can be adduced to explain why the said Universal should be present only partially in this case.

Page 47.

Nor, again, is this *immediateness* a Universal in the sense of a merely general predicate or class-characteristic (upādhi); for no explanation of it as such can be given. *Immediateness* cannot be said to consist in the fact of knowledge being effected through some organ of sense. This definition will not apply to that immediate knowledge of pleasure, pain &c., which we gain without the mediation of any sense-organ and which is direct consciousness in the form of the eternal Witness (sākṣipratyakṣa; Cf. pp. 75, 96. note). On the other hand, it will extend too far, in the case of an object present to a

आलम्बनं सर्वविशेषणानां
जयत्यखण्डस्थितिरान्ध्रदेशः(१) ॥ ५ ॥
फलमिव सुकृतानां लोकधात्र्याः समग्रं
विगलितमिव भूमौ नाकलोकस्य खण्डम् ।
नगरमतिगरीयः सर्वसंसारसारः
त्रिभुवनगिरिनाम्ना तत्र विख्यातमास्ते ॥ ६ ॥
तत्राभवत् सकलशास्त्रविचारपात्रं
श्रीवत्सगोत्रसुरकाननपारिजातः ।
अन्यद्विधातु(?)रवलम्बनमाप्तवाचां
रामेश्वरः कलिकलङ्ककथान्तरायः ॥ ७ ॥
आसीत् प्रमाणपदवाक्यविचारशीलः
साहित्यसूक्तिबिसिनीकलराजहंसः ।
ब्रह्मामृतग्रहणनाटितलोभवृत्तिः
तस्यात्मजो निपुणधीर्नरसिंहभट्टः ॥ ८ ॥
तस्मादचिन्त्यमहिमा महनीयकीर्तिः
श्रीमल्लिनाथ इति मान्यगुणो बभूव ।
यः सोमयागविधिना कलिखण्डनाभि-
रद्वैतसिद्धमिव सत्ययुगं चकार ॥ ९ ॥
लक्ष्मीरिव मुरारातेः पुरारातेरिवाम्बिका ।
तस्य धर्मवधूरासीन्नागम्मेति गुणोज्ज्वला ॥ १० ॥
ज्येष्ठस्तदीयतनयो विनयोदितश्री-
र्नारायणोऽभवदशेषनरेन्द्रमान्यः ।
वाग्देवताकमलयोरपि यस्य गात्रे
सीमाविवादकलहो न कदापि शान्तः ॥ ११ ॥

(१) आन्ध्रदेशः तैलङ्गदेशः ।

विरिञ्चेः पर्यायो भुवि सदवतारः फणिपते-
स्त्रिदोषो दोषाणां सकलगुणमाणिक्यजलधिः ।
अवाचां ग्रावां वा सकलविदुषां मौलिकुसुमं
कनीयांस्तत्सूनुर्जयति नयशाली नरहरिः ॥ १२॥
सवसुग्रहहस्तेन ब्रह्मणा १२९८ समलङ्कृते ।
काले(१) नरहरेर्जन्म कस्य नासीन्मनोरमम् ॥ १३॥"

एतेन आन्ध्रदेशे त्रिभुवनगिरिनाम्नि नगरे वत्सगोत्रे १२९८ विक्रमसंवत्सरे नरहरिनामा विद्वद्वरः समजनि तस्य पिता मल्लिनाथ आसीदिति निष्पन्नम् ।

केचित्तु अयमेव मल्लिनाथो नैषधचरितं विहाय रघुवंशादिपञ्चकाव्यटीकां चकार मल्लिनाथपुत्राभ्यां नारायणनरहरिभ्यां नैषधचरितटीके चक्राते इति वदन्ति । तन्न यतः १२९८ संवत्सरादपि पूर्वकालवर्ती मल्लिनाथो रघुवंशादिकाव्यटीकासु अर्वाचीनान् निबन्धान् कथमुद्धरेदिति । इदं सर्वं वृत्तं मल्लिनाथेन नैषधचरितमपि व्याख्यातमिति चाग्रे प्रपञ्चयिष्यामः ॥

येन नारायणेन नैषधचरितं व्याख्यातं सोऽन्यो नारायणो वेदकरोपनामको महालसानरसिंहपुत्रो न तु नागम्मामल्लिनाथपुत्रो यथाह नैषधचरितटीकारम्भे

(१) ब्रह्मेति एकसंख्याबोधकम् एकमेवाद्वितीयं ब्रह्मेति श्रुतेः । काले विक्रमसंवत्सर इति यावत् यतः सरस्वतीतीर्थेन वाराणस्यामेव निवसता टीका कृता वाराणस्यां तु विक्रमसंवत्सरलेखस्यैव प्रचारात् अग्रिमश्लोकेन नरहरिजन्मकालिकग्रहस्थितिवर्णनाच्च । अयमेवार्थो भट्टवामनाचार्याणामपि सम्मतः । सरस्वतीतीर्थस्य वाराणसेयत्वमग्रिमश्लोकेन स्फुटमच विस्तरभीत्या न लिखितमिति ॥

"नत्वा श्रीनरसिंहपण्डितपितुः पादारविन्दद्वयं
मातुश्चापि महालसेत्यभिधया विख्यातकीर्तेः क्षितौ।
श्रीरामेश्वरसोतयोः सुमनसोर्गुर्वोरगर्वो यथा-
बुद्धि श्रीनिषधेन्द्रकाव्यविवृतिं निर्माति नारायणः॥"

इति॥

नरहरिणापि नैषधचरितं व्याख्यातं सोऽन्यो नरहरिः यथाह नैषधचरितटीकाप्रथमसर्गान्ते

"यं प्रासूत त्रिलिङ्ग-
क्षितिपतिसततारांधिताङ्घ्रिः स्वयम्भूः
पातिव्रत्यैकसीमा
सुकविनरहरिं नालमा यं च माता।
यं विद्यारण्ययोगी
कलयति कृपया तत्कृतौ दीपिकाया-
माद्यः सर्गोतिमाद्य-
त्कविकुलविजयी चारु नीराजितोऽभूत्" ॥इति॥

ततश्चान्योऽपि मल्लिनाथ आसीत्। वाराणसीस्थराजकीयसंस्कृतपाठशालीयसामवेदीयराणायनिशाखीयारण्यगानपुस्तके (७ संख्यके) लेखकेनोद्धृतो यथा "संवत् १५६७ वर्षे चैत्रसुदि ४ बुधवासरे मझिआरी(१) ****छ पुत्रमल्लिनाथपाठार्थे विश्वनाथसुत-आदित्येनालेखि।" पुस्तकमिदं कागजाख्याधारे आर्यावर्तप्रचलिताकारविशिष्टदेवनागराक्षरैर्लिखितम्॥

---

(१) अस्मिन्नेव पुस्तके ५४ पत्रे "आरण्यकं समाप्तमिति"। "मझिआरीग्रामे" इति च लिखितमस्ति।

तद्भिन्नोऽपि मल्लिनाथ आसीत्। यस्य पुत्त्रेण लिखितं कुमारसम्भवकाव्यपुस्तकमष्टमसर्गान्तमत्यन्तपरिशुद्धं सटिप्पणमस्मन्निकटे वर्तते तत्र लिपिकाल एवं लिखितः।

"संवत् १६०३ वर्षे आनन्दनामसंवत्सरे ज्येष्ठवदि १ शनौ दिने काश्यामन्तर्गृहे श्रीविश्वेश्वरप्रसादेन मल्लिनाथात्मजेन गणेशपण्डितेन गौडेन स्वपरोपकारार्थं लिखितमिदं पुस्तकम् ॥"

तद्भिन्नोऽपि मल्लिनाथो येन च चिकित्साशास्त्रे ऽनेके निबन्धाः कृता यथाह स एव स्वकृतपथ्यापथ्यनिरूपणे। "शाके वेदाब्धिशास्त्रेन्दौ १६४४ मल्लिनाथो भिषग्वरः। चक्रे बालावबोधाय पथ्यापथ्यनिरूपणम् ॥" १६४४ शाकवर्षे १७७९ विक्रमसंवत्सरेऽयं मल्लिनाथ आसीदिति।

जैनास्तु पार्श्वनाथचरितं प्रमाणयन्तश्चतुर्विंशतितीर्थङ्करेषूनविंशो मल्लिनाथ इति वदन्तस्तन्नाम्नैव लब्धनामा पञ्चकाव्यटीकाकारो मल्लिनाथः(१) पूर्वं जैनः पश्चाद् ब्राह्मणः संवृत्तः अनेके पूर्वं जैनाः पश्चात् संस्कारं विधाय ब्राह्मणाः क्षत्त्रियाश्चाभूवन्निति धर्मस्थितिस्थापकभूतानां शङ्कराचार्यादीनामितिहासग्रन्थादवगतेरिति वदन्ति। तत्तूपहासास्पदम् निरूपितानां मल्लिनाथानां कस्मिँश्चिदपि ग्रन्थे आर-

(१) मल्लिनाथशब्दस्यार्थस्तु "मल्लो महाबलो मल्लिर्मल्लिकाकुसुमप्रिय"इति शिवनामाष्टोत्तरशतकात् मल्लिः शिवः। मल्लते धारयति विज्ञानमिति मल्ल + सर्वधातुभ्य इन् उणादौ ४। ११७। ईशानः सर्वविद्यानामिति श्रुतेश्च। मल्लिर्नाथो यस्य स मल्लिनाथो रामनाथवदिति।

मल्लिश्चतुर्विंशतेरर्हतां मध्ये ऊनविंश इति हेमचन्द्रः १। २८।

म्भसमाप्तिवाक्येषु जैनत्वानुपलब्धेः नाममात्रसाम्यादेव जैनत्वे गौतममहावीरस्वामिसंवादात्मकानां जैनागमानां दर्शनात् महावीरस्वामिशिष्यस्य गणधरस्य जैनमुख्यस्य गौतमस्यापि ब्राह्मणत्वापत्तेरहल्यापतिगौतमस्यापि जैनत्वापत्तेश्च ।

A. C. Burnell. ए. सी. बर्नेल् महाशयप्रकाशिते वंशब्राह्मणे तु प्रतिपादितम् काकटेयराज्ये १३१० ईसवीयवर्षे राजा प्रतापरुद्रदेवाभिध आसीत् तत्समये सरस्वतीविलासनामको ग्रन्थो रचित इति कोलाचलमल्लिनाथपुत्रः कुमारस्वामी निरूपयति ।

रामकृष्णगोपालभाण्डारकर, एम्. ए., पीएच्. डी., महाशयसङ्कलिते १८९७ इसवीयवर्षसम्बन्धिरिपोर्टपुस्तके प्रतिपादितम् उत्कलदेशे १२८२–१३०० ईसवीयवर्षे नरसिंहराज आसीत् तत्समये विद्याधरेण एकावलीग्रन्थो रचितः स च मल्लिनाथेन व्याख्यात इति ।

Theodor Aufrecht's Catalogus Catalogorum. औफ्रेख्टमहाशयसङ्कलिते सूचीपत्राणां सूचीपत्रपुस्तके २३९ पृष्ठे लिखितमस्ति आदित्यवर्मणः पुत्रो मल्लिनाथः तत्पुत्रस्त्रिविक्रमदेवोऽनेन प्राकृतव्याकरणवृत्तिर्निर्मितेति ।

अस्माभिस्त्वेवमनुमीयते । वाराणसीस्थराजकीयसंस्कृतपाठशालीये (१०० संख्यके) कोलाचलमल्लिनाथसूरिकृतकिरातार्जुनीयटीकाघण्टापथपुस्तके लेखकेन लिपिकालः १५८० शाकवर्षो लिखितः(१) । तेनैव मल्लिनाथेन

(१) "शके १५८० जयवत्सरे दक्षिणायने शरदृतौ कार्त्तिके मासे वरिष्ठपक्षे द्वादशीपूर्वकत्रयोदश्यां तिथौ सायं सुरारिगुरुवासरे हरिहरेश्वरपुण्यतीर्थवासिभट्टभट्टात्मजकाव्यवक्तृसुधीनारायणाभिधानेन गौतमी-

तद्भिन्नोऽपि मल्लिनाथ आसीत्। यस्य पुत्त्रेण लिखितं कुमारसम्भवकाव्यपुस्तकमष्टमसर्गान्तमत्यन्तपरिशुद्धं सटिप्पणमस्मन्निकटे वर्तते तत्र लिपिकाल एवं लिखितः।

"संवत् १६०३ वर्षे आनन्दनामसंवत्सरे ज्येष्ठवदि १ शनौ दिने काश्यामन्तर्गृहे श्रीविश्वेश्वरप्रसादेन मल्लिनाथात्मजेन गणेशपण्डितेन गौडेन स्वपरोपकारार्थं लिखितमिदं पुस्तकम् ॥"

तद्भिन्नोऽपि मल्लिनाथो येन च चिकित्साशास्त्रेऽनेके निबन्धाः कृता यथाह स एव स्वकृतपथ्यापथ्यनिरूपणे।
"शाके वेदाब्धिशास्त्रेन्दौ १६४४ मल्लिनाथो भिषग्वरः।
चक्रे बालावबोधाय पथ्यापथ्यनिरूपणम् ॥" १६४४ शाकवर्षे १७७९ विक्रमसंवत्सरेऽयं मल्लिनाथ आसीदिति।

जैनास्तु पार्श्वनाथचरितं प्रमाणयन्तश्चतुर्विंशतितीर्थङ्करेषूनविंशो मल्लिनाथ इति वदन्तस्तन्नाम्नैव लब्धनामा पञ्चकाव्यटीकाकारो मल्लिनाथः(१) पूर्वं जैनः पश्चाद्ब्राह्मणः संवृत्तः अनेके पूर्वं जैनाः पश्चात् संस्कारं विधाय ब्राह्मणाः क्षत्रियाश्चाभूवन्निति धर्मस्थितिस्थापकभूतानां शङ्कराचार्यादीनामितिहासग्रन्थादवगतेरिति वदन्ति। तत्तूपहासास्पदम् निरूपितानां मल्लिनाथानां कस्मिँश्चिदपि ग्रन्थे आर-

(१) मल्लिनाथशब्दस्यार्थस्तु "मल्लो महाबलो मल्लिर्मल्लिकाकुसुमप्रिय" इति शिवनामाष्टोत्तरशतकात् मल्लिः शिवः। मल्लते धारयति विज्ञानमिति मल्ल + सर्वधातुभ्य इन् उणादौ ४। ११७। ईशानः सर्वविद्यानामिति श्रुतेश्च। मल्लिर्नाथो यस्य स मल्लिनाथो रामनाथवदिति। मल्लिश्चतुर्विंशतेरर्हतां मध्ये ऊनविंश इति हेमचन्द्रः १। २८।

म्भसमाप्तिवाक्येषु जैनत्वानुपलब्धेः नाममात्रसाम्यादेव जैनत्वे गौतममहावीरस्वामिसंवादात्मकानां जैनागमानां दर्शनात् महावीरस्वामिशिष्यस्य गणधरस्य जैनमुख्यस्य गौतमस्यापि ब्राह्मणत्वापत्तेरहल्यापतिगौतमस्यापि जैनत्वापत्तेश्च।

A. C. Burnell. ए. सी. बर्नेल् महाशयप्रकाशिते वंश-ब्राह्मणे तु प्रतिपादितम् काकटेयराज्ये १३१० ईसवीयवर्षे राजा प्रतापरुद्रदेवाभिध आसीत् तत्समये सरस्वतीविलासनामको ग्रन्थो रचित इति कोलाचलमल्लिनाथपुत्रः कुमारस्वामी निरूपयति।

रामकृष्णगोपालभाण्डारकर, एम्. ए., पीएच्. डी., महाशयसङ्कलिते १८९७ इसवीयवर्षसम्बन्धिरिपोर्टपुस्तके प्रतिपादितम् उत्कलदेशे १२८२-१३०० ईसवीयवर्षे नरसिंहराज आसीत् तत्समये विद्याधरेण एकावलीग्रन्थो रचितः स च मल्लिनाथेन व्याख्यात इति।

Theodor Aufrecht's Catalogus Catalogorum. औफ्रेख्टमहाशयसङ्कलिते सूचीपत्राणां सूचीपत्रपुस्तके २३९ पृष्ठे लिखितमस्ति आदित्यवर्मणः पुत्रो मल्लिनाथः तत्पुत्रस्त्रिविक्रमदेवोऽनेन प्राकृतव्याकरणवृत्तिर्निर्मितेति।

अस्माभिस्त्वेवमनुमीयते। वाराणसीस्थराजकीयसंस्कृतपाठशालीये (१०० संख्यके) कोलाचलमल्लिनाथसूरिकृतकिरातार्जुनीयटीकाघण्टापथपुस्तके लेखकेन लिपिकालः १५८० शाकवर्षो लिखितः(१)। तेनैव मल्लिनाथेन

(१) "शके १५८० जयवत्सरे दक्षिणायने शरदृतौ कार्त्तिके मासे वरिष्ठपक्षे द्वादशीपूर्वकत्रयोदश्यां तिथौ सायं सुरारिगुरुवासरे हरिहरेश्वरपुण्यतीर्थवासिभट्टंभट्टात्मजकाव्यवक्तृसुधीनारायणाभिधानेन गौतमी-

च किरातार्जुनीयटीकायां(१) ४ सर्गे उपारता इति १० श्लोकव्याख्यायां "पीयूषवर्ष(२)स्त्वेकदेशिसमासमेवाश्रित्य समासान्तमाहे"त्युक्तम् । पीयूषवर्षस्तु तत्त्वचिन्तामण्यालोकचन्द्रालोकप्रसन्नराघवनाटकादिग्रन्थकर्ता पक्ष-

---

तटस्थजनस्थाने किरातीपायघटापद्याख्यपुस्तकं लिखितमात्मकार्यार्थं परोपकारार्थम् ।" इति तत्पुस्तकस्यान्तिमपत्रे लिखितमस्ति ॥

(१) रघुवंशादिनैषधान्तकाव्यटीकायाः सटीकतार्किकरक्षाटीकायाश्चैकमल्लिनाथकर्तृकत्वं तेनैव मल्लिनाथेन के के ग्रन्था रचिता इति चाग्रे सविस्तरं निरूपयिष्यते ।

(२) पीयूषवर्षकृता किरातार्जुनीयटीका तु वाराणसीस्थराजकीयसंस्कृतपाठशालीयभूतपूर्वाध्यापकानां त्रिपाठिवेचनरामशर्मणां निकटे आसीत् । मुद्रिते मल्लिनाथकृतटीकापुस्तके तु पीयूषवर्ष इत्यस्य स्थाने "प्रकाशवर्ष" इति केनचिच्छोधितम् । श्रीफ्रेखट्महाशयसङ्कलितसूचीपत्रदर्शनादवगम्यते प्रकाशवर्षकृतापि काचित् किरातार्जुनीयटीका वर्तते तस्यामयं पाठो वर्तते न वेति विद्वद्भिः समालोचनीयम् ।

एवं मुद्रिते मल्लिनाथकृतटीकासहितशिशुपालवधपुस्तके १ सर्गगतं तिरश्चीनमिति २ श्लोकव्याख्याने "दिवाकरस्तु वृत्तरत्नाकरटीकायां प्रथमपठितेन 'द्विधाकृतात्मा किमयं दिवाकरो विधूमरोचिः किमयं हुताशनः ।' इति चरणद्वयेन सहेममेव श्लोकं षट्पदच्छन्दस उदाहरणमाहे"ति पाठो दृश्यते । अयं च केनचित् कस्मिँश्चिल्लिखितपुस्तके टिप्पण्यादिरूपेण लिखितः केनचिन्मूले एव प्रक्षिप्तः यतो मल्लिनाथकृतटीकापुस्तकस्य १७१५ संवत्सरलिखितस्योपलब्धेः दिवाकरेण च १७४० संवत्सरे वृत्तरत्नाकरस्य टीकाया रचितत्वात्* वाराणसीस्थराजकीयसंस्कृतपाठ-

* "भारद्वाजकुले श्रुतिस्मृतिपटुः श्रीसूर्यभक्तस्तथा-
ऽयमाराधनतत्परोऽपि(?)च महादेवोऽभवत् तार्किकः ।
तत्पुत्रेण दिवाकरेण रचिते श्रीवृत्तरत्नाकरा-
दर्शे भट्टमतानुसारिणि परं षष्ठः समाप्तिं गतः ॥

धरान्वर्थनामा जयदेवमिश्र(१) एव ! स च १४७८ शाकवर्षे वर्तमानस्य मिथिलादेशाधिपतेः श्रीमहेशठक्कुरस्य मध्यमभ्रातुर्भगीरथठक्कुरस्य गुरुरासीदिति १५८० शाकवर्षात् पूर्वं १४७८ शाकवर्षात् पश्चात् तदासन्नसमये(२) वा रघुवंशादिटीकाकारस्य कोलाचलमल्लिनाथसूरेः स्थितिरासीदिति।

शालीये प्राचीने माघटीकापुस्तके ऽस्मन्निकटे वर्तमाने प्राचीने पुस्तके ऽप्यस्य पाठस्याभावाच्च। खेदस्थानं यदिदानीमपि शोधकमहाशया मल्लिनाथकृतकाव्यटीकासु निवेशप्रवेशादिना टीकाग्रन्थमन्तर्गडुं कृत्वाल्पज्ञजनभ्रान्तिजनकं कुर्वन्ति न तु प्राचीनपरिशुद्धादर्शसंवादपूर्वकं परिष्कुर्वन्तीति।

(१) जगदीशभट्टाचार्येणानुमानदीधितिटीकायां सिद्धान्तलक्षणप्रकरणे "पक्षधरमिश्रादिसम्मतत्वात्" "शब्दमण्यालोके तैः सार्थकत्वं समर्थितम्।" इत्युक्तत्वाद् आलोकग्रन्थस्य जयदेवकृतत्वात् जयदेव एव पक्षधरः। पक्षस्य मासार्द्धस्य तिथिवारनक्षत्रयोगकरणानि एकदैव पञ्चाङ्गं दृष्ट्वा मनसि धारयतीति पक्षधर इति किंवदन्ती।

(२) महेशठक्कुरशिष्येण केनचित् पण्डितेन दिल्लीनगराधिष्ठितात् भारतेश्वरात् मिथिलादेशाधिपत्यं प्राप्य गुरवे गुरुदक्षिणात्वेन तत् समर्पितमिति किंवदन्त्या महेशठक्कुरेण वृद्धावस्थायां यौवनान्ते वा राज्यं प्राप्तम्। महेशठक्कुरानुजस्य भगीरथस्य च "विंशाब्दे जयदेवपण्डितकवेस्तर्काब्धिपारं गत" इति द्रव्यकिरणावलीप्रकाशटीकान्ते उक्त्या जयदेवस्य

पूर्णाब्धिसप्तैकमिते १७४० प्रवर्षे सत्कार्त्तिके मासि विशुद्धपक्षे।
तार्तीयपूर्णे दिवसे सुपुण्ये ह्यादर्श इत्थंघटितः समाप्तः॥"
इति तट्टीकान्ते वर्तते।

अत्र वर्ष इत्यनेन विक्रमसंवत्सरो ग्राह्यः इण्डिआआफिसपुस्तकालये वर्तमाने पुस्तके १६९९ शालिवाहनवर्षस्य लिपिकालत्वेन लिखितत्वात्।

अनेनैव दिनकरापरनामधेयेन दिवाकरेण सिद्धान्तमुक्तावल्या व्याख्यानं दिनकरीत्यपरनामधेयं मुक्तावलीप्रकाशाभिधं प्रणीतम्।

तथाहि चन्द्रालोकारम्भे

"चन्द्रालोकमयं स्वयं वितनुते पीयूषवर्षः कृती ।"

प्रथममयूखसमाप्तावपि

"महादेवः सत्रप्रमुखमखविध्येकचतुरः
सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ ।
अनेनासावाद्यः सुकविजयदेवेन रचिते
चिरं चन्द्रालोके सुखयतु मयूखः सुमनसः ॥

इति पीयूषवर्षपण्डितजयदेवविरचिते चन्द्रालोके प्रथमो मयूखः ॥"

अन्ते

"पीयूषवर्षप्रभवं चन्द्रालोकं मनोहरम् ।
सुधानिधानमासाद्य श्रयध्वं विबुधा मुदम् ॥
जयन्ति याज्ञिकश्रीमन्महादेवाङ्गजन्मनः ।
सूक्तपीयूषवर्षस्य जयदेवकवेर्गिरः ॥"

प्रसन्नराघवनाटकेऽपि प्रस्तावनायाम्

"विलासो यद्वाचामसमरसनिष्यन्दमधुरः
कुरङ्गाक्षीबिम्बाधरमधुरभावं गमयति ।
कवीन्द्रः कौण्डिन्यः स तव जयदेवः श्रवणयो-
रयासीदातिथ्यं न किमिह महादेवतनयः ॥

पण्डितत्वं कवित्वं निबन्धकर्तृत्वं च भगीरथस्य विंशाब्दे* सम्पन्नमासीदिति तस्यापि वृद्धत्वसम्भवे किरातार्जुनीयटीकाया यौवने प्रणीतत्वे तदानीं किरातार्जुनीयटीकायाः ७५ वर्षप्राचीनत्वकल्पनमपि सम्भवतीति ।

गीतगोविन्दकर्ता जयदेवस्त्वस्माद्भिन्न एवेति प्रसन्नराघवभूमिकायां प्रतिपादितं पण्डितगोविन्ददेवशास्त्रिणा काशीविद्यासुधानिधौ ।

* विंशतिवर्षमिते वयसीत्यर्थः ।

अपि च ।

लक्ष्मणस्येव यस्यास्य सुमित्रागर्भजन्मः ।
रामचन्द्रपदाम्भोजे भ्रमद्भृङ्गायते मनः ॥

नटः । एवमेतत् । नन्वयं प्रमाणप्रवीणोऽपि श्रूयते। तदिह चन्द्रिकाचण्डातपयोरिव कवितातार्किकत्वयोरेकाधिकरणतामालोक्य विस्मितोऽस्मि ।

सूत्रधारः । क इह विस्मयः ।

येषां कोमलकाव्यकौशलकलालीलावती भारती
तेषां कर्कशतर्कवक्रवचनोद्गारे ऽपि किं हीयते ।
यैः कान्ताकुचमण्डले कररुहाः सानन्दमारोपिता-
स्तैः किं मत्तकरीन्द्रकुम्भशिखरे नारोपणीयाः शराः॥"

इति ।

चिन्तामण्यालोकारम्भे च

"अधीत्य जयदेवेन हरिमिश्रात् पितृव्यतः ।
तत्त्वचिन्तामणेरित्थमालोकोऽयं प्रकाश्यते ॥"

एतेन जयदेवमिश्र एव[१] पीयूषवर्षपण्डितस्तार्किकः कविश्च । अस्य माता सुमित्रा पिता महादेवो गुरुः पितृव्यश्च हरिमिश्र इति निष्पन्नम् ।

भगीरथठक्कुरेण च द्रव्यप्रकाशिकायां द्रव्यकिरणावलीप्रकाशटीकायामन्ते

"विंशाब्दे जयदेवपण्डितकवेस्तर्काब्धिपारं गतः
श्रीमानेष भगीरथः समजनि श्रीचन्द्रपत्यात्मजः ।
श्रीधीरातनयेन तेन रचिता श्रीमन्महेशाग्रज-
श्रीदामोदरपूर्वजेन जयतादाचन्द्रमेषा कृतिः ॥"इति।

(१) पितृव्यः पितुर्भ्राता स च मिश्रोपनामक इति जयदेवोऽपि मिश्रोऽच नास्ति वादावकाशः ।

मिथिलादेशे जनकपुरस्थानात् पञ्चक्रोशान्तरे ईशानदिग्भागे धनुःक्षेत्रे 'धनुखा' इतिप्रसिद्धे कूपे प्रस्तरपट्टे वक्ष्यमाणं पद्यं लिखितमस्ति।

"आसीत् पण्डितमण्डलाग्रगणितो भूमण्डलाखण्डलो
जातः खण्डवलाकुले(?)गिरिसुताभक्तो महेशः कृती।
शाके रन्ध्रतुरङ्गमश्रुतिमही १४७८ संलक्षिते हायने
वाग्देवीकृपयाशु येन मिथिलादेशः समस्तोऽर्जितः॥"

इत्यादीन्यनेकानि पद्यानि तत्र वर्तन्ते।

श्रीमहेशठक्कुरेण थेघठक्कुरापरनामधेयेन भगीरथठक्कुरेण च मेघठक्कुरापरनामधेयेन(१) चानेके ग्रन्था रचिताः विस्तरस्तु तेष्वनुसन्धेयः।

अपि च।

मार्कण्डेयपुराणान्तर्गतस्य चण्ड्याः सप्तशतीस्तोत्रस्य व्याख्यानं चित्रकूटसमीपे १६३३ वैक्रमवर्षे मल्लिनाथात्मजेन भीमसेनानुजेन वीरभद्रेण रचित(२)मित्ययं

(१) "यः कैशोरे विश्वविख्यातकर्मा धर्माचार्यः श्रीमहादेवशर्मा।
तत्सोदर्यो वर्द्धमानस्य सूक्तौ भावं मेघः सम्यगाविष्करोति॥"

इति भगीरथठक्कुरकृतद्रव्यप्रकाशिकारम्भे दर्शनात् तस्य मेघापरनामधेयत्वं श्रीमहेशठक्कुरस्य महादेवापरनामधेयत्वं च स्फुटमवगम्यत इति।

(२) ग्रन्थे ऽस्मिन् स्थूलमानेन श्लोकानां पञ्च सहस्राणि वर्तन्ते। ग्रन्थारम्भे "श्रीकृष्णद्वैपायनाभिधानमहर्षिवेदव्यासप्रोक्तमार्कण्डेयपुराणान्तर्गतजयाख्यदेवीमाहात्म्यप्रकाशकसप्तशतिकाभिधानं सावर्णिः सूर्यतनय इत्यादिसावर्णिर्भविता मनुरित्यन्तग्रन्थसन्दर्भं क्रौष्टुकिनामा द्विजन्मा प्रियशिष्यो मार्कण्डेयं शिरसा प्रणम्यापृच्छत्।" इत्यादि।

पुस्तकान्ते लेखकेन लिपिकाल एवं लिखितः।

"खगुणार्णयुतैश्चन्द्रैर्याजिते ऽब्दे १०३० तु वैक्रमे ।
नभसोऽग्नितिथौ शुभे छायाहृदयनन्दने ॥
लिखितं नीलकण्ठेन दुर्गापुस्तं सटीककम् ।
लिखितं खलु यत्नेन यश्चोरयति पुस्तकम् ॥
शूकरी तस्य माता स्यात् पिता तस्य च गर्दभः ॥" इति ।

मल्लिनाथवद्वीरभद्रोऽपि महावैयाकरणोऽस्यां टीकायां प्रतिश्लोकं बहूनां पदानां पाणिनिव्याकरणेन साधुत्वं दर्शयति । क्वचित् क्वचिदेकस्यैव वाक्यस्य प्रकारान्तरैर्नानाविधानर्थान् निरूपयति प्रमाणयति च तैत्तिरीयोपनिषदं भगवद्गीतां व्यासं पाणिनिं याज्ञवल्क्यं मातृगुप्ताचार्यं मुरारिमिश्रममरकोशं विश्वकोशं यादवकोशं मेदिनीकरकोशं च । अस्यां टीकायां कस्यापि टीकाकारस्य नाम न लिखति किं तु प्रतिश्लोकं "कस्यचिन्मते" "अपर आह" एवं रूपेण मतान्तरमुपन्यस्यति स च कश्चिदनतिप्राचीनष्टीकाकारो यतस्तेन पाणिन्यमरहेमचन्द्रयादववीरतरङ्गिण्यादयो ग्रन्थाः प्रमाणत्वेनोपन्यस्ताः ।

अपरोऽपि वीरभद्र आसीद् येन वात्स्यायनकामसूत्रव्याख्यानभूत आर्याच्छन्दसा निबद्धः कन्दर्पचूडामणिग्रन्थो रचितः । कन्दर्पचूडामणिग्रन्थे च भोजराजनाम्न उल्लेखात् स्वस्य च वीरशब्देनोल्लेखनात् स कश्चिदनतिप्राचीनो राधिराज इत्याभाति । यथाह कन्दर्पचूडामणौ ।

"अधिकरणे पञ्चमके कुरुते व्याख्या तृतीयके ऽध्याये ।
भूचक्रचक्रवर्त्ती वीरः श्रीवीरभद्रोऽसौ ॥

मत्सन्निकटे वर्तमानं पुस्तकं चाद्यन्तहीनम् आकारेण वर्षाणां त्रिशत्याः पूर्वं लिखितमिवाभाति ।

अपरोऽपि दीक्षितभीमसेन आसीद् येन सुधासागरनामकं काव्यप्रकाशव्याख्यानं १७७९ वैक्रमसंवत्सरे कृतं चण्डीसप्तशतीव्याख्यानमपि । अयं च कान्यकुब्ज इति तट्टीकादर्शनात् व्यक्तमवगम्यते ।

१६३३ संवत्सरोऽपि पूर्वोक्तां मल्लिनाथस्य स्थितिं द्रढयति । तथाहि

तद्व्याख्याने प्रथमाध्यायान्ते

"यो नित्यं गुरुपादपूजनरतः श्रीमल्लिनाथात्मजः
क्षेमश्रीवदनाम्बुजाहिमकरः श्रीवीरभद्रो द्विजः ।
देवीचारुपदाब्जदत्तहृदयो लोकप्रियस्तत्कृतौ
टीकायां किल चण्डिकानुचरिते ऽध्यायोयमाद्यो गतः॥" इति ।

एवमेव द्वितीयतृतीयचतुर्थानामध्यायानामन्ते ।

पञ्चमाध्यायान्ते तु

"यस्मै वाग्वादिनीयं वरममलमदाच्छ्रीभवानी पुनर्यं
कारुण्यादात्मभृत्यं कलयति सुषुवे मल्लिनाथः सुतं यम् ।
क्षेमश्रीर्वर्धयन्ती सुखमतुलमलं प्राप चाङ्के गतं यं
तस्यागात् पञ्चमोऽसौ स्तुतिललितगुणोऽध्याय एवात्र देव्याः ॥" इति ।

अष्टमाध्यायान्ते तु

"येन द्विजातिनिवहः समादृतो वीरभद्रेण ।
तेन व्यधायि देव्याष्टीकायामष्टमोऽध्यायः ॥" इति ।

दशमाध्यायान्ते तु

"शास्त्रयुक्त्या जिता येन वीरभद्रेण वादिनः ।
तत्स्पृष्टदुर्गाटीकायामध्यायो दशमो गतः ॥" इति ।

एकादशाध्यायान्ते तु

"शब्दशास्त्रार्थसाहित्यच्छन्दोव्याख्यानकोविदः ।
यस्तेन वीरभद्रेण चण्डिकाविवृतिः कृता ॥" इति ।

समाप्तौ तु

"शास्त्रयुक्त्या जिता येन वीरभद्रेण वादिनः ।
तत्स्पृष्टदुर्गाटीकायां गतोध्यायस्त्रयोदशः ॥

यो वै भूपालचूडामणिनिकरकरैरर्चिताङ्घ्रिर्द्विजेन्द्रः
काणादे चाक्षपादे कपिलफणिपतिप्रोक्ततन्त्रे च तन्त्रे[१] ।
वैयासे पाणिनीये ऽप्रतिहतधिषणोऽलङ्कृतौ काव्यमूले
टीकां कृत्वाग्रगण्योऽभवदिह विदुषां मल्लिनाथः कवीन्द्रः ॥
तत्सूनुर्वीरभद्रः कुलपतिपदभाग्भीमसेनानुजोऽसौ
चण्ड्याः स्तोत्रस्य टीकां विबुधजनमनोमोदसम्पादयित्रीम् ।
वर्षे रामाङ्कचन्द्रे शिवनयनयुते १६३३ चित्रकूटोपकण्ठे
चक्रे चण्डीप्रसादात् प्रतिपदममलं भावयंस्तत्पदाब्जम् ॥"
इति ।

मल्लिनाथेन काव्यटीकासु तार्किकरक्षाटीकायामपि "कोलाचलमल्लिनाथसूरिविरचितायां"मित्यादेर्लिखितत्वात् कोलाचलनिवासीत्युक्तं भवति कोलप्रधानोऽचल इति कोलश्चासावचलश्चेति वा व्युत्पत्त्या कोलनामकः कश्चित् पर्वतः[२] स च चित्रकूटसमीपस्थ इति महाभारतात् मार्कण्डेयपुराणाच्च प्रतिभाति । तथाहि

(१) कपिलप्रोक्ततन्त्रे सांख्ये फणिपतिप्रोक्ततन्त्रे योगशास्त्रे तन्त्रे जैमिनिप्रोक्ते पूर्वमीमांसाशास्त्रे ।

(२) पर्वताः । अद्रिगोत्रगिरिग्रावाचलेत्यमरः ।

केचित्तु वराहः शूकरो घृष्टिः कोलः पोत्री किरिः किटिरित्यमरकोशात् कोलाचलं कूर्माचलवत् वाराहक्षेत्रं वर्णयन्तः कान्यकुब्जदेशे गङ्गातटे वर्तमानमनेकपुरातनविभ्रष्टराजहर्म्यादियुतमुच्चावचप्रदेशमिदानीं "सोरों वदरिआ" इति प्रसिद्धमेवेति वदन्ति ।

मार्कण्डेयपुराणान्तर्गतचण्डीसप्तशत्यां "कोलाविध्वंसिनस्तथे"ति यदुक्तं तत्र कोलानाम नगरी सुरथराजस्य राजधानीति टीकाकारैर्व्याख्यातत्वात् सा कोलाचलशब्देन कथमपि न व्यपदेशमर्हतीति विद्वद्भिर्विवेचनीयम् ।

टीकाकिरातार्जुनीयघण्टापथटीकयोरप्येकमल्लिनाथकर्तृकत्वं सुव्यक्तम्[१]। मल्लिनाथेन तार्किकरक्षाटीकायामस्मिन्नेव पुस्तके ३९ पृष्ठे "स्फुटीकृतं चैतदस्माभिः पञ्चकाव्यादिटीकासु अलं महीपाल तव श्रमेणेत्यादावित्युक्तत्वात् आदौ वाणीं काणभुजीमितिश्लोकस्य वर्तमानत्वात् तदेकमल्लिनाथकर्तृकत्वमस्यापि सिद्धम्।

केचित्तु "स्पष्टीकृतं चैतदस्माभिः पञ्चकाव्यादिटीकासु" इति मल्लिनाथेनोक्तत्वात् नैषधचरितस्य तदानीमसत्त्वात् नैषधचरितं तेन न व्याख्यातम्। मुद्रिता जीवातुसमाख्या नैषधचरितटीका त्वाधुनिकेन केनचित् पण्डितेन पुस्तकविक्रयप्राचुर्यार्थं कृतेति वदन्ति। तन्न मल्लिनाथेन रघुवंशटीकायां ४ सर्गे स सैन्यपरिभोगेणेति ४५ श्लोकव्याख्याने "नैषधे च। अपां हि तृप्ताय न वारिधारा स्वादुः सुगन्धिः स्वदते तुषारा"[२] इति। शिशुपालवधटीकायामपि ३ सर्गे कपाटविस्तीर्णेति १३ श्लोकव्याख्याने "प्रायेणैकार्थमप्यनेकश्लोकमुक्तिविशेषलाभाल्लिखन्ति कवयः यथा हि नैषधे आदावेव निपीयेत्यादिश्लोकद्वयं तथा स्वकेलिलेशेत्यादिश्लोकद्वयं चे"त्युक्तत्वात् तदानीमेव मल्लिनाथेन नैषधचरितस्य समालोचितत्वात् भगीरथेन च नैषधचरितगूढार्थदीपिकायां टीकायां[३] मल्लिनाथकृतजीवातुटी-

(१) मयाध्ययनसमये मल्लिनाथकृतकाव्यटीकाग्रन्थानामपि विवरणस्य मनोरमं पुस्तकं दृष्टम्। खेदितोऽस्मि तत् कौतुककरं पुस्तकमिदानीं हस्तगतं न भवतीति।

(२) नैषधे ३ सर्गे ९३ श्लोकः।

(३) अस्याष्टीकायाः पुस्तकं १६२९ शाकवर्षलिखितं वाराणसीस्थराजकीयसंस्कृतपाठशालीयपुस्तकालये वर्तते। अत्रानेकेषु स्थलेषु पूर्वलि-

स्यात् तत्रापि यत्किञ्चिदवयवेन गिरिरग्निमानित्यादिकेन तत्पत्त्वसाध्यकेन हीनत्वात् गिरिरग्निमानित्यानुपूर्व्यास्ता-दृशवर्णसमुदायत्वस्य वा अवयवतावच्छेदकत्वेन यत्कि-ञ्चिदवयवतावच्छेदकरूपावच्छिन्नशून्यत्वविवत्तणे ऽप्येत-द्दोषावारणात् । किं तु अवयवतावच्छेदकतावच्छेदकीभू-तधर्मावच्छिन्नावच्छेदकताकशून्यत्वे तात्पर्यम् । तादृश-धर्मश्च प्रकृतानुमित्यन्यूनानतिरिक्तविषयकबोधजनकता-वच्छेदकयत्किञ्चिज्ज्ञानीयविषयताश्रयवर्णत्वसमनियत-समुदायत्ववत्त्वादिः । तादृशैकसमुदायत्वावच्छिन्नसत्त्वे ता-दृशसमुदायत्ववत्त्वावच्छिन्नावच्छेदकताकशून्यत्वाभावादि-ति । इदं सभाक्षोभादिना भवतीति ॥ १२ ॥

अधिकं लक्षयति ।

हेतूदाहरणाधिकमधिकम्[१] ॥ १३ ॥

हेतूदाहरणेत्युपलक्षणम् । दूषणाधिकमपि बोध्यम् । प्रतिज्ञाधिकं च पुनरुक्तमर्थान्तरं वा । यथोक्तानभिधानान्न पुनरुक्तत्वसाङ्कर्यम् । पर्वतो वह्निमानितिप्रतिज्ञानन्तरं धूमादालोकादिनिहेतुद्वयप्रयोगे नीलधूमादित्यादिप्रयोगे च हेत्वधिकम् । योयो धूमवान् स वह्निमान् यथा महानसं यथा चत्वरमित्यादौ यो धूमवान् स वह्निमान् वह्निमानेव धूमवानित्यादिनानाविधव्याप्तिबोधाभिप्रायेण प्रयोगे वा उदाहरणाधिकम् । न चैकहेतुप्रयोगे हेत्वाकाङ्क्षानिवृत्तेरर्था-न्तरत्वं स्यात् क्वचित् तत्साङ्कर्ये ऽपि क्षतिविरहात् । अ-सङ्कीर्णं तु नीलधूमादित्यादि । लक्षणं तु हेतौ व्यर्थविशे-षणाभिधानविभिन्नार्थकहेतुद्वयाभिधानविभिन्नार्थकोदा-

(१) पूर्ववत्सङ्गत्या सूत्रम्। हेतूदाहरणाधिकमधिकम् । अत्र हेतूदाहरण-त्वमविवक्षितमित्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

हरणद्वयाभिधानविभिन्नार्थकदृष्टान्तद्वयघटितोदाहरणाभिधानहेतुसाध्यविशेषणाधिक्यघटितोदाहरणाभिधानदूषणद्वयाभिधानान्यतमत्वम् । सूत्रस्य तत्रैव तात्पर्यात् ॥ १३ ॥[1]

पुनरुक्तं लक्षयति ।

शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यतरानुवादात्[2] ॥ १४ ॥

पुनर्वचनमुक्तार्थस्य पुनःकथनं पुनरुक्तम् । अत्र निश्चयाजनकत्वं विशेषणं देयं तेनानुवादव्युदासः । तस्य विभागमाह । शब्दार्थयोरिति । अन्यतरानुवादादित्यनेन सम्बन्धः । शब्द एकार्थकैकानुपूर्व्यवच्छिन्नः शब्दः । अर्थ एकार्थकविभिन्नानुपूर्वीकशब्दस्तयोरन्यतरानुवादादन्यतरस्य पुनःकथनात् तयोः पुनःकथनभेदादिति वा । द्वैविध्यमिति शेषः । केचित्तु शब्दार्थयोः पुनर्वचनं पुनरुक्तमित्यर्थः । शब्दार्थयोरित्यनेन विभागो दर्शितः । अन्यतरानुवादादनुवादभिन्नत्वादित्याहुः । शब्दपुनरुक्तं यथा घटो घट इति । अर्थपुनरुक्तं यथा घटः कलस इत्यादि । न चेदमनाकाङ्क्षिताभिधानत्वेनार्थान्तरं स्यात् पुनरुक्तव्यावर्तकविशेषणस्यार्थान्तरलक्षणे देयत्वात् । इदं भ्रमादिना भवति ॥ १४ ॥

(१) अत्र न्यायसूचीनिबन्धे इति त्रिभिः सूत्रैः स्वसिद्धान्तानुरूपप्रयोगाभासनिग्रहस्थानत्रिकप्रकरणमिति दृश्यते ।

(२) शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात् । अर्थादापन्नस्य स्वशब्देन पुनर्वचनं पुनरुक्तम् । तदनेन सूत्रद्वयेन पुनरुक्तमेकमेव निग्रहस्थानमित्यादि तात्पर्यटीका । अधिकस्येव पुनरुक्तस्यापि उक्तिनिरूप्यत्वादनन्तरं पुनरुक्तलक्षणप्रकरणम् । सूत्रम् । शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादादित्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः । एवमन्यत्रापि शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादादिति पाठः ।

पुनरुक्तप्रभेदान्तरमाह ।

अर्थादापन्नस्य स्वपदेन पुनरभिधानम्[१] ॥१५॥

पुनरुक्तविशेष इति शेषः । स्वस्यार्थस्य अर्थात् प्रागुक्तशब्दार्थानुपपत्तिज्ञानेनापन्नस्य ज्ञातस्य स्वशब्देन पुनरभिधानम् । यद्वा आपन्नस्यार्थस्य स्वशब्देन स्वस्य बोधकेन शब्देन पुनःकथनमित्यर्थः । इदं चाक्षिप्तपुनरुक्तमिति पुनरुक्तं त्रिधेति भाष्यकारादयः । एतदुदाहरणं च जीवी देवदत्तो गृहे नास्तीत्युक्ते गृहासत्त्वविशिष्टजीवित्वं बहिःसत्त्वं विनानुपपन्नमित्यर्थापत्त्या बहिःसत्त्वस्य लाभे ऽपि बहिरस्तीति वचनमिति । अन्ये तु पुनरुक्तं द्विविधम् । तत्रेदमर्थपुनरुक्तम् । शब्दपुनरुक्तं प्राक्शब्देनोक्तस्यार्थस्य तत्समानानुपूर्वीकेण विभिन्नानुपूर्वीकेण वा शब्देन पुनःकथनम् । शब्दार्थयोः पुनर्वचनमि(त्यनेन द्विविधस्यैव)[२] लाभादित्याहुः ॥ १५ ॥ [३]

अननुभाषणं लक्षयति ।

विज्ञातस्य परिषदा त्रिरभिहितस्याप्य-

(१) पूर्वसूत्रटिप्पणी द्रष्टव्या । तत्र च तात्पर्यटीकायां तथैव पाठः । द्वितीयलक्षणसूत्रम् । अर्थादापन्नस्य स्वशब्देन पुनरभिधानम् । पुनरुक्तमिति प्रकृतमिति अन्वीक्षान्यतत्त्वबोधे वर्धमानोपाध्यायाः । तत्र चायमेव पाठः । एतन्मते पुनरुक्तमिति न सूत्रान्तर्गतमिति । तात्पर्यटीकाकृन्मते तु तत् सूत्रान्तर्गतमिति विशेषः । विवरणकृता तु न तन्निवेशितमिति । न्यायसूचीनिबन्धे तु अर्थादापन्नस्य स्वशब्देन पुनर्वचनं पुनरुक्तमिति पाठः ।

(२) अत्रादर्शपुस्तके एकं पत्रं पार्श्वद्वये छिन्नं तेन तत्र प्रतिपङ्क्तिषु आद्यन्तयोः कानिचित् कानिचित् पदानि न सन्ति कस्यचित् कस्यचित् पदस्य कानिचित् कानिचिदक्षराणि न सन्ति । तत्र यानि पदान्यक्षराणि वा सम्भावनामादृत्य पूरितानि तानि ( ) एतच्चिह्नमध्ये निवेशितानीति बोध्यम् ।

(३) अत्र न्यायसूचीनिबन्धे इति द्वाभ्यां सूत्राभ्यां पुनरुक्तनिग्रहस्थानप्रकरणमिति दृश्यते ।

प्रत्युच्चारणमननुभाषणम्[१] ॥ १६ ॥

त्रिरभिहितस्येति वादिनेत्यादि । एतेन (प्रथमवचने ऽननुभाषणे वादिना वारत्रयं वाच्यमिति दर्शितम् । अज्ञान)साङ्कर्यवारणाय ज्ञातत्वमर्थविशेषणम् । विक्षेपसाङ्कर्यवारणाय कथायामवस्थितत्वं प्रतिवादिविशेषणं देयमिति । यदाहुराचार्याः । अज्ञानसा(ङ्कर्यनिरासायाज्ञानमनाविष्कुर्वतेति विक्षेपसाङ्कर्यनिरासाय कथामविच्छिन्दतेति च वि)शेषणीयमिति । न चाप्रतिभासाङ्कर्यमुत्तरप्रतिपत्तावपि सभाक्षोभादिना अननुभाषणसम्भवात् । इदं चतुर्धा एकदेशानुवादात् विपरीतानुवादात् केवलदूषणोक्त्या (स्तम्भेन वेति । सर्वनामपदेनानुवादात् पञ्चममित्याचार्याः ॥ १६ ॥

अज्ञानं) लक्षयति ।

अविज्ञातं चाज्ञानम्[२] ॥ १७ ॥

भावे निष्ठाप्रत्ययः । चकारात् परिषदा विज्ञातार्थस्य वादिना त्रिरभिहितस्यापीत्यस्य लाभः । तथा च तादृशस्याज्ञानं तादृशस्याज्ञानाख्यं निग्रहस्थान(मित्यर्थः । इदं च किं वदसि बुध्यत एव नेत्याद्याविष्करणेन ज्ञा)तुं शक्यत इति ॥ १७ ॥

अप्रतिभां लक्षयति ।

उत्तरस्याप्रतिपत्तिरप्रतिभा[३] ॥ १८ ॥

---

(१) अथ वचननिरूप्यत्वादुत्तरविरोधिनिग्रहस्थानचतुष्कप्रकरणं सूत्रम् । विज्ञातस्येत्यादि अन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः । तत्र तात्पर्यटीकादिषु च अप्रत्युच्चारणमिति पाठः । अन्यत्र क्वचित् त्रिरभिहितस्याप्यनुच्चारणमिति पाठः ।

(२) ज्ञानाभावनिरूप्यत्वसङ्गत्या सूत्रम् । अविज्ञातं चाज्ञानमित्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

(३) सूत्रम् । उत्तरस्याप्रतिपत्तिरप्रतिभेत्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

अप्राप्तकालं लक्षयति ।

अवयवविपर्यासवचनमप्राप्तकालम्(१) ॥ ११ ॥

अवयवस्य कथैकदेशस्य विपर्यासः क्रमवैपरीत्यं, तेन वचनमप्राप्तकालमित्यर्थः । यथा प्रतिज्ञाहेत्वादीनां क्रमस्तत्र प्रतिज्ञानन्तरमुदाहरणादिप्रयोगः । एवं वादिना साधनमुक्त्वा सामान्यतो हेत्वाभासा उद्धरणीया इत्येकः पादः । प्रतिवादिनस्तत्रोपालम्भो द्वितीयः पादः । प्रतिवादिनः स्वपक्षसाधनं तत्र हेत्वाभासोद्धरणं चेति तृतीयः पादः । ततो जयपराजयव्यवस्था चतुर्थः पाद इत्यादिक्रमस्तद्वैपरीत्येन कथनमिति ॥ १ ॥

न्यूनं लक्षयति ।

हीनमन्यतमेनाप्यवयवेन न्यूनम्(२) ॥ १२ ॥

अवयवेन स्वशास्त्रसिद्धेन । तेन सौगतस्य द्व्यवयवमात्राभिधानेऽपि न न्यूनत्वम् । अवयवसामान्यहीनायाः कथाया असम्भवादाह । अन्यतमेनेति । यत्किञ्चिदवयवेनेति फलितार्थः । अपिकारादवयवैकदेशहीनत्वस्यापि लाभः । अथवा अन्यतमेनापीत्यनेन एकद्वित्र्याद्यवयवलाभेन यत्किञ्चिदवयवेन हीनमित्यर्थः । अवयवैकदेशस्यावयवत्वाभावादेव तद्धीनस्यावयवहीनत्वेन लाभात् । वस्तुतस्तु यत्किञ्चिदवयवशून्यावयवाभिधानत्वस्य लक्षणत्वे पर्वतो वह्निमानित्यादिपञ्चावयवप्रयोगेऽपि न्यूनत्वं

(१) अथ सिद्धान्तनिरूप्यनिग्रहस्थानत्रिकलक्षणप्रकरणम् । तत्रापि कथञ्चिदन्वयादपार्थकाद् भेदयितुं तदवान्तरसूत्रम् । अवयवविपर्यासोऽप्राप्तकालमित्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः । तत्र च अवयवविपर्यासोऽप्राप्तकालमिति पाठः ।

(२) पूर्वस्यैवास्यापि अवयवनिरूप्यत्वसङ्गत्या सूत्रम् । हीनमन्यतमेनाप्यवयवेन न्यूनम् । अत्र सूत्रे अपिशब्दो वर्णमात्रानुस्वारन्यूनत्वस्यानुक्तस्य समुच्चयार्थं इत्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

प्रत्युच्चारणमननुभाषणम्[1] ॥ १६ ॥

त्रिरभिहितस्येति वादिनेत्यादि। एतेन (प्रथमवचनेऽननुभाषणे वादिना वारत्रयं वाच्यमिति दर्शितम्। अज्ञान)साङ्कर्यवारणाय ज्ञातत्वमर्थविशेषणम्। विक्षेपसाङ्कर्यवारणाय कथायामवस्थितत्वं प्रतिवादिविशेषणं देयमिति। यदाहुराचार्याः। अज्ञानसा(ङ्कर्यनिरासायाज्ञानमनाविष्कुर्वतेति विक्षेपसाङ्कर्यनिरासाय कथामविच्छिन्दतेति च वि)शेषणीयमिति। न चाप्रतिभासाङ्कर्यमुत्तरप्रतिपत्तावपि सभाक्षोभादिना अननुभाषणसम्भवात्। इदं चतुर्धा एकदेशानुवादात् विपरीतानुवादात् केवलदूषणोक्तया (स्तम्भेन वेति। सर्वनामपदेनानुवादात् पञ्चममित्याचार्याः ॥ १६ ॥

अज्ञानं) लक्षयति।

अविज्ञातं चाज्ञानम्[2] ॥ १७ ॥

भावे निष्ठाप्रत्ययः। चकारात् परिषदा विज्ञातार्थस्य वादिना त्रिरभिहितस्यापीत्यस्य लाभः। तथा च तादृशस्याज्ञानं तादृशस्याज्ञानाख्यं निग्रहस्थान(मित्यर्थः। इदं च किं वदसि बुध्यत एव नेत्याद्याविष्करणेन ज्ञा)तुं शक्यत इति ॥ १७ ॥

अप्रतिभां लक्षयति।

उत्तरस्याप्रतिपत्तिरप्रतिभा[3] ॥ १८ ॥

---

(१) अयं वचननिरूप्यत्वादुत्तरविरोधिनिग्रहस्थानचतुष्कप्रकरणं सूत्रम्। विज्ञातस्येत्यादि अन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः। तत्र तात्पर्यटीकादिषु च अप्रत्युच्चारणमिति पाठः। अन्यत्र क्वचित् त्रिरभिहितस्याप्यनुच्चारणमिति पाठः।

(२) ज्ञानाभावनिरूप्यत्वसङ्गत्या सूत्रम्। अविज्ञातं चाज्ञानमित्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः।

(३) सूत्रम्। उत्तरस्याप्रतिपत्तिरप्रतिभेत्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः।

तथा एकधर्मिवृत्तित्वमपरधर्मिवृत्तित्वस्य एकसाधकत्वं वान्यसाधकत्वस्य विरोधीति केनापि नोच्यते अन्यथा त्वदुक्तासाधकतासाधनमपि न स्यात् तत्रापि साधनान्तरसत्त्वादिति ॥ २८ ॥

समाप्तमुपलब्धिसमप्रकरणम् ॥

अनुपलब्धिसमं लक्षयति ।

तदनुपलब्धेरनुपलम्भादभावसिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिसमः[1] ॥ २९ ॥

शब्दोऽनित्यः यदि शब्दो नित्यः स्यादुच्चारणात् प्राक् कुतो नोपलभ्यते न हि घटाद्यावरणकुड्यादिवच्छब्दस्यावरणमस्ति तदनुपलब्धेरिति नैयायिकैरुक्ते प्रतिवादी प्रत्यवतिष्ठते यद्यावरणानुपलब्धेरावरणाभावः सिध्यति तदावरणानुपलब्धेरप्यनुपलम्भात् तदावरणानुपलब्धेरभावसिद्धौ तद्विपरीतस्य तदावरणस्योपपत्तेस्तन्नित्यत्वमेव स्यादिति प्रत्यवस्थानमनुपलब्धिसमः । प्रतिकूलतर्कदेशनाभासेयम् । यद्यपि द्वितीयाध्यायेऽयमुद्दङ्कितो दूषितश्च तथापि क्रमप्राप्ततया शिष्यबुद्धिवैषद्याय चास्य पुनरुपादानम् ॥ २९ ॥

अत्रोत्तरमाह ।

अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः[2] ॥ ३० ॥

अनुपलम्भात्मकत्वादुपलम्भाभावरूपत्वात् । तथा च तत्प्रतियोगिन उपलम्भस्याग्रहेणानुपलब्धेरेव ग्रहात्

(१) एतद्व्याख्यावसरे सूत्रकारस्य चोपलक्षणत्वे स्वमत्युत्प्रेक्षणमित्युक्तमन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायैः । इदं न्यायसूचीनिबन्धे वर्तते ।

(२) दुष्टत्वमूलसूत्रं तु अनुपलम्भात्मकत्वादनुपलब्धेरहेतुरित्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः । अस्य प्रत्यादेशसूत्रम् । अनुपलम्भात्मकत्वादनुपलब्ध्यहेतुरिति तात्पर्यटीका ।

कुतस्तदनुपलब्धिः। एवमनुपलम्भात्मकाभावस्याभावग्रहे न प्रतियोग्यनुपलब्धिर्हेतुस्तस्याभावाभावत्वेन भावरूपत्वादिति तदनुपलब्धेरनुपलम्भादित्यादिकमहेतुः न प्रतिषेधसाधकमिति। अन्यथा दोषानुपलब्धेरनुपलम्भात् त्वदुक्तसाधनमपि सदोषं स्यादिति ॥ ३० ॥

ननु तदावरणोपलम्भस्याग्रह एव कथं तदनुपलब्धेर्ग्रहः कथं वा उपलम्भाभावाभावस्योपलम्भस्य ग्रहस्तत्र प्रतियोग्यनुपलब्धेरप्यहेतुत्वादित्यत आह।

ज्ञानविकल्पानां च भावाभावसंवेदनादध्यात्मम्[१] ॥ ३१ ॥

आत्मानमधि अध्यात्मम्। ज्ञानविकल्पानां ज्ञानविशेषाणाम्। भावाभावसंवेदनात् मनसैव सत्त्वासत्त्वज्ञापनात्। तथा च घटादिज्ञानसत्त्वे घटं जानामीति तदसत्त्वे च घटं न जानामीतिमानसप्रत्यक्षस्योदयान्नासमञ्जसमिति भावः ॥ ३१ ॥

समाप्तमनुपलब्धिसमप्रकरणम् ॥

अनित्यसमं लक्षयति।

साधर्म्यात् तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसमः[२] ॥ ३२ ॥

साधर्म्यात् दृष्टान्तघटसाधर्म्यात् कृतकत्वात्। तेन कृतकत्वेन सह तुल्यधर्मोपपत्तेः तत्सहचरितधर्मस्यानित्य-

(१) न केवलं निषेधविषयप्रमाणागम्यताऽनुपलब्धेरुपपत्तिगम्या अपि तु स्वसंवेदनप्रत्यात्मवेदनीयेत्याह सूत्रकारः। ज्ञानविकल्पानामित्यादि तात्पर्यटीका। एतद्व्याख्यावसरे अथवा भावाभावयोर्विरोधायकनिषेधकमानगम्यता कथं गम्यत इत्यत्रेदं सूत्रमुपतिष्ठत इत्युक्तमन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायैः।

(२) अनुपलब्धिसमानित्यसमयोरभावनिरूप्यतयैकनिरूप्यत्वसङ्गत्या सूत्रम्। साधर्म्यात् तुल्यधर्मोपपत्तेरित्यादि अन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः।

त्वस्योपपत्तिस्वीकारे । यद्वा दृष्टान्तयत्किञ्चित्साधर्म्यात् कृतकत्वात् दृष्टान्ततुल्यधर्मोपपत्तेः दृष्टान्तगतयावद्धर्मस्वीकारेणानित्यत्वरूपसाध्यस्यापि स्वीकारे । सर्वानित्यत्वप्रसङ्गः सत्त्वरूपघटादिसाधर्म्येण सर्वानित्यत्वप्रसङ्गः । न चैवमर्थान्तरमिति वाच्यम् । सर्वस्यैवानित्यत्वे व्यतिरेकसहचाराग्रहात् व्यतिरेकव्याप्तिविघटनात् । अनुपसंहारिदेशनाभासेयं प्रतिकूलतर्कदेशनाभासा वा । लक्षणं तु दृष्टान्तसाधर्म्येण सर्वस्य साध्यवत्त्वापादनम् । साध्यपदादविशेषसमाव्यवच्छेदात् तत्र साध्यभिन्नस्यैवापादनात् । सर्वानित्यत्वेति अनित्यत्वसाध्याभिप्रायेणोक्तं साध्यमात्रोपलक्षकम् । तेन न पर्वतो वह्निमान् धूमादित्यादौ महानससाधर्म्यात् सत्त्वात् सर्वस्य वह्निमत्त्वापादनस्य जात्यन्तरतापत्तिः । अनित्यसमपदं तु पारिभाषिकमिति भावः ॥ ३२ ॥

अत्रोत्तरमाह ।

साधर्म्यादसिद्धेः प्रतिषेधासिद्धिः प्रतिषेध्यसाधर्म्यात्(१) **॥ ३३ ॥**

साधर्म्यादसिद्धेः सर्वानित्यत्वप्रसङ्गेन साधर्म्यस्यासाधकत्वस्वीकारात् । भवतेति शेषः । प्रतिषेधासिद्धिः मदुक्तहेतोः कृतकत्वादेः साधकत्वव्यतिरेकस्य प्रतिषेध्यसाधर्म्याद् या भवदुक्तसिद्धिः सा नेत्यर्थः । तथा च कृतकत्वं न साधकं दृष्टान्तसाधर्म्यरूपत्वात् सत्त्वादिवदिति त्वदुक्तप्रयोगोऽप्यसङ्गतः स्यात् दृष्टान्तसाधर्म्यरूप-

(१) भूस्य प्रत्याख्यानसूत्रम् । साधर्म्यादसिद्धेरित्यादि तात्पर्यटीका । दुष्टत्वमूलचिन्तासूत्रम् । साधर्म्यादसिद्धेरित्यादि अन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

त्वस्य त्वदीयहेतोरपि दृष्टान्तरूपसत्त्वसाधर्म्येणासाधकत्वेन त्वदभिमतत्त्वादिति भावः ॥ ३३ ॥

ननु साधर्म्यमात्रस्य साधकत्वे सर्वानित्यत्वप्रसङ्गः केन वार्यतामित्यत आह ।

दृष्टान्ते च साध्यसाधनभावेन प्रतिज्ञातस्य धर्मस्य हेतुत्वात् तस्य चोभयथाभावान्नाविशेषः[१] ॥ ३४ ॥

साध्यसाधनभावेन साध्यव्याप्यत्वेन । प्रतिज्ञातस्य निश्चितस्य । हेतुत्वात् साधकत्वात् । तस्य च व्याप्यत्वस्य च । उभयथाभावादन्वयव्यतिरेकरूपत्वात् । नाविशेषः कृतकत्वसत्त्वयोर्न तुल्यता । मदुक्तहेतौ कृतकत्वे व्याप्तिसत्त्वेन सत्त्वे च तदसत्त्वेन विशेष एवेति न सत्त्वस्य सर्वानित्यत्वसाधकत्वमिति भावः ॥ ३४ ॥

समाप्तमनित्यसमप्रकरणम् ॥

नित्यसमं लक्षयति ।

नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नित्यसमः[२] ॥ ३५ ॥

अनित्यभावोऽनित्यत्वं तस्य नित्यं सर्वकालं स्वीकारेऽनित्ये शब्दे नित्यत्वं स्यादित्यापादनं नित्यसमः । अयं भावः । अनित्यत्वस्य नित्यत्वस्वीकारे तदभावदशायां नित्य एव शब्दः स्यात् । न हि दण्डाभावशून्यतादशायां

(१) न्यायसूत्रोद्धारे प्रतिज्ञातस्येति नास्ति । तात्पर्यटीकान्वीक्षानयतत्त्वबोधन्यायसूचीनिबन्धेषु तु प्रतिज्ञातस्येत्यत्र प्रज्ञातस्येति पाठः ।

(२) धर्मस्य तदतद्रूपताविकल्पे धर्मोपलब्धेः कारणत्वात् तस्याश्च पूर्वभावित्वसहत्या सूत्रम् । नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नित्यसम इत्यन्वीक्षानयतत्त्वबोधे वर्धमानेः पाठ्यायाः ।

न दण्डीति प्रयुज्यत इत्यनित्यत्वं नित्यमेवास्तीत्युपगन्तव्यम् । तथा च शब्दस्यापि नित्यत्वमन्यथा तत्रानित्यत्वस्य सर्वकालवृत्तित्वासम्भवादिति बाधः सत्प्रतिपक्षो वा । तद्देशनाभासेयम् । एवमनित्यत्वं यदि नित्यं तदा कथं शब्दस्यानित्यतां कुर्यान्न हि रक्तं महारजनं पटस्य नीलतां करोति । अथानित्यत्वमनित्यं तदा तदभावदशायां शब्दस्य नित्यत्वं स्यादित्यादिकमूह्यम् । लक्षणं तु साध्यस्य नित्यत्वानित्यत्वसार्वकालिकत्वासार्वकालिकत्वान्यतरधर्मेणानित्यपक्षस्य नित्यत्वरूपविरहापादनेन प्रत्यवस्थानम् । इदमनित्यपक्षकानित्यत्वसाध्यकस्थल एवेति । अथवा सार्वदिकसाध्यवत्त्वासार्वदिकसाध्यवत्त्वविकल्पेनानित्यपक्षे नित्यत्वसाध्यविरहान्यतरापादनेन प्रत्यवस्थानं नित्यसमः । सार्वदिकसाध्यवत्त्वेनानित्यपक्षस्य नित्यत्वापादनेन प्रत्यवस्थानं वा सूत्रे नित्यसाध्यवत्त्वस्यैव लाभात् । अनित्यभावादित्युपलक्षणम् । साध्यवत्त्वादिति तदर्थः । न च पर्वतो वह्निमानित्यादौ पर्वतस्य नित्यत्वापादने ऽर्थान्तरम् । विपर्यये सार्वदिकसाध्यवत्त्वविरहोन्नयनेन बाधपर्यवसानादिति । केचित्तु अनित्यस्य भावो धर्मस्तस्य नित्यमभ्युपगमे ऽनित्यत्वेनाभ्युपगतस्य नित्यत्वं स्यात् यथा क्षितिः सकर्तृका कार्यत्वादित्यत्र अनित्यक्षितेर्धर्मः सकर्तृकत्वं त्वया क्षितौ नित्यमुपेयते न वा न चेत् तदा साध्याभावदशायां बाधः । अथ नित्यमेव सकर्तृकत्वमुपेयते तदा क्षितेर्नित्यत्वं स्यादिति सकर्तृकत्वं विरुद्धं तद्देशनाभासेयमिति प्राहुः ॥ ३५ ॥

अत्रोत्तरमाह ।

प्रतिषेध्ये नित्यमनित्यभावादनित्ये नि-

त्यत्वोपपत्तेः प्रतिषेधाभावः[1] ॥ ३६ ॥

प्रतिषेध्ये पक्षे शब्दे। नित्यमनित्यभावाद् यावत्कालं पक्षो वर्तते तावदेव तत्रानित्यभावादनित्यत्वसाध्यस्वीकारात्। अनित्ये शब्दे। अनित्यत्वोपपत्तेरित्यकारप्रश्लेषः। प्रतिषेधाभावः त्वदुक्तप्रतिषेधो नेत्यर्थः। अथवा नित्यत्वोपपत्तेर्यः प्रतिषेधः तस्याभावः स न सम्भवतीत्यर्थः ॥ ३६ ॥

समाप्तं नित्यसमप्रकरणम् ॥

कार्यसमं लक्षयति।

प्रयत्नकार्यानेकत्वात् कार्यसमः[2] ॥ ३७ ॥

प्रयत्नकार्यानेकत्वात् प्रयत्नसम्पादनीयस्यानेकत्वादनेकविधत्वात् कार्यसम इत्यर्थः। अयमर्थः। शब्दोऽनित्यः प्रयत्नानन्तरीयकत्वादितिप्रयोगे प्रयत्नानन्तरीयकत्वं प्रयत्नकार्ये घटादौ प्रयत्नानन्तरोपलभ्यमाने कीलकादौ च दृष्टम्। तत्र द्वितीयं न तज्जन्यत्वसाधकम्। प्रथमं त्वसिद्धम्। तथा च सामान्यत उक्ते हेतावनभिमतविशेषनिराकरणेन प्रत्यवस्थानं कार्यसमः। असिद्धिदेशनाभासादिरूपेयम्। अथवा प्रयत्नकार्याणां कर्तव्यप्रयत्नानामनेकत्वादनेकविधत्वात्। तथा चोक्तान्यस्वव्याघातकजात्युत्तरं कार्यसमा। एवं चास्या आकृतिगणत्वात् सूत्रानुपदर्शितानामपि ग्रहः। यथा त्वत्पक्षे किञ्चिद्दूषणं भवि-

---

(१) अस्य प्रत्यादेशसूत्रम्। प्रतिषेध्ये नित्यमित्यादि तात्पर्यटीका। अत्र दृष्टिस्तरसूत्रम्। प्रतिषेध्ये नित्यमनित्यभावादित्यादि अन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः।

(२) सूत्रम्। प्रयत्नकार्यानेकत्वात् कार्यसम इत्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः।

ष्यतीति शङ्कापिशाचीसमा कार्यकारणभावस्योपकार-नियतत्वे ऽनवस्थेत्यनुपकारसमेत्यादि ॥ ३७ ॥

अत्रोत्तरम् ।

कार्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेः[1] ॥ ३८ ॥

शब्दस्य कार्यान्यत्वे ऽकार्यत्वे प्रयत्नस्य वक्तुः प्रयत्नस्याहेतुत्वं शब्दाहेतुत्वं शब्दस्य प्रयत्नाजन्यत्वमिति यावत् । अनुपलब्धिकारणस्यावरणादेः सत्त्वाद् भवतीति समुदितार्थः । अयमभिप्रायः । उच्चारणात् प्राक् शब्दस्यानुपलब्धिरावरणादित्यकार्यतया शब्दस्य प्रयत्नाजन्यत्वेन स्वरूपासिद्धिः स्यात् न चैवम् । शब्दस्यावरणाद्यभावेन कार्यत्वेन प्रयत्नजन्यत्वमेवेति न दोषः । आकृतिगणपक्षे तु कार्याणां जातीनामन्यत्वे नानाविधत्वे इदमुत्तरम् । प्रयत्नस्य त्वदीयदूषणप्रयत्नस्य अहेतुत्वमसाधकतासाधकत्वाभावः । उपलब्धेः कारणस्य प्रमाणस्य निर्दोषवाक्यस्य या उपपत्तिः निर्दोषवाक्याधीनोपपादनं तदभावात् त्वद्वाक्यस्य स्वव्याघातकत्वादित्यर्थः ॥ ३८ ॥

कार्यसमप्रकरणं समाप्तम् ॥

जातिवादोऽसदुत्तरत्वेन न कर्तव्यः तत्त्वनिर्णयप्रयोजकेन सदुत्तरेणैव कथोद्भावनं कार्यमिति सूचयित्वा तथैवासदुत्तरत्वेनाकर्तव्यां कथाभासरूपां षट्पक्षीं प्रसङ्गाद् दर्शयति ।

---

(१) अस्य प्रत्यादेशसूत्रम् । कार्यान्यत्वे प्रयत्नाहेतुत्वमित्यादि तात्पर्यटीका । अत्र प्रत्युत्तरसूत्रम् । कार्यान्यत्वे प्रयत्नाहेतुत्वमित्यादि अन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

प्रतिषेधे ऽपि समानो दोषः[१] ॥ ३९ ॥

सर्वत्रैवम्[२] ॥ ४० ॥

प्रतिषेधे ऽपि प्रतिवाद्युक्तप्रतिषेधके ऽपि । समानो दोषो मदुक्तहेतुर्यथा यद्दोषेण दुष्टीकृतस्तथा दोषेण दुष्ट इत्युद्भावनेन वादिनः प्रत्यवस्थानमप्यसदुत्तरमित्यर्थः । अथवा जातिवादिनं प्रति तथा प्रतिषेधे ऽपि समानो दोष इत्यर्थः । यथा प्रयत्नानन्तरीयकत्वं न शब्दानित्यत्वं साधयति अनैकान्तिकत्वादिति यो दोषः स त्वत्पक्षे तुल्यः अनैकान्तिकत्वस्यापि असाधकताव्यभिचारित्वादिति । यथा वा प्रयत्नानन्तरीयकत्वं व्यभिचारित्वेन शब्दानित्यत्वासाधकमिति यद्युच्यते तदा त्वदुक्तप्रयत्नाभिव्यङ्ग्यत्वमपि नित्यत्वासाधकं व्यभिचारात् ॥ ३९ ॥

इदं च मतानुज्ञारूपनिग्रहस्थानं किं कार्यसमायामेवेत्यत आह । सर्वत्रैवम् । एवंविधमसदुत्तरं सर्वत्रैव जातौ सम्भवतीर्थः । यथा शब्दोऽनित्यः कृतकत्वादित्यत्र नित्याकाशसाधर्म्यादमूर्तत्वान्नित्यः स्यादिति साधर्म्यसमायामाकाशसाधर्म्यान्नित्यत्वे आकाशवच्छब्दे परममहत्त्वं स्यादित्युत्कर्षसमेति । एवमन्यत्राप्यूह्यम् । यद्यय-

(१) यदि पुनर्वाद्यपि जातिवादिनं प्रति साधनाभासेन प्रत्यवतिष्ठते ततः षट्पक्ष्यां सत्यां न तत्त्वनिर्णयावसाना कथा भवेदिति शिष्यहितः सूत्रकारः समाधानाभासवादिनं प्रति षट्पक्षीमवतारयति । प्रतिषेधे ऽपि समानो दोषः । तदेतत्सूत्रावतारपरं भाष्यम् । हेतोश्चेदित्यादि तात्पर्यटीका । तत्र षट्पक्षीरूपकथाभासावतारणार्थं सूत्रम् । प्रतिषेधे ऽपि समानो दोष इति अन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायः । प्रतिषेधोऽपि समानो दोष इत्यादर्शपुस्तके सूत्रे व्याख्याने च पाठः ।

(२) न केवलमस्यां जातावयं समाधानाभासो वादिनोऽपि तु सर्वत्रैव जातावित्ति शिष्यान् शिक्षयति सूत्रकारः सर्वत्रैवमिति तात्पर्यटीका । परं तु विवरणकृता प्रतिषेधोऽपि समानो दोषः सर्वत्रैवमिति एकसूत्रत्वेन पठितम् । तात्पर्यटीकान्यायसूचीनिबन्धान्वीक्षानयतत्त्वबोधदर्शनाद् द्वे सूत्रे इति निश्चीयते ऽस्माभिः ।

प्रतिदेशः षट्पक्षानन्तरमेव कर्तुमुचितस्तथापि त्रिपक्षादिकमपि सूचयितुमत्रोक्तः । उभयासदुत्तरत्वबोधकफला हि षट्पक्षी त्रिपक्षादावपि तत्फलकत्वतुल्यत्वादिति भावः । न च त्रिपक्षानन्तरमेव मध्यस्थेन पर्यनुयोज्योपेक्षणस्योद्भावने कथासमाप्तौ कुतश्चतुर्थपक्षादिकमिति वाच्यम् । मध्यस्थस्य तदस्फुरणदशायां सम्भवादिति ॥ ४० ॥

चतुर्थपक्षमाह ।

प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद्दोषः[1] ॥ ४१ ॥

वादिनं प्रत्युक्तो दोषः प्रतिषेधः तं प्रति तथैव दण्डो दोषः तं प्रति च पुनः प्रतिवादिना तथादोषेण प्रत्यवस्थानमित्यर्थः । यथा शब्दोऽनित्यः प्रयत्नानन्तरीयकत्वादिति वादिनः स्थापनापक्षः प्रथमः । प्रयत्नकार्यानेकत्वादित्याद्युक्तदोषः प्रतिवादिनो द्वितीयः । प्रतिषेधदोषः समान इति वादिनो विप्रतिषेधः पुनस्तृतीयः पक्षः । तत्रापि प्रतिवादिनस्तथादोषोद्भावनं चतुर्थः पक्ष इति ॥ ४१ ॥

पञ्चमपक्षमाह ।

प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समानो दोषप्रसङ्गो मतानुज्ञा[2] ॥ ४२ ॥

(१) प्रतिषेधेऽपि समानो दोष इतिसूत्रावतरणिकायां तात्पर्यटीकाकृता ऽभ्युपहितः सूत्रकारः समाधानाभासवादिनं प्रति षट्पक्षीमवतारयतीति लिखितम् । तेनैषां पक्षाणां सूत्रत्वमायातीति । व्याख्यातमिदमन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायैः । वर्तते चेदं न्यायसूचीनिबन्धे ।

(२) प्रतिषेधं द्वितीयपक्षं सदोषं स्वीकृत्य तद्विप्रतिषेधे समप्रतिषेधे तृतीयपक्षतुल्यस्य दोषस्य प्रसङ्गस्त्वत्कृतोऽयं मतानुज्ञेति सूत्रार्थ इत्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायैर्व्याख्यातम् ।

आदौ वादिनः स्थापनापक्षः। तत्र जात्युत्तरेण सदोषप्रतिषेधोद्भावनं प्रतिवादिनो द्वितीयः पक्षः। तं प्रतिषेधमभ्युपेत्य तत्र दोषानुद्भावनेनानुमतिं व्यञ्जयित्वा प्रतिवादिपक्षे तथैव प्रतिषेधोद्भावनं तृतीयः पक्षः। तं प्रति तथैव दोषोद्भावनं विप्रतिषेधश्चतुर्थः पक्षः। तं प्रति च तत्तुल्यदोषप्रसञ्जनं मतानुज्ञानाम निग्रहस्थानं पञ्चमः पक्ष इत्यर्थः॥ ४२॥

षष्ठपक्षमाह।

स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारे हेतुनिर्देशे परपक्षदोषाभ्युपगमात् समानो दोषः(१)॥४३॥

स्वपक्षः स्थापनारूपः प्रथमपक्षस्तं लक्षीकृत्य प्रवृत्तो द्वितीयः पक्षस्तस्यापेक्षा समादरस्तत्र दोषानुद्भावनमिति यावत्। तेनोपपत्तेः स्वपक्षोपपादनस्य उपसंहारो यत्र तस्मिन् हेतुनिर्देशे सति परपक्षदोषाभ्युपगमेन पुनर्यो दोषस्तत्र प्रतिवादिनः समानदोषोद्भावनमिति मतानुज्ञावृत्त्या षष्ठः पक्ष इत्यर्थः। अत्रोभयोरप्यसदुत्तरत्वादर्थासिद्धिः। यदि वादी प्रतिवादिनं सदुत्तरेण दूषयति तदा षट्पक्षी न प्रवर्तत इति॥ ४३॥

समाप्तं कथाभासप्रकरणम्॥

इति गोतमसूत्रविवरणे पञ्चमाध्यायस्याद्याह्निकविवरणम्॥

(१). एतत् सूत्रं धृत्वा स्वपक्षः स्थापनावादिन आद्यः पक्षः तल्लक्षणो द्वितीयः पक्षः जात्युत्तरं स्वपक्षलक्षणीयत्वात् तस्यापेक्षा उपेक्षा अनुद्धारः तदनन्तरमुपपत्तेः प्रतिषेधे ऽपि समानो दोष इत्यस्या उपसंहारे प्रतिपादनविषये यो दूषणरूपो हेतुर्मया निर्दिष्ट उक्तः चतुर्थकक्षास्तेन तत्र दोषमनुक्त्वा त्वया पञ्चमकक्षास्तेन यो मतानुज्ञारूपो दोष उक्तः स तत्रापि समानः तत्रापि मतानुज्ञा कुतः परपक्षदोषाभ्युपगमात् तृतीयकक्षायां चतुर्थकक्षास्तेन मया यो दोष उक्तस्त्वया तदुपगमादिति सूत्रार्थ इति व्याख्यातमन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायैः।

अथेदानीं निग्रहस्थानविशेषलक्षणार्थं विभजते ।

प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासन्न्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि[1] ॥ १ ॥

अत्र चकारः समुच्चयार्थस्तेनानुक्तानां दृष्टान्ते साध्यवैकल्यादीनां ग्रहणम् । केचित्तु चकारस्त्वर्थे तेन एतानि तु निग्रहस्थानानि न पुनरपस्मारादिनाऽननुभाषणादीनि झटितिसंवरणेन तिरोहिता वाणीत्यर्थो लभ्यत इत्याहुः ॥ १ ॥

तत्र प्रथमोद्दिष्टां प्रतिज्ञाहानिं लक्षयति ।

प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः[2] ॥ २ ॥

(१) तत्र परस्परासङ्कीर्णनिग्रहस्थानत्वव्याप्याः कत्युपाधय इति विभागोत्थापकजिज्ञासायां विभागोद्देशसूत्रम् । प्रतिज्ञाहानिरित्यादि अन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

(२) सूत्रम् । प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः । कथमत्र सूत्रार्थ इत्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः । प्रतिदृष्टान्तधर्माभ्यनुज्ञा, स्वदृष्टान्ते प्रतिज्ञाहानिः । तदेतत् सूत्रं भाष्यमतेन तावद् व्याचष्ट इति तात्पर्यटीका ।

प्रतिदृष्टान्तः परोक्तदृष्टान्तस्तस्य धर्मः साध्यसाधनविरहः तस्याभ्यनुज्ञा। स्वदृष्टान्ते यतो दृष्टान्तान्तरात् सा प्रतिज्ञाहानिः। प्रतिज्ञायते साध्यसाधनयोः सहचारो यतः सा वाक् दृष्टान्तस्तस्य हानिर्यत इति व्युत्पत्तेः। तथा च दृष्टान्ते साध्यसाधनान्यतरवैकल्यस्य परेणोद्भावने तद्दोषमनुद्धृत्य दृष्टान्तान्तरप्रयोगः प्रतिज्ञाहानिरिति फलितम्। यथा पर्वतो वह्निमान् धूमादयोगोलकवदित्युक्ते अयोगोलकं धूमशून्यमिति प्रतिवादिनोक्ते च अस्तु तर्हि महानसवदित्यादि। केचित्तु प्रतिकूलो दृष्टान्तो यत्र स परपक्षः स्वः स्वीयो दृष्टान्तो यत्र स स्वपक्षः। तथा च स्वपक्षे परपक्षधर्माभ्यनुज्ञा प्रतिज्ञाहानिः स्वयं विशिष्याभिहितपरित्याग इति फलितार्थः। सिद्धान्तस्तु स्वयं विशिष्य नाभिधीयत इति नापसिद्धान्तसाङ्कर्यम्। इयं च पक्षदृष्टान्तसाध्यसाधनान्यहानिभेदात् पञ्चधा। यथा शब्दोऽनित्यः कृतकत्वादित्युक्ते अत्र प्रतिज्ञा बाधितविषया इति प्रत्युत्तरे दत्ते अस्तु तर्हि घट एव पक्ष इतिप्रयोगे पक्षहानिः। तथा अत्रैवास्तु तर्हि शब्दोऽभिधेय इत्युत्तरे साध्यहानिः। एवं दृष्टान्तहानिरप्यवसेया। ऐन्द्रियकत्वादितिप्रयोगे हेतुरयमनैकान्तिक इति प्रत्युत्तरे अस्तु तर्हि कृतकत्वमेव हेतुरित्युत्तरं साधनहानिः। अन्यहानिस्तु हेत्वादिविशेषणहान्यादिरूपा। यथा नीलधूमादितिप्रयोगेऽत्र नीलत्वं व्यर्थविशेषणमित्युत्तरिते अस्तु तर्हि धूमो हेतुरित्यादीति प्राहुः॥ २॥

प्रतिज्ञान्तरं लक्षयति।

प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात् तदर्थनिर्देशः प्रतिज्ञान्तरम्[1] ॥ ३ ॥

(१) प्रतिज्ञानिरूप्यत्वसङ्गत्या सूत्रम्। प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात् तदर्थनिर्देशः प्रतिज्ञान्तरमित्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः।

प्रतिज्ञातार्थप्रतिषेधे पक्षे साध्यस्य पक्षसाध्ययोस्तद्विशेषणस्य वा प्रतिषेधे। धर्माणां पक्षसाध्यतद्विशेषणादीनां विकल्पात् भेदमादाय। तदर्थनिर्देशः प्रतिज्ञातार्थानां पक्षादीनामेकतरनिर्देशः प्रतिज्ञान्तरमित्यर्थः । इदं च पक्षहानिसाध्यहानितद्विशेषणहानिपक्षसाध्यविशेषणान्तरप्रक्षेपेणानेकविधम् । तत्र हानित्रयोदाहरणमनुपदमेव प्राग् दर्शितम् । पक्षे विशेषणान्तरदानं यथा शब्दो नित्य इत्युक्ते ध्वनौ बाधे प्रतिवादिनोक्ते च वर्णात्मकः शब्दो नित्य इत्युत्तरम् । एवं पर्वतो वह्निमान् सुरभिमलिनधूमादित्युक्ते अत्र हेतोर्व्यर्थविशेषणमिति प्रत्युत्तरिते कृष्णागरुप्रभववह्निमानित्युत्तरे साध्यविशेषणप्रक्षेपः । प्रकृतोपयोगान्नार्थान्तरत्वमनयोरिति । एवमन्यदप्यूह्यम् । अत्र प्रतिज्ञातार्थस्येत्युपलक्षणम् । हेत्वतिरिक्तार्थस्येति तदर्थः । हेत्वन्तरस्य स्वातन्त्र्येण वक्तव्यतया उदाहरणान्तरादीनामत्रैवान्तर्भावात् । अथवा अनुक्तसमुच्चायकेन चकारेण तेषां स्वातन्त्र्येण ग्रहणम् । तत्र उदाहरणान्तरं यथा पर्वतः कृष्णागरुवह्निमान् सुरभिमलिनधूमात् योयः सुरभिमलिनधूमवान् स वह्निमानितिप्रयोगे प्रतिवादिनोदाहरणे न्यूनत्वे उक्ते पुनः स तादृशवह्निमानित्युदाहरणान्तरमिति । एवमन्यदूह्यम् । केचित्तु प्रतिज्ञातार्थस्य प्रतिषेधे कृते तद्दूषणोद्दिधीर्षया धर्मस्य धर्मान्तरस्य विकल्पात् पक्षे साध्ये वा विशेषणतया दानादित्यर्थः । तदर्थस्य प्रतिज्ञातार्थस्य निर्देश इति । प्रतिज्ञातार्थस्येत्युपलक्षणम् । हेत्वतिरिक्तावयवार्थस्येत्यर्थः । उदाहरणं तूक्तमेव । प्रतिज्ञातार्थापरित्यागान्न प्रतिज्ञाहानावन्तर्भावः । प्रतिषेध इत्यनेन झटितिसंवरणे विलम्बेनापि स्वयं दूषणं विभाव्य विशेषणे तद्दोष इत्युक्तमिति प्राहुः ॥ ३ ॥

प्रतिज्ञाविरोधं लक्षयति ।

प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः(१) ॥४॥

अत्र प्रतिज्ञाहेतुपदे कथाकालीनवाक्यपरे । तथा च कथायां स्ववचनार्थेन स्ववचनार्थविरोधः प्रतिज्ञाविरोधः । बाधितत्वं विरोधः । अत्रोदाहरणम् । पर्वतो वह्निमान् ह्रदत्वादिति । प्रतिज्ञार्थैकदेशे वह्नौ हेत्वर्थस्य ह्रदत्वज्ञानज्ञाप्यत्वस्य बाधात् । न च स्वरूपासिद्ध्यादिसाङ्कर्यम् । उपधेयसङ्करेऽपि उपाधेरसङ्करात् । न चासङ्कीर्णस्थलाभाव इति वाच्यम् । पर्वतो वह्निमान् धूमात् योयो धूमवान् स निरग्निरित्युदाहरणेऽसङ्करात् । एवमुपनयादावपि बोध्यम् ॥ ४ ॥

प्रतिज्ञासन्न्यासं लक्षयति ।

पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासन्न्यासः(२) ॥ ५ ॥

पक्षप्रतिषेधे स्वोक्तमतप्रतिषेधे । प्रतिज्ञातार्थस्यापनयनमपलाप इत्यर्थः । यथा शब्दोऽनित्य ऐन्द्रियकत्वादित्युक्ते सामान्यादौ हेतुरयं व्यभिचारीति परेण प्रत्युक्ते क एवमाह शब्दोऽनित्य इति ॥ ५ ॥

हेत्वन्तरं लक्षयति ।

अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम्(३) ॥ ६ ॥

---

(१) एतद्व्याख्यानावसरे यथाश्रुति तावत् सूत्रं व्याचष्टे वार्त्तिककार इत्युक्तं तात्पर्यटीकाकृद्भिः । सूत्रम् । प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोध इत्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

(२) सूत्रम् । पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासंन्यास इत्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

(३) हेतुसंन्यासस्य पूर्वेण सङ्ग्रहादस्य हेतुनिरूप्यत्वसङ्गत्या सूत्रम् । अविशेषोक्त इत्याद्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

अत्र हेतुपदं साधकपरम् । स च हेत्ववयवस्थ उदाहरणादिस्थो वा । अविशेषेणोक्ते कुत इति जिज्ञासानन्तरमेवोक्ते । अनन्तरं परेणासिद्ध्यादिना प्रतिसिद्धे विशेषमिच्छतस्तद्दूषणोद्धारेण गमकसाधनप्रयोगमिच्छतो यस्तत्रैव हेतौ विशेषणान्तरप्रक्षेपो हेत्वन्तरं वा द्वयमपि हेत्वन्तरम् । तत्राद्यं यथा शब्दोऽनित्यो बहिरिन्द्रियग्राह्यत्वादित्युक्ते परेण च तत्र सामान्यादौ व्यभिचारोद्भावने सामान्यवत्त्वे सतीति विशेषणम् । एवं विशिष्टहेतुप्रयोगानन्तरं यद्यद् बहिरिन्द्रियग्राह्यं तदनित्यमित्युदाहरणे न्यूनत्वेन वादिना प्रत्युक्ते तद्विशेषणप्रक्षेपेण वचनम् । एवमुपनयादावपि बोध्यम् । द्वितीयं यथा तत्रैवास्तु तर्हि कृतकत्वमेव हेतुरिति वचनम् । केचित्तु अविशेषोक्ते सामान्यधर्मपुरस्कारेणोक्ते विशेषमिच्छतो विशेषणान्तरदानमित्यर्थः । हेत्वन्तरप्रयोगे तु प्रतिज्ञाहानिरित्याहुः ॥ ६ ॥(१)

अर्थान्तरं लक्षयति ।

प्रकृतादर्थादप्रतिसम्बद्धार्थमर्थान्तरम्(२) **॥ ७ ॥**

प्रकृतात् विप्रतिपत्तिविषयात् जिज्ञासिताद्वार्थात् । असम्बद्धो भिन्नः तस्याभिधानमर्थान्तरमित्यर्थः । अथवा ल्यब्लोपे पञ्चमी । असम्बद्धोऽनुपयोगी । तथा च प्रकृता-

(१) अत्र न्यायसूचीनिबन्धे इति षड्भिः सूत्रैः प्रतिज्ञाहेत्वन्तरान्वितनिग्रहस्थानपञ्चकविशेषलक्षणप्रकरणमिति दृश्यते । विवरणकृता त्वस्मिन्नाह्निके प्रकरणोल्लेखो न कृतः ।

(२) सम्प्रति प्रकृतोपयोग्यर्थप्रतिपत्तिफलशून्यनिग्रहस्थानचतुष्कलक्षणप्रकरणम् । पूर्वापेक्षया हेतुहेतुमद्भावोऽवान्तरसङ्गतिः । अस्य प्रकृतोपयोगव्यतिरेकज्ञापकतया तद्व्युत्पादकपूर्वापेक्षत्वात् सूत्रम् । प्रकृतादर्थादप्रतिसम्बद्धार्थमर्थान्तरमित्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

र्थमुपेत्यानुपयुक्तार्थाभिधानमित्यर्थः । उभयथा प्रकृतानाकाङ्क्षिताभिधानमर्थान्तरमिति पर्यवसितम् । यथा शब्दोऽनित्यः कृतकत्वादित्युक्त्वा शब्दो गुणः स चाकाशस्येत्यादि ॥ ७ ॥

निरर्थकं लक्षयति ।

वर्णक्रमनिर्देशवन्निरर्थकम्(१) ॥ ८ ॥

वर्णक्रमेण निर्देशो गणचपेत्यादिप्रयोगस्तत्तुल्यं वचनम् । तुल्यता चावाचकत्वेन । अवाचकत्वं तु शक्त्या निरूढलक्षणया परिभाषया वा बोधतात्पर्येणानुच्चरितत्वम् । तथा च समयबन्धव्यतिरेकेणावाचकपदप्रयोगो निरर्थकं निग्रहस्थानमित्यर्थः । तेन मया अपभ्रंशेन शब्देन विचारणीयमितिसमयबन्धेनापभ्रंशप्रयोगे नातिव्याप्तिः । झटितिसंवरणे तु न दोष इत्युक्तप्रायम् । एतत्प्रयोगश्च प्रमादादिनेति बोध्यम् ॥ ८ ॥

अविज्ञातार्थं लक्षयति ।

परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम्(२) ॥ ९ ॥

वादिना त्रिरभिहितमपि मध्यस्थप्रतिवादिभ्यामविज्ञातार्थकमविज्ञातार्थमित्यर्थः । मध्यस्थप्रतिवादिनोरेकस्य बोधे तु नाविज्ञातार्थम् । त्रिरभिधानं चानवधाननिबन्धनाबोधनिरासाय । इत्थं चावहिताविकलव्युत्पन्नपरिषत्प्रतिवादिबोधानुकूलोपस्थित्यजनकवाचकपदप्रयो-

(१) अर्थनिरूप्यत्वसङ्गत्या सूत्रम् । वर्णक्रमनिर्देशवन्निरर्थकमित्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

(२) निरर्थकवचनस्यार्थनिरूप्यत्वात् अस्य च सार्थकत्वेन पूर्वव्यावृत्तेः सङ्गत्या सूत्रम् । परिषत्प्रतिवादिभ्यामित्यादि अन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

गोऽविज्ञातार्थम् । वाचकपदेनापार्थकनिरर्थकयोर्वारणम् । परस्य यथा बोधो न भवति तथा शब्दः प्रयोक्तव्यस्तथा कृते अज्ञानेन प्रत्युत्तरासामर्थ्येन परो निरस्तो भविष्यतीति मम जय इत्यभिसन्धानेनेदं प्रयुज्यते । न चैतत्प्रयोगे कथं निग्रह इति वाच्यम् । दुर्बोधशब्दाज्ञानस्य पराजयाप्रयोजकत्वात् । प्रसिद्धार्थप्रयोगे व्युत्थानसम्भवात् प्रसिद्धार्थपरित्यागेन दुरूहार्थप्रयोगस्य भङ्गभयनिबन्धनत्वाच्च । कथमन्यथा भङ्गकाले ऽतिदुरूहयत्किञ्चित्शब्दप्रयोगेणैव जयः स्यान्नैतन्न्याय्यमिति । इदं च त्रेधा सम्भवति असाधारणतन्त्रमात्रप्रसिद्धं यथा नैयायिकेन मीमांसकस्य विचारे तदुभयतन्त्रज्ञे च मध्यस्थे तदन्यतन्त्रसिद्धपरिभाषया तदेकतरेण प्रयुज्यते । उभयतन्त्रानभिज्ञस्य मध्यस्थत्वासम्भवादित्येकम् । अपरं च श्वेतो धावतीत्यादि श्लिष्टम् । तथा कश्यपतनयाधृतिहेतुरयं त्रिनयनतनयवाहनसमाननामधेयवान् तत्केतुमत्त्वादित्यादिकं यौगिकमनपेक्षितरूढिकं चेति दिक् । अतिद्रुतोच्चरितादिकमपीति भाष्यम् ॥ ९ ॥

अपार्थकं लक्षयति ।

पौर्वापर्यायोगादप्रतिसम्बद्धार्थमपार्थकम्[१] ॥ १० ॥

पौर्वापर्यं कार्यकारणभावः तस्यायोगादभावात् । तत्तदर्थबोधकतत्तत्पदघटिताकाङ्क्षाज्ञानादीनामित्यादि । अप्रतिसम्बद्धार्थमनन्वितार्थकमपार्थकमित्यर्थः । तथा चाभिमतवाक्यार्थानुकूलाकाङ्क्षादिशून्यवाचकपदघटितवाक्यमपार्थकमिति पर्यवसितम् । उदाहरणं तु निराकाङ्क्षनासन्नवाक्यमात्रम् । अयोग्यं तु प्रतिज्ञाविरोध इति ॥ १० ॥[२]

(१) अर्थनिरूप्याविज्ञातार्थनिरूपणानन्तरमर्थव्यतिरेकनिरूप्यापार्थकलक्षणमितिसङ्गत्या सूत्रम् । पौर्वापर्यायोगादित्यादि अन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

(२) अत्र न्यायसूचीनिबन्धे इति चतुर्भिः सूत्रैः प्रकृतोपयोगिवाक्यार्थप्रतिपत्तिफलशून्यनिग्रहस्थानचतुष्कप्रकरणमिति दृश्यते ।

अप्राप्तकालं लक्षयति ।

अवयवविपर्यासवचनमप्राप्तकालम्(१) ॥ ११ ॥

अवयवस्य कथैकदेशस्य विपर्यासः क्रमवैपरीत्यं तेन वचनमप्राप्तकालमित्यर्थः । यथा प्रतिज्ञाहेत्वादीनां क्रमस्तत्र प्रतिज्ञानन्तरमुदाहरणादिप्रयोगः । एवं वादिना साधनमुक्त्वा सामान्यतो हेत्वाभासा उद्धरणीया इत्येकः पादः । प्रतिवादिनस्तत्रोपालम्भो द्वितीयः पादः । प्रतिवादिनः स्वपक्षसाधनं तत्र हेत्वाभासोद्धरणं चेति तृतीयः पादः । ततो जयपराजयव्यवस्था चतुर्थः पाद इत्यादिक्रमस्तद्वैपरीत्येन कथनमिति ॥ ११ ॥

न्यूनं लक्षयति ।

हीनमन्यतमेनाप्यवयवेन न्यूनम्(२) ॥ १२ ॥

अवयवेन स्वशास्त्रसिद्धेन । तेन सौगतस्य द्व्यवयवमात्राभिधानेऽपि न न्यूनत्वम् । अवयवसामान्यहीनायाः कथाया असम्भवादाह । अन्यतमेनेति । यत्किञ्चिदवयवेनेति फलितार्थः । अपिकारादवयवैकदेशहीनत्वस्यापि लाभः । अथवा अन्यतमेनापीत्यनेन एकद्वित्र्याद्यवयवलाभेन यत्किञ्चिदवयवेन हीनमित्यर्थः । अवयवैकदेशस्यावयवत्वाभावादेव तद्धीनस्यावयवहीनत्वेन लाभात् । वस्तुतस्तु यत्किञ्चिदवयवशून्यावयवाभिधानत्वस्य लक्षणत्वे पर्वतो वह्निमानित्यादिपञ्चावयवप्रयोगेऽपि न्यूनत्वं

(१) अथ सिद्धान्तनिरूप्यनिग्रहस्थानत्रिकलक्षणप्रकरणम् । तत्रापि कथञ्चिदन्वयादपार्थकाद् भेदयितुं तदनन्तरसूत्रम् । अवयवविपर्यासोऽप्राप्तकालमित्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः । तत्र च अवयवविपर्यासोऽप्राप्तकालमिति पाठः ।

(२) पूर्वस्येवास्यापि अवयवनिरूप्यत्वसङ्गत्या सूत्रम् । हीनमन्यतमेनाप्यवयवेन न्यूनम् । अत्र सूत्रे अपिशब्दो वर्णमात्रानुस्वारन्यूनत्वस्यानुक्तस्य समुच्चयार्थ इत्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

च्छिन्नकालसंबन्धित्वं वस्तुनो ब्रूमः अन्यापेक्षया पूर्वापरयोरपि कालयोरेतदपेक्षया स्वकालत्वे विरोधाभावः क्षणेऽपि स्वीकार्य्यः यथा परमाणुद्वयापेक्षया पूर्वापरीभूतस्यापि तन्मध्यदेशस्य परमाण्वन्तरं प्रति स्वदेशतया न तस्य तत्संबन्धविरोधः, अन्यथा पूर्ववत् क्षणेऽपि क्षुण्णः तथाऽपि पूर्वापरकालयोस्तदुपाध्योर्वा विरुद्धयोस्तेजस्तमसोरिव कथमेकत्र समावेशः, अविरोधे तु यौगपद्यप्रसङ्ग इति चेन्न यौगपद्ये हि तयोर्विरोधः न त्वेकवस्तुसंबन्धे अन्यथैकज्ञानसंबन्धे ऽपि विरोधप्रसङ्गेन प्रत्यभिज्ञास्वरूप-स्यानुत्पत्तिप्रसङ्गात् । यदि पुनः कालयोः स्वरूपभे... ...स्यविरोधो विवक्षितः तर्हि रूपरसयोरिव्यादिभिः ।

प्रति... उपल... ...नेकसंबन्धकं न गृह्यते ॥
इदमित्थन्त्वयोः किंचिद्यदि केनापि भज्यते ।
इदं नास्तीति वाच्योऽपि भङ्गोऽन्यतरभङ्गतः ॥
विसंवादादिसाध्येषु विकल्पत्वादि हेतवः ।
व्याकुलाः पक्षहेत्वादिबाधाबाधविकल्पतः ॥
अतः सिद्धोऽयं तात्त्विकद्रव्याद्रव्यविभागः ।

क्षणभङ्गवाद-निराकरणम् तानि च द्रव्याणि स्थिराण्येव क्षणभङ्गे प्रमाणाभावात्, स हि प्रत्यक्षतोऽनुमानतो वा, नाद्यः

---

* अयमत्र निगूढार्थः संबन्धसंबन्धिभाव-धर्म-धर्मिभावनिराकरणार्थं प्रवृत्ता यद्यव्याहतवाचोभवेयुर्भवेयुरपि ते विजयिनः, न च ते तथा, धर्मधर्मिभावनिराकरणस्यापि धर्म्यङ्गीकारपुरस्सरतया धर्मिणो धर्माभावस्यापि च धर्मभूततया तत्सिद्ध्यसिद्धिभ्यामेव तस्य व्याघातात् । किं च भिन्नस्य धर्मत्वे घटोऽपि पटधर्मतामियात्, अभिन्नत्वे च धर्मधर्मिभावो नावकल्प्येत इत्यादिकमपि बौद्धस्य दुर्मनीषितमेव अनेनापि त्वदीयवाक्येन बुबोधयिषितार्थस्य संबन्धासंबन्धयोस्तव व्याहत्यवश्यम्भावात् ।

† यदि धर्मः स्वविशिष्टवृत्तिः स्यात् स्ववृत्तिः स्यात्, यदि धर्मधर्मिसंबन्ध एकत्र पर्याप्तवृत्तिः स्यादन्यत्र न स्यात् यद्युभयवृत्तिः स्यात्सांशः स्यादित्यादिकुतर्काणां प्रसञ्जकप्रसञ्जनीयव्याप्ति-प्रतितर्काप्रतिघात-प्रसञ्जनीयविपर्ययपर्यवसान-प्रसञ्जनीयानिष्ट-परपक्षासाधकत्वरूपतर्काङ्गपञ्चकान्यतमहानिविध्वंस्तरूपत्वाच्च तदुत्थानसम्भवा-नापीति भावः ।

यत् सत् तत् क्षणिकं यथा घटः सन्तश्चामी भावा इत्यपि न, भावशब्देन विश्वपक्षीकारे पक्षहेतुदृष्टान्तभेदासिद्धिः, घटव्यतिरिक्तपक्षीकारेऽपि घटस्य क्षणिकत्वासंप्रतिपत्तेर्दृष्टान्तत्वायोगः, विरुद्धधर्माध्यासस्य च परिहृतत्वात्। अत एव प्रदीपादिदृष्टान्तोऽपि प्रत्युक्तः तेषामपि त्रिचतुरक्षणस्थायित्वाभ्युपगमात् अस्तु तर्हि क्षणोपाधिर्दृष्टान्तः स हि न स्थिरः तथात्वे क्षणावच्छेदकत्वायोगादिति चेन्न स्थिरैरेव परस्परावच्छिन्नारम्भावसानैस्तणाकरणप्रवृत्तेः, परस्परावच्छेदश्च युगपद्विशिष्टबुद्धिविषमावेशः। [illegible]था दीर्घयोरेव मानदण्डयोर्विरुद्धदिक्प्रसृ-

ननु तावप्यंकुरयोः परस्परसंयोगावच्छिन्नांशेनाग्रीसंतानप्रतिनियतकालतयां तदुपपत्तेः तत्सामग्रीविषसंबन्धासंबन्धयोरपि चोद्यमपरिहार्य्यमिति चेन्न भिन्नकालभाविसामग्रीविशेषादेव परिहृतत्वात् तज्जातीयस्यैव बीजक्षणस्य समर्थबीजारम्भे त्वयाऽप्येतदपरिहार्य्यं तत्पूर्वक्षणस्वभावादित्यपि तत एव दत्तोत्तरम्। अन्यथाऽनुपलभ्यमानानन्तक्षणतत्स्वभावकल्पनागौरवप्रसङ्गात्, अन्वयव्यतिरेकवतामपि सहकारिणामकारणत्वे दुर्निर्वहमुपादानस्यापि कारणत्वम्। यदि च कालभेदभिन्नयोरेव करणाकरणयोः सहकारिसंनिध्यसंनिध्योर्वा वस्तुभेदकत्वं देशभेदभिन्नयोरपि करणाकरणयोः सामर्थ्यासामर्थ्ययोः सहकारिसंनिध्यसंनिध्योर्वा तयोर्भेदकत्वप्रसङ्गेन क्षणे ऽपि क्षुद्यमानेऽनवधिकभेदप्रसङ्गेन क्वचिदेकं न सिद्ध्येदिति शून्यवादप्रसङ्गः। देशभेदे स्वसंनिध्यसंनिधिभ्यामेव तदुपपत्तिरिति चेन्न, तयोरपि तद्वदेव विरुद्धयोर्भेदकत्वप्रसङ्गात्, परस्परविरुद्धपूर्वापरकालसंबन्ध एवैकस्य कथमिति चेन्न स्वापेक्षया पूर्वापरत्वस्यासिद्धेः, न हि स्वप्रागभावप्रध्वंसाव-

यमानमेव वस्तु तेन ग्रस्यत इति तत्र ध्रुवभावित्व-शब्देन तत्समकालभावित्व-तदनन्तरभावित्वनियमतन्मात्रजन्यत्वतदेकसामग्रीजन्यत्वाहेतुकत्वाद्यर्थविवक्षायां यथायथमसिद्धिव्याघातसाध्याविशेषादिदोषादेष्यत्वनियममात्रमवशिष्यते, तच्च भवतामपि विसभागसन्तानारम्भककपालक्षणतदविनाभूतप्रतिसंख्यानिरोधादिना ऽनैकान्तिकमिति, अन्यथा सर्वेषामप्युत्तरक्षणानामेष्यत्वाविशेषात् प्रथमक्षण एव सर्वक्षणोत्पत्तौ विश्वविनिवृत्तिप्रसङ्गः आस्थानिवृत्त्यर्थं क्षणिकत्वमुपदेष्टव्यमिति चेत् अहोमहाधार्मिकस्यानलीकवादिनो महा[illegible]र्दन तादाप्रसज्येत सूक्ष्मधियस्तत्रैवास्थानिवृत्तिप्रसङ्[illegible]नेकवस्तुसंबन्धं त्यताम्[illegible]पते[illegible]पि च [illegible]सिद्धेः [illegible]ः क्वचिदपि नास्तीति वाच्यम् क्षणिकनिर्धर्मकपरमाणावपि पुञ्जदशायामनेकनैरन्तर्यादेरभ्युपेतत्वादिति। एतेन वर्तमानत्वप्रत्ययात् क्षणभङ्गसिद्धिरिति वदन्तोऽपि निरस्ताः, न हि तेन पूर्वापरकालसंबन्धाभावोगृह्यते, न चाक्षिप्यते तद्विरोध्यवर्त्तमानत्वमात्रनिषेधात्, तस्य च तदानीं प्रागभावप्रध्वंसाभावनिषेधात्मकत्वेन पूर्वापरकालसंबन्धाविरोधित्वात् प्रत्यक्षेणेन्द्रियसंबन्धक्षणो गृहीतः क्षणान्तरं तु तस्य कुतः सिद्धमिति चेन्न प्रत्यभिज्ञानस्य तदबाधस्य चोक्तत्वात् प्रत्यभिज्ञात्वादेव दीपप्रत्यभिज्ञा[illegible] सर्वापि प्रत्यभिज्ञा भ्रान्तिरिति चेत् पूर्वोक्तेनैव सोपाधिकत्वात्, एतदनुमानमात्रबाध्यत्वे प्रत्ययत्वादेव सर्वः प्रत्ययो भ्रान्तिरिति माध्यमिकमतसमुत्थानस्य दुष्परिहरत्वात् क्षणभङ्गपक्षे भ्रान्तिरूपाऽपि प्रत्यभिज्ञास्मृतिमात्रमपि नोपपद्यते इत्यात्मनि वक्ष्यामः। ततश्च व्याप्तिप्रतिसन्धानाद्यनुपपत्तेरनुमानमात्रमेव निर्मूलमिति कुतः क्षणभङ्गानुमानम्।

जडाया अपि मतेः पराक्त्वं सिद्धम् । यत्तु नीतिमालायां नारायणार्यैरुक्तं ज्ञानस्य तु पराक्त्वाभावमात्रमेव न तु प्रत्यक्त्वमिति एतदपि पूर्वपक्षप्रोक्तदृग्विषयत्वमात्राधीनसिद्धित्वरूपेदन्त्वाभावाभ्युगमादिति मन्तव्यम् । एवं हि तत्र पूर्वपक्षितं तस्य नीलादिवदिदमित्यनवभासात् पराक्त्वाभावेन प्रत्यक्त्वं च विद्यत इति । तत्र रजोगुणकत्वतमोगुणकत्वमहदाद्यवस्थार्हत्वानि त्रिगुणलक्षणानि अध्यक्षादिभिर्यथासम्भवं नानावस्थस्य तस्य सिद्धेः तच्चाधःप्रभृतिदेशेष्वनन्तम् ऊर्ध्वं हि भोगविभूत्यवच्छिन्नं नित्ययतया सि[illegible]सःपरत्वश्रुतेः त्रिगुणस्य च तदनन्तमसंख्यम्च तयोर्मध्ये किञ्चि[illegible]वचनात् तच्च विचित्रसृष्ट्या विरुद्धदिक्प्रसृ[illegible]प्रकृतिः स्वपरसंयोगावच्छिन्नांशेनाल्पतरदेशावच्छेदः कर्तुं श[illegible]। एवं कालेऽपीति न कोऽपि दोषः । माभूदन्वयः यदक्षणिकं तदसत् यथा शशविषाणमिति व्यतिरेकः स्यात्, न स्यात् त्वदभिमतक्षणिकत्वासिद्धेरेव तन्निरूपिताक्षणिकत्वासिद्धेस्तस्य व्याप्यत्वग्रहणायोगात् । चिरकालस्थायित्वविवक्षायां तु निःस्वभावे शशशृङ्गे तदयोगः । अथ शशशृङ्गाभावो दृष्टान्तः स तर्हि सन्नेव प्रामाणिकत्वात् भावेतरत्वलक्षणमसत्त्वमस्तीति चेन्न भावान्तराभाववादे तस्याप्यसिद्धेः अन्यत्राप्यभावस्येव भावस्यापि सुवचत्वात् प्रत्यक्षत्वादिविरोधपरिहारकॢप्तेश्चाविशिष्टत्वादिति ।

केचित्तु नित्यमपि किञ्चित्तत्वं बुद्धोपदिष्टमिति सत्त्वाख्यसाधनमागमबाधितं कृत्वा ध्रुवभावित्वमेव हेतुमभिमन्यन्ते तथा हि यद् ध्रुवभावि न तद्धेतुसापेक्षम् अन्यथा ध्रुवभावित्वविरोधात् अतः कार्याणां ध्रुवभाविनः प्रध्वंसस्याहेतुकत्वसिद्धेर्विलम्बायोगादुदी-

१४

मेव सतामेकत्वमेकोपाधिसंबन्धायत्तमिति न प्रथमः, व्याघातात् अन्यथा भेदाभेदवादाय कथं कुप्येत्, न द्वितीयः अवयव्यङ्गीकारप्रसङ्गात् तदभ्युपगमेऽपि तस्मादेकस्माज्जगदुत्पत्त्यभावात् तदंशा एव हि ततो भिन्ना बहुधा परिणमन्ति ततोवरमनारूढनिरर्थकैकद्रव्यैः परमाणुभिरेव जगद्द्रव्यारम्भः अत एव न तृतीयः पृथक्पृथगारम्भकत्वे समुदायनिर्देशस्य निरर्थकत्वात् वास्तविकस्य चैकत्वस्य वनादिष्वप्यसंभात् औपाधिकैक्यव्यपदेशस्य च वैशेषिकाद्यभिमतानन्तपरमाणूपादानवादेऽप्यविशेषात्, अन्यच [illegible]धा परिणमतीति कल्पना विवर्तवाद[illegible]यमधर्मः प्रसज्येत सूक्ष्मधिय[illegible] च विश्वानित्यतामात्रोपदेशादपि च [illegible], अन्यथा शून्योपदेशस्यैवावश्यकर्तव्यत्वप्रसङ्गादिति । प्रत्यनुमानानि च विगीता प्रत्यभिज्ञा स्वविषये प्रमा अबाधितबुद्धित्वात् स्वलक्षणबुद्धिवत्, सा हि स्वविषये प्रमैवास्माकं, वैभाषिकस्यापि यत्सन्न तत्क्षणिकं यथा संप्रतिपन्नं नित्यं, सन्तश्चामी भावा इति यत्प्रतीयते तदक्षणिकं यथा शशशृङ्गमिति भवद्व्यवहारेणापि प्रसज्यते, प्रध्वंसः सहेतुकः पूर्वावधिमत्त्वात् पटवदित्यादीनि च स्वयमुन्नेयानि एवं द्रव्यस्य स्थिरत्वं सिद्धं तच्च ।

द्रव्यविभागः । द्वेधा जडाजडतया प्रत्यक्तदितरतयाऽपि वा द्रव्यम् ।
षोढा त्रिगुणानेहोजीवेश्वरभोगभूति–मतिभेदात् ॥
धीकालभोगभूतीरविवक्षित्वा गुणादिरूपत्वात् ।
देहात्मेशविभागार्थं त्रेधा तत्त्वं विविच्यते केचित् ॥

परत एव भासमानं जडं तदन्यदजडं, स्वस्मै भासमानं प्रत्यक् परस्मै भासमानं परागिति व्यवहरन्ति तेना-

श्यमान एव संयोगो निरवयवेऽपि परमाणौ परममहति वा वस्तुनि स्वाभावसामानाधिकरण्यमनुभवन् स्वाभावाभावात्मकस्वानुबन्धेन यथोपलम्भप्रतिनियतदेशभेदधियमुपदधातीति प्रमाणबलादभ्युपगन्तव्यम् । एवमिहापि निरवयवेऽपि त्रिगुणे परमेश्वरसंकल्पविशेषपर्य्यवसितैः सामग्रीभेदैः स्वाभाविकसंविभक्ताश्रयाः प्रतिनियतप्रदेशाः परिणतिभेदाः प्रादुःषन्तीति, तत्र स्पर्शादिलक्षणप्रादेशिकपरिणतिदशायां छेदनभेदनपरिस्पन्दनादीनामपि सिद्धिरिति किं नोपपद्यते, स्पन्दस्पर्शादिभेदाश्रयांशानामपि भेविभूतस्तु दास्ते [illegible] विलक्षणधर्माः यथा निर्भिदाकाशवादे प्रदेशानां संयोगविशेषास्तीव्रतरशब्दादिधर्मा एव वा भेदाः तद्वदत्रापि । नन्वेवमप्यनतिलङ्घनीयैव भेदाभेदवागुरेति चेन्न ईदृशभेदाभेदप्रसङ्गस्य वैनाशिकमतेऽप्यविवादात् अविरोधाच्च, तस्य चातत्त्ववादे हि विरोधं ब्रूमः न पुनस्तथाभूतस्यातथापरिणामे अवस्थारूपयोरेकत्वबहुत्वयोः कालभेदेन परिहारात् तथा च भाष्यम्--कपालत्वचूर्णत्वपिण्डत्वावस्थाप्रहाणेन घटत्वावस्थावदेकत्वावस्थाप्रहाणेन बहुत्वावस्था तत्प्रहाणेनैकत्वावस्थेति न कश्चिद्विरोध इति, भवत्ववस्थारूपस्यैकत्वस्य पूर्वापरभाविना बहुत्वेनाविरोधः तद्द्रव्यस्वरूपैक्येन तु विरोधः स्यात्, न स्यात् तद्द्रव्यस्य ह्यतद्द्रव्यत्वं विरुद्धं न तु तस्यैव सतोऽनेकधर्मयोगोपाधिकं बहुत्वं, स्मरति च भगवान् पराशरः ।

परमात्मात्मनोर्योगः परमार्थ इतीष्यते ।
मिथ्यैतदन्यद्द्रव्यं हि नैति तद्द्रव्यतां यतः ॥ इति,

अस्तु वा स्वतःसांशत्वं पिण्डवदव्यक्तस्य तथापि पिण्डवदेव न भेदाभेदावयविवादप्रसङ्गः । नन्वेवं यथांशं

स्वकार्य्यारम्भकत्वे किमेकीभावावस्थाकल्पनेनेति चेन्न यदि वयं कापिलवत् कल्पयेमहि तदैवमुपालभ्येमहि कारणश्रुतिसमधिगता ह्येकत्वावस्था न कल्पनागौरवानुयोगविषयः, न च नैरर्थक्यं श्रुतिबाधपरिहाराय प्रयोजनकल्पनोपपत्तेः, न चैकत्वमौपाधिकत्वादवास्तविकं संपिण्डितानामेकारम्भादेकत्वारम्भस्यैव लघुत्वात् अवयविभङ्गे चैतत् स्थापयिष्यामः। न चैवमपि पराभिमतपरमाणुपुञ्जमात्रत्वमाशङ्कनीयं गन्धरसरूपस्पर्शादिरहितपरस्पराप्रतिघातकसत्त्वरजस्तमोरूपगुणत्रयाश्रयपरस्परसुश्लिष्टपञ्चभूतसूक्ष्मद्रव्यरूपत्वेन श्रुत्यादिसिद्धे पराभिमतपरमाणुस्वभावगन्धाभावेनार्थान्तरत्वसिद्धेः।

यत्त्वौपाधिकभेदाभेदवादिनं प्रति भाष्ये ब्रह्मण उपाधिसंसर्गादपि छेदनाद्यनुपपत्तिकथनं तद् ब्रह्मस्वरूपस्य निष्कलत्वाच्छेद्यत्वादिवचनबलमवलम्ब्य अन्यथा ब्रह्मस्वरूप एव सविकारत्वापत्तौ निर्विकारत्वश्रुतेरनवकाशत्वप्रसङ्गात् तत्र सर्वज्ञत्वात् सर्वांशगतसुखदुःखादिप्रतिसंधानप्रसङ्गोद्दुष्परिहरः, इह त्वंशभेदप्रतिनियतविकारेषु न स्वभावसङ्कर इति, एतेन परमाणुकारणवादो निरस्तः---जालालोकविलोकनीयत्रसरेणुशब्दवाच्यद्रव्यातिरिक्ताप्रत्यक्षाणुकल्पने प्रमाणाभावात् तेष्वेव मात्रया भेदमवलम्ब्य परमाणुद्व्यणुकत्र्यणुकादिव्यपदेशः प्रमाणग्रन्थेषु तेषामेव रूपाद्यनुद्भवदशायां गृह्यमाणगन्धाश्रयगन्धवाहानीतसूक्ष्मद्रव्यवदचाक्षुषत्वादिसम्भवात्, परमाणोरप्रत्यक्षत्वव्यवहारः क्वचित् कृतोऽपि न विरुध्यते। न च पवनानीतगन्धाश्रयद्रव्येषु परमाणुत्वं भवतामपीष्टं परमाणूनां प्रत्यक्षगुणाश्रयत्वानभ्युपगमात्, अतः प्रत्यक्षादागमाद्वा न भवदभिमतपरमाणुसिद्धिः। अनुमानानि तु

पश्यामः अणुपरिणतारतम्यं क्वचिद् विश्रान्तं परिमाणतारतम्यरूपत्वात् महत्परिमाणतारतम्यवदिति चेन्न तारतम्यरूपत्वादित्येतावतापि व्यभिचाराभावेन परिमाणविशेषणस्य व्यर्थत्वात् पारिमाण्डल्यविवक्षयाऽणुशब्दप्रयोगेऽन्योन्याश्रयणात् महत्त्वापकर्षतारतम्यस्य त्रसरेणावेव पर्य्यवसितत्वाभ्युपगमात्, सामान्यतः परिमाणापकर्षतारतम्यविवक्षया प्रयोगेऽपि तद्विश्रान्तेरपि दृश्यमान एवोपपत्तेः। एवमवयवापकर्षतारतम्यविश्रान्तेरपि, अस्तु वा त[illegible]श्रान्तिः तथाऽप्याधिक्यन्यूनताभ्याम् प्रमाणसिद्धाभ्यां सर्षपमे[illegible]धरादिपरिमाणाविशेषप्रसङ्गः परिहृतः, अनन्तत्वाविशेषेऽपि प[illegible]परजातीयेषु [illegible]दिवसप[illegible]संवत्सरचतुर्युगकल्पादिषु चाधिक्यन्यूनतयोर्भवद्भिरप्यभ्युपगतत्वात्। विप्रतिपन्नं कार्य्यद्रव्यारब्धं महत्त्वे सति चाक्षुषत्वात् चाक्षुषद्रव्यत्वात् इत्यादीनां विपक्षे बाधकाभावादप्रयोजकत्वं द्रव्यचाक्षुषताप्रकर्षो महत्त्वावयवसंख्याप्रकर्षानुविधायी दृष्टस्तद्धेतुक एव, अत स्तदभावे चाक्षुषत्वं न स्यादिति चेन्न यथोपलम्भं योग्यतास्वीकारात्, अन्यथा महावयवारब्धत्वस्यापि व्याप्तावनुप्रवेशप्रसङ्गात्, लाघवं चास्मन्मते वायवीयतैजसाप्यपार्थिवत्रसरेण्वादेरपि पूर्वपूर्वभूतात्मककार्य्यद्रव्यारब्धत्वादस्मन्मतेन सिद्धसाधनत्वं च कार्य्यावयवित्वसाधनेऽपि चाक्षुषतयाऽस्मदुपगतेन कालेनानैकान्त्यं दुष्परिहरं परिदृश्यमानमेव परमाणुमिच्छतां महत्त्वविशेषणमसिद्धं च, चाक्षुषद्रव्यत्वादेव महत्त्वसाधनमपि पूर्ववद् दूष्यम्। पृथिवीत्वं नित्यसमवेतवृत्ति घटपटजातित्वात् सत्तावदित्यादिकुटिलानुमानान्यपि पूर्ववद् विपक्षे बाधकाभावात् विषयनियमराहित्येनातिप्र-

सञ्ज्ञकत्वात्, पृथिवीत्वं नित्यवृत्ति न भवति पृथिवीमात्रजातित्वात् घटत्ववदित्यादिभिस्तादृशैरनुमानैः प्रतिपन्नयितुं शक्यत्वात्, अभिमतविशेषपर्यवसानासिद्धेश्च निरूपका नानुमानेषु गणयन्ति । घटादीनां सर्वेषां नित्येश्वराश्रितत्वाभ्युपगमात् अतिरिक्तसमवायानभ्युपगमाच्च, सिद्धसाधनत्वं च नित्यवृत्तीति साधनेऽपि घटादिरूपेण परिणतस्यापि त्रिगुणद्रव्यस्य स्वरूपतो नित्यत्वाभ्युपगमात् स एव दोषः । एवमारम्भकाणामणूनां कृत्स्नैकदेशसंयोगविकल्पेनाधिकपरिमाणद्रव्यानारम्भकत्वसभागत्वादिचोद्यं परमाणुदूषकैः सर्वैरपि क्रियते, भाष्यकारैश्च महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् । इत्यस्मिन्नधिकरणे तदेव चोद्यं कृतं तदेतन्माध्यमिकानामेवोपपद्यते न त्वन्येषां तथा हि सौत्रान्तिकाद्यैरपि पुञ्जदशायां परमाणूनां संयोगानभ्युपगमेऽपि परस्परमावृतत्वानावृतत्वादिकं दिगवच्छेदभेदेन स्वीकार्यं ज्ञानमात्रवादिनोऽपि ज्ञानस्यैकस्यानेकज्ञेयाकारसंबन्धे कृत्स्नैकदेशविकल्पस्तदवस्थ एव । ज्ञेयमिथ्यात्वं तु न तत्परिहारः मिथ्याभूतेऽप्युल्लेखावश्यं भावात् ।

यस्तु प्रत्यक्षाण्येव सूक्ष्मद्रव्याणि निर्भागाण्यभ्युपगच्छति तस्यापि विभूनां निरवयवानां संयोगे तदेव चोद्यं स्थितं, यस्तु विभुद्रव्यमपि नैच्छत् तस्यापि सामान्ये स्यात् तस्याप्यनभ्युपगमे संयोगसमवायादावनेकनिष्ठे स्यात् न हि द्रव्य एवेदं चोद्यमिति नियमोऽस्ति; द्रव्याणामेव भागवत्त्वयोग्यतेति चेत् तर्ह्यणुविभुव्यतिरिक्तद्रव्याणामित्यपि ग्राह्यं सत्यं, कथं तर्हि भाष्यं दृश्यमानातिरिक्तकल्पनाभिप्रायं निर्भागतयोपलभ्यमानस्यापि यः सावयवतां कल्पयति तस्य सर्वं द्रव्यं द्रव्यारम्भकमवयवतः संयुज्यैवारभते

दिगवच्छेदभेदोऽप्यवयवत एवेति व्याप्तिः स्यात्, ततः पराभिमतप्रतिष्ठितासिद्धिरिति प्रत्यक्षागमसिद्धाएवेश्वरादिषु यथा प्रमाणमङ्गीकार्यम् अत एव कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वेति सूत्रे श्रुतेस्तु शब्दमूलत्वादित्यादि च परिहारसूत्रम्। अस्तु तर्हि प्रत्यक्षसिद्धैरेव सूक्ष्मद्रव्यैर्जगदारम्भः, मैवं स्वतन्त्रारम्भे शास्त्रविरोधात् परतन्त्रारम्भाभ्युपगमे यथागमं प्रकृतेरपि स्वीकार्यत्वात् भूतचतुष्टयपूर्वभाविनश्च प्रपञ्चस्य तदारम्भणीयत्वविरोधात् महाभूतचतुष्टयसूक्ष्मावयवानामाकाशशब्देनाभिधानमिति भाष्यं भूतानामन्योन्योपादानोपादेयत्वविशिष्टसृष्टिक्रमप्रक्रियाविरोधश्च । भूतचतुष्टयातिरिक्तं नास्ति चेन्न आगमविरोधात् तथा त्रसरेणूनामेव गन्धादिरहितावस्थाऽस्त्विति स्वीकारे तद्वदविभागापत्तिः स्वीकार्य्येति सैव मूलप्रकृतिरिति सिद्धं, सा च समत्रैगुण्या मूलप्रकृतिः तस्यामपि मात्रया भेदमवलम्ब्याव्यक्ताक्षरविभक्ताविभक्ततमोरूपावस्थाचतुष्टयमामनन्ति। उक्तं च न्यायसुदर्शने वरदभट्टारकैः द्विविधाः स्मृतिकाराः केचिदव्यक्तकारणवादिनः केचित् त*मः कारणवादिनः अव्यक्तस्यैव सूक्ष्मावस्थाभेदोऽक्षरं तमश्च नातीव भेद इत्यव्यक्ते पर्यवस्यतामभिप्रायः तमपि भेदमुररीकृत्य तमसि पर्यवस्यतां तस्मादुभयेषामविरोध इति । यत्तु भाष्यादिष्वव्यक्तसहपठिताक्षरशब्दस्य चेतनविषयतया बहुश उपादानं तत्परव्याख्यानमनुरुद्ध्य वा स्वरूपतो निर्विकारे जीवे स्त्रज्यत्ववचनाच्चिद्रूपविकारवत्त्वेऽपि यथाक्षरशब्दप्रवृत्तिः तथा परब्रह्मेतरविषयस्याक्षरशब्दस्याचिदवस्थाविशेषेऽपि शक्तिकल्पनोपपद्यत इति प्रतिपादयितुं

* अतः कृक्रमीति पाणिनीयेन तमस्कारणवादिन इति सूचितम् ।

वा क्वचित् त्तरे प्रकृतिविशेषे अक्षरशब्दप्रयोगस्य मुख्यत्वा-
योगात् परब्रह्मरूपाक्षरसंबन्धेन लक्षणायां प्रयोजनाभावात्
जीवसंबन्धेनाजहल्लक्षणायां लयविशेषादिप्रतिपादनौचि-
त्यात्, उभावेतौ लीयेते परमात्मनि इत्यादिना द्वयोरपि
लयाभिधानाच्चात्राजहल्लक्षणैव युक्तेत्यभिप्रायेण वेति न क-
श्चिद्विरोध इति। अव्यक्ताहङ्कारावस्थाव्यवहितोत्तरपूर्वा-
वस्थाविशिष्टं त्रिगुणं महान् तच्छब्दवाच्यत्वमेव वा तल्ल-
क्षणम्। एवमहंकारादिष्वपि भाव्यम् अध्यवसायरूपवृत्ति-
र्महानिति सांख्याः यथाहुः अध्यवसायोबुद्धिरिति [illegible]दसत्
अध्यवसायस्यात्मधर्मत्वात्, यदि परं तन्नि[illegible]मित्तत्वमात्रं
महतः तावतैव बुद्ध्यध्यवसायादिप्र[illegible]योगविषयत्वं, न च
तन्निमित्तत्वमात्रं लक्षणम[illegible]
[illegible]तिव्याप्तेः, अवान्तरविशेषस्या-
प्यनवधारण[illegible]वधारयतां तु तदपि लक्षणम्। एवं धर्मा-
धर्मादिकरणत्वादिकमपि लक्षणं निरसनीयं, स त्रिधा सा-
त्त्विकोराजसस्तामसश्चेति, तत्र तत्तद्गुणोन्मेषवशादंशभे-
दात्तत्तद्व्यपदेशः, इन्द्रियाव्यवहितपूर्वावस्थाविशिष्टं त्रिगु-
णमहङ्कारः। अत्रापि पूर्ववदभिमानोऽहङ्कार इति सांख्य-
लक्षणं दूषणीयं, स चानात्मनि देहेऽहंभावकरणहेतुत्वमा-
त्रादहङ्कारशब्दवाच्यः न त्वहमर्थत्त्वात्प्रतीच आत्मन एव
तत्त्वान्न चैवं त्याज्यत्ववचनविरोधः। अहङ्कारस्योत्कृष्ट-
जनावमानहेतोर्गर्वापरपर्य्यायस्याभिमानस्य तथोक्तेः।
सोऽपि पूर्ववत्त्रिविधः। तत्र सात्त्विकादिन्द्रियाणि ताम-
साच्छब्दतन्मात्रं, राजस उभयानुग्राहकः। राजसता-
मसयोरपीन्द्रियाव्यवहितपूर्वभावित्वमात्रं सिद्धमिति
नाव्याप्तिः। त्रयाणाम्प्रत्येकंप्रत्येकलक्षणमपि यथास्वं
कार्य्यकारणप्रकाराः। यत्तूक्तं भोजराजेन।

स्यात्त्रिविधोऽहङ्कारोजीवनसंरम्भगर्वरूपोऽयम् ।
सम्भेदादस्य सतो विषयो व्यवहार्य्यतामेति ॥
सात्त्विकराजसतामससम्भेदात्सञ्जायते पुनस्त्रेधा ।
स च तैजसवैकारिकभूतादिकनामभिःसमुच्छ्वसिति ॥
तैजसतस्तत्र मनोवैकारिकतोभवन्ति चाक्षाणि ।
भूतादेस्तन्मात्राण्येषां सर्गोऽयमेतस्मात् ॥

इति, विरुद्धांशोवाह्यशैवागममूलत्वेनानादरणीयः ।
एवम्भगवत्पराशराद्युक्तप्रमाणतमपुराणाद्यानुगुण्येन पुरा-
लत्वनि[illegible]वचनादीनि निर्वाह्याणि, अत्यन्तविरुद्धानि त्व-

[illegible]ध्यन्यत्वे सति हृत्कण्ठचक्षुरादिशरीरप्रदे-
ग्रहो वाद इति लक्षणे[illegible]था तत्तत्कार्यविशेषशक्तमिन्द्रि-
ऽपसिद्धान्तेन निग्राह्य इति सूचितम् । [illegible]कारकं तदि-
मर्थनं परपक्षदूषणं तत्समर्थनं शब्ददोषवर्जनं चेति पञ्चा-
वयवास्तदुपपादकाः । अन्यथाङ्गवैकल्यात् कथाभासत्वप्र-
सङ्ग इति भावः । इति वादपदार्थः ॥ ७७ ॥ ८८ ॥

अथोत्तरश्लोके स इति सर्वनाम्ना पुनर्वादोपादानात्
तस्यैव लक्षणान्तराभिधानमिति मन्दभ्रमनिरासार्थमाह ।
जल्पवितण्डे इति ।

ननु स इति पूर्वोक्तलक्षणं वादं परामृश्य पुनस्त-
स्यैव तद्विरुद्धधर्माभिधाने व्याघातः स्यादित्याशङ्क्याह ।
स इतीति । विशेषणप्रयोजनमाह । छलादीति । अस्त्येव
वादाद् भेदो जल्पस्य वितण्डायास्तु कथं भेद इति शङ्कां
निरस्य लक्षणं निष्कृष्याह । ततश्चेति । स्वपरेत्यादिविशे-

(१) सम्भेदो–पा· C पु· ।
(२) तत्त्वाध्यवसाय–पा· C पु· ।

तत्त्वावसाय[1]फलत्वादस्यां वीतरागाणामेव शिष्याचार्यसब्रह्मचारिणामधिकारः[2] न च विजिगीषूणामित्युक्तं वीतरागकथेति । तदुक्तम् । तं शिष्यगुरुसब्रह्मचारिशिष्टश्रेयोर्थिभिरनसूयुभिरभ्युपेयादिति । अज्ञातज्ञापनं ज्ञातस्य स्थिरीकरणं संशयनिवर्तनमिति त्रिविधस्तत्त्वनिर्णयः । अत्र निग्रहस्थानमुत्तरत्र[3] दर्शयिष्यति । तदुक्तम् । प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिप[illegible]साधग्रहो वाद इति ॥ ७७ ॥ ८८ ॥

[illegible]जयी अपि तु

नन्वेवं लक्षणे [illegible] वाञ्छितपरप्रहारस्तमप्रहरमाण इव वीरः । स्वसाधनासिद्धौ परदूषणमात्रेणापि

षणाद्वितण्डातो भेद इत्यर्थः । अत्रापि विजिगीषुपदमधिकारिनिरूपणार्थम् । अत्रोदयनसम्मतिमाह । विजिगीषमाणयोरिति । विजिगीषमाणाधिकारत्वाच्छलादिसम्भेदो लभ्यते तेन वादाद् भेदः । शेषेण क्रमाद् वितण्डाकथाभासाभ्यां भेदः । ननु विजिगीषवोरपि वादवत् तत्राभिमानिकोऽपि प्रमाणतर्कव्यवहारः किं नेष्ट इत्याशङ्क्याह । तत्रेति । यथा कथञ्चित् परभञ्जनैकतत्पराणां किं तया चिन्तयेति भावः । अवष्टम्भो बलात्कारः । एकपक्षसत्त्वस्वपरपक्षसाधनोपालम्भयोर्द्वयोरपि यः कर्ता स एव जेता नान्यतरकारी किं त्वभावाद् भावोऽतिरिच्यत इति न्यायादुभयभ्रष्टाद् वरमिति श्लाघते केवलमिति सदृष्टान्तमाचष्टे । तस्यां चेत्यादि । जलपलक्षणे सूत्रसम्मति-

जल्पवितण्डे दर्शयति।

स च छलादिसम्भिन्नो[1] जल्पोऽस्य विजयः फलम् ॥ ७८ ॥

जल्प एव वितण्डा स्यात् प्रतिपक्षे त्वसाधने।

स इति तच्छब्देन प्रमाणतर्कनियमाभिधानं तत्त्वावसाय[2]लक्षणं फलं च परिहायोक्तलक्षणो वादः परामृश्यते। छलादिप्रयोगाभ्यनुज्ञानाद्विजयफलत्वनिर्देशाच्च ततो भिद्यते। ततश्च प्रमाणतर्काभ्यां

ग्रहो वाद इति लक्षण[illegible]। सिद्धान्ताविरुद्ध इत्यनेन तद्विरोधे [illegible]पक्षसाधनं तत्स-ऽपसिद्धान्तेन निग्राह्य इति सूचितम्। स्व[illegible]पकारक तादे-मर्थनं परपक्षदूषणं तत्समर्थनं शब्ददोषवर्जनं चेति पञ्चावयवास्तदुपपादकाः। अन्यथाङ्गवैकल्यात् कथाभासत्वप्रसङ्ग इति भावः। इति वादपदार्थः ॥ ७७ ॥ ऽऽ ॥

अथोत्तरश्लोके स इति सर्वनाम्ना पुनर्वादोपादानात् तस्यैव लक्षणान्तराभिधानमिति मन्दभ्रमनिरासार्थमाह। जल्पवितण्डे इति।

ननु स इति पूर्वोक्तलक्षणं वादं परामृश्य पुनस्तस्यैव तद्विरुद्धधर्माभिधाने व्याघातः स्यादित्याशङ्क्याह। स इतीति। विशेषणप्रयोजनमाह। छलादीति। अस्त्येव वादाद् भेदो जल्पस्य वितण्डायास्तु कथं भेद इति शङ्कां निरस्य लक्षणं निष्कृष्याह। ततश्चेति। स्वपरेत्यादिविशे-

(१) सम्भेदो–पा॰ C पु॰।

(२) तत्त्वाध्यवसाय–पा॰ C पु॰।

छलादिभिश्च स्वपरपक्षसाधनोपालम्भवती विजिगीषुकथा जल्पः । विजिगीषमाणयोरुभयोरपि साधनोपालम्भवती कथा जल्प इत्याचार्याः । तत्र हि मत्सरादिना विजिगीषया वा कथाप्रवृत्तेः । सदुत्तरापरिस्फूर्तौ छलादिप्रयोगेणापि प्रतिवादी पर्याकुलितमानसोऽप्रतिभो ऽसदुत्तरवादी वा भवेदितीतरस्यावष्टम्भे विजयसम्भवात् प्रमाणतर्काभ्यामेव व्यवहार इत्यभिमानोऽपि न विवक्षितः । तस्यां च कथायां परपक्षसाधनानुपालम्भे तु न स्वपक्षस्थितिमात्रेण विजयी अपि तु केवलं श्लाघ्य एव स्यात् । वञ्चितपरप्रहारस्तमप्रहरमाण इव वीरः । स्वसाधनासिद्धौ परदूषणमात्रेणापि

षणाद्वितण्डातो भेद इत्यर्थः । अत्रापि विजिगीषुपदमधिकारिनिरूपणार्थम् । अत्रोदयनसम्मतिमाह । विजिगीषमाणयोरिति । विजिगीषमाणाधिकारत्वाच्छलादिसम्भेदो लभ्यते तेन वादाद् भेदः । शेषेण क्रमाद् वितण्डाकथाभासाभ्यां भेदः । ननु विजिगीषवोरपि वादवत् तत्राभिमानिकोऽपि प्रमाणतर्कव्यवहारः किं नेष्ट इत्याशङ्क्याह । तत्रेति । यथा कथञ्चित् परभञ्जनैकतत्पराणां किं तया चिन्तयेति भावः । अवष्टम्भो बलात्कारः । एकपक्षसत्त्वस्वपरपक्षसाधनोपालम्भयोर्द्वयोरपि यः कर्ता स एव जेता नान्यतरकारी किं त्वभावाद् भावोऽतिरिच्यत इति न्यायादुभयभ्रष्टाद् वरमिति श्लाघते केवलमिति सदृष्टान्तमाचष्टे । तस्यां चेत्यादि । जलपलक्षणे सूत्रसम्मति-

तथा यथा आत्मानमरक्षन् परघातीव वीरः। ततश्च स्वपरपक्षयोः साधनोपालम्भाभ्यामेव विजयो नान्यतरमात्रेणेति। तदुक्तम्। यथोक्तोपपन्नच्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्प इति॥

प्रतिपक्षस्थापनामात्रहीनो जल्प एव वितण्डा भवति। अत्र प्रतिवादी यं कञ्चन सिद्धान्तमवलम्ब्य व्यवस्थितः प्रतिपक्षभङ्गमात्रेण विजयी भवति न तु जल्पवत्स्वपक्षसाधनेनापीत्युक्तम् प्रतिपक्षे त्वसाधन इति। सिद्धान्तावष्टम्भस्त्ववश्यं करणीयः।

माह। तदुक्तमिति। अत्र तन्त्रोच्चारितोपपन्नपदावृत्त्या यथोक्ते वादलक्षणे यदुपपन्नं योग्यं केवलप्रमाणतर्कतत्त्वावसायफलातिरिक्तं तेनोपपन्नो युक्तः छलादिसम्भिन्नो जल्प इति सूत्रार्थः। इति जल्पपदार्थः॥

श्लोकोत्तरार्द्धे वितण्डालक्षणमुक्तं तस्यार्थं निष्कृष्याह। प्रतिपक्षेति। अत्र जल्प एवेति मासमग्निहोत्रवत् तद्धर्मप्राप्त्यर्थो नामातिदेशस्तेन छलादिसम्भिन्न इत्यर्थः। एतच्चास्यापि(१) जल्पवज्जयमात्रफलत्वान्न वादवत् केवलप्रमाणतर्कव्यवहारनियम इति ज्ञापनार्थमुक्तम्। लक्षणं तु प्रतिपक्षस्थापनारहिता वितण्डेत्येव। एतावतैव जल्पाद् वादादपि व्यावृत्तेः। ईदृग्वादाभासव्यावृत्त्यर्थं तस्यापि सम्भावितत्वादिति केचित्। प्रतिपक्षे त्वसाधन इति प्रतिपक्षस्थापनानिषेधादर्थादस्थाप्यावलम्बो न कार्य इति भ्रमः स्याद् अतोऽभिप्रायं व्याचष्टे। अत्रेति। तर्ह्यस्थाप्यपक्षस्य

(१) वितण्डाव्यवहारस्यापि।

अन्यथाऽनित्यः शब्दः कृतकत्वादिति नैयायिकेन प्रयुक्ते कश्चन वैतण्डिकाभिमानी मीमांसादृष्ट्या पूर्वमसिद्धिमुद्भाव्य वादिना पुनः साध्यमाने हेतौ सौगतमतानुसारेण सिद्धसाधनतामुद्भावयेदित्यपरिनिष्ठितः कथाव्यवहारः स्यात् । अत एव सूत्रकारोऽपि प्रतिवादिनः पक्षपरिग्रहमङ्गीकृत्य तस्य स्थापनामात्रं निराचष्टे स प्रतिपक्षस्थापनाहीनो वितण्डेति । जल्पवितण्डयोरेव चतुःपञ्चानां षट्सप्तानां वाङ्गानां

किमवलम्बनेनेत्यत आह । सिद्धान्तावष्टम्भस्त्विति । कुत इत्याशङ्क्यान्यथातिप्रसङ्गादित्याह । अन्यथेति । मीमांसामते शब्दस्य नित्यत्वात् कृतकत्वस्यासिद्धिः । साध्यमान इति । प्रयत्नानन्तरीयकत्वादिनेति शेषः । हेतौ कृतकत्वहेतावित्यर्थः । सौगतमते सन्मात्रस्य क्षणिकत्वात् सिद्धसाधनता नियता स्यादिति जयपराजयव्यवस्था न स्यादित्यर्थः । स्वोक्तं सूत्रसंवादेन द्रढयति । अत एवेति । पक्षपरिग्रहानङ्गीकारे प्रतिपक्षहीन इत्येवोच्येत न तु स्थापनाहीन इति भावः । यद्यपि कथा तस्या षडङ्गानि प्राहुश्चत्वारि केचनेति सामान्येनोक्तं प्राक् तथापि तज्जल्पवितण्डाविषयमेव न वादविषयमिति नियच्छति । जल्पवितण्डयोरेवेति । चत्वारि पञ्च वा चतुःपञ्चानि षट् सप्त वा षट्सप्तानि तेषाम् । सङ्ख्ययाव्ययेत्यादिना बहुव्रीहिः बहुव्रीहौ सङ्ख्येये डजबहुगणादिति समासान्तो डच्प्रत्ययः । लेखकस्वीकारपक्षे पञ्चमसप्तमसम्भवः । अथ वादे

नियमावश्यम्भावः । वादे तु तदनपेक्षमेव तत्त्वावसायफलसिद्धेः । न च न विगृह्य कथां कुर्यादित्यादिभिर्जल्पवितण्डयोर्निषेधः शङ्कनीयः । नास्तिकनिराकरणार्थमवश्यकर्तव्यत्वेन तदितरविषयत्वान्निषेधस्य । तदुक्तम् । तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवदिति ताभ्यां विगृह्य कथनमिति च ॥ ७८ ॥ ऽऽ ॥

अथ हेत्वाभासाः ।

हेतोः केनापि रूपेण रहिताः कैश्चिदन्विताः ॥७९॥

तन्नियमाभावे हेतुमाह । वादे त्विति । तदनपेक्षमङ्गानपेक्षं क्रियाविशेषणं चैतत् । ननु निषिद्धयोर्जल्पवितण्डयोः किमर्थं लक्षणमुच्यते यत् प्रक्षाल्य त्यागः स्यादित्याशङ्क्याह । न चेति । कुतो न शङ्कनीय इत्याशङ्क्य निषेधस्य नास्तिकेतरप्रतियोगिककथाविषयत्वादित्याह । नास्तिकेति । तर्हि किं तदनयोः कर्तव्यताबोधकं शास्त्रमित्याकाङ्क्षायां सूत्रमेवेत्याह । तदुक्तमिति । स्मृतिवत् सूत्रस्यापि आर्षत्वात् तदपवादकत्वं युक्तमिति भावः । जल्पवितण्डे इति । कर्तव्ये इति शेषः । नन्वनेन सूत्रेणानयोः कर्तव्यतामात्रं प्रयोजनं चोक्तं न तु विगृह्य कथनमिति कथमस्यापवादकत्वमित्याशङ्क्योत्तरसूत्रे तदुक्तमित्याह । ताभ्यामिति । इति वितण्डापदार्थः ॥ ७८ ॥ ऽऽ ॥

अथ कथानन्तरमुद्देशक्रमाद्धेत्वाभासा लक्ष्यन्ते इत्याह । अथेति ।

हेत्वाभासाः पञ्चधा ते[1] गौतमेन प्रपञ्चिताः ।

उक्तानां चतुःपञ्चानां रूपाणामन्यतमेन विकलास्तदितराङ्गसद्भावे ऽपि हेतव[2] आभासा भवन्ति । ते च पञ्चविधाः । तदुक्तम् । सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकाला हेत्वाभासा इति । गौतमग्रहणेन मतान्तरे विशेषं दर्शयति[3] । स चोपन्यस्य निरस्यत[4] इति ॥ ७९ ॥ ऽऽ ॥

तत्र सव्यभिचारः स्यादनेकान्तः स च द्विधा॥८०॥
साधारणस्तथा हेतुरसाधारण इत्यपि ।

रूपशब्दस्यानेकार्थत्वात् विवक्षितमर्थमाह । उक्तानामिति । अनुमानोक्तानां पक्षधर्मत्वादीनामित्यर्थः । नन्वेतल्लक्षणं केवलान्वयिकेवलव्यतिरेकिणोरतिव्याप्तमित्याह । चतुःपञ्चानामिति । तयोश्चतुरन्यतमराहित्यमितरत्र पञ्चान्यतमराहित्यं च विवक्षितम् । तथा च योग्यान्यतमरूपविकलो हेत्वाभास इत्यर्थः । तत्पाञ्चविध्ये सौत्रमुद्देशं प्रमाणयति । तदुक्तमिति ॥ ७९ ॥ ऽऽ ॥

तत्राद्यस्य लक्षणं विभागं चाह । तत्रेत्यादि ।

---

(१) पञ्चाधामी—पा॰ A पु॰ ।
(२) सम्पत्तावपि हेतव—पा॰ B पु॰ ।
(३) द्योतयति—पा॰ B पु॰ । सूचयति—पा॰ C पु॰ ।
(४) निरसिष्यत इति—पा॰ B पु॰ ।

तत्र हेत्वाभासेषु सव्यभिचारो नामानेकान्तः(१) एकत्रान्तो निश्चयो व्यवस्थितिर्नास्तीति । तदुक्तम् । अनैकान्तिकः सव्यभिचार इति । स च साधारणोऽसाधारण इति च द्विविधो भवतीति ॥ ८० ॥ ऽऽ ॥

ननु व्यवस्थान(२)मतिलङ्घ्यान्यत्रापि वृत्तिर्व्यभिचारः । तत्र साधारणस्य पक्षसपक्षलक्षणस्थानातिक्रमेण विपक्षेऽपि वृत्तेर्भवति व्यभिचारिता(३) । पक्षमात्रवृत्तेस्त्वसाधारणस्य कथं व्यभिचारिता । तस्य हि स्वस्थानवृत्तिरेव सङ्कुचिता दूरेऽन्यत्रापि वृत्तिरित्याशङ्कामपनुदन् विधाद्वयमेव विविच्य दर्शयति ।

आद्योन्वयादनेकान्तः पक्षत्रयकृताश्रयः(४) ॥ ८१ ॥

तत्रेत्यस्य प्रकृतिप्रत्ययार्थौ दर्शयन् लक्ष्यलक्षणपदे विविच्य योजयति । तत्र हेत्वभासेष्विति । तत्र विधाद्वयव्याप्तिज्ञानाय लक्षणपदं व्युत्पादयति । एकत्रेति । निश्चयवाचिनान्तशब्देन नियतत्वसाम्याद् व्यवस्थितिर्लक्ष्यते तेन साधारणस्य पक्षसपक्षयोरिव विपक्षेऽपि प्रवृत्तेरसाधारणस्य सति सपक्षे पक्षमात्रवृत्तेर्विपक्षादिवत् सपक्षादपि सर्वस्मात् व्यावृत्तेश्च स्वसीमातिक्रमेण व्यवस्थितत्वादनैकान्तिकत्वमित्यर्थः । अत्र सूत्रं संवादयति । तदुक्तमिति ॥ ८० ॥ ऽऽ ॥

अथ यथोक्तश्लोकेनोत्तरश्लोकस्य पौनरुक्त्यमाशङ्क्य शङ्कोत्तरत्वेन अस्यैव विचारणान्न दोष इत्याशयेन शङ्कापूर्वकमवतारयति । नन्विति ।

(१) अनैकान्तिकः–पा॰ C पु॰ । (२) स्वस्थान–पा॰ C पु॰ ।
(३) व्यभिचारः–पा॰ B पु॰ । (४) कृतान्वयः–पा॰ A पु॰ ।

व्यतिरेकादनेकान्तः पक्षमात्रान्वयः परः ।

अन्वयो व्यतिरेक इति च द्वे हेतुरूपे तत्रान्वयस्य भूमिः पक्षसपक्षौ व्यतिरेकस्य तु विपक्ष एव । सपक्षाश्च वा केचित् । तत्रान्वयस्य विपक्षेऽपि वृत्तेर्यथा व्यभिचारः । एवं व्यतिरेकस्यापि सर्वेष्वपि सपक्षेषु वृत्तेर्भवत्येव व्यभिचारः । अत एव पक्षमात्रवृत्तेरपि केवलव्यतिरेकिणः सपक्षाभावादेव तत्र व्यतिरेको न वर्तत इति न व्यभिचारः । सपक्षविपक्षयोरुभयोरपि व्यतिरेकोऽस्तीति दर्शयितुं पक्षमात्रान्वयः पर इत्युक्तम् । पक्ष एवान्वयोऽन्यत्र सर्वत्र व्यति-

---

पक्षमात्रान्वय इत्यत्र सति सपक्षे इति शेषः । अन्यथा केवलव्यतिरेकिणोऽप्यहेतुत्वप्रसङ्गात् ।

इह श्लोके ऽन्वयव्यतिरेकग्रहणं किमर्थमित्याशङ्क्य व्याचष्टे । अन्वय इत्यादि । ननु व्यतिरेकस्य विपक्षमात्रभूमिकत्वे सपक्षैकदेशवृत्तेर्धूमादिहेतोरहेतुत्वं स्यादित्यत आह । सपक्षाश्च वा केचित् । नन्वेतावता पूर्वोक्तशङ्कानिरासः कथमत आह । तत्रान्वयस्येति । एवं च सति सपक्षे पक्षमात्रवृत्तिरसाधारणः असति तन्मात्रवृत्तिर्व्यतिरेकीति सिद्धमित्याह । अत एवेति । ननु श्लोके व्यतिरेकस्य सपक्षगामित्वं कुत्रोक्तमत आह । सपक्षविपक्षयोरिति । तत्रापि मात्रपदं प्रसादलभ्यमित्याह । पक्ष एवेति । क्रमेण विधाद्वयमुदाहरति । तत्रेत्यादि ॥ ८१ ॥ ऽऽ ॥

रेक एवेत्यर्थः । तत्र पक्षत्रयवृत्तिः साधारणः । यथाऽनित्यः शब्दः प्रमेयत्वादिति । सति सपक्षे पक्षमात्रवृत्तिरसाधारणः । यथाऽनित्या भूर्गन्धवत्त्वादित्युक्तमेवेति ॥ ८१ ॥ ऽऽ ॥

विरुद्धः स्याद्वर्तमानो हेतुः पक्षविपक्षयोः ॥ ८२ ॥

पक्षविपक्षयोरेव वर्तमानो हेतुर्विरुद्ध इत्येवकारोपश्लेषेण साधारणानैकान्तिकव्यवच्छेदसिद्धिः । साध्यविपर्ययव्याप्तो हेतुर्विरुद्ध इत्याचार्याः । यथा नित्यः शब्दः कार्यत्वादिति । तदुक्तम् । सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्ध इति ॥ ८२ ॥

प्रतिरुद्धः प्रकरणसमः स्यात् प्रतिसाधनैः ।

प्रतिप्रमाणप्रतिरुद्धो हेतुः प्रकरणसम इति ।

अथ विरुद्धं लक्षयति । विरुद्ध इति ।

उदाहरति । यथेति । अत्र कार्यत्वादिति हेतुः साध्याभिमतनित्यत्वविपरीतानित्यत्वव्याप्तः पक्षविपरीतयोरेव शब्दघटयोर्वर्तत इति स्याद् विरुद्ध इत्यर्थः । सिद्धान्तमिति । यं कञ्चन शब्दनित्यत्वादिसिद्धान्तं प्रतिज्ञाय तत्साधनार्थं तद्विरोधी तद्विपर्ययव्याप्तो हेतुः प्रयुक्तो विरुद्ध इत्यर्थः ॥ ८२ ॥

अथ प्रकरणसमं लक्षयति । प्रतिरुद्ध इति । स च प्रकरणेन प्रतिरोधकहेतुना समबलत्वात् प्रकरणसम इति द्रष्टव्यम् ।

प्रतिरोधो नाम हेतोरर्थनिश्चयप्रवृत्तिप्रतिबन्धः । सत्प्रतिपक्षो हेतुः प्रकरणसम इत्याचार्याः । ननु दुर्बलेन समबलेन प्रबलेन[1] वा प्रतिरोधः । त्रेधापि न सम्भवति । हीनबलस्य बाधितत्वेन प्रतिरोधकत्वायोगात्[३] । वस्तुनो द्वैरूप्यासम्भवेनोभयो[४]स्तुल्यबलत्वासम्भवात्[५] । प्रबलेन हीनबलस्य बाधितत्वेन कालातीतसङ्करप्रसङ्गाच्चेति । सत्यम् । वास्तवतुल्यबलत्वाभावे ऽपि अगृह्यमाणविशेषत्वेनाभिमानसिद्धसाम्येन प्रतिप्रमाणेन प्रतिरोधो विवक्षित इति न कश्चिद्दोषः । ततश्च नानुमानेनैव प्रतिरोधोऽनुमानस्याभिमानसाम्येन प्रत्यक्षादिनापि तत्सम्भवात् ।

ननु प्रतिरोधो नाम गतिप्रतिबन्धः स च हेतोर्वचनात्मकस्यासम्भवीत्यत आह । प्रतिरोधो नामेति । सत्प्रतिपक्षोऽविद्यमानप्रतीतिहेतुक इत्यर्थः । ननु सर्वथापि प्रतिरोधासम्भवात् खपुष्पकल्पोऽयं हेत्वाभास इति शङ्कते । नन्विति । स खलु पुरुषविशेषमपेक्षमाणो हेत्वाभासो भवतीत्याशयेन परिहरति । सत्यमिति । अत्राभिमानिकविशेषणलभ्यं विशेषान्तरमाह । ततश्चेति । अथानुमानिकस्याभिमानिकसाम्येन प्रत्यक्षेण प्रतिरोधमु-

---

(१) अधिकबलेन—पा॰ B पु॰ ।

(२) प्रतिरोधायोगात्—पा॰ C पु॰ ।

(३) विरुद्धप्रमाणयो—पा॰ B पु॰ ।

(४) बलायोगात्—पा॰ C पु ।

यथा शुक्लोऽयं शङ्खः शङ्खत्वादितरशङ्खवदिति प्रयोगे पीतत्वेन प्रत्यक्षोपलब्धेः शुक्ल एव कथं स्यादिति। तमिमं प्रकरणसमं विरुद्धाव्यभिचारीति केचिद्व्यपदिशन्ति यथाहुः।

यत्राप्रत्यक्षता वायोररूपित्वेन साध्यते।
स्पर्शात् प्रत्यक्षता चासौ विरुद्धाव्यभिचारिता॥ इति।

तदुक्तम्। यस्मात् प्रकरणचिन्ता स निर्ण-

दाहरति। यथेति। एवमात्मनानात्वसाधनस्य व्यवस्थादेरद्वैतवाक्येन प्रतिरोध इत्याद्यूह्यम्। नन्वस्य(१) विरुद्धाव्यभिचारिणः परोक्ताद्भेदे पञ्चैवेतिनियमभङ्गादित्याशङ्क्य भेदमाह। तमिममिति। अभेदव्यक्तये(२) परोक्तमुदाहरणं दर्शयति। यथाहुरिति।

अत्र वायोरप्रत्यक्षत्वसाधकहेतोररूपित्वस्य प्रत्यक्षत्वे हेतुना स्पर्शवत्त्वेन प्रतिरुद्धत्वाद्विरुद्धः प्रतिरुद्धः सत्यव्यभिचाराप्रतीतेरव्यभिचारी चेति तस्यैव तथा व्यपदेशात् स एव स इत्यर्थः।

अथ स्वोक्तप्रकरणसमलक्षणे सूत्रसम्मतिमाह। तदुक्तमिति। यस्माद्वादिप्रयुक्ताद्धेतोरुपरि प्रकरणचिन्ता स्वविपरीतसाध्यसाधकहेतुविचारः प्रवर्तते स निर्णयार्थं स्वसाध्यसिद्ध्यर्थमुपदिष्टो वादिहेतुः प्रकरणेन प्रतिहेतुना समबलत्वात् प्रकरणसम उच्यत इति सूत्रार्थः। अत्र

---

(१) अस्य प्रकरणसमस्य विरुद्धाव्यभिचारीतिव्यपदेशात् प्रकरणसम एव विरुद्धाव्यभिचारीति भावः।

(२) प्रकरणसमात्।

यार्थमपदिष्टः(१)प्रकरणसम इति । एकदेशिनस्तु स्वपक्षपरपक्षसिद्धावपि त्रिरूपो हेतुः प्रकरणसम इति लक्षयन्ति उदाहरन्ति च । यथानित्यः शब्दः पक्षसपक्षयोरन्यतरत्वात् सपक्षवदिति । तदिदं तावदसम्भवि लक्षणम् न ह्येकस्यैव हेतोरुभयत्रापि त्रैरूप्यं सम्भवति । नित्यत्वे साध्ये गगनं सपक्षः इतरत्र तदेव विपक्षः । न त्वेक एव हेतुः सपक्षे तत्र वर्तते विपक्षाच्च ततो व्यावर्तते चेति सम्भवति पक्षसपक्षयोरन्यतरत्वादित्यस्याप्येकदा शब्दाकाशयोरन्यतरत्वादित्यर्थोऽन्यदा शब्दघटयोरन्यतरत्वादित्यर्थः । ततश्च शब्दमात्रमत्रैकं नार्थ इति न किञ्चिदेतत् ।

असिद्धः साध्यतुल्यत्वाद्धेतुः साध्यसमो भवेत् ॥ ८३ ॥

असिद्धो हेतुः साध्यसम इति लक्षणम् । साध्य-

भूषणोक्तं लक्षणं दूषयितुमनुभाषते । एकदेशिनस्त्विति । दूषयति । तदिदमिति । कुत इत्यत आह । न हीति । असम्भवं व्यनक्ति । नित्यत्व इतीति । किं च एकस्य हेतोरुभयत्र त्रैरूप्यं लक्षणं तदैकत्वमेव हेतोरसिद्धमित्याह । पक्षसपक्षयोरित्यादि ।

अथ साध्यसमं लक्षयति । असिद्ध इति ।

अत्र लक्षणांशं निष्कृष्याह । असिद्धो हेतुरिति ।

---

(१) मुद्दिष्टः-पा० C पु० ।

समशब्दप्रवृत्तिनिमित्तप्रदर्शनं साध्यतुल्यत्वादिति[१]। तदुक्तम्। साध्याविशिष्टः साध्यत्वात् साध्यसम इति ॥ ८३ ॥

अथासिद्धिलक्षणं विवक्षन् सिद्धिलक्षणपुरःसरं सप्रकारमसिद्धिमाह।

व्याप्तस्य पक्षधर्मत्वप्रतीतिः सिद्धिरिष्यते[२]।
असिद्धिस्तदभावः स्याद्धेतोः[३] सा च चतुर्विधा ॥ ८४ ॥

व्याप्तेः पक्षस्य हेतोश्च तज्ज्ञानस्याप्यभावतः।

सिद्ध्यभावोऽसिद्धिस्तद्वानसिद्धः। सिद्धिश्च

तर्हि साध्यतुल्यत्वादित्यस्य किं प्रयोजनमत आह। साध्यसमशब्देति। साध्यतुल्योऽसिद्ध इति यावत्। स साध्यसम इति सूत्रार्थः॥ ८३ ॥

ननूक्तं साध्यसमलक्षणम् अथास्मिन् उदाहर्तव्यं किमेतदप्रस्तुतमेव सिद्ध्यादिकमुत्तरार्द्धे वृथा प्रपञ्च्यत इत्याशङ्क्य लक्षणपदार्थासिद्धिज्ञानस्य सिद्धिज्ञानसाध्यत्वात् तल्लक्षणपूर्वकमसिद्धिलक्षणं तद्विभागं चाह। अथेति।

श्लोके तदभाव इत्यत्र तच्छब्देन सिद्धिपरामर्श इति व्याचष्टे। सिद्ध्यभावोऽसिद्ध इति। एषैव लक्षणपदप्रवृ-

(१) समत्वादिति—पा॰ B पु॰।
(२) सिद्धिरुच्यते— पा॰ A पु॰।
(३) तदभावो ह्यसिद्धिः स्याद्धेतोः—पा॰ A पु॰।

व्याप्तस्य हेतोः पक्षधर्मत्वेन प्रतीतिः । ततश्च व्याप्तिपक्षधर्मताहेतूनामभावे व्याप्यत्वासिद्ध्याश्रयासिद्धिस्वरूपासिद्धयो भवन्ति । यथाहुः । असिद्धः साध्यसमः स चाविद्यमानसपक्षः पक्षेऽविद्यमानोऽविद्यमानव्याप्तिकश्चेति त्रिधेति । व्याप्त्यादीनां त्रयाणामन्यतमस्य प्रतीत्यभावे त्वज्ञानासिद्धिरिति चतस्रोऽसिद्धयः । तत्र व्याप्यत्वासिद्धो यथा गर्भस्थो मैत्रीत-

त्तिनिमित्तमित्याह । तद्वानसिद्ध इति । श्लोके योग्यत्वादव्यवहितयोरपि व्याप्तहेतुपदयोरन्वयं वदन् असिद्धिलक्षणं निष्कृष्याह । सिद्धिश्चेति । तथा च व्याप्त्यादिस्वरूपाभावे व्याप्यत्वासिद्ध्यादयस्त्रयो भेदाः तदन्यतमप्रतीत्यभावे त्वज्ञानासिद्धिरित्येवं चातुर्विध्यं सिद्ध्यतीति । फलितमाह । ततश्चेत्यादिना चतस्रोऽसिद्धयइत्यन्तेन । श्लोके पक्षस्येत्येतत् तद्धर्मस्याप्युपलक्षकमित्याह । पक्षतद्धर्मेति । तथा च पक्षस्य तद्धर्मस्य वा सन्दिग्धस्याभावेऽप्याश्रयासिद्धिरेवेति न त्रित्वहानिः । एतेन सिद्धसाधनस्याप्यत्रैवान्तर्भाव इति सिद्धम् । आद्यभेदत्रये तावदुदयनलक्षणमालां संवादयति । यथाहुरिति । अत्रासिद्धः साध्यसम इति सामान्यलक्षणम् । स चेत्यादिना क्रमादाश्रयस्वरूपव्याप्यत्वासिद्धीनां विभागोद्देशः संग्रहे तु वृत्तानुसाराद्व्युत्क्रमः । अथान्त्यपादं तच्छब्देनानन्तरोक्तव्याप्तिपक्षहेतूनां परामर्श इति दर्शयन् व्याचष्टे । व्याप्त्यादीनामिति । अथैषां क्रमेणोदाहरणान्याह । तत्रेत्या-

नयः(१) श्यामः मैत्रीतनयत्वादिति(२) सम्प्रतिपन्नवदिति अयं हि शाकाद्याहारपरिणतिप्रयुक्तव्याप्तिकत्वात्(३) सोपाधिकसम्बन्ध इत्यसिद्धव्याप्तिकः । आश्रयासिद्धो यथा ईश्वरो न सर्वज्ञः कर्तृत्वादिति । स्वरूपासिद्धो यथा अनित्यः शब्दः चाक्षुषत्वादिति । भागासिद्धो यथा अनित्ये वाङ्मनसे मूर्तत्वादिति । विशेषणासिद्धिविशेष्यासिद्धिव्यर्थविशेषणासिद्धिव्यर्थविशेष्यासिद्ध्यादीनां उदाहरणानि स्वयमेव द्रष्टव्यानि । अज्ञानासिद्धो यथा । देवदत्तो बहुधनो

दि । ईश्वरो न सर्वज्ञ इत्यत्रेश्वरासिद्धौ धर्म्यसिद्धेस्तत्सिद्धौ धर्मिग्राहकबाधात् सन्दिग्धधर्मासिद्धेश्चाश्रयथाप्याश्रयासिद्धिरिति भावः । स्वरूपासिद्धेरेव भेदान्तरमाह । भागेति । अत्र पक्षैकदेशे वाचि मूर्तत्वाभावाद् भागासिद्धिः। पुनश्च स्वरूपासिद्धेर्भेदान्तराण्यतिदिशति । विशेषणेति । अनित्यः शब्दः मूर्तत्वे सति गुणत्वात् गुणत्वे सति मूर्तत्वात् गुणत्वे सति कृतकत्वात् इति क्रमादेषामुदाहरणानि । आदिशब्दादयं सार्वभौमो भविष्यति तादृग्भाग्यत्वे सति क्षत्रियत्वादित्यादिसन्दिग्धविशेषणासिद्ध्यादिसङ्ग्रहः । अथाज्ञानासिद्धेषु हेत्वज्ञानासिद्धमुदाहरति । देवदत्त इति । सर्वं क्षणिकं सत्त्वाद्

---

(१) मैत्रतनयः-पा· B पु· ।

(२) मैत्रतनयत्वात्-पा· B पु· ।

(३) व्याप्तित्वेन-पा· B पु· ।

भविष्यति तद्धेतुभूतादृष्टाश्रयत्वादिति । व्याप्याश्रययोरज्ञानासिद्धिरुदाहर्तव्या । एताश्चासिद्धयोऽन्यतरासिद्ध्युभयाऽसिद्धिभेदेन च भिद्यन्त इति ॥ ८४ ॥ ऽऽ ॥

सिद्धसाधने तु सिद्धविशेषणत्वेन पक्षाभासतामिति केचित्[1] । तान्निराकुर्वन्नसिद्धावन्तर्भावमाह ।

आश्रयासिद्धता हेतोः सिद्धधर्मस्य साधने[2] ॥८५॥
पक्षो हि संश्रयस्तस्य स च साध्यान्वितो यतः ।

भविष्यन्मैत्रीपुत्रो वाग्मी भविष्यति विशिष्टपुरुषत्वात् इत्यज्ञानव्याप्त्याश्रयासिद्धयोरुदाहरणे। अथ सर्वासिद्धिसाधारणं द्वैविध्यमाह । एताश्चेति । अनित्यः शब्दः बाह्येन्द्रियप्रत्यक्षद्रव्यत्वादिति वाद्यसिद्धिः नैयायिकैः द्रव्यत्वानभ्युपगमात् कृतकत्वादिति प्रतिवाद्यसिद्धिः मीमांसकैस्तदनङ्गीकारादित्युभयविधेयमन्यतरासिद्धिः तत्रैव चाक्षुषत्वादित्युभयासिद्धिः ॥ ८४ ॥ ऽऽ ॥

ननु पूर्वश्लोके पक्षतद्धर्मयोरभावादाश्रयासिद्धिरिति व्याख्यानादेव सिद्धसाधनस्याप्याश्रयासिद्धित्वमेवेत्युक्तप्रायमेव तत् किमर्थमुत्तरश्लोके पुनरुच्यत इत्याशङ्क्य पक्षपक्षाभासत्वपक्षप्रतिक्षेपार्थमित्याह । सिद्धसाधने त्विति ।

साध्यान्वित इति । सन्दिग्धसाध्यधर्मक इत्यर्थः ।

---

(१) सिद्धविशेषणत्वेन पक्षाभासः सिद्धसाधनमिच्छन्ति केचित्–पा॰ B पु॰ ।

(२) साधनात्–पा॰ C पु॰ ।

प्रतिवादिनोऽपि सिद्धस्य धर्मस्य साधने क्रियमाणे हेतुराश्रयासिद्धो भवति। कुतः पक्षो हि हेतोराश्रयः साध्यधर्मविशिष्टश्च धर्मी पक्ष इत्युक्तम्। तत्र यथा विशेष्यस्य धर्मिणोऽभावादाश्रयासिद्धः तथा विशेषणस्य साध्यधर्मवत्त्वस्याभावादपि विशेष्याभाव इव विशेषणाभावे ऽपि विशिष्टाभावस्याविशिष्टत्वादसिद्धिभेद एवायमिति ॥ ८५ ॥ ऽऽ ॥

कालातीतो बलवता प्रमाणेन प्रबाधितः ॥ ८६ ॥

प्रमाणबाधितविषयः कालातीतः। बलिन एव

ननु सिद्धसाधनस्य दोषत्वे सर्वस्यापि साध्यस्य प्रतिवादिनं प्रति सिद्धत्वात् सर्वानुमानोच्छेदः स्यादित्याशङ्क्य व्याचष्टे। प्रतिवादिनोऽपीति। ननु सत्यपि धर्मिणि कथं धर्माभावमात्रेणाश्रयासिद्धिरित्याशयेन शङ्कते। कुत इति। सत्यं न धर्मिमात्रमाश्रयः किं तु धर्मविशिष्टो धर्मीत्याह। पक्षो हीति। ततः किमत आह। तत्रेति। अभावादपीति। आश्रयासिद्धिरित्यनुषङ्गः। कुत इत्यत आह। विशेष्येति। इह विशिष्टस्याश्रयत्वात् तस्य च विशेषणविशेष्ययोरन्यतरापाये ऽप्यपायादित्यर्थः। प्रकृतमुपसंहरति। असिद्धीति॥ ८५ ॥ ऽऽ ॥

अथ कालात्ययापदिष्टं लक्षयति। कालातीत इति।

ननु प्रमाणसिद्धस्वरूपस्य हेतोः को बाध इत्याशङ्क्य विषयापहारलक्षण इति व्याचष्टे। प्रमाणेति। संग्रहे बलवतेति विशेषणं व्यावर्त्याभावाद्बाधकस्वरूपकथनमात्रपरम् न तु लक्षणाङ्गमित्याह। बलिन एवेति। केनानुमानेनास्य

बाधकत्वाद्बलवतीत्युक्तम् । तत्र प्रत्यक्षबाधितो यथा अनुष्णोऽग्नि[1]र्द्रव्यत्वादिति । अनुमानबाधितो यथा सावयवाः परमाणवो मूर्तत्वादिति । कथमनुमानबाधित इति चेत् । उच्यते । आद्यावयवि स्वन्यूनपरिमाणोपादानमवयवित्वात् घटवत् । यथा अणुपरिमाणतारतम्यं क्वचिद्विश्रान्तं परिमाणतारतम्यत्वात् महापरिमाणतारतम्यवत्[2] । अन्यथा मशकमातङ्गयोरप्यविशेषप्रसङ्गः अनन्तावयवारब्धत्वाविशेषादित्यनुमानेन निरवयवद्रव्यत्वेन परमाणुसिद्धेर्धर्मिग्राहकप्रमाणबाधितत्वात् । आगमबाधितो यथा यागादयः स्वर्गसाधनं न भवन्ति क्रियात्वादिति । उपमानबाधितो

बाध इत्याशयेन पृच्छति । कथमिति । धर्मिग्राहकेणेत्याह । आद्येति । त्रसरेणुः सावयवावयवारब्धः चाक्षुषद्रव्यत्वात् घटवदिति सिद्धं द्व्यणुकमाद्यावयविशब्दार्थः । अथ तदवयवानामपि कार्यद्रव्यारम्भकत्वेन सावयवत्वानुमाने बाधकमाह । अण्विति । अत्रोभयसाध्यानङ्गीकारे ऽनन्तावयवारब्धत्वाविशेषान्मशमातङ्गयोस्तुल्यपरिमाणत्वप्रसङ्ग इत्याह । अन्यथेति । अंशत्रयविशिष्टभावनावरोधात् स्वर्गसाधनत्वेनैवागमावगतानां तदसाधनत्वसाधने तेनैव धर्मिग्राहिणा बाध इत्याह । आगमेति । एवमुपमानावगतगवयशब्दवाच्यभावस्य गोसदृशपशोस्तदवाच्यत्वानुमाने तेनैव बाध इत्याह । उपमानेति । ननु विशेषणाभा-

---

(१) कृष्णवर्त्मा—पा॰ B पु॰ ।

(२) महत्त्वतारतम्यवत्—पा॰ B पु॰ । महत्परिमाणतारतम्यवत्—पा॰ C पु॰ ।

यथा गोसदृशो गवयशब्दवाच्यो न भवति वस्तुत्वादिति। ननु सिद्धसाधनवदस्यापि बाधितधर्मविशिष्टत्वेनापक्षभूते धर्मिणि वर्तमानस्याश्रयासिद्धिरेव स्यात्। मैवम्। अनुष्णत्वेन द्रव्यत्वस्य व्याप्तिग्रहणायोष्णत्वाभावरूपस्यानुष्णत्वस्य निर्णयार्थमुष्णत्वं क्वचिद्धर्मिणि ग्रहीतव्यम्। स च धर्मी वह्निरेवेति व्याप्तिग्रहणसमय एव बाधिते विषये पश्चात् पक्षत्वातिपातः। तथा चोपजीव्योपजीवकयोरुपजीव्यमेवोद्भाव्यमिति न्यायाद् बाधितविषयत्वमेवोद्भाव्यमिति। सिद्धसाधने तु व्याप्तिस्थितौ पक्षधर्मत्वमेव जीवनमित्याश्रयासिद्धिरेव भवेत्। एतेन बाधितविषयस्यापि पक्षाभा-

---

वाद्विशिष्टाभाव इति सिद्धसाधनोक्तन्यायेनापि विशिष्टस्य धर्मिणोऽभावात् तद्वदेवायमप्याश्रयासिद्धः किं न स्यादिति शङ्कते। नन्विति। सत्यं तथापि परिस्फूर्तिकत्वादुपजीव्यत्वेन प्राधान्याच्च बाध एवोद्भाव्यो नाश्रयासिद्धिरिति परिहरति। मैवमिति। तत्र बाधस्य पुरःस्फूर्तिकत्वं तावदाह। अनुष्णत्वेनेति। ततस्तदुपजीवनेन धर्मिणः पक्षत्वभङ्गादाश्रयासिद्धिरित्याह। पश्चादिति। फलितमाह। तथा चेति। सिद्धसाधनस्य तु सिद्धव्याप्तिकस्यैव हेतोः पक्षधर्मतामात्रविरहिणोऽन्योपजीवित्वादाश्रयासिद्धत्वमेवेति वैषम्यमाह। सिद्धसाधने त्विति। काणादास्तु कालातीतो न हेत्वाभासः पक्षवचनस्यैव दुष्टत्वात् प्रतिज्ञाभास इति भणन्ति। तान् प्रत्याह। एते-

सतां वदन्तो निरस्ता भवन्तीति ॥ ८६ ॥

विभागोद्देशमाक्षिप्य समादधाति।

पञ्चैव कथमाभासा विद्यते ह्यप्रयोजकः।
इति पर्यनुयोगोऽयं तार्किकस्य न युज्यते ॥ ८७ ॥

अप्रयोजक इत्यपि कश्चिद्धेत्वाभासोऽस्तीति कथं पञ्चत्वपरिसंख्यानमित्ययं पर्यनुयोगस्तर्कव्यापारं जाननस्य न युज्यत इति ॥ ८७ ॥

कथं न युज्यते तत्राह।

नेति। बाधस्यैवोक्तान्यत्वाभिधानेनेत्यर्थः। तथा च पक्षादीनां सर्वेषामपि हेतुशेषत्वेन तद्दोषाणामपि हेतुदोषपर्यवसानाद्धेत्वाभास एवायं न पक्षाभास इति भावः॥ ८६ ॥

ननु हेत्वाभासाः पञ्चधेति पूर्वं सिद्धान्तितं पञ्चत्वपरिसंख्यानं किमर्थमकस्मादुत्तरार्द्धे निरस्यत इत्याशङ्क्य न तन्निरस्यते किं तु स्थूणानिखननेनाक्षिप्य दृढीक्रियते पञ्चैवेत्यादिना समञ्जसमित्यन्तेन सार्द्धचतुष्टयेनेत्यवतारयति। विभागोद्देशमिति।

नन्वप्रयोजकसद्भावे कथं हेत्वाभासानतिरेक इत्याशङ्क्य तस्यापि तदाभासत्वादिति व्याचष्टे। अप्रयोजक इति। कश्चिदिति। पूर्वोक्तविलक्षण इत्यर्थः। पञ्चत्वपरिसंख्यानं पञ्चत्वावधारणमित्यर्थः। पञ्चग्रहणस्य पञ्च पञ्चनखा इतिवत्पञ्चेतरनिषेधपरत्वादिति तद्वेदेति वेदनार्थे ठकोविधानात्। तार्किकस्तर्कव्यापाराभिज्ञ इति सोल्लुण्ठनत्वसूचनाय व्याचष्टे। तर्कव्यापारं जानानस्येति ॥ ८७॥

यस्येत्यादिना सार्द्धश्लोकेनैतदेवोपपादयतीत्याह।

यस्यानुकूलतर्कोऽस्ति स एव स्यात् प्रयोजकः ।
तदभावेऽन्यथासिद्धिस्तस्याः स हि निवारकः ॥८८॥
अतोऽप्रयोजकस्य स्याद्व्याप्यासिद्धेरसिद्धता ।

अनुकूलतर्कवत एव हेतोः प्रयोजकत्वात् तदभावेऽन्यथासिद्धिः स्यात् । उपाधिविधूननद्वारेणान्यथासिद्धिशङ्कानिरसनहेतुस्तर्क इत्युक्तत्वात् । अन्यथासिद्धोऽप्रयोजक उपाधिमानिति पर्यायाः । यथाहुः ।

समासमाविनाभावावेकत्र स्तो यदा तदा ।
समेन यदि नो व्याप्तस्तयोर्हीनोऽप्रयोजकः ॥ इति

कथमिति ।

तर्कविधूतान्यथासिद्धिशङ्कस्यैव हेतोः प्रयोजकत्वात् तद्रहितोऽप्रयोजकः स च निरुपाधिकसम्बन्धलक्षणव्याप्तिवैधुर्याद् व्याप्यत्वासिद्धित्वान्नातिरिच्यत इति श्लोकाभिप्रायमाह । अनुकूलेति । ननु तर्काभावमात्रेण कथमनन्यथासिद्धिरित्यत आह । उपाधीति । पक्षे विपक्षजिज्ञासाविच्छेदस्तनुग्रह इत्यत्रेति भावः । एतावता कथमप्रयोजकस्यानतिरिक्तत्वमत आह । अन्यथासिद्ध इति । अन्यप्रयुक्तव्याप्तिक इत्यर्थः । स च व्याप्यत्वासिद्ध एवेति भावः ।

अतोऽप्रयोजकस्य सोपाधिकपर्यायत्वे तावत् सम्मतिमाह । समेत्यादि । यदैकत्र साध्ये समासमाविनाभावो साध्यसमव्याप्तिकस्तद्भिन्नव्याप्तिकश्च द्वौ हेतू सम्भवतः तयोर्मध्ये यो हीनव्याप्तिको हेतुः समेन समव्याप्तिकेनाव्याप्तश्चेदन्यथाऽनित्यत्वसाधने सावयवत्वकृतकत्वस्योपा-

केचित्तु परप्रयुक्तव्याप्त्युपजीवीत्यप्रयोजकं[1]
व्यपदिशन्ति । यथाहुः ।

व्याप्तेश्च दृश्यमानायाः कश्चिद्धर्मः प्रयोजकः ।
यस्मिन् सत्यमुना भाव्यमिति शक्त्या निरूप्यते ॥
अन्ये परप्रयुक्तानां व्याप्तीनामुपजीवकाः ।
दृष्टैरपि न तैरिष्टा व्यापकांशावधारणा ॥ इति ।

अन्ये तु सन्दिग्धव्याप्तिक इत्याहुः । यथा ।
साध्यादन्येन धर्मेण सपक्षेष्वनुयायिना ।

धित्वप्रसङ्गात् सोऽप्रयोजक उच्यते । तथा च सोपाधिकस्यैवाप्रयोजकव्यपदेश इति भावः ।

अथास्यान्यथासिद्धपर्यायत्वं च संवादयति । केचिदिति । परप्रयुक्तव्याप्त्युपजीवी अन्यथासिद्ध इत्यर्थः । यत्रैकेन साध्येनानेकेषां धर्माणामापाततो व्याप्तिर्दृश्यते तत्र तस्या व्याप्तेस्तेषु धर्मेषु कश्चिदेक एव धर्मः प्रयोजको निरूप्यते केनोपायेनेत्यत उच्यते । अस्मिन् साध्ये सत्येवामुना साधनधर्मेण भाव्यं नान्यथेत्येवमन्वयव्यतिरेकलक्षण्या शक्त्या सामर्थ्येनेत्यर्थः । ततोऽन्ये धर्माः परप्रयुक्तव्याप्त्युपजीवकाः पूर्वोक्तप्रयोजकधर्मोपरागोपलब्धव्याप्तिका इत्यर्थः । अत एव तैर्दृष्टैरपि व्याप्तवद्दृश्यमानैरपि न साध्यावधारणमिष्यत इत्यर्थः । अत्रापि निषिद्धत्वप्रयुक्तव्याप्त्युपजीवका हिंसात्वादय एवोदाहरणम् ।

उपलक्षणं चैतत् तद्व्यपदेशान्तरं चास्तीत्याह । अन्ये त्विति । साध्यादन्येन पापसाधनत्वादिसाध्यधर्मव्यति-

---

(१) व्याप्त्युपजीवकमप्रयोजकं—पा· C पु· ।

विना पक्षे स्थितो धर्मः सन्दिग्धव्याप्तिको मतः ॥

इति ।

ततश्च सर्वथा असिद्धव्याप्तिकत्वेनासिद्धभेद एवायमप्रयोजको न तु पृथगाभास इति ॥ ८८ ॥ ऽऽ ॥

अनुकूलतर्काभाववत् प्रतिकूलतर्कसद्भावे ऽपि व्याप्यत्वासिद्ध एव हेतुः स्यादित्यत आह ।

भावे ऽपि प्रतिकूलानां तर्काणामीदृशी गतिः ॥८९॥

किं सर्वत्र नेत्याह ।

आत्माश्रयस्तथान्योन्यसंश्रयश्चक्रकाश्रयः[1] ।

रिक्तेन सकलसपक्षानुगतेन धर्मेण निषिद्धत्वादिना विना पक्षे स्थितो धर्मो हिंसात्वादिः परप्रयुक्तव्याप्तिकत्वसम्भावनया सन्दिग्धव्याप्तिको मतः कैश्चिदित्यर्थः ।

तथा च सञ्ज्ञाभेदमात्रेणाभासान्तरत्वे ऽतिप्रसङ्गात् सिद्धोऽसिद्धावन्तर्भाव इत्युपसंहारपरत्वेनातोऽप्रयोजकस्येत्येतद्व्याचष्टे । ततश्चेति ॥ ८८ ॥ ऽऽ ॥

ईदृशी गतिरिति । अनुकूलतर्करहितस्य हिंसात्वादेरिवास्पर्शवत्त्वादमूर्तत्वे मनसः क्रियावत्त्वं न स्यादिति प्रतिकूलतर्कहतस्यास्पर्शवत्त्वादेरपि अमूर्तत्वसाधनस्य व्याप्यत्वासिद्धत्वमेवेत्यर्थः ।

ननु प्रतिकूलतर्कपराहतस्य हेतोर्व्याप्यत्वासिद्धिमभिधाय तस्यैवोत्तरश्लोके स्वरूपासिद्धत्वाभिधानं व्याहतमित्याशङ्क्य सत्यम् तस्य क्वचिदपवादः क्रियत इत्यवतारयति । किं सर्वत्रेति । नन्वेते तर्काः सर्वे ऽपि स्वरूपा-

(१) चक्रकाह्वयः–पा॰ A पु॰ ।

तद्यथा शब्दोऽनित्यो नित्यधर्मानुपलब्धेः। (शब्दो नित्योऽनित्यधर्मानुपलब्धेरिति।)(१) अत्र हि साध्यविपरीतसाधकं(२) समानबलमनुमानान्तरं प्रतिपक्ष इत्युच्यते। यः पुनरतुल्यबलो न स प्रतिपक्षः। तथाहि विपरीतसाधकानुमानं त्रिविधं भवति। उपजीव्यमुपजीवकमनुभयं चेति। तत्राद्यं बाधकं बलवत्त्वात्। यथा अनित्यः परमाणुर्मूर्त्तत्वाद्(३) घटवदित्यस्य (परमाणुसाधकानुमानं नित्यत्वं साधयदपि न प्रतिपक्षः किं तु बाधकमेवोपजीव्यत्वात् तच्च धर्मिग्राहकत्वात्)(४) न हि प्रमाणेनागृह्यमाणे धर्मिणि(५) परमाणावनित्यत्वानुमानमिदं सम्भवति आश्रयासिद्धेः। अतोऽनेनानुमानेन परमाणुग्राहकस्य प्रा-

परमाणुसाधकानुमानमिति। द्व्यणुकं स्वल्पपरिमाणसमवायिकारणारब्धं कार्यद्रव्यत्वाद् घटवदित्यनुमानं पर-

(१) ( ) एतन्मध्यस्थो नास्ति ३। ४ पु०।

(२) अत्र च विपरीतार्थसाधकं--पा० ३। ४ पु०।

(३) स्पर्शवत्त्वात्--पा० ३। ४ पु०।

(४) ( ) एतन्मध्ये। धर्मिग्राहकं प्रमाणमाद्यं बलवत्। तच्च पक्षसाधकतयोपजीव्यम्। इति पाठः १ पु०।

(५) अगृहीते स्वधर्मिणि--पा० ४ पु०।

माण्यमप्यनुज्ञातमन्यथा अस्योदयासम्भवात् । तस्मादुपजीव्यं बाधकमेव । उपजीवकं तु दुर्बलत्वाद्बाध्यम् । यथेदमेवानित्यत्वानुमानम् । तृतीयं तु सत्प्रतिपक्षं समबलत्वात्[1] ।

यस्य प्रत्यक्षादिप्रमाणेन[2] पक्षे साध्याभावः परिच्छिन्नः स कालात्ययापदिष्टः स एव बाधितविषय इत्युच्यते । यथाग्निरनुष्णः कृतकत्वाज्जलवत् । अत्र कृतकत्वं हेतुः । तस्य च यत् साध्यमनुष्णत्वं तस्याभावः प्रत्यक्षेणैव परिच्छिन्नः त्वगिन्द्रियेणाग्नेरुष्णत्वपरिच्छेदात्[3] । तथा परोऽपि कालात्ययापदिष्टः । यथा घटस्य क्षणिकत्वे साध्ये प्रागुक्तं सत्त्वं हेतुः । तस्यापि च यत् साध्यं क्षणिकत्वं तस्याभावोऽक्षणिकत्वं प्र-

माणुसाधकानुमानं ज्ञेयम् ।

कालात्ययापदिष्टं लक्षयति । यस्य बलवदित्यादि । ग्रन्थस्त्वनुमाननिरूपणे व्याख्यात इत्यत्र न व्याख्यायते । विषयव्याप्त्यर्थं तस्योदाहरणान्तरं दर्शयति । तथेत्यादिना । प्रत्यभिज्ञास्वरूपं दर्शयति । स एवायं

(१) तुल्यबलत्वात्—पा॰ ३ । ४ पु॰ । •
(२) बलवत्प्रमाणेनेति टीकासम्मतः पाठः ।
(३) उष्णत्वोपलम्भात्—पा॰ ३ पु॰ ।

त्यभिज्ञातर्कादिलक्षणेन प्रत्यक्षेण[1] परिच्छिन्नम्। स एवायं घटो यो मया पूर्वमुपलब्ध इति प्रत्यभिज्ञया पूर्वानुभव[2]जनितसंस्कारसहकृतेन्द्रियप्रभवया पूर्वापरकालाकलनया घटस्य स्थायित्वपरिच्छेदादिति । एते चासिद्धादयः पञ्च हेत्वाभासा यथाकथञ्चित् पक्षधर्मत्वाद्यन्यतमरूपहीनत्वादहेतवः स्वसाध्यं न साधयन्तीति ।

ये ऽपि लक्षणस्य केवलव्यतिरेकिहेतोस्त्रयो दोषा अव्याप्त्यतिव्याप्त्यसम्भवास्ते ऽप्यत्रैवान्तर्भ-

---

घटो यो मयेति । अत्र प्रत्यभिज्ञायां संस्कारोऽपि कारणम् । सन्निकर्षस्त्वतीतसमयसम्बन्धात्मकतत्तांशे संयुक्तविशेषणता । न च विशेषणता यदि तत्तैव तदा सन्निकर्षस्यासत्त्वमेव पर्यवसितमिति वाच्यम् । तादृश्यास्तत्तायाः सन्निकर्षो विशेषणता सा च विशेष्यीभूतघटादिस्वरूपात्मिकेत्युपायकृतः । साम्प्रदायिकास्तु स्मृतिरेव प्रत्यभिज्ञाहेतुः संस्कारस्तु तयान्यथासिद्ध इत्याहुः । उपसंहरति । एत इति ।

ननु लक्षणस्यापि केवलव्यतिरेकितया तत्रातिव्याप्त्यादयो हेत्वाभासान्तराणि भविष्यन्तीत्याशङ्क्याह ।

---

(१) प्रत्यभिज्ञालक्षणप्रत्यक्षेणैव–पा० २ । ३ पु० । प्रत्यभिज्ञानात्मकेन प्रत्यक्षेण–पा० ४ पु० ।

(२) पूर्वावस्थानुभव–पा० ३ । ४ पु० ।

वन्ति न तु ते पञ्चभ्योऽधिकाः। तथाहि अतिव्याप्तिर्व्याप्यत्वासिद्धिः विपक्षमात्राद्व्यावृत्तत्वात्[१] सोपाधिकत्वाच्च। यथा गोलक्षणस्य पशुत्वस्य। गोत्वे हि सास्नादिमत्त्वं प्रयोजकं न तु पशुत्वम्। तथा अव्याप्तिर्भागासिद्धत्वम्। यथा गोलक्षणस्य शावलेयत्वस्य। एवमसम्भवोऽपि स्वरूपासिद्धिः। यथा गो[...]लक्षणस्यैकशफत्वस्येति ॥

अभिप्रायान्तरेण प्रयुक्तस्य शब्दस्यार्था-

र्थे ऽपीति। विपक्षमात्रादिति। सकलविपक्षादित्यर्थः। गोत्वे हि सास्नादिमत्त्वमिति। अयं गौः पशुत्वादित्यनुमानस्य साध्ये गोत्वे सास्नादिमत्त्वं प्रयोजकमित्यर्थः ॥

साम्प्रतं छलं निरूपयति। अभिप्रायान्तरेणेति। तच्च त्रिविधं वाक्छलं सामान्यच्छलमुपचारच्छलं चेति। तत्राविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम्[२]। एतदुदाहरणं तु मूल एव। सम्भवतोऽर्थस्यातिसामान्ययोगादसद्भूतार्थकल्पना सामान्यच्छलम्[३]। यथायमहो ब्राह्मणो विद्याचरणसम्पन्न

---

(१) विपक्षमात्रव्यावृत्त्यभावात्—पा॰ ४ पु॰।

(२) न्यायसूत्रम्। अ॰ १ आ॰ २ सू॰ ५३।

(३) न्यायसूत्रम्। अ॰ १ आ॰ २ सू॰ ५४। तत्रासम्भूतार्थकल्पनेति पाठः।

न्तरं परिकल्प्य दूषणाभिधानं छलम् । यथा नवकम्बलोऽयं देवदत्त इति वाक्ये नूतनाभिप्रायेण प्रयुक्तस्य नवशब्दस्यार्थान्तरमाशङ्क्य कश्चि-

---

इति सम्भवाभिप्रायेणोक्ते कश्चिन्नियमाभिप्रायेणाह । यदि ब्राह्मणे विद्याचरणसम्पत् सम्भवेद् व्रात्येऽपि सम्भवेत् । व्रात्योऽपि ब्राह्मणः सोऽपि विद्याचरणसम्पन्नः स्यादिति । उपचारवृत्त्या प्रयुक्ते वृत्तिमात्रेण दूषणाभिधानमुपचारच्छलम् । यथोपचारेण मञ्चाः क्रोशन्तीत्युक्ते मञ्चस्थाः पुरुषाः क्रोशन्ति न मञ्चा इति प्रत्यवस्थानम् । इदं त्ववधेयम् । मञ्चाः क्रोशन्तीत्यत्र गृहीतैकवाक्यतानुरोधेनौपचारिकी मञ्चस्थस्योपस्थितिः । एकवाक्यता चार्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यादित्यन्यत्रोक्ता । उपचारो नाम लक्षणा तत्र भवा औपचारिकी । अध्यात्मादित्वात् ठञ् । तद्धितेष्वचामादेरिति[1] वृद्धिः । ठस्येकः[2] । यस्येति च[3]त्यकारलोपः । ततष्टिड्ढाणञित्यादिना[4] ङीप् पुनर्यस्येति चेत्यकारलोपादि । एवं विशिष्टवाचकपदस्य विशेषणमात्रपरत्वे लक्षणा गौर्नित्य इत्यादौ । गौरनित्य इत्यत्र तु पदान्नियतोपस्थितेः शक्तिसाध्यत्वनियमाद्गोपदाच्छक्त्या विशिष्टोपस्थितौ विशेषणांशस्य नित्यतया अनित्यत्वानन्वयेऽपि विशेष्ये तदन्वयः शक्त्यैव स्वतन्त्रोपस्थितत्वात् । नन्वेवं गौर्नित्य इत्यत्रापि विशिष्टोपस्थितौ

---

(१) पाणिनिसूत्रम् । अ० ७ पा० २ सू० ११७ ।
(२) पाणिनिसूत्रम् । अ० ७ पा० ३ सू० ५० ।
(३) पाणिनिसूत्रम् । अ० ६ पा० ४ सू० १४८ ।
(४) पाणिनिसूत्रम् । अ० ४ पा० १ सू० १५ ।

दूषयति । नास्य नव कम्बलाः सन्ति दरिद्रत्वा-
त् । न ह्यस्य द्वयमपि[1] सम्भाव्यते कुतो नवेति ।
स च वादी छलवादितया ज्ञायते ॥

असदुत्तरं जातिः । सा चोत्कर्षसमाप-
कर्षसमादिभेदेन बहुविधा । विस्तरभिया नेह

विशेष्यांशस्यानित्यतया नित्यत्वानन्वये ऽपि विशेषणांशे तदन्वयः स्यादेकदेशत्वाविशेषादिति चेत् । न । अत्र विशेषणांशस्य शक्त्या परतन्त्रोपस्थितत्वात् तदन्वयो न भवतीति स्वतन्त्रोपस्थितये लक्षणा । गौरनित्य इत्यत्र तु विशेष्यांशस्य शक्त्यैव स्वतन्त्रोपस्थितिरित्युक्तं प्राक् । एवं च साकाङ्क्षत्वनिराकाङ्क्षत्वे एवान्वयानन्वययोः प्रयोजके न तु पदार्थत्वतदेकदेशत्वे इति । एषा च जहल्लक्षणा अजहल्लक्षणाप्यपरा । यथा छत्रिणो गच्छन्तीत्यादौ । तदुक्तम् । शक्यलक्ष्यसाधारणमेकधर्ममादाय शक्यार्थापरित्यागेन ययोपस्थितिः सा अजहत्स्वार्थेति । तादृगेकधर्मस्त्वेकसार्थगन्तृत्वादिरूपो ज्ञेयः । वेदान्तिनस्तु तत्त्वमसीत्यादौ जहदजहत्स्वार्थामपि लक्षणां मन्यन्त इत्यन्यत्र विस्तरः ॥

क्रमप्राप्तां जातिं लक्षयति । असदिति । दूषणासमर्थमुत्तरं जातिरित्यर्थः । स्वव्याघातकमुत्तरं जातिरित्यन्ये । सा चोत्कर्षसमादिभेदेनेति । अत्रादिशब्दात् साधर्म्यसमावैधर्म्यसमाद्या द्वाविंशतिसङ्ख्याका अन्या अपि ग्राह्याः । तथा च सूत्रम् । साधर्म्यवैधर्म्योत्कर्षापकर्ष-

---

(१) न ह्यस्मिन् कम्बलत्रयमपि—पा· ४ पु· ।

कृत्वोच्यते[१] । तत्राव्याप्तेन दृष्टान्तगतधर्मेण साध्ये पक्षे अव्यापकधर्मस्यापादनमुत्कर्षसमा जातिः । यथा शब्दोऽनित्यः कृतकत्वाद् घटवदित्युक्ते[२] कश्चिदेवमाह यदि कृतकत्वेन हेतुना घटवच्छब्दोऽनित्यः स्यात् तर्हि तेनैव हेतुना तद्वदेव शब्दः सावयवोऽपि स्यात् । अपकर्षसमा तु दृष्टान्तगतेन धर्मेणाव्याप्तेन व्यापकस्य धर्माभावस्यापादनम् । यथा पूर्वस्मिन् प्रयोगे[३] कश्चिदेवमाह यदि कृतकत्वेन हेतुना घटवच्छब्दोऽनित्यः स्यात् तेनैव हेतुना घटवदेव हि शब्दः श्रावणोऽपि न स्यात् । न हि घटः श्रावण इति ॥

वर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमा[४] इति । तत्राव्याप्तेनेति । कृतकत्वं यथा अनित्यत्वेन व्याप्तं तथा न सावयवत्वेनापि किंतु क्वचिद् घटादौ सावयवत्वेन सहचरितमिति कृत्वा तद्बलेन पक्षे ऽविद्यमानस्य सावयवत्वस्यापादानमुत्कर्षस-

(१) कार्त्स्न्येनाभिधीयते—पा॰ ४ पु॰ ।
(२) इति प्रयुक्ते—पा॰ ३ । ४ पु॰ ।
(३) पूर्वस्मिन्नेवानुमाने—पा॰ ३ । ४ पु॰ ।
(४) न्यायसूत्रम् । अ॰ ५ आ॰ १ सू॰ १ ।

पराजयहेतुर्निग्रहस्थानम् । तच्च न्यूनाधिकापसिद्धान्तार्थान्तराप्रतिभामतानुज्ञाविरोधादिभेदाद्बहुविधमपि विस्तरभयान्नेह कृत्स्नमुच्यते । यद्विवक्षितार्थे किञ्चिदूनं तन्न्यूनम् । विवक्षितात् किञ्चिदधिकमधिकम् । सिद्धान्तादपध्वंसो(१)ऽपसिद्धान्तः । प्रकृतेनानभिसम्बन्धार्थं वचनमर्थान्तरम् । उत्तरापरिस्फूर्तिरप्रतिभा । पराभिमतस्यार्थस्य स्वप्रतिकूलस्य स्वयमेवाभ्यनुज्ञानं स्वीकारो मतानुज्ञा । इष्टार्थभङ्गो

मेत्यर्थः ॥

कथासमाप्तेर्निमित्तभूतं निग्रहस्थानं लक्षयति । पराजयहेतुरिति । तच्च न्यूनाधिकेत्यादि । अत्रादिशब्दात् प्रतिज्ञाहान्यादिकं ग्राह्यम् । तथा च सूत्रम् । प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासन्न्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च यथोक्ता निग्रहस्थानानीति(२) । नन्वत्र च्छलादेः स्वरूपभेदानां सामान्यच्छलादीनामनिरूपणं

(१) अपभ्रंशो—पा॰ ४ पु॰ ।

(२) न्यायसूत्रम् । अ॰ ५ आ॰ २ सू॰ १ । तत्र सूत्रपाठे यथोक्ता इति नास्ति ।

विरोधः । इहात्यन्तमुपयुक्तानां स्वरूपभेदेन भूयोभूयः प्रतिपादनम् । यदनतिप्रयोजनं तदलक्षणमदोषाय । एतावतैव बालव्युत्पत्तिसिद्धेः ॥

॥ इति श्रीकेशवमिश्रविरचिता तर्कभाषा समाप्ता ॥

शिवम् ।

दोषाय भविष्यतीत्याशङ्क्याह। इहात्यन्तमिति। यद्यपि कथायां स्ववाक्येषु ते परिवर्ज्याः परवाक्येषु उद्भाव्या इत्युपयुक्ता एव तथापि तत्सिद्धिर्ग्रन्थान्तराद्भविष्यतीति भावः । एतावतैवेति । छलादेः सामान्यनिरूपणेनैव बालव्युत्पादनसिद्धेरित्यर्थः ॥

इयं न्यायप्रदीपाख्या टीका श्रीविश्वकर्मणा ।
निर्माय विश्वनाथस्य पादपद्मे समर्पिता ॥ १ ॥
ग्रन्थो न्यायप्रदीपाख्यो निर्मितो विश्वकर्मणा ।
निर्माय खलु सङ्ख्यातो बाणाब्धिरामभूमिभिः ॥ २ ॥

समाप्तमिदम् ।

॥ श्रीः ॥

तर्कभाषायाः सूचीपत्रम् ।

्पयाय ।

...

ाग: । ५

बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनात्वगाख्यानि।
वाक्पाणिपादपायूपस्थं कर्मेन्द्रियं ह्याहुः॥
उभयात्मकमत्र मन इति।

तदसत् तस्य च ज्ञानद्वारैव कर्महेतुत्वात् तावता च तथात्वे चक्षुरादावपि प्रसङ्गात् क्वचित् कर्मेन्द्रियत्वव्यवहारस्त्वौपचारिकः मानसवाचिककायिककर्मविभागस्तु कर्मशब्दस्य शुभाशुभसङ्कल्पादिरूपज्ञानेऽपि प्रयोगात्, अतः षडपि ज्ञानेन्द्रियाणि, तत्र प्राकृतविभागं प्रत्युच्यते अणुद्रव्यत्वे सति पञ्चविषयसाधारणेन्द्रियत्वं स्मृतिकरणेन्द्रियत्वमित्यादि प्राकृतमनोलक्षणं, तच्च हृत्प्रदेश[illegible]त्राधिष्ठानम् इन्द्रियान्तराणामपि हृत्प्रदेश एव कन्दस्थान, स्थानान्तरेष्वपि यथासम्भवं वृत्तिः, आत्मनोऽपि तत्र भूयसा वृत्तिः, तथा च भाष्यं सर्वेन्द्रियकन्दभूतस्थानविशेषे वृत्तिरिति चक्षुषि नावस्थानमिति मन एकमेवान्तःकरणं सङ्कल्पाध्यवसायादयस्तद्व्यापारभेदादेव ज्ञायन्त इति नान्तःकरणवैविध्यं, तथा च भाष्यम् अध्यवसायाभिमानचिन्तावृत्तिभेदान्मन एव बुद्ध्यहङ्कारचित्तशब्दैर्व्यपदिश्यत इति, उदाहृतञ्च तत्प्राणे सूत्रकारैः पञ्चवृत्तिर्मनोवद् व्यपदिश्यत इति, अतोऽन्तःकरणं त्रिविधमित्यादिवादिनः सांख्यादयो निरस्ताः। शब्दादिपञ्चके शब्दमात्रग्रहणशक्तमिन्द्रियं प्राकृतश्रोत्रं तन्मनुष्यादीनां कर्णशष्कल्यवच्छिन्नवृत्ति द्विजिह्वानां नयनवृत्ति तदुक्तं न्यायतत्त्वे करणपादाष्टमाधिकरणे चक्षुषा श्रवणं सर्पाणामिति नियम्यत इत्यादि, यत्तूक्तं तत्त्वरत्नाकरे कर्णशष्कुलीशरीरनयनगोलकरसनानासिकाधिष्ठानानि च तानीति तत्प्रायिकं मन्तव्यम् एतस्य नाभसत्ववदिगुपादानत्ववादानामनन्यथासिद्धाहङ्कारिकत्ववच-

नंबलादाप्यायितत्त्वादिभिर्निर्वाहः। यत्तु करणपादपञ्चमाधिकरणे नेत्रश्रोत्रादिशक्तीनामालोकशब्दाद्यात्मकत्वमुक्तं यच्च तथैव सप्तमाधिकरणे अन्नस्यातिसूक्ष्मपरिणाममिन्द्रियमित्यादिना कर्मेन्द्रियाणामप्यन्नपरिणामित्वादित्यादिना चेन्द्रियाणां भौतिकत्वं प्रतीतं तदप्यखिलमाप्यायनाभिप्रायेण निर्वाह्यं, तथैव हि स्मृतिवचनमपि वेदार्थसंग्रहे निर्व्यूढं, यथा वैकारिकाहङ्कारादेकादशेन्द्रियाणि जायन्त इति हि वैदिका इत्युपक्रम्य एवमाहङ्कारिकाणामिन्द्रियाणां भूतैश्चाप्यायनं महाभारत उच्यत इति श्रोत्रं भौतिकं बाह्येन्द्रियत्वात्, आकाश इन्द्रियारम्भकः भूतत्वात्, शब्दः स्वसमानजातीयगुणवतेन्द्रियेण गृह्यते बहिरिन्द्रियव्यवस्थाहेतुगुणत्वात्, श्रोत्रं स्वग्राह्यगुणसजातीयगुणवत् बहिरिन्द्रियत्वात् इत्यादीनां चक्षुराद्यभौतिकत्वस्य वक्ष्यमाणत्वात् साध्यविकलत्वश्रुतिबाधादिदूषणानि वाच्यानि।

शब्दस्य भूतधर्मत्वात् श्रुतेर्वैकारिकत्वतः।
संयुक्तनिलयोयोग्यः स* तया संप्रतीयते॥

शब्दस्य द्रव्याद्रव्यत्वश्रोत्रगमनशब्दागमनादिविवादमद्रव्ये शमयिष्यामः, त्वगादीनामपीन्द्रियाणां पूर्वोक्तश्रोत्रलक्षणे शब्दमात्रपदस्थाने क्रमात् स्पर्शमात्रपदन्यासेन लक्षणमूह्यं, तत्र त्वगाश्रयः कृत्स्नं वपुः, प्रदेशभेदेन स्पर्शोपलम्भतारतम्यं नखदन्तकेशादिषु स्पर्शानुपलम्भश्च प्राणमान्द्यतारतम्यादिति करणपादाष्टमाधिकरणे प्रोक्तं, यथायोग्यं वाय्वादिचतुष्टयं संयोगेन तया गृह्यते, स्पर्शादयस्तु संयुक्तनिष्ठतया चक्षुरादीनामाश्रया नयनगो†लकतालुना-

* स तथा संप्रतीयते इत्युचितं प्रतिभाति।
† वक्ष्यमाणरीत्या पदसाधुत्वमवधेयम्।

साः तत्र गजानां नासा हस्त इति पाणि*घ्राणयोरेकमेवा-
वाधिष्ठानमुच्यते तत्रोक्तं हस्तेन गन्धोपलब्धिर्गजानामेवे-
त्यादि जङ्गमशरीरेष्वेव प्रायशोऽयमिन्द्रियप्रदेशनियमः
चक्षुषा वायुव्यतिरिक्तभूतचतुष्टयं तथैव गृह्यते रूपादयो-
ऽपि स्पर्शादिवत्, दूरस्थग्रहणे तु चाक्षुषमहःप्रसरणात्
संबन्धसिद्धिः, तच्च करणपादद्वितीयाधिकरणे प्रपञ्चितं
प्रतिबिम्बग्रहणे तु स्वच्छद्रव्यप्रतिहतस्य नयनमहसः प्र-
तिस्रोतःप्रसरादिमूलकत्वं भ्रान्त्यधिकरणपूर्वपक्षेऽभिहितं,
स्फटिकादौ दर्शनवशान्नयनादिप्रभामात्रप्रवेशयोग्यं संस्था-
नमिति सर्वेषां तद्व्यवहितोपलम्भः, अञ्जनादिसंस्कृतनयन-
प्रभायाः पृथिव्यादावनुप्रवेशात्तदक्तचक्षुषां निधिप्रभृतेरु-
पलम्भः, जिह्वाघ्राणाभ्यां† तु रसगन्धौ क्रमात्संयुक्तनिष्ठ-
तया गृह्येते, उक्तं चेदं संबन्धद्वैविध्यं तत्त्वरत्नाकरे ।

तत्र वृद्धा विदामासुः संयोगं सन्निकर्षणम् ।
संयुक्ताश्रयणं चेति यथासम्भवमूह्यताम् ॥

इति, । तदेवं मनःस्पर्शनलोचनानि द्रव्याद्रव्यग्राह-
काणि श्रोत्रजिह्वाघ्राणान्यद्रव्यग्राहकाणि सर्वेषामपीन्द्रि-
याणां तत्तत्कालादिविशिष्टवस्तुग्राहकत्वात् द्रव्याद्रव्य-
ग्राहकत्वमेव वा, उक्तं च प्रमेयसंग्रहे श्रीविष्णुचित्तार्यैः
सन्मात्रप्रत्यक्षनिराकरणप्रसङ्गेन कालस्य वस्तुधर्मतया
सर्वप्रतीत्यन्तर्भावान् न पृथग्रूपत्वमिति । यत्तु वैशेषि-
कादिभिरुच्यते त्वगादीनीन्द्रियाणि क्रमाद्वाय्वाद्यात्मका-
नि स्पर्शादिषु मध्ये स्पर्शरूपरसगन्धमात्राभिव्यञ्जकत्वात्
स्वेदशैत्याभिव्यञ्जकपवनवत् दीपप्रभावत् दन्तान्तर्गत-

* पाणिसहिते घ्राणे इति पाणिघ्राणे इति विग्रहीतव्यं घ्राणपदे नासारन्ध्रो-
पाधिनिबन्धनं द्विवचनम् ।

† अत्र प्रायङ्कतया प्राप्तः पुँव्वद्भावः कुतोनजात इति समगरिषि स्थानान्तरे ।

नबलादाप्यायितत्त्वादिभिर्निर्वाहः। यत्तु करणपादपञ्चमाधिकरणे नेत्रश्रोत्रादिशक्तीनामालोकशब्दाद्यात्मकत्वमुक्तं यच्च तथैव सप्तमाधिकरणे अन्नस्यातिसूक्ष्मपरिणाममिन्द्रियमित्यादिना कर्मेन्द्रियाणामप्यन्नपरिणामित्वादित्यादिना चेन्द्रियाणां भौतिकत्वं प्रतीतं तदप्यखिलमाप्यायनाभिप्रायेण निर्वाह्यं, तथैव हि स्मृतिवचनमपि वेदार्थसंग्रहे निर्व्यूढं, यथा वैकारिकाहङ्कारादेकादशेन्द्रियाणि जायन्त इति हि वैदिका इत्युपक्रम्य एवमाहङ्कारिकाणामिन्द्रियाणां भूतैश्चाप्यायनं महाभारत उच्यत इति श्रोत्रं भौतिकं बाह्येन्द्रियत्वात्, आकाश इन्द्रियारम्भकः भूतत्वात्, शब्दः स्वसमानजातीयगुणवतेन्द्रियेण गृह्यते बहिरिन्द्रियव्यवस्थाहेतुगुणत्वात्, श्रोत्रं स्वग्राह्यगुणसजातीयगुणवत् बहिरिन्द्रियत्वात् इत्यादीनां चक्षुराद्यभौतिकत्वस्य वक्ष्यमाणत्वात् साध्यविकलत्वश्रुतिबाधादिदूषणानि वाच्यानि।

शब्दस्य भूतधर्मत्वात् श्रुतेर्वैकारिकत्वतः।
संयुक्तनिलयोयोग्यः स* तया संप्रतीयते॥

शब्दस्य द्रव्याद्रव्यत्वश्रोत्रगमनशब्दागमनादिविवादमद्रव्ये शमयिष्यामः, त्वगादीनामपीन्द्रियाणां पूर्वोक्तश्रोत्रलक्षणे शब्दमात्रपदस्थाने क्रमात् स्पर्शमात्रपदन्यासेन लक्षणमूह्यं, तत्र त्वगाश्रयः कृत्स्नं वपुः, प्रदेशभेदेन स्पर्शोपलम्भतारतम्यं नखदन्तकेशादिषु स्पर्शानुपलम्भश्च प्राणमान्द्यतारतम्यादिति करणपादाष्टमाधिकरणे प्रोक्तं, यथायोग्यं वाय्वादिचतुष्टयं संयोगेन तया गृह्यते, स्पर्शादयस्तु संयुक्तनिष्ठतया चक्षुरादीनामाश्रया नयनगोलकतालुना-

* स तया संप्रतीयते इत्युचितं प्रतिभाति।

† वक्ष्यमाणरीत्या पदसाधुत्वमवधेयम्।

सा: तत्र गजानां नासा हस्त इति पाणि*घ्राणयोरेकमेवाधिष्ठानमुच्यते तत्रोक्तं हस्तेन गन्धोपलब्धिर्गजानामेवेत्यादि जङ्गमशरीरेष्वेव प्रायशोऽयमिन्द्रियप्रदेशनियमः चक्षुषा वायुव्यतिरिक्तभूतचतुष्टयं तथैव गृह्यते रूपादयोऽपि स्पर्शादिवत्, दूरस्थग्रहणे तु चाक्षुषमहःप्रसरणात् संबन्धसिद्धिः, तच्च करणपादद्वितीयाधिकरणे प्रपञ्चितं प्रतिबिम्बग्रहणे तु स्वच्छद्रव्यप्रतिहतस्य नयनमहसः प्रतिस्रोतःप्रसरादिमूलकत्वं भ्रान्त्यधिकरणपूर्वपक्षेऽभिहितं, स्फटिकादौ दर्शनवशान्नयनादिप्रभामात्रप्रवेशयोग्यं संस्थानमिति सर्वेषां तद्व्यवहितोपलम्भः, अञ्जनादिसंस्कृतनयनप्रभायाः पृथिव्यादावनुप्रवेशात्तदक्तचक्षुषां निधिप्रभृतेरुपलम्भः, जिह्वाघ्राणाभ्यां† तु रसगन्धौ क्रमात्संयुक्तनिष्ठतया गृह्येते, उक्तं चेदं संबन्धद्वैविध्यं तत्त्वरत्नाकरे ।

तत्र वृद्धा विदामासुः संयोगं सन्निकर्षणम् ।
संयुक्ताश्रयणं चेति यथासम्भवमूह्यताम् ॥

इति, । तदेवं मनःस्पर्शनलोचनानि द्रव्याद्रव्यग्राहकाणि श्रोत्रजिह्वाघ्राणान्यद्रव्यग्राहकाणि सर्वेषामपीन्द्रियाणां तत्तत्कालादिविशिष्टवस्तुग्राहकत्वात् द्रव्याद्रव्यग्राहकत्वमेव वा, उक्तं च प्रमेयसंग्रहे श्रीविष्णुचित्तार्यैः सन्मात्रप्रत्यक्षनिराकरणप्रसङ्गेन कालस्य वस्तुधर्मतया सर्वप्रतीत्यन्तर्भावान् न पृथग्रूपत्वमिति । यत्तु वैशेषिकादिभिरुच्यते त्वगादीनीन्द्रियाणि क्रमाद्वाय्वाद्यात्मकानि स्पर्शादिषु मध्ये स्पर्शरूपरसगन्धमात्राभिव्यञ्जकत्वात् स्वेदशैत्याभिव्यञ्जकपवनवत् दीपप्रभावत् दन्तान्तर्गत-

---

* पाणिसहिते घ्राणे इति पाणिघ्राणे इति विग्रहीतव्यं घ्राणपदे नासारन्ध्रोपाधिनिबन्धनं द्विवचनम् ।

† अत्र प्राण्यङ्गतया प्राप्तः पुँव्द्भावः कुतोनजात इति समगरिषि स्थानान्तरे ।

तोयवत् कुङ्कुमगन्धाभिव्यञ्जकघृतवदिति तत्र व्यञ्जकत्वं नाम व्यक्तिं प्रति करणत्वं तदनुग्राहकत्वं वा सामान्येन हेतुत्वमात्रं वा इन्द्रियत्वं वा, न प्रथमद्वितीयौ, स्वेतरहेतुवर्गप्रतियोगिकस्य साधकतमत्वादेवैवंविधत्वेन, साधनवैकल्यासिद्धिप्रसङ्गात्, न तृतीयः, इन्द्रियाधिष्ठानतत्संस्कारादिभिरनैकान्तिकत्वात्, न तुरीयः, साधनवैकल्यात् सर्वेषां चागमबाधः स एव, धर्मिग्राहकबाधोऽपि आगमा[illegible]तिरिक्तेन्द्रियासिद्धेः, किञ्चित्करण[illegible]कत्वेतावतापि करणमा[illegible]सिध्येत् नातिरिक्तं, गोलकादेरवैकल्येऽपि कार्यवैकल्यादतिरिक्तं कल्प्यत इति चेन्न सूक्ष्मस्य वैकल्यस्य मूषिकाघ्रातबीजवद् दुर्दर्शत्वात् परिमलादिप्रसर इव पार्थिवगोलकावयवविशेषप्रसरवशादेव विषयसंबन्धसिद्धेः प्राप्यकारित्वाविरोधाच्च। अतोऽन्वयव्यतिरेकसिद्धस्यागमसिद्धस्य वा पक्षीकारे ग्राहकप्रमाणबाधोऽवर्जनीयः।

यत्त्वालोकाभावे जायमानो रूपसाक्षात्कारः तेजः*करणकः रूपसाक्षात्कारत्वात् सत्यालोके जायमानरूपसाक्षात्कारवदिति चक्षुषस्तैजसत्वमिति, तदपि न आप्यायकतेजसा सिद्धसाधनत्वात् तेजसस्तत्र कारणत्वेऽपि तच्चक्षुरेवेति नियामकाभावात् इन्द्रियवदेवानुद्भूतरूपस्पर्शस्य कस्यचिद्बाह्यतेजसोपि ग्रीष्मोष्मवत् सम्भवात्, उद्भूतरूपस्यापि साधने भवदभिमतेन्द्रियस्यापि तथात्वप्रसङ्गेन तमस एवासिद्धिप्रसङ्गात्, ईश्वरज्ञानेन चानैकान्त्यात्, अनित्यत्वेन विशेषणेऽपि स्वाप्रयोगिसाक्षात्कारैरनैकान्त्यात्, सर्वव्यभिचारस्थलव्यतिरिक्तत्वे सतीति विशेषणे तर्ककौशलम्, एवमनुमानान्तरेऽपि यथासम्भवं दूषणमू-

* अत्रापि तेजस्करणक इत्यपेक्षितम्।

ह्यम् । अप्राकृतश्रोत्रादिषु तु मुक्तेश्वरादीनां करणाधीनज्ञानप्रसराभावेऽपि स्वेच्छया परिग्रहवशाद्विषयसहकारिनियमे न निर्बन्धः तत्तदधिष्ठानविशेषादिभिस्तल्लक्षणम् ।

बौद्धा*स्तु बुद्धश्चक्षुषैव सर्वं जानातीति वदन्ति तदयुक्तं तादृशभवदभिमतसार्वज्ञ्ये प्रमाणाभावात्, चक्षुःप्रकर्षतारतम्यं क्वचिद्विश्रान्तं प्रकर्षतारतम्यत्वादित्यादेरपि चक्षुर्ग्राह्यवर्ग एव सर्वातिशायित्वसम्भावनया तदतिलङ्घनेन रसादिविषयविश्रयेयोगादिति ।

अथ कर्मेन्द्रियम् । उच्चारणादिष्वन्यतमक्रियाहेतुत्वं तल्लक्षणं । तत्पञ्चधा वागादिभेदात् वर्णोच्चारणकरणमिन्द्रियं वाक्, तच्च हृत्कण्ठजिह्वामूलतालुदन्तोष्ठनासामूर्धरूपस्थानापृक्तवृत्ति, शुकादिव्यतिरिक्तविहगादीनां तत्तदद्दृष्टसंस्थानादिसहकारिविरहाद्वर्णोच्चारणाशक्तिः शुकादीनामपि किञ्चित् तद्वैषम्यादुच्चारणवैषम्यं, शिल्पकरणमिन्द्रियं पाणिः, स च मनुष्यादीनामङ्गुल्यादिवृत्तिः, वारणादीनां नासावृत्तिः । ननु

* वैभाषिक-सौत्रान्तिक-योगाचार-माध्यमिक-भेदभिन्ना बुद्धशिष्या बौद्धाश्चत्वारो बहुधा गण्यन्तेऽवान्तरविशेषानविगणय्य । शिष्यैर्हि योगश्चाचारश्चेति द्वयं करणीयमिति तेषां शैली, तत्राप्राप्तार्थस्य प्राप्तये पर्यनुयोगो योगः, गुरूक्तार्थस्याङ्गीकरणमाचारः, ततश्च गुरूक्तार्थस्य शून्यतत्त्वस्याङ्गीकरणादुत्तमाः, यथाश्रुतप्रतिपत्तृत्वेन पर्यनुयोगस्याकरणादधमाश्च ये शिष्यास्ते उत्तमाधमभावेन मध्यमतामवाप्ता बुद्धेन माध्यमिका इत्यभाणिषत । ते च सर्वशून्यत्ववादिनः । ये च बुद्धोक्ते सर्वशून्यत्वे बाह्यार्थशून्यतामवधृत्यापि कथमान्तरस्य ज्ञानस्यापि शून्यत्वमिति पर्यनुयोगमकुर्वंस्ते पर्यनुयोगाचाराङ्गीकाराद् बुद्धेन योगाचारा अमानिषत । ये त्वस्मिन्नेवावसरे प्रथमतः किमपि नापृच्छन् किन्तूपदेशसूत्रस्यान्ते तर्कमकुर्वंस्ते बुद्धेन गुरुणा सूत्रान्ते प्रश्नकर्तृत्वात् सौत्रान्तिका इत्यगादिषत । ते बाह्यान्तरपदार्थानां सत्यत्वमभ्युपगम्यापि क्षणिकतामातिष्ठन्ते । बाह्यार्थानां प्रत्यक्षतामपलप्यानुमेयतां च वदन्ति । ये तु माध्यमिकान् प्रति सर्वशून्यत्वं, योगाचारान् प्रति च बाह्यार्थशून्यत्वमुपदिष्टं, सौत्रान्तिकान् प्रति तु बाह्याभ्यन्तरतत्त्वसत्त्वमित्यादिविरुद्धं बहूपदिष्टं गुरुणा बुद्धेनेत्येवमसूयामाविष्कुर्वन्तो बुद्धं बहु विरुद्धं भाषसे इत्येवमभाषिषत शिष्यास्तांस्तु नाहमेतादृशोभवन्त एव विविधविरुद्धार्थज्ञातार इति वैभाषिका इति समबूबुधद्बुद्ध इति ते वैभाषिकख्यातिमलप्सतेति नामनिरुक्तिश्चतुर्णाम् ।

तालुपादादिभिरपि अभ्यासपाटवान्मौक्तिकग्रथनलिपिकरणादिशिल्पदर्शनात्तत्रापि तद्वृत्तिरास्थेया सत्यं मात्रया वृत्तिरस्त्येव विरोधाभावाद्देशभेदेन इन्द्रियान्तरव्याप्ते देशेऽवस्थानादेश्चक्षुः स्पर्शनादौ दर्शनादिति। संचरणकरणमिन्द्रियं पादः, स च मनुष्यादीनां चरणादिवृत्तिः, भुजगपतगादीनां तूरःपक्षादिवृत्तिः, तदुक्तं करणपादाधृमाधिकरणे सर्पाः पादात् कर्मेन्द्रियादृते वक्षसा गच्छन्ति, तेषां गतिशक्तिरुरसि तस्मादुरगास्ते पन्नगाश्चेति पादात्कर्मेन्द्रियादित्यवयवविशेषलक्षणः सर्वेषामपि जन्तूनामेकादशेन्द्रियवत्त्वेन साक्षादिन्द्रियनिषेधायोगात्, तस्य च तत्तत्संस्थानादिसहकारेण स्थलजलगगनादिसंचारहेतुता, विहगादिपरकायप्रवेशे अन्वयव्यतिरेकदर्शनात्, मलादित्यागकरणमिन्द्रियं पायुः, स च तत्तदवयववृत्तिः, विहङ्गविशेषादीनां तु मुखादिवृत्तिः, तच्चोक्तं तत्रैवाधृमाधिकरणे यथा वा मान्थालादीनामास्येन विण्मूत्रविसर्ग इति, आनन्दविशेषकरणमिन्द्रियमुपस्थः, स च मेहनादिवृत्तिः। ये तु कर्मेन्द्रियाणि नाभ्युपगच्छन्ति तैर्ज्ञानेन्द्रियाणि नाभ्युपेयानि तर्कागमयोरुभयत्राविशेषात्, चक्षुर्गोलकादाविव दृष्टावैकल्येऽपि पादादौ संचारादेः क्वचित् सूक्ष्मदोषविशेषेण प्रतिबन्धादिति। एतेषां संख्यानिर्णयाधिकरणोपसंहारे भाष्यम् इत्यादिश्रुतिस्मृतिसिद्धेन्द्रियसंख्या स्थिता, अधिकसंख्यावादा मनोवृत्तिभेदाभिप्रायाः, न्यूनव्यपदेशास्तु तत्रतत्र विवक्षितगमनादिकार्यविशेषप्रयुक्ता इति, अणुत्वं चैषामुपलब्ध्ययोग्यपरिच्छिन्नपरिमाणत्वमात्रमेव, अणवश्चेति सूत्रोक्तमिति भाष्ये व्यक्तम्। एते सर्व एव समाः सर्व एवानन्ताः इति श्रुतिस्तूपकरणत्वसाम्यम् अथ यो ह्येताननन्तानुपास्त इत्युपास्यतया विहितप्राण-

विशेषणभूतकार्य्यबाहुल्यं चाभिप्रैति । अत एव तेषां परिच्छेन्नविचित्रपरिमाणत्वं स्थितं विकारशीलत्वाच्च मशकमातङ्गादिनानादेहेषु विचित्रपरिणामत्वं कालभेदेन परिणामभेदा विरोधं ज्ञाने समर्थयिष्यामः । सर्वेषां चैषां स्वाधिष्ठानदोषादिरेव दोषः सुषुप्त्याद्यवस्थास्वव स्थावराद्यवस्थास्वदृष्टादिवशात् तत्तद्वृत्तिनिरोधतारतम्यं प्रबलादृष्टसहकारात् गन्धर्वयोगिप्रभृतीन्द्रियाणामतिसूक्ष्मव्यवहितविषयता उत्पत्तेरारभ्यादृष्टवशात् प्रतिपुरुषनियतानामपि तेषां जीवत्परकायप्रवेशे वि[illegible]ष्टादृष्टान्तर्वशात् कायवदेव परोपकारकत्वं स्वेन्द्रियैः सह स[illegible]त्र प्रवेशात्तेषामेव वा तत्राप्युपकारकत्वं मृतकायप्रवेशे हि स्वेन्द्रियैरेव तथा जीवत्कायप्रवेशेऽपि स एव समाधिरुचितः । स्मृतिश्च ।

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥

इति, मृतकायस्य च परकायव्यवहार उपचारात्, परकायारम्भकशरीरैकदेशैरस्थ्यादिभिः प्रविष्टस्य कायलक्षणसंघात आरभ्यते, तदा च स्वशरीरं मृतमेव मृतकायप्रवेशवत् पुनः प्रवेशः, अनेकशरीराधिष्ठाबशक्तानां तु यथेष्टम्, शरीरविनाशे चेन्द्रियाण्याप्यायकैर्मात्रया हीयन्ते शरीरान्तरे पुनरापूर्यन्ते मुक्तपरित्यक्तान्यन्यपरिगृहीतान्यपरिगृहीतानि वा यावत्प्रलयमवतिष्ठन्त इत्यादिकं द्रष्टव्यम् । ननु कर्मेन्द्रियाणां शरीरेण सहोत्पत्तिविनाशौ न पुनःशरीरान्तरगमनमस्ति, तथा हि सारे ऽभिहितम् हस्तादयोऽपीन्द्रियाणि जीवे देहान्तरवस्थिते उपकारकत्वाविशेषादिति, एवं भाष्येऽप्युक्तम्, न सप्तैवेन्द्रियाणि अपि त्वेकादश हस्तादीनामपि शरीरे स्थिते जीवे तस्य भोगोपक-

तालुपादादिभिरपि अभ्यासपाटवान्मौक्तिकग्रथनलिपिकरणादिशिल्पदर्शनात्तत्रापि तद्वृत्तिरास्थेया सत्यं मात्रया वृत्तिरस्त्येव विरोधाभावाद्देशभेदेन इन्द्रियान्तरव्याप्ते देशेऽवस्थानादेश्चक्षुः स्पर्शनादौ दर्शनादिति। संचरणकरणमिन्द्रियं पादः, स च मनुष्यादीनां चरणादिवृत्तिः, भुजगपतगादीनां तूरःपक्षादिवृत्तिः, तदुक्तं करणपादाधिकरणे सर्पाः पादात् कर्मेन्द्रियादृते वक्षसा गच्छन्ति, तेषां गतिशक्तिरुरसि तस्मादुरगास्ते पन्नगाश्चेति पादात्कर्मेन्द्रियादित्यवयवविशेषलक्षणः सर्वेषामपि जन्तूनामेकादशेन्द्रियवत्त्वेन साक्षादिन्द्रियनिषेधायोगात्, तस्य च तत्तत्संस्थानादिसहकारेण स्थलजलगगनादिसंचारहेतुता, विहगादिपरकायप्रवेशे अन्वयव्यतिरेकदर्शनात्, मलादित्यागकरणमिन्द्रियं पायुः, स च तत्तदवयववृत्तिः, विहङ्गविशेषादीनां तु मुखादिवृत्तिः, तच्चोक्तं तत्रैवाधिकरणे यथा वा मान्थालादीनामास्येन विण्मूत्रविसर्ग इति, आनन्दविशेषकरणमिन्द्रियमुपस्थः, स च मेहनादिवृत्तिः। ये तु कर्मेन्द्रियाणि नाभ्युपगच्छन्ति तैर्ज्ञानेन्द्रियाणि नाभ्युपेयानि तर्कागमयोरुभयत्राविशेषात्, चक्षुर्गोलकादाविव दृष्टावैकल्येऽपि पादादौ संचारादेः क्वचित् सूक्ष्मदोषविशेषेण प्रतिबन्धादिति। एतेषां संख्यानिर्णयाधिकरणोपसंहारे भाष्यम् इत्यादिश्रुतिस्मृतिसिद्धेन्द्रियसंख्या स्थिता, अधिकसंख्यावादा मनोवृत्तिभेदाभिप्रायाः, न्यूनव्यपदेशास्तु तत्रतत्र विवक्षितगमनादिकार्य्यविशेषप्रयुक्ता इति, अणुत्वं चैषामुपलब्ध्ययोग्यपरिच्छिन्नपरिमाणत्वमात्रमेव, अणवश्चेति सूत्रोक्तमिति भाष्ये व्यक्तम्। एते सर्व एव समाः सर्व एवानन्ताः इति श्रुतिस्तूपकरणत्वसाम्यम् अथ यो ह्येतानन्तानुपास्त इत्युपास्यतया विहितप्राण-

विशेषणभूतकार्य्यबाहुल्यं चाभिप्रैति । अत एव तेषां परिच्छेदन्नविचित्रपरिमाणत्वं स्थितं विकारशीलत्वाच्च मशकमातङ्गादिनानादेहेषु विचित्रपरिणामत्वं कालभेदेन परिणामभेदा विरोधं ज्ञाने समर्थयिष्यामः । सर्वेषां चैषां स्वाधिष्ठानदोषादिरेव दोषः सुषुप्त्याद्यवस्थास्ववस्थावराद्यवस्थास्वदृष्टादिवशात् तत्तद्वृत्तिनिरोधतारतम्यं प्रबलादृष्टसंस्कारात् गन्धर्वयोगिप्रभृतीन्द्रियाणामतिसूक्ष्मव्यवहितविषयता उत्पत्तेरारभ्यादृष्टवशात् प्रतिपुरुषनियतानामपि तेषां जीवत्परकायप्रवेशे विशिष्टादृष्टान्तरवशात् कायवदेव परोपकारकत्वं स्वेन्द्रियैः सह सर्वत्र प्रवेशात्तेषामेव वा तत्राप्युपकारकत्वं मृतकायप्रवेशे हि स्वेन्द्रियैरेव तथा जीवत्कायप्रवेशेऽपि स एव समाधिरुचितः । स्मृतिश्च ।

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥

इति, मृतकायस्य च परकायव्यवहार उपचारात्, परकायारम्भकशरीरैकदेशैरस्थ्यादिभिः प्रविष्टस्य कायलक्षणसंघात आरभ्यते, तदा च स्वशरीरं मृतमेव मृतकायप्रवेशवत् पुनः प्रवेशः, अनेकशरीराधिष्ठानशक्तानां तु यथेष्टम्, शरीरविनाशे चेन्द्रियाण्याप्यायकैर्मात्रया हीयन्ते शरीरान्तरे पुनरापूर्यन्ते मुक्तपरित्यक्तान्यन्यपरिगृहीतान्यपरिगृहीतानि वा यावत्प्रलयमवतिष्ठन्त इत्यादिकं द्रष्टव्यम् । ननु कर्मेन्द्रियाणां शरीरेण सहोत्पत्तिविनाशौ न पुनःशरीरान्तरगमनमस्ति, तथा हि सारे ऽभिहितम् हस्तादयोऽपीन्द्रियाणि जीवे देहान्तरवस्थिते उपकारकत्वाविशेषादिति, एवं भाष्येऽप्युक्तम्, न सप्तैवेन्द्रियाणि अपि त्वेकादश हस्तादीनामपि शरीरे स्थिते जीवे तस्य भोगोपक-

रणत्वात् कार्य्यभेदाच्च, दृश्यते हि श्रोत्रादीनामिव हस्तादीनामपि कार्य्यभेद आदानादिरिति। न्यूनत्वव्यपदेशास्तु तत्रतत्रविवक्षितगमनादिकार्य्यविशेषप्रयुक्ता इति च, दीपे तु व्यक्तमेवोक्तं तत्र श्रोत्रादीनि जीवेन सह शरीरान्तरगमनेऽपि गच्छन्ति वाग्घस्तादीनि कर्मेन्द्रियाणि तु स्थिते शरीरे तेनैव सहोत्पत्तिविनाशयोगीन्युपकारकाणि इत्यादि, अतो यादवप्रकाशवत् कर्मेन्द्रियाणां प्रतिशरीरमुत्पत्तिविनाशौ भाष्यकाराभिमतौ। नैतदेवम्, प्राणगतेश्चेति सूत्रे तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति इत्यादिश्रुतेरुदाहृतत्वात्। सप्तगतेरित्यधिकरणे यानि त्वितराणि विषयाणां ग्राहकत्वेन तेषामौपचारिकः प्राणव्यपदेश इति पूर्वपक्षं कृत्वा हस्तादयस्तु स्थिते ऽतो नैवमिति तेषामपि प्राणत्वसमर्थनाच्च प्राणगतेश्चेत्यस्यैव समनन्तरे अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वादिति सूत्रे भाष्यं—यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वायुं प्राणश्चक्षुरादित्यमित्यादिना प्राणानां जीवमरणकाले अग्न्यादिष्वप्ययाश्रवणान्न तेषां जीवेन सह गमनमिति गतिश्रुतिरन्यथा नेयेति चेन्न भाक्तत्वादग्न्यादिष्वप्ययश्रवणस्येत्यादिकम्, अतः कर्मेन्द्रियस्य वाचोऽत्र गतिरभ्युपेतेत्युपलभ्यते तदन्येषामपि सममेव, सारेऽप्युक्तम् सप्तानां गतिश्रवणं विशेषणं च तेषां प्राधान्यादिति, दीपेऽपि सप्तानामेव गतिश्रवणं योगकाले विशेषणं च ज्ञानेन्द्रियाणां मनसः तत्प्रवृत्तिरूपबुद्धेश्च प्राधान्यादित्यादि, न चाहङ्कारिकेन्द्रियवादिनः प्रतिशरीरमिन्द्रियोत्पत्तिविनाशाभ्युपगम उपपद्यते पाण्याद्यधिष्ठानानि तु नेन्द्रियाणीति तदुत्पत्तिलयोपपत्तिः कथं तर्हि श्रोत्रादीनीत्यादेर्निर्वाहः, इत्थं परमतवत् प्रति शरीरमुत्पत्तिविनाशाभ्युपगमेऽपि ते-

षामिन्द्रियत्वं सिद्ध्यतीति कृत्वा हस्तादयस्तु स्थितेऽतो नैवमिति सूत्रस्य योजनान्तराभिप्रायेणैवमुक्तम् । अत एकादशेन्द्रियाण्यपि शरीरान्तरेष्वप्यनुवर्तन्त इति भाष्यकाराभिप्रेतमिति प्रतीमः । एवमेषामेवैतावतामेवैवंस्वभावानामेवागमेनैव सिद्धत्वात्सौगतवैभाषिकचार्वाकप्रभृतीनां स्त्रीन्द्रियपुरुषेन्द्रियादिकल्पनं कर्मेन्द्रियपरित्यागः, एकेन्द्रियवादः, तत्रापि त्वगिन्द्रियैकत्वस्वीकारः, शरीरस्यैवेन्द्रियत्वं कर्मेन्द्रियाणां शरीरोत्पत्तिविनाशयोरुत्पत्तिविनाशौ, मनोविभुत्वनित्यत्वतैजसत्वनिर्मनस्कत्वादीनि, राजसाहङ्कारजन्यत्वभौतिकत्वादीन्यन्यान्यपि प्रलपितान्यनादरणीयानि । युक्तिबाधादयश्च यथासंभवमुन्नेया इति ।

अथ तन्मात्रादिसृष्टिः । भूतानामव्यवहितसूक्ष्मावस्थाविशिष्टं द्रव्यं तन्मात्रं, दधिरूपेण परिणममानस्य पयसो मध्यमावस्थावद् भूतरूपेण परिणममानस्य द्रव्यस्य ततः पूर्वा काचिदवस्था तन्मात्रा, तद्विशिष्टमपि द्रव्यं तन्मात्रमित्युच्यते तदेव च भूतोपादानमिति न शब्दादिगुणमात्राद्भूतसृष्टिः विशिष्टशब्दादिविषयाधिकरणं भूतं तत्रापि प्राकृताप्राकृतविवेकः पूर्ववत्, तन्मात्राणि च भूतानि च प्रत्येकं पञ्चधा शब्दतन्मात्राकाशादिभेदात् तत्र तामसाहङ्काराकाशयोर्मध्यमावस्थाविशिष्टं द्रव्यं शब्दतन्मात्रम्, एवमुत्तरोत्तरतन्मात्रेष्वपि तत्तद्भूतद्वयमध्यमावस्थाविशिष्टत्वम् अविशिष्टतत्तद्गुणाश्रयत्वं तत्तद्भूतोपादानत्वं च लक्षणमूह्यम् ।

सांख्यास्तु पञ्चापि तन्मात्राणि साक्षात्तामसाहङ्कारोत्पन्नानि तत्र शब्दतन्मात्रमाकाशारम्भकम् इतराणि तु तन्मात्राणि पूर्वपूर्वतन्मात्रसहकृतान्युत्तरोत्तरभूतारम्भ-

काणीत्याहुः। तदसत् आकाशाद्वायुरित्याद्यनन्यथासिद्धो-पादानक्रमविशेषाभिधानदर्शनात् भगवत्पराशरादिभिश्च प्रपञ्चितत्वात् तन्मात्राणि भूतादाविति श्रुतिस्तु न साक्षा-द्यौगपद्येनाप्ययपरा पृथिव्यप्सु प्रलीयते इत्यादिपूर्ववा-क्यविरोधात् आकाशाद्वायुरित्यादिश्रुत्यन्तरविरोधाच्च तथात्वे हि पृथिवी गन्धतन्मात्रे लीयते आपो रसतन्मात्रे लीयन्त इत्यादिक्रममुक्त्वा तन्मात्राणि भूतादाविति व-क्तव्यं न चेयं श्रुतिरत्यन्तक्रमनिबन्धनपरा आकाश इन्द्रि-येषु इन्द्रियाणि तन्मात्रेष्विति भवतामप्यनभिमतक्रम-विशेषापातप्रतीतेः, एवमष्टौ प्रकृतयः षोडश विकाराः इति श्रुतिरपि यथाकथं चिन्नेया अत उक्तस्य शब्दतन्मात्र-लक्षणस्य नातिव्याप्तिः सहोत्पत्तावपि समानकालीनत्व-मेव न त्वाकाशाहङ्कारापेक्षया स्पर्शतन्मात्रत्वादीनां म-ध्यमावस्थात्मकत्वमिति नातिव्याप्तिः। अस्पर्शत्वे सति विशिष्टशब्दाधारत्वं श्रोत्राप्यायकत्वं चाकाशलक्षणम्, अयं चावकाशदानादिनोपकरोतीति शास्त्रसिद्धत्वादभ्युपेत्यम् आकाशरूपपरिणामरहितप्रकृत्यादिप्रदेशेष्वप्यवकाशो-ऽस्त्येव अन्यथा तत्र स्पर्शवद्वृत्त्यादिनिरोधप्रसङ्गात् आका-शादेर्नित्यत्वादिसाधनानि निरवयद्रव्यत्वादीन्यागमबा-धान्यतरानैकान्तिकत्वादिभिर्दूषणीयानि। किं चेदं नित्यत्वं किमवस्थापत्तिराहित्यं किं वा द्रव्यस्य सर्वदा सत्त्वमिति न प्रथमः, पार्थिवपरमाण्वादिभिरनैकान्तिकत्वात्पक्षे च शब्दवत्त्वतदभावाद्यवस्थाभेदस्वीकारेण बाधापसिद्धान्त-प्रसङ्गात्, न द्वितीयः, सिद्धसाधनत्वात् अवयवविश्लेषल-क्षणो विनाशो निषिध्यत इति चेन्न अहङ्कारादिदशाप्राप्तस्य सिद्धसाधनत्वादेव वायुत्वपञ्चीकरणादिप्राप्तावस्थाभेदे सर्वोपपत्तिः प्रागेवोक्ता। प्रत्यक्षश्चायमाकाशः यदोन्मीलनं

चक्षुषस्तदैवाकाशोऽयमिति प्रतीतेः। न च नीरूपस्य कथं चाक्षुषमिति वाच्यं रूपवतो वा कथं चाक्षुषमिति प्रसङ्गात् उपलम्भसिद्ध्या योग्यतयेति चेत् तुल्यम्। अन्यथा रूपरूपिरूपैकार्थसमवायाद्यवान्तरभेदकल्पनानुपपत्तेश्च पञ्चीकरणेन वा व्यष्टिरूपसिद्धिर्भाष्योक्ता, प्रमेयसंग्रहे चोक्तं यथा कालस्य वस्तुधर्मतया सर्वप्रतीत्यन्तर्भावान्न पृथग्रूपवत्त्वं गगनस्य दिशां च त्रिवृत्करणेन रूपवत्त्वमित्यादि, यत्तूक्तं भाष्ये न चक्षुषा सन्मात्रं गृह्यते तस्य रूपरूपिरूपैकार्थसमवेतपदार्थग्राहित्वादिति तत्प्रत्यक्षस्य विशिष्टविषयत्वपरं न तु रूपवन्मिश्रितत्वाख्यसंबन्धवर्जनपरम् अत एव हि रूपरूपिरूपैकार्थसन्निवेशाद्यालिप्तमेव चाक्षुषमिति स्थितमिति प्रमेयसंग्रहोक्तिः, अतः संयुक्तसमवेतस्यापि रूपस्य कार्य्यकरत्वमुपलम्भबलाद् ग्राह्यं,न चेश्वरादावतिप्रसङ्गः गुरुत्वादितुल्यत्वात्, वाय्वादीनां तु पञ्चीकरणेन रूपवत्त्वेऽपि रूपानुद्भवादचाक्षुषत्वम्। यत्तु प्रमेयसंग्रहे अद्य जातस्य चक्षुरपि न ह्यरूपं वायुं गृह्णातीति तदप्युद्भूतरूपाभावपरमेव अत एवं प्रकारेण रूपित्वान्नभसः आकाशमस्ति श्याममिति प्रतीतिः, अत एव चेयं प्रतीतिर्नावरणाभावावलम्बना विधिरूपत्वाभावान्तराभाववादिनस्त्वदोषत्वात्, अतिरिक्तवादिनां तु प्रागभावादिविकल्पदुःस्थत्वात् कृत्स्नप्रतियोगिकनिषेधस्यासिद्धेः आवरणेष्वपि तादात्म्याभावस्य सामानाधिकरण्यनिषेधात्मकत्वात्संसर्गाभावस्य च यत्किंचित्संसर्गिप्रत्ययमन्तरेणानुपपत्तेः, तथा च स एवाकाश इति स्यात्। न च काल्पनिकाधिकरणनिषेधः अबाधितत्वायोगात्, नाप्यालोकतिमिरावलम्बनः तेष्वाकाशप्रतीतिव्यवहारयोरयोगात् आरोपस्यापि प्रतीतिपूर्वकत्वात्, अप्रत्यक्षत्वे च तस्या

ङ्गुल्या निर्देशपूर्वकपामरव्यवहारगोचरता निर्मूला स्यात्, शब्दादिकरणपरिशेषानुमानादेरपामरविषयत्वादशक्यत्वाच्च न हि शब्दस्य गन्धवद् भेर्य्याद्यवयवधर्मत्वे कारकतया व्यञ्जकतया चाभ्युपगतवायुधर्मत्वे वा कश्चिद्दोषः। न च स्पर्शनादिग्राह्यत्वप्रसङ्गः, एकभूतगुणस्यैव गन्धरसरूपादेर्भिन्नत्वग्राह्यत्वस्य दृष्टत्वात्, एवं बाधकान्तरमपि दूष्यं गौरवं च भवतो बाधकं स्यात्, आगमवशात्तु वयमाकाशे शब्दमिच्छामः, आकाशात् स्पर्शतन्मात्रं ततो वायुः तस्य विशिष्टस्पर्शवत्त्वे सति रूपशून्यत्वम्, अस्मदादिस्पर्शनैकेन्द्रियग्राह्य द्रव्यत्वम्, अनुष्णाशीतस्पर्शविशिष्टत्वे सति गन्धशून्यत्वमित्यादिलक्षणम् अस्य त्वगिन्द्रियायोग्यत्वाप्रत्यक्षत्वादिसाधनान्यरूपिद्रव्यत्वादीन्युपलम्भविरोधानैकान्त्यादिभिर्निरसनीयानि, स्पर्शवत्त्वमेव हि स्पर्शनेन्द्रियग्राह्यत्वौपयिकं न रूपवत्त्वं, तथा च भाष्यं च तदनुसारिविवरणकारवचनं च, स्पर्शनमपि न सन्मात्रविषयं स्पर्शतद्वद्वस्तुविषयत्वादिति, प्रमेयसंग्रहश्च त्वगिन्द्रियस्यापि स्पर्शवद्वस्तुविषये शक्तिरिति। यदि च स्पर्शानुमेयो वायुः स्यात् क्षितिसलिलतेजसामपि स्पर्शनग्राह्यत्वं न स्यात् तत्रापि ततस्तदनुमानस्य सुवचत्वात् उपलम्भस्य समत्वात् तस्य च वायोः स्वभावाद्वा अदृष्टात्मकेश्वरसंकल्पाद्वा स्वारसिकं तिर्य्यक्प्रसरणं पार्थिवादिद्रव्येण वा वाय्वन्तरेण वाऽभिघातवशाद्भ्रमणोर्ध्वगमनादयः ते च दूरस्थेन तृणरज्जुप्रभृतीनां भ्रमणोर्ध्वगमनादिभिरनुमेयाः तत्र*त्येन तु स्पर्शनग्राह्याः एतेन वायोर्नानात्वमपि सिद्धम्। अस्य च सर्वतः पार्थिवाप्योपरोधे सति स्तम्भः सलिलाऽऽतपकु-

* एवमेव पाठोमूले।

सुमादियोगात् शीतोष्णसौरभारोपः तथा चान्वयव्यतिरेकौ, एतेन वृद्धिः समानैः सर्वेषां विपरीतैर्विपर्ययः-इति न्यायाद्वायुः शीत इत्यायुर्वेदानुसारिणां वादिनां मतं निरस्तम्।

शीतसंवर्ध्यत्वोष्णापचेयत्वादिभिः साम्यात्तु शीततयोपदेशः, न तु सजातीयविजातीयाभ्यामेवोपचयापचयाविति नियमः पार्थिवादिभिर्दोषाणामनियमेनोपचयापचयदर्शनात् तत्रापि तत्तत्पदार्थसांसिद्धिकसलिलाद्यंशशक्त्या तदुपपत्तिरिति चेदत्रापि तथात्वे को विरोधः व्यवस्थस्य मारुतस्य तदुपचयापचयहेतूनां च पाञ्चभौतिकत्वात् आपोमयः प्राण इति श्रुत्या प्राणस्य सलिलाप्यायितत्वसिद्धेश्च शीतसंवर्ध्यत्वाद्युपपत्तेः, दुरूहां वस्तुशक्तिमवलम्ब्यैव स्वभावः प्रभावश्च तैरेव क्वचित्क्वचिद्वर्ण्यते यथा दुन्दुभिस्वनादौ, सा चात्राप्यनिवार्येति न सङ्कटं किञ्चित्, स च त्वगिन्द्रियाप्यायनेन प्राणशरीरविषयात्मतया चोपकरोति, तत्र शरीरधारणादिहेतुर्वायुविशेष एव प्राणसंज्ञः, न वायुमात्रं नापि वायुक्रिया, सूत्रितं च न वायुक्रिये पृथगुपदेशात् इति, स एव व्यापारभेदात् पञ्चधा दशधा चोच्यते सूत्रितं च पञ्चवृत्तिर्मनोवद्व्यपदिश्यत इति, प्राणापानव्यानोदानसमानभेदात्पञ्चधा नागकूर्मकृकलदेवदत्तधनञ्जयाख्यैर्भेदैः दशधा, प्राणशब्दस्तु वादशब्दवत् सामान्यतो विशेषतश्च निष्पन्नः अस्य शरीरेन्द्रियधारकत्वं यस्मिन्नुत्क्रान्त इदं शरीरं पापिष्ठतरमिव दृश्यते एतस्यैव सव रूपमभवन्नित्यादिश्रुतिसिद्धम्। भाष्यं च प्राणस्य तु शरीरेन्द्रियधारणमित्यादि प्रपञ्चितश्चायमर्थः प्राणविद्यायाम्, एवं जङ्गमशरीरेष्विव स्थावरशरीरेष्वप्यसावस्त्येव मूलनिषिक्तसलिलदोहदपार्थिवधातूनामभ्यादानात्, अ-

त्रापि भाष्यं–स्थावरेषु हि प्राणसम्भवेऽपि तस्य पञ्चधाऽवस्थाय शरीरस्य धारणार्थत्वेनावस्थानं नास्तीति, अत एव प्राण इति सूत्रे दीपश्च शिलाकाष्ठादिषु प्राणायत्तस्थित्यभावादिति, नखदन्तरोमकिणादीनामपि मन्दप्राणाश्रयत्वं न्यायतत्त्वे करणपादाष्टमाधिकरणे प्रपञ्चितम्, अस्यैव रेचकपूरककुम्भकरूपं नियमनमष्टाङ्गयोगे चतुर्थमङ्गम्, आयुर्वेदेषु योगानुशासने चास्य प्रपञ्चो ग्राह्यः प्राणाख्याद्वायोरन्य एव शरीरोपादानभूतो वायुस्तदुपादानत्वं वायुप्रचुरेषु मारुतादिशरीरेषु व्यक्तं, विषयत्वं चण्डवाततालवृन्तपवनादिषु वायोरूपतन्मात्रं ततस्तेजः वायोरग्निरित्यग्निशब्दस्तेजोमात्रपरः। ननु वायोरग्निरित्युपादानत्वविवक्षायां प्रत्यक्षविरोधः पर्णतृणकाष्ठादीनामेव भस्म–धूम धूमध्वजादिरूपेण परिणामदर्शनात् पर्णादीनां च पार्थिवत्वात् अप्रत्यक्षैस्तदानीमप्यदृष्टाद्युपनीतैस्तेजोवयवैर्ज्वालारम्भ इति कल्पनस्य गुरुत्वात् विचित्रारम्भस्य च भस्मधूमाङ्गारादिषु दृष्टत्वेनावर्जनीयत्वात् स्पर्शविशेषस्य धूमादिगतगन्धविशेषवद्दूरालभास्पर्शादिवदुपपत्तेः, अतः सलिलस्य सहकारिभेदात् फेनतरङ्गबुद्बुदवत् पृथिव्या एवांशतो हुतवहादिपरिणाम इति सिद्धे वायोरग्निरित्यादि निमित्तकारणमात्रेणाप्युपपद्यत इति तदसत् अन्यथा सिद्धापादानप्रकरणपठितसृष्टिप्रलयक्रमक्रियाविरोधात्, पर्णतृणादीनामपि पञ्चभौतिकत्वस्य वक्ष्यमाणत्वात् तत एव तदंशतो निर्वृत्तरपीष्टत्वात् ज्वालानिर्वापणानन्तरमेव तदवयवानुपलम्भवत् तदुत्पत्तेः प्रागपि तथैवोपपत्तौ गौरवस्याप्यभावात् अबिन्धने च जातवेदसि पार्थिवपरिणामात्मकत्वकल्पनायोगात्, अनियतोपादानक्लृप्तेर्गुरुत्वात् तदेवं तत्रतत्र लीन एवाग्निः सहकारिविशेषा-

दृष्टाद्युपनीतसजातीयावयवयोगाच्चोद्भूत उपलभ्यते, व्यवहरन्ति च महर्षयोऽपि काष्ठेऽग्निरिव शेरते, दारुण्यग्निर्यथा तैलं तैले तद्वदसौ पुमान् इत्यादि, अतः समष्टिसृष्टिदशायां वायोरेवोपादानादग्नेरुत्पत्तिरुपपन्ना, व्यष्टिदशायां तु तेजस एव सूक्ष्मात् स्थूलतेजसः समुद्भव इति उष्णस्पर्शत्वभास्वररूपवत्त्वादिकं च तेजसो लक्षणं, तच्च [illegible]श्च-*क्षुषोराप्यायकं तेजोमयी वाक् आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशत् रश्मिभिरेषोऽस्मिन् प्रतिष्ठित इत्यादिश्रुतेः दिवाभीतादिव्यतिरिक्तलोचनानामञ्जनविशेषादिशून्यानां तिमिराद्यतिरिक्तविषयप्रत्ययोत्पादने प्रभूतरूपमाप्यायकातिरिक्तं तदवश्यापेक्षितं, वैश्वानराद्यात्मना च तदुपकारः, वैश्वानरो नाम शरीरान्तर्वर्ती प्राणादिसंयोगादशितपीतपाकादिहेतुस्तेजोविशेषः, शरीरत्वं तेजस्तेजःप्रचुरेषु दहनतपनादिशरीरेषु व्यक्तं विषयत्वं चन्द्रिकाऽऽतपशतह्रदाहुतवहादिषु, तत्र हुतवहस्य ज्वालात्मकस्य दाह्यनाशे नाशदर्शनात् पुष्कलकारणक्रमोपनिपातादेकदाऽनेकदीपादर्शनाच्चाशुतरविनाशित्वरूपं क्षणिकत्वं सिद्धं, प्रत्यभिज्ञा तु निष्क्रान्तप्रविष्टवदसम्भवान्निर्वापितारोपितदीपादिष्विव वान्यथासिद्धा प्रत्यक्षत्वं ज्वालाभेदस्योक्तं तत्त्वरत्नाकरे निपुणनिरीक्षणे च जलवेणिकावत् ज्वालासञ्चरणं दृश्यत इति अहेतुक एव ज्वालाविनाश इति बौद्धगन्धिनः केचिदाहुस्तदयुक्तं क्षणभङ्गप्रसङ्गात्, अदृष्टेश्वरादेश्च हेतोरवर्जनीयत्वात्, वेगादेश्चाविनाभूतस्यावस्थान्तरापादकत्वोपपत्तेः, एवमन्त्यशब्दचरमसंस्कारादिष्वपि स्वतोविनाश†वा-

* अत्रेतरेतरद्वन्द्वो न भवतीति पूर्वोक्तरीत्या पदसाधुत्वमवधेयम्।

† अमुं च विषयं मिथ्यावादिमतनिरसनावसरे पर्यगूशुधं स्नेहपूर्तेः प्रथमधारापपाताद्यविन्दो।

द्गिनो निरस्ताः ।

तदखिलमभिप्रेत्योक्तं वेदार्थसंग्रहे दावाग्न्यादीनामपि पूर्वावस्थाविरोधिपरिणामपरम्परा अवर्जनीयैवेति, तत्र भौमदिव्यादिभेदः तत्रतत्र सामग्रीकार्याणि क्षणिकत्वस्थिरत्वादीनि। यथायोगमुन्नेयानि तेजःपुनः सामान्यतो द्विविधम्, प्रभा प्रभावच्चेति आवरणसदसद्भावाधीनसङ्कोचविकाशो यथा वेगशक्त्यधिष्ठानदेशाधिकदेशप्रसारी तेजोविशेषः प्रभा, सा च प्रभावद्भिः सहोत्पद्यते सहैव च विनश्यति, न चासौ विशीर्णदीपाद्यवयवः ऊर्ध्वगमनस्वभावानां वाताद्यभिघातादर्शने युगपद्विष्वग्विशरणादिकल्पनस्य गुरुत्वात्, प्रभायास्तु यथोपलम्भं तथाऽभ्युपगमात् स्थिरतरेषु मणिद्युमणिप्रभृतिषु च विशरणप्रसङ्गात् तत्रापि प्रतिक्षणोत्पत्त्यादिकल्पनस्यातिगुरुत्वात् तैलदशादिवत्सामग्रीविशेषादर्शनात्, न च मण्यादीनां प्रत्यभिज्ञा भ्रान्तिः, विशरणे सिद्धे तद्भ्रान्तित्वसिद्धिः तत्सिद्धौ विशरणसिद्धिरिति परस्पराश्रयणात्, विशीर्णगन्धाश्रयचम्पककुसुमादिवदंशतो विशरणेऽपि प्रत्यभिज्ञानमिति चेन्न भ्रान्तेर्दत्तोत्तरत्वात् यथोपलम्भं द्रव्यान्तराभ्युपगमे भ्रान्तित्वकल्पनानवकाशात् गन्धोपलम्भे तु वायुगतिविशेषानुविधाननियमात् आश्रयभूतचम्पकादिनाशेऽपि गन्धावस्थानदर्शनाच्च प्रभातुल्यत्वपरित्यागः ग्रीष्मनिशादिषु औष्ण्योपलम्भेऽपि प्रभात्मकं स्वरूपं नास्त्येव अस्याश्च मूलाग्रयोर्घनविरलत्वादयो यथादर्शनं ग्राह्याः। यत्तु वरदविष्णुमिश्रैः निरवयवात्मज्ञानसङ्कोचविकाशदृष्टान्ततया प्रभामुपन्यस्योक्तं प्रभाया निरवयवत्वमवयवानुपलम्भात् इति तच्छेदनभेदनयोग्यावयवविरहाभिप्रायेणेति मन्तव्यम्, न चैषा स्वतन्त्रा दीपाद्यपृथक्सिद्धतयैव प्रतीतेः, तद्विशि-

ष्टं तेजःप्रभावत् तच्च मणिद्युमणिदीपादिबहुप्रकारं सामग्रीविशेषाधीनस्वभावभेदात्तेजसः शोकहर्षशोषणवृद्धिपाकप्रकाशादिजनकत्वतारतम्यम्, ऊर्ध्वज्वलनमपि तत एव वा अदृष्टादेव वा तस्य रोहितभास्वरैकस्वभावस्यापि सलिलादिसंसर्गभेदाद् वर्णवैचित्र्योपलम्भः, एतच्च यदग्नेरोहितं रूपमित्यादिश्रुतिसिद्धम्। वैशेषिकादीनां शुक्लत्वसाधकान्वयव्यतिरेकौ श्रुतिबाधितौ अन्यथासिद्धौ च, मध्याह्नमार्तण्डमण्डलश्वैत्योपलम्भस्यापि मण्डलोपष्टम्भकानुद्भूतस्पर्शोद्भूतरूपसलिलांशनिबन्धनत्वोपपत्तेः, उद्भवानुद्भवयोश्च गुणानामन्यत्राप्यनियमाभ्युपगमात्। तेजसो रसतन्मात्रम्, तस्मादापः शीतस्पर्शवत्त्वं निर्गन्धत्वे सति विशिष्टरसवत्त्वमित्यादि तल्लक्षणं तासां शुक्लमधुरशीतैकस्वभावानामाश्रयादिसंसर्गभेदाद्रूपरसस्पर्शवैचित्र्यारोपः, अद्रव्यनिरूपणे तु तेजोऽन्नगुणव्यवस्था समर्थयिष्यते, स्वाभाविकमासां द्रवत्वम् आप्येष्वपि करकादिषूपष्टम्भवशात्काठिन्यं प्राणरसनाप्यायनादिनोपकुर्वते शरीरत्वमासामप्प्रचुरेषु वरुणलोकशरीरेषु स्पष्टं, विषयत्वं सरित्समुद्रेषु। अद्भ्यो गन्धतन्मात्रं, ततः पृथिवी, विशिष्टगन्धवत्त्वं रसवत्त्वे सति विशिष्टस्पर्शवत्त्वमित्यादि तल्लक्षणं, सा प्रथमं सुरभिमधुरकृष्णानुष्णाशीतस्पर्शा जाता, ततोऽनुष्णाशीतत्वं सर्वदाऽनुवृत्तं तेजःसलिलस्पर्शोपाध्यन्वयव्यतिरेकात्तदुपाधिक एवौष्ण्यशैत्योपलम्भः, कार्ष्ण्यं स्वतःसिद्धमिति श्रुतिसिद्धम्। पाकभेदात्तु विचित्रवर्णता जायते सुरभिस्वभावत्वमप्यौत्सर्गिकन्यायसिद्धं कारणस्य पयसो माधुर्यानुविधानं च बाधकाभावे ग्राह्यं, तस्याः काठिन्येऽपि सलिलातपादियोगात् क्वचिद्द्रवत्वोपलम्भः मनोघ्राणाप्यायनादिना च तस्या उपकारः, शरीरत्वमस्याः

मनुष्यतिर्यक्स्थावरादिषु व्यक्तं, विषयत्वं मृत्पाषाणौषधितिमिरादिषु, यद्यपि विषयादिरूपेण निर्दिष्टानां सर्वेषामपीश्वरापेक्षया तत्तद्भिशिष्टजीवापेक्षयापि शरीरत्वं वद्यते तथाऽपि लोकव्यवहारोपकारतारतम्यालोकनेन विभज्य व्यवहारः, शरीरतयाऽभ्युपगतमपि विषयतया वैशेषिकैरप्युक्तं विषयो मृत्पाषाणस्थावरलक्षण इति, स्थावरस्य हि शरीरत्वं तैरेव प्रपञ्चितम् ।

तमोवादः । तमोद्रव्यं पार्थिवं च अबाधितनीलादिप्रत्ययविषयत्वात्, आलोकाभावे चाक्षुषं नास्तीति बाधकमिति चेन्न तेजसि व्यभिचारात् तद्व्यतिरिक्तत्वे सतीति चेत् तथाऽपि भवदभिमते तमस्येतदभावे चाक्षुषत्वात् इतरसामग्रीसाकल्यलक्षणयोग्यतासिद्ध्यर्थमविरोधार्थं च तथाऽङ्गीकार इति चेत् अत्रापि प्रतीयमानाकारभङ्गपरिहाराय बुध्यस्व, न हि यत्कश्चिद्यदपेक्षं तत्सर्वत्र तदपेक्षमिति नियमः, स्वेदादिशैत्यग्रहे वायुसापेक्षस्य स्पर्शनस्यौष्ण्यग्रहे तदभावसापेक्षत्वात्, आलोकाभावप्रत्ययविशेषाभावनैल्यमात्रप्रतीतिपक्षाः विधिरूपेण प्रत्ययात् लोकप्रतीतिविरोधप्रसङ्गात् नीलमिति धर्मितया स्फुरणाच्च निरस्ताः । प्रलयविनाशावसानादयस्तु विधिरूपेण वर्तमाना अपि स्फुटवस्त्वन्तरानुपलम्भात् कस्यचिदित्येव सर्वसंवित्सिद्धेश्चाभावपक्षे निक्षेपं सहन्ते । स्पर्शानुपलम्भादिचोद्यं तु इन्द्रनीलालोकादिष्विव निर्वाह्यम्, आगमसिद्धं च तमसो द्रव्यत्वादिकं तमः ससर्ज भगवानिति तत्त्वान्तरवत् सृष्टिश्रवणात्, नासीत्तमोज्योतिरभून्न चान्यदिति कार्यान्तरैर्ज्योतिषा च सह लयाभिधानात् आलोकाभावपक्षे तमोज्योतिषोर्द्वयोरपि लयाभिधानविरोधात् ।

अन्तर्यामिब्राह्मणे च यस्य तमः शरीरमिति तेजसा सह तमसः शरीरत्वेनाभिधानात् । तत्र भाष्यम् एवमप्स्वग्न्यन्तरिक्षवाय्वादित्यदिक्चन्द्रतारकाकाशतमस्तेजःस्वित्यादि ।

यत्तु षडर्थसंक्षेपे भावरूपाज्ञानानुमानदूषणे प्रोक्तं निमीलनेऽपि भातीति न तमोद्रव्यम् अन्धस्तु नाक्षिस्थग्रहेऽलं व्याहरति चेति तत् श्रुतिस्मृतिभाष्यादिविरोधान्मतान्तरेणैकदेशिमतेन वोक्तं, निमीलनेऽपि भानस्य पित्तोपहतचक्षुषः किंचित्पित्तोपलम्भेऽपि तुल्यत्वात्, जात्यन्धस्य तु तद्द्रव्याव्यवहारात् अजात्यन्धस्यापीन्द्रियाधिष्ठानक्षोभेऽपि मात्रयेन्द्रियशक्तेरनपगमनादक्षिस्थग्रहस्याविरोधात् तमो न द्रव्यम् आलोकाभावे गृह्यमाणत्वात् आलोकाभाववदिति चेन्न प्राभाकराणां हेतुदृष्टान्तयोरभावात्, उदयनादीनां पक्षदृष्टान्तयोरभेदात्, रूपमात्रतमोवादिनोऽपि दिवाभीतादिदृश्यमानैर्द्रव्यैर्व्यभिचारात्, मानुषचक्षुषेति विशेषणेऽपि योगिदृश्यमानैः, अयोगीति विशेषणेऽपि अञ्जनाक्तचक्षुषा गृह्यमाणैः, प्रकृष्टादृष्टाञ्जनादिरहितमानुषचक्षुषेति विशेषणेऽपि तमोनीलिमातिरिक्तं नैल्याश्रयत्वेनाबाधितप्रतीतिविषयत्वादित्यादिभिर्बाधः प्रतिरोधो वा दुष्परिहरः । उक्तं वरदगुरुभिस्तत्त्वसारे ।

तमो नाम द्रव्यं बहुलविरलं मेचकचलं
प्रतीमः केनापि क्वचिदपि न बाधश्च ददृशे ।
अतः कल्प्यो हेतुः प्रमितिरपि शाब्दी विजयते
निरालोकं चक्षुः प्रथयति हि तद्दर्शनवशात् ॥

इति। नन्वेवमस्तु तमसो द्रव्यत्वं सिद्धान्तः पार्थिवत्वं तु भाष्यकारादिवचनान्न ज्ञातमिति चेन्न प्राकृतत्वनीलत्ववचनाभ्यां परिशेषात् सिद्धेः, न हि वायुपर्यन्तेषु प्राकृतेषु रूपगुणोऽस्ति, न वा तोयतेजसोः कृष्णरूपमस्ति, तथा च श्रुतिः यदग्ने रोहितमित्यादिका।

ननु तत्त्वरत्नाकरे मूलप्रकृतिरेवेदं तम इत्युक्तं तथा हि।

बध्नाति यदभिद्रोहाद्यत्प्रपत्त्या च मुञ्चति।
जन्तूँस्तमस्तमाश्रित्य हरिं तत्प्रविविच्यते॥
अतो न काकदन्तानामिव तस्य परीक्षणम्।
उपेक्ष्यं बन्धकत्वस्य ज्ञाने हानप्रयोजनात्॥
तत्स्वरूपतदुत्पत्तिग्राहकादिषु सूरयः।
विवदन्ते ततो जातः संदेहश्चिन्त्यतेऽधुना॥

अत्रालोकाभावस्तम इति काश्यपीयाः, नास्त्येव तमः नीलभावरूपस्मृतिप्रमोष एव तमोव्यवहारहेतुरिति प्राभाकराः, द्रव्यान्तरमेवेदं कल्प्यमिति कौमारिलाः, प्रधानतत्त्वमेव तम इति तत्त्वविद इत्युपक्रम्य प्राथमिकमतयुगलमथनपूर्वकं तृतीयमुपन्यस्य।

अत्र तत्त्वविदः प्राहुः स्थूलसूक्ष्मात्मना स्थिता।
दैवी गुणमयी माया बाह्यान्तरतमोमता॥

इत्युक्तम्। अतो न पार्थिवत्वपरिशेषो युक्त इति तन्न तत्र मूलप्रकृतित्वं तावन्न सम्भवति विकारैः सह सृष्टिसंहारवचनात्, अन्तर्यामिब्राह्मणे च कार्यवर्गानुप्रवेशेन प्राथमिकतमोव्यतिरिक्तस्य तेजोविरोधितमसः पृथक्शरीरत्वाभिधानात् प्रधानतमसश्च प्रत्यक्षग्राह्यत्वासिद्धेः।

नाहो न रात्रिर्न नभो न भूमिर्नासीत्तमो ज्योतिरभून्न चान्यत्।

श्रोत्रादिबुद्ध्यानुपलभ्यमेकं
प्राधानिकं ब्रह्म पुमांस्तदासीत् ॥

इति श्लोकस्मृतेः, अवस्थान्तराश्रयणेन सर्वमिदमुपपद्यते इति चेत्सत्यम्, तदेवास्माभिरुच्यते पृथिव्यवस्थातिरिक्तमवस्थान्तरमिति चेन्न पूर्वोक्तपरिशेषात् पृथिवीतः पृथगेव सृष्ट्यादिवचनं कथमुपपद्यत इति चेत् स्वर्गान्तरिक्षादिसृष्टिवदिति भाव्यम् । तमःशब्दप्रयोगानुवृत्तिः कथमिति चेत् अनेकार्थत्वेनानुवृत्त्यन्यथासिद्धेः ज्ञानालोकयोः प्रकाशशब्दवत् । यद्वा उद्भूततमोगुणमेवालम्ब्य द्वयोरपि व्यवहारोपपत्तिः, कथं तर्हि तत्त्वरत्नाकरोक्तिः वस्तुतस्तु वयमपि संशयीमहि, न हि तत्र प्रतिज्ञानिर्वाहपर्यन्तं ग्रन्थो निबद्धः येनाभिप्रायमध्यवस्येम, स हि प्रबन्धः अत्र तत्त्वविदः प्राहुरिति श्लोकमात्र एव विघ्नितः, निबद्धमात्रं चास्मदुक्ताविरुद्धम्, पार्थिवत्वेऽपि प्रधानतत्त्वानतिरेकात्, न हि वयमसत्कार्यवादिनः समस्तप्रकृतिप्राकृतपरीक्षोपक्रमविवक्षया च बध्नाति यदभिद्रोहादित्यादेरुपपत्तिः, अत्र तत्त्वविदः इति श्लोकेपि स्थूलसूक्ष्मात्मना स्थितेति विभागादेवमेव तात्पर्यमिति विभावयामः ।

अस्तु वा किञ्चिदभिनवघनघनावलीमलीमसमनाघ्रातस्पर्शरसगन्धमन्धकाराभिधानमवस्थान्तरं प्रकृतेः तथापि न पृथग्द्रव्यत्वसिद्धिः । तदेवं चतुर्विंशतितत्त्वानि चिन्तितानि आत्मनः आकाशः संभूतः तत्तेजोऽसृजतेत्यादिन्यूनसृष्टिव्यपदेशा न तत्त्वान्तरसृष्टिप्रतिक्षेपपराः प्रामाणिकत्वाविशेषेण तत्परित्यागायोगात् । वदन्ति च

क्षीरादिदं तत इदं च ततो दधीति क्षीराद्दधीति वदतां किल को विशेषः । इति,

अत एव षट्त्रिंशत्तत्त्ववादोऽपि निराकृतः ते ह्येवमाहुः ।

शैवागमेषु मुख्यं पतिपशुपाशा इति क्रमात्त्रितयम्, तत्र पतिः शिव उक्तः पशवो ह्यणवोऽर्थपञ्चकं पाशः ।

इति तत्त्वसंग्रहः ।

मूलं कर्म च माया च मायोत्थमखिलं जगत् ।
तिरोधानकरी शक्तिरर्थपञ्चकमिष्यते ॥

इति पाशविभागः ।

माया पुरुषः शिव इत्येतत्त्रितयं महार्थसंहारे ।
अवशिष्यते पुनस्तत्प्रवर्तते पूर्वसृष्टौ ॥

इति सृष्टिप्रलयाश्रयनित्यतत्त्वनिष्कर्षः ।

शुद्धानि पञ्च तत्त्वान्याद्यन्तेषु स्मरन्ति शिवतत्त्वम् ।
शक्तिसदाशिवतत्त्वे ईश्वरविद्याख्यतत्त्वे च ॥
पुंसोऽज्ञकर्तृतार्थं मायास्तत्त्वपञ्चकं भवति ।
कालो नियतिश्च तथा कला च विद्या च रागश्च ॥
अव्यक्तं मायातो गुणतत्त्वं तदनुबुद्ध्यहङ्कारौ ।
चेतोधीकर्मेन्द्रियतन्मात्राणीति तत्त्वानि ॥

इति तत्त्वगणना, तत्र चिदचिदीश्वरविभागतन्नित्यत्वादौ न विवादः, ईश्वरस्तु प्रसिद्धशिवाद्विलक्षणः शाश्वतशिवादिशब्देन निर्दिष्टो नारायणः, स च चिदचितोः सर्वावस्थावस्थितयोः शरीरीत्येवमादिरौपनिषादानां विशेष ईश्वरे* समर्थयिष्यते, तत्त्वगणनायां तु शुद्धतत्त्वपञ्चकस्य परमार्थत एकतत्त्वात्मकतया तैरेवोक्तत्वात्तत्र नातीव विवादः तथा हि तैरेवोक्तम् ।

* ईश्वरनिरूपणावसर इत्यर्थः ।

पञ्चानामप्येषां न हि क्रमोऽस्तीह कालरहितत्वात् ।
व्यापारवशादेषां विहिता खलु कल्पना शास्त्रे ॥
तत्त्वं वस्तुत एकं शिवसंज्ञं चित्रशक्तिखचितं तत् ।
शक्तिव्यापृतिभेदात्तस्यैते कल्पिता भेदाः ॥

इति, रागोऽभिष्वङ्गात्मेति तैर्लक्षितस्य रागस्य पुरुषगुणभूतस्य न प्राकृततत्त्वान्तरत्वं प्रकृतिसंसर्गवशात् पुरुषस्य रागो जायत इत्येतावदिष्यते रागाख्यकार्येण तत्कारणभूततत्त्वान्तरक्लृप्तिरिति चेन्न सुखहेतुत्वज्ञानादिभिरेव तदुत्पत्त्युपपत्तेः, अन्यथा द्वेषादिकार्येष्वपि तत्त्वान्तरकल्पनाप्रसङ्गात् विद्याऽपि ।

उद्बुद्धकर्तृशक्तेः पुंसो विषयप्रदर्शननिमित्तम् ।
विद्या तत्त्वं सूते प्रकाशरूपं च करणवैशिष्ट्यात् ॥

इत्यभिहिता, तत्रापि पुनर्मनःप्रभृतिप्रमितिकरणग्राम एव विषयप्रदर्शने पर्याप्त इति न करणान्तरमनुमन्यामहे ।

मायातस्तदनुकलामलं नृणामेकतस्तिरस्कृत्य-
व्यञ्जयति कर्तृशक्तिं कलेति तेनेह कथितेयम् ।
कालेन नियत्या चाप्युपसर्जनतामुपेतया सततम्
विदधाति व्यापारं निजमेषा ह्यवनिपर्यन्तम् ॥

इति च कलाभिहिता–तत्राप्यव्यक्तावस्थाकारणभूतात्तरशब्दाभिलप्यप्रकृत्यवस्थामिच्छामः तत्र कलाशब्दः शब्दान्तरं वा प्रयुज्यतां कर्तृशक्तिव्यञ्जकत्वं तु तस्या नेष्यते ज्ञानेच्छापुण्यपापादिभिरेव तदभिव्यक्तेः, ज्ञानादेश्चेन्द्रियाधीनत्वात् ।

नियतिर्नियमनरूपा मायातः साऽप्यनन्तरं भवति ।
नियमयति येन निखिलं तेनेयं नियतिरित्युक्ता ॥ इति

अत एव षट्त्रिंशत्तत्त्ववादोऽपि निराकृतः ते ह्येवमाहुः ।

शैवागमेषु मुख्यं पतिपशुपाशा इति क्रमात्त्रितयम्, तत्र पतिः शिव उक्तः पशवो ह्यणवोऽर्थपञ्चकं पाशः ।

इति तत्त्वसंग्रहः ।

मूलं कर्म च माया च मायोत्थमखिलं जगत् ।
तिरोधानकरी शक्तिरर्थपञ्चकमिष्यते ॥

इति पाशविभागः ।

माया पुरुषः शिव इत्येतत्त्रितयं महार्थसंहारे ।
अवशिष्यते पुनस्तत्प्रवर्तते पूर्वसृष्टौ ॥

इति सृष्टिप्रलयाश्रयनित्यतत्त्वनिष्कर्षः ।

शुद्धानि पञ्च तत्त्वान्याद्यन्तेषु स्मरन्ति शिवतत्त्वम् ।
शक्तिसदाशिवतत्त्वे ईश्वरविद्याख्यतत्त्वे च ॥
पुंसोऽज्ञकर्तृतार्थं मायातस्तत्त्वपञ्चकं भवति ।
कालो नियतिश्च तथा कला च विद्या च रागश्च ॥
अव्यक्तं मायातो गुणतत्त्वं तदनुबुद्ध्यहङ्कारौ ।
चेतोधीकर्मेन्द्रियतन्मात्राणीति तत्त्वानि ॥

इति तत्त्वगणना, तत्र चिदचिदीश्वरविभागतन्नित्यत्वादौ न विवादः, ईश्वरस्तु प्रसिद्धशिवाद्विलक्षणः शाश्वतशिवादिशब्देन निर्दिष्टो नारायणः, स च चिदचितोः सर्वावस्थावस्थितयोः शरीरीत्येवमादिरौपनिषादानां विशेष ईश्वरे* समर्थयिष्यते, तत्त्वगणनायां तु शुद्धतत्त्वपञ्चकस्य परमार्थत एकतत्त्वात्मकतया तैरेवोक्तत्वात्तत्र नातीव विवादः तथा हि तैरेवोक्तम् ।

* ईश्वरनिरूपणावसर इत्यर्थः ।

पञ्चानामप्येषां न हि क्रमोऽस्तीह कालरहितत्वात् ।
व्यापारवशादेषां विहिता खलु कल्पना शास्त्रे ॥
तत्त्वं वस्तुत एकं शिवसंज्ञं चित्रशक्तिखचितं तत् ।
शक्तिव्यापृतिभेदात्तस्यैते कल्पिता भेदाः ॥

इति, रागोऽभिष्वङ्गात्मेति तैर्लक्षितस्य रागस्य पुरुषगुणभूतस्य न प्राकृततत्त्वान्तरत्वं प्रकृतिसंसर्गवशात् पुरुषस्य रागो जायत इत्येतावदिष्यते रागाख्यकार्येण तत्कारणभूततत्त्वान्तरक्लृप्तिरिति चेन्न सुखहेतुत्वज्ञानादिभिरेव तदुत्पत्त्युपपत्तेः, अन्यथा द्वेषादिकार्येष्वपि तत्त्वान्तरकल्पनाप्रसङ्गात् विद्याऽपि ।

उद्बुद्धकर्तृशक्तेः पुंसो विषयप्रदर्शननिमित्तम् ।
विद्या तत्त्वं सूते प्रकाशरूपं च करणवैशिष्ट्यात् ॥

इत्यभिहिता, तत्रापि पुनर्मनःप्रभृतिप्रमितिकरणग्राम एव विषयप्रदर्शने पर्याप्त इति न करणान्तरमनुमन्यामहे ।

मायातस्तदनुकलामलं नृणामेकतस्तिरस्कृत्य-
व्यञ्जयति कर्तृशक्तिं कलेति तेनेह कथितेयम् ।
कालेन नियत्या चाप्युपसर्जनतामुपेतया सततम्
विदधाति व्यापारं निजमेषा ह्यवनिपर्यन्तम् ॥

इति च कलाभिहिता—तत्राप्यव्यक्तावस्थाकारणभूतान्तरशब्दाभिलप्यप्रकृत्यवस्थामिच्छामः तत्र कलाशब्दः शब्दान्तरं वा प्रयुज्यतां कर्तृशक्तिव्यञ्जकत्वं तु तस्या नेष्यते ज्ञानेच्छापुण्यपापादिभिरेव तदभिव्यक्तेः, ज्ञानादेश्चेन्द्रियाधीनत्वात् ।

नियतिर्नियमनरूपा मायातः साऽप्यनन्तरं भवति ।
नियमयति येन निखिलं तेनेयं नियतिरित्युक्ता ॥ इति

परिभाषिता, तत्र नियमनशब्देन नियन्तृशक्तिविवक्षायामीश्वरसङ्कल्पाद्यतिरिक्तनियतिर्नास्ति प्रतिनियतफलावश्यम्भावित्वादिविवक्षायां तु पुण्यपापादिरूपैव नियतिः, तत्तत्स्वकार्यकारणादिविवक्षायां प्रतिनियततत्तद्वस्तुशक्तिरेव नियतिरिति न प्राकृततत्त्वान्तरमस्ति, यदि पुनः प्रमाणभूतेषु पञ्चरात्रादिषु क्वचिन्नियत्यादिसृष्टिरुच्यते तदाऽपि तत्रतत्र तात्पर्यभेदेन संप्रतिपन्नतत्त्वविशेषलच्छक्त्यादीनामेव पृथग्गणनमिति मन्तव्यम्। युक्तिश्च निर्बन्धतो दूष्यते न त्वागमः, कालस्य मायासृज्यत्वादिकम् अनादिर्भगवान् कालो नान्तोऽस्य द्विज! विद्यत इत्यादिभिर्बाधितम्, तत्र च।

यतः कुतश्चित्कालांशात्परतः पूर्वतो ऽपि वा
कालो न चेत्त्वदुक्तिस्थं पौर्वापर्यं न सिध्यति।
कालाधीनभवद्भव्यभूतादिव्यवहारवान्
देशोऽन्योऽपि ततः सोऽपि तदभावे न सिध्यति॥

नित्यविभूतावपि कालस्याहेतुत्वमात्रं न त्वभावः।
कालं स पचते तत्र न कालस्तत्र वै प्रभुः।
कलामुहूर्तादिमयश्च कालो न यद्विभूतेः परिणामहेतुः।

इत्यादिवचनात्, अन्यथा सदा पश्यन्तीत्यादिभिर्विरोधात् अस्य चान्वयव्यतिरेकाभ्यामागमाच्च यथायोगं तत्तत्कार्यनिमित्तत्वसिद्धिः। तच्चोपाध्यवच्छेदात् सविकारत्वपक्षे स्वविकारान् प्रति कालस्योपादानत्वमेव निमित्तभूताकारान्तराभावात्।

एकेनैव क्षणेनास्य विश्वस्यापि विशेषणात्।
कालवत्तत्क्षणानां च व्यापित्वमवगम्यते॥

अस्य विकारित्वं सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि कला मुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वश इत्यादि-

श्रुतिः कालं सः, कलामुहूर्तादिमयः, इत्यादिस्मृतिश्चाह अत्र स्वारसिकार्थे बाधकाभावादधिदेवतोपाध्याद्युत्पत्त्या निर्वाहो न शङ्क्यः विभोर्विकारित्वानुपपत्तिर्बाधिकेति चेन्न अवयवोच्छूनतादिलक्षणस्य विकारस्यानभ्युपगमात्, अवस्थान्तरापत्तिमात्रस्याविरोधात् अन्यथा विभोरेवासिद्धिप्रसङ्गात्, सर्वमूर्तसंयोगित्वं हि विभुत्वं तस्मादन्ततः संयोगलक्षणमङ्गीकार्यम् । अथ विकारित्वानुपपत्त्या विभुत्वमेव कस्यचिन्नास्तीति मतं तथाऽपि कालस्य विकारित्वाद्विभुत्वमेव भज्येत न पुनर्विभुत्वाद्विकारित्वम्, कथं च विकारित्वं विभुत्वस्य बाधकं कारणत्वे प्रमाणाभावादिति चेत् न तावदिदं सामान्यतः तथा हि ।

न हेतुकार्यतेत्येतद्बोधाय फणितं न वा ।
द्विधाऽपि भङ्गः स्वोक्त्याद्येः फलवत्त्वाफलत्वयोः ॥
सावधेरवधिर्योऽसौ पूर्वो हेतुः परो रिपुः ।
कार्यं नित्यमसद्वा स्यादवधेरनपेक्षणात् ॥

अन्वये सत्यपि नित्यविभोर्देशकालव्यतिरेकाभावेन कारणत्वं दुर्ग्रहमिति चेन्न तावन्तरेणापि धर्मिग्राहकेणैव तत्सिद्धेः, सामान्यतश्चान्वयव्यतिरेकयोरपि सुशकत्वात् सामान्यतः सिद्धस्य पारिशेष्यादिभिर्विभुत्वादिसिद्धेः, विकारित्वमविभुत्वेन व्याप्तमिति चेन्न ईश्वरतज्ज्ञानाभ्यामनैकान्त्यात्, तयोरपि पक्षीकरणे श्रुतिबाधादिप्रसङ्गात्, निर्विकार एवेश्वर इति न दोष इति चेन्न संयोगसिसृक्षादिलक्षणविकारस्यावश्यम्भावितयाऽभ्युपगन्तव्यत्वात्, तत्र कृत्स्नैकदेशविकल्पाद्यनुपपत्तयस्तु विभुद्रव्य इवाविभुद्रव्येष्वपि तुल्यत्वाच्छून्यवादं प्रसञ्जयेयुः ताश्च सूत्रकारैरेवेश्वरे प्रसज्य परिहृताः कृत्स्नप्रसक्तिः,

श्रुतेस्तु शब्दमूलत्वादित्यादिभिः । उक्तं च कालादीनां विकारस्वरूपत्वं वेदार्थसंग्रहे निमेषकाष्ठाकलामुहूर्तादिपरार्द्धपर्यन्तापरिमितव्यवच्छेदस्वरूपसर्वोत्पत्तिस्थितिविकारादिसर्वपरिणामनिमित्तभूतकालकृतपरिणामास्पृष्टानन्तमहाविभूतिरिति । उक्तं च नीतिमालायां नारायणार्यैः कालोऽनाद्यनन्तोऽजस्रक्षणपरिणामिमुहूर्ताहोरात्रादिविभागवान्, परिणामपरिस्पन्दहेतुरिति प्रत्यक्षश्चायं तथा हि।

वर्तमानतयाऽध्यक्षे वस्तु सर्वं प्रकाशते ।
न सा स्वरूपं धीभेदान्नोपाधिरनवस्थितेः ॥
तत्र स्वपरनिर्वाहे पूर्वत्रैव तथा न किम् ।
तथा चास्त्वतिधोरान् प्रत्यनन्तस्त्वागमो बलम् ॥
तत्सिद्धस्योपलम्भेन प्रत्यक्षत्वं प्रसाध्यते ।
लाघवात्तद्विषयता वर्तमानधियोवरम् ॥
न चैषा लैङ्गिकी बुद्धिर्लिङ्गादेरविमर्शतः ।
विमर्शेऽप्यन्यथासिद्धेस्तर्कानुग्रहवर्जनात् ॥
मिथः करम्बितैरेव मूर्तैर्वा विश्ववर्तिभिः ।
तद्युक्तैर्गगनाद्यैर्वा पक्षद्वितयसंमतैः ॥
रविस्पन्दादिभूयस्त्वफल्गुत्वाद्युपनायकैः ।
परावरत्वादिसिद्धेरन्यथा गौरवोदयात् ॥
तावन्मात्रोपनेतृत्वे सिद्धस्यार्थस्य कल्पिते ।
जगतो मिश्ररूपत्वं न भवेदधिके यथा ॥
कालसंबन्धरूपोऽयं परत्वादिरिति स्थिते ।
लिङ्गसिद्ध्यैव कालस्य प्रत्यक्षत्वमुपागतम् ॥
अतोऽनुमानमात्रेण कालोऽन्यो नैव सिध्यति ।
केवलागमसिद्धे च न लोकव्यवहार्यता ॥

तदेवं केवलैस्तर्कैः कालस्य दुरुपपादतामालम्ब्य हि न्यायतत्त्वे संयोगाधिकरणे संयोगविभागसङ्ख्याः काल

इत्यादि चोक्तम् प्रमातृपादे च प्रसङ्गात् कालमपलप्य तस्मादेकाश्रयक्रियासङ्ख्याकाल इति सूक्तमुपसंहृतम् । प्रपञ्चितं चास्य प्रत्यक्षत्वं तत्रैव यथा सर्वे प्रत्ययाः कालोपश्लिष्टा एव हि दृश्यन्ते तदिति देशकालविशिष्टतयैव स्मृतिरपि जायमाना प्रागपि कालानुभवं साधयतीति, जैननिराकरणे भाष्यं च कालस्य पदार्थविशेषणतयैव प्रतीतेस्तस्य पृथगस्तित्वनास्तित्वादयो न वक्तव्याः न च परिहर्तव्याः कालोऽस्ति नास्तीति व्यवहारो व्यवहर्तॄणां जात्याद्यस्तित्वनास्तित्वव्यवहारतुल्य इति, अत एव च कालस्य पृथग्गणनाभावः, तदेवमव्यक्तोपक्रममहदहङ्कारेन्द्रियतन्मात्रभूतसृष्टिप्रकरणेषु जीवपरौ पञ्चविंशकषड्विंशकौ अक्षरतमसोरन्यतरोपक्रमे कालस्य पृथग्गणने च षड्विंशकसप्तविंशकाष्टविंशकत्वादिकं यथासम्भवं भाव्यं, श्रुतिश्च तं षड्विंशकमित्याहुः सप्तविंशमथापरे इति सत्त्वरजस्तमसां पृथग्गणनयाऽधिकसङ्ख्यां निर्वहन्तस्तेषां द्रव्यत्वदूषणेन वक्ष्यमाणेन निरस्ताः । पञ्चविंशातिरिक्तनिषेधपराणां निर्वाहस्तु भगवता व्यासेन मोक्षधर्मेऽभिहितः ।

अन्यश्च राजन् ! स परस्तथाऽन्यः पञ्चविंशकः ।
तत्स्थत्वादनुपश्यन्ति ह्येक एवेति साधवः ॥

इति, सूत्रितं च अवस्थितेरिति काशकृत्स्न इति, प्रपञ्चितश्चायमर्थो भाष्यादिषु सामानाधिकरण्यनिर्वाहे । नन्वेवमपि तत्तद्भूतेषु सवितृकान्तहिमकरकवैद्युतवैश्वानराद्युत्तरोत्तरावस्थादर्शनात्तत्त्वसङ्ख्यानियमोऽनुपपन्नः मैवं समष्ट्यवस्थापेक्षया तन्नियमात् पञ्चीकरणपश्चाद्भाविव्यष्ट्यवस्थाविशेषाणां चानन्त्यादपरिसङ्ख्यानम् । एतेषु

च तत्त्वेषु भागत एवोत्तरोत्तरसृष्टिः पूर्वपूर्वैरुत्तरोत्तरावरणस्य तत्तदाकारेण च कार्यवृत्तेः श्रुतत्वात्, अन्यथा पृथिव्येकशेषप्रसङ्गात् पूर्वपूर्वभूतानामुपलम्भादिसिद्धत्वाच्च । तन्मात्राणां त्वावारकत्वाद्यनाश्रयणान्निःशेषपरिणाम इत्येके। शरीरादेश्चतुर्विंशतितत्त्वमयत्ववचनात्तेषामप्येकदेशतः परिणाम इत्यपरे। पूर्वस्मिन् पक्षे तन्मात्रकार्यभूतगुणपञ्चकेन सह शरीरादेश्चतुर्विंशतितत्त्वमयत्वोक्तिरिति वा, सर्वाचित्तत्त्वमयत्वमात्रप्रतिपादनपरतया वा निर्वाहः, अपरस्मिन्पक्षे क्वचित्केषां चित्सृष्ट्यनुक्तिवदविवक्षयाऽऽवरणाद्यनुक्तिरिति गतिः ।

एतानि तत्त्वानि प्रथममीश्वरः स्वसङ्कल्पादेव तत्तदव्यवहितपूर्वपूर्वतत्त्वशरीरकः सृष्ट्वा व्यष्टिनामरूपव्याकरणं सङ्कल्प्य तेषां तत्त्वानां पृथग्भूतानां व्यष्टिसृष्ट्यशक्तेः परस्परसंमिश्रणं च सङ्कल्प्य ह्यधोऽर्धभागश्चत्वारो वायुतेजःपयोभुवाम् इत्यादिक्रमेणैकैकभूतेषु भूतान्तराणामष्टमांशचतुष्कैः पञ्चीकरणं कृत्वा तेषु स्वानुप्रविष्टजीववर्गमनुप्रवेश्य तैरेव तत्त्वैर्दशगुणितोत्तरसप्तावरणवेष्टितं हेमाख्यपरिणामगतभूतमयं ब्रह्माण्डमारभ्य तदन्तरे च स्वनाभिपङ्कजप्रभृतिसप्तस्थानेष्वन्यतमेन सकलतदण्डान्तर्वर्तिचेतनभरितविग्रहं चतुर्मुखं प्रसादात्सृजति क्रोधाच्च रुद्रम्, अत्र श्रुतिः एको ह वै नारायण आसीन् न ब्रह्मा नेशानः इत्यारभ्य तत्र ब्रह्मा चतुर्मुखोऽजायत त्र्यक्षः शूलपाणिः पुरुषोऽजायत इत्यादिका नारायणाद्ब्रह्मा जायते नारायणाद्रुद्रो जायते इत्यादयश्च । उक्तं च महाभारते ।

ब्रह्माणं शितिकण्ठं च याश्चान्या देवताः स्मृताः ।
प्रतिबुद्धा न सेवन्ते यस्मात्परिमितं फलम् ॥

एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजौ स्मृतौ ।
तदादर्शितपन्थानौ सृष्टिसंहारकारकौ ॥ इति,

स च भगवाननन्तरं स्वविहितब्रह्मान्तर्यामिरूपेणावस्थितः स्वप्रहितवेदोपज्ञविज्ञानेन स्वार्पिताभ्यां विचित्रसृष्टिविषयबुद्धि-शक्तिभ्यामुपबृंहितेन स्वनिर्धूतमधुकैटभादिविविधापदा ब्रह्मणा ब्रह्माण्डान्तश्चतुर्दशभुवनसंस्थानतदधिकरणकदेवतिर्यङ्मनुष्यस्थावरादिदिग्विशेषादिविविधविचित्रव्यष्टिसंज्ञामूर्तिसृष्टिं कारयति करोति च तच्छरीरकः, तथा च सूत्रं संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् इति, संहारयति संहरति च हरशरीरकः । ननु नित्यविभोर्दिशः कार्यत्वं कथं न नित्यविभुदिग्द्रव्यस्यासिद्धेः ।

प्राक् प्रत्यग्दूरासन्नादिव्यपदेशानां तूभयसंमतैस्तत्तदुपाध्युपहितैस्तैस्तैराकाशादिद्रव्यैरेव मूर्तान्तरसंयुक्तसंयोगपरम्परास्यूतैस्तत्तत्प्राक्त्वादिभेदनिर्वाहकत्वाभिमतोपाधिविशेषैरेव वा यथायोगं निर्वाहात् संप्रतिपन्नाकाशादिपरित्यागेन सर्वत्र सर्वगुणघटनरूपातिप्रसङ्गपरिहारायाधिकदिग्धर्मिकल्पनं पापत्त्यवत्पुण्यपरित्त्ययोऽपि भवतीति भयान्मन्दाकिनीमपहाय मरीचिकानुधावनम् ।

तावन्मात्रोपनेतृत्वस्वभावान्यप्रकल्पनात् ।
सिद्धस्य धर्मिणः कल्प्या तावन्मात्रोपनेतृता ॥

अस्तु तर्ह्याकाशातिरिक्तं दिक्तत्त्वं पद्भ्यां भूमिर्दिशः श्रोत्रात् दिशश्श्रोत्रमित्यादिपृथक्सृष्टिप्रलयश्रवणादिति चेन्न अभिमानिदेवतोपाधिसृष्ट्या निर्वाहात् तत्तदेकप्रकरणस्थान्तरिक्षस्वर्गलोकाद्यवच्छेदसृष्ट्यादिवत् अन्यथा तत्रापि तत्त्वान्तरस्वीकारप्रसङ्गात्, सूत्रकारादिभिश्च न

धायुक्रिये पृथगुपदेशादित्यधिकरणे पृथक्सृष्ट्याद्युपदेशवतोऽपि प्राणस्य वायुविशेषत्वमेवोक्तं तद्दिगादीनामपि प्रदर्शनार्थं मन्तव्यम्। यदि च कार्यं किमपि दिक्तत्त्वं तदा तत्सृष्टेः पूर्वं संहारात्परतश्च प्रकृतिमहदादितत्त्वानामावरणत्वावार्यत्वदूरासन्नत्वव्यवस्था न स्यात् व्यष्टिदशायां हि दिक्सृष्टिः श्रूयते प्रकृतिकार्यतया प्रादेशिकत्वे वा शुद्धसत्त्वत्रिगुणादेरूर्ध्वाधःप्रभृतिव्यवस्था न स्यात्, यदि तत्रोपाधिभिरुपहितैर्वा तैस्तैर्निर्वाहः तदत्रापि सममिति सिद्धं न दिक् तत्त्वान्तरमिति। यत्तु प्रमेयसंग्रहे प्रोक्तं गगनस्य दिशां च त्रिवृत्करणेन रूपवत्त्वम् अतश्चाक्षुषं सर्वं सविशेषमेव गृह्यत इति तेनापि पञ्चीकृतभूतारब्धत्वमात्रं प्रतीयते न पुनःस्थिरपरिगणितचतुर्विंशत्यतिरिक्ततत्त्वान्तरत्वम्।

वरदविष्णुमिश्रैस्तु द्रव्यं च षड्विंशतिविधं सत्त्वरजस्तमांसीत्यादिना दिग्द्रव्यं पृथगेव सङ्ख्यातम् आकाशकालदिशश्चक्षुरिन्द्रियेणेति तस्य चाक्षुषत्वमप्युक्तं दिक्कालौ चाक्षुषौ प्रत्यक्षपरत्वापरत्वकारणसंयोगाश्रयत्वाद् घटवदित्यनुमानेनावगम्यत इति तत्साधितं च, अत्र पृथक्त्वं भाष्यविरुद्धसत्त्वादिद्रव्यपरिगणनवदन्यपरतया निर्वाह्यमिति, तदेतद् ब्रह्माण्डप्रभृतिस्तम्बपर्यन्तं सर्वमपि पञ्चभूतात्मकं पञ्चीकरणादिवचनात् तासां त्रिवृतं त्रिवृतमेकैकां करवाणीत्युपलक्षणं समानप्रकरणैरुपबृंहणैश्च तथाऽध्यवसायाद् भूयसा तु लौकिकपरीक्षकागमव्यवहारः, तथा च सूत्रं वैशेष्यात्तु तद्वादस्तद्वादः इति, त्र्यात्मकत्वात्तु भूयस्त्वादिति च एवं पञ्चीकरणमप्युपलक्षणमेव।

नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना।
नाशक्नुवन्प्रजाः स्रष्टुमसमागम्य कृत्स्नशः॥

समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः ।
एकसङ्घातलक्षास्तु संप्राप्यैक्यमशेषतः ॥
महदाद्या विशेषान्ता ह्यण्डमुत्पादयन्ति ते ।

इति भगवत्पराशरवचनात् तथा श्रीमद्गीताभाष्ये महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव चेति क्षेत्रारम्भकद्रव्याणीत्यादिकमुक्त्वा प्रकृत्यादिपृथिव्यन्तद्रव्यारब्धमिन्द्रियाश्रयभूतमिच्छाद्वेषसुखदुःखविकारिभूतसङ्घातरूपं चेतनसुखदुःखोपभोगाधारत्वप्रयोजनं क्षेत्रमित्युक्तं भवतीत्युक्तम् ।

तदेवमष्टद्रव्योपादानानि शरीराणि, इन्द्रियाणि तु शरीराश्रितानि द्रव्यान्तराणि, इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः इति क्षेत्राश्रितानि तत्त्वानीति विभजनात् इन्द्रियाश्रयभूतमित्युपसंहाराच्च, एतेन तन्मात्राणां पूर्वोक्तो निःशेषपरिणामपक्षः परिगृहीत इव सूच्यते । नन्वेकस्यानेकद्रव्योपादानकत्वे जातिसङ्करः स्यात्, न स्यात् अवयविनोऽस्माभिरनभ्युपगमात् बुद्धिशब्दसङ्ख्यापरिमाणदेशकालकार्यादिभेदस्यावयव्यारम्भकतया भवदभिमतावस्थान्तरमात्रेण निर्वाहात् अन्यथा राश्यादिष्वपि द्रव्यान्तरकल्पनाप्रसङ्गात गुरुत्वादिकार्यादर्शनादिनिर्वाहपरिक्लेशात् पृथग्दशापतनदर्शनेनावयवगुरुत्वस्याप्रतिबन्धात्, अवयविगुरुत्वप्रतिबन्धे तु द्व्यणुकप्रभृतेः सर्वस्यापतनप्रसङ्गात् परमाणुगुरुत्वैरेव सर्वत्र पतने घटादेः साक्षात्परमाण्वारब्धत्वाभावेन तत्पतने तद्गुरुत्वस्यासमवायित्वायोगात् संयोगाभावाच्च दीर्घैकतन्तुसंवर्तनजनितेषु तन्त्वतिरिक्तव्यवहारभङ्गप्रसङ्गात् । द्वितीयतन्तुप्रभृत्युपान्त्यतन्तुपर्यन्तपटधियो विभज्यमानतन्तुव्यतिरिक्त-

तन्तुगतपटधियश्चाविशेषात् आरभ्यारम्भवादेऽपि प्रथम-द्वितीयतन्त्वपगमे द्वितन्तुकादिद्रव्यावस्थाऽनभ्युपगमात् घटादिषु चारम्भकभागानुपलम्भेन यथेष्टभागानर्हत्वात् उपलम्भश्रुतिभ्यां बाधितत्वाच्च, अतोऽवयव्यनभ्युपगमान्न जातिसङ्करः, अभ्युपगच्छतामपि प्रतिनियतकनकरजताद्यंशनिर्मितबिम्बादिवद्धेरम्बादिवच्च निर्वोढुं शक्यत्वात् अस्मन्मते तु संघातविशेषरूपेषु तत्तद्भूतांशानां प्रतिनियतत्वात् अवयविवादिनापि यथास्वं निमित्ततयोपादानतया चानेकभूतानामेकसङ्घातानुप्रवेशोऽवर्जनीयः। न च तत्र मिथोजातिसङ्करस्तादात्म्यं वा जायत इति नास्माकं कश्चिद्विशेषः, न च जातिसंकरो दोषः उपाधिसंकरवत्, न हि मिथोधर्मिपरिहारेण वर्तमानयोरुपाध्योः कार्यत्वमूर्तत्वादिरूपयोरेकत्र समावेशो नातिप्रसङ्गावहः, जात्योस्तु तथेति नियामकमस्त्यन्यत्राभिमानात् परावरभावरहितयोर्जात्योरसमावेशनियमोपलम्भो नियामक इति चेन्न उपाध्योरपि नीलत्वपीतत्वादिरूपयोस्तत्सम्भवात् केषुचिद्दर्शनस्य जातावपि समत्वात् कनकत्वकुण्डलत्वयोः काञ्चनकटककलधौतकुण्डलादिषु पृथगेव वर्तमानयोः काञ्चनकुण्डले समावेशदर्शनात् गत्वतीव्रत्वादीनां च तीव्रगकारादौ तेषां च जातित्वाभ्युपगमात् तत्रान्यतरजातिभङ्गो वा सदृशसंस्थानाभिव्यङ्ग्यजातिद्वयकल्पना वेत्यादि तु स्वसिद्धान्तस्तनन्धयविषयवात्सल्यं तच्च स्वापत्यं मार्जारादिवज्जिघत्सति अत्यन्तसजातीयेष्वप्येकजातीयत्वेनाबाधितप्रत्यभिज्ञाने जातेरेव भङ्गप्रसङ्गात्।

तदेवमनेकतत्त्वात्मकं ब्रह्माण्डादिव्यष्टिविश्वमिति एवंविधब्रह्माण्डानन्त्यतदन्तर्वर्तिलोकविशेषसंस्थानतत्परिमाणलोकपालनिवासादिभेदतत्तदवस्थानकालादयो--

अनवस्थेत्यमी तर्काः स्वरूपासिद्धिहेतवः ॥ ९० ॥

पञ्चविधस्तर्क इत्युक्तम् । तत्रात्माश्रयादयश्च-त्वारः प्रतिकूलतर्का यस्य हेतोरुद्भाव्यन्ते तस्य स्वरू-पासिद्धिरेव स्यात् न व्याप्यत्वासिद्धिरिति ॥ ९० ॥

एवं चाप्रयोजकस्यासिद्धावन्तर्भावाद्विभागोद्दे-शः सुस्थ इत्युपसंहरति[1] ।

आभासपरिसंख्यानमेवं सति समञ्जसम् ।

अनध्यवसितः षष्ठो हेत्वाभास इति केचित् । यथाहुः । साध्यासाधकः पक्ष एव वर्तमानो हेतुरन-ध्यवसित इति तस्यासाधारणादिषु यथासम्भवमन्त-

सिद्धिहेतवश्चेद् व्याप्यत्वासिद्धेः किमवशिष्यत इत्याशङ्क्य तस्याश्चैकोऽवशिष्यते योऽनिष्टप्रसङ्गात्मेत्याशयवानाह । पञ्चविधस्तर्क इत्युक्तमिति । ततः किमत आह । तत्रेति । अनिष्टप्रसङ्गतर्कोद्भावने तु व्याप्यत्वासिद्धिरेवेति शेषः । तथा च प्रतिकूलतर्कसद्भावे ऽपि व्याप्यत्वासिद्धिरेवेति यदुक्तं तदपि सिद्धमिति भावः ॥ ९० ॥

अथोपसंहारवाक्यमभिप्रायाभिधानपूर्वकमवतार-यति । एवं चेति ।

अथ न्यायैकदेशिमतेनाभासातिरेकमाशङ्कते । अन-ध्यवसित इति । तस्य तदुक्तलक्षणं चाह । यथेति । केवल-व्यतिरेकिणो भिनत्ति साध्यासाधक इति । शेषमाभा-सान्तरनिरासार्थम् । अथ परोदाहृतानामनध्यवसितभे-दानां यथायथमसाधारणादिष्वन्तर्भावान्नातिरेक इति प-

(१) विभागोद्देशमुक्तमुपसंहरति—पा॰ A पु॰ ।

र्भावान्न पञ्चभ्योऽतिरेक इति[1] ॥

हेत्वाभासवद् दृष्टान्ताभासा अपि किमिति सूत्रकारैरेव नोद्दिश्यन्ते न च लक्ष्यन्त इत्याशङ्कायामाह ।

न सूत्रितं किमिति चेद्दृष्टान्ताभासलक्षणम् ॥ ९१ ॥

अन्तर्भावो यतस्तेषां हेत्वाभासेषु पञ्चसु ।

पक्षाभासवद्दृष्टान्ताभासानामपि हेत्वाभासेष्वेव यथायथमन्तर्भावान्न ते पृथक् सूत्रिता इति ॥ ९१ ॥ ऽऽ ॥

तेषां कस्य कुत्रान्तर्भाव इत्यत्राह ।

रिहरति । तस्येति । तत्रानित्यः शब्दः आकाशविशेषगुणत्वादित्यसाधारणः । एवमन्येषामपि सर्वमनित्यं सत्त्वादित्यादीनां व्याप्यत्वासिद्धिभागासिद्ध्यादिष्वन्तर्भावः सुगम एवेति भावः ।

ननूत्तरश्लोके सूत्रितशब्दप्रयोगो न युक्तः संग्रहकारस्य स्वयमसूत्रकारत्वादित्याशङ्क्य सूत्रकारस्यैवायमुपालम्भो न त्वस्येति दर्शयन्नवतारयति । हेत्वाभासवदिति । आशङ्कायामाहेति । आशङ्कामनूद्य निरस्यतीत्यर्थः ।

ननु दृष्टान्ताभासानां कथं हेत्वाभासेष्वन्तर्भाव इत्याशङ्क्य पक्षाभासवत् तल्लक्षणलक्षितत्वादिति व्याचष्टे । पक्षाभासवदिति ॥ ९१ ॥ ऽऽ ॥

ननूक्ता अपि हेत्वाभासा कतिचित् किमर्थमुत्तरार्द्धत्रये पुनरुच्यत इत्याशङ्क्याह । तेषामिति । दृष्टान्ताभा-

---

(१) यथायोगमन्तर्भावाच्च पञ्चभ्योऽतिरिक्त इति—पा॰ B पु॰ ।

साधारणो विरुद्धो वा दृष्टान्ते साध्यवर्जिते ॥९२॥
असाधारणता हेतोस्तस्मिन् साधनवर्जिते ।
व्याप्त्यसिद्धिरभावे स्यादाश्रयस्य द्वयोरपि[१] ॥९३॥

साध्यविकलो दृष्टान्तो विपक्ष एव स्यात्[२] । तत्र वर्तमानो हेतुः सपक्षान्तरवृत्तौ सत्यां पक्षत्रयवृत्तित्वात् साधारणानैकान्तिको भवति। यथाऽनित्यः शब्दः प्रत्यक्षत्वात् सामान्यवदिति । अत्र विपक्षे सामान्ये सपक्षे घटादौ पक्षे च शब्दे वर्तमानः प्रत्यक्षत्वादिति हेतुः साधारणो भवति। असत्यां तु सपक्षवृत्तौ पक्षविपक्षयोरेव वर्तमान इति विरुद्धो भवति। यथाऽनित्यः शब्दः श्रोत्रग्राह्यत्वाच्छब्दत्ववदिति। साध्यधर्मवति दृष्टान्ते साधनविकले सपक्षादपि व्यावृत्तेरसाधारणानैकान्तिको हेतुः स्यात्।

सानामित्यर्थः ।

ननु साध्यविकलस्य साधारणविरुद्धयोरत्यन्तविलक्षणयोरन्तर्भावः कथमिच्छया विकल्प्यत इत्याशङ्क्य तत्र हेतोः सपक्षवृत्त्यवृत्तित्वाभ्यां द्वैविध्याद् व्यवस्थितविकल्प इति व्याचष्टे। साध्यविकल इत्यादि। द्वितीयार्धं व्याचष्टे। साध्यधर्मवतीति । ननूदाहृते साधनविकले हेतोः पक्षमात्रवृत्तित्वादसाधारण्यमस्तु यस्तूदाहृतदृष्टान्तव्य-

(१) तयोरपि—पा॰ B पु॰ ।

(२) विपक्ष एव भवति—पा॰ B पु॰ ।

यथा नित्यः शब्दः आकाशविशेषगुणत्वादात्मवदिति। ननु सकलसपक्षादपि व्यावृत्तौ ह्यसाधारणो भवति केषुचित् सपक्षेषु वर्तमानो दृष्टान्ततया निर्दिष्टे सपक्षे चावर्तमानः कथमसाधारणः स्यात्। यथा नित्यः शब्दोऽमूर्तत्वात् परमाणुवदिति। सत्यमयमसाधारणो न भवति सपक्षेष्वाकाशादिषु वृत्तेः। तथाप्यनुपदर्शितव्याप्तिको हेतुः स्यादिति हेत्वाभासान्तर्गत एवेति भावः। दृष्टान्तधर्मिण एवाभावे तस्मिन् सत्येव द्वयोः[१] साध्यसाधनयोरभावे ऽप्यनुपदर्शितव्याप्तिको[२] हेतुः स्यात्। यथाऽनित्यः शब्दः प्रत्यक्षत्वादिति यथाकाशं यथा वा तत्कुसुममिति। ननु तस्यामेव प्रतिज्ञायां कृतकत्वादिति हेतुमभि-

क्तावववर्तमानोऽपि सपक्षान्तरे वर्तते तस्यासाधारणत्वासम्भवाद् दृष्टान्ताभासत्वमेवेत्याशयेन शङ्कते। नन्विति। तस्यासाधारण्याभावे ऽपि स्वनिर्दिष्टदृष्टान्तव्यक्तावनुपदर्शितव्याप्तिकत्वाद् व्याप्यत्वासिद्धावन्तर्भाव इत्याह। सत्यमिति। यद्यप्यत्रामूर्तत्वस्य पक्षत्रयवृत्तित्वादनैकान्तिकत्वं चास्ति तथाप्यपुरःस्फूर्तिकत्वादनुद्भाव्यं तत् उभयविकलाश्रयविकलयोस्तु व्याप्यत्वासिद्धावन्तर्भाव इति तृतीयार्द्धेनोच्यत इत्याह। दृष्टान्तधर्मिण एवेति। क्वचिदनयो[३]रनन्तर्भावमाशङ्कते। नन्विति। अतिपीडा-

(१) तयोः—पा॰ D पु॰। (२) असिद्धव्याप्तिको—पा॰ B पु॰।
(३) साध्यसाधनविकलाश्रयविकलयोः।

धाय गगनतत्कुसुमयोर्निदर्शितयोर्न व्याप्यसिद्धिरिति दृष्टान्ताभासमात्रमत्रेति चेत् न अत्राप्यनुपदर्शितव्याप्तिको हेतुः स्यात् अतिपीडायां(१) व्याप्यत्वासिद्धिरेव। एवं च वैधर्म्यदृष्टान्ते ऽपि साध्याव्यावृत्तेरसाधारण्यं साधनाव्यावृत्तेर्विरोधः साधारण्यं वा उभयाव्यावृत्तावाश्रयाभावे ऽपि व्याप्यत्वासिद्धिः। ततश्च दृष्टान्ताभासानां हेत्वाभासान्तर्भावान्नासूत्रितत्वोपालम्भ इति ॥ ९२ ॥ ९३ ॥

छलं सामान्यतो लक्षयति ।

यामिति। कृतकत्वानित्यत्वयोर्व्याप्तिसद्भावे ऽपि निर्दिष्टदृष्टान्तव्यक्त्योरनुपदर्शितव्याप्तिकत्वमात्रेण कथञ्चिद् व्याप्यत्वासिद्धिरेवेत्यर्थः। अथ साधर्म्यदृष्टान्ताभासवद् वैधर्म्यदृष्टान्ताभासानामपि हेत्वाभासान्तर्भाव एवेत्याह। एवं च वैधर्म्येति। तत्र पूर्वोक्तसाधनविकलोदाहरण(२)मेवात्र साध्याव्यावृत्तस्योदाहरणं साध्यविकलोदाहरणं(३) च साधनाव्यावृत्तस्येति द्रष्टव्यम्। उभयेत्यादि स्पष्टम्। उपसंहरति। ततश्चेति। इति हेत्वाभासपदार्थः ॥ ९२ ॥ ९३ ॥

ननु छलस्य बहुशो लक्षणानि वक्ष्यन्ते तत् किमुच्यते किञ्चिदर्थमित्यादिनेत्यत आह। छलमिति। सामान्यलक्षणं विना विशेषलक्षणाप्रवृत्तेः प्रथमं सामान्यलक्षणमुच्यत इत्यर्थः।

---

(१) अत्यन्तपीडायां—पा॰ B पु॰ ।

(२) शब्दो नित्य आकाशविशेषगुणत्वात् आत्मवत् ।

(३) अनित्यः शब्दः प्रत्यक्षत्वात् सामान्यवत् साधारण्यम् अनित्यः शब्दः श्रोत्रग्राह्यत्वात् शब्दत्ववत् ।

किञ्चिदर्थं[१]मभिप्रेत्य प्रयुक्ते वचने पुनः ।
अनिष्टमर्थमारोप्य तन्निषेधश्छलं मतम् ॥ ९४ ॥

अर्थान्तरविवक्षया वाक्यप्रयोगे वक्तुरनभिप्रेतमेवार्थं तदर्थत्वेनाध्यारोप्यारोपितार्थदूषणं छलम् । अर्थश्चाभिधेय औपचारिकस्तात्पर्यविषयश्च विवक्षित इति तेन छलत्रयसंग्रह इति[२] । तदुक्तम् । वचनविघातोऽर्थविकल्पोपपत्त्या छलमिति । वाक्यस्य विविधकल्पना नानात्वकल्पनोपपत्तिकारणतया वचनविघातः छलमित्यर्थः ॥ ९४ ॥

छलानि परिसञ्चष्टे । तच्च त्रेधा वाक्छलादिभेदात् । तदुक्तम् । तत्त्रिविधं वाक्छलं सामान्यच्छलमुपचारच्छलं चेति ।

तत् तु त्रेधा वाक्छलादिभेदतस्तत्र वाक्छलम् ।
अभिधावैपरीत्येन कल्पितार्थस्य बाधनम् ॥९५॥

किञ्चिदन्यमेव । अनिष्टमनभिप्रेतम् । तन्निषेध आरोपितार्थनिषेधः । तदेतत्सर्वं व्यनक्ति । अर्थान्तरेत्यादि । नन्वर्थशब्दस्याभिधेयवचनत्वादिदं लक्षणमनभिधेयार्थे वाक्छलादन्यत्राव्याप्तमित्याशङ्क्याह । अर्थश्चेति । मुख्यामुख्यसाधारणार्थोऽयमर्थशब्द इत्यदोष इत्यर्थः । अर्थविकल्पोपपत्त्या अर्थान्तरकल्पनयेत्यर्थः ॥ ९४ ॥

(१) कमप्यर्थ—पा॰ B पु॰ ।
(२) इति सर्वसङ्ग्रह सिद्धिरिति—पा॰ B पु॰ ।

अर्थान्तरविषयामभिधामभिप्रेत्य प्रयुक्तस्य श-ब्दस्यानभिमतार्थान्तरविषयामभिधामारोप्य कल्पि-तस्याभिधेयस्य निषेधो वाक्छलम् । अभिधेयान्तर-विषयतया प्रयुक्तस्य शब्दस्याभिधेयान्तरमारोप्य त-न्निषेध इत्यर्थः । यथाहुः । वाच्यान्तरकल्पना यत्र तद्वाक्छलमिति । तदुक्तम् । अविशेषाभिहिते ऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलमिति । त-

नन्वभिधावैपरीत्यमौपचारिकत्वं तच्च वाक्छले न सम्भवतीत्याशङ्क्याभिधान्तराश्रयणमिति व्याचष्टे। अर्था-न्तरेति। ननु अनेकार्थस्यापि शब्दस्य वृत्तिद्वयायोगात् एकैवाभिधेति कथमभिधान्तरवाचो युक्तिरित्याशङ्क्य स-त्यमभिधेयभेदाद्भेदव्यपदेश इत्याशयेन वास्तवमर्थमाह । अभिधेयान्तरेति। अथवा अस्त्वभिधाभेदः तथापि लक्षणे कल्पितार्थस्य बाधनमित्ययुक्तम् अभिधावैपरीत्यपदेने-त्यभिधोपादानसामर्थ्याद् विपरीताभिधादूषणस्यैव लक्ष-णत्वावगतेरभिधेयार्थदूषणायोगादित्याशङ्क्य तत्राप्यभि-धेयपरत्वमेव विवक्षितम्(१) तत्परिहारेण केवलाभिधादू-षणस्य दुष्करत्वादित्याशयेन तात्पर्यार्थमाह । अभिधेया-न्तरमिति। वाच्यान्तरकल्पनेति। वाच्यान्तरे प्रयुक्तस्येति शेषः। कल्पना कल्पयित्वा तन्निषेध(२) इत्यर्थः। अविशेषे-ति। अर्थद्वये ऽप्यैकरूप्यमविशेषः तेनाभिहिते ऽर्थे प्रयुक्ते

(१) अभिधावैपरीत्यमत्राभिधेयपरमेव विवक्षितमिति भावः ।
(२) तत्पदेन वाच्यान्तरम् ।

द्यथा आढ्योऽयं नवकम्बलवत्त्वादिति । अत्र नवश-
ब्दस्य नूतनत्वमभिप्रेत्य प्रयोगे सङ्ख्याविशेषमभि-
धेयमारोप्य निषेधति । कुतोऽस्य नव कम्बला एक
एव कम्बलः प्रत्यक्षसिद्ध इति ॥ ९५ ॥

सामान्यच्छलमेतत् स्यादतिसामान्ययोगतः ।
तात्पर्यवैपरीत्येन कल्पितार्थस्य बाधनम् ॥ ९६ ॥

उत्तरमर्द्धं लक्षणांशः । सामान्यच्छलमिति लक्ष्य-
निर्देशः । अतिसामान्ययोगत इति छलवादिनः प्रत्य-
वस्थानबीजम् । एतदुक्तं भवति । निर्दिष्टस्य कस्य-
चित् सामान्यस्यानभिमतमेव हेतुत्वादिकं तात्पर्य-
विषयमारोप्य तस्यानभिमतेष्वेव विशेषेषु योगदर्श-
नादनैकान्तिकत्वादिदोषोद्भावनमिति । यथा अयमहो

शब्द इत्यर्थः । अभिप्रायादभिप्रेतार्थादित्यर्थः । कल्पना आरोपः गतमन्यत् । वाक्छलमुदाहरति । यथेत्यादि ॥ ९५ ॥

अथ सामान्यच्छललक्षणमाह । सामान्येति । भेदा-न्तराद्भिनत्ति । तात्पर्यवैपरीत्येनेति ।

अतिसामान्ययोगत इत्यस्य लक्षणान्तःपातित्वशा-ङ्कानिरासाय लक्ष्यलक्षणांशौ निर्द्धारयति । उत्तरमर्द्धमि-त्यादि । तर्हि तत्किमर्थमत आह । अतिसामान्येति । अतिक्रान्तमभिमतविषयवर्तिसामान्यमतिसामान्यं त-द्योगत इत्यर्थः । कथमस्य तद्बीजत्वमित्याशङ्क्य यथैतत् तथा दर्शयति । एतदुक्तमिति । उदाहरति । यथेत्यादि ।

ब्राह्मणोऽनूचान इत्युक्ते किमत्राद्भुतं ब्राह्मणोऽनूचान इति अत्र ब्राह्मणस्यानूचानत्वसम्भावनामात्रेण कश्चिद्वदति । तत्र ब्राह्मणत्वस्यानूचानत्वे हेतुत्वं तात्पर्यविषयमारोप्य छलवादी प्रत्यवतिष्ठते । न ब्राह्मणत्वमनूचानत्वे हेतुर्निराकृतिभिरनैकान्तिकत्वादिति । तदुक्तम् । सम्भवतोऽर्थस्यातिसामान्ययोगादसद्भूतार्थकल्पना सामान्यच्छलमिति ॥ ९६ ॥

उपचारप्रयोगेषु गौणलाक्षणिकेषु यः ।
मुख्यार्थासम्भवाद्बाध उपचारच्छलं तु तत्[1]॥९७॥

शब्दानां शक्तिवशादेवाहत्य प्रतीयमानोऽर्थो

सम्भवतोऽर्थस्य ब्राह्मणादौ सम्भावनामात्रेणोक्तस्यार्थस्यानूचानत्वादेरतिसामान्ययोगात् उक्तब्राह्मणत्वादिसामान्यस्यानूचानत्वातिक्रमेण व्रात्यादौ योगदर्शनात् असद्भूतार्थकल्पना अनभिप्रेतहेतुत्वारोपेण विघट्टनं सामान्यच्छलमिति सूत्रार्थः ॥ ९६ ॥

अथोपचारच्छललक्षणं व्याख्यातुं पठति । उपचारेति । गौणलाक्षणिकभेदेन द्विविधेष्वप्यौपचारिकप्रयोगेषु प्रयोक्तुरविवक्षितं मुख्यार्थमारोप्य तस्यासम्भवदोषेण दूषणमुपचारच्छलमिति श्लोकार्थः ।

अथ कोऽयं मुख्यार्थः क औपचारिकः कतिविधश्चेत्याकाङ्क्षायां सर्वं दर्शयति । शब्दानामित्यादि । शक्तिवशादभिधासामर्थ्यादित्यर्थः । आहत्येति । अन-

---

(१) छलं भवेत्–पा॰ A पु॰ ।

मुख्यः । यथा गवादिशब्दानां गोत्वादिजातिक्रोडीकृता व्यक्तिः । औपचारिकस्तु मुख्यार्थद्वारा प्रतीयमानः । उपचारश्च द्विविधः गौणलक्षणाभेदात् । तत्र लक्षणा नाम मुख्यार्थसम्बन्धिन्यर्थान्तरे वृत्तिः । यथा गङ्गायां घोषः प्रतिवसति इत्यत्र गङ्गाशब्दस्य तत्सम्बन्धिनि तीरे वृत्तिः गौणी तु मुख्यार्थवर्तिगुणसामान्ययोगिन्यर्थान्तरे वृत्तिः । यथा सिंहो देवदत्त इत्यत्र सिंहवर्तिशौर्यादिगुणसामान्ययोगिनि देवदत्ते सिंहशब्दस्य वृत्तिः । यथाहुः ।

अभिधेयाविनाभूतप्रतीतिर्लक्षणेष्यते ।
लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता ॥ इति(१) ।

न्यव्यवधानेनेत्यर्थः । जातिक्रोडीकृता व्यक्तिरिति । न तु मीमांसकवज्जातिरेवेत्यर्थः । मुख्यार्थद्वारेति । मुख्यार्थेनैव द्वारा उपायेनेत्यर्थः । तेन हि स्वशब्दाभिहितेनाप्यनुपपन्नत्वात् स्वसम्बन्धी स्वगुणयोगी वार्थः प्रत्याय्यते स शब्दस्य औपचारिकोऽर्थः । स्फुटमन्यत् ।

अत्र लक्षणागौण्योर्भट्टसम्मतिमाह । अभिधेयेत्यादि । मुख्यार्थानुपपत्तौ तत्सम्बन्धार्थान्तरप्रतीतिर्लक्षणा । लक्ष्यमाणेति । जातिरेव शब्दार्थः तदाक्षेप्या व्यक्तिरिति मीमांसकाः । तत्क्रोडीकृताव्यक्तिः शब्दार्थ इति नैयायिकाः । उभयथापि लक्ष्यमाणतत्तद्गुणयोगिन्यर्थान्तरे

---

(१) रिष्यति गौणतेति—पा॰ C पु॰ ।

तत्र गौणं लाक्षणिकं वार्थमभिप्रेत्य वाक्यप्रयोगे वक्तुरनभिप्रेतमेव मुख्यार्थमारोप्य तदसम्भवेन दूषणाभिधानमुपचारच्छलम् । यथा गङ्गायां घोषः प्रतिवसति सिंहो देवदत्त इति वा प्रयुक्ते कथं जले घोषवासः कथं देवदत्तः सिंह इति वा प्रत्यवस्थानम् । अभिधातात्पर्यौपचारवृत्तिव्यत्ययेन कल्पितार्थनिषेध इति त्रयाणां सङ्क्षेपतो लक्षणम् । छलं च

सादृश्यनिबन्धना वृत्तिर्गौणीत्यर्थः ।

अथैवं लक्षणवाक्यस्थपदार्थमभिधाय तद्वाक्यार्थमाह । तत्र गौणमित्यादि । उभयमुदाहरति । यथेति । अथ शिष्याणां सुखबोधार्थं छलत्रयस्यापि लक्षणत्रयं सङ्गृह्याह । अभिधेति । अभिधावृत्तिव्यत्ययेनोपचारवृत्तिव्यत्ययेनेत्यादि योज्यम् । तथा च वाच्यान्तरे प्रयुक्तस्य शब्दस्याविवक्षितवाच्यान्तरारोपेण तथौपचारिकार्थस्यानभिमतमुख्यार्थारोपेण सम्भावनामात्राभिप्रायेणोपन्यस्तस्यार्थस्य हेतुत्वारोपेण वचनविघाताः क्रमेण वागुपचारसामान्यच्छलानीत्यर्थः । अथैषामुद्भवोद्भावनयोरवसरमाह । छलं चेति । अत्र नवकम्बलोऽयं माणवकः मञ्चाः क्रोशन्तीति च वादिना प्रयुक्ते ततो द्वितीयकक्षायां प्रतिवादिना वागुपचारच्छलयोरुत्क्रमेणोद्भवः ततस्तृतीयकक्षायां वादिनोद्भावनं सामान्यच्छलस्य तु ब्राह्मणोऽयमनूचान इति वादिनोक्ते क्रमादुद्भवः तदुत्तरकक्षायां प्रतिवादिनोद्भावनमित्यर्थः । तत्र यथाकालमनुद्भावने छलप्रयोक्तुर्निरनुयो-

द्वितीयादिकक्षायां[1] सम्भवति उत्तरकक्षायामुद्भाव्यमिति ॥ ९७ ॥

इति श्रीवरदराजविरचिते तार्किकरक्षाव्याख्याने सारसंग्रहे प्रथमः परिच्छेदः ॥

ज्यानुयोगः अन्यथेतरस्य पर्यनुयोज्योपेक्षणमुभयोः प्रमादे षट्कक्ष्यनन्तरं सभ्यैरुद्भाव्यं फलं तु छलप्रयोगस्य परव्यामोहनात् पाक्षिकविजयलाभ इति स्थितिः । इति छलपदार्थः ॥ ९७ ॥

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचल[2]श्रीमल्लिनाथसूरिविरचितायां वरदराजीव्याख्यायां[3] प्रथमः परिच्छेदः समाप्तः ॥

श्रीभद्रकाल्यै नमः ॥

---

(१) कक्ष्यासु—पा॰ B पु॰ ।

(२) लोकाचल—पा॰ E पु॰ ।

(३) वरदराजविरचितसारसंग्रहव्याख्यायां निष्कण्टकासमाख्यायां—पा॰ F पु॰ ।

सटीकतार्किकरक्षायाम्

द्वितीयः परिच्छेदः ।

अथ जातिः । तत्र सामान्यलक्षणसूत्रम् । सा-

द्वितीयपरिच्छेदस्य

ज्ञानपूर्णकृता

लघुदीपिका टीका[१] ।

ॐ नमः परमात्मने ।

चतुर्दशपदार्थात्मपरिच्छेदार्थविस्तृतिः ।
कृता जातिपरिच्छेदव्याख्यानमधुनोच्यते[२] ॥

अथ जातिः छलानन्तरमुद्देशक्रमप्राप्ता जातिः सामान्यतो विशेषतश्च लक्ष्यत इति शेषः । तत्र लक्ष्यमा-

---

(१) मल्लिनाथकृतनिष्कण्टकाटीकायाः पुस्तकत्रयं सम्पादितं मया परं तु त्रिष्वपि पुस्तकेषु प्रथमपरिच्छेदान्ते छलपदार्थनिरूपणानन्तरं समाप्तिर्दृश्यते ऽतोऽत्र द्वितीयतृतीयपरिच्छेदयोर्ज्ञानपूर्णकृता लघुदीपिकाख्या टीका सन्निवेश्यते । किं तु मल्लिनाथेन द्वितीयतृतीयपरिच्छेदौ जातिनिग्रहस्थाननिरूपकौ न व्याख्याताविति न भ्रमितव्यम् (पृ· १९० पं· १५) एतत्सर्वं जातिपरिच्छेदे स्फुटीभविष्यतीति, तथा (पृ· २०७ पं· ११) एतच्च निग्रहान्ते स्फुटीभविष्यतीति मल्लिनाथेनैव निष्कण्टकायामुक्तत्वात् । प्रथमपरिच्छेदस्य लघुदीपिका त्वन्ते मुद्रिता भविष्यतीत्यवगन्तव्यम् ॥

(२) प्रमाणादिच्छलान्तचतुर्दशपदार्थनिरूपकस्य प्रथमपरिच्छेदस्य व्याख्यानं कृतम् इदानीं जातिपरिच्छेदो द्वितीयो व्याख्यायत इति भावः ।

धर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिरिति । तदिदं सदुत्तरप्रकरणसमातीतकालोद्भावनाभ्यामतिव्याप्तेः उत्कर्षसमादावव्याप्तेश्च लक्षणमुपलक्षणमात्रपरमिति मन्वाना भाष्यवार्त्तिकटीकातात्पर्यपरिशुद्धिकाराः सर्व एव सर्वास्वपि जातिषु समशब्दं प्रयुञ्जानस्य सूत्रकारस्य तदर्थ एवानुवृत्तत्वाल्लक्षणत्वेन विवक्षित इति व्याचक्षते । भाष्यकारस्तावदुत्तरवादिनाभिधीयमानं विशेषहेत्वभावं समशब्दस्यार्थमाह । यदभाष्यत् साधर्म्येण प्रत्यवस्थानमविशिष्यमाणमिति । अत्र साधर्म्यग्रहणमुपलक्षणार्थम् । ततश्च यथा त्वदुक्तं साधर्म्यं वैधर्म्यं वा सहचरितं तथास्मदुक्तमपि । न हि त्वदुक्तमेव साधकं नास्मदुक्तमित्यत्र विशेषहेतुरस्तीत्यादिनाकारेण व्याप्त्यादियुक्ताङ्गानपेक्षया साधर्म्यादिमात्राद्विशेषहेत्वभावाभिधानेन प्रत्यवस्थानं जातिरिति भाष्याभिप्रायः । वार्त्तिककारस्तु सममनुत्कृष्टमपकृष्टमुत्तरं जातिरिति मन्वान उत्तरवादिवाक्यगतमपकर्षं लक्षणया साम्यमाह । अपकर्षश्च स्थापनाहेतुप्रतिषेधासामर्थ्यम् । तच्च व्याप्तिवैधुर्यं स्थापनाहेतुरिव प्रतिषेधहेतुरपि व्याप्तिपक्षधर्मतयोरन्य-

---

णायां जातौ । प्रत्यवस्थानं परपक्षप्रत्यक्ष (?) इत्यर्थः । तदिदं लक्षणमित्युत्तरत्र सम्बन्धः । सदुत्तरेति जातिरूपप्रकरणसमव्यवच्छेदः ।

तराभावे भवत्याभासः । तत्र दूष्यदूषणव्याप्तौ सत्यासपक्षधर्मः कल्पितदूष्यं छलम् । तथाहि आढ्योऽयं नवकम्बलत्वादिति प्रयुक्ते कुतो नवास्य कम्बला इति छलवादिनो नेदं साधकमसिद्धत्वादिति हि विवक्षितम् । तत्रासिद्धत्वादितिहेतुर्दूष्यदूषणव्याप्तौ सत्यामपि पक्षभूते वादिहेतावसिद्धः अविवक्षितमेव सङ्ख्याविशेषमित्थं कल्पयित्वा प्रवर्तत इति छलं भवति । अकल्पितदूष्यस्तु केवलनिरनुयोज्यानुयोगो भविष्यति पक्षधर्मत्वे सत्यपि व्याप्तिशून्यः प्रतिषेधहेतुर्जातिः वादिसाधनं स्वसाध्यसाधनं न भवति युक्ताङ्गानपेक्षप्रतिधर्मप्रतिरुद्धत्वादित्यादयः प्रतिषेधहेतवः पक्षधर्मा अप्यसाधकत्वव्याप्त्यभावाद्भवन्ति जातय इति । तथा च वार्त्तिकम् । जातिर्नाम स्थापनाहेतौ प्रयुक्ते यः प्रतिषेधासमर्थो हेतुरिति स्वात्मनः परेण साम्यापादनाय प्रयुक्तमुत्तरं जातिरिति मन्वानष्टीकाकारो बुद्धिगतमेव साम्यं समशब्दप्रवृत्तिनिमित्तं मन्यतेस्म । यदाह समार्थः समीकरणार्थः प्रयोगो द्रष्टव्य इति । अयमत्र भावः । वादिना हेतौ प्रयुक्ते सदुत्तरापरिस्फूर्तौ प्रतिवादिनः साम्यापादनबुद्धिर्भवति अस्मदुक्तेन जात्युत्तरेणायं पर्याकुलितमानसो यदि स्वयमप्यसदुत्तरं ब्रूयात् तदा ममेवास्यापि निरनुयोज्यानुयोगः स्यात् निष्प्रतिभश्चेत् पर्यनुयोज्योपेक्षणं भवेदि-

त्युभावपि समौ भविष्यावः। यदि सदुत्तरेणायमस्मदुक्तां जातिमुद्धरेत् तदा ममैव पूर्वमापन्नः पराजयोऽवतिष्ठत इति पाक्षिकसाम्यापादनबुद्ध्या जातिवादिनः प्रत्यवस्थानमिति। आचार्यास्तु यदुत्तरं परकीयसाधनस्येव स्वस्यापि व्याघातकं भवति सा जातिरुत्तरस्यापि व्याघातकत्वेन स्वपरसाधनसाम्यं समशब्दप्रवृत्तिनिमित्तमाहुः। यथा जात्युत्तरं परसाधनमिव स्वात्मानमपि व्याप्नोति अतः स्वपरसाम्यात् सममित्युच्यत इति। अनेन स्वव्याघातकरमुत्तरं जातिरित्युक्तं भवति।

तत्र तावद्यथावार्त्तिकं लक्षणमाह।

प्रयुक्ते स्थापनाहेतौ दूषणाशक्तमुत्तरम्।
जातिमाहुः

अत्र सिद्धत्वे ऽपि दूषणासामर्थ्यमशक्तिः। ततश्च छलादिव्यवच्छेदसिद्धिरिति।

अथ न्यायाचार्याभिमतं लक्षणमाह।

अथान्ये तु स्वव्याघातकमुत्तरम्॥ १॥

कालात्ययापदिष्टप्रकरणसामाभ्यां प्रत्यवस्थानं साधर्म्यवैधर्म्याभ्यामपि भवतीत्यजातौ जातिलक्षणम् तथोत्कर्षादिसमानां साधर्म्य एवैकपक्षे पक्षपात इत्याशङ्क्याह। तत्र तावदिति। यथावार्त्तिकमित्यत्र योजना चेत्यध्याहारः (?)।

दूषणाशक्तं दूषणेनाव्याप्तम्। ख्यापनपरं व्याख्यातप्रायमिदं पद्यम्। अतिरोहितार्थमित्यर्थः।

॥ श्रीः ॥

न्यायप्रदीपाख्यटीकायाः सूचीपत्त्रम् ।

॥ श्रीः ॥

सटीकतर्कभाषाया विज्ञापनम् ।

गोवर्धनमिश्रकृततर्कभाषाप्रकाशाख्यतर्कभाषाटीकायाम्

यत्तर्कभाषामनुभाषतेस्म गोवर्धनस्तर्ककथासु धीरः ।
तेनानवद्येन सुधांशुगौरी कीर्तिर्गुरूणाममृताधिकास्तु ॥

विजयश्रीतनूजन्मा गोवर्धन इति श्रुतः ।
तर्कानुभाषां तनुते विविच्य गुरुनिर्मितिम् ॥

श्रीविश्वनाथानुजपद्मनाभानुजो गरीयान् बलभद्रजन्मा ।
तनोति तर्कानधिगत्य सर्वान् श्रीपद्मनाभाद्विदुषो विनोदम् ॥

इति रामकृष्णगोपालभाण्डारकरमहाशयसङ्कलित१८८२-८३-ख्रीष्टाब्दीयरिपोर्ट्पुस्तके २१३पृष्ठायां 'गुरुनिर्मितिं तर्कानुभाषां विविच्य तनुत' इतिलेखदर्शनेन गोवर्धनमिश्रः केशवमिश्रस्य शिष्य इति सिध्यति । बलभद्रजन्मेत्यनेन च बलभद्रोऽस्य गोवर्धनमिश्रस्य पितेति विजयश्रीतनूजन्मेत्यनेन च विजयश्रीर्गोवर्धनस्य मातेति चावगम्यते । विश्वनाथानुजपद्मनाभानुज इत्यनेन चास्य गोवर्धनस्य विश्वनाथपद्मनाभौ द्वौ ज्येष्ठभ्रातराविति निश्चीयते ।

पं॰ विन्ध्येश्वरीप्रसादद्विवेदिमुद्रितवाराणसीसंस्कृतसिरीजस्थ-सटीकप्रशस्तपादभाष्यभूमिकातो भाष्यटीकाकिरणावल्या एका पद्मनाभरचिता किरणावलीभास्करनामिका टीका वर्तत इति ज्ञायते । तत्पुस्तकं वाराणसीस्थबालसरस्वतीभवनपुस्तकालये वर्तते । तत्र चायमारम्भश्लोकः ।

उपदिष्टा गुरुचरणैरस्पृष्टा वर्धमानेन ।
किरणावल्यामर्थास्तन्यन्ते पद्मनाभेन ॥

अन्ते च—

यस्तर्कदुस्तरतरार्णवकर्णधारो वेदान्तवर्त्मनिरताध्वगसार्थवाहः ।
श्रीपद्मनाभरचितेन दिवाकरेण तुष्टोऽमुनास्तु सुकृती बलभद्रमिश्रः ॥

इति श्रीबलभद्रमिश्रात्मजपद्मनाभविरचितः किरणावलीभास्करः समाप्तः । इति लिखितमस्ति । पिटर्सन्महाशयकृतरायल्एसियाटिक्सोसाइटीसम्बन्धि१८८४—८५खीष्टाब्दीयजर्नल्पुस्तके २६१ पृष्ठायां कणादरहस्यनामकटीकामधिकृत्यादौ—

जयति पुरनिहन्तुः क्षोभपञ्चेषुवाणो-
जनिरचति पुमर्थानेककल्पद्रुमाणाम् ।
युगपदसुरजानां तद्द्रुहां चासहास्यौ
निरवधिगुणसीमा कोऽपि भीमा कटाक्षः ॥

स्तम्बेरमाग्रणीयं भ्रमरकुलं दानपानरमणीयम् ।
प्रद्योतमानगण्डस्थलमण्डलमण्डनं जयति ॥
आरचय्य प्रयत्नाद्यैरिहैकाशीतिकारिकाः ।?
आचार्यपद्मनाभेन व्याख्या सम्प्रति तन्यते ॥

अन्ते च—

न प्रार्थयामि भवतो दुर्वृत्ताः प्रार्थये साधून् ।
अङ्गीकृतमपि येषां शेषादिभिरप्यहो दूभूष्य ॥?
यद्यदत्र विनिक्षिप्तं नव्यं सिद्धान्तवर्तिना ।
पद्मनाभेन तैः प्रीतः प्रगल्भोऽस्तु गुरोर्गुरुः ॥

इतिश्रीसन्मिश्रश्रीजगद्गुरुबलभद्रात्मजविश्वनाथानुजविजयश्रीगर्भसम्भवसकलशास्त्रारविन्दप्रद्योतनभट्टाचार्यमिश्रश्रीमत्पद्मनाभकृतौ स्वकृतराद्धान्तमुक्ताहारव्याख्याने कणादरहस्यं समाप्तमिति ।

एवं लिखितमस्ति । बलभद्रात्मजेत्यनेन विजयश्रीगर्भसम्भवेत्यनेन विश्वनाथानुजेत्यनेन च गोवर्धनाग्रजन्मैव पद्मनाभः किरणावली-भास्कररकणादरहस्ययोः कर्तेति नात्र विवादावकाशः । अस्पृष्टा वर्ध-मानेनेतिकिरणावलीभास्करस्थलेखदर्शनेन च गोवर्धनाग्रजपद्मना-भस्य तत्त्वचिन्तामणिप्रणेतृगङ्गेशोपाध्यायात्मजवर्धमानोपाध्यायाद-र्वाचीनत्वमिति स्पष्टत एवावगम्यते ।

[illegible]

रामकृष्णगोपालभाण्डारकरमहाशयसङ्क[illegible]शत-ाब्दीयरिपोर्ट् पुस्तके चिन्नभट्टकृता तर्कभाषाप्रकाशिकानामिका एका टीका वर्तते । चिन्नभट्टस्तु सहजसर्वज्ञस्य पुत्रः सर्वज्ञस्य भ्राता विज-यनगरस्य राजा हरिहरोऽस्य सहायक आसीत् । स च चिन्नभट्टः चतुर्दशशताब्दिशेषभागे आसीदिति लिखितम् । तर्कभाषाटीकाकृ-च्चिन्नभट्टापेक्षया तर्कभाषाकृतः केशवमिश्रस्य प्राचीनत्वमाञ्जस्येनैव सिध्यति । एवं सति केशवमिश्रस्य तर्कभाषाटीकाकृद्गोवर्धनगुरु-त्वेन तत्समानकालत्वे सिद्धे गोवर्द्धनाग्रजपद्मनाभस्य च वर्धमानो-पाध्यायानन्तरत्वे चिन्नभट्टस्य च चतुर्दशशताब्दिशेषभागस्थायित्वे स्वीकृते केशवमिश्रस्य चतुर्दशशताब्दिशेषभागपूर्वत्वं वर्धमानोपा-ध्यायानन्तरत्वं पद्मनाभादिसमानकालिकत्वं च शक्यमवगन्तुम् ।

पिटर्सन्महाशयकृताल्वर्राजधानीस्थपुस्तकालयसूचीपु-स्तके पद्मनाभकृतप्रशस्तपादभाष्यसेतुमधिकृत्य—

स्मृतिपथमुपनीय श्रीमतस्तातवक्त्रात्
उचितमुपचितार्थं वाक्यमत्यादरेण ।
जयति विरचितोऽसौ पद्मनाभेन यत्ना-
दुदयनकृतिपारप्राप्तये सेतुरुच्चैः ॥

उदयनकृतिचन्द्रिकया वृद्धो भाष्याम्बुधिः परितः ।
बालानामपि सुगमस्तत्र मया रच्यते सेतुः ॥

बलवशीकृतदुर्दमभूपतिर्निजभुजार्जितलोकसमुन्नतिः ।
अगतिकार्थिजनस्य परा गतिर्जयति वीरवरः पृथिवीपतिः ॥

भाष्याम्भोनिधिसेतौ वीरवरीये यशोहेतौ (यशोहेतौ) ।
रचितो द्वितीयो भागो विदुषा श्रीपद्मनाभेन ॥

२४।यी कृणान्माविदुषा पितुर्पादष्टात् समाहृत्य ।
विषदीकृतः प्रयत्नात् कृतिषु विनोदाय गूढोऽर्थः ॥

भाष्याम्भोनिधिसेतौ वीरवरीये यशोहेतौ (यशोहेतौ)
चरमो लक्षणभागो रचितः श्रीपद्मनाभेन ॥

अमुनानृणीकृता वयमन्यवदान्याद्विशिष्टेन ।
प्रत्युपकारधियायं रचितो ग्रन्थस्ततोऽस्माभिः ॥

इतिलेखदर्शनात् पद्मनाभेनैव भाष्यसेतुनामिका टीका कृतेत्यवगम्यते । यद्यप्यत्र दृढतरप्रमाणाभावेन बलभद्रमिश्रपुत्रपद्मनाभेनैवायं सेतुः कृत इति न निश्चयः तथापि समानकालिकत्वानुमानेन द्वयोः समानपितृभक्तिदर्शनेन च सम्भाव्यत इदमिति ब्रूमः । तथाहि टड्साहब्रमहोदयप्रणीतराजस्थानेतिहासदर्शनेन बुन्दीनगरे १३४१खीष्टाब्दात्परं १४१६खीष्टाब्दपर्यन्तसमयमध्ये वीरसिंहो राजासीदित्यवगम्यते । तत्र वीरसिंहः छन्दोनुरोधेन वीरवरपदेन वीरेन्द्र इत्यर्थमाश्रित्य पद्मनाभेन सङ्गृहीत इति सम्भाव्यते बलभद्रमिश्रपुत्रपद्मनाभस्य च यथोक्तयुक्त्या चतुर्दशशताब्दिमध्ये स्थायित्वसम्भवः । ऋणयुक्तः पद्मनाभो मिथिलाप्रदेशात् बुन्दीप्रदेशं गत्वा वीरसिंहादनृणो जात इति अमुनानृणीकृता वयमिति लिखितवानि-

त्यपि सम्भाव्यते। पुस्तकं च तत्रैव लिखितमिति तत्प्रदेश एव प्राय उपलभ्यत इत्यपि सम्भाव्यते ।

इत्थं च पद्मनाभसमानकालिककेशवमिश्रोऽपि १३४१खीष्टाब्द-१४१६खीष्टाब्दमध्य आसीदिति सम्भाव्यते । अन्ततो वर्धमानोपाध्यायानन्तरकालिकः चिन्नभट्टस्थितिकालचतुर्दशशताब्द्यन्तभागपूर्वकालिकः केशवमिश्र इत्यत्राविसंवाद एवेति ॥

केचिन्मैथिलास्तु किम्बदन्तीमात्रसहाया मिथिलाप्रदेशान्तर्गतसरिसवग्रामनिवासी अभिनववाचस्पतिमिश्रस्य पौत्रः केशवमिश्रः तर्कभाषाद्वैतपरिशिष्टालङ्कारशेखरालङ्कारसर्वस्वादिबहुग्रन्थप्रणेता इत्याहुः ।

अभिनववाचस्पतिमिश्रश्च पक्षधरमिश्रसमानकालिकः । तथा च गाथा ।

शङ्करवाचस्पत्योः सदृशौ शङ्करवाचस्पती ।
पक्षधरप्रतिपक्षी लक्ष्यीभूतो न च क्वापि ॥ इति ।

केशवमिश्रस्याभिनववाचस्पतिमिश्रपौत्रत्वे प्रमाणं यथा केशवमिश्रकृतद्वैतपरिशिष्टनामकधर्मशास्त्रप्रबन्धे यद्यपि परमगुरुचरणैस्तत्त्वालोके लाघवात् पर्युदासलक्षणया द्वयोरेकवाक्यतापि स्वीकृतेति लिखितम् । द्वैतपरिशिष्टग्रन्थे ऽपरत्रापि अत एव यत्र दशाग्रवेधी नास्ति अग्रिमदिने चैकादशी वर्धते तत्रापि वर्धमानैकादश्युपोषणं शास्त्रार्थं इति कृत्यमहार्णवे परमगुरव इति लेखो दृश्यते तत्त्वालोकस्य च वाचस्पतिमिश्रप्रणीतन्यायसूत्रव्याख्यारूपत्वेन कृत्यमहार्णवस्यापि वाचस्पतिमिश्रप्रणीतत्वेन गुरुस्तु गीष्पतौ श्रेष्ठे गुरौ पितरि दुर्भर इति कोषाद् गुरुशब्दस्य पितृवाचकत्वावगतेः किम्बदन्त्यनुरोधेन

कत्वं

परमगुरुशब्देन पितामहबोधनं सम्भवतीति परमगुरुत्वे ऽविवाद एवेत्यपि वर्णयन्ति ।

पक्षधरस्य च वक्ष्यमाणयुक्त्या दीधितिकारसमानकालिकत्वं दीधितिकारस्य श्रीकृष्णचैतन्यप्रभुसमानकालिकत्वमिति वर्णयन्ति गौडाः । तत्राभिनववाचस्पतिमिश्रापेक्षया षड्दर्शनटीकाकृद्वाचस्पतिमिश्रस्यातिप्राचीनत्वे प्रमाणं पश्यामः । तथाहि गङ्गेशोपाध्यायकृततत्त्वचिन्तामणिग्रन्थे अत एव प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः न हि करिणि दृष्टे चीत्कारेण तमनुमिमते ऽनुमातार इतिवाचस्पतिवचनयोरविरोध इतिलेखदर्शनात् षड्दर्शनटीकाकृद्वाचस्पतेर्गङ्गेशापेक्षया प्राचीनत्वमायाति तत्त्वचिन्तामणेरपि अभिनववाचस्पतिकृता टीका वर्तते तत्पुस्तकं वाराणसीस्थराजकीयसंस्कृतपाठशालीयपुस्तकालयाध्यक्षपण्डितविन्ध्येश्वरीप्रसादद्विवेदिसमीपे वर्तत इत्यभिनववाचस्पत्यपेक्षया षड्दर्शनटीकाकृद्वाचस्पतेरतिप्राचीनत्वमायाति । अभिनववाचस्पतिमिश्रकृतन्यायतत्त्वालोकनामिकायां न्यायसूत्रटीकायां बाधनालक्षणं दुःखमितिसूत्रव्याख्यानावसरे दुःखविषयबुद्धिविषयप्रमेयत्वमेव दुःखलक्षणमिति वाचस्पतिमिश्रा इति लेखो दृश्यते ततश्च ज्ञायते षड्दर्शनटीकाकृद्वाचस्पतिरेतदपेक्षयातिप्राचीन इति । तत्रैव न्यायतत्त्वालोके उदाहरणसाधर्म्यात् साध्यसाधनं हेतुरितिसूत्रव्याख्यानावसरे चिन्तामणिकृतस्त्वित्यादिना गङ्गेशोपाध्यायलेखधारणाच्च । न्यायसूचीनिबन्धात्मकसूत्रसूचीग्रन्थस्य षड्दर्शनटीकाकृद्वाचस्पतिप्रणीतत्वम्—

नमामि धर्मविज्ञानवैराग्यैश्वर्यशालिने ।
निधये वाग्विशुद्धीनामक्षपादाय तापिने ॥

इति तात्पर्यटीकान्यायसूचीनिबन्धयोरुभयत्रैकाकारमङ्गलाचरणं दृष्ट्वा निश्चीयते । न्यायसूचीनिबन्धे चान्ते—

न्यायसूचीनिबन्धोऽसावकारि सुधियां मुदे ।
श्रीवाचस्पतिमिश्रेण वस्वङ्कवसुवत्सरे ॥

इतिलेखदर्शनात् पक्षधरसमानकालिकवाचस्पत्यपेक्षया तस्यातिप्राचीनत्वं ज्ञायते । अभिनववाचस्पतिमिश्रश्च भैरवनारायणराजाश्रितः पण्डित आसीदिति—

भादृग्भादृग्भादृग्भा भैरवभूपतिदेवसभा ।

इतिवाचस्पतिप्रणीतभैरवनारायणनरपतिसभावर्णनगाथादर्शनेन

श्रीभैरवेन्द्रधरणीपतिधर्मपत्नी ... ाच...
राजाधिराजपुरुषोत्तमदेवमाता ... ादय... ाया मूलपुस्तक-
वाचस्पतिं निखिलतन्त्रविदं ... ति-
द्वैते विनिर्णयविधिं विधिवत्... रसूरिणा ।

इतिभैरवपत्न्याज्ञानुसारिवाचस्पति... ममतं महत् ॥

योपक्रमणिकाश्लोकदर्शनेन ... लनामकयन्त्रालयमुद्रितविजय-

श्रीवाचस्पतिमिश्रेण मिथिले... ख्यपुस्तके न्यायसूचोद्धारस्यस्य
लिख्यते मुनिमुर्द्धन्यश्रीगौ...

इति वाराणसीस्थमेडिकल्ह... या स्वीकारे ऽपि तर्कभाषाटीका-नगरसंस्कृतसीरीज्सम्बन्धिन्यायभा... अग्निभागस्थायित्वे तर्कभाषाकर्तुश्च पद्यस्य दर्शनेन चावगम्यते ।

एतावत्पर्यन्तस्य प्रामाणिकत... संशये जाग्रति स्फुटे ।
कर्तृचिन्नभट्टस्य चतुर्दशशताब्दिशेष... ादकस्मादपलप्यते ॥

तत्पूर्वकालस्थायित्वे सिद्धे ... पक्षधरकृतभर्त्सनकिम्बदन्तीसि-

वक्षोजपानकृत् काण बालकदीधितिकारसम्बोधनेन दी... रत्वे
सामान्यलक्षणा वृद्धत्वसूचने ऽपि केशवपक्षधरवाचस... दीधि-

इति दीधितिक...

गाथायां वक्षो...

तिर...

...पधरकृतभत... ...च दीधि-

नामतिदीर्घजीवित्वं विना यथोक्तसमयसामञ्जस्यासम्भवेन अतिकष्ट-
कल्पनया अतिदीर्घजीवित्वं तेषामङ्गीकृत्य सामञ्जस्यसम्भवे ऽपि
तर्कभाषाकर्तुः केशवमिश्रस्य द्वैतपरिशिष्टप्रणेतृत्वे प्रमाणाप्राप्तेर्नास्मा-
कमत्र सर्वथाश्वासः ।

केचित्तु द्वौ पक्षधरमिश्रौ एको गङ्गेशकृततत्त्वचिन्तामणिग्रन्थ-
स्यालोकनामकटीकाकारोऽपरश्च दीधितिकाररघुनाथशिरोमणिसमा-
नकालिकः आलोककारश्च वर्धमानोपाध्यायानन्तरकालिको दीधि-
भृत्सन्ते वर्तते प्राहुः तत्र च दृढतरप्रमाणाभावान्नास्माकमादरः ।
ति
प्रमातार इति मित्रसम्पादिते हस्तलिखितग्रन्थसूचीग्रन्थे
नटीकाकृद्वाचस्पतकं ७नषष्ट्यधिकशततमे लक्षणसंवत्सरे लिखितं
भिः रपि अभिनववाचस्पतिते तन्न समीचीनं प्रमाणं येन पक्षधरद्वयं

१२४ तीयसंस्कृतपाठशालीय

प्रात् । नेत इत्य घेयः काव्यप्रदीपनामालङ्कारग्रन्थकर्तुर्गो-
श्च केशवनाम मायाति
विन्दस्य पिता आसीदिति— यसूचर्टा

नयः केशवस्यात्मजन्मा
सोनादेव्याः प्रथमत षयबुद्धि
कवेः स्नेहपात्रं कनीयान् ।
श्रीगोविन्दो रुचिकर ो दृश्य
चीन इ सम्यगाधाय चित्तं
श्रीमन्नारायणचरणयोः
धनं हे महः काव्यतत्त्वं व्यनक्ति ॥
नत्वा सारस्वतमपि

इतिकाव्यप्रदीपप्रथमश्लो केशोपाध्यायकदर्शनाज् ज्ञायते । स च मिथि-
लाप्रदेशान्तर्गतभटसीमरिग्रामनिव षड्दशासी ठक्कुरोपाधिकोऽद्याप्यस्मिन् ग्रामे
तद्वंशीया वर्तन्त इति मैथिलानां विज्ञानवैरी किम्बदन्त्या ज्ञायत इत्यलम-
तिविस्तरेण ॥ नामक्षपादाय

निबन्धयोरुभयचक्र प्राप्तमस्मा-
अस्यास्तु न्यायप्रदीपाख्यटीकाया एकमव पु
तदप्यतिजीर्णं तस्यान्ते एवं लिखितं वर्तते ।

समाप्त ॥ शुभमस्तु ॥ लिखितं वासुदेवकायस्थकाशीदासपुत्रेण शुभमस्तु । संवत् १६६० समय आषाढवदी द्वितीया पुस्तकसमाप्त ॥ शुभं भवतु ॥ ग्रन्थो न्यायप्रदीपाख्यो निर्मितो विश्वकर्मणा । निर्माय खलु संख्यातो बाणाग्निरामभूमिभिः ॥ १३२५ ॥ श्रीरामचन्द्राय नमः ॥ ७ ॥ इति ।

एवं च १६६० संवत्सरलिखितटीकाग्रन्थादेव तत्पूर्वसमयवर्तित्वं टीकाकर्तुरवगम्यते । अस्यां टीकायां प्रायश उदयनाचार्यकुमारिलभट्टवरदराजादीनां प्राचीनतमानामेव कारिकादय ... स्तक ... उद्धृताः ... त्त्वचिन्तामणिटीकाभावप्रकाशकर्तुं रुचिदत्तस्यापि ... षां नामोल्लेखपूर्वकं मतमुद्धृतम् । यथास्मिन् पुस्तके १५५ पृष्ठायां १६ ... वेदं पङ्क्तौ । रुचिदत्तस्तु यत्कर्मजदुःखप्रागभावोऽस्ति तस्य भोगेनैव नाशः तत्प्रागभावस्य प्रतियोगिजनकत्वनियमात् अन्यथा प्रतियोगिरूपनाशकाभावे तस्यात्यन्ताभावत्वापत्तेरित्यादि ।

रुचिदत्तस्तु पक्षधरमिश्रशिष्य इति चिन्तामणिभावप्रकाशटीकायामादौ—

अधीत्य रुचिदत्तेन जयदेवाज्जगद्गुरोः ।
चिन्तामणौ ग्रन्थमणौ प्रकाशोऽयं प्रकाश्यते ॥

इतिश्लोकदर्शनेनावगम्यते जयदेवस्यैव पक्षधरनामान्तरत्वे सर्वसम्मतत्वात् । पक्षधरस्य च दीधितिकारसमकालिकत्वं दीधितिकारगुरुत्वप्रवादेन दीधितिकारं प्रति—

वक्षोजपानकृत् काण संशये जाग्रति स्फुटे ।
सामान्यलक्षणा कस्मादकस्मादपलप्यते ॥

इति पक्षधरकृतभर्त्सनगाथया चावगम्यते । एवं च दीधितिकारस्यापि श्रीगौराङ्गापरनामधेयश्रीकृष्णचैतन्यदेवसमकालिकत्वं

द्वयोर्वासुदेवसार्वभौमशिष्यत्वप्रवादेन चैतन्यजीवनचरितादिदर्शनेन चावगम्यते । श्रीकृष्णचैतन्यप्रभुश्च १४८५खीष्टीयाब्दे जगन्नाथमिश्राज्जात इतीतिहासदर्शनेन

शाके चतुर्दशशते रविवाजियुक्ते गौरो हरिर्धरणिमण्डल आविरासीत् ।

इतिचैतन्यचन्द्रोदयलेखदर्शनाच्च निश्चीयते । एवं सति तत्कालवर्ती रुचिदत्त आसीदिति १६६०संवत्संवत्सर(१६०३)-खीष्टाब्दपूर्वं १४८५ खीष्टाब्दानन्तरं मध्ये न्यायप्रदीपाख्यटीकाकारो [illegible] र्ता आसीदित्यसंशयमवगम्यते । न्यायप्रदीपाख्यटीकाकारश्च विश्वकर्मा टीकाकृत्प्रक्रियाप्रदीपनामकग्रन्थकर्तेति एतट्टीकापुस्तके प्रत्यभा- विश्वकर्मा प्र[illegible]नव[illegible]२ पृष्ठायां क्त्वाप्रत्ययार्थस्तु प्रक्रियाप्रदीपे ऽस्मच्च्छरद्वयं वव्याख्यानावसरे १५ [illegible] पाठशाला[illegible] [illegible]भि- निरूपितस्तत्रैवानुसन्धेय इत्य[illegible] इतिलेखदर्शनादवगम्यते ॥

श्रीमान् केशवमिश्रो न्यायसूत्रानुसारिबालकोपयोगिग्रन्थानतिविरलानुपलभ्य न्यायसूत्रानुसारिषोडशपदार्थतत्त्वनिरूपणाय सरलतमं तर्कभाषानामकं प्रथमपाठार्थिबालकानां परमोपकारकं ग्रन्थं रचितवान् । अत एव ग्रन्थस्यादौ—

बालोऽपि यो न्यायनये प्रवेशमल्पेन वाञ्छत्यलसः श्रुतेन ।
सङ्क्षिप्तयुक्त्यन्वितर्कभाषा प्रकाश्यते तस्य कृते मयैषा ॥ इति

मध्ये च प्रमाणनिरूपणानन्तरम्—

चत्वार्येव प्रमाणानि युक्तिलेशोक्तिपूर्वकम् ।
केशवो बालबोधाय यथाशास्त्रमवर्णयत् ॥ इति

अन्ते च तावतैव बालव्युत्पत्तिसिद्धेरिति च स्वीयग्रन्थस्य प्रयोजनं स्वयमेव दर्शितम् । ग्रन्थस्यास्यापाततः श्रवणमात्रेण सहजार्थबोधत्वे ऽप्यतिविस्तृतबहुटीकादर्शनाद् दुरवबोधभावार्थतावगम्यते । तत्र च—

मित्यवधार्य एतदुपयुक्तसरलानतिविस्तृतटीकासहितमेतन्मुद्रयित्वा प्रकाशयितुकामः टीकापुस्तकमूलपुस्तकान्तरसहायार्थी टीकापुस्तकादिकमलभमान इच्छामात्रसहाय आसम् । इह च वाराणसीस्थराजकीयप्रधानसंस्कृतपाठशालीयपुस्तकालये ऽनतिविस्तृतमेकमेव न्यायप्रदीपाख्यटीकापुस्तकं मूलपुस्तकत्रयं चावलोक्यात्रत्यराजकीयप्रधानसंस्कृतपाठशालीयप्रधानाध्यक्ष श्री१००मद् आर्थर्वेनिस्साहबमहाशयानामाज्ञया मुद्रयितुमारब्धेन मया प्रथमतस्तर्कभाषाया मूलपुस्तकत्रयमेव लब्धम् । टीकापुस्तकान्तरस्य हस्तलिखितपुस्तकानां मुद्रितसूचीपत्रेष्वनुपलभ्यात्यन्तदुर्लभतां मन्यमानेनात्रत्यपुस्तकालयस्थमेकमेव पुस्तकं क्वचिल्लुप्ताक्षरमतिजीर्णमासाद्य तर्कभाषा मुद्रयितुमारब्धा महतायासेन । मुद्रितेषु तु कतिषुचिदंशेषु स्वदेशं गत्वा पितृचरणसङ्गृहीतपुस्तकालयस्थं वङ्गाक्षरलिखितं तर्कभाषामूलपुस्तकमपि गृहीतम् । य[illegible]न्मुद्रितपुस्तके चतुर्थपुस्तकत्वेनावकल्पितम् । अस्मिंश्च पुस्तके ब[illegible]धिकाः पाठाः पाठान्तराणि च बहूनि वर्तन्ते तानितानि पुस्तकप्राप्[illegible]रं तत्तत्स्थले टिप्पण्याकारेण प्रायः सन्निवेशितानि ।

अ[illegible]न् कार्ये ऽस्मद्गुरुचरणा वाराणसीस्थराजकीयप्रधानसंस्कृतपाठश[illegible]ीयप्रधानाध्यापकनैयायिकशिरोमणिमहामहोपाध्यायश्रीयुक्तकैलासचन्द्रशिरोमणिभट्टाचार्यचरणाः परमसहाया अस्माकम् अत्रत्यराजकीयप्रधानसंस्कृतपाठशालीयपुस्तकालयाध्यक्षैः श्रीयुक्तविन्ध्येश्वरीप्रसादद्विवेदिभिरपि स्थलविशेषदर्शनेनोपकृतोऽस्मीति ।

अस्मि[illegible] मुद्रितपुस्तके ऽस्मत्प्रमादवशात् सीसकाक्षरदौर्बल्यादिदोषाच्च यद्यद शुद्ध्यादिकं तत् सर्वं शोधयित्वा क्षमासारा हि साधव इति क्षन्तुमर्हन्ति गुणमात्रदर्शिनः सन्त इति । प्रसीदतु च भगवान् सर्वान्तर्वर्ती सर्वज्ञो व्यापारेणानेन श्रीगोपालदेव इति प्रार्थयते ।

श्रीसुरेन्द्रलालशर्मा

टीकानामानि ।		टीकाकर्तृनामानि ।
न्यायप्रदीपः	...	विश्वकर्मा ।
तर्कभाषाप्रकाशिका	...	गौरीकान्तसार्वभौमभट्टाचार्यः ।
तर्कभाषाप्रकाशः	...	केशवमिश्रशिष्यगोवर्द्धनमिश्रः ।
बालबोधिनी	...	
तर्कदीपिका	...	केशवभट्टः ।
तर्कभाषाप्रकाशिका	...	कौण्डिनदीक्षितः ।
तत्त्वप्रबोधिनी(१)	...	गणेशदीक्षितः ।
तर्कभाषाप्रकाशिका	...	चिन्नभट्टः चैतन्यभट्टो वा ।
युक्तिमुक्तावली	...	नागेशभट्टः ।
तर्कभाषाप्रकाशिका	...	बलभद्रः ।
परिभाषादर्पणम्	...	भास्करभट्टः ।
तर्कभाषासारमञ्जरी	...	माधवदेवः ।
न्यायप्रकाशिका	...	
न्यायसङ्ग्रहः	...	रामलिङ्गः ।
तर्कभाषाभावः	...	रोमविल्ववेङ्कटबुद्धः ।
उज्ज्वला	...	गोपीनाथः ।
	...	मुरारिभट्टः ।
	...	भिन्नीभट्टः ।
	...	गुण्डुभट्टः
	...	नारायणभट्टः

तदिदं तर्कभाषापुस्तकमेकमस्मत्पितृचरणसङ्गृहीतास्मद्दे-
शस्थपुस्तकालये दृष्ट्वा गौतमीयसूत्रपाठार्थिनां परमोपकारकमिद-

(१) गणेशदीक्षितकृततत्त्वप्रबोधिनीटीकायां न्यायविलासाख्या विश्वनाथभट्टकृता एका टीका वर्तते । तत्राद्यश्लोकार्धं यथा व्याख्यां तत्त्वप्रबोधिन्या विश्वनाथः स्वमातरमिति ? बर्णेल्महाशयकृततञ्जोरपुस्तकालयसूचीपुस्तके दृश्यते ।

॥ श्रीः ॥

तर्कभाषायां चतुर्थपुस्तकपाठानां मूले ऽसन्निविष्टानामधिकानां तत्तत्स्थले सन्निवेश्यानां सूचीपत्रम् ।

---

२८ पृष्ठायां ४ पङ्क्तौ । 'ज्ञानं जन्यते' इत्यस्यानन्तरम् ।

उक्तं च ।

स्वरूपमात्रसम्बोधं निर्विकल्पं प्रचक्षते ।
विशिष्टधर्मिसम्भिन्नं सविकल्पं ततो द्विधा ॥
बालमूकादिसम्बोधसदृशं निर्विकल्पकम् ।
साक्षाद्भूतं भवेत् तत्तु यत् किञ्चिद् बुध्यते बहिः ॥
अन्तर्बाह्यविशिष्टं यत् सविकल्पमिति स्मृतम् ।

इति पाठोऽधिकः ।

३३ पृष्ठायां १ पङ्क्तौ । 'इन्द्रियेण गृह्यते' इत्यस्यानन्तरम् । अत्र कश्चिदाह न भूतलादेरन्योऽभावो नाम कश्चिदस्ति तथाहि भूतलमेव द्विविधं किञ्चिद् घटवत् किञ्चिच्च भूतलमेव केवलम् । तत्र केवलभूतल एव घटाभावव्यवहारः लोकस्य नेतरस्मिन् । अत्रोच्यते । न तावद् यथाकथञ्चिद् भूतलं घटाभावव्यवहारकारणं घटवत्यपि भूतले घटाभावव्यवहारप्रसङ्गात् । नापि केवलभूतलमात्रं घटाभावव्यवहारकारणम् । विकल्पासहत्वात् । तथाहि कैवल्यं भूतलस्वरूपाद् भिन्नं न वा भिन्नमपि घटविरोधि न वा प्रथमे स एवाभावोऽस्माभिरभिधीयते कैवल्यमिति भवद्भिः अत्र च संज्ञामात्रे विप्रतिपत्तिः न वस्तुनि । द्वितीये तु स एव घटवति प्रसङ्गो घटे सत्यपि कैवल्यसम्भवात् । भूतलादभिन्नं चेत् कैवल्यं पुनरपि घटवति प्रसङ्गो घटे सत्यपि भूतलस्वरूपानपगमात् । अथोच्यते न यथाकथञ्चिद्

भूतलं नापि केवलं किं तु दृश्यप्रतियोगिकभूतलमभावव्यवहारहेतुः न घटवति प्रसङ्गात् विद्यमानस्य प्रतियोगिनो घटस्य सुतरां दृश्यमानत्वात्। अथ विद्यमानो घटो न प्रतियोगी किं त्वयोग्य एवासौ हन्त किमिदं प्रतियोगित्वमनुभूयमानत्वमुत स्मर्यमाणत्वम्। आद्येऽभाव एव द्वितीये एकत्रानुभूयमानस्यान्यत्राभावव्यवहारो न स्यात् अयमिह नास्तीति एतद्भूतल एव प्रथमदण्डोपलब्धस्य घटस्य द्वितीयदण्डोपलब्धौ स एवायं तदवस्थ इति स्मर्यमाणेऽपि घटाभावव्यवहारो न स्याद् यदि स्यादतिव्याप्तिः। ननु भवतु भूतलादेरन्योऽभावः प्रत्यक्षप्रमाणपरिज्ञेयत्वं तु तस्य कुतः। इन्द्रियाणां सम्बद्धार्थग्राहकत्वात्। [तथाहि इन्द्रियाणि प्राप्यप्रकाशकारीणि ज्ञानकारणत्वादालोकवत्। यद्वा इन्द्रियाणि स्वविषयं प्राप्य कार्यं कुर्वन्ति करणत्वाद्वासीवत्। यद्वा चक्षुःश्रोत्रे प्राप्यकारिणी बहिरिन्द्रियत्वात् त्वगादिवत् त्वगादीनां तु प्राप्यकारित्वमुभयवादिसिद्धमेव। तेनाभावोऽपि यदीन्द्रियेण सम्बद्धः संयोगसमवाययोरेव मुख्यत्वात्? विशेषणविशेष्यभावश्च न सम्बन्धः सम्बन्धो हि सम्बन्धिभ्यां भिन्नो भवत्युभयाश्रित एकश्च। यथा भेरीदण्डसंयोगः स हि भेरीदण्डाभ्यां भिन्न उभयाश्रितश्चैकश्च। न च विशेषणविशेष्यभावस्तथा। तथाहि दण्डपुरुषयोर्विशेषणविशेष्यभावो न ताभ्यां भिद्यते न हि दण्डस्य विशेषणत्वं पदार्थान्तरमपि तु स्वरूपमेवाभावस्य विशेषणत्वात् न चाभावे कस्यचित् पदार्थस्य द्रव्याद्येकतरस्य सम्भवः। तस्माद् भावस्याभावस्य च स्वोपरक्तबुद्धिजनकत्वं यत् स्वरूपं तदेव विशेषणत्वं न तु तदर्थान्तरम्। एवं व्यापकत्वादयोऽप्यूह्याः। स्वप्रतिबद्धबुद्धिजनकत्वं स्वरूपमेव हि व्यापकत्वमग्न्यादीनां कारणत्वमपि कार्यानुकृतान्वयव्यतिरेकिस्वरूपमेव तन्त्वादीनां न त्वर्थान्तरं अभावस्यापि व्यापकत्वात् कारणत्वाच्च न, ह्यभावे सामान्यादिसम्भवः तदेवं विशेषणविशेष्यभावो न विशेषणस्वरूपाद् विशेष्यस्वरूपाद् भिन्नो नाप्युभयाश्रितो विशेषणे विशेषणभावमात्रस्य सद्भा-

यदाह ।

अनुमेयेन सम्बद्धं प्रसिद्धं च तदन्विते ।
तदभावे च नास्त्येव तल्लिङ्गमनुमापकम् ॥
विपरीतमतो यत् स्यादेकेन द्वितयेन वा ।
विरुद्धासिद्धसन्दिग्धमलिङ्गं काश्यपोऽब्रवीत् ॥

इति पाठोऽधिकः ।

४२ पृष्ठायां २ पङ्क्तौ । 'स्वाभाविकश्च सम्बन्धो व्याप्तिः' इत्यस्यानन्तरम् । इत्यविनाभाव इति प्रतिबन्धश्चोच्यते । इत्यधिकः पाठः ।

४३ पृष्ठायां ८ पङ्क्तौ । 'किं तु सन्दिग्धे' इत्या[illegible]दर्शनात् नैवम् मान।

अन्यच्च । [illegible] । तथाहि भूतलादिना अधिकरणेन न निर्णीते [illegible]च्यो मुख्याधिकरणे ऽभावो ग्रहीतव्यो निर[illegible]धिकरणस्य तस्यानिरूपणात् । सद्मामभावो निरूप्यते नैकेन सतेति न्यायात् । न च भूतलादिना अधिकरणेन सहाभावस्य मुख्यः सम्बन्धोऽस्ति [illegible] भूतलादौ मानान्तरेणापि तस्य ग्रहणम् । येन यस्य मुख्यः सम्बन्धः तस्यैव तत्र मानान्तरेणापि ग्रहणम् । पर्वतवह्न्यादौ नदीतीरपञ्चफलादौ नियमदर्शनात् । अथेन्द्रियेण ग्रहणे भावस्यायं नियम इति नियमस्य भावावच्छिन्नत्वादसम्बन्धाभावग्रहणे त्वतिप्रसङ्गस्य विशे[illegible]णविशेष्यभावेनापि निराकर्तुं शक्यत्वाद् भूतलादिना मुख्यसम्बन्धर[illegible]हितस्यापि भूतलाद[illegible]वधिकरणे ग्रहणं मानान्तरेणापि क्रियते हन्त इन्द्रियेणापि किं न गृह्यतामिति इन्द्रियेण सह मुख्यसम्बन्धवदेव इन्द्रियग्राह्यमिति नियमस्य भावावच्छिन्नत्वाद् भावो हि गृह्यमाणो मुख्यसम्बन्धेन गृह्यते नान्यथेति नियमार्थः तेनाभावे ऽसत्यपि मुख्यसम्बन्धे इन्द्रियेण गृह्यमाणे न कश्चिद्दोषः । अथ प्रसङ्गदोषस्तु विशेषणविशेष्यभावेन [illegible]निराकृत इति परेणाप्युक्तमेव । तस्मा-

[illegible] [ ] एतच्चिह्नमध्यस्थः पाठः क्वचिदक्रमो मुद्रिततर्कभाषापुस्तके ऽस्मिन्ननुपलब्धि[illegible] म[illegible]णान्तरत्वखण्डनावसरे ८४ पृष्ठायां १ पङ्क्तिमारभ्य पुनर्दृश्यते ।

भूतलं नापि केवलं किं तु दृश्यप्रतियोगिकभूतलमभावव्यवहारहेतुः न घटवति प्रसङ्गात् विद्यमानस्य प्रतियोगिनो घटस्य सुतरां दृश्यमानत्वात्। अथ विद्यमानो घटो न प्रतियोगी किं त्वयोग्य एवासौ हन्त किमिदं प्रतियोगित्वमनुभूयमानत्वमुत स्मर्यमाणत्वम्। आद्ये ऽभाव एव द्वितीये एकत्रानुभूयमानस्यान्यत्राभावव्यवहारो न स्यात् अयमिह नास्तीति एतद्भूतल एव प्रथमदण्डोपलब्धस्य घटस्य द्वितीयदण्डोपलब्धौ स एवायं तदवस्थ इति स्मर्यमाणे ऽपि घटाभावव्यवहारो न स्याद् यदि स्याददतिव्याप्तिः। ननु भवतु भूतलादे- रत्ये[illegible] [illegible]न्तप्रमाणपरिज्ञेयत्वं तु तस्य कुतः। इन्द्रियाणां दिन्द्रियस्यैवाभावग्रहणश[illegible] इ[illegible]याणि प्राप्यप्रकाशकारीणि ज्ञान- ति। भवति च प्रयोगः। विवादाध्य[illegible]विषयं प्राप्य कार्यं कुर्वन्ति थासिद्धेन्द्रियान्वयव्यतिरेकानुविधायित्वाद् घट[illegible]न्द्रियत्वात यभूतलादिग्रहणोपक्षीणत्वादिन्द्रियस्यान्यथासिद्धत्वमिति वाच्यम्। असति बलवति बाधके ऽन्यत्रोपक्षीणत्वस्य वक्तुमशक्यत्वात्। यत्तु इन्द्रियाभावयोरसम्बन्धो बाधक इत्युक्तं तद्दूषितमेव। तदेवं सम्बन्धविशेषणविशेष्यभावलक्षणेनेन्द्रियार्थसन्निकर्षेणानुपलम्भसहायेनाभाव इन्द्रियेण गृह्यते॥ इत्यधिकः पाठः।

३७ पृष्ठायां २ पङ्क्तौ। 'ऽतो लिङ्गपरामर्शोऽनुमानम्' इत्यस्यानन्तरम्। तदुक्तम्।

लिङ्गत्वेन परामर्शो योऽनुमानं तदुच्यते।
व्याप्तिः पक्षस्य धर्मत्वं मिलितं लिङ्गलक्षणम्॥

इति पाठोऽधिकः।

३७ पृष्ठायां ५ पङ्क्तौ। 'व्याप्तिबलेनार्थगमकं लिङ्गम्' इत्यत्र। व्याप्तिबलेन यद् यस्य गमकं तत् तस्य लिङ्गम्। इति पाठो दृश्यते।

३८ पृष्ठायां १ पङ्क्तौ। 'धूमोऽग्नेर्लिङ्गम्' इत्यस्यानन्तरम्।

---

(१) अयं श्लोकोऽग्रे ऽपि अस्मिन् पुस्तके अनुपलब्धिप्रमाणान्तरत्वखण्डनावसरे ८ पृष्ठायां वर्तते। तत्र च शेषचरणे तादृगर्थविचारणा इति पाठः।

यदाह ।

अनुमेयेन सम्बद्धं प्रसिद्धं च तदन्विते ।
तदभावे च नास्त्येव तल्लिङ्गमनुमापकम् ॥
विपरीतमतो यत् स्यादेकेन द्वितयेन वा ।
विरुद्धासिद्धसन्दिग्धमलिङ्गं काश्यपोऽब्रवीत् ॥

इति पाठोऽधिकः ।

४२ पृष्ठायां २ पङ्क्तौ । 'स्वाभाविकश्च सम्बन्धो व्याप्तिः' इत्यस्यानन्तरम् । इत्यविनाभाव इति प्रतिबन्धश्चोच्यते । इत्यधिकः पाठः ।

४३ पृष्ठायां ८ पङ्क्तौ । 'किं तु सन्दिग्धे' इत्यस्यानन्तरम् ।

अन्यच्च ।

न निर्णीते न चाज्ञाते न्यायः सन्दिग्धके ऽपि च ।
न हि दृष्टे च कारिणि चीत्कारेणानुमीयते ॥

इत्यधिकः पाठः ।

४६ पृष्ठायां २ पङ्क्तौ । 'परार्थमनुमानम्' इत्यस्यानन्तरम् ।

यथाहुः ।

पञ्चावयववाक्येन लिङ्गस्य प्रतिपादकम् ।
न्याय इत्युच्यते शास्त्रे परस्तस्मात् प्रबोध्यते ॥

इत्यधिकः पाठः ।

वहारहेतुः
द्रश्य-
पे·

ज्यौतिषपुराणादिषु प्रपञ्चिता द्रष्टव्याः क्वचित्क्वचिद्विरोधिनोऽपि तात्पर्यभेदादिनिर्वाह्याः, एषा च प्रतिनियतदेशकालस्वरूपफलभोगतारतम्यनिम्नोन्नतब्रह्मादिस्तम्बपर्यन्ता विषमसृष्टिः स्वरूपानादेर्जीववर्गस्य प्रवाहानादिकर्मतारतम्यनिबन्धनेति नाकृताभ्यागमकृतविप्रणाशवैषम्यनैर्घृण्यादिप्रसङ्गः, जीवानामाप्रलयावस्थायित्वादिपक्षे त्वेते दोषाः स्फुटाः, तदेवं पुण्यपापतारतम्यात् केचित् द्युप्रभृतिलोकेषूत्कृष्टशरीरेन्द्रियज्ञानशक्त्यादिमन्तः, केचिच्च नरकादिषु घोरदुःखकारणान्निकृष्टशरीरादिमन्तः, केचिच्च मिश्रकर्माणः पृथिव्यादिषु मिश्रमध्यमसुखादिमन्तः।

इह प्रसङ्गात्सामान्यतः शरीरलक्षणमुच्यते यस्य चेतनस्य यद् द्रव्यं सर्वात्मना स्वार्थे नियन्तुं धारयितुं च शक्यं तच्छेषतैकस्वरूपं च तत्तस्य शरीरमिति भाष्यम्। गोघटादिवत् संस्थानादिभिरनियतवृत्तेः शरीरशब्दस्य क्वचिद्विशेषे नियामकत्वाभावात् सर्वप्रयोगानुगुणमिदमेव श्रुति-[illegible]इदं व्यापकं लक्षणमिति भाष्यकाराभिप्रायः एतच्चैकलक्षणमिति केचिद्व्याचख्युः। लक्षणत्रयमित्यपरे। एकत्वपक्षे व्यवच्छेद्यपरिक्लेशः। अन्ये त्वेकलक्षणत्वेऽपि जन्मादित्रयस्य ब्रह्मलक्षणत्व इवात्रापि न व्यवच्छेद्यं सिद्धमस्ति [illegible]ङ्कितं तु सममित्याहुः। यौक्तिकग्रन्थेषु तथा निर्वाह[illegible]ानुचितत्वात् त्रित्वपक्ष एव मुख्यः, भट्टपराशरपादैर[illegible]ध्यात्मखण्डद्वयविवरणे स एव पक्षः सूचितः चेतनाचेतनयोरविशिष्टत्वं प्रति शरीरत्वं स्वेच्छया नियच्छता भगवता व्याप्यत्वाविशेषात् इदमेव भौतिकस्य शरीरस्यापि शरीरत्वमित्येकस्य लक्षणतयोपपादनात्, तत्रैवं लक्षणत्रयनिष्कर्षः-यस्य चेतनस्य यदवस्थं द्रव्यं यावत्सत्तमसंबन्धानर्हं स्वशक्ये नियन्तव्यस्वभाव तदवस्थं तस्य

शरीरमित्येकं लक्षणम्, चेतनस्य-चैतन्यविशिष्टस्येत्यर्थः, तेन चैतन्यस्य तत्तदाश्रयं प्रति शरीरत्वव्यवच्छेदः यदवस्थमित्यव्याप्तिपरिहारः, तस्यैव द्रव्यस्यावस्थान्तरे वियोगात्, द्रव्यमिति क्रियादिव्यवच्छेदः, यावत्सत्तमित्यादिना जीवं प्रति परकायप्राणेन्द्रियकुठारादिव्यवच्छेदः, प्राणादीनां हि पृथगेव सृष्टानां शरीरनिर्माणात्पूर्वभावात् तथा मोक्षात्पश्चादपि तेषामाप्रलयावस्थानात् स्वशक्य इत्यसम्भवपरिहारः, न हि विहङ्गमसाध्यं विहायोगमनं मानुषमृगसरीसृपादिशरीरस्य शक्यं, न च तावता तेषामशरीरत्वमिति भावः स्वशक्यं चान्वयव्यतिरेकादिसमधिगतं यथासम्भवं भाव्यम् अतः शिलाकाष्ठघटपटादिषु जीवशरीरेष्वपि तदधीनत्वाभावेनाव्याप्तिचोद्यं परिहृतं भवति स्थावरादिवदतिसूक्ष्मस्य नियमनविशेषस्यास्मदादिभिर्दुर्ग्रहत्वात् यद्यपि क्वचित्स्थावरेषून्मेषनिमेषादिकं दृश्यते तथाऽपि न तत्सार्वत्रिकम् । स्मरन्ति च"शिलाकाष्ठादिष्वपि स्वल्पतरं चैतन्यम् अप्राणिमत्सु स्वल्पा सा स्थावरेषु ततोऽधिकेत्यादि । वक्ष्यमाणचतुर्थलक्षणपक्षे तु नास्य, चोद्यस्यावकाशोऽपि, न चात्र शक्ये सर्वत्र नियमनं विवक्षितम् अनिच्छादिवशेन तस्यापि क्वचिदसम्भवात् सहकार्यनागमनमात्रेण कार्यानुत्पत्तिसिद्धेः,न ह्यङ्कुरमनुत्पाद्य विनष्टस्य बीजवर्गस्याङ्कुरोत्पादनसामर्थ्यं नास्तीति शक्यते वक्तुं, नियन्तव्येत्यनियन्तव्यव्याध्यादिव्यवच्छेदः, व्याध्यादीनां ज्वराद्यात्मकानां तदीयत्वात् स्वशक्ये प्रवर्तमानत्वाच, एवं पुत्रशरीरादीनामपि स्वभावशब्देनाव्याप्तिपरिहारः व्याध्यादिदशायां स्वशक्येऽप्यशक्यनियमनानां मानुषशरीरादीना-

मपि शरीरत्वात्तदानीमेतस्याशक्यनियमनत्वस्यौपाधिकत्वादिति ध्येयम् । यस्य चेतनस्य यदवस्थं द्रव्यं यावत्सत्तं धार्यं तदवस्थं तस्य शरीरमिति द्वितीयं लक्षणम् पुत्रशरीरादिकं न यावत्सत्तं धार्यमिति व्यवच्छिद्यते शेषं प्राग्वत्, तथा यस्य चेतनस्य यदवस्थं द्रव्यं यावत्सत्तमशेषतानर्हं तदवस्थं तस्य शरीरमिति तृतीयं लक्षणम् । अशेषतानर्हमिति पूर्ववदेव पुत्रादिव्यवच्छेदः दानादिना तेषां स्वशेषत्वनिवर्तनस्य शक्यत्वात्, शरीरस्य तु दा[illegible]पादनेन परशेषत्वेऽपि स्वस्वशेषत्वस्य सांसिद्धिकस्य निवर्तयितुमशक्यत्वादिति । अत्रेदं चतुर्थमपि लक्षणत्रयफलितं श्रीभाष्यकाराभिप्रेतं लक्षणमुच्यते-यस्य चेतनस्य यदवस्थमपृथक्सिद्धविशेषणं द्रव्यं तत्तस्य शरीरमिति, यावत्सत्तमसं[illegible]र्हत्वमपृथक्सिद्धत्वम् आधेयत्वविधेयत्वशेषत्वान्यपृथक्सिद्धेरवान्तरभेदा इह विवक्षिताः, व्यवच्छेद्यं तु स्पष्टमेव एतेनैतदपि परिहृतं यदुत शरीरशब्दस्यान्यतमं वा त्रीण्यपि वा त्रिकं वा प्रवृत्तिनिमित्तं, न प्रथमः आधेयत्वविधेयत्वशेषत्वानि शरीरशब्दप्रवृत्तिनिमित्तानीति भाष्य*विरोधात्, न द्वितीयः गौरवात् अनेकार्थत्वप्रसङ्गाच, न तृतीयः गौरवात्, भिन्नलक्षणपक्षे चास्वारस्यादिति त्रिभिरुपलक्षितस्यैव चेतनापृथक्सिद्धत्वस्य प्रवृत्तिनिमित्तत्वान्न कश्चिद्दोषः, ईश्वरतज्ज्ञानव्यतिरिक्तं द्रव्यं शरीरमिति वा तटस्थं लक्षणम्, भाष्ये शरीरत्वस्य पितृत्वादिवत्सप्रतियोगिकत्वसूचनाय देवत्वमनुष्यत्वद्विपात्त्वाद्यवान्तरभेदानामप्रयोजकत्वसूचनाय च यस्य चेतनस्य यद्द्रव्यमित्यादिनिर्देशः प्रतियोगिनिर्देशरहिते लक्षणे यथाप्रमाणं प्रतियोगिविशेषव्यवस्था यथा वैशे-

* विवक्षितगुणोपपत्तेश्चेति सूत्रस्थभाष्यविरोधादित्यर्थः ।

षिकादीनां लक्षणेषु सप्रतिसंबन्धिकगुणसामान्यविशेष-समवायाभावादीनां प्रतिसंबन्धिनिर्देशरहितेषु लक्षणेषु कर्मान्यत्वे सति जातिमात्राश्रयो गुणः, नित्यमेकमनेकसमवायि सामान्यम्, अजातिरेकवृत्तिर्विशेषः, नित्यसंबन्धः समवायः इत्यादिषु ।

अन्यैस्तु चेष्टेन्द्रियार्थाश्रयः शरीरमिति सूत्रितम् । तत्रान्त्यावयवित्वे सति चेष्टाश्रयत्वमेकं लक्षणम् तद्विशेषितेन्द्रियाश्रयत्व-भोगायतनत्वे द्वे, तत्र चेष्टाशब्देन [illegible] क्रियामात्रविवक्षायामतिव्याप्तिर्व्यक्ता प्रयत्नवदात्मसंयोगासमवायिकारणकक्रियाविवक्षायां प्रयत्नवदीश्वरसंयोगासमवायिकारणकक्रियाश्रयेषु तच्छरीरतया तैरनभ्युपगतेषु भूभूधरादिष्वतिव्याप्तिः प्रयत्नवज्जीवेति विशेषणे प्राणादिष्वतिव्याप्तिः बुद्धिपूर्वकप्रयत्नेति विशेषणेऽपि बुद्धिपूर्वकाकुञ्चनप्रसारणादिदशायां तेष्वेवातिव्याप्तिः, वाय्वादेरन्त्यावयवित्वं नास्तीति चेत् कस्य तर्ह्यस्ति घटादेरिति चेन्न तत्राप्यनेकघटपटादिभिर्भित्तिकन्थादिनिर्माणे तदसिद्धेः, तत्र तदारम्भो नास्तीति चेत् अन्यत्रापि तथैव नास्तीत्येव तु सत्यम् । अस्तु तर्हि घटादयो मध्यावयविन इति चेत् न सर्वत्रापि तथा प्रसङ्गात् अन्त्यावयवित्वमाकाशकोरकायितमिति साधु तद्विशेषितं लक्षणम् । इन्द्रियाश्रयत्वं तत्समवायित्वं तत्संयोगित्वं वा स्यात्, न प्रथमः, अनभ्युपगमात्, इन्द्रियावयवानां तन्मते शरीरत्वप्रसङ्गाच्च । न द्वितीयः घटादिष्वपि तत्सम्भवात्, यावत्सत्त्वमिन्द्रियसंयोगो विवक्षित इति चेत्तदपि न अनिमेषचक्षुषि प्रेक्षमाणे पुरुषे तदातनोत्पन्नविनष्टबुद्बुदप्रभृतिष्वतिव्याप्तेः, नित्यमनःपक्षे चात्मादिषु तैः शरीरतया मृतशरीरस्याभ्युपगमाच्च, इन्द्रियसंयुक्तकृत्स्नप्रदेशं शरीरमिति चेन्न मूर्तयोः शरीरेन्द्रिययोः स्वप्रतिघत्वविरोधेन

कृत्स्नप्रदेशसंयोगाभावस्य युष्माभिरेवाभ्युपगन्तव्यत्वात् निरिन्द्रियशरीरान्तःप्रवेशविशेषस्य प्रामाणिकत्वाच्च । युगपदनेकेन्द्रियावस्थितिदेशः शरीरमिति चेन्न अवस्थितिरिति संयोगमात्रविवक्षायामाकाशादीनामीश्वरस्य चास्मदादीन् प्रति शरीरत्वप्रसङ्गात्, अपृथक्सिद्धिविवक्षायामसिद्धेः, ईश्वरस्यास्मत्पक्षेण शरीरत्वप्रसङ्गाच्च, उपष्टम्भकत्वादिविवक्षायां प्राणेऽतिव्याप्तिः, यावत्सत्तमिन्द्रियासंयोगायोग्यं शरीरमित्यपि दत्तोत्तरम् ईश्वरादिष्वतिव्याप्तेर्दुष्परिहरत्वात्, इन्द्रियव्यतिरिक्तं प्राणव्यापाराधीनप्रवृत्तिनिवृत्त्यादिकं शरीरमिति चेन्न आत्मनि मलादिषु च प्रसङ्गात्, सर्वप्रवृत्तिषु तादधीन्यं विवक्षितमिति चेन्न असम्भवात्, न हि वाय्वाद्याकृष्यमाणशरीरादिप्रवृत्तिः प्राणाधीना । भोगायतनत्वमपि यदि भोगस्थानत्वमात्रं तदा गृहादिष्वप्यतिव्याप्तिः, यदाश्रित्यैवात्मा भोगवान्भवति तद्भोगायतनमिति विवक्षितमिति चेन्न अस्मन्मतेन लक्षणासम्भवात् अशरीरस्यापि मुक्तस्य भोगविशेषाभ्युपगमात्, दुःखात्मकभोगो विवक्षित इति चेत् तथाऽपीन्द्रियेष्वतिव्याप्तिः ईश्वरमुक्तादिभिरिच्छागृहीतशरीरेष्वव्याप्तिश्च स्वभ्रमवशेन भोगाश्रय इत्यपि न तत्तद्वादिभेदैरात्मतया बुध्यमानेष्विन्द्रियमनःप्राणेष्वतिव्याप्तेः, ईश्वरमुक्तादिशरीरेष्वव्याप्तेश्च, शिरःपाणिपादादिमयं शरीरमिति चेत् शिलापुत्रकादिष्वपि तत्सम्भवात्, प्राणादिमत्त्वे सतीति चेन्न मृतशरीराद्यव्याप्तेः, यदा कदाचित्प्राणादिसंबन्धमात्रं विवक्षितमिति चेत् तथाऽपि स्थावरादिशरीरेष्वव्याप्तिः तेषु प्राणादिसत्त्वेऽपि पाणिपादादिसंस्थानाभावात् । एवं लक्षणान्तराण्यपि दूष्याणि तत्र श्रुत्याद्यनुरोधेन पूर्वोक्तमेव लक्षणम् । तदेतच्छरीरं

द्विविधं नित्यमनित्यं चेति तत्र नित्यं त्रिगुणद्रव्यकालजीवशुभाश्रयात्मकमीश्वरशरीरं, नित्यानां च स्वाभाविकगरुडभुजगादिरूपम्। अनित्यं च द्विविधम् अकर्मकृतं कर्मकृतं चेति, प्रथममीश्वरस्य महदादिरूप तथाऽनन्तगरुडादीनां मुक्तानां च इच्छाकृततत्तद्रूपम्। कर्मकृतमपि द्विविधं स्वसङ्कल्पसहकृतकर्मकृतं केवलकर्मकृतं चेति पूर्वं महतां सौरिप्रभृतीनाम् उत्तरं चान्येषां क्षुद्राणाम्। पुनः शरीरं सामान्यतो द्विधा जङ्गममजङ्गमं चेति काष्ठादीनां शिलादीनां चाजङ्गमत्वमेव यथा वृक्षगुल्मलतावीरुत्तृणानां तमोमोहमहामोहतामिस्रान्धतामिस्रसंज्ञानां, शिलादिशरीरिणोऽपि जीवा विद्यन्त इत्यहल्यादिवृत्तान्तश्रवणात्सिद्धं तथा च वेदार्थसंग्रहे प्रोक्तम् "अतो देवो मनुष्यो यक्षो राक्षसः पक्षी वृक्षो लता काष्ठं शिला तृणं घटः पट इत्यादयः सर्वे प्रकृतिप्रत्यययोगेनाभिधायकतया प्रसिद्धाः शब्दा लोके तत्तद्वाच्यतया प्रतीयमानतत्तत्संस्थानवस्तुमुखेन तदभिमानिजीव–तदन्तर्यामिपरमात्मपर्यन्तस्यैव वाचका" इति, इदं च व्यष्टिनामरूपाणां सर्वेषां जीवानुप्रवेशश्रुतिबलावलम्बनेनोक्तम्। उक्तं च श्रीमद्गीताभाष्ये जघन्यगुणवृत्तिस्था अधो गच्छन्तितामसा इति, अथ तामसास्तु जघन्यगुणवृत्तिस्थाः उत्तरोत्तरनिकृष्टतमोवृत्तिषु स्थिताः अधो गच्छन्ति अन्त्यत्वं ततस्तिर्यक्त्वं ततः कृमिकीटादिजन्म ततः स्थावरत्वं ततोऽपि गुल्मलतात्वं ततश्च शिलाकाष्ठलोष्ठादित्वं गच्छन्तीत्यर्थ इति, अत्र स्थावरशब्दो गोवलीवर्दन्यायाद्वृक्षादिस्थावराख्यविशेषविषयो ज्ञेयः। जङ्गमं चतुर्धा देवमनुष्यतिर्यङ्नारकिसंस्थानभेदात्, असुरयक्षराक्षसादयोऽपि देवयोनयः, भूलोकवर्तिब्रह्मक्षत्रियविट्शूद्रादयो मनुष्ययोनयः, तेषां तु श्रुतिस्मृत्युक्तविधिनिषेधवि-

षयता, देवादीनामपि साऽस्त्येव प्रायश्चित्ताध्वरतपश्चर्या-ब्रह्मविद्यादिश्रवणात्, मृगपक्षिसरीसृपादयस्तिर्यग्योनयः। नारकिणस्तु रौरवादिषु दुःखैकाश्रयदुस्त्यजविग्रहाः, जङ्गमं पुनर्द्विविधं योनिजमयोनिजं चेति, इदं देवादिषु त्रिष्वपि सम्भवति प्रजापति-मधु-कैटभ-धृष्टद्युम्नैरावत-स्वेदजनादिदर्शनात्, तत्र योनिजेष्वेव पञ्चमाहुत्यपेक्षा योनिप्राप्तेः विषूसंघावंमाक अथ ...भ्रमेघवृष्टिव्रीह्यादिरेतःसिक्तवन्यशरी-न च षु संसर्गेन ज्ञात ...व्रीह्यादिप्राप्तेः पूर्वं शीघ्रमेव निष्क्रमणं ततः परं दुर्निष्प्रपततरं द्युपर्जन्यपृथिवीपुरुषानन्तरं पञ्चमे योषिदग्नौ हुतस्य तत्तत्कालप्रतिनियतपरिणामादय आयुर्वेदयोगादिशास्त्रेषु विशदमवसेयाः, सप्तधातूनां शुक्रशोणितसम्भवत्वप्रकारः प्रकृतिविकृतिभावनियतवातपित्तकफादिप्रपञ्चः नाड्यादिविशेषतत्परिमाणादयश्च तेष्वेवावसेयाः । एवं जरायुजाण्डजोद्भिज्जस्वेदजभेदोऽपि भाव्यः । एषां च व्यष्टिजीवशरीराणामीश्वरं प्रति शरीरत्वं सद्वारकमद्वारकं चेत्येकः सम्प्रदायः सद्वारकमेवेत्यन्यः । प्रथमस्तु पक्षः प्राचुर्येण भाष्यकारव्यवहारैः सूच्यते तत्त्वरत्नाकरेऽपि स एवोक्तः चेतनाचेतनयोरविशिष्टं तं प्रति शरीरत्वमित्यादिवचनात्, द्वितीयस्तु पक्षो विवरणकाराङ्गीकृतः षडर्थसंक्षेपे ह्यचितो जीवेश्वरयोर्देहत्वात्तद्वाचिशब्दजनितधियामुभयत्र पर्यवसानमुभयोरपि स्वयमेव भानात्, द्विभानं चाशङ्क्योक्तं नाचितो जीवद्वारा ब्रह्मशरीरत्वादिति विवरणेऽप्ययमेवार्थः प्रपञ्चितः, अयं च विवादो देवमनुष्यादिव्यष्टिदेहविषयः, दिव्यमङ्गलविग्रहाद्यचित्सु सद्वारकत्वायोगात् विवरणेऽपि हि तमःप्रभृतीनामपि शरीरत्वनिर्देशविरोधपरिहाराय आदिसृष्टौ त्वित्यादिना समष्टि-

तत्त्वानां साक्षात्परशरीरत्वमुक्तं तेजोऽबन्नसृष्टिसमनन्तरभाविदेवमनुष्यादिनामरूपव्याकरणमात्र एव अनेन जीवेनेत्यादिश्रुत्यनुरोधेन सद्वारकत्वं, तत्राप्यद्वारकं सद्वारकं च शरीरत्वे न कश्चिद्दोषः उभयपर्यवसानमपि विशेषमूलप्रयोगभेदप्रतिनियमात्परिहृतम्। अत एव च द्विर्भानमपि न चैकस्य युगपदनेकं प्रति शरीरत्वमनुपपन्नं तल्लक्षणयोगेन तदुपपत्तेः अनेकं प्रति शेषत्वादिवत्, न च पुनर्जीववच्छरीरभूतस्य त्रिगुणद्रव्यस्य जीवानुकाष्ठादीन्तविशेषदशामात्रेणेश्वरं प्रति शरीरत्वमपसरति, तत्तादन्यद्रव्यं, द्रव्याभेदात् व्याकृतभूतत्वगादीन्प्रति चेश्वरस्यान्तर्यामित्वात् तत एव च तेषां तच्छरीरत्वं श्रूयते सुषुप्तिमूर्च्छाद्यवस्थासु च स्वाभाविकमीश्वरनियाम्यत्वमेव देहदेहिनोर्दृश्यते अत इदमद्वारकनियमनं तत्पक्षे न स्यात्, जीवसत्तामात्रं च देहनियमनौपयिकं तदानीं ज्ञानेच्छारहितत्वया तस्य गगनादिसत्तातुल्यत्वात्, अतः सर्वावस्थानां सर्वद्रव्याणामीश्वरं प्रत्येव स्वतःशरीरत्वम्, जीवं प्रति तु तत्कर्मकृतमिति समीचीनोऽयं पन्थाः ॥

एनामात्मतिरस्क्रियाजवनिकामिच्छाविहारस्थलीम्
निर्व्यापारविभावरीसहचरीं निद्रामनिद्रात्मनः।
ब्रह्मस्तम्बमहेन्द्रजालरचनापिच्छावलीं श्रीमतो
विष्णोर्लोहितशुक्लकृष्णशबलां विद्यामविद्यातनुम् ॥

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु न्यायसिद्धाञ्जने जडद्रव्यपरिच्छेदः प्रथमः ॥ २ ॥

श्रियै नमः। श्रीधराय नमः।

श्रीमते रामानुजाय नमः

सन्तु शुभाशिषः पूर्वाचार्या लोकद्वयसर्वमङ्गलाय नः ॥

॥ श्रीः ॥

श्रियै नमः ।

श्रीधराय नमः ।

श्रीमते रामानुजाय नमः ।

अथ जीवपरिच्छेदो द्वितीयः

जीवस्वरूपनिरूपणम् ।

अथ जीवः,–अल्पपरिमाणत्वे सति ज्ञातृत्वं, शेषत्वे सति ज्ञातृत्वमित्यादि तल्लक्षणम्–स तावन्न देहः प्रत्येकसमुदायचैतन्यादिविकल्पानुपपत्तेः, शरीरभेद इवाभिप्रायभेदप्रसङ्गात् ममेति व्यतिरेकप्रत्ययात्, संघातत्वादिहेतुभिश्च अवयविनश्च दूषितत्वात्, सिद्धावपि तद्गुणस्य कारणगुणपूर्वकत्वप्रसङ्गात् पाकजगुणवत्परिणामविशेषाभ्युपगमेऽपि प्रत्यवयवं चैतन्यप्रसङ्गो दुष्परिहरः, अत एव किण्वादिभ्यो मदशक्तिवदिति प्रलापो निरस्तः, संघातदशायां प्रत्यवयवं मदशक्तेः रसविशेषादिवत् ।

अस्तु तर्हि भूतावयवविशेषः शीघ्रसञ्चारी स्थायी वा ज्ञातेति चेत् प्रकारान्तरेणायमभ्युपगतो वैदिकः पक्षः देहाद्यपिण्डातिरेके सिद्धे अनित्यत्वादिवादस्यायत्तत्वार्यत्वात्, आगमेनैवास्य देहव्यतिरेकसिद्धिरित्येके, यथोक्तमात्मसिद्धौ आनुमानिकीमप्यात्मसिद्धिमश्रद्दधानाः श्रौतीमेव तां श्रोत्रियाः सङ्गिरन्त इति, न चासौ बाह्येन्द्रियाणि, तेषां बहुत्वात् प्रतिनियतविषयत्वाच्च परस्परानुभूतार्थप्रतिसन्धान–परस्पराविवादनियमाद्यनुपपत्तेः, न च तेष्वन्यतमः नियामकाभावात्, न च तत्समुदायः समुदायेऽहमिति प्रत्ययाभावात् अन्ततः समुदायिषु पर्यवसानाच्च, यच्च स्वप्नदशायामुपरतबाह्येन्द्रियस्य च व्याघ्रादिरूपत्वद-

र्शनं तदपि बाह्येन्द्रियवर्गाद्देहाच्चात्मनो भेदं व्यनक्ति, अत इन्द्रियेषु शरीरे च सकले विकले च सकलोऽहं विकलोऽहमित्यादिबोधो भ्रमात्तद्वैशिष्ट्यविवक्षया वा, नापि मनः, कर्तुरात्मनः करणतयैव श्रुतेरनुमानतो वा तत्सिद्धेः आहङ्कारिकत्वश्रवणाच्च, नापि प्राणाः तेष्वपि देहोक्तयुक्तिसाम्यात्, नापि धीः ज्ञातृधर्मतया नश्वरतया च स्फुरणात्, स एवाहमिति प्रतिसंधानानुपपत्तेः। न चेदं प्रतिसंधानं भ्रान्तिः अबाधात्, क्षणभङ्गहेतूनां प्रागेव निरस्तत्वात् भ्रान्तिरूपं वात्मप्रतिसन्धानं विषयप्रत्यभिज्ञानं स्मृतिमात्रं च संस्काराधारं स्थिरमात्मानमन्तरेण कथञ्चिदपि न घटते ततश्चोपायानुष्ठानतत्फलानुभवादयोऽपि दुरुपपादाः।

यत्पुनराहुः।

यस्मिन्नेव हि सन्तान आहिता कर्मवासना।
फलं तत्रैव बध्नाति कार्पासे रक्तता यथा॥ इति,

तदप्यसत् तत्र वासनाधारस्थिरावयवानुवृत्तेः, निरन्वयविनाशिषु जगति सर्वक्षणेषु संतानैक्यभेदादयोऽपि दुर्वचाः नष्टं सर्वं क्षणं प्रति जायमानस्य सर्वस्यापि क्षणस्योत्तरत्वाविशेषात् देशविशेषस्यापि क्षणिकत्वेन तदैक्यासिद्धेः, अत एव चित्तविज्ञानालयविज्ञानसंतानभेदोऽपि निरस्तः, ज्ञानमात्रात्मवादे च प्रागुक्तप्रतिसंधानाद्यनुपपत्तिभिः संतानैक्यग्रहीतुरभावाच्च न संतानसिद्धिः, अतो यच्चाहुः

अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते॥

इति तच्च तेषामेव विपर्यासितदर्शनत्वफलम्, अनेन बौद्धग्रन्थिवेदान्तिनामपि सिद्धान्तोऽपक्रान्तः केवलज्ञप्तेर-

हम्प्रत्ययाविषयत्वात्, स्थिरत्वाभ्युपगमेऽपि अनुभवितृसापेक्षत्वात् भ्रान्तिरूपस्यापि प्रतिसंधानादेर्ज्ञातृत्वस्यापि भ्रान्त्यन्तरसिद्धत्वेऽनवस्थानात् न चासौ कारणानवस्थितिरिति न दोषः दोषाधिष्ठानयोरपि तथाभूतयोरेव सर्वत्र सम्भवेनाविद्यानादित्वाधिष्ठानसत्यत्वयोरपि परित्यागप्रसङ्गात्। यत्तु त एव सांख्यैः संभूयाहुः दर्पणमुखवदयःपिण्डौष्ण्यवत् करतलरविकरवच्च चिच्छायापत्तितत्संपर्कतद्व्यञ्जकत्वाधीनतदाश्रयत्वभ्रमादन्तःकरणस्य ज्ञातृत्वमिति तत्र यथाश्रुतविवक्षायां कथमचाक्षुषयोर्बिम्बाधिकरणयोश्छायापत्तिः, अध्यासमात्रे तदुपचार इति चेत् कुत्र कस्य, अन्तःकरणे चैतन्यस्येति चेत् तर्हि चैतन्यमेव मिथ्या स्यात् अध्यस्तत्वात्, तदनधिकरणचैतन्यस्य खपुष्पपरिमलायमानत्वात्, चैतन्ये अन्तःकरणस्येति चेत् तर्हि ज्ञानस्यान्तःकरणाश्रयताभ्रमः स्यात् न त्वन्तःकरणस्य ज्ञातृत्वभ्रमः, न चैतादृशः कश्चिद्भ्रमो दृश्यते, कथं च संपर्के सत्यपि द्वयोर्ज्ञातृत्वमौष्ण्यवत्तात्त्विकमनभ्युपगच्छतस्तदध्यासः धर्मधर्मिभावस्य लोके दृष्टत्वादिह तदध्यासात् ज्ञातृत्वभ्रम इति चेत् कुत्र धर्मत्वाध्यासः कुत्र वा धर्मित्वाध्यास इति नियामकाभावात् वैपरीत्यमपि स्यात् क्वचिद्धर्मिभेदाग्रहः क्वचिद्धर्मभेदाग्रह इति तौ नियामकाविति चेत् न ज्ञप्तेः स्वयंप्रकाशायाः स्वरूपातिरिक्तागृहीतभेदानभ्युपगमात्, अभ्युपगमे वा सधर्मत्वापातात् भेदाग्रहयोगादेवाहङ्काराभिव्यङ्ग्यत्वमपि निरस्तं यथाहुर्भगवद्यामुनमुनयः।

शान्ताङ्गार इवादित्यमहङ्कारो जडात्मकः।
स्वयं ज्योतिषमात्मानं व्यनक्तीति न युक्तिमत्॥

व्यङ्क्तृव्यङ्ग्यत्वमन्योन्यं न च स्यात्प्रातिकूल्यतः ।
व्यङ्ग्यत्वेऽननुभूतित्वमात्मनि स्याद्यथा घटे ॥

इति, अतः सिद्धमात्मैव ज्ञाताऽहम्प्रत्ययविषय इति, किञ्च ।

प्रत्यक्षत्वादुपलम्भतो मम सुखं भावीति मोक्षेच्छया ।
मुक्तब्रह्ममुमुक्षुवेदवचसा सुप्तोऽहमित्युक्तितः ।
मां नाज्ञासिषमित्यपि स्ववपुराद्यज्ञानमात्राश्रयात् ।
स्वापप्राच्यनिजक्रियास्मरणतोऽप्यात्माहमर्थः स्थिरः ॥

आत्मनोऽहंप्रत्ययगोचरत्वप्रतिक्षेपकाण्यात्मत्वाजडत्वनिर्विकारत्वादीनि प्रत्यक्षागमबाधादसाधारणानैकान्तिकत्वाच्च निरस्तानि । एवं ज्ञातृत्वकर्तृत्वप्रतिक्षेपकेष्वपि भाव्यम्, एवं कर्तृत्वज्ञातृत्वादिकं नात्मधर्मः धर्मत्वाद् दृश्यत्वादित्यादिकमपि बाधकबलाद्विपक्षे बाधकाभावाच्च दुःस्थम् । नाहङ्कारधर्म इति प्रयुज्यमाने का गतिर्देवानाम्प्रियस्य, अविद्येति चेत् सत्यमविद्यैव अनाविद्यककर्तृत्वस्य क्वचिदप्यनभ्युपगमात् आविद्यस्यापि निषेधे तद्विधानविरोधात्, ज्ञातृत्वं चास्य स्वाभाविकाकार इति ज्ञोऽत एवेत्यधिकरणे श्रुतिभिरुपपादितं, भोक्तृत्वहेतुभूतं कर्तृत्वं भोक्तुर्जीवस्यैव तच्च सामान्यतः परमपुरुषहेतुकमिति कर्ता शास्त्रार्थवत्त्वात्, परात्तु तच्छ्रुतेरित्यधिकरणे प्रपञ्चितम् अस्य स्वयंप्रकाशत्वनित्यत्वनानात्वाणुत्वादीनि श्रुत्युपपत्तिभ्यां सिद्धानि, स्वस्य चास्य स्वयंप्रकाशत्वं, परस्य तु तज्ज्ञानविषयतयैव प्रकाशते, स्वस्यापि प्रमाणान्तरावसेयाणुत्वशेषत्वनियाम्यत्वनित्यत्वादिविशिष्टरूपेण ज्ञानविषयत्वमस्त्येव अहमिति प्रत्यक्षवैकत्वविशिष्टतया तु स्वप्रकाशत्व सर्वदा, योगदशायां तु यथावस्थितापूर्वाकारवि-

शिष्टतया यौगिकप्रत्यक्षेण साक्षात्क्रियते तदिदमुक्तमात्मसिद्धौ ।

एवमात्मा स्वतः सिध्यन्नागमेनानुमानतः ।
योगाभ्यासभुवा स्पष्टं प्रत्यक्षेण प्रकाशते ॥

इति, तदेवं ज्ञातृत्वादिरूपभेदान्मातृमेयमानरूपोऽयमात्मा । उक्तं प्रज्ञापरित्राणे वरदनारायणभट्टारकैः ।

प्रमाता च प्रमेयं च प्रमाणं च भवेत्पुमान् ।
प्रमा मेया च धीरेव मेया एव घटादयः ॥

इति, स्वयंप्रकाशत्वादौ श्रुतिस्तु प्रसिद्धा यद्यपि सत्यं ज्ञानमित्यत्रान्तोदात्तत्वबलात् ज्ञानकर्तृत्वार्थकत्वमङ्गीकार्यम् । यद्यपि विज्ञानघन इत्यत्र रसघनदृष्टान्तस्वारस्यात् ज्ञानव्याप्तत्वं विवक्षितं यद्यपि विज्ञानं यज्ञं तनुत इत्यादिषु तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् तथाऽपि एष हि द्रष्टा श्रोता रसयिता घ्राता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुष इत्यत्र विज्ञानात्मशब्दस्वारस्यात् विशेषतः सामान्यतश्च प्रपञ्चितस्य ज्ञातृत्वस्य पुनर्वचने प्रयोजनाभावाच्च ज्ञानस्वरूपत्वं सिद्धम् । तथा च अत्रायं पुरुषः स्वयंज्योतिर्भवति कतम आत्मा योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष इत्यादिभिश्च स्वयंप्रकाशत्वं स्वरससिद्धमङ्गीकार्यम्, अनुमितिस्तु आत्मा स्वयंप्रकाशः ज्ञानत्वात् धर्मभूतज्ञानवदिति श्रीविष्णुचित्तैरुक्तम् अधीकर्मतया प्रकाशमानत्वज्ञानात्मसंबन्धप्रतिसंबन्धित्वादीनि परमबाधितानि विष्णुमिश्रोक्तानि ।

स्वस्यैव भासको दीपः स्वात्मनोऽन्यस्य च प्रभा ।
एवं भेदोऽस्ति साम्येऽपि ज्ञानयोर्धर्मधर्मिणोः ॥
प्रत्यक्स्वयंप्रभसुखे नित्यं पुंसि व्यवस्थिते ।
अस्वाप्सं सुखमित्यादौ कालाद्यंशेऽनुमास्थितिः ॥

अगायं मधुरं मन्दमागामीत्येवमादिषु ।
माधुर्यादिवदत्रापि सुखं भाति तदाननम् ॥

ज्ञानस्य संबन्धिशब्दतया व्युत्पत्तिमात्रं, प्रवृत्तिनिमित्तं तु कस्यचिद् व्यवहारानुगुण्ये निरपेक्षहेतुत्वं तदेव स्वस्येति निरूपितं, स्वयंप्रकाशत्वमिति न साध्याविशेषोऽपि विषयाश्रयवैशिष्ट्यनिर्बन्धो धर्मभूतज्ञाने धर्मिज्ञानस्यापि विशिष्टत्वात् परमतादतिरेकः, अस्य त्वविनाशित्वे युक्तयः ।

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ।

इत्यादिना भगवद्गीतायामुक्ताः, व्यञ्जिताश्च तद्भाष्ये, अनित्यत्वेऽस्याकृताभ्यागमकृतविप्रणाशादिप्रसङ्गश्च ।

जीवाणुपरिमाणनिरूपणम्

अणुश्चासौ श्रुतेः स्वयंप्रकाशस्य हृत्प्रदेशावच्छिन्नोपलम्भस्वारस्याच्च युगपदखिलभुवनेष्वदृष्टद्वारा तत्कार्यसिद्ध्यै विभुत्वकल्पनमयुक्तम् ईश्वरप्रीतिकोपयोरेवादृष्टत्वात् तदाधारस्य चेश्वरस्य विभुत्वात् जीवस्याविभुत्वे बाधकाभावात् विभुत्वे चोपलम्भाद्यस्वारस्याच्च इन्द्रियवत् शरीरप्रत्युप्तात्मगमनेनैव तत्रतत्र ज्ञानसुखाद्युपपत्तेः आत्मगमनं तूपलम्भश्रुत्याद्यनुकूलं विभुत्वकल्पनं तु न तथेति लाघवमिच्छतां तदेव फलितम्, उक्तं चात्मसिद्धौ प्राणात्मवादनिराकरणे अविभोरात्मनः स्पर्शविरहिणोऽपि प्रयत्नादृष्टप्रेरणानुगुण्येन मनस इवोत्क्रान्तिगत्यागतयो युज्यन्त इति, तथा तत्रैव चैतन्यप्रसरणचोद्यपरिहारयोरपि गुणिनमपहायेत्यादिना अणुत्वं व्यक्तं श्रुतिस्मृत्यादिषु सर्वगत्वादिव्यपदेशास्तु समुदायापेक्षया धर्मभूतज्ञानद्वारा सूक्ष्मानुप्रवेशक्षमतया वा तत्रतत्र यथोचितं निर्वाह्याः, नित्यो व्यापीत्या-

त्मसिद्धिवचने व्यापिपदमपि अतिसूक्ष्मतया सर्वाचेतनान्तःप्रवेशस्वभाव इति भाष्ये व्याख्यातम् उत्क्रान्तिगत्यागतीनामित्यादिभिश्च सूत्रकारैरेवाणुत्वं समर्थितं हृत्प्रदेशस्थितस्यैव जीवस्य ज्ञानद्वारा नानाधिष्ठानोपपत्तिः, एवमेव योगिप्रभृतीनां नानादेहाधिष्ठानं घटते न ततो विभुत्वक्लृप्तिः तदेतदखिलमभिप्रेत्य सूत्रितं गुणाद्वाऽऽलोकवदिति, मुक्तनिरूपणे च प्रदीपवदावेशस्तथा हि दर्शयतीति।

एतेन देहात्माभिमानमनुसरतामार्हतानां देहानुरूपविविधपरिमाणत्वकल्पनमपि भग्नम्। एवं चात्मा कार्त्स्न्य, न च पर्यायादविरोधोविकारादिभ्यः, अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः, इति सूत्रैश्च तन्निरस्तम्।

वरदविष्णुमिश्रैस्तु संसारदशायां स्वरूपज्ञानयोः संकोचादणुपरिमाणमात्मस्वरूपम् मोक्षदशायां तु सर्वगतं सर्वव्यापि ज्ञानं च विस्तीर्णतया प्रकाशते अयमर्थः-

बालाग्रशतभागस्य शतधा कल्पितस्य च।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते॥

इति श्रुत्यावगम्यते तथाऽऽह भगवान् पराशरः विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथापरेत्यादिना जीवस्यापि सङ्कोचविकाशयोगित्वमुक्तम्, अयमेवार्थो नित्यो व्यापीत्यात्मसिद्धिवचनमुपादाय मानयाथात्म्यनिर्णये प्रपञ्चितः तदेत्सूत्रादिविरोधाद्वैभववचनम्।

यत्तु गीताभाष्ये अनादिमत्परं ब्रह्मेति व्याख्याने ब्रह्म बृहत्त्वगुणयोगि शरीरादर्थान्तरभूतं स्वतःशरीरादिभिः परिच्छेदरहितं क्षेत्रज्ञतत्त्वमित्यर्थः। स चानन्त्याय कल्पत इति श्रुतेः शरीरपरिच्छिन्नत्वं चास्य कर्मकृतं

कर्मबन्धनान्मुक्तस्यानन्त्यमित्युक्तम्, यच्च लोके सर्वमावृत्य तिष्ठतीत्यत्र लोके यद्वस्तुजातं तत्सर्वमावृत्य व्याप्य तिष्ठति परिशुद्धस्वरूपं देहादिपरिच्छेदरहिततया सर्वगतमित्यर्थ इत्युक्तम्, एवं प्रकरणान्तरेष्वपि अनवच्छिन्नं ज्ञानैकाकारमित्युक्तं तदखिलं ज्ञानव्याप्त्यादितत्परमेवेति मन्तव्यं, सारभाष्यादिषु स चानन्त्याय कल्पते इत्यादेस्तथैव व्याख्यानात्। दीपे तु प्रदीपवदावेशस्तथा हि दर्शयतीति सूत्रे बालाग्रश्रुतिमुपादाय प्रत्यगात्मनोऽणुत्वमेव स्वरूपमिति सूत्रकारमतं नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारादिति साभिसंधिकमुक्तत्वाच्च अतः सदाऽणुरेव जीव इति सूत्रभाष्यकारादीनां सिद्धान्तः स चायमात्मा सौभर्यादिक्षेत्रज्ञव्यतिरिक्तेषु प्रतिक्षेत्रं भिन्नः स्मृत्यनुभवसुखदुःखकरणप्रयत्नादिप्रतिनियमात्, उक्तं हि न्यायसूत्रे नानाऽत्मानो व्यवस्थात इति, सांख्यैरप्युक्तम्।

जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव॥ इति,

जीवाद्वैतवचनानि तु प्रकारैक्यविषयाणि प्रकारैक्येऽपि ह्येकादिशब्दाः प्रयुज्यन्ते यथा अयमयं चैको व्रीहिरिति रामसुग्रीवयोरैक्यमित्यादि च भाव्यं, ततश्चायं संग्रहः।

अविरोधान्तरं गत्वजातिभोगाद्यभेदतः।
एकोक्तिरपृथक्सिद्धेर्देशकालदशादिभिः॥

साम्यं च सर्वजीवानां स्वरूपतोमुक्त्यवस्थायां गुणतोऽपि चेति श्रुतिस्मृत्यादिसिद्धं, तत्र जीवभेदनिषेधवचनान्यपि प्रामाणिकस्वरूपभेदव्यतिरिक्तदेहात्माभिमाननिबन्धनदेवत्वादिभेदनिषेधपराणि कण्ठोक्तेन च देवत्वादिनिषेधेन तेषामैकार्थ्यमुचितम्।

किंच निर्विशेषात्मैक्यवादिनोऽपि बन्धमोक्षयोरविशेषः प्रसज्यते तत्त्वत इदानीमपि निरस्ताविद्यत्वात्, अतत्त्वतस्तदानीमपि तद्व्यवहारोपपत्तेः, व्यपदिश्यते हि शुकादिषु मुक्तेष्वपि हि जगति संसारः किं च ।

भ्रान्त्या सर्वसमुच्छेदे नोच्छेदस्तत्त्वतो भवेत् ।
प्रमया त्वपसिद्धान्ताद् द्वैतभङ्गाद्यसम्भवः ॥

विस्तरेण च परस्ताद्दूषयिष्यामः ।

भास्करमते तु नित्यसर्वज्ञस्योपाधियोग एव परिहास्यः उपाधिभिश्छेदनाद्ययोगेन ब्रह्मण एव संसारित्वानपायः उपाधिसंचारे प्रतिक्षणं बन्धमोक्षप्रसङ्गः सौभर्यादिवदुपाधिभेदेऽपि प्रतिसंधानस्य दुस्त्यजत्वात् छेदाभ्युपगमे चाच्छेद्यत्ववादविरोधः एवं सकलपदार्थभिन्नाभिन्नसच्चिद्ब्रह्मवादोऽपि दूष्यः, बद्धस्यापि प्रलये मुक्ताविशेषसदापत्त्यभिधानात् मुक्तस्यापि सर्वज्ञस्य सृष्टौ सर्वहेयतादात्म्यानुसंधानेनानन्तसंसारयोगात् । अतोबन्धमोक्षाविशेष एव अस्माकमविद्यानिवृत्तिर्नाम भावान्तरं भविष्यत्येव तच्च धीविशेषविकासादिरूपं प्रीयमाणपरमपुरुषपरिग्रहविशेषादिश्च, परेषां तु निखिलमिदमाविलमिति ब्रह्म वेद ब्रह्मैव भवतीत्यादिकमित्थमेव ब्रह्मतादात्म्यापरोक्षकृतं मुक्तब्रह्मणोस्तादात्म्यं शरीरशरीरिभावात् तदा ऽपरोक्षं च शाश्वतमेव तदपरोक्षधियो यावदात्मभावित्वात्, न्यायसुदर्शने तूक्तम् एव शब्दः साम्यवाची साम्ये चैव क्वचिच्छब्द इति निघण्टूक्तेः वैष्णवं वामनमालभेत स्पर्धमानो विष्णुरेव भूत्वेमान् लोकानभिजयतीति साम्ये श्रौतप्रयोगदर्शनाच्च विष्णुरेव विष्णुरिवेत्यर्थः, न ह्यत्र विष्णुरेव भवतीति विवक्षितं स्पर्ध-

मानस्य पशुयागेन तदयोगात्, ऐहिकफलं हि शत्रुजयादीत्यादि भाष्यं च गौणतामेवाह प्रकारैक्ये च तत्त्वव्यवहारो मुख्य एव यथा सेयं गौरिति मुख्य एव मुख्यप्राय इत्यर्थः सेयं गौरिति तु व्यक्तिद्वयैकरूप्यव्यपदेशः, अतः सिद्धमीश्वरात्परस्परं च जीवा भिन्ना इति स्वतः सुखी चायमात्मा उपाधिवशात्संसरति ।

स द्विधा संसार्यसंसारी चेति, पुण्यपापादिमान्पूर्वः तच्छून्य इतरः पूर्वोऽपि द्विधा नित्यसंसारी भाविसंसारविरहश्चेति तत्रेतः पूर्वमनन्तकल्पेष्विव परस्तादपि हेत्वनागमनात् संसाराविच्छेदसम्भवात् पूर्वः, मानं तु लीलाविभूतिनित्यत्वोक्तिः, क्षिपाम्यजस्रं, न क्षमामि कदाचन इत्यादिकमपि तदुत्तम्भकम् । केचित्तु विलम्बातिरेकपराणि तानि न तु कस्यचिदपि नित्यः संसारः अविरुद्धयोरसंसर्गस्य कालविप्रकर्षानियमेन व्याप्तेः अन्यथा मोक्षसाधने स किमहमिति संदेहादप्रवृत्तिप्रसङ्गादिति वर्णयन्ति, इतः पूर्वमनागतैतच्छरीराद्युपनिपातवत् तद्धेतूपनिपातात् भाविसंसारविरहोपपत्तिः प्रमाणं च ब्रह्मविदो मोक्षवचनानि एते च संसारिणः कर्मपाशप्रग्रथिता ब्रह्माण्डकुहरपरिवर्तमानकालघटीयन्त्रकुण्डिकायमानास्तस्मिन् क्षीयमाणाः पूर्यमाणाश्च सन्तः परिभ्रमन्ति तत्र पुण्यकृतो धूमरात्र्यपरपक्षदक्षिणायनषण्मासपितृलोकाकाशं चन्द्रक्रमेण स्वर्गलोकमधिरोहन्ति अवरोहन्ति च चन्द्रमसः स्थानादाकाशवायुधूमाभ्रमेघादिक्रमेण, तत्र श्रद्धासोमवर्षान्नरेतोमयीनामाहुतीनां विद्युत्पर्जन्यपृथिवीपुरुषयोषितः स्थानानि प्रायिकी च पञ्चमाहुत्यपेक्षा द्रौपदीधृष्टद्युम्नप्रभृतिष्वदर्शनात्, एवमपुण्यकृतामपि स्वेदजादिशरीरेषु पञ्चमाहुत्यभावाच्चन्द्रप्राप्त्यभावाच्च तेषामतिघोरा निरयसरणिर्निरयदुःखानुभू-

तिश्च पुराणादिषु प्रपञ्चिता स्मर्यमाणापि कलेवरं कदम्बगोलाययति ।

द्वितीयोऽपि द्विधा संसारात्यन्ताभाववान् प्रध्वस्तसंसारश्चेति, तत्र कदाचिदपि संसारहेत्वभावात् पूर्वस्येश्वरवन्नित्यसूरेस्तदत्यन्ताभावः । उत्तरस्तु उपपादितो मुक्त एव अनादावपि काले प्रतिदिवसं सहस्रपुरुषमोक्षेऽपि न संसारात्यन्तविलयः अस्यानन्तस्यैवंस्वभावत्वात्, उक्तंच वेदार्थसंग्रहे ब्रह्माज्ञानपक्षादपि पापीयानयं भेदाभेदपक्षःअपरिमितदुःखस्य पारमार्थिकत्वात् संसारिणामनन्तत्वेन दुस्तरत्वाच्चेति अनन्तपयोनिधौ पयोबिन्दुसन्निपातवत्संसारिवर्गे पूर्वमुक्तेषु पश्चान्मुक्तानामनुप्रवेशः अनन्तेष्वपि संसार्यसंसारिष्वेकपादत्वत्रिपादत्वतारतम्यमापेक्षिकं, तथा च मुहूर्तयामाहोरात्रकल्पादिषु द्रव्यपार्थिवघटादिषु च दृष्टमेव अत एव नित्यानां समस्तबद्धमुक्तापेक्षयाऽप्यनन्तत्वमुपपन्नम् । केचित्तु नित्यसूरिवर्गं नेच्छन्ति तन्न सदा पश्यन्ति सूरय इत्यादिभिः सदापश्यदनेकद्रष्टृविशिष्टस्थानविधानात्, एव न मुक्तप्रवाहेण वेश्वरेण वाऽन्यथासिद्धिः सर्वेषां जीवानां संसारात्यन्तायोगव्यवच्छेदसाधनानि जीवत्वादिलिङ्गानि यथासम्भवं सिद्धसाधनबाधादिभिर्दूष्याणि एतेषां नित्यसूरीणामानन्त्यावान्तरभेदादिकं श्रीपञ्चरात्रसंहितासु विशदमनुसन्धेयम् ।

अनन्तविष्वक्सेनाद्यैर्नियताधिक्रियैरपि ।
ज्ञानानन्दादिभिर्मुक्ता नित्यैरानन्दसोदराः ॥

एवं सदादर्शनादिबलादेव नित्यमुक्तेश्वराणां प्रतिसर्गावस्थायां सुषुप्तकल्पतयाऽवस्थानं वदन्तः प्रत्युक्ताः सङ्कोचककर्माद्यभावाच्च सावस्था दुरुपपादा ।

अथ को मोक्षहेतुः भक्तिरूपापन्नोपासनवेदनध्यानादिशब्दवाच्योऽसकृदावृत्त आप्रयाणादन्वहमनुवर्तमानो ज्ञानविशेषः तथा च सूत्रम् आवृत्तिरसकृदुपदेशादिति, आप्रयाणात्तत्रापि हि दृष्टमिति च, न पुनः केवलं तत्त्वज्ञानं तस्याध्ययनविधिसिद्धसाङ्गसशिरस्काध्ययनगृहीताक्षरराशिविशेषापातप्रतीतनिरतिशयपुरुषार्थसाधनार्थनिर्णयरागप्राप्तश्रवणमात्रेण निष्पन्नस्याविधेयत्वात्, तावति सिद्धेऽपि मोक्षादर्शनाच्च, तदुक्तं भगवताऽऽपस्तम्बेन बुद्धे क्षेमप्रापणं तच्छास्त्रैर्विप्रतिषिद्धं बुद्धे चेत् क्षेमप्रापणमिहैव न दुःखमुपलभेतेति, नापि श्रवणमननोपासननिर्धूतभेदवासनस्य वाक्यमात्रजन्यः साक्षात्कार इति वाच्यम् तस्यान्योन्याश्रयविरोधादिदुष्टत्वात् अविद्यास्वरूपसंबन्धनिवर्तकज्ञानतज्ज्ञातृतदैक्योपदेशादीनां विकल्पासहत्वं भाष्यादिषु ग्राह्यम् असत्यात्सत्यप्रतिपत्तिश्च सर्वथाऽनुपपन्ना तथा हि ।

सत्यधीर्मम सत्येन तवासत्यादसत्यधीः ।
सत्यादसत्यधीर्वेत्ति नासत्यात्सत्यधीर्भवेत् ॥

कर्माङ्गकज्ञानस्य मोक्षोपायत्वनिरूपणम् ।

कर्मापि न केवलं ज्ञानसमुच्चितं वा मुक्तिहेतुः वेदनमेव विधायोपायान्तरनिषेधात्, तदङ्गतया कर्मानुप्रवेशे तु न विरोधः तथा सति तस्योपायान्तरत्वाभावात् परमात्मसाक्षात्कारोदयविरोधिरजस्तमोमूलभूतसांसारिकपुण्यपापरूपप्राचीनकर्मनिर्मथनकृतचित्तशुद्धिद्वारेण हि तदा तदुपयोगः, एतेन विशिष्टदेशवास–व्रतविशेष–वैष्णवसंश्रयादेर्ज्ञानयोगकर्मयोगयोश्च परम्परया मोक्षहेतुत्वमित्यपि सिद्धम् । वैष्णवसंश्रयादेरुपासनशेषतयोपादानात् यजमानेन सह पश्वादीनां स्वर्गादिगमनवद्वा मोक्षसिद्धिः

यजमानेन सहिताः स्वर्गं यान्ति नराधिपेति हि महाभारतोक्तिः, ज्ञानकर्मयोगयोश्च वक्तव्यमखिलं श्रीमद्गीताभाष्ये व्यक्तमुक्तम्। तत्र हि कर्मयोगप्रसङ्गेषु कर्मयोगस्य सुशकत्वादप्रमादत्वाच्चान्तर्गतात्मज्ञानतया निरपेक्षत्वादित्यादिप्रकारेण कर्मयोगमात्रेणात्मावलोकनसिद्धिरुपपादिता, तथा निराशीर्यतचित्तात्मेति श्लोके ज्ञाननिष्ठाव्यवधानरहितकेवलकर्मयोगेनैवंरूपेणात्मानं पश्यतीत्यर्थ इत्युक्तं, तथा ब्रह्मार्पणमिति श्लोकेऽपि मुमुक्षुणा क्रियमाणं कर्म परं ब्रह्मात्मकमेवेत्यनुसंधानयुक्ततया ज्ञानाकारं साक्षादवलोकनसाधनं न ज्ञाननिष्ठाव्यवधानेनेत्युक्तं, तथा पञ्चमाध्याये।

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ।
तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते॥
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम्।
यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते॥

इत्येतैर्व्यक्तमेव नैरपेक्ष्यमुक्तम्।

संन्यासस्तु महाबाहो! दुःखमाप्तुमयोगतः।
योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति॥

इति ज्ञानयोगादपि कर्मयोगस्य शीघ्रकारित्वं कर्मयोगादृते ज्ञानयोगस्य दुष्प्रापत्वं च प्रतिपादितं, द्वयोरपि भक्त्यङ्गत्वं बहुषु प्रदेशेष्वभिहितं, तथा हि अथैतदप्यशक्तोऽसि इत्यस्य व्याख्याने ततोऽक्षरयोगमात्मस्वभावानुसंधानरूपं परभक्तिजननं पूर्वषट्कोदितमाश्रित्य तदुपायतया सर्वकर्मफलत्यागं कुर्वित्युक्तं, तथा श्रेयो हि ज्ञानमभ्यासादित्यत्र शान्ते मनस्यात्मध्यानं सम्पत्स्यते आत्मध्यानाच्च तदापरोक्ष्यं तदापरोक्ष्यात्परा भक्तिरिति भ-

क्तियोगाभ्यासाशक्तस्यात्मनिष्ठैव श्रेयसी आत्मनिष्ठस्याप्यशान्तमनसो निष्ठावाप्तयेऽन्तर्गतात्मज्ञानानभिसंहितफलकर्मनिष्ठैव श्रेयसीत्यर्थ इत्युक्तं, तथा तृतीयषट्कारम्भे पूर्वस्मिन् षट्के परमप्राप्यस्य ब्रह्मणो भगवतो वासुदेवस्य प्राप्त्युपायभूतभक्तिरूपभगवदुपासनाङ्गभूतं प्रत्यगात्मनो याथात्म्यदर्शनं ज्ञानयोगकर्मयोगलक्षणनिष्ठाद्वयसाध्यमुक्तमित्युक्तम्, उभयपरिकर्मितस्वान्तस्यैकान्तिकात्यन्तिकभक्तियोगलभ्य इति ।

अत्रेदं तत्त्वं भक्तियोगः परमात्मप्राप्त्युपायभूतः तदशक्तस्य तद्भक्तियोगसिद्ध्यर्थमात्मावलोकनमपेक्षितं तस्य च ज्ञानयोगकर्मयोगौ द्वौ पृथगुपायौ तत्र ज्ञानयोगः स्वात्मावलोकनेऽन्तरङ्गः, तथाऽपि प्रथमं स दुष्करः तदनधिकारिणस्तुल्यफलः कर्मयोग एव कार्यः तदधिकारिणोऽपि व्यपदेश्यस्य लोकसंग्रहार्थं कर्मयोग एव कार्यः अशक्तस्य ज्ञानयोगशक्तिं कर्मयोग एवोत्पादयति तदा कर्मयोगं परित्यज्य ज्ञानयोगमनुतिष्ठतोऽपि न दोषः इमौ च योगौ कामनाभेदेन कस्यचित् कैवल्यमात्रसाधकौ यथा भगवदुपासनमेव कस्यचिदैश्वर्यादिकं साधयति प्रवाहानादिपुण्यपापरूपकर्मतारतम्येन शक्त्यशक्तिकामनादितारतम्यमिति न कश्चिद्दोष इति तत्सिद्धं भक्तिरेव मोक्षोपाय इति, ।

महनीयविषये प्रीतिर्भक्तिः सैवावस्थाभेदात्परभक्त्यादिभेदं भजते स्तुतिनमस्कारादिषु तत्सम्बन्धाद्भक्तिशब्द उपचारतः, सा च भक्तिः सदक्षर-मधु-दहर-भूम-वैश्वानरादिविद्याभेदाद्बहुधा गुणोपसंहारपादे निपुणमनुसंधेया, एवं चातुरात्म्योपासनरूपा अपि भक्तयः सद्भि-

द्यादिभेदवदङ्गीकार्याः प्रमाणसिद्धत्वनैरपेक्ष्याद्यविशेषात् एताः सर्वास्तत्तच्छास्त्रप्रतिपादिततत्तद्वर्णाश्रमधर्मनिष्ठत्रैवर्णिकमनुष्यदेवासुरादिसाध्याः, स्त्रीविधुराणामपि जपोपवासाद्यङ्गाधिकृतानां ब्रह्मविद्याधिकारोऽस्त्येव अनाश्रमित्वादाश्रमित्वमेव ज्याय इति विशेषः, नैष्ठिकादिपरिभ्रष्टानां त्वनधिकार एव तथा स्मृतेः, शिष्टबहिष्कारादेश्च कृतप्रायश्चित्तानामपि तेषां ब्रह्मविद्याधिकारो नास्त्येवेति बहिस्तूभयथाऽपि स्मृतेराचाराच्चेति सूत्रेऽभिहितम् । ननु गोपिकादेरपि मोक्षः श्रूयते तत्कथं त्रैवर्णिकत्वनियमः इत्थम् न हि तेषां तच्छरीरेष्वेवोपायानुष्ठानं किं तु प्राचीनेष्वेव ब्राह्मणादिजन्मसु प्रागेव प्राप्तोपायानामपि तेषां प्रारब्धकर्मविशेषादिना निकृष्टशरीरप्रवेशः अन्तिमशरीरं तु यत्किमपीति न दोषः प्रारब्धावधिकत्वाद्बन्धस्य, एवं विदुराद्यश्च भवान्तरीयसंस्कारोद्बोधजनितज्ञानेनेति नापशूद्राधिकरणविरोधः । स्मरन्ति च–

धर्मव्याधादयोऽप्यन्ये पूर्वाभ्यासाज्जुगुप्सिते ।
वर्णावरत्वे संप्राप्ताः संसिद्धिं श्रमणी यथा ॥

इत्यादि शुश्रूषोर्जानश्रुतेः शूद्रेत्यामन्त्रणं शोचनादिति सूत्र एव व्यक्तम् अध्यवसायादिविशेषविशिष्टाभ्यस्तविद्या तस्या अपि बुद्धिविशेषत्वात् नान्यः पन्था इत्यादिभिर्न विरोधः भक्तिविशेषत्वाच्च भक्त्या त्वनन्ययेत्यादिभिः, यथाहुः ।

साधनं भगवत्प्राप्तौ स एवेति स्थिरा मतिः ।
साध्यभक्तिस्तथा सैव प्रपत्तिरिति गीयते ॥
उपायो भक्तिरेवेति तत्प्राप्तौ या तु सा मतिः ।
उपायभक्तिरेतस्याः पूर्वोक्तैव गरीयसी ॥
उपायभक्तिः प्रारब्धव्यतिरिक्ताघनाशिनी ।
साध्यभक्तिस्तु सा हन्त्री प्रारब्धस्यापि भूयसी ॥

इति, तस्या अपि हि शब्दान्तरादिभिः सद्विद्यादिभेदाद्भेदे सिद्धे सर्ववेदान्तप्रत्ययन्यायात्सर्वप्रपत्तिप्रकरणपठितगुणोपसंहारेण पौष्कल्ये च सिद्धे विकल्पोऽविशिष्टफलत्वादिति न्यायेन विद्याऽन्तरसमुच्चयप्रसङ्गाभावः त्याज्यसमुच्चये विरोधाच्च भक्त्यङ्गभूता सा चान्यैव अभिसंधिभेदात् यथैश्वर्यसाधिका भक्तिरपवर्गोपायभक्तिभेदाद्भिद्यते, यथा च कर्मस्वरूपाविशेषेऽपि नित्यकाम्यज्योतिष्टोमभेदः, भक्तिविशेषभूतायास्तस्याः पृथगुपायत्वपरिगणनं कथमिति चेत् सकृदसकृत्त्वनिरपेक्षसापेक्षत्वादिभेदमाश्रित्येति मन्वीथाः फलवैषम्याभावे लघूपाये सति गुरूपायविधानमनर्थकमिति चेन्न तादृशाध्यवसायादेर्दुष्करत्वेन गौरवाविशेषात्, तथोक्तं प्रपत्तिप्रकरणे उपायः सुकरः सोऽयं दुष्करश्च मतो ममेति, यथा च कश्चिन्महता प्रयासेन महीपतेरर्थमासादयति स्खलने च यथोचितं दण्ड्यते, अपरस्त्वन्तरङ्गसेवाक्षमः क्षोदीयसैवायासेन तावन्तं तदधिकं चार्थमासादयति क्षुद्रेषु स्खलितेषु सह्यते महत्स्वप्यल्पदण्डो भवति तत्राप्यन्तरङ्गसेवा मन्दभाग्यानां दुर्लभेति चेदत्रापि तथैव, यथोपायभक्तिष्वेव तत्तच्छाखाभेदेन वर्णाश्रमभेदेन चाङ्गभूतानां कर्मणां गुरुलघुतारतम्येऽपि फलमविशिष्टं तथेहापि, कथं तर्हि अतस्त्वितरज्ज्यायोलिङ्गाच्चेति सूत्रे भूयोधर्मकाल्पधर्मकयोरतुल्यकार्यत्वादिति भाष्यम् इत्थम् एकाधिकारिगोचरमुख्यगौणविषयं हि तत्, अन्यथाऽधिकधर्मकाश्रमान्तरसूत्रान्तरादिष्वपि फलवैषम्यप्रसङ्गेन तदनुप्रवेशस्य ज्यायस्त्वप्रसङ्गात्, उपायभक्तौ नित्यनैमित्तिककर्मणां फलाभिसन्धिरहितकाम्यकर्मणां चाङ्गत्वेनानुष्ठानं न पुनः स्वातन्त्र्येण निषिद्धवर्जनं द्वयोरपि भक्त्योः समं, साध्यभक्तौ तु काम्यानां

श्रीहरये नमः ॥

न्यायसूत्रविवरणम् ।

तमालश्यामाङ्गो द्रुतकनकचीनांशुकरुचिः
शुचिः साक्षान्मूर्त्तो रस इव परानन्दनिविडः ।
द्रवच्चेता राधाप्रियसहचरः कोऽपि विहरन्
ममास्तां स्वच्छन्दं हृदयसदने चारुविजने ॥
भवारण्ये भीमे विमतिलतिकाकण्टकवृते
सदा लोकान् कर्मप्रचुरतरदुःखाकुलतया ।
तमोऽन्धानालोक्य भ्रमत इह शास्त्राणि करुण-
स्तदुच्छेदे न्याये मुनिरमलसूत्राणि विदधे ॥
नत्वा श्रीकृष्णपादाब्जं तं मुनिं श्रीगुरुं तथा ।
व्याख्यामातनुते तेषां श्रीराधामोहनः सुधीः ॥

तत्रादौ प्रेक्षावत्प्रवृत्तये प्रयोजनं दर्शयन् विधेयं निर्दिशति ।

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः(१) ॥ १ ॥ सो

प्रमाणादीनां तत्त्वज्ञानान्निःश्रेयसाधिगम इति तानि तत्त्वेन निरूप्यन्त इति शेषः । अन्यथा शिष्यावधानानुपपत्तेः । निरूपणं ज्ञापनं ग्रन्थात्मकशब्दसमूह इति

(१) प्रमाणादिपदार्थतत्त्वज्ञानान्निःश्रेयसाधिगम इत्येतच्छास्त्रस्यादिमं सूत्रमिति वार्त्तिकम् । तत्र संक्षेपतः प्रथमसूत्रमनूद्य तस्य तात्पर्यमाहेत्यादि तात्पर्यटीका । अतोऽस्य सूत्रत्वमित्यवसीयते ।

यावत्। व्यापारानुबन्धिनी विषयता च तत्पदलभ्यप्रमाणाद्यन्वयिनी आख्यातार्थः। अत्र यद्यपि अविगीतशिष्टाचारविषयत्वेनानुमितवेदविहितकर्तव्यताकं मङ्गलं कर्तुमुचितं तथापि मङ्गलस्य ग्रन्थसमाप्तिप्रतिकूलविघ्नविनाशकतया ग्रन्थादौ कर्तव्यत्वेन सर्वज्ञस्य मुनेः स्वतो विघ्नविरहनिश्चयवतो मङ्गलाकरणे ऽपि न दोषः। मङ्गलस्य कृतत्वे ऽपि तदुपनिबन्धनस्यानियमेनाकृतत्वे ऽपि न क्षतिः। वस्तुतोऽत्रापि शिष्यशिक्षार्थं मङ्गलोपनिबन्धः परमेश्वरपरप्रमाणपदोपन्यासरूपः कृतः प्रमाणपदस्य कर्तृव्युत्पत्त्या प्रमातृपरत्वात् प्रशब्दसमभिव्याहृतमाधातुना च नित्ययथार्थसर्वविषयकं ज्ञानमुच्यते तदुक्तं भारतीयनामसहस्रमध्ये प्रमाणं बीजमव्ययमिति। सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्तत इति न्यायेन(१) विशेषदर्शिनां प्रवर्तनाय प्रयोजनाभिधेयसम्बन्धानाह प्रथमसूत्रेण। सिद्धो ज्ञातोऽर्थः प्रयोजनं यस्य एवं सिद्धः सम्बन्धोऽभिधेयप्रयोजनाभ्यां यस्य तं ग्रन्थम्। तत्र प्रयोजनं निःश्रेयसपदबोधितापवर्गः। अभिधेयानि पदार्थतत्त्वानि। सम्बन्धो निःश्रेयसप्रमाणादिपदार्थतत्त्वज्ञानयोर्हेतुहेतुमद्भावः प्रमाणादितत्त्वनिरूपणात्मकग्रन्थयोः प्रतिपाद्यप्रतिपादकभावश्च। प्रतिपादकत्वं च ग्रन्थस्य ज्ञानद्वारेति मुमुक्षूणां निःश्रेयसोपयोगिप्रमाणादितत्त्वज्ञानजनकत्वरूपनिःश्रेयसोपयोगित्वज्ञानादेतद्ग्रन्थश्रवणे प्रवृत्तिरिति दर्शितम्। केचित्तु तत्त्वं ज्ञायते ऽनेनेति व्युत्पत्त्या तत्त्वज्ञानशब्दः शास्त्रपरः निःश्रेयसस्याधिगमो यस्मात् स निःश्रेयसाधिगम इति

(१) श्लोकवार्त्तिके प्रतिज्ञासूत्रव्याख्याने १७ श्लोकपूर्वार्द्धम्। तत्र सिद्धसम्बन्धमित्यत्र ज्ञातसम्बन्धमिति पाठः। शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजन इत्यपरार्द्धम्।

शास्त्रस्य निःश्रेयसोपयोगितत्त्वज्ञानजनकत्वलाभः । एवं च इति तानि निरूप्यन्त इति न पूरणीयमित्याहुः । तच्चिन्त्यम् । प्रमाणादयः पदार्था इत्यादिज्ञानं न मोक्षप्रयोजकमिति तत्त्वेत्युक्तम् । तत्त्वं च लक्षणस्वरूपादिकं तथा प्रमाणादीनां तत्त्वेन प्रकारेण विशिष्य ज्ञानान्मोक्षाधिगम इत्यर्थः । प्रमाणप्रमेयेत्यादि सर्वपदार्थप्रधानो द्वन्द्वनिर्देशः । अथ

पदार्थानां प्रधानत्वे परस्परविभेदतः ।
एकदैव क्रियायोगाद् भवति द्वन्द्वसंज्ञकः ॥

इत्यभियुक्तस्मरणात् प्रमाणादीनां प्रमेयाद्यभिन्नतया द्वन्द्वानुपपत्तिरिति चेत् । न । पदार्थो हि जात्याकृतिव्यक्तय इतिभाष्यानुसारेण पदार्थतावच्छेदकस्यापि पदार्थत्वात् । जातिपदं पदार्थतावच्छेदकपरं तथा चात्र पदार्थतावच्छेदकभेदादेव द्वन्द्वविधानम् । घटा इत्यादिस्वरूपैकशेषस्थले पदार्थभेदादेव द्वन्द्वः । न च तत्र द्वन्द्व एव नेति वाच्यम् । सकृदुच्चरितः शब्दः सकृदर्थं गमयतीति नियमाद् घटा इत्यनेनानेकघटबोधानुपपत्तेः । न चानेकपदमेलनरूपसमासत्वस्य घटो घटा इत्यादौ नास्तीति कथं द्वन्द्व इति वाच्यम् । द्वन्द्वोत्तरमेकशेषस्य करणात् । वस्तुतस्तु तादृशनियम एव नोपगम्यते एकार्थावच्छिन्नार्थकस्वरूपैकशेषोऽपि नास्तीति सर्वत्र पदार्थतावच्छेदकभेदादेव द्वन्द्वः पदार्थभेदेनापि द्वन्द्वविधाने घटकलशावित्यादिप्रयोगापत्तेरिति । यत्तु द्वन्द्वापवादक एवैकशेषः स च द्वन्द्वप्रसक्तावेव सम्भवतीति पदार्थभेदेऽपि द्वन्द्वविधानम् । अत एव युञ्जावित्यादौ नुम्विधानं साधु समासभिन्न एव तस्य साधुत्वादिति । तन्न । घटा इत्यादौ बहुवचनस्य लुप्तघटपदाप्रकृतिकतया तदर्थेन बहुवचनार्थस्यान्वये प्रकृत्यर्थ एव संख्याद्यन्वये स्या-

दिविभक्तीनां साकाङ्क्षत्वमितिनियमभङ्गापत्तेः । तत्र च निर्देशे यथावचनं विग्रह इति भाष्यम् । तथा च प्रमाणानि च प्रमेयं च संशयश्च प्रयोजनं चेति विग्रहं वर्णयन्ति । निर्देशसूत्रे च क्वचिदेकवचनं क्वचिच्च बहुवचनं सप्रयोजनमिति तत्रतत्रैव व्याख्येयम् । केचित्तु प्रथमोपस्थितत्वादेकवचनेनैव प्रमाणं च प्रमेयं चेत्यादिविग्रहमाचरन्ति । प्रमाणाधीना सर्वेषां व्यवस्थितिरिति प्रधानतया प्रथमतः प्रमाणनिर्देशः । जीवात्मपरमात्मनोः प्रमेयत्वेनावधारितयोरेव सत्त्वस्थैर्यादिसिद्धिस्तत्सिद्धौ च जीवात्मनि उत्तरकालं दुःखानुवृत्तिनिवृत्तिकामनया तत्त्वेन तदुभयनिरूपणश्रवणे प्रवृत्तिसम्भवस्तत्त्वं च देहादिव्यतिरिक्तत्वं परमात्मतत्त्वं च जगत्कर्तृत्वादिकमपि एतद्द्वयं साक्षान्मुक्तिहेतुरितरेषां देहादीनां प्रमेयाणां सामान्यविशेषरूपेण तत्त्वावधारणं च देहादिव्यतिरिक्तत्वज्ञानस्य प्रतियोगिज्ञानसापेक्षतया प्रयोजकमिति प्रमाणानन्तरं प्रथमतः प्रमेयनिर्देशः । परार्थस्थले पदार्थव्यवस्थापनस्यानुमानस्य न्यायसाध्यतयाऽवसरतो न्याये निरूपणीये तत्पूर्वाङ्गसंशयस्यादौ निर्देशः । श्रोतव्य इत्यादिश्रुत्या श्रवणानन्तरं मननबोधनात् मन्तव्यश्चोपपत्तिभिरिति बहुवचनेनैकेन हेतुनानुमानानन्तरमन्यहेतुकानुमानज्ञापनात् संशयो नानुमानाङ्गम् । न च तत्रापि आहार्यसंशयाभ्युपगम इति वाच्यम् । मानाभावादिति चेत् । न । श्रोतव्य इत्यादिश्रुतौ श्रवणमननयोर्नानाहेतुकानुमानानां च नैकप्रकारत्वं विवक्षितम् । तेनैकरूपेण शाब्दादौ सत्यपि रूपान्तरेणानुमानात् न संशयानुपपत्तिः । वस्तुतः संशयस्यानुमितावहेतुत्वे ऽपि विचारस्थले मध्यस्थसंशये सत्येव तन्निवृत्तये कः साध्यवानिति तत्प्रश्ने

वादिना न्यायोद्भावनान्न्यायाङ्गत्वं संशयस्येति । एवं शाब्दसिद्धावप्यर्थान्तरतात्पर्यसम्भावनयाऽप्रामाण्यसंशयादर्थसंशयेन निश्चितप्रामाण्यकानेकहेतुकानुमितिः । ततश्च प्रयोजनज्ञानं विना न्यायप्रवृत्तिर्न सम्भवतीत्येककार्यप्रयोजकत्वसङ्गत्या प्रयोजनोद्देशः । सदृष्टान्तोदाहरणस्य न्यायघटकतया तज्ज्ञाने दृष्टान्तज्ञानापेक्षेति तदादौ तन्निरूपणम् । यद्वा दृष्टान्त एव न्यायेन परप्रत्यायनमिति तदादौ तद्विधापनम् । तेनोदाहरणस्य दृष्टान्ताघटितत्वे ऽपि घटितत्वे ऽपि वा तदव्यवहितपूर्वं स्वातन्त्र्येण तन्निरूपणस्यानुपयुक्तत्वे ऽपि न क्षतिः । सिद्धान्तविषयस्यैव न्यायस्य वस्तुसाधकत्वं सिद्धान्तविषयत्वज्ञानं च दृष्टान्तं विना नेति दृष्टान्तानन्तरं न्यायपूर्वं सिद्धान्तकथनम् । ततश्चावसरतो न्यायावयवकथनं तत्र चावयवकथनेनैव न्यायकथनम् । ततश्चैककार्यकारितर्कोपन्यासः । ततस्तत्कार्यतया निर्णयस्य । ततश्च तदनुकूलयोर्वादजल्पयोः । ततो विजयलक्षणैककार्यकारितया वितण्डायाः । एतत्कथात्रयहेतुप्रयोगाङ्गकतया तत्र च वादस्थले विरोधिहेतौ दोषज्ञानं विना स्वहेतुना साध्यसाधनं न भवति जल्पवितण्डयोश्च परकीयहेतौ दोषोद्भावनं विना विजयो न भवतीति वितण्डानन्तरमेककार्यकारितया हेत्वाभासानाम् । ततश्चावसरतः कथाङ्गानां छलजातिनिग्रहस्थानानां निग्रहरूपैककार्यकारिणामुपन्यासः । छलजात्योर्निग्रहस्थानान्तःपातित्वे ऽपि विशेषेण कथनं प्रधानार्थं तथा च प्रमाणत्वादिकं न पदार्थविभाजकं मिथो विरुद्धत्वाभावात् परं तु मोक्षोपयोगिज्ञानविषयतावच्छेदकं पदार्थविभागश्चार्थतोऽवसेयः । कण्ठतः कणादैरुक्तः । इति प्रथमसूत्रव्याख्या ॥ अस्य सूत्रत्वं च

अल्पाक्षरमसन्दिग्धं सारवद् विश्वतो मुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः[१] ॥

इति तल्लक्षणादवसेयम् । एतद्ग्रन्थस्यान्वीक्षिकीन्यायतर्कादिशब्दैर्व्यपदेशश्च योगेन रूढ्या च । तत्र श्रवणादनु पश्चादीक्षा आत्ममननमन्वीक्षा तन्निर्वाहिका आन्वीक्षिकीति योगार्थः । अस्यार्थस्य वेदान्तादिगतत्वे ऽपि अत्र न्यायस्य बलवत्त्वेन प्राचुर्येण च भूरिप्रयोगाद् रूढिकल्पनमिति तथा च न्यायो मीमांसा धर्मशास्त्राणीति श्रुतेः । धर्मशास्त्राणि [२]

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश ॥

इति विष्णुपुराणाच्च । न्यायस्य बलवत्त्वं च सिद्धान्तानुसारित्वम् । तथा च कूर्मपुराणम् ।

श्रुतिसाहाय्यरहितमनुमानं न कुत्रचित् ।
निश्चयात् सादयेदर्थं प्रमाणान्तरमेव च ॥
श्रुतिस्मृतिसहायं तत् प्रमाणान्तरमुत्तमम् ।
प्रमाणपदवीं गच्छेन्नात्र कार्या विचारणा ॥
पूर्वोत्तरविरोधेन कोऽत्रार्थोऽभिमतो भवेत् ।
इत्याद्यमूहनं तर्कः शुष्कतर्कं तु वर्जयेत् ॥ इति ॥

ननु तत्त्वज्ञानस्य कुतो मोक्षहेतुत्वं तत्त्वज्ञानिनामपि मोक्षादर्शनात् । एवं सर्वाण्येव तत्त्वानि ज्ञातानि साक्षात् कारणानि किं वा कानिचित् कारणानि कानिचित् प्रयोजकानि तच्च कारणत्वादि नैयायिकं वाचनिकं वा इत्याकाङ्क्षायामाह ।

(१) अयं श्लोकः पराशरोपपुराणे १८ अध्याये वर्तते ।
(२) धर्मशास्त्राणीति तु सम्पातायातमिति सम्भाव्यते ।

दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्गः[१] ॥ २ ॥

दुःखादीनां मध्ये यदुत्तरोत्तरं तस्यतस्यापाये ऽभावे सति तदनन्तरस्य तत्तत्सन्निहितपूर्वपूर्वस्याभावादपवर्ग इत्यर्थः । अत्र सतिसप्तम्याः पञ्चम्याश्च प्रयोजकत्वं प्रयोज्यत्वं वाऽर्थः । मिथ्याज्ञानादीनां कारणानामभावस्य प्रयोज्यत्वं कार्याणां दोषादीनामभावे स्वरूपसम्बन्धविशेष एव दण्डाभावाद् घटाभाव इतिप्रतीतिसिद्धवदिति । अथ दुःखाभावप्रयोज्यत्वं नापवर्गे तस्य चरमदुःखध्वंसरूपत्वात् । न चाभेद एव पञ्चम्यर्थ इति वाच्यम् । जन्मापायप्रयोज्यस्य दुःखात्यन्ताभावस्य चरमदुःखध्वंसात्मकमोक्षभेदात् न हि जन्मापायप्रयोज्यो दुःखध्वंस इति चेत् । न । तदनन्तरकालदुःखविरहस्य स्वसामानाधिकरण्यस्वसमानकालीनत्वोभयसम्बन्धेन दुःखवदन्यत्ववैशिष्ट्यप्रयोजकतया तादृशविशिष्टदुःखध्वंसरूपमोक्षं प्रत्यपि तस्य प्रयोजकता । अयमभिप्रायः । जीवात्मनो देहादिभिन्नत्वरूपतत्त्वप्रकारेण साक्षात्कारे जाते तेन प्रतिबन्धात् तदात्मदेहाद्यभेदावगाहिज्ञानस्वरूपस्य मिथ्याज्ञानस्य निरासः । न चोत्पन्नतत्त्वज्ञानस्य तद्विरहदशायां मिथ्याज्ञानोत्पत्तौ बाधकाभाव इति वाच्यम् । तादृशतत्त्वज्ञानेन मिथ्याज्ञानजनकीभूतदोषविशेषस्य मिथ्याज्ञानजन्यसंस्कारस्य नाशात् समानविषयकविरोधिज्ञानस्य संस्कारनाशकतायाः क्लृप्तत्वात् । न च तादृशमिथ्याज्ञानजन्यसंस्कार-

(१) तदनन्तरापायादपवर्ग इति विश्वनाथपञ्चाननसम्मतः पाठः । परं निःश्रेयसं तत्त्वज्ञानात् क्रमेण भवति क्रमप्रतिपादनार्थं चेदं सूत्रं दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामित्येवमादीति वार्त्तिकम् ।

रूपवासनाया दोषविशेषतया मिथ्याज्ञानजनकत्वे ऽनवस्थेति वाच्यम्। अनादित्वेन बीजाङ्कुरवत् तद्दोषाभावात्। तथा च तत्त्वज्ञानेन समूलमिथ्याज्ञाने निरस्ते दोषस्य रागद्वेषादेस्तत्कार्यस्यानुत्पत्तिः। रागादिकं प्रति तादृशमिथ्याज्ञानस्य हेतुत्वमन्वयव्यतिरेकाभ्यां ग्राह्यम्। न च तत्त्वज्ञानिनामपि रागादिदर्शनात्। कथं तत्र मिथ्याज्ञानस्य हेतुत्वमिति वाच्यम्। विजातीयरागादिकं प्रत्येव तस्य हेतुत्वात्। अत एव श्रीभगवद्गीतावचनम्। अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तव इति। अज्ञानेन मिथ्याज्ञानेन आवृतं प्रतिरुद्धं ज्ञानं तत्त्वज्ञानं तेनाज्ञानेन मुह्यन्ति च रागादिमन्तश्च भवन्तीत्यर्थः। अन्यत्र च

यदात्मानं विजानीयादहमस्मीति पूरुषः।
किमिच्छन् कस्य कामाय संसारमनुसंसरेत्॥ इति।

न चैतद्वचनाभ्यां तत्त्वज्ञानाभावस्यैव रागादिहेतुत्वं बोध्यत इति वाच्यम्। तत्त्वज्ञानाभावत्वापेक्षया लघुत्वेन मिथ्याज्ञानत्वे रागादिजनकतावच्छेदकत्वावधारणात्। उत्पन्नतत्त्वज्ञानिनामप्यविरलतत्त्वज्ञानधारायां प्रमाणाभावेन तद्विरहदशायां रागाद्युत्पत्तेः। रागाद्यपाये च तत्कार्यप्रवृत्त्यपाय इति। तथा च रागापाये धर्माधर्मजनकप्रवृत्त्यपाय इति धर्माधर्मानुत्पत्त्या प्राक्तनाप्रारब्धादृष्टस्य तत्त्वज्ञानाधीननाशेन प्रारब्धस्य च भोगेनैव क्षयात् कारणस्यादृष्टस्य विरहे जन्मनो विलक्षणशरीरसम्बन्धस्याभावे तदधीनदुःखस्याप्यभावादपवर्ग इति पर्यवसितम्। न च धर्माधर्मयोः सुखदुःखहेत्वोरभावेनैव सुखदुःखानुत्पत्तिसम्भवात् कथं जन्मापाय इत्युक्तमिति वाच्यम्। जन्मान्तरसम्भवे भोगस्यापि सम्भव इति तदर्थं पापपु-

ण्ययोरपि सम्भावना यथा जीवन्मुक्तभोगदर्शनेन प्रारब्धधर्माधर्मकल्पनेतिशङ्कानिरासाय तदुपादानात् । अत एव धर्मनिरासोऽपि धर्मसत्त्वे तदधीनसुखभोगार्थं शरीरसम्बन्धस्वीकारे दुःखप्रसक्तिरपीति । एतेन तत्त्वज्ञानाद्विलक्षणमदृष्टं जन्यते तेन च नित्यसुखसाक्षात्काररूपा मुक्तिर्जन्यत इति भट्टमतमप्यपास्तीकृतम् । तदानीं शरीरविरहेण साक्षात्कारासम्भवात् । न च मुक्तस्य शरीरमपि सम्भवति तदारम्भकपापपुण्ययोरभावात् । न च तत्त्वज्ञानजन्यादृष्टेन शरीरमपि जन्यत इति वाच्यम् । शरीरस्य नित्यत्वासम्भवेन तद्बाधे मुक्तेरपि बाधापत्तेः अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशत इतिश्रुतिबाधापत्तेश्च वावेत्यव्ययमेवार्थे तथा च अशरीरमेव सन्तमित्यर्थः । वावसन्तमिति यङ्लुगन्तं वा । प्रियाप्रिये सुखदुःखे । एतेन नित्यसुखसाक्षात्कारान्यजन्यज्ञानत्वावच्छिन्नं प्रत्येव शरीरस्य हेतुतया मुक्ततादशायां शरीरविरहेऽपि न तदनुपपत्तिः । वस्तुतोऽवच्छिन्नज्ञानत्वावच्छिन्नं प्रति शरीरस्य हेतुत्वान्नानुपपत्तिः नित्यसुखसाक्षात्कारस्यावच्छिन्नत्वविरहेण व्यभिचारानवकाशादिति परास्तम् । तादृशसुखे मानाभावात् । आनन्दं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितमिति श्रुतौ चानन्दपदेन पुंलिङ्गत्वानुपपत्त्या आनन्दपदं सुखवत्परं ब्रह्मपदं जीवपरं रूपपदं स्वरूपपरं मोक्षपदोत्तरसप्तम्या निमित्तत्वमर्थः । तथा च सुखवज्जीवस्वरूपं मोक्षनिमित्तीभूतसाक्षात्कारविषय इति तादृशश्रुतितात्पर्यान्न तद्बलान्नित्यसुखसिद्धिरिति । वस्तुत आनन्दपदं दुःखाभाववत्परमिति मोक्षे मोक्षदशायां प्रतिष्ठितं स्थितं भवतीत्यर्थः । तथा च जीवात्मतत्त्वज्ञानं मिथ्याज्ञाननिवृत्त्यादिद्वारा मोक्षसा-

धनं नैयायिकम्। वाचनिकं च आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्यादिश्रुतेः। इतरपदार्थज्ञानं च साक्षात् परम्परयात्मतत्त्वज्ञानोपयोगीति बोध्यम्। न च तत्त्वज्ञानिनां कर्मदर्शनान्न कथं धर्माधर्मोत्पत्तिरिति वाच्यम्। विजातीयरागादिजन्यकर्मण एवादृष्टजनकत्वात्। न च रागादिकं विनापि नित्यसन्ध्यावन्दनादेरज्ञानादिनाप्यकरणे पापजननात् कथं पापं प्रति रागादेर्हेतुत्वमिति वाच्यम्। पापविशेष एव तस्य हेतुत्वात्। न च तत्त्वज्ञानिनामपि सन्ध्याद्यकरणे न कथं पापोत्पत्तिरिति वाच्यम्। तत्त्वज्ञानपूर्वमेव नित्यकर्माधिकारात्।

तावत् कर्माणि कुर्वीत न निर्विद्येत यावता।
सत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते॥

इत्यादिश्रीभागवतीयभगवद्वचनात्। न च तथापि दैववशसम्पन्नगङ्गाजलसंयोगादिना तत्त्वज्ञानिनां पुण्योत्पत्तिरिति वाच्यम्। तादृशपुण्योत्पादेऽपि तेषां तत्त्वज्ञानादेव क्षयात्। ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन इति भगवद्वचनात्। एवं चादृष्टान्तरोत्पादेऽपि न क्षतिः तेषामपि तत्त्वज्ञानादेव क्षयात्। रागादिजन्यादृष्टानां शरीरारम्भकतावच्छेदकावच्छिन्नतया नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपीत्यादिवचनात् तत्त्वज्ञाननाश्यतया रागादिनिरासेन तेषां निरासात्। यद्वा नीरागस्य दैववशसम्पन्नगङ्गाजलसंयोगादीनां पापनाशकत्वमेव न तु पुण्यजनकत्वमपीति नव्याः। तत्त्वज्ञानिनां दैववशसम्पन्नकर्मजन्यादृष्टानामुत्पादविनाशकल्पने गौरवान्मिथ्याज्ञानजन्यवासनाया एवादृष्टमात्रहेतुत्वं कल्प्यते तद्विरहादेव तत्त्वज्ञानिनां न धर्माधर्मोत्पत्तिः दोषपदेनाप्यत्र सैवोच्यते

ततश्च मिथ्याज्ञानाभावेऽनुत्पादात् प्राक्तनानां तत्त्वज्ञानादेव नाशात् प्रवृत्तिपदं च धर्माधर्मसामान्यपरमित्याहुः । प्रथमप्रकरणमिति[१] । उक्तमिति शेषः । प्रथमपदमभिधेयप्रयोजनपरं प्रकरणं जिज्ञासाधीनवाक्यमधीनत्वं च साक्षात्परम्परासाधारणं तेन द्वितीयादिसूत्रे नाव्याप्तिः तथा च जिज्ञासायां प्रथमपदार्थप्रयोजनाभिधेययोरन्वयात् प्रयोजनाभिधेयजिज्ञासाधीनवाक्यजातमित्यर्थः । समूहत्वं चानेकत्वम् ॥

इति न्यायसूत्रविवरणे प्रयोजनाभिधेयप्रकरणम् ॥

यथोद्दिष्टं क्रमेण लक्षयितुं प्रथमोद्दिष्टप्रमाणानि लक्षयति ।

प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि[२] ॥ ३ ॥

प्रत्यक्षाद्यन्यतमत्वं प्रमाणलक्षणम् । अथ प्रशब्दसमभिव्याहृतमाधातुना तद्वति तत्प्रकारकत्वरूपप्रकर्षविशिष्टानुभवो बोध्यते स्मृतौ तान्त्रिकाणां प्रमाव्यवहाराभावात् ज्ञानवाचिनापि माधातुनाऽनुभवो लक्ष्यते तत्करणं च प्रमाणमिति प्रमाकरणत्वमेव लक्षणम् । प्रत्यक्षेत्यादि विभागपरमिति व्याख्यानं सम्यगिति चेत् । न । कानि प्रमाणानीति जिज्ञासायां प्रमाणानीत्युत्तरासङ्गतेः । प्रमाणानीति बहुवचनं प्रत्यक्षादीनां विजातीयप्रमाकरणताभेदलाभाय । यद्यपि तत्पदार्थभेदेन तद्वति तत्प्रकारकत्वस्याननुगततया प्रमापदस्य नानार्थत्वात् कथं प्रमाणपदेन सकलप्रमाणलाभः तथापि प्रमाणपदेन प्रमापदप्रवृत्तिनिमित्त-

(१) एतद्व्याख्यातृमते इति प्रथमप्रकरणमिति सूत्रपाठग्रन्थे वर्तत इति गम्यते। एवमग्रेऽपि ।

(२) यथोद्दिष्टविभागद्वारेण सूत्रं प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीतीति वार्त्तिकम् ।

त्वेन प्रमात्वानामननुगमात्। शक्तिविशेषसम्बन्धेन प्रमापदवत्करणत्वं वा प्रमाणत्वं तेन प्रमापदप्रवृत्तिनिमित्तस्याप्येकस्यासत्त्वेन तद्रूपेणानुगमाभावे ऽपि न क्षतिः। प्रमाणव्यवहारविषयत्वं वा प्रमाणत्वमिह विवक्षितमिति प्रत्यक्षादिविशेषोपादानात् प्रमाणविभागोऽपि सूचितः॥

तत्र क्रमेण विशेषलक्षणं कर्तुं प्रत्यक्षलक्षणमाह।

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्[1] ॥ ४ ॥

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षमिति प्रत्यक्षसामान्यलक्षणम्। तत्रात्ममनःसंयोगजन्यसुखादिवारणाय ज्ञानमिति। तच्चाव्यभिचारि चेत् प्रत्यक्षप्रमेत्यर्थः। अव्यभिचारित्वं भ्रमसामान्यभिन्नत्वं आंशिकभ्रमस्य लक्ष्यत्वे स्वानुयोगिवृत्तित्वस्वप्रतियोगिनिष्ठस्वावच्छिन्नप्रकारतानिरूपितत्वोभयसम्बन्धेन यत्किञ्चित्सम्बन्धविशिष्टविशेष्यतासंसर्गानवच्छिन्नविषयतान्यतरवत्त्वं संसर्गानवच्छिन्नत्वं तु सांसर्गिकविषयत्वानिरूपितत्वमतः सर्वांशे भ्रमात्मकज्ञानीयमुख्यविशेष्यतामादाय न दोषः। संसर्गानवच्छिन्नेत्यादिकं निर्विकल्पकसाधारण्याय। तच्च प्रमात्मकप्रत्यक्षं द्विविधमव्यपदेश्यमतीन्द्रियं निर्विकल्पकात्मकमव्यभिचारि व्यवसायात्मकं व्यवसायो विशिष्टप्रत्यक्षम्। अत्राव्यभिचारित्वं निरुक्तोभयसम्बन्धेन सम्बन्धविशिष्टविशेष्यतावत्त्वमिति। यद्यपि आत्ममनःसंयोगरूपेन्द्रियार्थसन्निकर्षजन्यत्वाज् जन्यज्ञानमात्रे लक्षणमिदं गतमगतं चेश्वरप्रत्यक्षे। न चात्र ज्ञानपदं साक्षात्करोमीतिप्रतीतिसिद्धसाक्षात्कारत्वरूपजात्यवच्छिन्नपरमिति वाच्यम्। तथा

(१) इन्द्रियार्थसन्निकर्षोत्पन्नमित्यादि सूत्रमिति वार्त्तिकम्।

सति विशेषणदलवैयर्थ्यात् तथापि विषयताप्रत्यासत्त्यवच्छिन्नजन्यत्वस्य विवक्षणात् । ईश्वरप्रत्यक्षं तु न लक्ष्यमिति । ननु इन्द्रियत्वावच्छिन्नजनकतानिरूपितजन्यत्वमेव लक्षणमस्तु किं सन्निकर्षघटनयेति । न चेन्द्रियत्वं न जातिः तेजस्त्वादिना साङ्कर्यात् तथा चानुगतेन्द्रियत्वस्याभावात् कथं तेन हेतुतेति वाच्यम् । शब्देतरोद्भूतविशेषगुणशून्यत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वस्येन्द्रियत्वरूपत्वात् । तत्रात्मादिवारणाय सत्यन्तम् । श्रोत्रसङ्ग्रहाय शब्देतरेति । रूपस्य चक्षुषि सत्त्वादुद्भूतेति । उद्भूतत्वं न जातिः शुक्लत्वादिना सङ्करात् । न च शुक्लत्वादिव्याप्यं नानैवोद्भूतत्वमिति वाच्यम् । उद्भूतरूपत्वादिना चाक्षुषादिजनकत्वानुपपत्तेः । किं तु शुक्लत्वादिव्याप्यमनुद्भूतत्वं नाना तदभावकूटश्चोद्भूतत्वं तच्च संयोगादावपि संयोगादिश्चक्षुरादावस्तीति विशेषेति । कालादिवारणाय विशेष्यदलं कालादे रूपाद्यभावप्रत्यक्षे सन्निकर्षघटकचक्षुःसंयोगाश्रयस्य कालादेर्वारणाय मनःपदं ज्ञानकारणदलं चेति चेत् । न । एवमिन्द्रियत्वस्यानुगतत्वे ऽपि तेन प्रत्यक्षहेतुतायाः सर्ववादिसिद्धत्वाभावादिन्द्रियत्वेन हेतुत्वमते ऽपि तद्धेतुतायाः सन्निकर्षद्वारैवेति सूचनाय सन्निकर्षजन्यत्वघटितं लक्षणमादृतमिति । न च प्रमाणप्रस्तावे प्रमालक्षणमर्थान्तरग्रस्तमिति वाच्यम् । प्रत्यक्षप्रमालक्षणे कृते तत्करणत्वस्य प्रत्यक्षप्रमाणलक्षणस्य स्फुटत्वेन तात्पर्यात् । अथवा इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं यत इत्यध्याहारेणैव तादृशार्थलाभात् । वस्तुतः प्रत्यक्षानुमानेत्यादिप्रमाणलक्षणे प्रत्यक्षपदं प्रत्यक्षप्रमाकरणपरं तत्र प्रत्यक्षप्रमायां निरूपितायां तत्करणत्वस्य सुग्रहत्वात् सैव निरूपिता प्रत्यक्षपदस्य अक्षमिन्द्रियं प्रति जातमिति

व्युत्पत्त्या प्रमापरत्वे ऽपि लक्षणया प्रमाणबोधकत्वादायुर्घृतमितिवत् । अथ तथापि सन्निकर्षत्वस्याननुगतत्वेन संयोगादिभेदेन लौकिकसन्निकर्षाणामलौकिकसन्निकर्षाणां ज्ञानलक्षणादीनां चानुगतानतिप्रसक्तधर्मस्य दुर्वचत्वादन्यतमत्वादिनानुगमसम्भवे ऽपि गौरवम् । एवमिन्द्रियत्वमेव प्रत्यक्षप्रमाणलक्षणमस्तु कृतमधिकेनेति तथापि प्रमाणान्तरतानियामकं प्रमावैजात्यमिति सूचनाय प्रत्यक्षप्रमाकरणत्वमेव तत्प्रमाणलक्षणं प्रागेवाभिहितमिदानीं प्रसङ्गतः प्रमालक्षणमिन्द्रियत्वावच्छिन्नजन्यत्वरूपमिति तत्र तादृशजन्यताविशेषलाभायैव सन्निकर्षपदम् । साक्षात्कारत्वस्य लक्षणत्वसम्भवे ऽपि तस्य लक्षणान्तरत्वादिन्द्रियाणां प्रमाणस्वरूपताज्ञापनायैव प्रमाणतैक्यज्ञापनाय वा गुर्वपि तथा लक्षणं प्रदर्शितमिति भावः । केचित्तु इन्द्रियार्थसन्निकर्षेत्यनेन ज्ञानाकरणकं ज्ञानं प्रत्यक्षमित्यर्थो विवक्षणीयः । न च विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षविशेषे ऽव्याप्तिस्तस्य विशेषणतावच्छेदकात्मकविशेषणज्ञानजन्यविशेषणतावच्छेदकप्रकारकविशेषणज्ञानजन्यत्वेन ज्ञानकरणकत्वादिति वाच्यम् । ज्ञानाकरणकज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वस्यैव लक्षणत्वेन विवक्षणीयत्वात् तथा च तादृशप्रत्यक्षत्वमादाय सर्वत्र लक्षणगमणादिति प्राहुः । सविकल्पकमपि द्विविधं संस्कारोद्भवतदनुद्भवभेदादित्याह । संस्कारोद्भवा प्रत्यभिज्ञा [1] ॥

अनुमानं लक्षयति विभजते च ।

अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववत् शेषवत् सामान्यतो दृष्टं च [2] ॥ ५ ॥

(१) एतन्मते इदमपि सूत्रम् । क्वचित् सूत्रपाठपुस्तके ऽपीदं वर्तते ।

(२) प्रत्यक्षलक्षणानन्तरमनुमानलक्षणपरं सूत्रं पठति । अथ तत्पूर्वकं त्रिविधमनुमानमितीति तात्पर्यटीका ।

अथशब्द आनन्तर्यार्थः । तेन प्रत्यक्षनिरूपणस्यानुमाननिरूपणहेतुत्वं लभ्यत इति प्रत्यक्षमादौ निरूपितमिति सूचितम् । प्रत्यक्षपूर्वकत्वेनानुमाननिरूपणे प्रत्यक्षज्ञानस्य विशेषणज्ञानमुद्रयाऽपेक्षितत्वात् । अत्र तत्पदं प्रत्यक्षप्रमाणपरम् । पूर्वपदं कारणवाचि । अनुमानमनुमितिकरणम् । प्रत्यक्षजन्यत्वेन निरूपणं च ज्ञायमानलिङ्गस्य करणतानिराकरणाय । इतरभेदानुमापकं त्वनुमितिकरणत्वमात्रम् । प्रत्यक्षजन्यत्वं च प्रत्यक्षमात्रवृत्तिधर्मावच्छिन्नकारणताप्रतियोगिककार्यत्वं तेन कालविधया प्रत्यक्षजन्यतामादाय धूमादिहेतूनामपि तज्जन्यतया न लिङ्गकरणतावादिमतानिरासः । न वा शाब्दात्मकव्याप्तिज्ञानासङ्ग्रहः तत्रापि मनस्त्वावच्छिन्नजनकताप्रतियोगिकजन्यतासत्त्वात् । वस्तुतस्तु उपायाभावाद् व्याप्तिनिश्चय एव न सम्भवति कुतस्तस्य प्रामाण्यमिति चार्वाकशङ्कानिराकरणाय तत्पूर्वकत्वेन निरूपणम् । त्रैविध्यमाह । पूर्ववदित्यादि । पूर्वं कारणं तद्वद् व्याप्यं यत्र तद्विषयकं ज्ञानं यथा चिकीर्षादिना प्रवृत्त्यनुमानम् । शेषः कार्यं तद्वद् व्याप्यतया तद्विषयकं ज्ञानं यथा धूमादिना वह्न्यनुमानम् । समान्यतो दृष्टं कार्यकारणभिन्नलिङ्गविषयकं व्याप्तिज्ञानं यथा पृथिवीत्वादिना द्रव्यत्वानुमानम् । अथवा दृष्टमित्यस्य सर्वत्रान्वयः तथा च पूर्ववद् दृष्टमन्वयसहचारेण दृष्टमन्वयसहचारमात्रजन्यव्याप्तिज्ञानं केवलान्वय्यनुमानमित्यर्थः । शेषवद् दृष्टं व्यतिरेकसहचारमात्रजन्यव्याप्तिज्ञानं केवलव्यतिरेकीत्यर्थः । सामान्यतो दृष्टं तदुभयसहचारग्रहजन्यं व्याप्तिज्ञानमन्वयव्यतिरेकीत्यर्थः । केचित्तु तत्पूर्वकमित्यत्र तत्पदं सहचारप्रत्यक्षपरं तत्र प्रत्यक्षत्वमिन्द्रियजन्यज्ञान-

त्वं तथा च सहचारविषयकेन्द्रियजन्यज्ञानजन्यमनुमानमित्यर्थ इत्याहुः। अन्ये तु तत्पदं प्रत्यक्षविशेषपरामर्शकं विशेषत्वं च व्याप्तिपक्षधर्मताविषयकत्वं तेन व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमनुमानं चानुमितिरिति प्रमालक्षणं यत इत्यध्याहारेण च करणमवसेयम्॥

क्रमप्राप्तमुपमानं निरूपयति।

प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्[1]॥ ६॥

प्रसिद्धस्य पूर्वप्रमितस्य गवादेः साधर्म्यात् सादृश्यात् तज्ज्ञानात् साध्यस्य गवयादिपदवाच्यत्वस्य साधनं सिद्धिकरणं यत् सादृश्यज्ञानं तदुपमानं सिद्धिश्चोपमितिः। अथवा प्रसिद्धात् गवयादौ ज्ञातात् साधर्म्यात् गवादिसादृश्यात् साध्यसाधनमित्यर्थः। ननु सादृश्यज्ञानमुपमानमित्येवकथं नोक्तमिति चेत् तत्फलस्यानुमानभिन्नस्योपमितिरूपस्य प्रदर्शनाय तथाभिधानात्। तत्प्रदर्शनं च कणादादीनामनुमानान्तर्गतत्वमेव मतं तन्निराकरणाय। तथाहि केनचिद् ग्रामीणेन कीदृग्गवय इति प्रश्ने कृते गोसदृशो गवयपदवाच्य इत्यारण्यकेन केनचिदुत्तरिते ततो ग्रामीणोऽरण्ये कदाचिद् गवयदर्शनेनायं गवयो गोसदृश इति निश्चित्य गवयो गवयपदवाच्य इत्यवधारयति। तादृशावधारणं हि न प्रत्यक्षं गवयपदवाच्यत्वस्य चक्षुराद्ययोग्यत्वात्। नापि शाब्दः शब्दादेरभावात्। नाप्यनुमितिः व्याप्यतया लिङ्गानुपस्थितेः तथानुव्यवसायाभावाच्च। तथा चातिरिक्तप्रमासिद्धौ तत्करणमप्यतिरिक्तमिति सिद्धमुपमानं प्रमाणान्तरम्। तत्र च सादृश्यज्ञानं करणं

(१) अथोपमानम्। प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानमिति। सूत्रार्थः पूर्वंघटित वार्त्तिकम्। अथोपमानमिति भाष्यम्। सूत्रं पठति। प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानमिति तात्पर्यटीकाकृता सूत्रभाष्यविभागः कृतः।

व्याख्यातचरं चेदमिति। अत्र जातीनां विभागोद्देशसूत्रम् । साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणाहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमा इति। द्वन्द्वात् परः श्रूयमाणः प्रत्येकमभिसम्बध्यत इति समशब्दस्य सर्वैः साधर्म्यादिभिः सम्बन्धः । सर्वसम्बन्धार्थमेव निग्रहस्थानवत् परस्परानपेक्षा अपि जातयः समासेनोद्दिश्यन्ते प्रत्येकावृत्तौ गौरवप्रसङ्गादिति ॥ १ ॥

अथ प्रतिधर्मसमाया जातेर्लक्षणमाह ।

अनभ्युपेतयुक्ताङ्गात् प्रमाणात् प्रतिरोधतः ।
प्रत्यवस्थानमाचख्युः प्रतिधर्मसमं बुधाः ॥ २ ॥

विभागोद्देशसूत्रम् न तु लक्षणैकपरमिति भावः । सर्वास्वपि जातिषु समशब्दं प्रयुञ्जानस्येति पूर्वोक्तमर्थं समर्थयति (?) । द्वन्द्वात्पर इति । जातिनिग्रहस्थानभेदानां पौर्वापर्यं नैवापेक्षिकं न तु पूर्वापरार्थसम्बन्धाधीनमित्याह । सर्वसम्बन्धार्थमेवेति । परस्परापेक्षा न प्रमाणप्रमेयादिभेदानामिति पूर्वलक्षणसापेक्षा इत्यर्थः (?) । तर्हि साधर्म्यवैधर्म्यसमप्रतिजातिशब्दान् किं न प्रयुङ्क्त इत्यत्राह । प्रत्येकावृत्ताविति ॥ १ ॥

उदयनेन प्रथमजातिद्वयस्यैका सञ्ज्ञा नैमित्तिककृता तां स्मारयति । अथ प्रतिधर्मसमाया इति ।

अनभ्युपेतयुक्ताङ्गादिति प्रकरणसमाख्यहेत्वाभा-

येन केनचित्प्रमाणेन वादिना साध्योपसंहारे कृते अनभ्युपेतयुक्ताङ्गेन प्रतिप्रमाणेन प्रतिरोधतः प्रत्यवस्थानं प्रतिधर्मसमः। अत्रावश्याभ्युपगन्तव्यानां तत्प्रमाणाङ्गानां वास्तवसद्भावाभावे ऽपि सद्भावाभिमानमात्रमपि नास्ति तेन सदुत्तरप्रकरणसमाद् व्यवच्छेदसिद्धिः तत्र सद्भावाभिमानस्य विद्यमानत्वात्। प्रकरणसमाया जातेर्व्यवच्छेदायोक्तं प्रतिरोधत इति। तत्र बाधेन प्रत्यवस्थानस्य वक्ष्यमाणत्वादिति ॥ २ ॥

ननु महतीयमपूर्वा प्रक्रिया यत् सूत्रकारादिभिरनुद्दिष्टामलक्षितां च प्रतिधर्मसमाभिधानां जातिं भवन्तो लक्षयन्तीत्यत आह ॥

साधर्म्यवैधर्म्यसमौ तद्भेदावेव सूत्रितौ।

सूत्रकारस्यापि प्रथमतः साधर्म्यवैधर्म्यसमावुद्देशपूर्वं लक्षयतस्तद्द्वारा प्रतिधर्मसमायामेव तात्पर्यम्। तयोस्तदवान्तरभेदत्वादिति किमर्थं तर्हि मुख्यमेव प्रतिधर्मसममुपेक्ष्यावान्तरभेदोपादानमिति

सव्युदासः प्रमाणादिति प्रत्यक्षादेः सर्वस्मात् प्रमाणादियं जातिः प्रवर्तत इति दर्शितं भवति। प्रतिरोधत इति प्रकरणसमाख्यजातेर्व्यवच्छेदः। स साध्यस्योपसंहारे प्रथममेव प्रतिपाद्यते। उद्देशपूर्वं लक्षयतः सामान्यविशेषसूत्राभ्यामशेषलक्षणं च कुर्वतः ते च उत्कर्षापकर्षसमादीनामवान्तरभेदाश्च स्वयमेवेति भाष्यवार्त्तिकादिषु कृतश्रमैः शिष्यैर्ज्ञातव्या इत्यर्थः ॥ २ ॥

चेत् तत्राह ।

अवान्तरभिदाः सन्ति सर्वत्रेति प्रसिद्धये ॥ ३ ॥

सर्वास्वपि जातिषु बहवोऽवान्तरभेदाः सन्ति । यथा तावत् प्रतिधर्मसमायां साधर्म्यवैधर्म्यसमौ ते च स्वयमेवोहनीया इति प्रदर्शनार्थमवान्तरभेदोपादानमिति ॥ ३ ॥

अवान्तरभेदत्वानङ्गीकारेण तयोः स्वतन्त्रजातित्वाभ्युपगमे ऽनिष्टप्रसङ्गमाह ।

तौ चेत् स्वतन्त्राभिमतौ प्रत्यक्षादेः प्रमाणतः ।
एवंविधः प्रसङ्गः स्याज्जातित्वेन न सूत्रितः ॥ ४ ॥

तदा ह्यनङ्गीकृतयुक्ताङ्गेन प्रत्यक्षादिना प्रमाणेन प्रतिरोधतः प्रत्यवस्थानस्य जात्यन्तरानन्तर्भावादजातित्वं स्यात् । तच्चायुक्तम् असदुत्तरत्वात् छलाद्यनन्तर्भावाच्चेति । अत्र सूत्रम् । साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्ययोपपत्तेः साधर्म्यवैधर्म्यसमाविति । तदिति साध्यपरामर्शः । उपसंहारकर्मतया

तदा ह्यनङ्गीकृतेति । यदानुमानाभाससाधर्म्यवैधर्म्याभ्यामेव प्रत्यवस्थानमिमे अजाती स्यातां तदा ह्येवं सति समापन्नमिति भावः । जात्युत्तरानन्तरभावात् साधर्म्यादिचतुर्विंशतिजातीनां एवंविधप्रसङ्गस्य च लक्षणैकभावादित्यर्थः । कथमप्रस्तुतस्य तच्छब्देन परामर्श इत्यत्राह । उपसंहारकर्मतयेति । उपसंहारः समर्थनं तत्कर्मतया समर्थनीयत्वेन । सामान्यलक्षणसूत्रात् साधर्म्यवैधर्म्याभ्यां

प्रकृतत्वात्। उपपत्तेरिति तादर्थ्ये षष्ठी। साधर्म्यवैधर्म्याभ्यामित्यावर्तनीयम्। सामान्यलक्षणसूत्रात् प्रत्यवस्थानपदमनुवर्तनीयम्। लक्ष्यलक्षणपदानां यथासङ्ख्येन सम्बन्धः। स्वपक्षसाधनपरपक्षप्रतिषेधाभ्यां द्विभागेन प्रत्यवस्थाने प्रतिषेधभागेन जातित्वमिति सूचयितुं पुल्लिङ्गनिर्देशः। सामान्यलक्षणेनैव सदुत्तरप्रकरणसमत्वोद्भावनव्यवच्छेदः ततश्चायमर्थः सम्पद्यते साधर्म्येण वैधर्म्येण द्वाभ्यां वा साध्योपसंहारे वादिना कृते साध्यधर्मविपर्ययधर्मसिद्ध्यर्थमनङ्गीकृतयुक्ताङ्गेन साधर्म्येण प्रत्यवस्थानं साधर्म्यसमः। तथोपसंहारे तथाविधेन वैधर्म्येण प्रत्यवस्थानं वैधर्म्यसम इति। यथा अनित्यः शब्दः कृतकत्वात् घटवदित्युपसंहारे नैतदेवमस्ति ह्याकाशेनापि साधर्म्यममूर्तत्वं तद्वन्नित्यः किं न स्यात् न चेदेवमनित्योपि न स्यादविशेषादिति साधर्म्यसमः। तस्मिन्नेवोपसंहारे

प्रत्यवस्थानं जातिरित्यस्माल्लक्षणपदानां लक्ष्यपदयोर्लक्षणपदयोश्च पुल्लिङ्गनिर्देशः समाहृत्योक्तिः। सामान्यलक्षणेन दूषणासक्तं स्वव्याघातकं चोत्तरं जातिः अनेन सह उत्तरेति हेत्वाभासरूपप्रकरणसमस्य दूषणाशक्तताद्यभावात् तेन तद्व्यवच्छेद इत्यर्थः। तन्नश्च सूत्राङ्गानामेव संविधानसद्भावात् तथाविधेनाङ्गीकृतयुक्ताङ्गेन साधर्म्येणैव चेति नियमः। प्रत्यवस्थानेन तु साधन इत्याह। तस्मिन्नेवेति। प्रत्येकं च द्रष्टव्यम्। वैधर्म्येणोपसंहारे कृते साध-

घटवैधर्म्याच्छ्रावणत्वान्नित्यः किं न स्यात् इति वैधर्म्यसमः । एवं वैधर्म्येण द्वाभ्यां चोपसंहारे साधर्म्येण च प्रत्यवस्थानं प्रत्येकं च द्रष्टव्यम् । तथा प्रत्येकं समुच्चिताभ्यां चोपसंहारे समुच्चिताभ्यां साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं चोदाहर्तव्यम् । अनुमानेन साध्योपसंहारे प्रत्यक्षेणापि प्रत्यवतिष्ठते । यथा पूर्वस्मिन्नेव प्रयोगे स एवायं गकार इति प्रत्यभिज्ञाप्रत्यक्षेण नित्यः किं न स्यात् प्रमाणत्वाविशेषादिति । तथा शब्दोपमानाभ्यां प्रत्यवस्थानमुदाहर्तव्यम् । सर्वासामपि जातीनां सप्ताङ्गानि वक्ष्यति । अत्र

र्म्येण प्रत्यवस्थानं साधर्म्यसमः । वैधर्म्येण प्रत्यवस्थानं वैधर्म्यसमः द्वाभ्यां साधर्म्यवैधर्म्याभ्यामुपसंहारे साधर्म्येण प्रत्यवस्थानं साधर्म्यसमः वैधर्म्येण प्रत्यवस्थानं वैधर्म्यसमः इति प्रस्तुतम् । शब्दानित्यत्वानुमाने ऽन्यथोदाहर्तव्यमित्यर्थः । अथ प्रतिधर्मसमयोर्विशेषान्तरसमामाह । तथा प्रत्येकमिति । साधर्म्येण वा वैधर्म्येण वा उभाभ्यां वोपसंहारे कृते उभाभ्यां प्रत्यवस्थानं चोक्तोदाहरणे साधर्म्यवैधर्म्यसमाख्य एकः प्रतिधर्मसमविशेषो द्रष्टव्य इत्यर्थः । तथा शब्दोपमानाभ्यामिति । शब्दानित्यत्वानुमाने प्रयुक्ते नाचिकेतमुपाख्यानं मृत्युप्रोक्तं सनातनमित्याद्यागमादनित्यः किं न स्यात् । तथा तस्मिन्नेव प्रयोगे अनेन सदृशः पूर्वं तेनोक्तः शब्द इत्युपमानेन नित्यः किं न स्यादित्यादिप्रत्यवस्थानमूहनीयमित्यर्थः । प्रत्यक्षादिना प्रत्यवस्थानस्य प्रतिधर्मसम इत्येव सञ्ज्ञा द्रव्याविषयवृत्तित्वं

प्रतिधर्मसमो लक्ष्यः अनभ्युपेतयुक्ताङ्गेन प्रमाणेन प्रतिरोधतः प्रत्यवस्थानमिति लक्षणं युक्ताङ्गहीनप्रतिप्रमाणोपलम्भ उत्थानबीजं सत्प्रतिपक्षत्वमारोप्यम् तद्भ्रान्तिः फलम् प्रमादः प्रतिभाक्षयश्चावसरः सर्वत्रेति वक्ष्यति। दुष्टत्वमूलं तु द्विविधं साधारणमसाधारणं चेति। तत्र साधारणं स्वव्याघातत्वम्। असाधारणं तु त्रिविधम्। युक्ताङ्गहीनत्वमविषयवृत्तित्वं चेति। अत्र साधारणं तावन्नेदं स्वसाध्यसाधकम् अनङ्गीकृतयुक्ताङ्गेन प्रमाणेन प्रतिरुद्धत्वादिति हि जात्यात्मकः प्रतिषेधः। स च स्वात्मानमपि व्याहन्ति नेदं दूष्यदूषकं तथाविधप्रतिप्रमाणप्रतिरुद्धत्वादिति। असाधारणं तु युक्ताङ्गहीनत्वं युक्तं व्याप्त्यादङ्गमनपेक्ष्य प्रवृत्तत्वादिति। तत्र सूत्रं गोत्वाद्गोसिद्धिवत् तत्सिद्धिरिति। यथा व्याप्तात् तद्गोत्वादेव गोव्यवहारसिद्धिः नाव्याप्तात् पशुत्वादेः तथा व्याप्तादेव कृतकत्वादिहेतोः साध्यसिद्धिर्नाव्याप्तादमूर्तत्वादेरिति यु-

---

हीनार्थकाङ्गभावे सत्यदूष्ये दूषणाभिधानमङ्गीकृत्य युक्ताङ्गं यथा व्याप्तादिति। अयं पिण्डो गौरिति व्यवहर्तव्यः गोत्वात् व्यतिरेकेणाश्ववदिति। अत्र गोव्यवहाराख्यसाध्येनाविनाभूतत्वात् गोत्वादिति हेतोर्यथा साध्यसिद्धेर्यथा च साध्यव्यभिचारिणः पशुत्वादिति हेतोर्न गोव्यवहारसिद्धिरेवमित्यर्थः। नाव्याप्तादिति। अमूर्तत्वा-

क्वाङ्क्षहानिप्रदर्शनं सूत्रार्थः ॥ ४ ॥

कस्याप्यनिष्टधर्मस्य वादिसाधनशक्तितः ।
दृष्टान्तात् पक्ष उत्कर्ष उत्कर्षसम उच्यते ॥ ५ ॥

दृष्टान्तधर्मिणि दृष्टस्य पक्षे चाविद्यमानस्य धर्मस्य वादिनिर्दिष्टसाधनसाहचर्यमात्रेण साध्यधर्मस्येव दृष्टान्तात् पक्षे समुत्कर्षेण प्रत्यवस्थानमुत्कर्षसमः । अविशेषसमातो भेदप्रदर्शनायोक्तं वादिसाधनशक्तित इति । तत्र हि सत्त्वादिना हेत्वन्तरेणोत्कर्षं वक्ष्यति । सद्भावोपपत्तेरिति । उदाहरणं तु अनित्यः शब्दः कृतकत्वाद् घटवदिति प्रयोगे अनित्यत्वेनेव मूर्तत्वेनापि सहचरितं कृतकत्वं घटादावुपलब्धं शब्देऽपि मूर्तत्वं साधयेत् । न चेदेवमनित्यत्वमपि न साधयेदविशेषात् । तथा क्षित्यादिकं सकर्तृकं कार्यत्वात् घटवदिति प्रयोगे कार्यं कर्तृमत्त्वेनेव किंचिज्ज्ञशरीरिकर्तृमत्वेनापि सहचरितं घटादावुपलब्धमिति क्षित्यादावपि तथाविधमेव कर्तारं साधयदभिमतसर्वज्ञाशरीरिकर्तृत्वं विरुणद्धीति विशेषवि-

---

दिहेतोर्गुणकर्मादौ नित्यत्वव्यभिचारेण तस्मात् तत्सिद्धिरित्यर्थः ॥ ४ ॥

वादिसाधनशक्तितः वाद्युक्तहेतुबलात् उदाहरणान्तरापदेशव्याजेनेश्वरानुमानं प्रति मीमांसकादीनाम् ।

एवंरूपवचनमेतज्जात्युत्तरमित्याह । क्षित्यादिकमि-

रुद्धो हेतुरिति । कः पुनरस्योत्थानहेतुः पक्षे ऽविद्यमानस्य दृष्टान्ते वादिहेतुसहचरितस्य धर्मस्योपलम्भः विशेषविरुद्धत्वमारोप्यं तद्भ्रान्तिः फलम् साधारणादुष्टत्वमूलं तु नेदं स्वसाध्यसाधकं विरुद्धत्वान्नित्यत्वसाधनकृतकत्ववदिति । प्रतिषेधहेतोरपि विशेषविरुद्धत्वं नित्यत्वसाधनकृतकत्वे नित्यत्वासाधकत्वं दृष्टमिति साधकत्वमिव नित्यत्वासाधकत्वमपि साधयेदित्यभिमतमनित्यत्वासाधकत्वं विरुणद्धीति । असाधारणं तु युक्ताङ्गहीनत्वं कार्यत्वादेः कर्तृमत्त्वादिनेव

ति । अभिमतं न्यायवाद्यभिमतम् । विरुणद्धीति । तेनाव्याप्तत्वात् तं प्रतिक्षिपति । सर्वत्र तज्जातिविशेषा लक्ष्यः तत्तद्विशेषसूत्रोक्तं लक्षणं प्रमादः प्रतिभाहानिर्वावसर इत्येतत्त्रयमुक्तप्रायमिति । तस्याङ्गान्तराण्याह । पक्षे ऽविद्यमानस्येत्यादिना । तद्भ्रान्तिः फलं विशेषविरोधः आयातं ततोऽङ्गं पराजित इति वादि भ्रमो जातिवादिनः फलमित्यर्थः । साधारणदुष्टत्वमूलं स्वव्याघातकत्वं नेदं स्वसाध्यसाधकमिति वादिसाधनसाहचर्यमात्रेण दिष्टं तत्पक्षेऽनिष्टधर्मप्रसञ्जनं ह्युत्कर्षसमः स जात्युत्तरेऽप्यस्ति कथं नित्यत्वसाधककृतकत्वरूपे दृष्टान्तविरुद्धत्वानित्यत्वसाधकमस्ति तदसाधकत्वं जातिवादिनो विरुद्धत्वात् इति हेतोः पक्षभूते वादिसाधने व्यापनं ततश्च नित्यत्वासाधकत्वं जातिवाद्यभिहितमनित्यत्वादिति हेतोः कर्तृमत्त्वानित्यत्वादिनेव किञ्चित् शरीरिकर्तृमत्त्वमूर्तत्वादिना

शरीरादिनापि व्याप्त्यभावात् सत्यां तु व्याप्ताविष्टापादनादिति ॥ ५ ॥

व्यावृत्ते व्यापकाभासे
पक्षतो लिङ्गसाध्ययोः ।
आकर्षोऽन्यतरस्य स्या-
दपकर्षसमः स्फुटः ॥ ६ ॥

दृष्टान्ते साध्यस्य हेतोर्वा व्यापकत्वेन कञ्चिद्धर्ममारोप्य पक्षे तन्निवृत्ते व्यापकाभावाद्व्याप्याभाव इति साध्यस्य हेतोर्वा पक्षादपकर्षणमपकर्षसमः यथा पूर्वयोरेव प्रयोगयोर्दृष्टान्ते घटे कृतकत्वस्य वा अनित्यत्वस्य वा व्यापकं मूर्तत्वं तच्च शब्दाद्व्यावृत्तमिति तयोरन्यतरस्य निवृत्तिः घटादौ कर्तृमत्त्वस्य कार्यत्वस्य वा व्यापकं शरीरित्वम् तच्च क्षित्यादेर्निवृत्तमिति तयोरन्यतरस्य वा निवृत्तिरिति । उत्थानहे-

---

व्याप्तिर्नास्ति कार्यस्य शरीरस्य कर्तृकत्वाभावात् कृतकस्य कर्मणो मूर्तत्वाभावाच्च ॥ ५ ॥

अथ तेषामपि शरीरकर्तृकत्वमूर्तत्वसद्भावे जातिवाक्यस्य सिद्धसाधकत्वात् युक्ताङ्गहानिरित्यर्थः । अपकर्षणमपकर्षेण प्रत्यवस्थानं प्रथमं शब्दनित्यत्वानुमाने अपकर्षसमं दर्शयति । घटादौ कर्तृमत्त्वस्येति । साध्यपक्ष इति प्रबलप्रमाणबुद्ध्या साध्यापकर्षाभिधाने बाधितविषयत्वं प्रतिप्रमाणबुद्ध्या चेत् सत्प्रतिपक्षत्वमिति विभागः हेत्वपकर्ष इति विभागः हेत्वपकर्ष इति यया कयाचिद्बुद्ध्या हेत्वपकर्षे सिद्धत्वमारोप्य उत्कर्षसमवदिति । नेदं स्वसा-

तुस्तु दृष्टान्ते साध्यहेत्वोर्व्यापकाभिमतस्य धर्मस्य पक्षे निवृत्त्युपलम्भः । साध्यापकर्षे बाधितविषयत्वं सत्प्रतिपक्षत्वं वा आरोप्यम् । हेत्वपकर्षे त्वसिद्धत्वं तदाभासेयं साधारणमसाधारणं च दुष्टत्वमूलमुत्कर्षसमावदूहनीयमिति ॥ ६ ॥

हेतोस्तु यादृशं रूपं पक्षमात्रे विवक्षितम् ।
तद्रूपहेतुमान् साध्यः सपक्षोऽप्यन्यथा पुनः ॥ ७॥
भवेत् साधनवैकल्यमिति वर्ण्यसमोदयः ।

पक्षवर्तिनो हेतोरसिद्धार्थत्वादीनि रूपाणि विवक्षितानि सपक्षवर्तिनस्तु सिद्धार्थत्वादीनि । तानि पञ्चरूपाणि च रूपाणि वक्ष्यति । तत्र सपक्षविवक्षितरूपवद्धेतुमत्तया सिद्धस्य दृष्टान्तस्य पक्षमात्रविवक्षि-

ध्यसाधकं बाधितविषयत्वात् सत्प्रतिपक्षत्वादसिद्धत्वाद्वेति जातिवाद्युक्तहेतवोऽपि न साध्यसाधका भवितुमर्हन्ति । प्रत्येकं तथाविधबाधादियुक्तत्वादित्याद्यूहनीयम् । तथा व्यापकव्याप्य इत्यत्रापि न तु व्यापकाभासाभावादिति व्याप्त्याद्ययुक्ताङ्गहीनत्वं चोहनीयमित्यर्थः ॥ ६ ॥

अथौचित्यादनवसरे ऽप्युत्थानबीजमाह । तत्र सपक्षविवक्षितेति । असिद्धार्थहेतुमान् उभयसाध्यसिद्धसाध्यधर्मसहितहेतुयुक्तः । एवं रूपान्तरेष्वतिप्रवृत्तसाध्यज्ञापनशक्तिमत्त्वादिवक्ष्यमाणरूपचतुष्टययुक्तो हेतुः सपक्षे विद्यते वा न वा । आद्ये पक्षवत्पक्षोऽपि साध्यधर्मवत्तया वर्ण्यः स्यादु द्वितीये तथाविधहेतुमत्तया सपक्षः साध्यः स्यात् । अन्यथा साध्यसाधनवैकल्ययोरन्यतरप्रस-

तद्रूपवद्धेतुमत्त्वेनासिद्धिः कारणं वर्ण्यसमायाः । तत-श्चेयमेवं प्रवर्तते किं पक्षवदसिद्धार्थहेतुमान् सपक्षः सिद्धार्थहेतुमान् वा पूर्वत्र सपक्षे ऽपि साध्यधर्मवत्तया वर्ण्यः साध्यः स्यादित्यर्थः । अन्यथा साध्यधर्मस्यासिद्धत्वसाध्यविकलो दृष्टान्तः स्यात् उत्तरत्र पक्षविवक्षितहेतुमत्तया दृष्टान्तः साध्यः स्यात् । अन्यथा तादृशस्य हेतोरभावात् साधनविकलः स्यादिति । एवं रूपान्तरेषु च त्रिष्वपि प्रवृत्तिकारः स्वयमेव बोद्धव्यः। साध्यसाधनवैकल्ये दृष्टान्तस्यारोप्ये । अतिपीडायां हेतोर्विरुद्धत्वासाधारणत्वदुष्टत्वे मूलं तु यथोक्तवर्ण्यत्वप्रतिषेधहेतावपि सुवचत्वात् त्वव्याघातः । अविषयवर्तित्वं च पक्षवर्तिहेतुरूपाणां सपक्षवर्तिन्यपि सञ्चारणात् । अयुक्ताङ्गाधिकत्वं वा सपक्षवर्तिनो हेतोर्न युक्तानामेवासिद्धार्थत्वादयुक्ताङ्गानामुररीकरणादिति ॥ ७ ॥ ऽऽ ॥

ङ्गादिति बोद्धव्यमित्यर्थः । अतिपीड़ायां हेत्वाभासपर्यन्तचिन्तायां विरुद्धत्वासाधारणत्वसाध्यविकलः सपक्षो विपक्ष इति तत्रापि वर्तमानो हेतुः पक्षविपक्षयोरेव वर्तत इति विरुद्धः । साध्यधर्मवति सपक्षेऽप्यवर्तमानो हेतुः पक्षमात्रवृत्तिरसाधारणो भवत्यतस्तदुभयमारोप्यमित्यर्थः । यथोक्तवर्ण्यत्वस्येति । नेदं स्वसाध्यसाधकं विरुद्धत्वादसाधारणत्वाद्प्रतिषेधहेतोः अविपक्षविवक्षितरूपाणां सपक्षसत्त्वमसत्त्वं विकल्प्य उभयथापि वर्ण्यत्वस्य सुवचत्वादित्यर्थः ॥ ७ ॥ ऽऽ ॥

सपक्षवर्तिनो हेतोर्याद्रूपं विवक्षितम्[1] ॥ ८ ॥
पक्षोपि तादृग्घेतुः स्यादन्यथा हेत्वसिद्धता[2] ।
सपक्षवत् तदा साध्य इत्यवर्ण्यसमाकृतिः ॥ ९ ॥

किं सपक्षवत्पक्षोपि सिद्धार्थहेतुमान्न वा । न चेत् पक्षोपि न साध्यः स्यात् सपक्षवर्तिनः सिद्धार्थस्य हेतोस्तत्राभावात् तथा च स्वरूपासिद्धो हेतुः । सिद्धार्थधर्मवर्तित्वे तु सिद्धधर्मविशिष्टत्वात् पक्षो न साध्यः स्यात् तथा चापक्षधर्मो हेतुरिति प्रत्यवस्थानमवर्ण्यसमः । एवं रूपान्तरेष्वपि दर्शयितव्यम् उत्थानहेतुस्तु पक्षधर्मत्वापेक्षितरूपवद्धेतुमत्त्वे ऽपि पक्षस्य पक्षाविवक्षितसपक्षमात्रविवक्षितरूपवद्धेतुमत्त्वेनासिद्धिः साधारणमसाधारणं दुष्टत्वमूलं वर्ण्यसमावद् द्रष्टव्यम् ॥ ८ ॥ ९ ॥

सपक्षवर्तिन्यपि हेतोरिति शेषः । पक्षो न साध्यः स्यात् साध्येन गृहीतव्याप्तिहेतुः पक्षे न चेत् न तत्र साध्यसाधनसिद्धिरित्यर्थः । अपक्षधर्मः आश्रयासिद्धः एवं रूपान्तरेष्वपीति । अनारब्धसाध्यज्ञापनशक्तित्वादिरूपचतुष्टयवद्धेतुसद्भावासद्भावौ पक्षो न साध्यः स्यादिति द्रष्टव्यमित्यर्थः । साधारणमसाधारणं चेति । प्रतिषेधहेतोरप्यवर्ण्यत्वरूपस्य व्याघातकत्वमविषयवृत्तित्वमयुक्ताङ्गाधिकत्वं च पूर्ववद्‌ज्ञातव्यमित्यर्थः ॥ ८ ॥ ९ ॥

---

(१) व्यवस्थितम्—पा· A पु·

(२) अन्यथासिद्धिहेतुता—पा· B पु· ।

कानि पुनः पक्षमात्रवर्तिनो हेतोर्विवक्षितानि रूपाणि कानि चासपक्षमात्रवर्तिन इत्यत्राह ॥

अप्रसिद्धार्थत्वमारब्धसाध्यज्ञापनशक्तता ।
व्याप्तिप्रामाण्यशून्यत्वं संशयैकार्थता तथा ॥१०॥
स्वरूपभेदश्चेत्येतत् पक्षमात्रं विवक्षितम् ।
हेतुरूपं सपक्षे तु तादृग्रूपविपर्ययः ॥ ११ ॥

हेतोरर्थः प्रमेयं सिषाधयिषितो धर्म इति यावत् । स हि पक्षे ऽसिद्धो भवति । अन्यथा सिद्धसाध्यताप्रसङ्गात् सपक्षे तु सिद्धः इतरथा साध्यवैकल्यप्रसङ्गात् पक्षे साध्यज्ञापनाय प्रवृत्तशक्तिर्हेतोरन्यत्र न तथा पूर्वमेव प्रमाणान्तरेण साध्यसिद्धिः पक्षे संशयसमानविषयो हेतुः सन्दिग्धन्यायप्रवृत्तेः इतरत्र तथा साध्यधर्मनिश्चयात् पक्षे व्याप्तिग्राहकशून्यो हेतुः । तत्र साध्यस्य प्रमाणान्तराभावात् अपरत्र प्रमाणान्तरात् साध्यहेतोर्व्याप्तिर्गृह्यते । पक्षे धूमादिविशेषः कश्चित् परत्र तज्जातीयोऽन्यो विशेष इत्येतानि हेतुरूपाणि पक्षसपक्षयोर्व्यवस्थया विवक्षितानि ॥ १० ॥ ११ ॥

धर्मस्यैकस्य केनापि धर्मेण व्यभिचारतः ।
हेतोश्च व्यभिचारोक्तेः विकल्पसमजातिता ॥१२॥

पक्षे ऽसिद्धो भवति प्रतिवादिन इति शेषः । तत्र साध्यस्येति । प्रस्तुतानुमानेनैव हि पक्षे साध्यासाद्धः न प्रमाणान्तरेण तत्साध्यसाधनयोर्व्याप्तिः पक्षेण प्रमाणान्तरसिद्धिरित्यर्थः ॥ १० ॥ ११ ॥

अत्र षष्ठ्यन्तो धर्मशब्दो हेतुधर्मान्तरं चाह। तृतीयान्तस्तु साध्यधर्मं धर्मान्तरं च। ततश्चैकस्य हेतुधर्मस्य धर्मान्तरेण वा धर्मान्तरस्य साध्यधर्मेण वा धर्मान्तरस्य धर्मान्तरेण वा व्यभिचारदर्शनमुत्थानहेतुः। तेन हेतोरपि साध्यव्यभिचारापादनं विकल्पसमः। तच्च दृष्टान्ते साध्येन सह वर्ततां हेतुः पक्षे तु तेन विनैव वर्ततामिति व्यवस्थयैवापादनीयम्। तत्र हेतोर्धर्मान्तरं प्रति व्यभिचारस्त्रिविधः। पक्षदृष्टान्तयोः पक्षयोर्दृष्टान्तयोर्वेति। तत्र प्रथमो यथा। अनित्यः शब्दः कृतकत्वाद् घटवदिति प्रयोगे यथा कृतकत्वं शब्दे विभागजत्वेन सह वर्तते घटे विनैव वर्तत इति विभागजत्वं व्यभिचरति। तथा कृतकत्वं घटे अनित्यत्वेन सह वर्ततां शब्दे तु तेन विनैव वर्ततेत्यनित्यत्वं व्यभिचरेदिति। द्वितीयस्तु अनित्ये वाङ्मनसी कृतकत्वादिति प्रयोगे कृतकत्वं यथा वाङ्मनसयोर्मूर्तत्वममूर्तत्वं च व्यभिचरति तथा साध्यमपि व्यभिचरेदिति। तृतीयस्तु क्रियावाना-

---

इति व्यवस्थयैव शून्ये पक्षे वृत्तिरेव व्यभिचारः न तु विपक्षगामित्वमिति नियमः घटेऽपि नैव वर्तते शब्दविभागयोरेव विभागजत्वं अतस्तद्व्यतिरिक्ते घटे विभागजत्वमन्तरेण कृतकत्वं वर्तत इत्यर्थः। मूर्तत्वममूर्तत्वं चेति। यथा कृतकत्वं मनसि मूर्तत्वेन सहवर्तते। यथाहवान्यमूर्नत्वेन(?)

त्मा क्रियाहेतुगुणयोगित्वात् लोष्टवत् तूलवदित्यत्र क्रियाहेतुगुणयोगित्वं हेतुः यथा क्रियावतो लोष्टतूलयोर्यत्तु लघुत्वे व्यभिचरति तथा क्रियावत्त्वमपीति । धर्मान्तरस्य साध्यधर्मं प्रति व्यभिचारो यथा अनित्यः शब्दः कृतकत्वादिति प्रयोगे यथा प्रमेयत्वमाकाशघटयोरनित्यत्वं व्यभिचरति तथा कृतकत्वमपीति । धर्मान्तरस्य धर्मान्तरं प्रति व्यभिचारो यथा द्रव्यत्वस्य पयःपावकयोरुष्णत्वव्यभिचारात् कृतकत्वस्याप्यनित्यत्वाव्यभिचार इति । अनैकान्तिकाभासोऽयं दुष्टत्वमूलं तु अव्याप्तस्य व्यभिचारान्न व्याप्तस्यापि व्यभिचारः । तथाभ्युपगमे वा प्रतिषेधहेतोरप्यन्यव्यभिचाराद्व्यभिचारः स्यादिति व्याघातः । अविषयवृत्तित्वं चान्यव्यभिचारादन्यस्यासाधकत्वापादनादिति ॥ १२ ॥

सह वर्तते मनसि वर्तत एवमित्यर्थः । आत्मनि क्रियाहेतुर्गुणः प्रयत्नः प्राणादिव्यापारहेतुत्वात् लोष्टे वेगः गुरुलघुत्वविशेषतदभावौ अनैकान्तिकचोदनाभासोऽयं पक्षे साध्यं विनैव वृत्तिर्नाम पक्षविपक्षयोर्वृत्तिः भवत्यतः पक्षत्रयवृत्तित्वादनैकान्तिकचोदनाभासोऽयं सत्यपक्षवृत्तित्वादाश्रयासिद्ध इत्यर्थः । अव्याप्तस्येषुसाध्यव्यभिचारिणो विभागजत्वादेः प्रतिषेधहेतोरपीति धर्मान्तरादिकं प्रति व्यभिचाराज्जातिवादिहेतोरप्यसाधकत्वरूपसाध्यव्यभिचारः स्यादित्यर्थः ॥ १२ ॥

दृष्टान्तहेतुपक्षाणां सिद्धानामपि साध्यवत् ।
साध्यतापादनं तस्माल्लिङ्गात् साध्यसमो भवेत् १३

प्रमाणान्तरसिद्धानामेव पक्षहेतुदृष्टान्तानां साध्यधर्मस्येव तत एव लिङ्गात् साध्यत्वापादानं साध्यसमः। तस्मादिति वर्ण्यसमतो भेदं दर्शयति । एवं प्रत्यवतिष्ठमानस्यायमभिमानः। दृष्टान्ते हि प्रयोजकत्वं हेतोर्गृह्यते तच्च साध्यं प्रत्येव प्रयोजकत्वं नान्यत्रेति । तत्रापि साध्यसिद्ध्यर्थमयमेव हेतुः प्रयोक्तव्यः । इतरथा पक्षे ऽपि साध्याप्रयोजकत्वं स्यात् । एवं लिङ्गधर्मिणावपि सिद्धावनुमानाङ्गं भवतः तत्सिद्धिश्च न प्रमाणान्तरादुचिता लिङ्गस्य तत्राप्रयोजकत्वेन साध्ये ऽप्यप्रयोजकत्वापत्तेः। क्रोडीकृतलिङ्गधर्मिलिङ्गिविषयानुमितिज्ञानजनकत्वाल्लिङ्गस्य न हि लिङ्गधर्मिणावपोह्य साध्यमात्रप्रतीतिर्लिङ्गाज्जायते । अय-

साध्यस्य साधकं साधनमिति प्रसिद्धिं विहाय पक्षादीनामप्यनेनैव साधनेन साध्यत्वं वदतः कोऽभिप्राय इत्याशङ्क्याह । एवं प्रत्यवतिष्ठमानस्येति । प्रयोजकत्वं साधकत्वम् इतरथा सपक्षे ऽप्यनेनैव साधनेन साध्यसिद्ध्यनङ्गीकारे कथमेवमित्यत्राह । क्रोडीकृतेति । धर्मिलिङ्गसहितसाध्यधर्मस्यानुमेयत्वादित्यर्थः । अयमेव न्याय इति दृष्टान्तगतसाध्यस्यापि अयमेव हेतुः साधक इति स्थिते तत्रापि धर्मिहेतुसहितस्य साध्यत्वात् तयोरप्ययमेव साधक इत्यवगन्तव्यमित्यर्थः। असिद्धत्वादय इत्यादिश-

(१) सपक्षेषु—पा॰ B पु॰ ।

THE

PAÑCAPĀDIKĀ

OF

PADMAPĀDA

TRANSLATED BY

ARTHUR VENIS.

In the margin of the translation is shown the paging of the Sanskrit text of the Vizianagram Series.

The adhikaraṇas of Vedānta are indicated by the corresponding adhyāya and sūtras.

Further abbreviations are :—

Viv = Pañcapādikāvivaraṇa } Viz. Series.
V. P. S. = Vivaraṇaprameyasaṃgraha : } Viz. Series.

S. L. = Siddhāntaleça : English translation by A. Venis.

S. M. = Vedāntasiddhāntamuktāvalī : English translation by A. Venis.

Bhā = Bhāmatī : Biblio. Indic. Edition.

PAÑCAPĀDIKĀ.

Reverence to Brahman, the Witness, Bliss eternal, Intelligence unchanging, the One existent without end and untouched by the net-work of duality!

Reverence to the sage Bādarāyaṇa, the abode of calm, who unfolds Vedānta as the sun expands a lotus-cluster!

I salute that wondrous Çaṅkara, who is not surrounded by serpents, nor is covered with sacred ashes, half of whose form is not the body of Umā and who is not terrible, who is unattended by Vināyaka, and from whom the dark poison stain has disappeared!*

I bow my head to that teacher who has become famous through his Bhāṣya and whose honey-like teachings in the Bhāṣya that issues from his mouth as from the lake Mānasa are drunk in by his humble and attentive pupils, in every quarter, as by bees.

Devoutly I begin this commentary on the Bhāṣya, which clear and profound supports a weight of words and thoughts, as a plant supports its stalks and foliage.

---

* Most of the epithets in this stanza have a double meaning, one in reference to the God Çiva and another in reference to Çaṅkarācārya. Thus भोगि is both a serpent and a sensual person; and भूति means both ashes and wealth; and विनायक is both Gaṇeça and an obstacle. Then, अनुमा = अनुमान, inference, and also अन्-उमा i. e. not-Umā; so that Çaṅkarācārya is described as 'consisting half of reasoning,' whereby he supports the other half, viz., the teaching of revealed Veda.

The Bhāṣya, opening with the words—(the object and the subject) WHICH ARE PRESENT TO CONSCIOUSNESS AS THE THOU AND THE I RESPECTIVELY—and ending, IT IS A NATURAL MODE OF THOUGHT AND SPEECH TO SAY—I AM THAT, THAT IS MINE,—closes finally with the passage—ALL VEDĀNTA TEXTS ARE TO BE STUDIED, IN ORDER TO DESTROY THAT FALSE NOTION WHICH IS THE CAUSE OF EVIL, AND SO TO GAIN A (TRUE) KNOWLEDGE OF SELF AS THE ABSOLUTE UNITY. It sets forth the subject-matter of the Vedānta System and its aim, because these are taught implicitly in the first sūtra. And this point we will make clearer in discussing the passage—THEREFORE BRAHMAN OUGHT TO BE AN OBJECT OF INQUIRY.*

But if this be so, interposes an objector, the Bhāṣya should confine itself to that passage in which the words—IN ORDER TO DESTROY THAT FALSE NOTION, &c.—set forth the aim of the Vedānta System, and the words—AND SO TO GAIN A TRUE KNOWLEDGE OF SELF AS THE ABSOLUTE UNITY—declare the subject-matter of the System? Of what use is the earlier passage, teaching as it does that Nescience (Avidyā) brings about the common modes of thought and speech, e. g. *I am a man*—wherein the *I* and *That is mine* are falsely predicated of one's body and sense-organs.

To this objection the reply is that the knowledge of Brahman, enounced in the opening sūtra, is indeed that which destroys the cause of evil (i. e. Nescience). And evil consists above all in the notion that one is a knower and an agent and an enjoyer. Now if these were realities, knowledge could not destroy them; for it is only the

* Cf. Text. pp. 66, 67.

unreal or Nescience that can be destroyed by knowledge. Whereas if the notion of agency &c. is due to Nescience as its cause, then the statement that the knowledge of Brahman destroys the cause of evil is logically consistent. For this reason, while indicating that the knowledge of Brahman destroys the cause of evil, the Sūtra-writer himself clearly means to show that the notion of agency &c. is due to Nescience as its cause. Hence also the aim of this the opening passage of the Bhāṣya is to serve as an Introduction* to the entire Vedānta System, helpful to an understanding of the sūtras by showing that the notion of agency &c. is due to Nescience as its cause. And so the aim of the Vedānta System is set forth in the statement that Vedānta texts terminate in the doctrine that Self, which is commonly regarded as an individual bound to a world of change, is in its own true nature nothing but the undifferenced and unchanging Intelligence, the Real, the absolute Bliss. But this doctrine is contradicted by the seemingly unrefuted consciousness which, vouched for by direct perception, finds expression in the words—*I am an agent, I am joyed, I am pained.* Hence, to remove this contradiction, it must be proved that Nescience produces characteristics in Self which are opposed to the true nature of Brahman; and until this has been proved, Vedānta texts must appear as meaningless as the sentence 'An old ox sat at its door chanting benedictions.' Hence, it must be proved that it is Nescience that projects on the Self a nature

Page 2.

---

* चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं प्रचक्षते । Another defin. is प्रतिपाद्यमर्थं बुद्धौ संगृह्य प्रागेव तदर्थमर्थान्तरवर्णनमिति । V. P. S. p. 8. l. 20.

~१६२

other than that of Brahman. And this point the Sūtra-writer will prove in the Chapter termed Avirodha, under the section dealing with Jīva or the personal sentiency—II. 3. 29.

But it may be urged that, if this is the case, that Sūtra should come first in order of enunciation. By no means so: for the priority of a passage must be settled by reference to its definite subject-matter.* And when, in regard to this subject-matter, the purport or application of a given sentence has been shown, then a doubt, which might overthrow that application, and also a resolution of that doubt, can logically find expression. Whereas the doubt and its overthrow would be irrelevant, if the definite application of a given sentence had not previously been shown. However, to make the point easy of comprehension, the writer of the Bhāṣya expounds (in his Introduction) what is necessarily implied in the opening sūtra of the System though really proved by II. 3. 29. Thus no fault attaches to the order of exposition in the Bhāṣya.

But here another objection is brought against the Bhāṣya, as follows:—When entering on a task, e. g. the writing of a book, all good men begin with some auspicious preliminary adequate to the task in hand, whether by worship and reverence of their favourite deity or by thinking of such words as *atha* and *vṛddhi* or by looking at such substances as curds. This immemorial practice of good men is an infallible rule for us. And the auspicious introduction, it is well known, is intended to remove obstacles. Further, great hindrances may be anticipated

* अर्थविशेषोपपत्तेः—the proof उपपत्तिः (of its priority) depends on its special subject-matter, अर्थविशेषेण उपपत्तिः ।

in the case of a writer beginning a work with final release as its high aim; for it is a common fact that the best things are attended by many hindrances. Veda also teaches—'Hence they (the Gods) like not that men should know this'—* and human experience also is to the effect that they hinder what they like not. How then is it that the Bhāṣya-writer neglects this immemorial practice and, fearlessly, begins his treatise without an auspicious introduction?

To this objection we reply: The opening passage of the Bhāṣya, ending with the words 'TADDHARMAṆĀMAPI, &c., &c.' is the auspicious introduction to the work. What this passage implies is that the Inner Reality, the Pratyagartha or Self, is pure Intelligence or Brahman, and is free from all defects. Hence no defect in the form of a hindrance can attach to him who, in order to declare (as the Bhāṣya-writer declares) that the presentation to consciousness of an entity in a form other than that in which it really exists as above described is a false presentation, must have thought of the Self as essentially Intelligence and as free from defect of every kind,—though indeed this opening passage deals with a different matter (viz. adhyāsa). Therefore, foremost in maintaining the immemorial practice of good men in regard to an auspicious introduction is the writer of the Bhāṣya.

Page 3.

The Bhāṣya reads; IT IS WELL-KNOWN THAT IDENTITY OF SUBJECT AND OBJECT, WHICH ARE BY NATURE OPPOSED TO EACH OTHER AS LIGHT AND DARKNESS ARE, IS IMPOSSIBLE.

* Bṛh. Up. I. 4. 10. the word '*this*' means ब्रह्मात्मतत्त्वम्

But what, it may be asked, is this Opposition; or what sort of identity is intended, in regard to whose impossibility light and darkness furnish an illustration? If the intended opposition means the impossibility of co-existence of two things (in space and time), then it must follow that darkness cannot exist when and where light exists. But this is not a fact; for colour is seen indistinctly in a badly lighted house but distinctly elsewhere; and, therefore, the persistence of darkness to some extent, in a badly lighted house, is an observed fact. Similarly, the fact that some degree of heat is felt in a shady spot implies the existence of light also in that spot. So that co-existence of this kind must be considered predicable of heat and cold also, since these two are felt simultaneously.

We reply: The opposition consists in the essential difference (of subject and object), that is to say, there cannot really be that fusion* of subject and object which is held to exist, for example, in the case of the universal and the individual. Hence, identity of subject and object, consisting as it would in their fusion, is impossible. But why not? Because the subject whose sole essence is Intelligence cannot *of itself* become the object-element i. e. non-intelligent; nor is this possible *from without,* for Intelligence is not a divisible material substance to undergo change of its parts, nor is it under

* Sambheda is tādātmya, or identity of essence together with some known difference. It is not numerical identity, ekatva, which excludes all difference. Cf. V.P.S. p.14 1.21. भेदाऽभेदसहमन्योन्याभावविरोधि तादात्म्यम् । भेदविरोधि एकत्वमिति तयोर्विविक्तत्वात् । The Vedānta regards jāti or the universal, as a property, dharma, residing in and really identical with its substrate, dharmin; and it expresses this identity by tādātmyam, itaretarabhāvaḥ, dharmadharmiṇorabhedaḥ.

तर्कभाषा ।

श्रीमत्केशवमिश्रविरचिता ।

श्रीमद्विश्वकर्मविरचितया न्याय-
प्रदीपाख्यटीकया सहिता ।

वाराणसीस्थराजकीयप्रधानसंस्कृतपाठशालीयेन
न्यायाध्यापकेन तर्कतीर्थोपाधिधारिणा
श्रीसुरेन्द्रलालगोस्वामिना
संस्कृता ।

THE

TARKABHĀṢĀ

OF

KEÇAVAMIÇRA

WITH THE COMMENTARY

NYĀYAPRADĪPA

OF

VIÇWAKARMAN

EDITED BY

SURENDRALĀLA GOSVĀMIN
PROFESSOR, SANSKRIT COLLEGE, BENARES.

BENARES:
PRINTED AT THE MEDICAL HALL PRESS.

1901.

...त्वात्
तद्देहपाताव-
१६७

रा.
regard
really ident..
tity by tādātmyam,

१८६

॥ श्रीः ॥

सटीकतर्कभाषायाः शुद्धिपत्त्रम् ।

पृ·	पं·	अशुद्धम् ।	शुद्धम् ।
३	८	तदय	तदर्थं
८	२३	पृष्ठायां	पृष्ठे
१९	२१	वन्हे	वह्ने
२०	९	मिति द्रव्य	मितिद्रव्य
२३	१०	निरुक्ते	निरुक्तेः
२९	१५	बुद्धिः	बुद्धिः
३०	१०	कर्षः ।) (१)	कर्षः ।)(१)
३६	८	पठादे-	पटादे-
४०	९	श्रावणत्व	अश्रावणत्व
४१	१७	वलवत्त्वात्	बलवत्त्वात्
४१	२३	श्वोक	श्लोक
४८	२०	प्रदर्शयति	प्रदर्शयति ।
५०	१८	वेति विवाद	वेतिविवाद
५३	२१	पृष्ठायाम्	पृष्ठे
५५	२०	बहुव्रीहै	बहुव्रीहौ
५६	१५	सिाद्धश्च	सिद्धिश्च
५७	३	ानश्चित	निश्चित
६३	२१	वन्हि	वह्नि
७४	९	भयावषयकं	भयविषयकं
७६	२४	पृष्ठायाम्	पृष्ठे
७९	१०	सपत्त	सपक्षे
७९	१६	प्रामाणिकत्व	प्रामाणिकत्वे
८३	४	प्राप्यकारित्व	प्राप्य प्रकाश-कारित्व
८३	६	तयोस्त्तः	तयोः स्तः
८३	१८	वस्तुप्राप्य-प्रकाश	वस्तु प्राप्य प्रकाश
८७	९	मैतिह्य	मैतिह्यं
१०२	१८*	धर्माजन्य-सात्ता	धर्माजन्यज-न्यसात्ता
१०८	३(क)	दिनावयव	द्व्यवयव
११०	१०*	रूपत्वादि	शुक्लत्वादि
१११	११*	घटादि	घृतादि
१२४	१८	स्याम	स्याम
१३१	२४	पृष्ठायाम्	पृष्ठे
१५५	२३	पा	पा·
१५६	२०	ध्यस्ये ा	ध्यस्यो
१५८	१२*	शङ्खयोः	शङ्खत्वयोः
१६२	३	त्त्वादिति(२) वा	त्त्वादिति वा (२)
१६३	७	अनिष्ठा	अनिष्टा
१६३	१८	हाल	हाल-
१६३	१९	पृष्ठायाम्	पृष्ठे
१६३	२२	पृष्ठायाम्	पृष्ठे
१६४	२२	पृष्ठायाम्	पृष्ठे
१७८	२०	टाका	टीका
१८१	१४	वाद्धः	..त्वात्

..तद्देहपाताव-

(क) अत्र च शुद्धपाठः टीकासम्मतो द्वितीयपुस्तकम...

* एतच्चिन्हयुक्तपङ्क्त्यङ्कीयशुद्धपाठाः सम...

१६७

विज्ञापने

पृ.	पं.	अशुद्धम् ।	शुद्धम् ।
१	९	पृष्ठायां	पृष्ठे
२	७	पृष्ठायां	पृष्ठे
७	१५	मुर्द्धन्य	मूर्द्धन्य
८	८	वतांति	वर्त्तीति
८	१०	उन	ऊन
९	१०	पृष्ठायां	पृष्ठे
९	२४	तिकार	तिकार
१०	१०	पृष्ठायां	पृष्ठे
१२	२०	विन्ध्य	विन्ध्ये

पाठाधिक्यानां सूचीपत्रे

पृ.	पं.	अशुद्धम् ।	शुद्धम् ।
१	१	पृष्ठायां	पृष्ठे
१	१	नन्तम्	नन्तरम्
१	९	पृष्ठायां	पृष्ठे
१	१७	केवल्य	कैवल्य
४	१७	पृष्ठायां	पृष्ठे
४	१७	परामशा	परामर्शा
४	२२	पृष्ठायां	पृष्ठे
४	२४	पृष्ठायां	पृष्ठे
५	७	पृष्ठायां	पृष्ठे
५	९	पृष्ठायां	पृष्ठे
५	१२	कारिणा	करिणा
५	१४	पृष्ठायां	पृष्ठे

तर्कभाषायाः सूचीपत्रे

पृ.	स्तं.	पं.	अशुद्धम् ।	शुद्धम् ।
३	२	२८	रूपरूम्	रूपराम्
५	२	२	विभाग	विभागः

न्यायप्रदीपाख्यटीकायाः सूचीपत्रे

पृ.	स्तं.	पं.	अशुद्धम् ।	शुद्धम् ।
२	२	१९	कमत्वय	कर्मत्वय
४	१	३०	शब्दबोधे	शाब्दबोधे
४	२	२७	सुष्टि	सृष्टि

rega..
really ide..
tity by tādātmy-

स्वरूपतोऽपि त्यागः, न तु नित्यानाम् अङ्गिनः प्रहाणात्ते-
षामपि तदङ्गानां परित्याग एवेति चेन्न स्वतन्त्राधिकारा-
नपायात् तदेतदखिलम् उपायापायसंत्यागी मध्यमां वृत्ति-
मास्थितः इत्यादिभिर्विशदमवगन्तव्यम्।

यत्तु केचित् परित्यक्तसकलवर्णाश्रमधर्माः संवर्तभ-
रतविदुरादयो ब्रह्मविदः संचरन्तीति यथेष्टकरणकौतुकिनां
प्रलपितं तदसत् तत्तत्प्रकरणेष्वेव जडवदाचरणाज्ञानाभि-
संध्यादिमात्रप्रतिपादनपरत्वनिर्णयात् बाल्येन तिष्ठासेत्,
जड़वल्लोकमाचरेत्, सतां मार्गमदूषयन्नित्यादीनां पर्यालो-
चनात्, बाल्यं च शक्तिविद्याभिजनाद्युत्कर्षाणां सतामना-
विष्करणमेव न तु कामचारवादभक्ष्यत्वादि, तथा च सूत्राणि
अनाविष्कुर्वन्नन्वयात्, सर्वान्नानुमतिश्च प्राणात्यये तद्दर्श-
नात्, शब्दश्चातोऽकामकार इत्यादीनि, अन्यथा स खल्वेवं
वर्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते, नाविरतो दुश्च-
रितात्, वर्णाश्रमाचारवतेत्यादिश्रुतिस्मृतिशतप्रकोपप्रस-
ङ्गः। कथं तर्हि उत्तरपूर्वाघयोरश्लेषविनाशौ वाच्यौ इत्थं
समधिगतविद्यानां भुक्तफलकृतप्रायश्चित्तप्रारब्धकर्मव्य-
तिरिक्तं प्राचीनं कर्मोपायप्रभावादेवाग्निप्रोतेषीकतूलवत्
प्रदूयते उत्तरं चाबुद्धिपूर्वकं पुष्करपलाश आप इव न श्लि-
ष्यति, पुण्येऽपि विद्यानुकूलव्यतिरिक्तांशस्य सुखहेतुत्वे-
ऽपि मोक्षविरोधित्वाविशेषादनिष्टफलतया पापशब्दाभि-
लप्यस्याश्लेषविनाशावेव, नाभुक्तं क्षीयते कर्मेत्यादिकं तु
विद्याभिन्नविषयं, प्रारब्धं तु भोगेनैव क्षपणीयं सूत्रं च
भोगेन त्वितरे क्षपयित्वाऽथ संपद्यत इति, प्रारब्धकर्मणां
च न तद्देहपातावधिकत्वनियमः कर्मणां विचित्रफलत्वात्
एतद्देहावसान एवेति न्यस्तभरस्य तु तस्य तद्देहपाताव-

धिकत्वमेव यावन्न विमोक्ष्येऽथ संपत्स्य इत्यस्यापि प्रारब्धतत्तत्कर्मफलपर्यवसानविषयत्वात्, अस्माच्छरीरात्समुत्थायेत्यादेरप्यन्तिमशरीरविषयत्वात् अत एव यावदधिकारमवस्थितिराधिकारिकाणामिति सूत्रम्, एतेनान्तिमशरीरनिवृत्तौ देशकालनियमाभावोऽपि सिद्धः सूत्राणि निशि नेति चेन्न सम्बन्धस्य यावद्देहभावित्वाद्दर्शयति च, अतश्चायनेऽपि दक्षिण इत्यादीनि, एवं बुद्धिपूर्वमुत्तरमपि भोगेन प्रायश्चित्तेन वा क्षपणीयं, न चैष प्रायशो विद्यानुकूलं पुण्यं पापं च बुद्धिपूर्वकं करोति फलाभिसंधियुक्तपुण्यस्य च विद्याविरोधित्वात् फलान्तरेषु च विरक्तत्वात् पापे चेश्वराज्ञातिलङ्घनभयात्, यदि च कदाचिद्बुद्धिपूर्वकं करोति तदा भीतः स्वयमेव तत्तदुचितं प्रायश्चित्तं करोति अथ प्रमादात्तदपि न करोति तदापि प्रारब्धकर्मपर्यवसानात्प्रागेव तत्तत्कर्म यथाकथंचित्फलति न तु स्वयमेव जन्मादिप्रयोजको भवति, अथ च जन्मादिहेतुरेव कर्मविशेषः शापादिर्वोपनिपतितः तदा तेन तत्प्रसज्यत एव तथाऽपि निष्पन्नस्योपायस्य न शैथिल्यम् सतः प्रारब्धकर्मण इवैतस्यापि पर्यवसाने संसारं निवर्तयति न च पुनरुत्तरोत्तरकर्मकरणात्संसाराविच्छेद इति वाच्यं शास्त्रविरोधात् निष्पन्नस्योपासनस्य निष्फलत्वप्रसङ्गात् सूत्राभिप्रेतं चैतत् एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेरिति, इदं च सूत्रं विद्याङ्गकर्मविषयमपि विद्यायां तुल्यन्यायतयाऽनुसंधेयम्। नन्वेवं समस्तकर्मप्रलये साधुपापकृत्ययोर्हानं सुहृद्द्विषदुपायनं च कथं घटते तथा हि न तावत्पूर्वकृतयोः, तत्र केषांचित्कर्मणां दत्तफलत्वात् केषाचित्प्रायश्चित्तविद्याभ्यां विनष्टत्वात्, फलवत्त्वयोरपि कर्मस्वरूपनिवर्तकत्वात् केषांचित्प्रारब्धफलानां

भोगेनैव क्षपितत्वात्, एवमुत्तरकृतानामबुद्धिपूर्वकाणां चाश्लिष्टत्वात् विद्यानुकूलानां च विद्ययैव फलभूतया निवृत्तत्वात् तत्र च साधुकृत्यांशाभावात्, न च सुहृदादिकृतस्यैव कर्मणोऽनेन हानादिकमुपपद्यते स्वकीयत्वाभावात् दायसमोपायननिर्देशानुपपत्तेः, उपायनवाचोयुक्तिस्तत्तत्सौहार्द-शात्रवाभ्यां जनितत्वादौपचारिकीति चेन्न हानौ तूपायनशब्दशेषत्वादित्यादिसूत्रभाष्यादिविरोधादचिन्तनीयत्वप्रसङ्गाच्च प्रागेव सौहार्दादिकृतस्य दायसमकालप्राप्त्यभिधानविरोधाच्चेति । अत्रोच्यते दत्तफलमदत्तफलं चेति पूर्वाघं द्विविधम् । अदत्तफलमपि प्रायश्चित्तविनष्टमविनष्टं चेति, अविनष्टमपि प्रारब्धफलमप्रारब्धफलं चेति, तत्रान्तिमं विद्यया विनाश्यम्, एवमुत्तरमपि विद्यानुकूलमननुकूलं चेति द्विविधम्, अननुकूलमपि बुद्धिपूर्वमबुद्धिपूर्वं चेति, तत्राबुद्धिपूर्वस्य विद्याफलादश्लेषः, एवं ययोः कर्मराश्योः प्रबलकर्मान्तरप्रतिरोधाददत्तफलयोरश्लेषविनाशौ तयोर्हानं सुहृदाद्युपायनं चोच्यते तथा च सुहृदः साधुकृत्यामित्यस्य विषयविभागपरं अतोऽन्यापि ह्येकेषामुभयोरिति सूत्रे भाष्यं—विद्ययाऽश्लेषविनाशश्रुतिश्च तद्विषयेति, अश्लेषविनाशौ च कर्मशक्तिप्रतिबन्ध-तन्नाशावेव, सा च शक्तिर्भगवत्कोपप्रीतिविशेषात्मिका, तादृशौ च प्रीतिकोपौ सुहृद्द्विषद्गोचरौ भवत इति तावतैवोपायनवाचोयुक्तिः, पाते त्विति सूत्रांशे शरीरपातादूर्ध्वं तु विद्यानुगुणदृष्टफलानि सुकृतानि नश्यन्तीत्यर्थ इति भाष्यं विद्यानुगुणानामदत्तफलानां कर्मणां शरीरपातादूर्ध्वं विनाश उपायनं च, इतरेषां तु विद्याधिगमदशायामेवाश्लेषविनाशौ उत्क्रमणदशायां च हानमुपायनं चेति विभाग इति, न्यासविद्या तु प्रारब्धमपि निःशेषं

लकाल्यत्वाजरत्वाक्षरत्वादिवचनेन देशलयाभावात्, स यदि पितृलोककामो भवतीत्यादिनाऽनायासस्वसङ्कल्पमात्रसृष्टपरमपुरुषभोगनिर्मग्नाप्राकृतभोगरूपत्वेन संसारित्वाभावात्।

सृष्ट्यादिजगद्व्यापारमोक्षप्रदत्वमुमुक्षूपास्यत्वशेषित्वादिरूपभगवदसाधारणधर्मव्यतिरिक्तज्ञानानन्दसत्यसङ्कल्पत्वादिगुणात्यन्तसाम्यातिरेकेण सायुज्यं तु गगनारविन्दमकरन्दवार्तामनुसरति, न तावत्सायुज्यं ब्रह्मणि लयः अग्निवाय्वादित्यादिसायुज्येऽपि लयप्रसङ्गात्, नापि साधारणशरीरवत्त्वं जीवशरीरापेक्षया संसारेऽपि समत्वात्, ईश्वरशरीरापेक्षया मोक्षेऽप्ययोगात्, एवमन्यदपि, किं तर्हीदं समानात्मगुणयोगित्वं तत्रैव चास्य स्वारस्यं सयुग्भावो हि सायुज्यं सयुक्शब्दश्च भिन्नयोरेकत्र साधारणयोगं दर्शयति, परमं साम्यमुपैति मम साधर्म्यमागताः इत्यादिबलाच्च ब्रह्मैव भवतीत्यादीनामपि साम्य एव तात्पर्यमिति प्रागेवोपपादितम्, अग्न्यादिप्राप्तिषु सालोक्यादितारतम्यमस्ति ब्रह्मप्राप्तौ तु सायुज्यरूपायां पूर्वं त्रयमप्यविनाभूतम्। यत्तु

मोक्षं सालोक्यसारूप्यं प्रार्थये न कदाचन।
इच्छाम्यहं महाबाहो! सायुज्यं तव सुव्रत!॥

लोकेषु विष्णोर्निवसन्ति केचित्
समीपमृच्छन्ति च केचिदन्ये।
अन्ये तु रूपं सदृशं भजन्ते
सायुज्यमन्ये स तु मोक्ष उक्तः॥

इत्यादि, तदपि श्रीविष्णुलोकादिविचित्रावान्तरपदप्राप्त्यपेक्षयेति न दोषः।

न च सेवा दुःखहेतुः सेवात्वादिति वाच्यम् अनीश्वरसेवापक्षीकारे सिद्धसाधनात् ईश्वरसेवापक्षीकारे बाधात्, सुखरूपेषु वदान्यसेवादिषु चानैकान्त्यात्, एतद्व्यतिरिक्तसेवा दुःखहेतुः सेवात्वात् एतत्सेवावदित्यत्रापि व्यतिरेकोपलक्षितव्यक्तिद्वयेंऽशतः सिद्धसाधनबाधयोरन्यतरानतिपातात्, एवं सेवामात्रपक्षीकारे दृष्टान्ताभावश्चाधिकः, केवलव्यतिरेकित्वविवक्षायां दुःखहेत्वन्तरसद्भावेन सपक्षवतस्तत्रावर्तमानस्य सेवात्वस्यासाधारणत्वप्रसङ्गात्, केवलव्यतिरेकी च निरसिष्यते तर्कोऽपि निराश्रयो न साधकः, केवला व्याप्तिरप्रयोजिका, व्यभिचारश्चोक्तः, दुःखहेतुत्वे च पापावष्टब्धत्वमुपाधिः, निवृत्तस्वातन्त्र्याभिमानस्य दासभूतस्येश्वरसेवायाः स्वरूपानन्दरूपत्वेन सुखरूपत्वमेवोपपन्नं, तदेवं विषयकारणस्वरूपविशेषविशिष्टज्ञानविशेषसाध्यो मोक्ष उक्तः। स च निर्दुःखनिरतिशयानन्दरूपभगवदनुभवात्मक इति सिद्धम्।

अन्येषां तु देहविच्छेदमात्रसहस्त्रयुवतिसंयोगज्ञानालीकलय–वासनात्यन्तविराम–विषयोपरागवैधुर्य–नित्योर्द्ध्वगमनार्हच्छरीरानुप्रवेश–विशिष्टनिरावरणत्ववियातानुभवस्वातन्त्र्य–शिवसारूप्य–शिवसाम्यापत्ति–चिच्छक्तिपरिशेषाविद्यानिवृत्त्युपाधिनिवृत्ति–सकलवैशेषिकगुणोच्छेद–केवलात्मानन्दानुभवप्रभृतयो निःश्रेयसविकल्पा देहातिरिक्तात्मसद्भाव–बाह्यार्थपारमार्थिकत्व–तत्तदागमाप्रामाण्यब्रह्मनिर्विकारत्वनिर्दोषत्वज्ञानानन्दादिनित्यत्वप्रतिपादनादिभिर्दूषणीयाः।

यदिह दृषद्विशेषनिःश्रेयसवादिनां दृषन्मतीनामिदमनुमानम् आत्मा कदाचिदखिलविशेषगुणशून्यः अनित्यवैशेषिकगुणाश्रयत्वात् उत्पद्यमानघटप्रलयाकाशवदिति

विनाशयितुं शक्ता तथाऽपि रागविषयमंशं तदनुबन्धिदुःखं च स्थापयति, निःशेषवैराग्ये तु निःशेषं निवर्तयति अत एवार्त-दृप्तभेदः रागविषयश्चांशो दृप्तेनैतावदिति परिच्छेत्तुं शक्यः विचित्रत्वात्पुंसामभिप्रायपद्धतेः, अस्यां च विद्यायामन्तिमप्रत्ययापेक्षाऽपि न विद्यते ।

इयं केवललक्ष्मीशोपायत्वप्रत्ययात्मिका ।
स्वहेतुत्वधियं रुन्धे किं पुनः सहकारिणाम् ॥
प्रारब्धकर्मावधिको मोक्ष इत्थमुपासितुः ।
दृप्तस्य देहावधिक आर्तस्यात्र्यवधिर्मतः ॥

उत्क्रमिषतः सर्वस्य पूर्वं वागिन्द्रियं तदनु च शेषाणि नवेन्द्रियाणि मनसा सहाविभागं गच्छन्ति तच्च सर्वेन्द्रियसंयुक्तं मनः प्राणेन, स चैकादशेन्द्रियसंयुक्तो जीवेन, स चेन्द्रियप्राणसंयुक्तः पञ्चभूतैः, तानि चेन्द्रियप्राणजीवसंयुक्तानि परमात्मना एतावच्च विद्वदविदुषोः साधारणम्, अविदुषस्तु विशेषः प्रागेवोक्तः, विद्वांस्तु सर्वोऽपि मूर्धन्यया ब्रह्मनाड्या सुखेन शरीरान्निष्क्रामन्

अर्चिरहः सितपक्षोदगयनाब्दमरुदर्केन्दु ।
वैद्युतवरुणेन्द्रप्रजापतिसंज्ञैरातिवाहिकैः पुरुषैः ॥

क्रमाद्यथास्वं देशमतिवाह्यमानो वैद्युतेनामानवनाम्ना तेनैव क्रमाद्वरुणादिसमीयं नीतस्तेन ब्रह्मसमीपमुपनीयते, एषैवार्चिरादिगतिः कर्मणामन्यसंक्रान्तिश्च

सम्भूतिं च विनाशं च यस्तद्वेदोभयं सह ।
विनाशेन मृत्युं तीर्त्वा सम्भूत्याऽमृतमश्नुते ॥ इति

सम्भूतिविनाशशब्दाभ्यामुच्यते, कर्मणां विनाशेन हि संसारतरणम् अर्चिरादिसम्भूत्या च ब्रह्मप्राप्तिः सम्भूतिमुपासत इत्यत्रोपासनं चिन्तनमात्रमेव संभूतिशब्दश्च

प्राप्तौ बहुशः प्रयुक्तः तेऽर्चिषमभिसम्भवन्ति एतमितः प्रेत्याभिसम्भवितास्मि ब्रह्मलोकमभिसम्भवानि इत्यादिषु । नारायणार्यैस्तु सम्भूतिविनाशशब्दौ फलद्वारा लक्षणया विद्याकर्मविषयावुक्तौ विदुषो विद्यासाध्यस्यापवर्गस्य सम्यगभिवृद्धिरूपत्वादित्यादिना ।

एवं च विद्यां चाविद्यां च यस्तद्वेदोभयं सह ।

इत्यादिश्रुत्यैकार्थ्यं स्यात् उत्क्रम्य गच्छतश्चास्य सर्वकर्मक्षयेऽपि च विद्यामाहात्म्यादेव सूक्ष्मशरीरशब्दा-*भिलभ्यं किञ्चित् त्रिगुणद्रव्यमुपष्टम्भकमनुवर्तते, उक्तं च सारे शरीरादुत्क्रान्तस्यापि सूक्ष्मशरीरमनुवर्तत इत्यादि, अत एव च प्राथमिकसाक्षात्कारः प्रत्यूषकल्प इति गतिसाफल्यं निःशेषाविद्याविनाशश्च विशिष्टदेशगतिसापेक्ष इति गतिशास्त्रादेवाध्यवसीयते तथा च परं जैमिनिर्मुख्यत्वादिति सूत्रे भाष्यं यथा हि विद्योत्पत्तेर्वर्णाश्रमकर्मशौचाचारदेशकालाद्यपेक्षा तमेतं वेदानुवचनेनेत्यादि शास्त्रादवगम्यते तथा निःशेषाविद्यानिवर्तनरूपविद्यानिष्पत्तिरपि विशिष्टदेशगतिसापेक्षेति गतिशास्त्रादवगम्यत इति उत्क्रमणप्रभृति चोत्तरोत्तरमतिशयितज्ञानानन्दशाली जायते प्राणेन्द्रियादिमत्त्वाच्च मध्ये भोगविहारसम्भवाद्युपपत्तिः, अमानवकरस्पर्शादारभ्य चासौ मुक्तः ततः पूर्वः सर्वोऽप्युपायव्यापारः फलं परमपदपर्यङ्कारोहणादिकं तदा चायमीश्वर इवापहतपाप्मत्वसत्यसङ्कल्पत्वादिविशिष्टोभवति, तच्चास्य समस्तप्रतिबन्धकात्यन्तिकलयादाविर्भूतं स्वाभाविकं रूपं, ततः परमस्य कदाचिदपि न संसारात्मिका पुनरावृत्तिः प्रथमं तावदका-

* शब्दाभिलप्यमिति तूचितो भाति पाठः ।

लकाल्यत्वाजरत्वाक्षरत्वादिवचनेन देशलयाभावात्, स यदि पितृलोककामो भवतीत्यादिनाऽनायासस्वसङ्कल्पमात्रसृष्टपरमपुरुषभोगनिर्मग्नाप्राकृतभोगरूपत्वेन संसारित्वाभावात्।

सृष्ट्यादिजगद्व्यापारमोक्षप्रदत्वमुमुक्षूपास्यत्वशेषित्वादिरूपभगवदसाधारणधर्मव्यतिरिक्तज्ञानानन्दसत्यसङ्कल्पत्वादिगुणात्यन्तसाम्यातिरेकेण सायुज्यं तु गगनारविन्दमकरन्दवार्तामनुसरति, न तावत्सायुज्यं ब्रह्मणि लयः अग्निवाय्वादित्यादिसायुज्येऽपि लयप्रसङ्गात्, नापि साधारणशरीरवत्त्वं जीवशरीरापेक्षया संसारेऽपि समत्वात्, ईश्वरशरीरापेक्षया मोक्षेऽप्ययोगात्, एवमन्यदपि, किं तर्हीदं समानात्मगुणयोगित्वं तत्रैव चास्य स्वारस्यं सयुग्भावो हि सायुज्यं सयुक्शब्दश्च भिन्नयोरेकत्र साधारणयोगं दर्शयति, परमं साम्यमुपैति मम साधर्म्यमागताः इत्यादिबलाच ब्रह्मैव भवतीत्यादीनामपि साम्य एव तात्पर्यमिति प्रागेवोपपादितम्, अग्न्यादिप्राप्तिषु सालोक्यादितारतम्यमस्ति ब्रह्मप्राप्तौ तु सायुज्यरूपायां पूर्वं त्रयमप्यविनाभूतम्। यत्तु

मोक्षं सालोक्यसारूप्यं प्रार्थये न कदाचन।
इच्छाम्यहं महाबाहो! सायुज्यं तव सुव्रत!॥

लोकेषु विष्णोर्निवसन्ति केचित्
समीपमृच्छन्ति च केचिदन्ये।
अन्ये तु रूपं सदृशं भजन्ते
सायुज्यमन्ये स तु मोक्ष उक्तः॥

इत्यादि, तदपि श्रीविष्णुलोकादिविचित्रावान्तरपदप्राप्त्यपेक्षयेति न दोषः।

न च सेवा दुःखहेतुः सेवात्वादिति वाच्यम् अनीश्वरसेवापक्षीकारे सिद्धसाधनात् ईश्वरसेवापक्षीकारे बाधात्, सुखरूपेषु वदान्यसेवादिषु चानैकान्त्यात्, एतद्व्यतिरिक्तसेवा दुःखहेतुः सेवात्वात् एतत्सेवावदित्यत्राऽपि व्यतिरेकोपलक्षितव्यक्तिद्वयेंऽशतः सिद्धसाधनबाधयोरन्यतरानतिपातात्, एवं सेवामात्रपक्षीकारे दृष्टान्ताभावश्चाधिकः, केवलव्यतिरेकित्वविवक्षायां दुःखहेत्वन्तरसद्भावेन सपक्षवतस्तत्रावर्तमानस्य सेवात्वस्यासाधारणत्वप्रसङ्गात्, केवलव्यतिरेकी च निरसिष्यते तर्कोऽपि निराश्रयो न साधकः, केवला व्याप्तिरप्रयोजिका, व्यभिचारश्चोक्तः, दुःखहेतुत्वे च पापावष्टब्धत्वमुपाधिः, निवृत्तस्वातन्त्र्याभिमानस्य दासभूतस्येश्वरसेवायाः स्वरूपानन्दरूपत्वेन सुखरूपत्वमेवोपपन्नं, तदेवं विषयकारणस्वरूपविशेषविशिष्टज्ञानविशेषसाध्यो मोक्ष उक्तः । स च निर्दुःखनिरतिशयानन्दरूपभगवदनुभवात्मक इति सिद्धम् ।

अन्येषां तु देहविच्छेदमात्रसहस्त्रयुवतिसंयोगज्ञानालीकलय-वासनात्यन्तविराम-विषयोपरागवैधुर्य-नित्योर्द्धगमनार्हच्छरीरानुप्रवेश-विशिष्टनिरावरणत्वविद्यातानुभवस्वातन्त्र्य-शिवसारूप्य-शिवसाम्यापत्ति-चिच्छक्तिपरिशेषाविद्यानिवृत्त्युपाधिनिवृत्ति-सकलवैशेषिकगुणोच्छेद-केवलात्मानन्दानुभवप्रभृतयो निःश्रेयसविकल्पा देहातिरिक्तात्मसद्भाव-बाह्यार्थपारमार्थिकत्व-तत्तदागमाप्रामाण्यब्रह्मनिर्विकारत्वनिर्दोषत्वज्ञानानन्दादिनित्यत्वप्रतिपादनादिभिर्दूषणीयाः ।

यदिह दृषदविशेषनिःश्रेयसवादिनां दृषन्मतीनामिदमनुमानम् आत्मा कदाचिदखिलविशेषगुणशून्यः अनित्यवैशेषिकगुणाश्रयत्वात् उत्पद्यमानघटप्रलयाकाशवदिति

तत्रागमबाधस्तावदुक्तः, ज्ञानसंस्कारपक्षे हेतोरन्यतरासिद्धिश्च, ज्ञानादीनां भवदभिमतगुणत्वानभ्युपगमात् सिद्धसाधनं स्वरूपासिद्धिश्च प्रलयाकाशादेरनभ्युपगमादुत्पद्यमानघटादेरपि सगुणत्वाभ्युपगमादुदाहरणस्याश्रयहीनत्वसाध्यविकलत्वे, प्रलयकालगतप्रकृत्यादेरपि सत्त्वादिगुणयोगात् परैरनभ्युपगमाच्च न तद्दृष्टान्तोपन्यासः, एवमस्मदीये ज्ञानसंस्कारपक्षे मुक्तावस्थायां ज्ञानस्याखिलविशेषगुणशून्यत्वमस्तु वा मा वा तथाऽपि परानभ्युपगमान्नैष दृष्टान्तः ज्ञानद्रव्यत्वतद्गतसंस्कारयोस्तैरनभ्युपगमादिति ।

ननु स्वात्मानन्दानुसन्धानरूपकैवल्याख्योऽपि मोक्षो भगवद्यामुनमुनिभिरुक्तः ।

ऐश्वर्याक्षरयाथात्म्यभगवच्चरणार्थिनाम् ।
वेद्योपादेयभावानामष्टमे भेद उच्यते ॥ इति,

संसृत्यक्षरवैष्णवाध्वसु नृणां सम्भाव्यते कर्हिचिदिति च, अनुसृतश्चायमर्थो भाष्यकारैरपि तथा हि चतुर्विधा भजन्ते मामित्यादौ जिज्ञासुः प्रकृतिवियुक्तात्मस्वरूपावाप्तीच्छुरित्याद्युक्तेः, अष्टमाध्यायारम्भे ऽपि सप्तमार्थानुक्रमणे सुकृततारतम्येन च प्रतिपत्तिवैशिष्ट्यादैश्वर्याक्षरयाथात्म्यभगवत्प्राप्तीच्छयोपासकभेदमित्याद्युक्तेश्च तथा कैवल्यार्थिनां स्मरणप्रकारमाहेत्युक्त्वा यदक्षरं वेदेति श्लोकमवतार्य सर्वद्वाराणीत्यादेर्व्याख्याने ओमित्येकाक्षरं ब्रह्म मद्वाचकं व्याहरन् वाच्यं मामनुस्मरन् आत्मनः प्राणं मूर्धन्याधाय देहं त्यजन् यः प्रयाति स याति परमां गतिं प्रकृतिवियुक्तं मत्समानाकारमपुनरावृत्तिमात्मानं प्राप्नोतीत्यर्थ इति चोक्तेः, अनन्तरं च एवमैश्वर्यार्थिनः कैवल्यार्थिनश्च स्वप्राप्त्यनुगुणं भगवदुपासनप्रकार उक्तः । अथ ज्ञानिनो भगवदुपासनप्रकारं प्राप्तिप्रकारं चाहत्यु-

त्त्वा अनन्यचेता इत्येतद्व्याख्यातम् अतः परमध्यायशेषेण ज्ञानिनः कैवल्यार्थिनश्चापुनरावृत्तिमैश्वर्यार्थिनः पुनरावृत्तिं चाहेत्युक्त्वा मामुपेत्येत्यादिकं प्रभवत्यहरागम इत्येतदन्तं व्याख्याय कैवल्यं प्राप्तानामपि पुनरावृत्तिर्न विद्यत इत्याहेत्युक्त्वा परस्तस्मात्त्वित्यादिकमपि तद्धाम परमं ममेत्येतदन्तं व्याख्यातम् अनन्तरं च ज्ञानिनः प्राप्यं तु तस्मादत्यन्तविभक्तमित्याहेत्युक्त्वा पुरुषः स पर इति श्लोको व्याख्यातः, अनन्तरं च आत्मयाथात्म्यविदः परमपुरुषनिष्ठस्य च साधारणीमर्चिरादिकां गतिमाहेत्युक्तम् अथ तत्रत्यभाष्यग्रन्थ एवेह लिख्यते-तथा हि द्वयोरप्यर्चिरादिका गतिः श्रुता श्रुतौ सा चापुनरावृत्तिलक्षणा यथा पञ्चाग्निविद्यायां तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धातप इत्युपासते तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहरित्यादौ अर्चिरादिना गतस्य परब्रह्मप्राप्तिरपुनरावृत्तिश्चाम्नाता, स एनान् ब्रह्म गमयति एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्त्तन्ते इति, न च प्रजापतिवाक्यादौ श्रुतपरविद्याङ्गभूतात्मप्राप्तिविषयेयं तद्य इत्थं विदुरिति गतिश्रुतिः, ये चेमेऽरण्ये श्रद्धातप इत्युपासत इति परविद्यायाः पृथक्श्रुतिवैयर्थ्यात्, पञ्चाग्निविद्यायां च इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति रमणीयचरणाः कपूयचरणा इति पुण्यपापहेतुको मनुष्यादिभावो ऽपामेवभूतान्तरसंसृष्टानाम् आत्मनस्तु तत्परिष्वङ्गमात्रमिति चिदचितोर्विवेकमभिधाय तद्य इत्थं विदुः तेऽर्चिषमभिसंभवन्ति इमं मानवमावर्तं नावर्तन्त इति विविक्ते चिदचिद्वस्तुनी त्याज्यतया प्राप्यतया च य इत्थं विदुस्तेऽर्चिरादिना गच्छन्ति न च पुनरावर्तन्ते इत्युक्तमिति गम्यते, आत्मयाथात्म्यविदः परमपुरुषनिष्ठस्य च स एनान् ब्रह्म गमयतीति ब्रह्मप्राप्तिवच-

नादचिद्वियुक्तमात्मवस्तु ब्रह्मात्मकतया ब्रह्मशेषतैकरस-मित्यनुसन्धेयं तत्क्रतुन्यायाच्च परशेषतैकरसत्वं च य आत्मनि तिष्ठन् यस्यात्मा शरीरमित्यादिश्रुतिसिद्धमिति अतोऽक्षरनिष्ठस्याप्यर्चिरादिगतिः सिद्धा। यत्तु यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति इत्यस्याक्षरविषयस्य व्याख्याने सर्वेषु वियदादिभूतेषु सकारणेषु सकार्येषु विनश्यत्सु तत्र तत्र स्थितोऽपि न विनश्यतीत्युक्तं तदप्यचित्संसृष्टावस्थाविषयम् अन्यथा पूर्वोक्तगतिविरोधात्. द्वादशाध्याये च ये त्वक्षरमित्यत्र तेऽपि मां प्राप्नुवन्त्येव मत्समानाकारमसंसारिणमात्मानं प्राप्नुवन्त्येवेत्यर्थ इत्युक्तम्, अतः सांप्रदायिक एवायं कैवल्याख्यो मोक्ष इति चेत् अत्रोच्यते न तावदयं मोक्षो भाष्यकाराभिमतः शारीरकभाष्ये व्यक्तमुक्तत्वात्, तथा हि वाक्यान्वयादित्यधिकरणे तावत् अमृतत्वस्य परमपुरुषवेदनैकोपायतया प्रतिपादनादित्युक्त्वा परमपुरुषविभूतिभूतस्य प्राप्तुरात्मनः स्वरूपयाथात्म्यवेदनमपवर्गसाधनभूतपरमपुरुषवेदनोपयोगितया ऽऽवश्यकं न स्वत एवोपायत्वेनेत्युक्तं, तथा येयं प्रेते विचिकित्सा मनुष्ये इत्यादिव्याख्याने तत्तद्वाद्यभिमतमोक्षविकल्पानुपन्यस्य त्रय्यन्तनिष्णातास्त्वित्यादिना जीवपरयोः स्वरूपस्वभावानप्यभिधाय जीवस्यानादिकर्मरूपाविद्यातिरोहितस्याविद्योच्छेदपूर्वकस्वाभाविकपरमात्मानुभवमेव मोक्षमाचक्षत इत्युक्तं, सर्वकर्मविनिर्मुक्तात्मस्वरूपावाप्तिर्हि भगवत्प्राप्तिगर्भाऽत इमे सत्याः कामा अनृतापिधाना इति भगवतो गुणगणस्य तिरोधायकत्वेनानृतशब्देन स्वकर्मणः प्रतिपादनादिति वेदार्थसंग्रहेऽभिहितम्।

एवं वरदविष्णुमिश्रैरपि नन्वेवं निःशेषकर्मक्षयाभावात्कैवल्यप्राप्तौ न मुक्तः स्यादित्याशङ्क्योक्तं सत्य-

मुक्त एव सः मोक्षस्य परमात्मानन्दानुभवरूपत्वात् तस्य ब्रह्मानन्दानुभवाभावात् स्वानन्दमात्रानुभवात्, स्वानन्दमात्रानुभवश्च योगिनाममृतं स्थानं स्वात्मसन्तोषिणश्च य इति भगवत्पराशरवचनात् मुक्तिव्यतिरिक्तमनपायियोगसाध्यमैश्वर्यमिति भट्टपराशरपादैरध्यात्मखण्डद्वयव्याख्यायामैश्वर्याक्षरयोरपवर्गव्यतिरिक्ततया तुल्यत्वं दर्शितम् अन्येष्वैश्वर्याक्षरभोगेष्वनपेक्षया जुगुप्सया साधिष्ठानमित्यादिना, यदि चासौ मोक्षः तदा स्वाभाविकरूपप्राप्तिमन्तरेण न पर्यवसानं, यदि पर्यवसानं तदा नित्यसंसारविशेष एवायमिति मन्तव्यम्, अशरीरस्य कथं संसारित्वमिति चेत् कथं वा प्रलयदशापन्नस्य तदानीमप्युत्तरशरीराद्यारम्भयोग्यसूक्ष्माचित्संसर्गादिति चेत् अस्याप्यचित्संसर्गोऽभ्युपगन्तव्य एव, अतः शरीरारम्भोभविष्यति न वेत्येष एव विशेषः। किमस्याचित्संसर्गे प्रमाणमिति चेत् स्वपरयाथात्म्यानुभवाभावः मायाजवनिकान्तर्हितो हि जीवो यथावस्थितं स्वरूपं न जानाति किं कारणमिति चेत् कर्मविशेषः, उक्तं च वेदार्थसंग्रहे सर्वकर्मविनिर्मुक्तात्मस्वरूपावाप्तिर्हि भगवत्प्राप्तिगर्भाऽत इमे सत्याः कामा अनृतापिधाना इति भगवतो गुणगणस्य तिरोधायकत्वेनानृतशब्देन स्वकर्मणः प्रतिपादनादिति, यद्यस्य निःशेषाविद्याविलयेऽपि परमात्मयाथात्म्यानुभवो न स्यात् अन्येषामपि तथा स्यात् अविशेषात् तावदेवास्य स्वाभाविकरूपं स्यात् अचित्संसर्गेऽपि कथमसौ पुनर्न संसरतीति चेत् कैवल्यकर्मजनितभगवत्सङ्कल्पस्य तथाविधत्वादिति भाव्यम्। ननु तापत्रयाभिहतोऽयमीश्वरज्ञानादेव विशुद्धिं गतः तत्कथं विशदस्वात्मानुभवदशायामीश्वरं विस्मरेदिति चेत् सम्यगुक्तं तथाऽपि कैवल्यसद्भावे निर्बन्धश्चेत्

पूर्वोक्त एव हेतुः, उक्तं च सङ्गतिमालायां श्रीविष्णुचित्तैः ननु ब्रह्मप्राप्तीच्छयोपक्रान्तस्योपासनस्य कथं केवलप्रापकत्वमुच्यते यथा स्वर्गकामस्यैव यागे प्रक्रान्तस्य यथावदननुष्ठाने ब्रह्मराक्षसत्वादि भवतीति ।

ननु कस्यैवंविधे स्वाभाविकभगवदनुभवयोग्यतागन्धविधुरतया दग्धबीजपर्याये स्वात्मन्यभिलाषः स्यादिति चेत् हन्तानेवंविधेष्वपि स्वर्गपशुपुत्रभिक्षोदनादिष्वभिलाषिणो दृश्यन्ते किं पुनरतिशयानन्दशालिन्येवंविधे, प्रसिद्धं च प्रियास्पदत्वं स्वात्मनः, आगमश्च आश्चर्यवत्पश्यति कश्चिदेनमित्यादि सुप्तोत्थितप्रत्यभिज्ञानं सुखमहमस्वाप्समित्येवंरूपं प्रागेवोक्तं, प्रपञ्चितं च भाष्यादिषु, श्रीविष्णुचित्तैश्चोक्तम्—

स्वापे सुखत्वाभिज्ञानात् तद्विच्छेदे च रोषतः ।
तदर्थमन्यत्यागाच्च श्रुतिस्मृतिशतैरपि ॥ इति,

कथमिह मोक्षव्यपदेश इति चेत्, दुःखहेतुभूतदेहेन्द्रियात्यन्तविलयात् केन मार्गेण केवलो गच्छति कुत्र तिष्ठतीति चेत् यत्र कुत्रापि न तावदर्चिरादिगतिः प्रकृतेः परस्ताद्वासश्चास्य युज्यते परमात्मोपासनप्रकरणेष्वेव तयोः श्रवणात्, तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धातप इत्युपासते इति विभागस्यापि परमात्मात्मकस्वात्मानुसन्धानस्वात्मशरीरकपरमात्मानुसन्धानभेदमूलत्वात्, यदि चास्यार्चिरादिमार्गेण गतिः स्यात् तदा विशिष्टदेशप्राप्त्या निःशेषाविद्यानिवृत्तिर्ब्रह्मप्राप्तिश्च स्यादेव स एनान् ब्रह्म गमयतीति श्रवणात् सूत्रं च दर्शनाच्चेति एवं च सति ज्ञानसङ्कोचहेतुभूताविद्यात्यन्तविलयात्सर्वज्ञत्वादिप्रसङ्गदुष्परिहरः भगवद्यामुनमुनिभिरपि संसृत्यक्षरवैष्णवाध्वस्विति वैष्णवाध्वा पृथगुपदिष्टः, अक्षिपुरुषस्य परमात्म-

त्वनिर्णयायोक्ते श्रुतोपनिषत्कगत्यभिधानाच्चेति सूत्रे भाष्यं च अधिगतपरमपुरुषयाथात्म्यस्यानुसंधेयतया श्रुत्यन्तरप्रतिपाद्यमानार्चिरादिका गतिर्या तामपुनरावृत्तिलक्षणपरमपुरुषप्राप्तिकरीमुपकोसलायाक्षिपुरुषं श्रुतवत इत्यादि, अतोऽपि केवलात्मानुसंधायिनोऽर्चिरादिगतिर्नास्ति, अन्यथा तया परमात्मनिर्णयायोगात् अप्रतीकालम्बनान्नयतीति बादरायण इति सूत्रे चात्र वक्तव्यं सर्वं प्रपञ्चितं भाष्ये, पञ्चाग्निविद्यानिष्ठस्यापि प्रकृतिविनिर्मुक्तब्रह्मात्मकस्वात्मानुसन्धायित्वं तत्रैव तत्क्रतुन्यायादिना निर्णीतं, भूमविद्यागतप्राणशब्दवाच्यकेवलजीवोपासकस्य चार्चिरादिगतिः कण्ठोक्त्या प्रतिषिद्धा, नामादिप्राणपर्यन्तप्रतीकालम्बनानां तूभयविधश्रुतिसिद्धोपासनाभावात्तत्क्रतुन्यायाच्चार्चिरादिगतिर्ब्रह्मप्राप्तिश्च न विद्यत इत्यादिना नामादिप्राणपर्यन्तोपासकानां विशेषं च दर्शयतीति सूत्रेण फलान्तरं च प्रदर्शितं, तदधिकरणोपसंहारे चोक्तं–तस्मादचिन्मिश्रं केवलं वा चिद्वस्तु ब्रह्मदृष्ट्या तद्वियोगेन च य उपासते न तान्नयति, अपि तु परं ब्रह्मोपासीनानात्मानं च प्रकृतिवियुक्तं ब्रह्मात्मकमुपासीनानातिवाहिको गणो नयतीति सिद्धमिति।

सारे चोक्तं पञ्चाग्निविदस्तु प्रकृतिवियुक्तात्मस्वरूपं य आत्मनि तिष्ठन्नित्यादिना ब्रह्मात्मकमुपासत इत्यप्रतीकालम्बनत्वं तत्क्रतुन्यायाविरोधश्च उभयेऽपि परिपूर्णब्रह्मोपासने मुखभेदेन स्वात्मशरीरं ब्रह्म, केचन ब्रह्मात्मकस्वात्मानमितर इत्यादि । एवं दीपेऽपि प्रपञ्चितं द्रष्टव्यम् एवं स्थिते गीताभाष्यवाक्यान्यपि तदनुरोधेन वर्णनीयानि पञ्चाग्निविदोऽर्चिरादिगतिस्तावत्सर्वग्रन्थेष्वविगीता, तस्य च परमात्मात्मकस्वात्मानुसंधातृत्वं सिद्धम् तस्य किं कैवल्यमेव पुरुषार्थः उत परमात्मानुभवोऽपी-

त्यत्र विशयः तत्र च शारीरकभाष्याद्यनुसारे तस्य परमात्मानुभवः, गीताभाष्यस्वारस्यानुसारे कैवल्यमिच्छन्ति, उभयाविरुद्धतया ग्रन्थनिर्वहणं तु गीताभाष्यटीकायां तात्पर्यचन्द्रिकायामुक्तमस्माभिः, तत्र किञ्चिदुच्यते यस्त्वयम् आत्मयाथात्म्यविदः परमपुरुषनिष्ठस्य च साधारणीमर्चिरादिकां गतिमाहेत्यादिग्रन्थस्तु प्रस्तुतत्वमात्रेण कैवल्यनिष्ठपरमपुरुषनिष्ठविषय इति न मन्तव्यम् । किंतु परमात्मात्मकस्वात्मानुसन्धातृस्वात्मशरीरकपरमात्मानुसन्धातृभेदभिन्नब्रह्मविद्विषय एव, तथा सत्यात्मयाथात्म्यविच्छब्दोऽप्यत्यन्तानुगुणः एकग्रन्थशकलास्वारस्यं बहुग्रन्थस्वारस्याय ग्राह्यम् । न चात्र कश्चिद्भगवद्यामुनमुनिवचनविरोधगन्धोऽपीति गीताभाष्येऽपि पञ्चाग्निविद्यानिष्ठस्य ब्रह्मात्मकस्वात्मानुसन्धानं तत्क्रतुन्यायात् ब्रह्मप्राप्तिश्च स्फुटतरं प्रत्यपादि ।

केचित्तु ब्रह्मभूतस्वात्मा कैवल्यभोग्यः, ब्रह्मणस्तु स्वात्मविशेषणतया भानमात्रमस्तीत्याहुः । तर्हि न तत्कैवल्यं भवेत् साधनतो गतितः प्रमाणतः प्रकारतश्च दुर्निरूपं च तदित्यात्मयाथात्म्यविदः ।

कान्तां प्राप्य विचित्रकर्मरचितां पर्यायतोभूमिकाम् ।
केनाप्यद्भुतनाटकेन कमपि श्रीमन्तमानन्दयन् ॥
कृत्वा शास्त्रमुखे मनः प्रतिमुखं गर्भावमर्शात्परम् ।
विद्यानिर्वहणेन लब्धविभवो ह्येष विद्योतते ॥

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु न्यायसिद्धाञ्जने जीवपरिच्छेदो द्वितीयः ॥

श्रियै नमः श्रीधराय नमः श्रीमते रामानुजाय नमः ।
सन्तु शुभाशिषः पूर्वाचार्या लोकद्वयसर्वमङ्गलाय नः ॥

॥ श्रीः ॥

श्रियै नमः ।

श्रीधराय नमः ।

श्रीमते रामानुजाय नमः ।

न्यायसिद्धाञ्जने ईश्वरपरिच्छेदः ।

अथेश्वरश्चिन्त्यते सर्वेश्वरत्वं, व्यापकत्वे सति चेत-
नत्वं, सर्वशेषित्वं, सर्वकर्मसमाराध्यत्वं, सर्वफलप्रदत्वं,
सर्वाधारत्वं, सर्वकार्योत्पादकत्वं, स्वज्ञान-स्वेतरसमस्त-
द्रव्यशरीरकत्वं, स्वतःसत्यसङ्कल्पत्वादिकं चेश्वरलक्षणम् ।
यत्तु जन्मादिसूत्रे जन्मादित्रितयसमाहारो लक्षणमुक्तं,
तत्रैकैकस्य लक्षणत्वे सम्भवत्यपि त्रयाणां त्रयः कर्तार इति
कुमतिशङ्काव्यावर्तनाय तदिति मन्तव्यं, सत्यादिवाक्येऽ-
प्यनन्तपदेनैव सर्वव्यवच्छेदसिद्धौ शङ्कितक्रमेण व्यवच्छे-
दात्पूर्वविशेषणद्वयम्. एवमन्यत्रापि भाव्यम्, अद्वितीय-
समाभ्यधिकदरिद्रत्वश्रवणादसावेकः स एव ब्रह्म, तस्यैव
त्रिविधपरिच्छेदरहितस्य सर्वात्मकत्वेन निरतिशयबृहत्त्व-
बृंहणत्वश्रवणात् अग्निः सर्वा देवताः, आपो वा इदꣳ सर्वं,
ब्राह्मणो वै सर्वा देवताः, नकिरिन्द्र! त्वदुत्तरः इत्यादेर्व्या-
घातकर्मशेषत्वाभ्यामन्यपरत्वनिर्णयान्न तेषामानन्त्यब्रह्म-
त्वादिसिद्धिः, स एव सदसदव्याकृतब्रह्मात्माकाशप्राण-
शिवनारायणादिशब्दैः कारणप्रकरणगतैः सामान्यतो वि-
शेषतश्च व्यपदिश्यते, न चं वृश्चिकोत्पत्तौ गोमयवृश्चिकादि-
वज्जगदुत्पत्तौ देशकालभेदात्कारणानियमः किं न स्यादिति
वाच्यं प्रमाणान्तरेण भेदासिद्धेः, शब्देन तु समानप्रकरण-
त्वप्रत्यभिज्ञानात् सर्वशाखाप्रत्ययन्याय-सामान्यविशेष-

न्यायाभ्यामेकत्वादिकण्ठोक्त्या भिन्नार्थोपपत्तौ भेदकल्पनायोगात्, अतो न प्रधानादेर्ब्रह्मत्वं, नापि ब्रह्मरुद्रादेस्तेषां सृज्यत्वसंहार्यत्वकर्मवश्यत्वादिश्रवणेन जीवत्वसिद्धेः।

कण्ठोक्तकर्मवश्यत्वकार्यत्वेषु न हेतुता।
कार्यतालीलया युक्ता कारणस्य हतैनसः॥

कारणादिप्रकरणेषु च तत्तद्वाचकशब्दानां शरीरिपर्यन्ततया निर्वचनान्तरेण वाऽऽकाशप्राणादिशब्दवत्परमात्मन्येव पर्यवसानसिद्धेः, तदयं संग्रहः।

परविद्यासु जीवोक्तिर्निरुक्त्यादेः पराश्रया।
तल्लिङ्गानन्यथासिद्धौ तद्विशिष्टावलम्बिनी॥

स्वोपासनोपदेशस्वसर्वैश्वर्यप्रपञ्चनादेश्च प्रह्लादवामदेवादिवच्छास्त्रावगतस्वात्मशरीरकपरमात्मानुसन्धानमूलत्वात्, तस्य च सर्वशरीरस्य यथाविधि चेतनाचेतनविशिष्टतयाऽप्युपास्यत्वोपपत्तेः, अथर्वशिरःश्वेताश्वतरादीनां निर्वाहः पुरुषनि*र्णये प्रपञ्चितः श्रीभाष्यकारैश्च वेदार्थसंग्रहभाष्यादिषु, तदखिलानुसन्धायिभिर्वात्स्यवरदगुरुभिस्तत्त्वनिर्णयाख्ये प्रकरणे सर्वो निष्कर्षः संगृहीतः, तत्त्वसारे च।

कस्त्वं तत्त्वविदस्मि वस्तु परमं किं तर्हि विष्णुः कथं
तत्त्वेदम्परतैत्तिरीयकमुखत्रय्यन्तसन्दर्शनात्।
अन्यास्तर्हि गिरः कथं गुणवशादत्राह रुद्रः कथं
तदृष्ट्या कथमुद्भवत्यवतरत्यन्यत्कथं नीयताम्॥

इत्यादिभिः श्लोकैः संगृहीतः, एवं च नारायणस्यैव परमकारणत्वमुमुक्षूपास्यत्वसर्वान्तर्यामित्वादिसिद्धेस्त्रिमूर्तिसाम्यैक्योत्तीर्णव्यक्त्यन्तरपरत्वपक्षाश्चत्वारोऽपि नि-

* भगवद्यामुनमुनिविरचितः परमात्मयाथात्म्यनिरूपणपरो ग्रन्थः।

श्रीमद्रामदयालुरिन्दुरमलो मोदाय भूयात्सद...

नत्वा शंभुं हरिं गौरीं विधिं ढुण्ढिं च भारतीम् ।
क्रियते रघुनाथेन लौकिकन्यायसंग्रहः ॥ २ ॥
लौकिकन्यायरत्नानामाकरे यत्प्रदर्शितम् ।
तस्य संक्षेप एवेह शीघ्रबोधाय दर्श्यते ॥ ३ ॥
न्यायार्थं विषयं चैवोदाहृतिं च यथामति ।
वदिष्यामोऽत्र संक्षेपाद्विस्तरादपि च क्व चित् ॥ ४ ॥
प्रसङ्गादागतानां तु न्यायानां तत्र विस्तृतेः ।
अर्थमात्रं वदिष्यामः क्व चिदन्यामुदाहृतिम् ॥ ५ ॥
प्रसङ्गादायाता अपि निगदविख्यातविषया
न ते व्याख्यास्यन्ते पुनरसकृदुक्ताश्च विरलाः ।
पुनर्व्याख्यास्यन्ते विषयकथनादिप्रवितताः
पुरोऽप्रोक्तान्कांश्चित्पुनरपि वदिष्यामि विषये ॥ ६ ॥
अर्थादर्थो न शब्दार्थ इत्याद्या वृद्धसूक्तयः ।
पूर्वैर्न्यायतया प्रोक्ता वदिष्यामस्ततस्तथा ॥ ७ ॥
उदाहृतिं वदिष्यामः प्रायो वेदान्तशास्त्रगाम् ।
मीमांसान्यायगां क्वां चित्क्वां चिच्चापरशास्त्रगाम् ॥ ८ ॥
आम्नायशिरसामस्या निबन्धत्वं न तावता ।
स्याद्वैशेष्यात्तु तद्वाद इति न्यायसमाश्रयात् ॥ ९ ॥

तथा ऽप्येषां वेदान्तत्त्वं यथा श्रुतम् ॥ १३ ॥
यथा चान्यनिबन्धेषु बहुष्वप्यन्यगोचरः ।
विचारो दृश्यते तद्वद्भवत्वऽत्रापि न क्षतिः ॥ १४ ॥
ससैन्धवे ऽपि मौद्गे हि सूपे मौद्गत्ववद् ध्रुवम् ।
श्रुत्यन्तस्य निबन्धत्त्वं निबन्धस्यास्य गम्यताम् ॥ १५ ॥
तत्तदीयैरनूबन्धैरिदं स्यादनुबन्धवत् ।
तदीयाः के ऽनुबन्धाः स्युरिति चेत्त्वमवेहि तान् ॥ १६ ॥
स्यादत्रोपनिषन्नाम छन्दसां काण्ड उत्तरः ।
वेदान्तस्तदनुग्राहि सूत्रभाष्यादिकं तथा ॥ १७ ॥
अधिकारी सविषयः सम्बन्धः सप्रयोजनः ।
अनुबन्धा इति ख्याताश्चत्वारः सन्ति शास्त्रगाः ॥ १८ ॥
अधीतवेदवेदाङ्गो ह्यापातब्रह्मबोधवान् ।
बहुजन्मार्जितैः पुण्यैः सम्यगाराधितेश्वरः ॥ १९ ॥
ब्रह्म नित्यमनित्यं तु जगदेवं विवेचकः ।
ऐहिकामुष्मिकेभ्यश्च भोगेभ्यो विरतः सदा ॥ २० ॥
यत्नेन मनसो नित्यं विषयेभ्यो निवर्त्तकः ।
तेभ्यो बाह्येन्द्रियाणां च बलादाकर्षकः सदा ॥ २१ ॥
उभयेषां निवृत्तानां तथा स्थापनयत्नवान् ।
शीतोष्णसुखदुःखानां तथा मानापमानयोः ॥ २२ ॥

सहिष्णुः श्रवणादौ च सर्वदैव समाहितः ।
गुरुवेदान्तवाक्येषु केवलाद्वैतवृत्तिषु ॥ २३ ॥
दृढविश्वासवान्धीरः सत्यवादी दयान्वितः ।
अहं बद्धो विमुक्तः स्यां कथमेवं विचिन्तकः ॥ २४ ॥
वेदान्तेष्वधिकारी स्याद्वेदान्तज्ञैर्विनिश्चितः ।
तद्विषयस्तु जीवस्यात्यन्ताभेदः परात्मना ॥ २५ ॥
तत्रैव तस्य तात्पर्यं नान्यत्रैवं विनिश्चितः ।
स एव विषयस्तस्य न्यायविद्भिर्विनिश्चितः ॥ २६ ॥
यत्परः शब्द इत्यादेर्न्यायादर्थव्यवस्थितिः ।
गङ्गायां घोष इत्यादिलौकिकेष्वपि दृश्यते ॥ २७ ॥
प्रयोजनवति श्रुत्या तात्पर्यं च विनिश्चितम् ।
स्वाध्यायस्य विधेर्नूनं विरोधो ह्यन्यथा भवेत् ॥ २८ ॥
तच्च प्रयोजनं ब्रह्माद्वैतज्ञानेन सिध्यति ।
ब्रह्मविद्भवति ब्रह्मेत्यादिशास्त्रानुशासनात् ॥ २९ ॥
न भेदे तस्य तात्पर्यं सिद्धत्वादन्यमानतः ।
प्रयोजनविहीनत्वान्निन्दितत्वाच्च सर्वथा ॥ ३० ॥
मृत्योः स मृत्युमाप्नोति यो ऽत्र नानेव पश्यति ।
अल्पमप्यन्तरं कुर्वन्बिभेतीति श्रुतौ श्रुतम् ॥ ३१ ॥
प्रधानादौ न तात्पर्यं श्रुतेः किं त्वन्तरात्मनि ।
उपक्रमोपसंहारमुखैर्लिङ्गैर्विनिश्चयात् ॥ ३२ ॥
मतान्तरनिरासेन ह्येतदर्थप्रपञ्चनम् ।
भविता ऽग्रे तदेतस्य विस्तराद्धुपरम्यते ॥ ३३ ॥
प्रतिपाद्यस्य चैक्यस्य जीवात्मपरमात्मनोः ।
वेदान्तानां च संबन्धं बोध्यबोधकतां विदुः ॥ ३४ ॥
तेषामेकत्वबोधेनोत्पाद्योत्पादकतां तथा ।
प्रयोजकप्रयोज्यत्वं संबन्धः शास्त्रमोक्षयोः ॥ ३५ ॥
हेतुमद्धेतुभावश्च संबन्धो मोक्षबोधयोः ।

संबन्धो ऽभिहितो ऽभिज्ञैरुक्तभेदैश्चतुर्विधः ॥ ३६ ॥
अद्वैतावरकस्यास्य मूलाज्ञानस्य बाधनम् ।
सविलासस्य संप्राप्तिश्चानन्दस्य प्रयोजनम् ॥ ३७ ॥
कल्पितस्य निवृत्तिश्च नाधिष्ठानातिरेकिणी ।
रज्जुसर्पनिवृत्तिर्हि न रज्जोरतिरिच्यते ॥ ३८ ॥
प्रत्यगात्मतया तस्य प्राप्तत्वे ऽपि च सर्वदा ।
कण्ठचामीकरन्यायात्तत्प्राप्तिरुपचर्यते ॥ ३९ ॥
ब्रह्मैव सन्नयं ब्रह्म प्राप्नोतीति श्रुतौ श्रुतम् ।
विमुच्यते विमुक्तश्च निवृत्तश्च निवर्त्तते ॥ ४० ॥
अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत् ।
इष्टस्यार्थस्य संप्राप्तौ को विद्वान् यत्नमाचरेत् ॥ ४१ ॥
इति न्यायं समाश्रित्य दुर्दुरूढदुरुक्तयः ।
यास्ताः सम्यङ्निरस्ताः स्युः श्रुतिन्यायसमाश्रयात् ॥४२॥
अनाद्यविद्यया तस्या वृत्तेः सो ऽप्राप्तवद्भवेत् ।
विद्यया तन्निवृत्तौ तु प्राप्त इत्युपचर्यते ॥ ४३ ॥
स्वाधिष्ठानातिरेकेण न सत्ता कल्पितस्य वै ।
विद्यया तन्निवृत्तिस्तूपचारादिति निश्चिनु ॥ ४४ ॥
स्वबाहौ कल्प्यमानस्य भुजङ्गस्य निवर्त्तनम् ।
न दृष्टं वस्तुनो लोके दण्डाद्यैर्बाह्यसर्पवत् ॥ ४५ ॥
अतश्च द्विविधे ऽपि स्यादैकरूप्यं प्रयोजनम् ।
आत्मरूपेण संस्थानं ततः सिद्धं प्रयोजनम् ॥ ४६ ॥
संक्षेपेणानुबन्धा हि श्रौताः प्रोक्ता यथामति ।
तदनुग्राहिसूत्रादेस्तएवैवं विनिश्चिनु ॥ ४७ ॥
तथा तस्य निबन्धानामनुबन्धास्तएव च ।
अस्याप्येतन्निबन्धत्वादनुबन्धा भवन्ति ते ॥ ४८ ॥

अत्र सर्वत्र निबन्धपदं प्रकरणपरम् । ननु किमिदं सूत्रादेः श्रुत्यनुग्राहित्वं तदर्थावबोधहेतुत्वमिति चेन्न तत एव तत्सम्भवेन तद्वैयर्थ्यात् अन्यथा विषयासिद्धेर्विचारानुपपत्तेः । स्वीकृत्येदमुक्तम् । वस्तुतस्तु वेदान्तविषय एव न सम्भवति जीवब्रह्मैक्यस्य तद्विषयत्वाद्विरुधर्मकयोश्च तयोस्तदयोगादिति । उच्यते । यद्यपि वेदान्तेभ्य एव तदर्थप्रमा जायते तथा ऽपि तेषां परपरिकल्पितार्थान्तरपरत्वसंशयादसम्भावनादिपुरुषदोषप्रतिबन्धवशाच्च प्रमासामग्र्या जायमाना ऽपि सा नाविद्यानिवर्त्तनक्षमा किं तु मज्जनोन्मज्जनन्यायेनाप्रतिष्ठितेव भवति । अतस्तादृशप्रतिबन्धनिरासेन प्रमाणजन्यायाः प्रमितेः स्वविषयप्रतिष्ठत्वस्थिरीकरणाय विचारशास्त्रमारम्भणीयम् । यत्तु विरुद्धधर्माक्रान्तत्वाज्जीवब्रह्मणोरैक्यासम्भव इति तन्न । विरोधस्य भेदाधीनतया तदसिद्धावसिद्धा ऽद्वैतवादिनं प्रति स्वरूपासिद्धेः । अनुमानेन श्रुतिबाधायोगाच्च । किञ्च सर्वमानोपजीव्यप्रत्यक्षविरोधे ऽप्यागमस्यैव प्राबल्यमित्युत्सर्गः तथा च तत्पादोपजीविनो वराकस्यानुमानस्य का कथा । तथा च स्मृतिः प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतमिति । तथा च न विषयविचारयोरसिद्धिरिति सिद्धम् । नूतनतार्किकोत्थापितकुतर्कनिराकरणेन मन्दानवगाह्यभाष्याद्युक्तितात्पर्यवर्णनेन च प्रकरणानां साफल्यम् । अस्य तु प्रकरणान्तरैस्तुल्यावान्तरविषयादिमत्त्वे ऽपि सर्वशास्त्रेतिहासपुराणसाहित्यव्याकरणकाव्यनाटकाख्यायिकादिषु वर्त्तमानदुरवगाह्यलौकिकन्यायनिचयार्थविषयाद्युद्धाटनेन सर्वोपकारित्वादवश्यारभ्यत्वम् । परमविषयादयो यद्यपि प्रकरणानां शास्त्रीया एव तथा ऽपि प्रकरणत्वादेवावान्तरविषयादयः सन्त्येव । तत्र सारं जि-

घृक्षुरवान्तराधिकारी । सगुणनिर्गुणरूपविषयभेदं विहाय निर्गुणमात्रमिह विषयः शास्त्रैकदेशसंबद्धमित्यंशेन संगृहीतः । तन्मात्रावधारणमतिगूढशास्त्रतात्पर्योद्घाटनं च तार्किकोद्भावितशास्त्रतात्पर्यपरिपन्थिकुतर्कनिराकरणं चावान्तरप्रयोजनं शेषेण संगृहीतम् । संबन्धस्तु विषयानुरूप इत्यलं प्रपञ्चेन ।

अथ व्याख्येयन्यायव्याख्यानमारभ्यते । तत्र तावन्न्यायसप्तके प्रायस्त्वंपदार्थशोधनम् । ततो ऽष्टमे वृद्धप्रकम्पनन्याये तत्पदार्थशोधनपुरःसरं वाक्यार्थनिरूपणं भविष्यति । स्थूणनिखननसिंहावलोकनन्यायाभ्यामुक्तार्थदार्ढ्याय तद्विरुद्धमतान्तरनिरासाय चोत्तरग्रन्थप्रवृत्तिः । यत्रापि सूक्ष्मार्थज्ञापनाय क्रमेण तत्समीपसमीपतरसमीपतमो ऽर्थस्तत्तयोच्यते तत्र स्थूलारुन्धतीन्यायो ऽवतरति । यथा ध्रुवमरुन्धतीं च दर्शयतीति विधिबलाद्वरवध्वोस्तद्दर्शने प्राप्ते ऽतिसूक्ष्मायास्तस्याः झटिति दर्शयितुमशक्यतया तावच्चन्द्रं तत्त्वेन वदन्ति । ततश्चन्द्रेतरास्तत्समीपस्थास्तारकाः । ततः सप्तर्षिसंज्ञकाः समीपतराः । ततः समीपतमं वसिष्ठं तत्त्वेनोक्त्वा तमेव तत्तया बोधयन्ति तथा गृहादीनात्मानमिव मन्यमानाः प्राकृता गृहे नष्टे नष्टो ऽहमिति क्रोशन्तो दृश्यन्ते । तान्वारयन्ती श्रुतिः आत्मा वै जायते पुत्र इति तावत्पुत्रमात्मत्वेन वदति । ततो ऽस्य धीः पुत्रात्मत्वे मा पर्यवस्यत्विति स वा एष पुरुषो ऽन्नरसमय इति देहमात्मानं वदति ततो देहमेवात्मानं न जानीयादिति तात्पर्यवती श्रुतिस्ते ह प्राणाः प्रजापतिं समेत्य ब्रूयुरित्यादिना श्रोत्रादीनां चेतनत्वं सूचयन्ती तदविनाभूतमात्मत्वं सूचयति । तथैव पुनरन्यो ऽन्तरात्मा प्राणमय इति प्राणात्मत्वं ब्रूते । इन्द्रिया-

प्रचुरत्वादानन्दमयो बन्धहेतुत्वात्कोशः सूक्ष्मस्थूलदेहकारणत्वात्कारणशरीरमिति चोच्यते। तदुपहिता चित्प्राज्ञ इत्युच्यते। मायोपहिता त्वीश इति। एतयोरैक्यमग्रे वक्ष्यामः। कोशानामनात्मत्वे तु पूर्वा एव युक्तयो ऽनुसन्धेयाः। संघातानात्मत्वमपीन्द्रियबृन्दानात्मत्ववन्निश्चेयमिति दिक्। इति स्थूलारुन्धतीन्यायः। अत्रादित आरभ्यैतावद्ग्रन्थसन्दर्भे प्रसङ्गाद् ग्रन्थान्तरेष्विव ये न्यायाः पठितास्ते पाठक्रमेणैव लिख्यन्ते सङ्गतिस्तु मुख्येष्वेव यथास्वं भिक्षुपादप्रसारणन्यायेनातिदेशसङ्गतिः। प्रासङ्गिकेष्वपि यस्यान्यस्य सङ्गतिर्भविता तस्याप्यर्थमात्रं वदिष्यामः। एवमग्रेपि बोध्यम्।

यश्चार्थादर्थे[illegible] [illegible]दनार्थ इति न्या०। शबरस्वामिवचन[illegible] [illegible]त्तरीयकतया लभ्यते [illegible] [illegible] स शब्दार्थ इति

म्बनन्यायः । अनेन हि दृढासु युक्तिषु निरस्तासु निर्बला युक्तीरवलम्बमानो ऽलमनेन कुशकाशालम्बनन्यायेनेति निरस्यते ॥ ७ ॥

यथा पङ्कलिप्ता तुम्बिका नदीसमुद्रादौ मज्जन्ती पङ्कक्षये ऽवकाशे आगत्य तिष्ठति तथा जीवो देहक्षये ऽलोकाकाशे गत्वा तिष्ठति अयमेव तस्य मोक्ष इति ।

प्रासादवासिन्यायो ऽप्यवतरति । एक एव देवदत्तः कालभेदेन प्रासादोपर्यधश्च वसन्नपि प्रासादवासप्राधान्येन प्रासादवासीत्युच्यते ॥ ३१ ॥

कार्येण कारणसंप्रय इति न्यायः ॥ ३२ ॥

तद्धेतोरेव तदस्तु किं तेनेति न्या० । तस्य कपालादेर्हेतोर्मृदादेरेव तत् घटादिकारण[...] किं तेनान्तर्गडुना कपालादिरूपकार्येणे[...]

कारणगुणप्र[...]

यगुण[...]

या[...]

तु यथा कश्चिद्भिक्षुर्यथेष्टान्नाच्छादनवासगृहादिलाभाय धनाढ्यगृहे प्रविष्टो युगपत्तल्लाभं दुर्लभं मन्वानः पूर्वमिह पादप्रसारस्तु मे भवतु पश्चात्परिचयं सम्पाद्य क्रमेण सर्वं साधयिष्यामीति धियाल्पां भिक्षां स्वीकरोति तथा मातेवातिहितैषिणी श्रुतिरद्वैततत्त्वे मुमुक्षुमतिप्रवेशमिच्छन्ती सकृत्तमशक्यं च मन्यमाना पूर्वोक्तक्रमेण संसारमुक्तये तद्बोधयतीति बोध्यम् ॥ २ ॥ ३८ ॥

सोपानारोहणन्यायो ऽपीह बोध्यः । यथा प्रासादमारुरुक्षुर्युगपदारोढुमशक्नुवन्पूर्वां कक्षां परित्यजन्नुत्तरामुत्तरां चारुहन् क्रमेण प्रासादमारोहति तथा स्वात्मभूतमपि ब्रह्माज्ञानाद्व्यवहितमिवापन्नमात्मत्वेन ज्ञातुकामः सहसा ज्ञातुमशक्नुवन्नन्तरो[illegible]त्वबुद्ध्या पूर्वपूर्वात्मत्वधीबाधेन क्रमेण [illegible]तं चतुर्थमात्मत्वेन जानातीति [illegible]

[illegible]रोपे

श्वरमात्रतया भावयेदिति एवं च यथा पूर्वोक्तक्रमेणावरोहणात्सुखेन भूमिमेति तथा तेन क्रमेण भावनात्सुखेन पुमानद्वितीयं शिवमेति । प्रलयो ऽप्यनेनैव क्रमेण बोध्यः । साक्षात्प्रकृतौ विकारलय इति न्यायात् । जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते । ज्योतिष्यापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते । अव्यक्तं पुरुषे ब्रह्मन्निष्कले संप्रलीयतइति स्मृतेश्च । वार्तिककारैर्विश्वादिनामपि विलापनक्रम उक्तः । अकारं पुरुषं विश्वमुकारे प्रविलापयेत् । उकारं तैजसं सूक्ष्मं मकारे प्रविलापयेत् । मकारं कारणं प्राज्ञं चिदात्मनि विलापयेदिति । अत्रापि तदतिरेकेण तदभावभावनैव विलापनम् । एषामनेनैव क्रमेण प्रलये उपाधिलयप्रयुक्तो लयो ऽपि बोध्यः । चिदात्मनो ऽपि कुत्र चि[illegible] स्यादिति शङ्कां वारयति श्रुतिः । पुरु[illegible] सा परा गतिरि[illegible]

त्मत्वे निरात्मत्वापत्तिः न च कस्य चिन्नाशे ऽवशिष्टस्य बृन्दस्यान्यत्वे ऽपि कस्य चित्तन्तोर्नाशे ऽप्यवशिष्टतन्तुबृन्दे स एवायं पट इति वदतिसाम्यात्प्रत्यभिज्ञा न विरुध्यते परिषद्न्यायेन च तत्कार्यनिर्वाहो ऽपीति शङ्क्यम्। उत्तरबृन्दस्य पूर्वस्माद्भिन्नतया पूर्वेणानुभूतस्योत्तरेणास्मरणापत्तेः नान्यदृष्टं स्मरत्यन्य इति न्यायात्। एकस्य कस्य चिदात्मत्वं तु विनिगमनाविरहेणाशक्यं वक्तुं तेषां प्रत्येकं भोक्तृत्वे स्वातन्त्र्ये च बहूनामैकमत्यासम्भवेन विरुद्धदिक्क्रियया बहुवृकाकृष्टमृगन्यायेन देहोन्मथनप्रसङ्गः। न च वरगोष्ठिन्यायेनैकमत्यं कदा चित्तत्सत्त्वे ऽपि सदा तदसम्भवात्। एकस्य प्राधान्योपगमे तु तस्यैवात्मत्वं युक्तम् स्वामिभृत्यभावस्य देहभेदव्याप्तत्वात्तदैक्ये स्वामिभृत्यन्यायस्याप्यप्रवृत्तेः तस्माद्युक्ता श्रुत्या तेष्वात्मत्वधीनिरासाय प्राणस्यात्मत्वोक्तिः। प्राणे ऽपि तन्निरासायान्योन्तरात्मा मनोमय इति वदति। एवमन्यो ऽन्तरात्मा विज्ञानमयो ऽन्योन्तरात्मा ऽनन्दमय इत्यादावपि बोध्यम्। ततः पुत्राद्यानन्दमयान्तानामनात्मत्वं दर्शयन्ती श्रुतिर्निर्विशेषात्मतत्त्वमेवात्मत्वेन दर्शयति। तथा हि कश्चिद्धीरः प्रत्यगात्मानमैक्षत् अस्थूलमनणवह्रस्वमदीर्घमचक्षुरश्रोत्रम् अप्राणो ह्यमनाः शुभ्रः अनन्तश्चात्मा विश्वरूपो ह्यकर्त्ता न चास्ति वेत्ता मम चित्सदा ऽहं चिन्मात्रो ऽहं सदाशिवः एष ते आत्मा सर्वान्तर इत्याद्याः श्रुतयो ऽनादिप्रवाहानुवर्त्तमानचार्वाकादिभ्रमसिद्धस्य प्रकृतन्यायेन शुद्धाद्वैततत्त्वे मुमुक्षुधीनिवेशाय पूर्वोक्तश्रुत्याभासानूदितस्य पुत्राद्यात्मत्वस्य बाधपूर्वकमात्मतत्त्वं प्रतिपादयति। किं च पुत्रात्मत्वश्रुतेर्गौणत्वं स्पष्टमेव भेदप्रसिद्धेः ते ह प्राणा इत्यादिश्रुतौ प्राणादिशब्दास्तत्तद्देवतापरा इति

स्पष्टमाकरदृशाम् । अन्नमयाद्यानन्दमयान्तश्रुतेर्मुञ्जादिषीकोद्धरणन्यायेन सर्वान्तरब्रह्मपुच्छशब्दार्थसर्वबाधावधिभूतात्मतत्त्वप्रतिपत्त्युपायार्थत्वेनोपन्यस्तत्वान्न तस्याःस्वार्थपरत्वं प्रत्यगात्मत्वादिश्रुतीनां तूपक्रमादिलिङ्गैः स्वार्थपरत्वात्प्राबल्यम् । प्रयोगश्च पुत्राद्यानन्दमयान्तं जगदनात्मा दृश्यत्त्वाद्धटवदिति । आत्मा स्वेतरचैतन्यभास्यः पदार्थत्वादित्याद्यनुमानं त्वन्यदेव तद्विदितादित्यादिश्रुतिबाधितं ज्ञानेनैकान्तिकं च । ज्ञानसन्धिधेः चेत्स्ववद्येत्वे आत्माश्रयः पूर्ववेद्यत्वेऽनवस्था । अस्तु को दोषो मूलक्षयाभावात् न यदेव न ज्ञायते तदेवासत्संपद्यते । एवं तद्वेद्यमपीति सर्वेषां गड्डलिकाप्रवाहन्यायेनाप्रामाणिकत्वप्रयुक्तासत्त्वलक्षणान्धकूपपतनं स्यात् । ततश्च कथं न मूलक्षयप्रयुक्तो जगदान्ध्यरूपदोष इत्यलम् । तस्माद्देहादीतरस्तत्साक्षी वेदान्तैः प्रकृतन्यायेन बोध्यते इति सिद्धम् । पञ्चकोशावतरणन्यायस्तु श्रुतिमात्रसिद्धत्वान्न लौकिकः एतत्तुल्यविषयप्रयोजनश्च । तथा हि ये स्थूलदेहादयः श्रुत्याऽन्नमयादिशब्दैरुक्तास्ते कोशवत्क्रमेरात्मानन्दावरकतया क्लेशहेतुत्वात्कोशा इत्युच्यन्ते । तत्र पञ्चीकृतभूतोत्पन्नः स्थूलदेहोऽन्नमयकोशः । पञ्चीकरणं त्वचिन्त्यशक्तिरीश एकैकं भूतं द्विधा विधाय तेषु पञ्च भागान्प्रत्येकं चतुर्धा विधाय तेषां स्वस्वद्वितीयभागानन्यस्थूलभागेषु योजयति । एवं च ते प्रत्येकं पञ्चपञ्चात्मका भवन्तीति । तेषु वियदादिव्यवहारस्तु मल्लग्रामन्यायेन स्वांशाधिक्यात् । ननु पुराणोक्तं तारतम्यं दशांशैर्भूतपञ्चक इत्यार्योक्तेस्तन्मूलेतिहासादेश्च व्योमादिदशमांशसाम्यं वाय्वादेरिति गम्यते । तथा चाकाशस्यापि वाय्वादिसर्वांशापेक्षयाऽप्याधिक्यात्सर्वत्र तद्व्यवहार एव स्यादिति उच्यते ।

न्यूनाधिकभावो हि ब्रह्माण्डावेष्टनभूतेष्वेव नान्तर्गतेषु अनुपलम्भात्। यथा ऽऽहुः ब्रह्माण्डावरणेष्वेषा न्यूनाधिकविचारणेति। तानि चापञ्चीकृतान्येवेति वासिष्ठादौ प्रथितं यथा च स्वांशाधिक्यात्तत्तद्व्यवहारयोग्यानि स्युस्तथैव मेलितानि। यत्तु क्वचित्समं विभज्येति पाठः तत्र सममिति संपातायातम्। यद्वा समं तत्तदंशाधिक्यात्तत्तद्व्यवहारयोग्यं यथा स्यात्तथेति समर्थनीयम्। एवं हि व्योम्नि शब्दो ऽभिव्यज्यते वायौ स्पर्शोऽपि। एवमग्रे ऽपि बोध्यम्। न च सर्वत्र सर्वे कुतो नाभिव्यज्यन्ते ऽभिव्यञ्जकस्य पञ्चीकरणस्य साम्यात् तस्य प्राग्विद्यमानगुणाभिव्यञ्जकत्वाङ्गीकारात्। न चैवं सर्वत्रैकैकगुणाभिव्यक्तिरेव स्यात्। कार्ये कारणगुणानुवृत्तिस्वीकारेण व्योमादिषु क्रमेणैकद्वित्रिचतुःपञ्चगुणानां प्रागपि तत्त्वात्। त्रिवृत्करणश्रुतेः पञ्चीकरणोपलक्षणत्वान्न तस्याप्रामाणिकत्वम्। तेभ्यश्च स्थूलदेहादयो जायन्ते। ते च न हि त्रिपुत्रो द्विपुत्र इति कथ्यते इति न्यायेन पाञ्चभौतिका उच्यन्ते प्रचुरभागस्य भूतस्य प्राधान्यविवक्षायां देवदत्तापुत्रन्यायेन भौमादिव्यवहारभाजो भवन्ति। अवकाशादिरूपकार्योपलम्भाच्च कार्येण कारणसंप्रत्यय इति न्यायेनैकदेहे कारणतया पञ्चभूतसत्ता ऽवधार्या। स चैकानेकज्ञानगोचरतया वनवत्समष्टिर्वृक्षवद्व्यष्टिश्च भवति। यद्वा व्यक्तिषु जातिवत्सर्वव्यष्टिष्वनुस्यूतमण्डात्मकं समष्टिः प्रत्येकं शरीरं व्यष्टिः एतदुपहितं चैतन्यं विश्वनराभिमानित्वाद्विविधं राजमानत्वाच्च वैश्वानर इति विराडिति चोच्यते। व्यष्ट्युपहितं विश्वशरीरप्रविष्टत्वाद्विश्वः तथा हि। जीवस्य त्रय उपाधयः। सुप्तौ बुद्ध्यादिसंस्कारोपरञ्जितमज्ञानमात्रमुपाधिः स्वप्ने लिङ्गशरीरं तच्चाज्ञानोपरञ्जितमहमज्ञ इति प्रतीतेः। जागरे

तूभयशरीरसंसृष्टं स्थूलशरीरं पीनो ऽहं निश्छिनोम्यज्ञो ऽहमित्यनुभवात् एतदेवान्नविकारत्त्वादन्नमय इत्युच्यते। न च पूर्वोत्तरविरोधः पञ्चीकृताया भुव एवान्नाकारेण परिणतत्वात्तद्धेतोरेव तदस्तु किं तेनेति न्यायेन पाञ्च-भौतिकत्वानपायात्। तमःप्रधानाज्ञानोपहितचैतन्याद्व्यो-मादयो जायन्ते। तेषु च कारणगुणप्रक्रमन्यायेन सत्त्वादयो जायन्ते तत्र तद्गतरजोंऽशेभ्यो मिलितेभ्यः प्राणो जायते स चैको ऽपि स्थानभेदात्प्राणापानादिसंज्ञां लभते। ननु व्योमवद्देहे वृत्तिलाभमात्रेणावस्थितो बाह्यवायुरेवास्तु पञ्जरचालनन्यायेन वागादीनां सामान्यवृत्तिरूपा क्रिया वा ऽस्तु किं विशेषकल्पनागौरवेण धर्मिकल्पनातो धर्म-कल्पना वरीयसीति न्यायादिति चेन्न। एतस्माज्जायते प्राण इति श्रुतौ वायोरिन्द्रियाणां च प्राणात्पृथङ्निर्दे-शात्। तथा च न्यायः न वायुक्रिये पृथगुपदेशादिति। व्यस्तेभ्यस्तु क्रमेण वागादीनि जायन्ते। तत्सहितः प्राणः प्राणमयकोशो भवति। तत्सात्त्विकांशेभ्यो मिलितेभ्यो-ऽन्तःकरणं जायते तच्च मनोबुद्ध्याख्यवृत्तिभेदाद् द्विविधम्। व्यस्तेभ्यश्च तेभ्यः क्रमेण श्रोत्रादीनि जायन्ते तैः सहिते मनोबुद्धी मनोमयविज्ञानमयकोशावुच्येते। एतत्कोशत्रयं मिलितं सप्तदशावयवं सूक्ष्मशरीरमिति लिङ्गमिति चोच्यते। अत्रापि समष्टित्वव्यष्टित्वव्यवहारः पूर्ववन्मतभेदेन ज्ञेयः। तत्र समष्ट्युपहितं चैतन्यं हिरण्यगर्भ इत्युच्यते व्यष्ट्यु-पहितं तु तैजस इति। अनिर्वचनीयं ज्ञानबाध्यं भावरूपं त्रिगुणात्मकमज्ञानम्। तदेव जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवतीति श्रुतौ मायादिश-ब्देनोच्यते। तत्र शुद्धसत्त्वप्रधानं सन्मायेत्युच्यते मलिनस-त्त्वप्रधानं त्वविद्येति। सा च प्रियमोदादिसहिता ऽनन्द-

गुरुशास्त्रोपदेशेनात्मनि ज्ञाते तदात्मबुद्धिमपवदति ॥ ६ ॥ ४३ ॥

शाखाचन्द्रन्यायोऽपीदृशः । यथा चन्द्रं दिदर्शयिषुराप्त आदौ दिगन्तरगतनक्षत्रादिभ्यो दृष्टिं वारयितुं शाखायां चन्द्र इत्यधिकरणत्वेन संबन्धविशेषेणादौ शाखामुपलक्षणमुपादत्ते । ततश्च दिगन्तरव्यावृत्तचक्षुषश्चन्द्रसमीपवर्तितारकादिषु चन्द्रभ्रमो मा भूदिति तत्स्वरूपं प्रकृष्टप्रकाशात्मकं बोधयति । एवं हि बोध्यधीः सुखेन चन्द्रेऽवतारिता भवति तथा पञ्चकोशावतरणवाक्येष्वपि बोध्यम् । एवं ब्रह्मविदाप्नोति परमित्युपश्रुत्य ब्रह्मशब्दस्यानेकत्र प्रयोगदर्शनान्मुमुक्षुभिर्ज्ञेयो ब्रह्मशब्दार्थः क इति जिज्ञासोर्जगत्कारणत्वोपन्यासेन येषु जीवादिषु जगत्कारणत्वं न सम्भवति तेषां कार्योपाधितयोपाधिद्वारा स्रष्ट्यकोटौ निविष्टत्वेन स्रष्टृत्वासम्भवात्तेभ्यो व्यावृत्तबुद्धेरपि सम्भवज्जगत्कारणभावेषु प्रधानादिषु ब्रह्मत्वभ्रममपनेतुं स्वरूपलक्षणमुपन्यस्यते । न हि जडानां तेषां ज्ञानादिरूपतोपपद्यते । ततश्चाद्यं लक्षणं केभ्यश्चिद्व्यावृत्तिनिश्चयपूर्वकबुद्धिस्थिरीकरणार्थं द्वितीयं तु सर्वभ्रमनिवृत्तिपूर्वकवस्तुस्वरूपसत्तानिश्चयार्थं त्वंपदार्थतटस्थस्वरूपलक्षणयोरपीदमेव प्रयोजनं बोध्यम् ॥ ७ ॥ ४४ ॥

तत्रैकस्य वस्तुनो मतभेदेन बहूनि रूपाणि तत्तच्छास्त्रेषु प्रतिपाद्यमानान्युपलभ्य क्रिया हि विकल्प्यते न वस्त्विति न्यायाद्वस्तुनि विकल्पासम्भवं च मत्वा विरुद्धानां समुच्चयस्याप्यसम्भवेन तेष्वेकमतप्रतिपादितं सर्वाविरुद्धं वस्तु स्वीक्रियते तत्र वृक्षप्रकम्पनन्यायः प्रवर्तते । यथा वृक्षमारूढः पुमानधःस्थितैर्नरैः पूर्वमियं शाखा प्रकम्पितव्या पूर्वमियमिति भिन्नभिन्नशाखाप्रचालने नियो-

जितः तदधःस्थेनैव च केन चित्सर्ववृक्षप्रकम्पने प्रेरितः सर्वैः पूर्वप्रचालनस्याज्ञाततया यौगपद्यासम्भवेन क्रमविकल्पोपगमे ऽपि सर्वाविरोधासिद्धेस्तच्चिकीर्षया वृक्षं प्रकम्पयति तत्प्रकम्पनेन च सर्वाः शाखा अपि प्रकम्पिताः स्युरिति भवति सर्वैरविरोधः तथा योगादारभ्य स्थावरान्तेशवादिभिरविरोधायौपनिषदाभिमतो महेशो ऽङ्गीकार्यो वीतरागैर्मुमुक्षुभिः ।

ननु के तत्तदभिमता ईशाः कश्चौपनिषदाभिमतः । कथं च तदुपगमे सर्वैरविरोध इति चेच्छृणु तावद्योगाभिमतमीश्वरं क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः । सो ऽपि जीववदसङ्गश्चिद्रूपश्च परश्च जीवेभ्यस्तन्नियन्तृत्वात् । प्रधानक्षेत्रज्ञपतिर्गुणेश इति श्रुतेः । ननु नियन्तृत्वं नाम तत्तत्कर्मकारयितृत्वं तच्चासङ्गस्यानुपपन्नं यः कारयति स करोत्येवेति न्यायेन कर्तृत्वस्य दुर्निवारत्वात् । दृश्यते हि योधयितृषु नृपेषु दानादिकर्तृत्वं स्वयं योद्धृत्वं चेति । न लोहचुम्बकन्यायेनासङ्गस्यापि प्रेरकत्वोपपत्तेः । न च तन्निष्प्रमाणकम् । भीषा ऽस्माद्वातः पवतइत्यादिश्रुतिसिद्धत्वात् । बन्धमोक्षादिव्यवस्था पृथ्व्याद्यवस्थित्यनुपपत्तिसिद्धत्वाच्च । जीवानामपि स्वतः क्लेशादिरहितत्वे ऽपि बुद्ध्या सह विवेकाग्रहेण क्लेशादिमत्त्वाङ्गीकारात् । ईशस्तु सदा तैरसंस्पृष्ट इति विशेष इति । एतेन सेश्वरसांख्यवादो ऽपि व्याख्यातः । एतत्तुल्ययोगक्षेमत्वात् ।

तार्किकास्त्वसङ्गस्य नियन्तृत्वमसहमाना नित्यबुद्धीच्छाकृतिमान्पुंविशेष ईश्वरः । पुंविशेषत्वमप्यस्य बुद्ध्यादिगुणकत्वादेव नान्यथा नित्यज्ञानादिमत्त्वादनित्यज्ञानादिमज्जीवेभ्यस्तद्वैलक्षण्यमपि सिध्यति । क्षित्यादि सक-

गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यार्थस्य स्मरणं व्यापारो गवयो गवयपदवाच्य इत्युपमितिः फलम् । अयं गवयपदवाच्य इति तु न फलं तथात्वे गवयत्वस्य शक्यतावच्छेदकत्वालाभादिदन्त्वादेरननुगमाद् गोसादृश्यादेर्गौरवाच्च गवयत्वमेव शक्यतावच्छेदकं वाच्यमिति । एवं दीर्घग्रीवत्वाद्यसाधारणधर्मज्ञानादुष्ट्रे करभपदवाच्यत्वज्ञानात् तादृशधर्मज्ञानमप्युपमानमिति टीकाकृतः । तत्र च धिक् करभमतिदीर्घग्रीवं चपलतरोष्ठं कठोरकण्टकाशिनं पशुनामपसदमित्यादिवाक्यार्थस्मरणं व्यापार इति । एवं शक्त्यतिरिक्तमप्युपमानविषय इति भाष्यम् । तथाहि का ओषधी ज्वरं हन्तीतिप्रश्ने दशमूलसमौषधी ज्वरं हन्तीतिवाक्यार्थज्ञानाज् ज्वरहरणकर्तृत्वमुपमित्या विषयीक्रियत इत्यादि । उपमाने गवादिपदशक्त्याद्यनुमानापेक्षणादनुमानोपजीवकत्वमेव सङ्गतिरिति बोध्यम् ॥ ६ ॥

शब्दं लक्षयति विभजते च ।

आप्तोपदेशः शब्दः(१) ॥ ७ ॥

स चायं द्विविधो दृष्टादृष्टार्थभेदात्(२) ॥ ८ ॥

शब्द इति लक्ष्यनिर्देशः । शब्द्यते व्यज्यते शाब्दबोधविषयीक्रियतेऽर्थोऽनेनेतिव्युत्पत्त्या शाब्दप्रमाकरणं तदर्थः । शाब्दत्वं चेममर्थं शाब्दयामीत्याद्यनुव्यवसायसिद्धजातिविशेषः । आप्तोपदेश इति लक्षणम् । आप्तः प्रकृतवाक्यार्थयथार्थज्ञानवान् तदुपदेशः प्रकृतवाक्यार्थबुबोधयि-

(१) अथ शब्दः । आप्तोपदेशः शब्द इतीति वार्त्तिकम् । अथ शब्द इति भाष्यम् । लक्षणसूत्रं पठति । आप्तोपदेशः शब्द इति तात्पर्यटीकायां सूत्रभाष्यविभागो वर्णितः ।

(२) स द्विविधो दृष्टादृष्टार्थत्वादिति तात्पर्यटीकासम्मतः पाठः । स द्विविधो दृष्टादृष्टार्थत्वादितिसूत्रस्य तात्पर्यमाह । नियमार्थमिति तात्पर्यटीका ।

षाप्रयुक्तवाक्यम्। अत्र शुकादिवाक्ये भ्रान्तप्रतारकवाक्ये चाव्याप्तिरिति व्याख्यान्तरम्। शब्दः प्रमाणशब्द इत्यर्थः। प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीत्युपन्यासात्। आप्तोपदेश इति। आप्तो यथार्थशाब्दज्ञानकरणज्ञानविषयः तथाविधो य उपदेशः शब्द इत्यर्थः। अथवा आप्तो यथार्थ उपदेशः शाब्दबोधो यस्मादितिव्युत्पत्त्या यथार्थशाब्दज्ञानजनकवाक्यमित्यर्थः। लक्ष्ये प्रमाणपदं प्रमाणव्यवहारविषयपरं न तु यथार्थज्ञानकरणपरं लक्षणाविशेषप्रसङ्गादिति ॥ ७ ॥

स द्वैविध्यमिति। स प्रमाणशब्दः। तत्र दृष्टार्थः शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमितिविषयार्थकः। स च गेहे घटोऽस्तीत्यादिलौकिकशब्दः। अदृष्टार्थकश्च शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकः। यथा वेदः स्मृत्यादिश्च। वेदत्वं च तादृशप्रमित्यविषयार्थकत्वे सति शब्दजन्यवाक्यार्थज्ञानाजन्यप्रमाणशब्दत्वम्। दृष्टार्थकवाक्यवारणाय सत्यन्तम्। स्मृतिभारतादिवाक्यविशेषवारणाय विशेष्यदलम्। शब्दोपजीविप्रमाणं च वेदादिशब्दमुपजीव्य जातमनुमानादि। गवयो गवयपदवाच्य इत्युपमितिश्च शब्दविषयकतया शाब्दप्रमाकरणमित्युपमानोपजीवकतया शाब्दप्रमाकरणनिरूपणम् ॥ ८ ॥

उपसंहरति। समाप्तं प्रमाणप्रकरणम् ॥

इति प्रमाणलक्षणप्रकरणविवरणम् ॥

प्रमाविषयत्वमेव प्रमेयत्वमिति लक्षणस्य स्फुटतया तदुपेक्ष्य तद्विभजते।

आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्[१] ॥ ९ ॥

(१) एतदर्थप्रकाशनायात्मादिसूत्रमिति वार्त्तिकम्।

प्रमेयत्वमेकं सर्वत्रानुगतप्रतीतिबलात् सिद्धमित्येकवचननिर्देशः । तदर्थैकत्वस्य पदार्थतावच्छेदके प्रमेयत्वेऽन्वयः । यत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्याविरुद्धसंख्याया अविवक्षितत्वं तत्र विशेष्यविशेषणपदयोः समानवचनत्वनियम इति प्रमेयपदोत्तरमेकवचनं न विरुद्धम् । अत एव वेदाः प्रमाणं पुरूरवो माद्रवसौ विश्वे देवा इत्यादिप्रयोगा इति । आत्मत्वादिकं न प्रमेयमात्रविभाजकं संयोगादीनामपि प्रमेयत्वाद् द्वादशधेतिविभागानुपपत्तेः । किं तु मोक्षहेतुप्रमेयविभाजकम् । तथा च तुशब्दः पुनरर्थे । एते पुनः प्रमेयं प्रकर्षेण मेयम् । प्रकर्षश्च मोक्षहेतुज्ञानविषयत्वम् । अथवा तुशब्दश्चार्थे । तथा चोक्तानुक्तसमुच्चयलाभः । एवं च प्रमेयमात्रस्य साक्षात् परम्परया वा मोक्षप्रयोजकत्वेऽपि न क्षतिः । आत्मादीनां च प्राधान्येन विशेषनिर्देशः । तत्रापि पूर्वपूर्वप्राधान्यात् पूर्वपूर्वक्रमनिर्देशः ॥ ९ ॥

प्रथमोद्दिष्टमात्मानं निरूपयति ।

इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्[1] **॥ १० ॥**

आत्मनो जीवस्यात्मत्वेन जात्यानुगतत्वादेकवचनम् । लिङ्गं व्यञ्जकमनुमापकमिति यावत् । अनुमापकत्वं च निरूपकतावदनुमितिजनकतावच्छेदकविषयतावत्त्वसम्बन्धेनानुमितिकरणतावत्त्वम् । तत्करणताया एकत्वाभिप्रायेण लिङ्गमित्येकवचनम् । इच्छादिकं यत्किञ्चिद्द्रव्यवृ-

(१) लिङ्गमितीत्याकारः पाठो बहुषु सूत्रपुस्तकेषु दृश्यते । जयन्त्यकृतवृत्तिदर्शनात् न्यायसूचीनिबन्धदर्शनाच्च इतिरहितः सूत्रपाठो गम्यते । आत्मनः समानासमानजातीयविशेषणार्थं सूत्रम् । इच्छेति । इति वार्त्तिकम् ।

त्ति गुणादित्यादितादात्म्यसंसर्गेणेच्छादिरूपगुणादिहेतुनात्मसिद्धिः। तत्र चेच्छादि न शरीरवृत्ति मृतशरीरे तदभावाद् बाल्ये ऽनुभूतस्य यौवने ऽस्मरणप्रसङ्गाच्च बाल्ययौवनशरीरयोर्भेदादेकत्रानुभूतस्यान्यत्र स्मरणे ऽतिप्रसङ्गाच्च। नापि चक्षुरादिवृत्ति तदुपघाते ऽपि स्मरणदर्शनात्। नापि मनोवृत्ति इच्छादेरप्रत्यक्षत्वापत्तेः। आश्रयस्यातीन्द्रियत्व आश्रितस्य योग्यत्वासम्भवात्। भूतानां च पञ्चानामिच्छादिबाधस्य स्फुटत्वाच्चातिरिक्तद्रव्यवृत्तित्वसिद्धिस्तदेव द्रव्यमात्मेति प्राञ्चः। अत्रात्मन इदन्त्वास्पदत्वेन प्रत्यक्षसिद्धत्वादनुमानप्रदर्शनमयुक्तम्। न चात्मनोऽसाधारणधर्मत्वेनेच्छादिप्रदर्शनं तथा सति धर्माधर्मयोरपि प्रदर्शनापत्तेः। एतेन लिङ्गं लक्षणम्। न च लिङ्गमित्येकवचनेन मिलितानामेव लक्षणत्वं प्रतीयते तच्चायुक्तमेकैकस्यैव लक्षणत्वसम्भवादिति वाच्यम्। किं लक्षणमित्याकाङ्क्षायामिच्छादीनामभिधानान्मिलितं लक्षणमिति प्रयोजकाभावात्। तथा च प्रत्येकमेव लक्षणम्। अत्र ज्ञानेच्छाप्रयत्नानामात्ममात्रस्य लक्षणत्वं सुखदुःखद्वेषाणां संसारिणो लक्षणत्वमिति प्रत्युक्तम्। अत्रोच्यते। लिङ्गं लौकिकप्रत्यक्षविषयतायां विषयविधया नियामकम्। तथा चेच्छादिप्रकारेणैवात्मनो लौकिकमानसप्रत्यक्षविषयतेति बोध्यम्। लक्षणं तु ज्ञानादिमत्त्वं स्फुटमिति भावः॥ १०॥

क्रमप्राप्तं शरीरं लक्षयति।

चेष्टेन्द्रियार्थाश्रयः शरीरम्[1] ॥ ११ ॥

द्वन्द्वात् परः श्रूयमाणः शब्दः प्रत्येकमभिसम्बध्यत इतिन्यायाच्चेष्टादिपदोत्तराश्रयपदस्य प्रत्येकमन्वयाच्चेष्टा-

(१) शरीरं लक्षयितुं सूत्रं चेष्टेत्यादीति तात्पर्यटीका।

श्रयत्वादिलक्षणत्रये तात्पर्यम् । चेष्टात्वं च प्रयत्नजन्यतावच्छेदको जातिविशेषः । शरीरावयववारणायान्त्यावयवित्वेन विशेषणीयम् । इन्द्रियाश्रयत्वं च चक्षुर्गोलकाद्यवच्छेदेन संयोगसम्बन्धेन चक्षुष्मान् देवदत्तोऽयमित्यादिप्रतीतेः । देवदत्तत्वादेः शरीरवृत्तिजातित्वात् । अर्थाश्रयत्वमित्यत्रार्थशब्दो न रूपादिपरस्तदाश्रयत्वस्य घटादावतिव्याप्तेः । किं तु सुखदुःखान्यतरपरः । अत एव भाष्यम् । यस्मिन्नायतने सुखदुःखयोः प्रतिसंवेदनं प्रवर्तते स एषामाश्रयस्तच्छरीरमिति । न च सुखाश्रयत्वं दुःखाश्रयत्वमिति प्रत्येकं लक्षणम् । सुखाश्रयत्वस्य नारकिशरीरे दुःखाश्रयत्वस्य स्वर्गिशरीरे व्यभिचारात् । स्वर्गिशरीरे पातभीरुत्वनिबन्धनदुःखस्य नारकिशरीरे भाविसुखसम्भावनया सुखस्य स्वीकारे तादृशलक्षणद्वयमपि सम्भवति । वस्तुतोऽर्थपदमत्रात्मविशेषगुणपरं तेन ज्ञानाद्याश्रयत्वमपि लक्षणं भवतीति । आश्रयत्वं चावच्छेदकतासम्बन्धेन । वृक्षादौ च सुखादिस्वीकारान्नाव्याप्तिः । न च रामकृष्णादिशरीरे सुखादेरवच्छेदकत्वानङ्गीकारादव्याप्तिरिति वाच्यम् । एतल्लक्षणालक्ष्यत्वात् । सर्वसाधारणलक्षणं तु चेष्टावदन्त्यावयवित्वादिकमेव । वस्तुतस्तु चेष्टावदन्त्यावयविवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमेवात्र तात्पर्यविषयीभूतम् । तथा च तादृशरामत्वकृष्णत्वादिजातिमादाय तत्र लक्षणसङ्गतिः । कल्पभेदेन नरसिंहशरीराणां नानात्वात् तद्वृत्तिनरसिंहत्वजातिमादाय तादृशशरीरे लक्षणसमन्वयः । अत एव चेष्टानाश्रयखण्डशरीरविशेषस्वीकारेऽपि तत्र नाव्याप्तिस्तत्रापि चैत्रत्वमनुष्यत्वादिजातिमादाय लक्षणसङ्गतेरिति । यद्वा अर्थपदं रूपादिपञ्चकसमुदायपरम् । घटादौ शब्दाश्रयत्वाभावान्नातिव्याप्तिः । शरीरस्य

पाञ्चभौतिकत्वाद्रूपादिसमुदायवत्त्वाल्लक्षणसङ्गतिः । न च शरीरस्यापि पाञ्चभौतिकत्वमग्रे निरसनीयमिति कथं तादृशसमुदायवत्त्वं तस्येति वाच्यम् । समवायस्वसमवायिनिमित्तकत्वान्यतरसम्बन्धेन समुदायवत्त्वस्य विवक्षणात् पार्थिवाद्येकतरस्य भूतान्तराणां समवायिकारणत्वाभावेऽपि निमित्ततास्वीकारादिति । अत्र देहात्मबुद्धिलक्षणमिथ्याज्ञानमेव संसारनिदानं तन्निरासे च मोक्ष इति प्रधानतया तयोरादावुपन्यासः । एवं चेष्टादीनामपीति बोध्यम् ॥ ११ ॥

इन्द्रियाणि विभजते लक्षयति च ।

घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः(१) ॥ १२ ॥

इन्द्रियत्वस्यानुगतजातेरभावादिन्द्रियाणीति बहुवचनम् । अथ घ्राणाद्यन्यतमत्वमिन्द्रियलक्षणमित्यत्रास्य न तात्पर्यं मनसोऽपीन्द्रियत्वात् । न च घ्राणादीनामुपलक्षणत्वेन मनसोऽपि ग्रहणमिति वाच्यम् । भूतेभ्य इत्यस्यासङ्गत्यापत्तेः । नापि बहिरिन्द्रियलक्षणमिदं बहिरिन्द्रियत्वेन प्रागनुपन्यासात् तल्लक्षणाकाङ्क्षाविरहात् । एवं पञ्चधा विभागोऽप्यनुपपन्नो मनसः षष्ठत्वादिति । ननु मनसो नेन्द्रियत्वं तेन सूत्रे इन्द्रियमनसोः स्वातन्त्र्येण कीर्तनम् । न च मनःषष्ठानीन्द्रियाणीतिभगवद्गीतावचनासङ्गतिरिति वाच्यम् । वेदानध्यापयामास महाभारतपञ्चमानित्यत्र यथा अवेदेनापि महाभारतेन वेदपञ्चसंख्यापूरणं तथात्राप्यनिन्द्रियेणापि मनसेन्द्रियषष्ठसंख्यापूरणात् । नन्वत्रा-

---

(१) घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्य इति सूत्रम् । लक्षणसूत्राणि समानासमानजातीयविशेषणार्थानि सर्वाणीति सूत्राणां द्रष्टव्य इति वार्त्तिकम् ।

णामहं शशीतिवदिन्द्रियाणां मनश्चास्मीति भगवद्वाक्यमिति चेत् । न । सुखादिसाक्षात्कारजनकतयेन्द्रियत्वेन मनसः कल्पनात् । न च सुखादिकं साक्षात्करोमीतिप्रतीतिसिद्धं प्रत्यक्षत्वं सुखादिग्रहनिष्ठं नेन्द्रियजन्यत्वसाधकमप्रयोजकत्वादिति वाच्यम् । इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमित्यादिप्रागुक्तप्रत्यक्षलक्षणसूत्रविरोधादिति चेत् । अत्रोच्यते । आत्मेत्यादिसूत्रे इन्द्रियपदस्य बहिरिन्द्रियपरत्वं प्रसिद्धत्वान्मनसस्तदिन्द्रियत्वस्य च सर्ववादिसिद्धत्वाभावेन सप्रमाणं पृथक् तदुपन्यस्तम् । गन्धादीनां तदर्थत्वेन कथनादिन्द्रियपदस्य बहिरिन्द्रियपरत्वं स्फुटमेव । शरीरधर्मत्वेन तन्निरूपणानन्तरमिन्द्रियनिरूपणम् । तदधीनज्ञेयतया च तदनन्तरमर्थनिरूपणम् । आत्मादिजन्यतया च ततो बुद्धिनिरूपणम् । बुद्धौ सिद्धायामेव तदयौगपद्यसाधकतया तदसमवायिकारणसंयोगाश्रयतया च सिद्धिरिति ततस्तन्निरूपणम् । एतेषां कार्यतया प्रवृत्तिनिरूपणम् । ततो धर्मादिजनने सहकारितया दोषनिरूपणम् । ततः प्रेत्यभाव इति तन्निरूपणम् । ततः सुखदुःखे तत्र च सुखस्य रागविषयतया तत्क्रमेण तयोर्निरूपणम् । एवं रीत्या संसारस्तत्त्वज्ञाने च मोक्ष इति ततस्तन्निरूपणमिति । केचित्तु मनसो नेन्द्रियत्वं प्रत्यक्षलक्षणं तु जातिघटनया सर्वत्र नेयमित्याहुः । घ्राणत्वादयस्तु जातिविशेषा घ्राणजादिप्रत्यक्षविशेषजनकतावच्छेदकतया सिद्धाः । श्रोत्रत्वं तु कर्णशष्कुल्यवच्छिन्ननभस्त्वम् । घ्राणादयो नित्या जन्या वा पृथिव्यादिभिन्ना वेत्यपेक्षायामाह । भूतेभ्य इति । श्रोत्रस्याजन्यत्वात् पञ्चम्यर्थस्य जन्यत्वस्य बाधः । न च कर्णशष्कुल्या जन्यत्वादेव तद्व्यपदेश इति वाच्यम् । तथापि

जन्यत्वस्य श्रोत्रे ऽन्वयासङ्गतेरिति चेत् । न । अत्राभेदे पञ्चम्या विधानात् ॥ १२ ॥

भूतान्येव कानीत्यपेक्षायामाह ।

पृथिव्यापस्तेजो वायुराकाशमिति भूतानि[1] ॥१३॥

आरम्भे परस्परानपेक्षत्वसूचनाया समासकरणं वाय्वाकाशयोरप्रत्यक्षत्वसूचनाय वाऽसमासकरणम् । भूतत्वं तु बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वं पृथिव्यादिगुणत्वेनेन्द्रियार्थकथनादवसितम् । पृथिवीत्वादयस्तु जातिविशेषाः । आकाशत्वं तु शब्दाश्रयत्वमखण्डोपाधिर्वेति ॥ १३ ॥

क्रमप्राप्तमर्थं विभजते लक्षयति च ।

गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः[2] ॥ १४ ॥

ग्राह्यत्वरूपमर्थत्वं वस्तुमात्रस्येति कथं गन्धादीनां पञ्चानामेव तत्त्वमित्यत आह । तदर्था इति । तेषामिन्द्रियाणामर्था विषया गुणाः । विषयता च व्यापारानुबन्धिनी । एवमुद्देशे ऽपि अर्थपदमिन्द्रियार्थपरं बोध्यमिन्द्रियपदं च बहिरिन्द्रियपरमित्युक्तमेव । बहिरिन्द्रियविषया द्रव्यादयोऽन्ये ऽपि वर्तन्ते तथाप्येकैकबहिरिन्द्रियग्राह्यगुणाः क्रमेण गन्धादय इत्यत्र तात्पर्यम् । एतेषां निरूपणं च प्रवृत्तिमूलप्रत्यक्षविषयत्वेन संसारमूलतयेति । पृथिव्यादिगुणा इति ।

(१) न्यायसूचीनिबन्धदर्शनादस्य सूत्रत्वमिति निश्चीयते । तत्र भूतपदार्थाज्ञाने भूतेभ्य इत्यनर्थकमतः प्रसङ्गाद् भूतानि दर्शयति । पृथिव्यापस्तेजो वायुराकाशमिति भूतानीति न्यायसूत्रटीकान्यायतत्त्वालोकीयवाचस्पतिमिश्रलेखदर्शनाच्च । एतेनाधुनिकानां केषाञ्चिद् भाष्यमेवेदं न सूत्रमिति प्रलापोऽपास्तः ।

(२) गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्था इत्येतत् सूत्रमिति वार्त्तिकम् ।

पृथिव्यादीनां यथायोगं गुणा इत्यर्थः । एतत्कथनं च गन्धादीनां तत्त्वानां सांख्यवेदान्तमते पृथिव्यादिकारणत्वं तद्गुणत्वं चेतिनिरासाय । लक्षणं तु गन्धाद्यन्यतमत्वम् । अथवा अधुना विभागमात्रे तात्पर्यं लक्षणं तूद्देश एव ज्ञेयम् । यथा बहिरिन्द्रियद्वयाग्राह्यत्वे सति बहिरिन्द्रियग्राह्यगुणत्वमिति ॥ १४ ॥

बुद्धिं लक्षयितुं स्वरूपमाह ।

बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम् (१) ॥ १५ ॥

उपलब्ध्यात्मकं ज्ञानं बुद्धिरित्यनर्थान्तरम् । बुद्ध्यादिपदत्रयमेकार्थकं न तु सांख्यमतवन्महत्तत्त्वाख्यं बुद्धितत्त्वं ज्ञानपरिणामीति व्यक्तीभविष्यति चेदमुपरिष्टात् । उपलब्धिस्वरूपत्वकथनाज् ज्ञानपदस्य करणव्युत्पत्तिभ्रमनिरासः । लक्षणं तु जानामीत्यादिप्रतीतिसिद्धज्ञानत्वजातिरेव स्फुटमिति भावः ॥ १५ ॥

मनो लक्षयति ।

युगपज्ज्ञानानुपपत्तिर्मनसो लिङ्गम् (२) ॥ १६ ॥

युगपदेककाले । एकात्मनीति पूरणीयम् । ज्ञानानामनुत्पत्तिर्यतः स एव धर्मो मनसो लिङ्गमितरभेदसाधकमित्यर्थः । स च धर्मः प्रत्यक्षासाधारणकारणेन्द्रियसंयोगाश्रयाणुत्वम् । एतस्य युगपज्ज्ञानानुपपत्तिप्रयोजकत्वं च ना-

(१) अत्र बुद्धेरवसरप्राप्ताया लक्षणापदेशद्वारेण सूत्रम् । बुद्धिरुपलब्धिरित्यादीति वार्त्तिकम् ।

(२) यस्मादिन्द्रियार्थसन्निकर्षे सत्यपि युगपज्ज्ञानानि न सम्भवन्ति अतो गम्यते अस्ति तदिन्द्रियसंयोगि सहकारि निमित्तान्तरमव्यापि यस्य सन्निधानासन्निधानानुविधानात् ज्ञानस्योत्पत्त्यनुपपत्ती भवत इति । कुतः कारणवैकल्ये कार्यप्रतिबन्धादिति सूत्रार्थ इत्येतत्सूत्रव्याख्याने वार्त्तिकम् । बुद्धिक्रमोद्देश्यत्वात् प्रवृत्तिहेतुत्वाच्चानन्तरं मनोलक्षणाय तत्स्वरूपसाधनद्वारा सूत्रम् । युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

नेन्द्रियाणां सत्यपि विषयसन्निकर्षे यत्सम्बन्धादेकेन्द्रियं ज्ञानं जनयति यदसम्बन्धादपरं ज्ञानं न जनयतीति। प्रत्यक्षकारणेन्द्रियसंयोगाश्रयत्वं मनसस्तत्प्रयोजकम्। मनसो विभुत्वे च युगपन्नानेन्द्रियासम्बन्धासम्भवादणुत्वमिति तस्यापि तत्प्रयोजकत्वम्। न च मनः सावयवमस्तु नानावयवतन्नाशादिकल्पने गौरवात्॥ १६॥

प्रवृत्तिं विभजयन् लक्षयति।

प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः(१) ॥ १७ ॥

आरम्भपदस्य प्रत्येकमन्वयात् वागारम्भो बुद्ध्यारम्भः शरीरारम्भ इति त्रिविधा प्रवृत्तिः। तत्र बुद्धिशब्दस्य बुद्धिजनके मनसि लक्षणा। वचनानुकूला प्रवृत्तिर्वागारम्भः। शरीरपदेन शरीरचेष्टापरिग्रहाच्छरीरचेष्टानुकूला शरीरारम्भः। एतद्द्वयातिरिक्ता बुद्ध्यारम्भः। स च ध्यानाद्यनुकूल इति कार्यभेदात् त्रिविधा प्रवृत्तिः। धर्माधर्मयोश्च लक्षणया प्रवृत्तिपदप्रयोगः। प्रवृत्तित्वं च प्रवृत्तोऽस्मीतिप्रतीतिसिद्धजातिविशेषो रागजन्यतावच्छेदकः। लक्षणं तु तदेव स्फुटमिति। निवृत्तौ जीवनयोनियत्ने च मानाभावे यत्नत्वमपि तदेव। ईश्वरकृतेरपि लक्ष्यत्वस्येष्टत्वात्। तयोर्मानपक्षे यत्नत्वव्याप्या सा जातिः। अतिप्रसक्तस्य कार्यतावच्छेदकत्वेऽपीश्वरकृतेरलक्ष्यत्वे जन्यप्रवृत्तित्वमेव रागजन्यतावच्छेदकम्॥ १७॥

(१) प्रवृत्तिफले प्रवृत्त्युपचारात्। प्रवृत्तिफलं धर्माधर्मौ धर्मिणः (?) सूत्रे प्रवृत्तिरित्युच्यते। इत्येतत्सूत्रव्याख्यानावसरे वार्त्तिकम्। प्रवृत्तिलक्षणाय सूत्रम्। प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ इति न्यायतत्त्वालोके वाचस्पतिमिश्राः। अत्रेतिशब्दयुक्तः पाठः क्वचित् सूत्रपाठपुस्तके दृश्यते।

दोषं लक्षयति ।

प्रवर्तनालक्षणा दोषाः[१] ॥ १८ ॥

दोषा इति बहुवचनं रागद्वेषमोहात्मकलक्ष्यत्रयेषु नानुगतं दोषत्वं जातिरितिसूचनाय । प्रवर्तना प्रवृत्त्यसाधारणकारणत्वं तदेव लक्षणं येषाम् । साधारणकारणशरीरादृष्टपरमेश्वरेच्छादिषु नातिव्याप्तिः । मोहस्यापि रागादिद्वारा प्रवृत्तित्वावच्छिन्नजनकत्वस्वीकारात् । केचित्तु शरीरादिवारणाय लौकिकप्रत्यक्षविषयकत्वे सति प्रवृत्तिजनकत्वं लक्षणमित्याहुः । रागादिगोचरप्रमायाः प्रवृत्तिहेतुत्वे तद्वारणाय प्रमाभिन्नत्वे सतीति विशेषयन्ति ॥ १८ ॥

प्रेत्यभावं लक्षयति ।

पुनरुत्पत्तिः प्रेत्यभावः[२] ॥ १९ ॥

प्रेत्य मृत्वा भावो जननं प्रेत्यभावः प्रेत्येत्यनेन पुनःपुनर्जन्ममरणाभ्यां संसारदुःखानुवृत्तिं प्रदर्श्य तन्निवृत्तिलक्षणापवर्गः प्रदर्शितः । मरणं च चरमप्राणसंयोगध्वंसः प्राणविभागो वेति । विजातीयाद्यप्राणशरीरसंयोगो विजातीयाद्यशरीरात्मसंयोगः शरीरविशिष्टात्मन आद्यक्षणसम्बन्धो वा जन्मेति ॥ १९ ॥

फलं लक्षयति ।

प्रवृत्तिदोषजनितोऽर्थः फलम्[३] ॥ २० ॥

(१) प्रवृत्त्यनन्तरं दोषलक्षणम् । प्रव–षाः । इति तात्पर्यटीका । प्रेत्यभावलक्षणात् प्राक् दोषलक्षणाय सूत्रम् । प्रवर्तनालक्षणा दोषा इति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

(२) उद्देशक्रमप्राप्तं प्रेत्यभावं लक्षयति । पुन–वः । इति तात्पर्यटीका । आत्मनः शरीरादिदोषपर्यन्तेन विश्लेषपूर्वकः सम्बन्धः प्रेत्यभाव इत्यात्मादिनिरूप्यत्वात् तदनन्तरं तल्लक्षणाय सूत्रम् । पुनरुत्पत्तिः प्रेत्यभाव इति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

(३) दुःखात् प्राक् फललक्षणाय सूत्रम् । प्रवृत्तिदोषजनितोऽर्थः फलमिति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

धर्माधर्मद्वारा प्रवृत्तेः फलप्रयोजकत्वं प्रवृत्तौ दोषस्य हेतुत्वमिति प्रवृत्तिदोषजनितत्वं फलमात्रे सङ्गतम् । तत्र च प्रवृत्तिदोषेति स्वरूपकीर्तनं प्रवृत्तिदोषसत्त्व एव सुखदुःखादिप्रयोजकशरीरसम्बन्धधर्माधर्मादीति तन्निरासे मोक्ष इतिद्योतनाय । लक्षणं तु जन्यत्वमेव । फलमपि द्विविधं मुख्यं गौणं चेति । तत्र मुख्यं सुखं दुःखं तत्साक्षात्कारः । तथा च भाष्यम् । सुखदुःखसंवेदनं फलमिति । तदन्यत् सर्वं गौणमिति ॥ २० ॥

दुःखं लक्षयति ।

बाधनालक्षणं दुःखम्[1] ॥ २१ ॥

बाधना पीडा स्वतो द्वेषविषयता लक्षणं यस्य । तत्स्वतस्त्वं च द्वेषानधीनत्वम् । शरीरेन्द्रियार्थेषु दुःखसाधनत्वात् सुखेषु च दुःखानुषङ्गाद् दुःखव्यवहारो गौण इति ॥ २१ ॥

अपवर्गं लक्षयति ।

तदत्यन्तविमोक्षोऽपवर्गः[2] ॥ २२ ॥

तस्य दुःखस्यात्यन्तविमोक्षः स्वसमानाधिकरणदुःखासमानकालीनो ध्वंसः । तत्पदेनात्र प्रागुपन्यस्तत्वेन मुख्यदुःखस्यैव ग्रहणम् । अत्र श्रुतिरपि । दुःखेनात्यन्तं विमुक्तश्चरतीति । आत्मतत्त्वज्ञानस्य तत्र हेतुता च तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यते ऽनायेतिश्रुतेः । तत्र तमेवेत्यत्रैवकारव्यत्यासेन तं विदित्वैवेत्यर्थः । अन्यः तत्त्वज्ञानाघटितः । अनाय अयनाय मोक्षायेति यावत् । अथ वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तादिति

(१) दुःखलक्षणाय सूत्रम् । बाधनालक्षणं दुःखमिति न्यायतत्त्वालोके वाचस्पतिमिश्राः । अत्र दुःखमितीत्याकारः पाठो बहुषु सूत्रपाठपुस्तकेषु दृश्यते ।

(२) दुःखनिवृत्तिरूपत्वादपवर्गस्य तल्लक्षणाय सूत्रम् । तदत्यन्तविमोक्षोऽपवर्ग इति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

पूर्वप्रतीके ईश्वरमुपक्रम्य तमेवेत्यादिश्रुतौ तत्पदेन ईश्वरपरामर्शात् कथं जीवात्मसाक्षात्कारस्य मिथ्याज्ञानाधीनवासनानाशद्वारा मुक्तिहेतुत्वमिति चेत् । न । न वारे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामाय पतिः प्रियो भवतीतिश्रुत्या ईश्वरासम्भविप्रियत्वाख्यानेन जीवमुपक्रम्य आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्योनिदिध्यासितव्य एतदेव खल्वमृतत्वमितिश्रुत्या जीवात्मसाक्षात्कारस्य मुक्तिहेतुत्वबोधनात् । तत्र द्रष्टव्य इति अग्निहोत्रं जुहोति यवागुं पचतीत्यत्राग्निहोत्रे द्रव्याकाङ्क्षासत्त्वाद् द्रव्यान्तरानुपदेशाच्च यवागुपाकस्य स्वातन्त्र्यापत्त्या यवागोरेवाग्निहोत्राङ्गतेति प्रथमं यवागुपाकस्ततोऽग्निहोत्रमिति क्रमस्तथा आत्मसाक्षात्कारस्य श्रवणाद्यानन्तर्यम् । श्रवणादित्रिके च पाठक्रमो ज्ञेयः । अमृतत्वममृतसाधनं कारणे कार्योपचारात् । एवं चात्मतत्त्वज्ञानं द्विविधं परमात्मतत्त्वज्ञानं जीवात्मतत्त्वज्ञानं च द्वयमपि मोक्षसाधनम् । तत्र परमात्मतत्त्वज्ञानस्य भिन्नविषयतया मिथ्याज्ञानजवासनानाशासामर्थ्येन तन्नाशकजीवात्मतत्त्वसाक्षात्कारोपयोगित्वमिति तस्य मोक्षप्रयोजकतारूपकारणता श्रुतौ बोध्यते । जीवात्मसाक्षात्कारस्यापि प्रागुक्तप्रणाल्या मोक्षप्रयोजकतैव न तु साक्षात् कारणता श्रुतिबोधिता कारणविरहेण दुःखान्तरानुत्पादात् चरमदुःखस्य च स्वोत्तरोत्पन्नविभुविशेषगुणरूपक्लृप्तकारणादेव नाशान्निरुक्तमोक्षे तत्त्वज्ञानस्यान्यथासिद्धत्वादिति । ईश्वरतत्त्वज्ञानं च तमेवं वेदानुवचनेन ब्राह्मणा विविदिषन्तीति श्रवणमनननिदिध्यासनरूपम् । तत्साक्षात्कारस्य तदयोग्यत्वेनासम्भवात् । तच्च जगत्कर्तृत्वादिनाऽस्थूलेत्यादिना तत्त्वेन तत्त्वमसि श्वेतकेतो इत्यादिश्रुत्या जी-

वात्माभेदेनातत्त्वेनापि भ्रमरूपमीश्वरज्ञानं मोक्षप्रयोजकम्। जीवात्मतत्त्वज्ञानं देहादिभिन्नत्वेन श्रवणादिचतुष्टयमिति विवेकः। दुःखेन जन्मनात्यन्तं विमुक्तिरपवर्ग इति भाष्ये जन्मना शरीरसम्बन्धेन निमित्तेन यद् दुःखं तेनात्यन्तं विमुक्तिरित्यर्थः। निमित्तस्य शरीरस्याभावादेव दुःखात्यन्तविमुक्तिरिति सूचयितुं जन्मनेत्युक्तम्। श्रुतिश्च। अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशत इति। प्रियाप्रिये सुखदुःखे। वावेति सम्बोधनम्। केचित्तु तेषामात्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयमिति प्राक्सूत्रोक्तशरीरादिदुःखपर्यन्तानामात्मनोऽत्यन्तविमुक्तिरात्मनोऽपवर्ग इत्यर्थः। तत्रेन्द्रियाणि पञ्च अर्थपदार्थविषयाः पञ्च दोषपदेन मिथ्याज्ञानतज्जन्यसंस्काररागद्वेषाश्चत्वारः प्रेत्यभावपदेनात्र तद्धेतुरदृष्टं लक्ष्यते फलं सुखमिति मिलित्वैकविंशतिप्रकाराणि पारिभाषिकदुःखानि तेषामात्यन्तिकनिवृत्तिरिति पर्यवसितम्। अत्र प्रमाणानि। दुःखेनात्यन्तं विमुक्तश्चरति। अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशतः।

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥

इत्यादिश्रुतयः। यद्वा दोषपदेन संस्कारेच्छाद्वेषा ग्राह्याः। बुद्धिनिरासेनैव मिथ्याज्ञानस्यापि निवृत्तिर्लभ्यते। दोषपदेन यद्यपि संस्कारग्रहणं न सूत्रे स्पष्टं तथापि मिथ्याज्ञानादिद्वारा प्रवर्तकस्य मिथ्याज्ञानजन्यसंस्कारस्य संस्कारत्वेन ग्रहणं प्रवर्तनालक्षणा दोषा इतिसूत्रात्। दोषविभागसूत्रे च मोहपदेन सवासनमोहस्य ग्रहणात्। एवं च मुक्तिलक्षणे बुद्धिसंस्कारेच्छाद्वेषयत्नसुखदुःखध-

र्माधर्माणां नवात्मविशेषगुणानां लाभः । इन्द्रियनिवृत्त्यार्थनिवृत्तिरर्थायातेति नात्रार्थग्रहणम् । किं त्विन्द्रियविभागसूत्रानुक्तत्वे ऽप्यत्रेन्द्रियपदेन कर्मेन्द्रियपञ्चकस्यापि तेषामपि प्रमाणसिद्धत्वादिति दशेन्द्रियाणि शरीरं मनश्चेत्येकविंशतिप्रकाराणि दुःखानि द्रव्यकिरणावलीमाथुर्यामभिहितानि । न च शरीरादिनाशस्यात्मन्यसत्त्वेन मनःश्रवणयोरजन्यत्वेन तन्नाशाप्रसिद्ध्या च कथमेतदिति वाच्यम् । शरीरादीनामात्मसम्बन्धनाशस्यैव विवक्षितत्वादित्याहुः । तन्न । शरीरादिनाशस्य स्वतःप्रयोजनत्वाभावेन मुख्यपुरुषार्थत्वाभावात् तत्र मुक्तिपदाप्रयोगाद् दुःखात्यन्तोच्छेदहेतुतया शरीराद्यत्यन्तोच्छेदस्य प्रयोजनत्वे ऽपि सुखनाशस्य कथमप्यप्रयोजनत्वात् सांसारिकसुखस्य दुःखानुविद्धतया विवेकिनामिच्छाविषयत्वाभावे ऽपि तदभावे नेच्छा किं तु तदनिच्छाप्रयोजकदुःखानुविद्धत्वाभाव एवेच्छेत्यनुभवात् । श्रुतौ शरीरादिनिवृत्तिकथनं च दुःखात्यन्तोच्छेदहेतुत्वेनेति ॥ २२ ॥

उपसंहरति । समाप्तं प्रमेयप्रकरणमिति ॥

प्रमेयलक्षणविवरणं समाप्तम् ॥

क्रमप्राप्तं संशयं लक्षयति विभजते च ।

समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्षो विमर्षः संशयः[1] ॥ २३ ॥

संशय इति लक्ष्यनिर्देशो विमर्ष इति लक्षणम् । तत्र मृषिज्ञानार्थो विशब्देन एकधर्मिणि विरोधिधर्मद्वयप्रका-

(१) समानानेकधर्मोपपत्तेरिति सूत्रमिति वार्त्तिकम् ।

रकत्वं लभ्यते। धर्मद्वयं क्वचिद् भावाभावरूपं यथायं स्थाणुर्न वेति क्वचिद् भावद्वयरूपं यथा स्थाणुर्वा पुरुषो वेति। न च वह्न्यादेरव्याप्यवृत्तित्वज्ञानदशायां जायमाने पर्वतो वह्निमान् वह्न्यभाववांश्चेतिसमुच्चये स्थाणुत्वपुरुषत्वयोरविरोधग्रहदशायां जायमाने ऽयं स्थाणुः पुरुषश्चेतिसमुच्चये चातिव्याप्तिरिति वाच्यम्। धर्मद्वये परस्परविरोधावगाहित्वस्यापि संशयलक्षणे निवेशादिति प्राञ्चः। अन्ये तु संशये विरोधभानस्य न नियमो मानाभावात्। भावद्वयकोटिकः संशयो नानुभविकः स्थाणुर्वा पुरुषो वेति च ज्ञानं स्थाणुत्वतदभावकोटिकं पुरुषत्वतदभावकोटिकं च संशयलक्षणं च तत्प्रकारतया तदभावप्रकारतया च निरूपितैकविशेष्यताशालिज्ञानत्वं समुच्चये प्रत्येकप्रकारतानिरूपितप्रत्येकविशेष्यतेति तद्व्यावृत्तिः। सा च विशेष्यता अव्याप्यवृत्तित्वज्ञानाभावप्रयोज्या पर्वते वह्निं सन्देह्मीत्याद्यनुव्यवसायसिद्धा। भावाभावयोः समुच्चये चाव्याप्यवृत्तित्वज्ञानं नियामकम्। न चैकत्र द्वयमितिरीत्या जायमाने एकधर्मिण्युभयप्रकारकज्ञाने ऽतिव्याप्तिस्तत्राप्युभयप्रकारतानिरूपितैकविशेष्यताया बाधादिग्रन्थे जगदीशैरप्युक्तत्वादिति वाच्यम्। एकत्र द्वयमितिरीत्या जायमाने ज्ञाने एकप्रकारतानिरूपितत्वेनापरप्रकारतानिरूपितत्वस्यावच्छेद्यावच्छेदकभावस्याङ्गीकारेण संशयवैलक्षण्यात्। इत्थं च प्रकारतानिरूपितत्वानवच्छिन्नोभयप्रकारतानिरूपितत्वाश्रयैकविशेष्यताशालिज्ञानत्वं संशयलक्षणमित्याहुः। केचित्तु संशये सन्देह्मीत्यनुव्यवसायबलात् प्रकारद्वये कोटित्वाख्यप्रकारताद्वयं स्वीक्रियते साक्षात्करोमीतिप्रतीत्या साक्षात्कारत्वाख्यलौकिकविषयतावत्। इत्थं च तदीयकोटित्वाख्यप्रकारताशालिज्ञानत्वं तत्संश-

any external influence. By parity of reasoning, the object cannot *of itself* become Intelligence, for that would be to lose its character as object; nor is this possible *from without*, for Intelligence cannot move into or mix with anything else.[1]

The Bhāṣya continues: All the more impossible is the identity of their respective properties. What this passage shows is that, since identity of subject and object is impossible (एवंस्थिते), it is a matter of common consent that properties cannot leave their proper substrate to take up their abode in some other substrate. The word *iti* (in the next clause of the Bhāṣya) states a reason:— *because* the argument adduced has proved that identity of subject and object is impossible, therefore (अतः) in the subject which consists of Intelligence and which is present to consciousness as the *I* &c. &c.'[2]. In our consciousness of the *I* is present a certain non-object element i. e. the pure undifferenced Intelligence. A fusion appears to take place between this pure Intelligence (तस्मिन्) and our consciousness of ourselves as individual men; and this man-character may be termed the object-element (युष्मदर्थस्य) in accordance with the definition of an object, for this man-character is presented only in so far as it is a something illumined by pure Intelligence.[3]. This *ap-*

---

1. Cf. Yogabhāṣya I, 2: चितिशक्तिरपरिणामिनी अप्रतिसङ्क्रमा। The Rājamārttaṇḍavṛtti to IV, 21 explains सा अप्रतिसङ्क्रमा न विद्यते प्रतिसङ्क्रमो ऽन्यत्र गमनं यस्याः सा तथोक्ता। अन्येन असङ्कीर्णा इति यावत्।

2. Text p. 3, l. 22: divide thus, चिदात्मके इति। अस्मत्प्रत्यये, &c. &c.

3. In the judgment, 'I am a man,' the subject or ego-element अहमंशः, is really pure Intelligence; for it is Self-luminous: whereas the predicate or man-character मनुष्यत्वं, is the object-element, युष्मदर्थः, because it is not self-luminous but is illumined by some other i. e. by

रकत्वं लभ्यते। धर्मद्वयं क्वचिद् भावाभावरूपं यथायं स्थाणुर्न वेति क्वचिद् भावद्वयरूपं यथा स्थाणुर्वा पुरुषो वेति। न च वह्न्यादेरव्याप्यवृत्तित्वज्ञानदशायां जायमाने पर्वतो वह्निमान् वह्न्यभाववांश्चेतिसमुच्चये स्थाणुत्वपुरुषत्वयोरविरोधग्रहदशायां जायमानेऽयं स्थाणुः पुरुषश्चेतिसमुच्चये चातिव्याप्तिरिति वाच्यम्। धर्मद्वये परस्परविरोधावगाहित्वस्यापि संशयलक्षणे निवेशादिति प्राञ्चः। अन्ये तु संशये विरोधभानस्य न नियमो मानाभावात्। भावद्वयकोटिकः संशयो नानुभविकः स्थाणुर्वा पुरुषो वेति च ज्ञानं स्थाणुत्वतदभावकोटिकं पुरुषत्वतदभावकोटिकं च संशयलक्षणं च तत्प्रकारतया तदभावप्रकारतया च निरूपितैकविशेष्यताशालिज्ञानत्वं समुच्चये प्रत्येकप्रकारतानिरूपितप्रत्येकविशेष्यतेति तद्व्यावृत्तिः। सा च विशेष्यता अव्याप्यवृत्तित्वज्ञानाभावप्रयोज्या पर्वते वह्निं सन्देह्मीत्याद्यनुव्यवसायसिद्धा। भावाभावयोः समुच्चये चाव्याप्यवृत्तित्वज्ञानं नियामकम्। न चैकत्र द्वयमितिरीत्या जायमाने एकधर्मिण्युभयप्रकारकज्ञानेऽतिव्याप्तिस्तत्राप्युभयप्रकारतानिरूपितैकविशेष्यताया बाधादिग्रन्थे जगदीशैरप्युक्तत्वादिति वाच्यम्। एकत्र द्वयमितिरीत्या जायमाने ज्ञाने एकप्रकारतानिरूपितत्वेनापरप्रकारतानिरूपितत्वस्यावच्छेद्यावच्छेदकभावस्याङ्गीकारेण संशयवैलक्षण्यात्। इत्थं च प्रकारतानिरूपितत्वानवच्छिन्नोभयप्रकारतानिरूपितत्वाश्रयैकविशेष्यताशालिज्ञानत्वं संशयलक्षणमित्याहुः। केचित्तु संशये सन्देह्मीत्यनुव्यवसायबलात् प्रकारद्वये कोटित्वाख्यप्रकारताद्वयं स्वीक्रियते साक्षात्करोमीतिप्रतीत्या साक्षात्कारत्वाख्यलौकिकविषयतावत्। इत्थं च तदीयकोटित्वाख्यप्रकारताशालिज्ञानत्वं तत्संश-

any external influence. By parity of reasoning, the object cannot *of itself* become Intelligence, for that would be to lose its character as object; nor is this possible *from without*, for Intelligence cannot move into or mix with anything else.[1]

The Bhāṣya continues: ALL THE MORE IMPOSSIBLE IS THE IDENTITY OF THEIR RESPECTIVE properties. 'What this passage shows is that since identity of subject and object is impossible (एवंस्थिते), it is a matter of common consent that properties cannot leave their proper substrate to take up their abode in some other substrate. The word *iti* (in the next clause of the Bhāṣya) states a reason:— *because* the argument adduced has proved that identity of subject and object is impossible, therefore (अतः) in the subject which consists of Intelligence and which is present to consciousness as the *I* &c. &c.'[2]. In our consciousness of the *I* is present a certain non-object element i. e. the pure undifferenced Intelligence. A fusion appears to take place between this pure Intelligence (तस्मिन्) and our consciousness of ourselves as individual men; and this man-character may be termed the object-element (युष्मदर्थस्य) in accordance with the definition of an object, for this man-character is presented only in so far as it is a something illumined by pure Intelligence.[3]. This *ap-*

1. Cf. Yogabhāṣya I, 2: चितिशक्तिरपरिणामिनी अप्रतिसङ्क्रमा । The Rājamārttaṇḍavṛtti to IV, 21 explains सा अप्रतिसङ्क्रमा न विद्यते प्रतिसङ्क्रमो ऽन्यत्र गमनं यस्याः सा तथोक्ता । अन्येन असङ्कीर्णा इति यावत् ।

2. Text p. 3, l. 22: divide thus, चिदात्मके इति । अस्मत्प्रत्यये, &c. &c.

3. In the judgment, 'I am a man,' the subject or ego-element अहमंशः, is really pure Intelligence; for it is Self-luminous: whereas the predicate or man-character मनुष्यत्वं, is the object-element, युष्मदर्थः, because it is not self-luminous but is illumined by some other i. e. by

pearance of fusion is termed adhyāsa or false predication.[1]

AND THE PROPERTIES OF THE OBJECT —The properties are here mentioned separately; for though a false predication of predicates is logically implied in a false predication of their substrates, cases do exist in which the former kind of predication takes place without the latter kind taking place : thus a man says—I am deaf—, but not—I am the ear—, though strictly deafness is a predicate of the hearing organ.

Page 4.

CONVERSELY, OF THE SUBJECT AND ITS PROPERTIES—that is to say, of the Principle of Intelligence and its properties. Against this it may be said that to the subject which is undifferenced Intelligence, no properties can belong to be falsely predicated of any object. We reply that the properties are Bliss, Consciousness of Objects and Eternal Being. These *appear* as if they were different from the Principle of Intelligence, though they are not really different. Hence our position is logically sound.

pure Intelligence, परप्रकाश्यं. An *object* is technically defined as that which is illumined by something other than itself—युष्मदर्थः परप्रकाश्यः । Cf. V. P. S. p. 9. ll. 26, 27 :—शास्त्रदृष्ट्या चिदवभास्यो युष्मदर्थ इत्येतल्लक्षणानुसारेण.

1. Adhyāsa is termed arthādhyāsa when regarded from the point of view of the thing (artha) which is falsely predicated, and jñānādhyāsa from the point of view of the presentation (jñāna); but of course each of these aspects implies the other. In the former case, the falsely predicated thing is like, but *is not* really, a remembered thing. In the latter case, the false presentation is like, but *is not* really, a re-presentation or remembrance. Cf. infra, and V. P. S. p. 26 : ll. 2-4.—द्विविधो ह्यध्यासो ज्ञानविशिष्टोऽर्थो ऽर्थविशिष्टं ज्ञानं चेति । तत्रार्थस्य तावत्स्मर्यमाणसदृशो ऽन्यात्मनाऽवभास्यमानो ऽन्योऽर्थोऽध्यास इति लक्षणम् । ज्ञानस्य तु स्मृतिसमानोऽन्यस्यान्यात्मतावभासो ऽध्यास इति ।

False predication, adhyāsa, occurs when certain qualities appear to our consciousness as existing in a certain substrate to which they do not really belong. Hence (says the Bhāṣya) such predication should logically be held to be false, mithyā. The word mithyā, *false*, has two meanings as implying (*a*) the negation (of the existence of a thing) or (*b*) the inexplicability (of a thing). In the present context it is used in the former sense; and the clause of the Bhāṣya means that the logical result should be to deny the existence of false predication (i. e. the very possibility of it should be denied, in accordance with the reasons advanced in the opening passage of the Bhāṣya). And though this is the case, yet the common mode of thought and expression, conveyed in the words—'*I am that*' and '*That is mine*,' and consisting in the false predication of subject and object in respect of each other, is a *natural* result due to the fact that an Inner Principle of Intelligence, Pratyak-Caitanya, exists. What the Bhāṣya passage means is that the existence of adhyāsa must not be denied on the ground of the common experience described above (लेन), as indeed the existence of the *I* is not denied on the same ground. The word loka denotes men in general, each consciously asserting—*I am a man*. The word vyavahāra means activity. And the compound LOKAVYAVAHĀRAḤ is appositional, and means that activity which asserts itself in the words—*I am a man*.

The Bhāṣya runs:—HAVING JOINED THE REAL AND THE UNREAL. The Real is the Subject or Intelligential Principle: the Unreal is the Object or thing denoted by the word Thou, and its unreality consists in its very

character as something predicated. The suffix *tvā* of the participles ADHYASYA and MITHUNĪKṚTYA in this passage is not employed to express a chronological priority to, or a real difference of activity from, the activity expressed in *lokavyavahāra*, as is the case in such a sentence as—'having eaten, he departs.' For a further action represented by another verb cannot be admitted as necessary to complete the meaning of the passage. Also because the sentence—ADHYASYA * * * NAISARGIKO' YAM LOKAVYAVAHĀRAḤ—is completed in setting forth only the nature of adhyāsa; and because it is just this point that is summed up in the passage recapitulatory of the whole introduction of the Bhāṣya:—EVAMANĀDIRANANTO NAISARGIKO' DHYĀSAḤ. Hence the double predication conveyed in the participles and the compound word lokavyavahāraḥ of the sentence in question must be held to be merely formal,[1] similar to that expressed in the sentence—Intelligence is the nature of the Soul—(for Intelligence and the Soul are really one).

The Bhāṣya says that the common form of thought and expression HAS AS ITS CAUSE NESCIENCE WHICH IS UNREAL. The compound MITHYĀJÑĀNAṂ is appositional, i. e. ajñānaṃ is mithyā. The word mithyā, *unreal*, implies inexplicability. By the word ajñāna, Nescience, is meant the opposite[2] of Intelligence (jñāna), i. e. the non-intelligent power termed Avidyā. HAS AS ITS CAUSE NESCIENCE i. e. has Nescience as its *material cause*.

1. Adhyāsa and lokavyavahāra are not two distinct activities, though the grammatical construction of the sentence might lead us to think that they were distinct.

2. Ajñāna, Nescience, is not the merely logical negation or privation (abhāvarūpa) of Jñāna, the Intelligential Principle; but is a positive entity (bhāvarūpa) and is by nature opposed to Intelligence. For Abhāva cf. S. L. p. 64, n. 2.

But here it may be objected that the aforesaid common mode of thought and speech (p. 4) cannot be termed *natural* (naisargika i. e. without origin), if (as explained above) it is due to a certain cause (naimittika). We reply :—It is logically necessary to assume a certain power or Nescience (avidyāçakti) as existing in the external and internal worlds and depending entirely on the existence of the Principle of Reality (the Brahman or h'elf, tatsvarūpa); for on no other assumption can we pr ccount for the presentation of unreal objects in conscious- Th ess. This Power of Nescience does not preclude for us a to nsciousness of the non-intelligent nature of these things atsvarūpa); for the fact that we sometimes fail to perceive pa on-intelligent things is entirely due to the absence of ne ome instrument of knowledge (i. e. is due to Nescience of oncealing the Principle of Intelligence which is the in- ca trument of knowledge).[1] And this is in accord with our th eneral experience that even before and after the presen- ation of an unreal object, e. g. unreal silver (in the place of the mother-of-pearl shell), and even while

Page 5.

Nescience continues to exist (i. e. while we continue to think and speak of the object as *silver*) we do perceive something real, (svarūpa i. e. the mother-of-pearl shell).[2] Hence, in regard to all non-intelligent

---

1. Cf. *Viv.* p.14. ll. 10, 11: अनात्मप्रमाणस्य चैतन्यस्य वैकल्यादावरणादेव विषयानवगतिसिद्धेर्न विषये पृथगावरणं कल्पनीयमित्यर्थः। It is Brahman alone that can be *concealed* by Nescience. A non-intelligent thing (jaḍavastu), in itself consisting of Nescience, cannot be said to be thus concealed: it is an appearance projected (vikṣepa) by Nescience. And the non-intelligent comprises all that appears to be different from Brahman (atadrūpa).

2. Nescience is there present; for *name* and *form* are imputed to the thing perceived. If therefore Nescience is present, and if at the

things, Nescience is nothing more than the material cause out of which issues a false presentation of these non-intelligent things. But as to the fact that Brahman in its absolute nature is not present to the Inner Self, (Pratyagātman) which is self-luminous as being essentially Intelligence—we hold that this non-presentation of Brahman, since it cannot be due to any other cause, must be due to an obstruction wrought by Nescience, a power which is itself without beginning, as is its relation with th Self. Our view therefore, is that Nescience prevents th presentation of the absolute Brahman to the Inner I telligence (Pratyakcit), and at the same time causes presentation of what is not-Brahman, atadrūpa, viz. th whole phenomenal world beginning with personal consc ousness (ahaṃkāra). Further, that during dreamle sleep and similar conditions,* Nescience remains laten as a residue in the form of all the mental retenta of th phenomenal world, viz. personal consciousness, &c. whic are projections (vikṣepa) from Nescience; and that Ne-cience again rises into activity. And it is for these reasons that the Bhāṣya declares that, though *natural* (i. e. without a beginning in time), the human consciousness asserting itself as *I* and *mine* is made up of inexplicable Nescience which is its material cause, but that it is not the product of any extrinsic cause, (i. e. a cause other than Nescience). Thus the fact that the common mode of thought and speech is natural is not incompatible with the fact of its being the result of a definite cause.

same time a thing is perceived, we cannot say that Nescience has the power of concealing (āvaraṇaçakti) non-intelligent things. Cf. S. M. p. 33.

* e.g. a fit of swooning and a world-catastrophe, mūrchā and pralaya.

AND THEIR RESPECTIVE PROPERTIES—the Bhāṣya here mentions properties apart from their substrates, in order to show that in some cases a property by itself is falsely predicated. BY NOT DISCRIMINATING THE ONE FROM THE OTHER—that is, by thinking of them as identical. The Bhāṣya-writer will himself explain how false predication of a subject in regard to another subject takes place, and also of a property by itself in regard to another property. He shows here that the essence of false predication is expressed by such forms as *I am That* and *That is mine*. The false predication expressed by the word *I* is the first to be made.

But it may be objected that it is the absolute, *impartite* Intelligence which shines forth in the consciousness expressed by the word *I;* so that in this case no part of any other subject is falsely predicated or left unpredicated. We reply that we shall show that this case includes that of the false predication of a part.

It may be objected, further, that what appears in consciousness as *That* is our body, which supplies the personal sentiency with objects for its fruition; and that the consciousness—*That is mine*—expresses the relation of ownership existing between the personal sentiency and the body; so that in this case nothing appears to be falsely predicated. We reply that if personal sentiency consists in false predication, all that attends on such sentiency must be equally false. No *real* retinue attends the man who becomes a king in his dreams or by way of magic. And thus our common modes of thought and expression, made up as these are of activities and agents, instruments and objects of activity, and the fruits thereof—

and all these starting from the false notion of personality—are falsely predicated of the Self which, in its essence, is the eternal, undifferenced and unfettered Principle of Intelligence. And, hence, false predication which is the cause of all evil can logically be said to be destroyed by means of that knowledge which terminates in the intuition (anubhava) that Self is identical with Brahman which is this Principle of Intelligence: hence also an inquiry into the Upaniṣads can logically be taken in hand, having that intuition and the destruction of evil as its motive and subject-matter.

The passage beginning with the words—ĀHA KO' YAMADHYĀSO NĀMA—is devoted to proving that false predication exists. As parts of this passage, the sentence prior to that beginning with the words—KATHAM PUNARAVIDYĀVADVIṢAYĀṆI—has its purpose in stating the definition of false predication and shewing the possibility of its existence; and the latter sentence (तथादि) is intended to prove the existence of false predication. This is how the whole passage should be analysed.

Page 6.

But it may be argued that, if this is so, the sentence shewing the definition of, and the possibility of the existence of, false predication is unnecessary, as distinct from the proof that such predication really takes place. For it cannot be said that a thing unknown and impossible is a matter of proof. And it would be especially difficult to *prove* the existence of an object already present to our consciousness.

We reply that we do not prove that personal consciousness consists in false predication by merely exhibit-

मेव न्यायो दृष्टान्तधर्मिणि तद्वर्तिनि च हेतौ दर्शयितव्यः । ततश्च पक्षहेतुदृष्टान्तानामपि सिद्ध्यर्थमयमेव हेतुर्यावन्न प्रयुज्यते तावत् तेषामसिद्धिर्भवेदिति । साध्यविकलत्वासिद्धत्वादय आरोप्यन्त इत्यस्य प्रतिषेधहेतावपि दुर्वारत्वात् स्वव्याघातः । अयुक्ताङ्गस्वीकारश्च पक्षादीनां तत एव लिङ्गात् सिद्धेरयुक्ताया एवाभ्युपगमात् उत्कर्षसमादीनां षस्मां लक्षणसूत्रम् साध्यदृष्टान्तयोर्धर्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यसमाः । अत्रोत्कर्षादिसमाख्यानिर्वचनमेवासां लक्षणम् । साध्यदृष्टान्तयोर्धर्मविकल्पः पञ्चानां कारणम् साध्यः पक्षः धर्माणां विकल्पो नानात्वं वैचित्र्यं तच्च तत्रतत्र दर्शितमेव ।

ब्देनान्यथासिद्धत्वं साधनविकलदृष्टान्ताश्रयासिद्धत्वं च गृह्यते । हेतुदोषस्याश्रयासिद्धिः स्वरूपासिद्धिः विरुद्धत्वमसाधारणत्वं व्याप्त्यसिद्धिश्च तत्तचोदनाभासोऽयं तत्तद्भ्रान्तिः फलमिति च द्रष्टव्यम् । अस्य यथोक्तसाध्यत्वस्य । अत्रोत्कर्षादीति । पक्षदृष्टान्तयोर्धर्मविकल्पाद्युत्थानबीजभेदादुत्कर्षेण प्रत्यवस्थानं अपकर्षेण प्रत्यवस्थानमित्यादिकमासां जातीनां लक्षणमित्यर्थः । वैचित्र्यं सदसत्त्वं वैलक्षण्यं च । तत्रतत्रेति । उत्कर्षसमे साधनसहचरितमात्रस्य धर्मान्तरस्य पक्षदृष्टान्तयोः सदसत्त्वं धर्मविकल्पः अपकर्षसमे साध्यसाधनयोः व्यापकाभिमतस्य धर्मान्तरस्य दृष्टान्तपक्षयोः सदसत्त्वम् वर्ण्यसमे हेतोः पक्षस्थि-

विकल्पसमायां तु साध्यदृष्टान्तयोरिति पदं साध्ययो-र्दृष्टान्तयोः साध्यदृष्टान्तयोरिति प्रत्येकसमुदायोपलक्षणपरं योजनीयम् । उभयसाध्यत्वाच्चेति षष्ठस्य हेतुः । चकारः पूर्वोक्तं धर्मविकल्पं समुच्चिनोति । अनुमाने सिद्धभागः साध्यभागश्चोभयं नाम तयोः सिद्धसाध्यत्वं धर्मविकल्पः । तत्र साध्यभागस्येव सिद्ध-भागस्यापि साध्यत्वमुभयसाध्यत्वं ततश्च सिद्धभाग-साधनार्थमनुमानप्रयोगप्रसञ्जनं साध्यसम इत्यर्थः । आसामुद्धारसूत्रम् किञ्चित् साधर्म्यादुपसंहारसिद्धे वै-धर्म्यादप्रतिषेधः । किञ्चित् साधर्म्याद् व्याप्तात् साध्यो-पसंहारे सिद्धे वैधर्म्यादव्याप्तात् कुतश्चिद्धर्मात् प्रति-षेधो न भवतीत्यर्थः । वर्ण्यावर्ण्यसाध्यसमानां स्वव्या-घातत्वप्रदर्शनार्थं सूत्रम् साध्यातिदेशाच्च दृष्टान्तोप-पत्तेरिति । यतः साध्यधर्मोऽन्यत्रातिदिश्यते स दृष्टा-

---

तरूपाणां पक्षसपक्षयोः सदसत्त्वम् विकल्पसमे साध्यसा-धनधर्मान्तराणां पक्षदृष्टान्तयोः दृष्टान्तयोश्च नानात्वम् साध्यसमे ऽनुमानस्य सिद्धसाध्यभागयोर्धर्मिहेतुसाध्यध-र्माणां सिद्धत्वसाध्यत्वरूपवैलक्षण्यं धर्मविकल्पः साध्य-भागस्येव सिद्धभागस्याप्यनेनैव साध्यत्वापादनादुभय-साध्यत्वमिति तत्र दर्शितमित्यर्थः । व्याप्ताद् वाद्युक्तात् कृतकत्वादिति हेतोः । अव्याप्तात् जातिवाद्युक्तात् युक्ता-ङ्गहीनत्वादियुक्ताद्विरुद्धादिहेतोः । यतः यस्मात् दृष्टा-न्तादन्यत्र साध्यधर्मिणि अतिदिश्यते यथा घटः तथा शब्दोऽपीति प्रतिपाद्यते उभयोरपि सिद्धत्वादित्यवर्ण्य-

न्तः । सिद्धेन ह्यतिदेशो भवत्यसिद्धस्येति न्यायात् सिद्धो दृष्टान्तः । पक्षस्तु साध्योऽङ्गीकार्यः उभयोरपि सिद्धत्वे साध्यत्वे वा दृष्टान्तदार्ष्टान्तिकभावव्याघात इति ॥ १३ ॥

प्राप्य साध्यं साधयति हेतुश्चेत् प्राप्तिकर्मणः ।
साध्यस्य पूर्वं सिद्धिः स्यादिति प्राप्तिसमोदयः ॥ १४ ॥

कृतिज्ञप्तिसाधारणीयं जातिः ततश्च साध्यं कार्यं ज्ञाप्यं च । तत्र कार्यमनुमितिज्ञानं ज्ञाप्यमनुमेयम् हेतुश्च लिङ्गं तज्ज्ञानं वा । प्राप्तिः संयोगादिर्विषयविषयिभावश्च सिद्धिः सत्त्वं ज्ञातत्वं च

समयोरुत्तरम् । साध्यत्वे वेति । वर्ण्यसाध्ययोरुत्तरमिति विभागः ॥ १३ ॥

प्राप्तिकर्मणः प्राप्त्याख्यसम्बन्धप्रतिसम्बन्धिनः ।

कृतिज्ञप्तीति । अनुमितिज्ञानस्योत्पत्तिपक्षे अनुमेयप्रतिपक्षे चेयं जातिः प्रवर्तत इत्यर्थः । ततश्चेति । सिद्धिशब्दस्य कृतिज्ञप्तिवाचकत्वात् साध्यशब्दस्यानुमितिज्ञानानुमेयं च वाच्यमित्यर्थः । हेतुश्चेति । व्याप्तत्वेन परामृष्टं लिङ्गपरामर्शो वा हेतुरिति पूर्वमेवोक्तमित्यर्थः । प्राप्तिः संयोगादिरिति । यदा लिङ्गं हेतुस्तदा साध्येन यथायोगं संयोगसमवायादिः सम्बन्धः यदा लिङ्गज्ञानं हेतुस्तदा-विषयविषयीभाव इत्यर्थः । सिद्धिः सत्त्वमिति । कृतिपक्षे सिद्धिरुत्पत्तिः ज्ञप्तिपक्षे ज्ञातत्वमित्यर्थः । आहत्यपदेन किमुक्तं भवतीत्यत्राह (?) । एतदुक्तं भवतीति । तेना-

एतदुक्तं भवति लिङ्गं तज्ज्ञानं वा स्वकार्यमनुमितिज्ञानं प्राप्य साधयेदप्राप्य वा अप्राप्य चेत् सर्वस्यापि सर्वं साधनं भवेदविशेषात् तेन प्राप्येति वक्तव्यम् सतां च प्राप्तिः सम्भवति सम्बन्धस्योभयनिष्टत्वेनान्यतरस्याप्यसत्त्वे निराश्रयत्वप्रसङ्गात् । तथा च कार्यस्याप्यवश्याङ्गीकर्तव्ये सत्त्वे कार्यकारणयोरुभयोरपि सत्त्वेनाविशेषात् किं कस्य कारणं कार्यं वेति निष्फलमनुमानमिति कृतिपक्षे प्राप्तिसमायाः प्रवृत्तिः ज्ञप्तिपक्षे ऽप्यप्राप्य ज्ञापनेऽतिप्रसङ्गात् प्राप्येति वक्तव्यं लिङ्गज्ञानस्य लिङ्गिना संयोगादिप्राप्त्यसम्भवात् विषयविषयिभाव एवाङ्गीकार्यः । तत्र च लिङ्गज्ञाने लिङ्गवल्लिङ्गिनोऽपि स्फुरणात् ज्ञातत्वेनाविशेषात् किं कस्य ज्ञापकं ज्ञाप्यं चेति । ततश्च प्राप्त्यावविशेषेण साधनत्वप्रतिक्षेपो लक्षणम् । अप्राप्त्यावतिप्रसङ्गादसाधनत्वमुत्थानहेतुः । साध्यस्य पूर्वं सिद्धिर्हेतोर्विशेषणं तच्चात्र नास्तीति विशेष-

---

प्राप्येति पक्षे दोषदर्शनेन । तथा च प्राप्तिप्रतिबन्धिनश्च निष्फलमनुमानम् अनुमितिज्ञानजननं ह्यनुमानप्रयोजनं तच्चेत् पूर्वमेव स्यादनुमानप्रयोगो व्यर्थः स्यादित्यर्थः । अतिप्रसङ्गाद्धेतोरविशेषज्ञापकत्वे प्रसङ्गात् लिङ्गज्ञानस्य लिङ्गपरामर्शाख्यस्य हेतोर्लिङ्गिना साध्येन संयोगादिगुणस्य सतो ज्ञानस्याश्रयव्यतिरिक्तेन संयोगसमवायाद्यसम्भवादित्यर्थः । तच्चात्र नास्तीति । हेतुसिद्धिसमये साध्यस्यापि सिद्धत्वात् उक्तमत्र अप्राप्तिसमायां प्राप्य साधयन्नित्य-

णासिद्धिरारोप्या । दुष्टत्वमूलमुत्तरत्र प्रदर्शयिष्याम इति ॥ १४ ॥

अप्राप्य साधयन् साध्यं हेतुः सर्वं च साधयेत् ।
अप्राप्तेरविशिष्टत्वादित्यप्राप्तिसमस्थितिः ॥१५॥

प्राप्तावविशेषेणासाधनत्वात् अप्राप्य कारणं ज्ञापनं च वक्तव्यम् । तच्चायुक्तमतिप्रसङ्गात् । न हि दाह्यमप्राप्तो दहनो दहति प्रकाश्यमप्राप्य प्रदीपः प्रकाशयतीति च दृष्टमिष्टं चेत्येवमप्राप्तावतिप्रसङ्गादसाधनत्वेन प्रत्यवस्थानमप्राप्तिसम इति लक्षणम् । प्राप्तावविशेषादसाधनत्वमुत्थानहेतुः । साध्यप्राप्तिहेतोर्विशेषणं तच्चात्र नास्तीति पूर्ववद्विशेषणासिद्धिरारोप्येति । अनयोर्लक्षणसूत्रम् प्राप्य साध्यमप्राप्य वा हेतोः प्राप्त्यविशिष्टत्वादप्राप्यासाधकत्वाच्च प्राप्त्यप्राप्तिसमाविति । हेतोः साधकत्वमिति शेषः । विकल्पेनास्थानहेतुं दर्शयति । कार्यकारणभावापलापवादिनो ह्येवमाहुः ॥

त्रापि साध्यहेतुव्याप्त्या शब्दानामित्यर्थः ॥ १४ ॥

पूर्ववदियमपि कृतिज्ञप्तिसाधारणीति दर्शयति । अप्राप्य करणं ज्ञापनं चेति । अतिप्रसङ्गात् अप्राप्त्यविशेषात् सर्वस्य करणे ज्ञापने च प्रसङ्गादित्यर्थः । न हि दृष्टमिष्टं चेति सम्बन्धविकल्पेनेति सूत्रे प्राप्य साध्यमप्राप्य वा हेतोरित्यन्तं न लक्षणोपयुक्तमिति भावः । एवंविधं जात्युत्तरं न कश्चिद्वदत्यस्थानोपालम्भोऽयमित्याशङ्क्याह । कार्यकारणभावेति । अपलापवादिनः बौद्धचार्वाकादयः ।

असत्त्वान्नास्ति सम्बन्धः कारणैः सत्त्वसङ्गिभिः ।
असम्बन्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिः ॥ इति ।

स्वव्याघातकत्वमनयोः सुगममेव प्रतिषेधकहेतावपि दूष्यं प्राप्य वा अप्राप्य वेत्यादिप्रसङ्गस्य दुर्वारत्वात् । असाधारणं तु प्राप्तिसमाया अयुक्ताङ्गाधिकत्वं कृतिपक्षे साध्यप्राप्तेरयुक्ताया एव स्वीकारात् । अयुक्तिश्चाप्राप्तेरेव दण्डादिभिर्घटादिनिष्पत्तिदर्शनात् । ज्ञप्तिपक्षे तु लिङ्गस्य तावल्लिङ्गिना प्रतिबन्धलक्षणा प्राप्तिरस्ति । लिङ्गज्ञानस्यापि तद्व्याप्तविषयिलक्षणा लिङ्गिना प्राप्तिरस्त्येव । साक्षाद्विषयविषयिलक्षणा नास्तीति चेत् । तर्ह्ययुक्ताङ्गस्वीकारः लिङ्गज्ञानस्य साक्षात् साध्यधर्मविषयत्वस्यानङ्गत्वादिति । अप्राप्तिसमाप्येतेन निरस्तैवायुक्ताङ्गश्च व्याप्तिलक्षणायाः प्राप्तेरनङ्गीकारात् । साक्षात् सम्बन्धोऽङ्गमिति

नास्ति सम्बन्धः कार्यस्येति शेषः । कारणैर्मृद्दण्डचक्रादिभिः कारणैः सत्त्वसङ्गिभिः सत्पदार्थसम्बन्धवद्भिश्च स्वयंसिद्धैर्वा न व्यवस्थितिः एकस्मात् सर्वस्योत्पत्तिप्रसङ्ग इत्यर्थः ।

प्रतिषेधहेतोरपि नेदं स्वसाध्यसाधकं विशेषणासिद्धत्वादित्यत्रापि ज्ञप्तिपक्षे ऽप्ययुक्ताङ्गाधिक्यं प्रतिपादयितुमाह । ज्ञप्तिपक्षे त्विति । प्रतिबन्धलक्षणा व्याप्तिरूपा । लिङ्गज्ञानस्यापीति । लिङ्गपरामर्शे हेतोः साध्यव्याप्तलिङ्गविषयत्वरूपः साध्येन सम्बन्धोऽस्तीत्यर्थः । साक्षाद्विषयेति । हेतुसाध्ययोरव्यवहितसम्बन्धाभावे ज्ञाप्यज्ञापकभावो न युक्त इति चेदित्यर्थः । एतेन प्राप्तिसमोक्तदोषा-

चेत् तर्ह्यनङ्गाङ्गीकारः । अभिचारकर्मणा भ्रातृव्यमारणादौ साध्यमाने दृष्टमेतत् । यत् साक्षादप्राप्तमपि साधनं भवतीति तदेतत् सर्वमभिसन्धायोक्तं घटादिनिष्पत्तिदर्शनात् पीडने चाभिचारादप्रतिषेध इति । केचित्तु साधनविशेषः साध्यविशेषेण व्याप्तो न वा । न चेत् न तं गमयेदतिप्रसङ्गात् व्याप्तश्चेद्व्याप्तिग्रहणसमय एव लिङ्गिविशेषस्यापि ज्ञातत्वादनर्थकमनुमानमिति प्रत्यवस्थानं प्राप्तिसमः । अप्राप्तिसमस्तु लिङ्गपरामर्शस्य करणत्वात् । करणानां च कर्मप्रत्यासत्त्यवश्यम्भावात् साध्यविशेषप्राप्तिर्वक्तव्या । सा चात्र नास्तीति प्रत्यवस्थानमिति लक्षयन्ति । अनयोरप्युक्तलक्षणकक्षीकारात् तदवान्तरविशेषत्वमङ्गीचक्रुराचार्याः ॥ १५ ॥

सिद्धे दृष्टान्तहेत्वादौ साधनप्रश्नपूर्वकम्[1] ।

णामत्रापि सुवचत्वेन । दोषान्तरमाह । अयुक्ताङ्गश्चेति । मारणादौ मारणोच्चाटनविद्वेषणस्तम्भनादौ इति मित्से सप्तमी । प्राप्य साध्यमिति सूत्रस्यार्थान्तरं वक्त्रन्तरव्याजेनाह । केचित्त्विति । साधनविशेषः पक्षवर्ती हेतुः साध्यविशेषेण सिषाधयिषितधर्मेण । कारणानां चेति । वास्यादिकरणानि दार्वादिकर्मणा सम्बद्धान्येव क्रियाजननद्वारा द्वैधीभावादिकं फलं जनयन्तीत्येवमेतदपीत्यर्थः । एतदपि व्याख्यानमस्मदभिमतमित्याह । अनयोरपीति । तदवान्तरविशेषत्वं प्राप्त्यप्राप्तिसमयोरपीति तदवान्तरविशेषत्वं प्राप्त्यप्राप्तिसमयोरवान्तरभेदत्वम् ॥ १५ ॥

(१) कारणप्रश्नपूर्वकम्–पा॰ A पु॰ ।

अनवस्थाभासवाचः प्रसङ्गसमजातिता ॥ १६ ॥

इयमपि कृतिज्ञप्तिसाधारणी जातिः तथा च साधनमुत्पादकं ज्ञापकं वा सिद्धिश्च स्वरूपतो ज्ञानतश्च । दृष्टान्तस्य कारणानपदेशादिति सूत्रखण्डे दृष्टान्तपदं स्वरूपतो ज्ञानतश्च सिद्धिमात्रमुपलक्षयति । कारणं ज्ञापकं कारकं वा कृतौ तावत् । अनुमितिज्ञानहेतूनां पक्षहेतुदृष्टान्तानां सिद्धानामपि कारणान्तरं वाच्यम् । न हि ते नित्याः कार्यस्यापि सदातनत्वप्रसङ्गात् न च तस्मादुत्पद्यन्ते स्वात्मनिवृत्तिविरोधात् असतः कारणत्वानुपपत्तेः कार्यस्यापि स्वत एवोत्पत्तिप्रसङ्गाच्च एवं तत्कारणस्यापीत्यनवस्थेति ।

दृष्टान्तहेत्वादावित्यादिशब्देन पक्षो गृह्यते ।

स्वरूपतः उत्पत्तितः । पक्षहेत्वोरेतज्जातिप्रवृत्तिः सूत्रकारस्याननुमतेत्याशङ्क्याह । दृष्टान्तस्येति । सिद्धानामपि पक्षहेतुदृष्टान्तानामनवस्थादुःस्थतयोत्पादकज्ञापकानभिधानात् प्रत्यवस्थानं प्रसङ्गसम इति सूत्रार्थः । नित्या अनाद्यनन्ताः । कार्यस्यापीति । करणसामग्र्या अनादित्वे तथाविधस्य कार्यस्याप्यनादित्वप्रसङ्गादित्यर्थः । असतः कारणत्वे सति स्वोत्पत्तेः पूर्वमसतः पक्षादेः स्वहेतुत्वायोगादित्यर्थः । एवं तत्कारणस्यापीति । उक्तेन प्रकारेण पक्षादीनां कारणवत्त्वे सिद्धे तेषामपि कारणानां कारणान्तरं वाच्यमेवं तेषामपीत्यनवस्थाप्रसङ्ग इत्यर्थः । पूर्वत्र कृतिपक्षे उत्तरत्र

मूर्त्ता वेदितव्याः, तिसृषु च मूर्तिषु परिपूर्ण एवेश्वरः प्रजापतिपशुपतिमूर्त्योस्तु प्रमाणबलाज्जीवव्यवहित इति विशेषः, एवमेव सर्वत्रापि पूर्ण एव, अन्यत्र विद्यमानस्यान्यत्र पूर्णत्वं न स्यादिति चेत्, किमिदं पूर्णत्वं निषिध्यते किमत्रैव विद्यमानत्वं, किमत्र पूर्णोपलब्धिविषयत्वं, किं वात्र पूर्णकार्यजननसामर्थ्यं, किं वात्र समस्तगुणविशिष्टत्वं, नाद्यः तस्यास्माभिरनभ्युपगमात्, न द्वितीयः तन्निषेधोऽपीह स्वरूपोपलब्धिनिषेधमात्रं वा, कृत्स्नभागोपलब्धिनिषेधो वा, अंशत्वानुपलब्धिनिषेधो वा, आद्ये त्वप्रयोजकत्वम् अनुपलम्भस्य सामग्र्यभावप्रयुक्तत्वात, तस्याश्चात्र सत्त्वे तदुपलम्भोपपत्तेः, द्वितीये सभागत्वसिद्ध्यसिद्ध्यारिष्टप्रसङ्गः, तृतीये अंशत्वाभावादेवांशत्वानुपलब्धिर्युक्तति न तन्निषेधः, बहुसंबन्धादेव तत्तत्संबन्धावच्छेदेनांशत्वं स्यादिति चेन्न बहुगुणव्यक्तिप्रतियोग्यादिविशिष्टेषु द्रव्यजातिनिषेधादिषु तैस्तैस्तदनभ्युपगमात्, यथोपलम्भं तद्वदेव संयोगादिष्वपि निरंशेष्वपि भावाभावसामानाधिकरण्यस्य युगपद्भाविनोऽपि व्यवस्थाप्यत्वात्, अन्यथा समस्तसम्बन्धतत्त्वस्यैव लोपे तन्मूलभूतसमस्तकार्यकारणभावादिलोपाच्छून्यताप्रसङ्गात्, न च तृतीयः, अवच्छिन्नदेशे सर्वोत्पत्तिनिषेधस्येष्टत्वात् सर्वानुकूलशक्तिमतस्तत्रापि वृत्तौ विरोधाभावात्, यत्रयत्र यद्यत्कार्यं दृष्टं तत्रतत्र तदनुकूलत्वेन तच्छक्तेः स्वीकारे क्वचित्सर्वोत्पत्तिप्रसङ्गाभावात्, अन्यथा शक्तस्यापि सर्वदा कार्यकरणप्रसङ्गे तद्विपर्ययात क्षणभङ्गावतारात्, तदभ्युपगमेन प्रत्यवस्थाने तद्भङ्गेन भङ्गात्, यदि च कालक्रमेण क्वचित्सर्वोत्पादकत्वप्रसङ्ग इष्टः तदा सर्वदेशभाविकृत्स्नव्यक्तिविवक्षायां व्याघातः, भूतानामन्यत्र भवन्तीनां व्यक्तीनामत्र भव-

ननैरपेक्ष्यात् नष्टानां कदाचिदप्यत्र जन्मागमयोरयोगात् स्वसजातीयमात्रविवक्षायामिष्टप्रसङ्गात् विभूतिद्वयस्याप्यंशतःसंभेदोऽवतारदशायां दृश्यते, नापि चतुर्थः रूपरसगन्धादीनां स्वाश्रयव्यापिनां कृत्स्नप्रदेशव्यापित्वस्यावयविपरमाण्वादिषु तैस्तैरभ्युपगमात् । एतत्सर्वं कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वेति परिचोद्य श्रुतेस्त्वित्यादिभिः परिहरन् सूत्रकार एव प्रदर्शितवान्, अतो यथागमं सर्वत्र पूर्ण एव भगवान्, अत एव निर्गुणवादोऽपि निरस्तः। विरुद्धौ गुणविधिनिषेधौ कथमिति चेद्विचारयामः न तावदत्र समुच्चयो युक्तः विरोधात्, अत एव नोभयत्यागः, न च विकल्पः सिद्धे तदयोगात् न चेदयोगात् न चान्यतरत्यागः, किं त्याज्यमिति नियमकाभावात्, अपच्छेदनयात्पूर्वं त्याज्यमिति चेत् तस्यानियतविरोधपौर्वापर्यविषयत्वात्, नियमे हि विरोधनयात्परानुत्पत्तिरेव, न च विषयव्यवस्थया विरोधपरिहारे सत्यन्यतरात्यन्तबाधकापच्छेदन्यायावतारो युक्तः गुणनिषेधवचसामुत्सर्गापवादन्यायेन विहितमङ्गलगुणव्यतिरिक्तविषयत्वात् श्रूयमाणे हेयगुणनिषेधे पर्यवसानात्, उक्तं च तत्त्वसारे ।

यद्ब्रह्मणो गुणशरीरविकारजन्म-
कर्मादिगोचरविधिप्रतिषेधवाचः ।
अन्योन्यभिन्नविषया न विरोधगन्ध-
मर्हन्ति तन्न विधयः प्रतिषेधबाध्याः ॥

इत्यादि,

एवं स्थितेऽपि निषेधार्थस्वभावप्रयुक्तपरत्वमात्रेण यदि निर्विशेषवचसा पूर्वबाधः तदा शून्यवचसा तस्यापि बाधान्माध्यमिकमतस्यैव विजयित्वं द्वयोरपि वचसोः पा-

रमार्थिकस्य प्रामाण्यस्यानभ्युपगमात् अपारमार्थिकस्य चाविशिष्टत्वात् तदेवमुभयलिङ्ग एवेश्वरः, एतेन निर्विशेषस्यापि ब्रह्मण आच्छादिकया अविद्यया तिरोहितस्य विक्षेपिकया तया प्रपञ्चाध्यास एव सृष्टिरित्यपि निरस्तं, तस्याऽविद्यादिदोषगन्धायोग्यत्वात् सर्वज्ञत्वादिगुणगणविशिष्टत्वस्य नित्यचेतनबहुत्वस्य च समर्थितत्वात् सदेवेत्यादिवाक्येऽप्युपादानत्वविधानबुद्धिस्थकारणान्तरनिषेधमात्रे तत्परत्वस्य पौर्वापर्यादिपर्यालोचनसिद्धत्वात्। किञ्च।

अधिष्ठानस्य कात्स्न्येन भानेऽभाने च न भ्रमः।
भाताभाताकृतिभिदा सविशेषत्वसाधिका॥

अतो निर्विशेषस्य तिरोधेयधर्मविशेषायोगात् स्वरूपमात्रतिरोधाने स्वस्यैव हानिप्रसङ्गात्, स्वयंप्रकाशतयाऽत्यन्तविशदस्वरूपे च वस्तुनि बाधकप्रत्ययावसेयविशेषाभावेनानिर्मोक्षसंसारयोरन्यतरप्रसङ्गात्, अभिज्ञाप्रत्यभिज्ञयोरपि हि देशकालादिविशेषादस्त्येव मात्रया वैषम्यम्।

अभिज्ञायाः प्रत्यभिज्ञा विशिष्टविषया सती।
तदशक्यभिदाबाधप्रगल्भा न तथाऽत्र ते॥

अतो यदि स्वरूपं निवर्तकं नित्यनिवृत्तिः स्यात्, यदा तु तदतिरिक्तं मानं तदा सविशेषत्वमेष्टव्यम्, अमानस्य निवर्तकत्वादर्शनान्मानत्वमेव निवर्तकत्वौपयिकमिति चेत् तद्वदेवामेयस्याधिष्ठानत्वादर्शनान्मेयत्वमेव तदौपयिकमिति किं न स्वीक्रियते, जडाजडवैषम्यादिति चेत् तुल्यं मानस्यापि स्वरूपातिरिक्तस्य जडत्वात् स्वरूपानुप्रवेशिनस्तु तदंशस्य प्रागपि सत्त्वात्। किं च।

ब्रह्मणोऽनिर्विशेषत्वमिति धर्मोऽस्ति वा न वा।
द्विधाऽपि सविशेषत्वं तद्योगतदयोगजम्॥

त्वद्वाक्याद्भ्रान्तिसिद्धं तल्लक्षणावृत्त्यनूदितम् ।
निषेधामो ऽभिधाशक्तिर्नास्तीति हि निषिध्यते ॥
निर्विशेषा पुरीत्युक्तिर्यथैकत्र न तिष्ठति ।
तथा सर्वप्रयोगश्च विशेषे पर्यवस्यति ॥
विशेषो निर्विशेषश्चेत्सोऽपि कस्यापि वा न वा ।
पूर्वत्र सविशेषत्वमन्यत्र न विशेषता ॥

ब्रह्म निर्विशेषमित्यभिलापमात्रमिति चेत्तर्हि सिद्धं नः समीहितं वस्तुतो विशेषप्रतिक्षेपाभावात्, ततश्चाभिलापगोचरत्वस्य विधानात् वस्तुमात्रस्य तदपि नास्तीति चेन्न ।

अवाच्यं वाच्यमिति वा वस्तुनि प्रतिपादिते ।
वाच्यमेव भवेद्वस्तु वाच्यावाच्यवचोऽन्वयात् ॥

किं च ।

दृढाध्यक्षादिमानेन जगत्सत्यत्वनिर्णये ।
निर्विशेषवचोऽन्यार्थं यूपादित्यैक्यवाक्यवत् ॥

प्रत्यक्षादिप्रत्ययो निरालम्बनः प्रत्ययत्वात् स्वाप्नप्रत्ययवत्, प्रपञ्चो मिथ्या दृश्यत्वात् व्यावर्तमानत्वात् शुक्तिरूप्यवदित्यादिभिरागममन्तरेणापि जगद्बाध इति चेन्न निर्विषयासदन्यथाख्यातिसाधने विरोधापसिद्धान्तादिदोषात् अनिर्वाच्यत्वसाधने अप्रसिद्धविशेषणत्वात् स्ववचनविरोधादिदोषात् विरुद्धयोः समुच्चयवत्तत्प्रतिक्षेपयोरपि परस्पराभावात्मनोः समुच्चयस्याविरुद्धत्वात् । तथा ।

सदसद्व्यतिरेकेण साधनात्तन्निषेधनात् ।
सदसद्व्यतिरिक्तस्य सिद्धा सदसदात्मता ॥
एकविज्ञानेन सर्वविज्ञानं च न ते भवेत् ।
सद्विज्ञानेन सदसदन्यविज्ञप्त्यसम्भवात् ॥

ऐक्यसाधर्म्यवैधर्म्यभावैः स्यादेकतोऽन्यधीः ।
बाधासिद्ध्याद्याहतयो लक्षणा च स्युरत्र ते ॥

किं च ।

तत्त्वे द्वित्रिचतुष्कोटिव्युदासेन यथायथम् ।
निरुच्यमाने निर्लज्जैरनिर्वाच्यत्वमुच्यते ॥

तथा बाधतद्योग्यत्वादिसाधने चानुपलम्भादिदोषात्, नश्वरत्वादिसाधनं त्विष्टमेव । किञ्च ।

तत्तत्पक्षादिबुद्धीनां प्रमाणत्वप्रमात्वयोः ।
बाधासिद्ध्यादयो दोषा विजृम्भन्ते यथायथम् ॥

तदभ्युपगमे चानुमानस्य निष्प्रयोजनत्वस्ववचनविरोधानुत्थानानि स्युः । किं च समस्तप्रत्यक्षाद्यप्रमाणत्वसिद्धावेतदनुमानोत्थानं, ततश्च तत्सिद्धिरित्यन्योन्याश्रयणं, भेदवासनादोषमूलत्वात्प्रत्यक्षमप्रमाणमिति चेन्न दोषत्वाप्रमाणत्वयोरन्योन्याश्रयणात् शास्त्रतोऽन्यतरसिद्धौ तत्प्राबल्यापेक्षया चक्रकापातः श्रुतिप्राबल्याप्रामाण्यकुदृष्टकरणत्वनिश्चयानुमानप्रवृत्तीनां तत्तत्पदार्थस्वरूपं प्रत्यक्षादिविषयः धर्मस्तु मिथ्यात्वादिनामकस्तदविरुद्धानुमानविषय इत्यविरोध इति चेत् स्वरूपसिद्धेरेव मिथ्यात्वविरोधात् स्वरूपाविरोधिमिथ्याशब्दपरिभाषितधर्मसाधने चास्माकमनिष्टाभावः । किं च ।

मिथ्यावादिप्रतिज्ञार्थः स्वप्रतिज्ञां स्पृशेन्न वा ।
आद्ये स्वस्यैव विध्वंसो द्वितीये व्यभिचारिता ॥
मिथ्यात्वस्य तु मिथ्यात्वे मिथ्यात्वं बाधितं भवेत् ।
सत्यत्वस्य तु सत्यत्वे सत्यत्वं स्थापितं भवेत् ॥
यदि प्रपञ्चमिथ्यात्वं सद्ब्रह्मैवेति सम्भवेत् ।
प्रपञ्चश्च तथैवेति स सत्यो न कथं भवेत् ॥

जडत्वात्स न तच्चेत्तन्मिथ्यात्वं च न तद्भवेत् ।
तत्त्वेनैव तदन्यत्वान्न तत्सत्यं च ते भवेत् ॥
सदसद्भिन्नता चापि विरोधात् सदसत्त्ववत् ।
परस्परमतिस्तस्य बाधिकेति निरूप्यताम् ॥

किं च प्रपञ्चतद्बाधकप्रत्ययाभ्यामुपहितानुपहितादिवेषेण ब्रह्मणोऽपि दृश्यत्वादनैकान्त्यं ब्रह्ममिथ्यात्वं वा स्यात्, अनुभूतिरवेद्या अनुभूतित्वादिति चेन्न ।

अनुभूतिरवेद्येति वचनं बोधकं न वा ।
आद्ये तेनैव वेद्यत्वं नो चेत्किं क विधीयते ॥

ब्रह्मणश्चात्यन्तावेद्यत्वे अथातो ब्रह्मजिज्ञासा, ब्रह्मविदाप्नोति परम्, आत्मा वा अरे द्रष्टव्यः, इत्यादिव्याकोपश्च, उपदेशश्च निष्प्रयोजनः उपदेष्टुश्चाद्वैतनिश्चयानिश्चययोः कस्मै किमुपदेश्यं, न ह्यनुन्मत्ता मिथ्यात्वेन निर्णीतेभ्यः प्रतिबिम्बादिभ्य उपदिशन्ति । व्यावृत्त्यनुवृत्तिमात्रं तु न मिथ्यात्वादिप्रयोजकं तथा हि ।

व्यावृत्तेऽपि च सत्यत्वं रज्जुवंशादिके स्फुटम् ।
तत्रैव चानुवृत्तस्य मिथ्यात्वमपि भोगिनः ॥
व्यावृत्तिमात्राद्यदि तत्सतोऽप्येतत्प्रसज्यते ।
सत्त्वं घटस्येहेदानीं नास्तीत्यादिनिरूपणात् ॥
तच्चेत्तद्देशकालादौ नापोढं तत्समं घटे ।
सदेव घटदेशश्चेन्नान्यथैवोपलम्भनात् ॥
सत्सदित्यनुवृत्त्या चेत्सतः सत्यत्वमिष्यते ।
भिन्ननास्त्यनुवृत्त्यादेर्भेदनास्त्योश्च सत्यता ॥
देशकालादिभेदेन नास्तिता सर्वगामिनी ।
भिन्नता च मिथोऽपेक्षा न क्वचिद्भिन्निवर्तते ॥
शब्दमात्रानुवृत्तिश्चेत्तत्रापि च तथैव नः ।
तत्तत्प्रमाणयोग्यत्वमात्रं सत्तेति मन्महे ॥

अनुवृत्तिधिया सत्ता सर्वभावानुयायिनी ।
यद्यपीष्टा तथाऽप्येषा तद्धर्मत्वेन सिध्यति ॥

अतः प्रतिपन्नदेशकालादौ निवृत्तं मिथ्या नान्यत्, अन्यत्सदिति तत्त्वम् । प्रत्यनुमानं च ।

भानासद्व्यतिरेकाद्यैर्विमतं सत्यतात्मवत् ।
विमतः प्रत्ययः सम्यग्ज्ञानाबाधात्स्वतन्त्रवत् ॥

इत्यादि, अत्रान्तिमयुगवेदान्तिनामभिजन्म रहस्यं प्रकाशयामः ॥

सांख्यसौगतचार्वाकसङ्कराच्छङ्करोदयः ।
दूषणान्यपि तान्यत्र भूयस्तदधिकानि च ॥

तदेवं सिद्धं, न च ब्रह्म बम्भ्रमीतीति, न च तत्स्वरूपेण जगदुपादानं निर्विकारत्वनिर्दोषत्वादिविरोधात्, नापि शक्त्युपधानेन शक्तेरभिन्नत्वे स्वरूपानतिरेकात् भिन्नत्वेऽस्मन्मतापातात्, भिन्नाभिन्नत्वे भिन्नत्वाकारेण विकारादिदोषप्रसङ्गात् । एतेन स्वतःसर्वेषां भिन्नाभिन्नत्वमपि निरस्तं व्यावृत्तमेव* दूषितं शङ्करादिपत्त्रयेऽपि चिदचित्प्रपञ्चब्रह्मणां बहुविधसामानाधिकरण्यवैरूप्यलक्षणादिभिश्च महान् क्लेशः ।

निर्भेदे सति दौष्कर्याद्विधाय जगदात्मताम् ।
तत्रैव तन्निषेधोऽयमिति बालिशजल्पितम् ॥
सामानाधिकरण्यं हि न शुक्तिकलधौतयोः ।
न च द्विचन्द्रयोर्नापि बिम्बतत्प्रतिबिम्बयोः ॥
न घटाकाशयोर्नापि घटछिद्रतयरन्ध्रयोः ।
तथैव न घटाकाशमहाकाशादिकेष्वपि ॥

* सन्मात्रस्याश्रिनो ब्रह्मत्वमपि निर्विकारत्वनिर्दोषत्वादिविरोधात्पूर्वमेव दूषितमिति पाठान्तरम् ।

एवं न पिण्डघटयोर्न वा घटशरावयोः ।
न च पिण्डाशयोर्नापि घटयोश्च परस्परम् ॥
मृदाद्याकारतो या तु सामानाधिकरण्यधीः ।
व्यक्तिभेदेऽपि जात्यादिनिमित्तैक्यनिबन्धना ॥

अक्लिष्टत्वेऽपि पक्षाणां नैयायिकादिमतमेव साधीयः तथा हि ।

वाचां परिगृहीतानां यूपादित्यादिवाक्यवत् ।
व्याहतार्थाभिधायित्वाद्वरं क्लिष्टार्थकल्पना ॥

भिन्नाभिन्नत्वं भवदभिमतं विरुद्धमिति वक्तुमपि लज्जामहे तथाऽपि ब्रूमः अभेदो हि भेदाभावः अतस्तं च तदभावं च कथमेकत्रैकदैवाध्यवस्येम भेदाभावातिरिक्तस्त्वभेदो नास्त्येव जात्याकारेणाभेद इति चेत् तर्हि जात्यादावभेदो व्यक्त्यादिषु भेद इति नैकस्य भिन्नाभिन्नत्वं, जातिव्यक्त्यादिकमपि मिथोभिन्नाभिन्नमिति चेत् इदं स्वरूपेणैव वा कारणान्तरेण वा पूर्वत्र विरोधः, उत्तरत्रानवस्थादिदोषः सप्तभङ्गीभक्तान् प्रतिचोद्यते ।

यदि सत्त्वादनैकान्त्यं विमतस्यान्यवन्मतम् ।
तस्यैकान्त्ये त्वनैकान्त्यमनैकान्त्ये न नः क्षतिः ॥
विशेषणविशेष्यत्वप्रतीतेर्नैकधीः क्वचित् ।
एकोऽयं घट इत्यादिरेको दण्डीति बुद्धिवत् ॥
परतन्त्रस्वभावत्वान्मत्त्वर्थीयानपेक्षता ।
सहधीनियमोऽप्येवं स हि भेदैकसाधकः ॥
असिद्धिश्च विना द्रव्यं गन्धादेरुपलम्भनात् ।
आलोकध्वान्तरूपादावनैकान्त्यं च दृश्यताम् ॥

तदयं संग्रहः-

नाभेदधीः प्राग्वैशिष्ट्याद्धर्मैक्यादेकतामतिः ।
मत्वर्थीयः पृथक्सिद्धे सहभावोऽपि भेदकः ॥

जगद्ब्रह्मणोरत्यन्तभेदे कथं त्रिविधपरिच्छेदराहित्यम् इत्थं-तत्र देशकालपरिच्छेदाभावस्तु सर्वदेशकालव्याप्तत्वात्सिद्धः, वस्तुपरिच्छेदराहित्यं तु न सर्वतादात्म्यं सर्वध्यासाश्रयत्वं स्वेतरसमस्तमिथ्यात्वादिकं वा प्रागुक्तदूषणशतोन्मेषात्, अतोऽन्यथैतन्निर्वाह्यं तत्रैवमुक्तं जन्माद्यधिकरणे विवर*णकारैः वस्तुपरिच्छेदो वस्तुपरिमाणं देशपरिच्छेदस्तद्धेतुक इति अयमेवार्थो वेदार्थसंग्रहविवरणेऽप्युक्तः। वरदनारायणभट्टारकैस्त्वेवमुक्तं न्यायसुदर्शने वस्तुपरिच्छेदो नाम इयद्गुणक इयद्विभूतिमानित्येवंविधः तद्रहितं ब्रह्म, वस्त्वन्तरभावो वा वस्तुपरिच्छेदः तद्रहितं च ब्रह्म, ब्रह्मव्यावृत्तस्य सर्वस्य ब्रह्मशरीरत्वात्तद्व्यतिरिक्तं किञ्चिदपि नास्तीति अयमसौ न भवतीति व्यवहारो न तस्यामवस्थायां प्रवर्तत इत्यर्थः, तथा च भाष्यकारः ब्रह्मव्यतिरिक्तवस्त्वन्तराभावादिति। अयमेवार्थो नारायणार्यैरप्युक्तः गुणैरियत्ताराहित्याद्वस्तुनाऽपरिच्छिन्नत्वं चावगम्यत इति, अत्र इयद्गुणक इत्यादिपक्ष एव प्रायः श्लाघ्यः एतदुक्तं भवति स्वरूपतो गुणतो विभूतितो वा केनचिदाकारेण कुतश्चिदपकर्षो वस्तुपरिच्छेदः वस्तुपरिमाणमिति पक्षोऽप्येतदन्तर्गतः तथा वस्त्वन्तराभावपक्षोऽपि स हि सर्ववस्तुसामानाधिकरण्यनिबन्धनं सर्वशरीरत्वेन सर्वात्मकत्वमिति नियमनादिगुणकाष्ठैवेति, तदेवमत्यन्तभिन्नानन्तवस्तुसत्यत्वेऽपि ब्रह्मणस्त्रिविधपरिच्छेदराहित्यमुपपन्नम्। एतेन पातञ्जलशैवकाणादादीनां निमित्तत्वमात्रवादोऽपि निरस्तः। कारणावस्थसूक्ष्मचिचिद्वस्तुविशिष्टस्य तस्यैवोपादानत्वश्रुतेः, न च तावता निर्विकारत्वश्रुतिवि-

* विवरणकारपदेनेह श्रुतप्रकाशिकाचार्या उच्यन्ते।

रोधः तस्याः सर्वान्तर्यामिशरीरैश्वर्यव्यवस्थितत्वात्, विशिष्टवेषेण विकाराश्रयत्वं त्विष्टमेव मनुष्यादिशरीरविशिष्टे स्वरूपतो निर्विकारे पुंसि बाल्ययुवत्वस्थविरत्वस्थूलत्वादिवत्, ईश्वरो न जगदुपादानं जगन्निमित्तत्वात् यो यन्निमित्तं न स तस्योपादानं यथा घटस्य कुलाल इति चेन्न धर्मिग्राहकविरोधात्, निमित्ततयैवानुमानसिद्धः पक्षीकृत इति चेन्न तस्यानुमातुमशक्यत्वात्, क्षित्यादिकं सकर्तृकं कार्यत्वात् घटवदिति चेन्न यथादृष्टोपसंहारे बाधात्, अन्यथा ज्ञानेच्छयोरपि त्यागप्रसङ्गात् नित्यज्ञानस्य शरीरादिनेव नित्यप्रयत्नस्यापि ज्ञानादिना निरपेक्षत्ववचनोपपत्तेः, स्वतोविषयप्रावण्ये ज्ञानत्वप्रसङ्ग इति चेन्न जीवनपूर्वकप्रयत्नवदुपपत्तेः, अदृष्टात्तत्र नियम इति चेत् अत्रापि तथाऽस्तु त्वयाऽप्येतदेष्टव्यम् अन्यथा नित्यज्ञानचिकीर्षाप्रयत्नानां सर्वदा सर्वगोचरत्वेन विषयनियमाभावे युगपत्सर्वकार्योत्पत्तौ युगपदनायाससर्वमोक्षक्षणभङ्गानन्तरक्षणकार्याभावादिप्रसङ्गात्, सहकारिक्रमात्कार्यक्रम इत्यविलक्षणवचनं सहकारिणामपि कार्यत्वाद्युगपदेव निवृत्तिप्रसङ्गात् प्रयत्नस्य समस्तवस्तुगोचरज्ञानसमानविषयत्वे नित्यवस्तूनामपि तत्प्रयत्नविषयत्वप्रसङ्गः,' ततश्च तेषामपि सृष्टिसंहारादिप्रसङ्गः अशक्यविषयप्रयत्नत्वादीश्वरस्यैवानीश्वरत्वं वा, अस्तु तर्ह्यदृष्टैकनियतप्रयत्नमात्रवानीश्वर इति चेत् जीवस्यैवानित्यप्रयत्नस्यैव तथाविधनियमोपपत्तेः, अङ्कुरादिगोचरप्रयत्नो न केनापि ह्युपलभ्यत इति चेन्न जीवनपूर्वकप्रयत्नेऽपि समत्वात्, कार्यादेव हि तत्कल्पनं, तदत्रापि समम् अदृष्टस्य च सर्वकार्यनिमित्तस्य नियामकत्वे किमदृष्टप्रयत्नकल्पनप्रयत्नेन । अत्रैवं संग्रहः ।

सर्वगत्वादनियमो नित्यगत्वादुपद्रवः ।
अदृष्टान्नियमे नित्ययत्नोऽत्राजगलस्तनः ॥
स्वादृष्टपरतन्त्रः स्यादुवरात्मा क्वचित्क्वचित् ।
परादृष्टपराधीनः सर्वत्रैव भवेत्परः ॥

प्रयत्नस्य च ज्ञानादतिरेकं पराभिमतमनुरुध्यैतदुक्तमिति मन्तव्यम् । किञ्च-

सिद्ध्यसिद्ध्योर्विरोधो नेत्येवं प्रलपतस्तव ।
विरोधसिद्ध्यसिद्ध्योश्च तन्निषेधो निषिध्यते ॥
त्वत्सिद्धान्तत्वदुक्तिभ्यां हेत्वाभासेन वा पुनः ।
ज्ञातो व्याप्तिविरोधेन विशेषः प्रतिषिध्यते ॥
तृणादिमर्मरीभावहेतुत्वादग्निमद्धिमम् ।
इति कृत्वा पक्षबलाच्छीताग्निर्न हि कल्प्यते ॥
व्यापकत्वेन दृष्टस्य पक्षसंबन्धमात्रतः ।
अधिकांशग्रहे हेतुः पक्षधर्मोऽपि न क्षमः ॥
सिद्धे तु पक्षसंबन्धे पारिशेष्यादिना पुनः ।
अधिकांशग्रहश्चेन्न पारिशेष्यानिरूपणात् ॥
दृष्टजातीयनिःशेषभङ्गसाध्यं न सिध्यति ।
अभङ्गेनाधिकं सिध्येन्न च सामान्यतः स्थितिः ॥
परिशेषानुमानस्याप्यन्वयित्वे समा गतिः ।
केवलव्यतिरेकी तु परस्तान्निरसिष्यते ॥

किंच सकर्तृकमित्यत्रोपादानादिसमस्तकारणविषयज्ञानादिमान् कर्तृतया विवक्षितः कतिपयविषयज्ञानादिमान् वा सामान्यतो वा, पूर्वत्र व्याप्त्यसिद्धिः, न हि कुलालादयो घटादिहेतुभूतमदृष्टेश्वरादिकं जानन्ति उत्तरयोः पक्षयोरीश्वरासिद्धिः, यागाद्युपकरणमृदाद्युपादानवेदिभिर्जीवैरेव सिद्धसाधनात् । एतेन द्व्यणुकादिकर्तृत्वमपि जीव-

स्यैवादृष्टद्वारा घटत इति सिद्धं, शरीराजन्यत्वेन च कार्यत्वहेतोर्बाधः* सोपा†धिकत्वं वा दुष्परिहरं, न च व्यर्थं विशेषणम् असिद्धिपरिहारेण तस्य सार्थकत्वात्, न च हेतुविशेषणं सर्वमनैकान्त्यपरिहारायेति मन्त्रपाठोऽयं, व्यर्थविशेषणं तर्हि सर्वत्रादूषणं स्यादिति चेन्न यत्किंचिद्दोषपरिहारानुपयुक्तत्वस्य वैयर्थ्येऽनुरूपत्वात्, तथा च प्रकृतानुपयोगिनस्तस्यार्थान्तराख्यनिग्रहस्थानत्वं वाऽस्तु, न च विशिष्टस्य व्याप्त्यभावादेकामसिद्धिं परिहरतो द्वितीयापत्तिरिति वाच्यम् तस्य‡ तदभावासिद्धेः, यत्र शरीराजन्यत्वं तत्र सर्वत्राजन्यत्वमात्रमप्यस्तीति तस्य व्याप्तावस्यापि व्याप्तिर्दुर्निवारैव अन्यथा कलमाङ्कुरात्कलमबीजानुमानमुच्छिद्येत बीजव्यतिरेकमात्रेण कलमाङ्कुरस्यापि व्यतिरेकसिद्धेर्व्यतिरेकव्याप्तौ व्यर्थविशेषणत्वात् बीजमन्तरेणापि केचिदङ्कुरा जायन्त इति चेत् कलमबीजमपि नानुमीयेत तदन्तरेणापि तदुपपत्तेः, एवं मैत्रीतनयस्य श्यामत्वे शाकाद्याहारपरिणामश्च नोपाधिः स्यात् आहारपरिणामव्यतिरेकमात्रेण श्यामत्वव्यतिरेकाच्छाकादीति विशेषणवैयर्थ्यात्, तन्निवृत्तावपि तमालेन्द्रनीलश्यामत्वं दृश्यत इति चेन्न विशिष्टस्यापि तत्र व्यतिरेकात्, न च शरीरश्यामत्वस्यैव तत्प्रयोजकं स्थावरायोनिजश्यामशरीरेषु शाकाद्याहारपरिणामाभावात्, आहारपरिणतिजशरीरश्यामत्वं शाकाद्याहारपरिणतिपूर्वकमिति चेन्न अत्र

---

* अकर्तृकत्व–शरीराजन्यत्वयोर्व्याप्तेर्निरुपाधिकतया अधिकबलवत्त्वमभिप्रेत्य बाध इति, । तदनङ्गीकारे तु कल्पान्तरम् ।

† कार्यत्वहेतोः शरीराजन्यत्वेन सोपाधिकत्वमेवं च शरीराजन्यत्वलक्षणोपाधिव्यतिरेकेण स्थापनानुमानं सत्प्रतिपक्षितमित्यर्थः ।

‡ शरीराजन्यत्वावच्छेदेन व्याप्त्यभावासिद्धेरित्यर्थः ।

साध्यद्वारापि समव्याप्तेर्वैयर्थ्यकवलितत्वात्, यच्छ्यामं न भवति तच्छाकाद्याहारपरिणतिपूर्वकं न भवति इत्येतावता तत्सिद्धेः, श्यामत्वजातिविशेषोऽनुपात्तविशेषणः साध्यः तेन न व्यर्थतेति चेन्न विशेषणमन्तरेण तस्य दुर्वचत्वात् विशेषशब्दमात्राभिधानेऽपि तस्यैव व्यर्थत्वात् किञ्च कार्यत्वात्सकर्तृकमित्यत्रापि व्यर्थविशेषणत्वं सुवचं हेतुमत्त्वमात्रव्यतिरेकेण कार्यत्वव्यतिरेकस्य सुवचत्वात् हेतुशब्दोऽत्रानुपात्त इति चेन्न तस्य फलितत्वात्, अन्यथा अशरीरशब्दप्रयोगे भवतोऽपि पर्यनुयोगानवकाशात्, विग्रहेण शरीराजन्यत्वं फलितमिति चेत् तर्हि कर्तृशब्दनिर्वचनेनापि हेतुविशेषत्वं फलितं सकर्तृकमिति हेतुतयैव संबन्धो वाच्यः एवं सावयत्वादनित्यत्वाभिधानेऽप्यवयवजन्यत्वं फलितमिति तत्रापि व्यर्थविशेषणता स्यात्, न ह्यवयवैः संबन्धमात्रं तेषु समवायमात्रं वा हेतुः नित्येष्वपि जातिगुणादिषु तत्सम्भवात्, विपक्षे बाधकतयोक्तकारणकार्योत्पत्तिप्रसङ्गोऽपि कर्तुः कारणविशेषत्वनिश्चयादेव परिहृतः अचेतनं चेतनाधिष्ठितमेव प्रवर्तत इति नियमात्कारणमात्र*त्वं सिद्धमिति चेन्न नियमासिद्धः, दृश्यते ह्ययस्कान्तादिभिरप्ययःप्रभृतेः प्रवर्तनम्, अयोगव्यवच्छेदः सिषाधयिषितः न त्वन्ययोगव्यवच्छेद इति चेन्न अन्वयव्यतिरेकवतस्तस्यैवान्यस्य विशेषहेतुत्वोपपत्तौ ततोऽतिरिक्तस्यादृष्टस्य कल्पनायोगात्, विपक्षे बाधकाभावस्य चोक्तत्वात् । किंचेदमधिष्ठानं किंरूपं प्रेरणमिति चेन्न अमूर्तेषु तदयोगात्, हेतुत्वेन ज्ञानमात्रमिति चेन्न प्रयत्नस्याकिञ्चित्करत्वप्रसङ्गात्, ज्ञानादित्रयवतः सन्निधानमात्रमिति

* कारणत्वमात्रमिति युक्तः पाठः ।

चेन्न तस्य नित्यत्वेन कार्यस्यापि सदातनत्वप्रसङ्गात् अदृष्ट-विशेषान्नियम इति चेत् न तर्ह्यदृष्टस्यैतदधीना प्रवृत्तिः तस्यैव तन्नियामकत्वात्, अन्यथा तस्यापि यावत्सत्त्वं प्रवृत्तिप्रसङ्गात्। किं च स्वयमचेतनस्येश्वरज्ञानस्य न चेतनाधिष्ठानमस्ति ज्ञानान्तराभावात् वस्तुतश्चेतन एवेश्वरात्मा तदाश्रयतया स्थित इति चेन्न जीवेन सिद्धसाधनात्, सामान्यतः स्वयमेव तदपि ज्ञानं प्रतीयत इति तावता तदधिष्ठानमिति चेन्न विशेषाकारस्याहेतुत्वप्रसङ्गात्, अन्यथा यथाकथञ्चित्सर्वगोचरज्ञानवत्त्वे सर्वस्रष्टृत्वाविरोधात्, ज्ञानान्तरेण तदधिष्ठानमिति चेन्न अनवस्थानात्, एतेनैव तदधिष्ठानमिति चेन्न अन्योन्यप्रवर्तनेऽन्योन्याश्रयणात्, उत्तरस्य ज्ञानस्य जगत्कारणत्वाभावान्नान्योन्याश्रयणमिति चेन्न अत्यन्ताकारणत्वेऽसत्त्वप्रसङ्गात्, कारणाधिष्ठानौपयिकस्यास्य चाकारणत्वे प्रथमस्यापि कारणस्याकारणत्वप्रसङ्गात्। एवं चिकीर्षाप्रयत्नयोरप्यकारणत्वे गतमीश्वरकर्तृत्वेन। किंच यदकर्तृकं तत्कार्यं न भवतीति व्यतिरेकव्याप्तावहेतुकत्वमुपाधिः अहेतुकत्वमकर्तृकत्वव्यापकमिति चेन्न पक्षे संदिग्धत्वेनोपाधित्वानपायात्, अन्यथा शाकाद्याहारपरिणतेरप्यनुपाधित्वेन मैत्रीतनयस्य श्यामत्वमनुमीयेत। न च सामान्याभावस्य विशेषाभावव्यापकत्वम् अन्यथा पृथिवीत्वाभावेन घटत्वाभावव्याप्तौ करकादेरपार्थिवत्वादिप्रसङ्गः। ननु कर्तुर्हेतुविशेषत्वं नाम हेतुष्वन्यतमत्वं सर्वकार्यानुवृत्तत्वं वाभिप्रेत्येदमुच्यते तत्राद्दृष्टादावपि प्रसङ्गादाद्यो निरस्तः, द्वितीयस्तु कल्पोऽसिद्ध इति चेन्न पूर्वोक्ताधिष्ठाननियमनिरासेन दत्तोत्तरत्वात्। किंच क्षित्यादिकमितीश्वरघटादिसंयोगः पक्षीकृतो न वा पूर्वत्र

भागासिद्धिः, एतदनुमानसिद्धपक्षीकारे ऽन्योन्याश्रयणम्, उत्तरत्र संदिग्धानैकान्तिकता, घटेश्वरसंयोगस्य सकर्तृकत्वसंदेहेऽपीश्वरसिद्धिरविरुद्धेति चेन्न तत्संयोगवदेव केषांचिदन्येषामप्यकर्तृकत्वं भवेदिति शङ्कामात्रस्य दुर्वारत्वात्, तावतापि क्षित्यादिसकर्तृकत्वनिश्चयभङ्गात् विप्रतिपन्नं कार्यं सकर्तृकमिति सामान्यतः पक्षीकारान्न कश्चिद्दोष इति चेन्न सामान्यस्य प्रयोगस्यापि समस्तविशेषकवलीकारार्थत्वात्, ततश्च समस्तविशेषाणां सामान्यतः सिद्धिसाकाङ्क्षत्वात् अन्यत इत एव वा तत्सिद्धावनुमानवैयर्थ्यान्योन्याश्रयौ दुष्परिहारौ । नन्वस्माकमीश्वरानुमाननिरासेन किं प्रयोजनं न च प्रयोजनाभावमात्रम् अनुमानत एवेश्वरं प्रतिपद्य तं भजमानान्प्रति नास्तिक्यशङ्का व्यापादिता स्यादिति महत्तेषामस्माकं च पापमिति अहो महाकारुणिकोऽसि तादृशेभ्य एतन्नोपदिश्यतां, प्रयोजनं च शृणु प्रथमं तावद्यथावस्थितत्त्वावबोधः श्रोत्रेण गन्धग्रहणनिरासवत्, अनुमानस्याभासतां पश्यतस्तीव्रबुद्धेरीश्वराविश्वासपरिहारश्च, ततश्च मन्दानां मतेस्तीव्रबुद्धिना प्रक्षोभो न स्यात् एवमपि क्रियतां कारुण्यम् अप्राप्तप्रापकस्यागमस्यानुवादताप्रसङ्गोऽपि परिहृतः स्यात्, अनुवादत्वेऽपीश्वरः सिध्यत्येवेति न कश्चिद्दोष इति चेन्न निमित्तोपादानभूतेश्वरासिद्धेः, निमित्ततयाऽनुमानसिद्धमीश्वरमनूद्योपादानत्वादि विधीयतां, प्रत्यक्षसिद्धं पृथिव्यादिकमनूद्येश्वरशेषत्वशरीरत्वादिविधानवदिति चेत् तथैवानूद्योपादानत्वनिषेधकानुमानोदये धर्मिग्राहकबाधस्य दुर्वचत्वप्रसङ्गात्, विशिष्टतया त्वागमेनैव सिद्धौ तस्य सुवचत्वात् पृथिव्यादेरीश्वरशेषत्वादिनिषेधानुमानवत्तदपीष्यतामिति चेन्न तस्य निषेध्यग्राहकसिद्ध्यसिद्धिभ्यां व्याघातस्य सुवचत्वात्,

अत्रेश्वरो न पृथिव्याद्युपादानं चेतनत्वात् कर्तृत्वाद्वा कुलालवदित्यादिप्रयोगे कथञ्चिदपि स दुर्वचः तदा त्वागमस्यान्यपरत्वोपपत्तावीश्वरस्यानुपादानत्वमेव स्यादिति जन्माद्यस्य यत इति निखिलजगदेककारणत्वसंविद्विलीयेतेति भयादनन्तरमेव सूत्रकारैः शास्त्रयोनित्वादिति प्रमाणान्तरगोचरत्वं निरस्तम्। ननु तर्हि रचनानुपपत्तेश्चेत्यादिसूत्रं तद्भाष्यादिकं च कथं संघटेत न्यायतत्त्वे च प्रमातृपादे चेतनस्यैव कर्तृत्वप्रतिपानप्रकरणे, ननु वायुर्भूरेणूनां संघातं करोति इत्यादिना परिचोद्य दत्तमुत्तरम् उच्यते कर्तृकरणकर्माणीति त्रीणि कारणानि क्रियाविशिष्टानि तेषामन्यतमाभावे क्रिया न युज्येतेत्यादि, अत्रापीश्वरानुमानानुमतिर्दृष्टा अतः शास्त्रयोनित्वादित्यस्यान्यथाऽर्थो वाच्य इति चेन्न रचनाऽनुपपत्तेरित्यादेरन्यभावत्वात्, अत्र हि चेतनानधिष्ठितप्रकृत्याद्युपादानत्वमात्रप्रतिपादकान्प्रति विशेषविरोधादिप्रदर्शने तात्पर्यं, स्वपक्षे तु तेषां सम्भावनातर्कत्वमेव तदनुगृहीतस्त्वागम एव प्रमाणम् अत एव न्यायतत्त्ववचनमपि निर्व्यूढं तदेवमुपादानमनूद्य निमित्तत्वनिषेधकान् निमित्तमनूद्योपादानत्वनिषेधकांश्च प्रति धर्मिग्राहकबाधं वक्तुं केवलजगदुपादाननिमित्तानुमानयोर्दूषणमिति मन्तव्यम्। आगमेश्वरादिपक्षीकारे त्वाश्रयासिद्धिरिति संग्रहः, निमित्तोपादानैक्यवाक्यं यूपादित्यैक्यवाक्यवदिति चेत् कथं लक्षणविरोधादिति चेन्नैवम्। न ह्युपादानासमवायिव्यतिरिक्तं निमित्तमिति निमित्तलक्षणं, नापि निमित्तासमवायिव्यतिरिक्तकारणमुपादानमित्युपादानलक्षणं येनात्र विरोधः स्यात्, किं तर्हि उपादानकारणत्वं च परिणामास्पदत्वमेवेति वेदार्थसंग्रहानुसारा-

र्तृकं कार्यत्वादित्यनुमानं तत्र मानम्। स च लाघवादेकः सर्वत्र कार्योपलब्धेर्विभुश्च। ज्ञानादेर्निकर्षवदुत्कर्षो ऽप्यङ्गीकार्यो बाधकाभावादिति न्यायेन भवाद्युपादानसर्वसूक्ष्मदर्शित्वात्सर्वज्ञश्च। सत्यकामः सत्यसङ्कल्पः यः सर्वज्ञः सर्वविदित्यागमो ऽपि तत्र मानमित्याहुः। यद्यप्यविद्याकामकर्माद्यभावाज्जन्यं सुखमीश्वरे न सम्भवति तथा ऽपि नित्यसुखाङ्गीकारे बाधकाभावात्। आनन्दं ब्रह्मणो विद्वानित्यादिश्रुतेश्च नित्यसुखाश्रयत्वमपीशस्यान्यत्सर्वं समानमिति तदेकदेशिनः।

नित्यज्ञानादिमत्त्वे सदा सर्गप्रसङ्गान्नित्यजिहीर्षावत्त्वे सदा प्रलयापत्तेश्च नैतन्मतं साधु अतो लिङ्गदेहसमष्ट्युपहितो हिरण्यगर्भ ईशः न च देहयोगे जीवत्वं शङ्क्यं तत्समनियताविद्याद्यभावेन तस्यासम्भवात्। कथं तर्हि शरीरपरिग्रहः लीलयैवेति गृहाण। न च तदीश्वरत्वे मानाभावः उद्गीथब्राह्मणस्य तत्र मानत्वादिति हैरण्यगर्भाः।

स्थूलदेहं विना सूक्ष्मस्यानुपलब्धेः स्थूलसमष्ट्युपहितो विराडेवेशः स च सर्वतोमस्तकादिमान्। सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपादित्यादिश्रुतेः। सर्वतः पाणिपादं तदित्यादिस्मृतेश्च। सदेहत्वे ऽपि जीवत्वाभावादिकं पूर्ववदिति विराडुपासकाः।

विधिमुपासीनास्तु बहुपाणिपादत्वं नेशत्वप्रयोजकम् अन्यथा कृमिविशेषस्य सहस्रपद्यादेरपीशत्वप्रसङ्गात् तस्मात् श्रुतिस्मृत्यादिसर्ववाङ्मयशरीरया भगवत्या सरस्वत्या सदोपासितः सत्यलोकाधिपतिर्ब्रह्मैवेशः। यतो वेत्यादिसामान्यवाक्यान्यप्याग्नेयं चतुर्धा करोतीतिविशेषवाक्येन पुरोडाशचतुर्द्धाकरणवाक्यवत्प्रजापतिः प्रजा असृजतेत्यादिविशेषवाक्यात्तत्परतयैव नेयानि। स च

रुद्रस्य स्वललाटादाविष्कर्त्ता हरेरप्यसुरवधाद्यर्थमवतारेषु नियोजकः । क चित्तयोः स्तुत्यादौ प्रवृत्तिस्तु लोकसंग्रहाय सा च विधेः स्वीयैव तयोः स्वांशत्वादित्याहुः ।

श्रीविष्णुनाभ्युद्भूतपद्मोत्पन्नो हि विधिः स चैनत्क तिष्ठतीति विचारितवान् । सो ऽपश्यत्पुष्करपर्णे ऽतिष्ठत्सो ऽमन्यत अस्ति चैतद्यस्मिन्निदमस्तीति श्रुतेः । ततो यदस्याधिष्ठानं तन्मे मूलमिति तन्निश्चयार्थं चिरं भ्रमन्नपि नापश्यत् । पश्चात्समाधिना चित्ते ऽवभातमपश्यत् चिरं तत्प्रसादात्प्रजोत्पादे समर्थो बभूव तत एव च वेदान्स्मृत्वा सर्वज्ञतामापेति भागवतादिषु प्रथितम् । अतो विष्णुरेवेशः स च स्वकृतधर्ममर्यादापालनाय स्वेच्छया ऽवतरति न तु कस्य चिदाज्ञया । यथा ऽऽह यदा यदा हि धर्मस्येत्यादि । किं च महोपनिषदि । एको ह वै नारायण आसीन्न ब्रह्मा नेशान इत्यादिना ब्रह्मेशानादिसर्वव्यवच्छेदेनैकस्यैव हरेः सर्गादौ सद्भावं ततः प्रपञ्चोत्पत्तिं चाभिधायाथ पुनरेव नारायणः सो ऽन्यत्कामो मनसा ऽध्यायत । तस्य ध्यानान्तःस्थस्य ललाटात्स्वेदोपतत्ता इमा आपः । तासु तेजो हिरण्मयमण्डमभवत्तत्र ब्रह्मा चतुर्मुखो ऽजायतेत्यादिना अथ पुनरेव नारायणः सोन्यत्कामो मनसा ऽध्यायत तस्य ध्यानान्तःस्थस्य ललाटात्त्र्यक्षः शूलपाणिः पुरुषो ऽजायतेत्यादिना च ब्रह्मरुद्रयोस्तत्सृष्टत्वोपवर्णनं दृश्यते। दृश्यते चैतदुपबृंहणं भारतादिषु तस्माद्विष्णुरेवेश इति वैष्णवाः ।

के चित्तु मूर्त्तित्रयातीतं मायाशबलं ब्रह्म नारायण इति मन्यन्ते । स एव वासुदेव इति महाविष्णुरिति चोच्यते । तेषां ब्रह्मा दक्षादयः कालस्तथैवाखिलजन्तवः ।

विभूतयो हरेरेता जगतः सृष्टिहेतवः । विष्णुर्मन्वादयः कालस्तथैवाखिलजन्तवः । स्थितेर्निमित्तभूतस्य विष्णोरेता विभूतयः । रुद्रः कालोन्तकाद्याश्च समस्ताश्चैव जन्तवः । चतुर्धा प्रलयायैते जनार्दनविभूतय इत्यादिवचनान्यनुकूलानि ।

शैवास्तु ततो ह्यस्य बन्धविपर्ययौ फलमत उपपत्तेरित्यादिन्यायेन पशुस्थानीयानां जीवानां बन्धमोक्षसुखदुःखादिलक्षणं फलं यदधीनं स ईश्वरः तच्च शैवलैङ्गादिषु शिवाधीनं प्रतिपादितं तस्यैश्वरत्वं ज्ञापयति । तथा हि ब्रह्माद्याः स्थावरान्ताश्च देवदेवस्य शूलिनः । पशवः परिकीर्त्त्यन्ते संसारवशवर्त्तिनः । तेषां पतित्वाद्देवेशः शिवः पशुपतिः स्मृतः । मलमायादिभिः पाशैः स बध्नाति पशून्पतिः । स एव मोचकस्तेषां भक्त्या सम्यगुपासितः । ब्रह्मादिस्तम्बपर्यन्तान्पशून्बद्ध्वा महेश्वरः । पाशैरेतैः पतिर्देवः कार्यं कारयति स्वकमिति । किं च जगत्कारणतयोक्तयोर्ब्रह्मविष्ण्वोरपि यदीशानस्य कारणत्वं तदा जगत्कारणत्वे किं वक्तव्यं यथा ऽऽह श्रीकृष्णो हरिवंशे । अहं ब्रह्मा कपिलो ऽथाप्यनन्तः पुत्राः सर्वे ब्रह्मणश्चातिवीर्याः । त्वत्तः सर्वे देवदेव प्रसूता एवं सर्वेशः कारणात्मा त्वमीड्य इति मन्त्रवर्णेषु भारते पुराणेषु च शिवहर्योरुपास्योपासकभावप्रतिपादकानि बहूनि वचनान्युपलभ्यन्ते तत्र कानि चिद्रत्नाकरे दर्शितानि विस्तरभिया नेह लिख्यन्ते । कौर्मे च मार्कण्डेयादीनृषीन्प्रति श्रीकृष्णः सर्गादौ महार्णवे काकतालीयन्यायेन स्वेन विधेः समागमं विवादं चोक्त्वा सामान्येन प्रागुक्तस्य शिवमाहात्म्यस्य ख्यापनायोक्तवान् । एवं विवादे वितते मायया परमेष्ठिनः । प्रबोधार्थं परं लिङ्ग प्रादुर्भूतं शिवात्मकम् । कालानलसमप्रख्यं ज्वालामाला-

समाकुलम् । क्षयवृद्धिविनिर्मुक्तमादिमध्यान्तवर्जितम् । ततो मामाह भगवानधो गच्छ त्व माशु वै । अन्तमस्य विजानीयामूर्ध्वं गच्छेयमित्यजः । तदा ऽऽशु समयं कृत्वा गत्वा तूर्ध्वमधश्च तौ । पितामहो ऽप्यहं नान्तं ज्ञातवन्तौ समेत्य वै । बद्धाञ्जलिपुटौ भूत्वा शंभुं तुष्टुवतुः पुनरिति शिवश्चैताभ्यां स्तुतः स्वस्मात्तयोरुत्पत्तिमुक्त्वोवाच । प्रीतो ऽहं युवयोः सम्यग्वरं दद्मि यथेप्सितम् । ततः प्रहृष्टमनसौ प्रणिपत्य महेश्वरम् । ऊचतुः प्रेक्ष्य तद्वक्त्रं नारायणपितामहौ । भक्तिर्भवतु नौ नित्यं त्वयि देव महेश्वर । ततः स भगवानीशः संहसन्परमेश्वरः । उवाच मां महादेवः प्रीतः प्रीतेन चेतसा । प्रलयस्थितिसर्गाणां कर्त्ता त्वं धरणीपते इत्यादि । अत्र प्राग्ब्रह्मविष्णवोरीश्वरत्वाभिमानादिवादे प्रवृत्ते तद्वारणाय लिङ्गाविर्भावः । तच्छिरःपादान्वेषणशक्त्यभिमाने निवृत्ते शिवाविर्भावस्तत्प्रसादाच्चैतयोः सर्वसामर्थ्यम् । अत एतयोरैश्वर्यं शिवाधीनम् । शिवस्य स्वाधीनं प्रसादेनैव च तत्तन्माहात्म्यख्यापनाय क्वचित्कल्पे ततस्तद्दर्शनाविर्भाव इत्याद्युपपादितम् । एवं शैवलैङ्गादिष्वपि द्रष्टव्यम् । ततश्च स्वतन्त्रैश्वर्यः शिव एवाराध्यो मोक्षादिकामैः । न हि भिक्षुको भिक्षुकं याचितुमर्हति सत्यन्यस्मिन्नभिक्षुक इति न्यायात् । देवो विश्वाधिको रुद्रः शिव एको ध्येयः शिवंकरः अन्यत्सर्वं परित्यज्येतिश्रुतेश्च । सर्वैरवश्याराध्यत्वं च तस्य मन्त्रो दर्शयति । अन्तरिच्छन्ति तं जने रुद्रं परो मनीषया गृह्णन्ति जिह्वया ससमिति । जनेष्वन्तर्यामितया तिष्ठन्तं परः परं श्रेष्ठं ये मनीषया सादरं ध्यायन्ति । ते ससं सस्यविकारमन्नं जिह्वया गृह्णन्तीति शाब्दोऽर्थः । ये तु कुतर्कव्यसनिनस्तमन्तर्नेच्छन्ति पुरीषमेव जिह्वया गृह्णन्तीति धन्याः खलु वने वाता

इत्यादेरिवाप्रस्तुतप्रशंसागम्ये ऽर्थे कटाक्षः। तथा ह्युपबृंहितं पराशरेण। अन्तरिच्छति यो रुद्रं सदा वन्द्यं मनीषया। गृह्णाति जिह्वया सोयं रसपूर्णामृतोदकम्। अन्तर्नेच्छन्ति ये रुद्रं भवानीसहितं भवम्। पुरीषमेव गृह्णन्ति जिह्वया ते न संशय इति। अत्राद्येन मन्त्रवाच्यो ऽर्थो दर्शितः द्वितीयेन गम्यः। स चेह स्वयंबाधितत्वात्तेषां गर्हितवृत्तित्वे पर्यवस्यति। अयमर्थो दर्शितो ऽन्यत्र। धिक्तेषां धिक्तेषां धिक्तेषां जन्म धिक्तेषाम्। येषां न वसति हृदये कुमतिपथविमोचको रुद्र इति। तस्मात्सर्ववशित्वात् सर्वाराध्यत्वात्सर्वफलप्रदत्वाच्च सर्वेशः शिव इत्याहुः। स च निमित्तं जगतामुपादानं तु तन्मायेति केचित्।

परमाणव उपादानं महेशो निमित्तमित्यपरे।

अन्ये त्वीशस्य द्वे शक्ती चिदात्मका आनन्दात्मका च तत्राद्या गौरी तद्विशिष्टस्य शिवस्य निमित्तत्त्वं द्वितीया विष्णुस्तद्विशिष्टस्योपादानत्वम्। तयोश्च शिवस्वरूपत्वं तच्छक्तित्वं च मायाविद्यादिशब्दवाच्या तु शक्तिरन्यैव। सा चोभयविधे ऽपि कारणत्वे सहकारिणीत्याहुः। एतन्मतमूलवचनानि तु रत्नाकरे द्रष्टव्यानि। परे त्वथर्वशिरसि पूर्वखण्डे देवा ह वै स्वर्गलोकमगमंस्ते देवा रुद्रमपृच्छन् को भवानिति पृष्टवतो देवान्प्रति सो ऽब्रवीदहमेकः प्रथममासं वर्त्तामि च भविष्यामि च नान्यः कश्चिन्मत्तो व्यतिरिक्त इत्यादिना एवं मां यो वेद स सर्वान्देवान्वेदेत्यन्तेन वचनेन शिवस्य सर्वात्मत्वं प्रतिपादितम्। अनन्तरं ततो देवा रुद्रं नापश्यन् ते देवा रुद्रं ध्यायन्ति ऊर्ध्वबाहवः स्तुवन्तीति देवैरुपास्यत्वं दर्शितम्। ततश्च द्वितीयखण्डे यो वै रुद्रः स भगवान्भूर्भुवस्स्वर्यश्च ब्रह्मा तस्मै वै नम इत्यारभ्य यश्च विष्णुर्यश्च महेश्वर इत्यादिप्रकारेण ब्रह्मविष्णुरुद्रोमेन्द्रादीनां

महाभूतादीनां च तद्विभूतित्वं पूर्वखण्डोक्तसर्वात्मवचनेन सिद्धमवयुत्यानुवादन्यायेन विशिष्य दर्शितम् । तृतीयचतुर्थयोस्तन्नामनिर्वचनमुखेन तस्य परभावः स्पष्टीकृतः । पञ्चमे तदुपासनादेव मोक्ष इत्युक्त्वा पाशुपतयोगात्मकतदुपास्तिप्रकारो दर्शितः । तदेवमादित आरभ्यान्तं विमृश्यमानमथर्वशिरोजातं मूर्त्तित्रयादतिरिक्तः परशिवः सर्वतो ज्यायस्त्वात्परेश इति स्पष्टीकरोति । कैवल्योपनिषदि च उमासहायं परमेश्वरं विभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् । ध्यात्वा मुनिर्गच्छति भूतियोनिं समस्तसाक्षिं तमसः परस्तादित्यदिना मुमुक्षूपास्यत्वमुक्त्वा स ब्रह्मा स शिवः सेन्द्रः सो ऽक्षरः परमः स्वराट् स एव विष्णुः स प्राणः स कालो ऽग्निः स चन्द्रमाः । स एव सर्वं यद्भूतं यच्च भाव्यं सनातनम् । ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तय इति ब्रह्मादेस्तद्विभूतित्वं दर्शितम् । न च स ब्रह्मेत्यादौ तत्पदानां सन्निहिते प्राप्यत्वेनोक्ते भूतयोनौ वृत्तेरुचितत्वाद्ब्रह्मादीनां तद्विभूतित्वमेव सिध्यति न तूपास्यविभूतित्वमिति शङ्क्यम् । भूतयोनिशब्दस्यापि यौगिकस्य सन्निहिते शिवे एव वृत्तेः तत्क्रतुन्यायात्तदुपासनात्तदाप्तेरेव युक्तत्वेन तस्य शिवान्यवृत्तित्वकल्पनाऽयोगाच्च । न च कथं ज्ञात्वा तमिति तस्य ज्ञानान्मोक्षप्रतिपादनम् । सगुणब्रह्मवादे तद्बोधादेव मोक्षस्योपपन्नत्वात् । निर्विशेषब्रह्मवादे सगुणज्ञानान्मोक्षो नोपपद्यतइति ज्ञात्वा तमित्यत्र तत्पदस्य निर्विशेषपरत्वावश्यकतया पूर्वेषामपि तत्परत्वं सिध्यतीति चेन्न । तत्तेजो ऽसृजतेत्यादौ तत्पदानां सविशेषे वृत्तावपि तत्त्वमसिवाक्यश्रुततत्पदमात्रस्यैवानुपपत्त्या निर्विशेषे लक्षणावद्यत्रानुपपत्तिस्तस्यैव ज्ञात्वा तमिति तत्पदस्य तत्र लक्षणाया न्याय्यत्वेन योज-

नप्राप्यायां कावेर्य्यां मल्लबन्धनस्यायुक्तत्वात्। तस्मादुपास्यपरमशिवविभूतित्वमेव ब्रह्मादेरित्याहुः। उभयोरुपबृंहणभूतानि भारतपाद्मकौर्मादित्यपराशरशैवमानवादिपुराणवायुसूतसंहितावचनानि परमशिवसंहाररुद्रयोर्नामरूपसाम्यस्य किञ्चिद्विशेषस्य च प्रतिपादकानि वचनानि च रत्नाकरे द्रष्टव्यानि।

गाणपतास्तु तुरीयः परमशिवः श्रीगणेश एव स एव वैष्णवैर्वासुदेवाभिधो महाविष्णुरित्युच्यते। न तु शिवद्वयं विष्णुद्वयं वा ऽस्ति येनैकः शिवो विष्णुर्वा मूर्त्तित्रयमध्यगो द्वितीयस्तदतिरिक्त इत्युपगम्येत। एवं च स एव साक्षात्परं ब्रह्म ब्रह्मादीनां तु तदंशत्वेन ब्रह्मत्वं व्यपदिश्यते विष्णवंशानामिव विष्णुत्वं तथा च श्रुतिः। नमस्ते गणपते त्वमेव प्रत्यक्षं ब्रह्मासीत्यादि। अत्र विशेष्यसंबद्धत्वादन्ययोगव्यवच्छेदिनैवकारेण पार्थ एव धनुर्द्धर इत्यत्रत्यैवकारेण पार्थादन्यत्र धनुर्धरत्वस्येव गणपतेरन्यत्र साक्षाद्ब्रह्मत्वस्य योगो व्यवच्छिद्यते। अतः श्रेयःकामैः सर्वैरपि स एवाराध्यः। तत्पूजां विना ऽन्यपूजाया वैयर्थ्यस्मरणेन फलजनकत्वायोगात्। अवश्यापेक्षितानपेक्षितयोरपेक्षितं स्मरणीयमिति न्यायेन कृताकृतप्रसङ्गी यो विधिः स नित्य इति न्यायेन च तदाराधनस्यावश्यकत्वात्। कृते च तस्मिन्विद्यार्थी लभते विद्यां धनार्थी लभते धनम्। पुत्रार्थी लभते पुत्रान्मोक्षार्थी परमं पदमित्यादिवचनेभ्यः सर्वेषु लाभसम्भवेनानधीते महाभाष्ये व्यर्था स्यात्पदमञ्जरी। अधीते ऽपि महाभाष्ये व्यर्था सा पदमञ्जरीति न्यायेनान्याराधने प्रयोजनाभावात्। सूर्याद्याराधनफलारोग्यादिमोक्षान्तकथनानन्तरं सर्वमिच्छेद्गणाधिपादिति स्मर-

एमप्यत्रमानं तस्मादेव ब्रह्माद्युत्पत्तिस्तत एव तेषां सृष्ट्यादिसामर्थ्यलाभश्चेत्याहुः ।

परमशिवविभूतिरूपस्यापि श्रीगणपतेस्तत्त्वेन वर्णनमुपासनार्थं वास्तवतदभेदाभिप्रायं च । सर्वत्र तत्पूजनस्य तत्तत्कर्मोपासनाङ्गत्वात् । न चैतावता तेषामननुष्ठानापत्तिः प्रयाजादिषु कृतेषु ज्योतिष्टोमादीनामप्यननुष्ठानापत्तेः । इतरोपासनादिविधायकशास्त्राप्रामाण्यापत्तेश्च । सर्वमिच्छेदित्यादि तु विनायकाराधनस्य परम्परया सर्वत्रोपयोगवर्णनपरं न त्वितरनिषेधपरम् तद्विधिविरोधात् । किं च हेरम्बोपपादकवाक्येषु परमशिवनामानि रूपाणि च न दृश्यन्ते अतो न स परमशिवः किं तु शंभुशिवशङ्करादिनामा त्रिनेत्रेन्दुशेखरादिलिङ्गो विधेरपि शास्ता हरेरपि वरप्रदस्तेन नुतश्च श्रीकालभैरव एव वेदान्तप्रतिपाद्यो मुमुक्षुभिराराध्यो मूर्त्तित्रयपरः परमशिव इति भैरवमुपासीनाः ।

श्रीमल्लारिभक्तास्तु कौर्मे ब्रह्मविष्ण्वोः स्वस्वसर्वेश्वरत्वाभिमानेन विवादे प्रवृत्ते वेदैः प्रणवेन च पृथक्पृथग्बोधितो विधिर्नावबुद्धवांश्चेत्तदा नीललोहितो रुद्रः प्रादुर्बभूव । स च तद्गर्ववचनं श्रुत्वा भैरवं प्रेरयामास तेन च तच्छिरसि छिन्ने सति सोमः परमशिवः प्रादुर्बभूव स च ब्रह्मणा बहुधा स्तुतः स्वपादयोः पतितं तमुत्थाप्य वरांश्च दत्त्वा प्रोवाचाग्रे स्थितं रुद्रं नीललोहितमीश्वरम् । एषा ब्रह्माऽस्य जगतस्त्वमस्य प्रथमः सुतः । आत्मना रक्षणीयस्ते गुरुर्ज्येष्ठः पिता तव । अयं च भगवान्यज्ञोऽसगर्वो भवताऽनघ । सान्त्वितव्यो विरिञ्चस्य धारणीयं शिरस्त्वया । ब्रह्महत्याऽपनोदार्थं व्रतं लोके प्रदर्शय । चरस्व भिक्षामित्यादिना नीललोहिते व्रतमाज्ञाय च स्थानं

स्वाभाविकं दिव्यं ययौ तत् परमं पदम्। ततः स भगवानीशः कपर्दी नीललोहितः। ग्राहयामास वदनं ब्रह्मणः कालभैरवमित्युक्तम्। अत्र सदाशिवांशनीललोहितांशो भैरव इति भाति। काशीखण्डे ऽपि कौर्मोक्तरीत्यैव प्राक्तनं सर्ववृत्तान्तमुपपाद्य अथेश्वरः पद्मयोनेः श्रुत्वा गर्ववतीं गिरम्। सकोपतः समुत्पाद्य पुरुषं भैरवाकृतिम्। प्राह पङ्कजजन्मा ऽसौ शास्यस्ते कालभैरव। कालवद्राजसे साक्षात्कालराजस्ततो भवान्। विश्वं भर्त्तुं समर्थो ऽसि भरणाद्भैरवः स्मृतः। त्वत्तो भेष्यति कालो ऽपि ततस्त्वं कालभैरवः। यतः पापानि भक्तानां भक्षयिष्यसि तत्क्षणात्। पापभक्षण इत्येव तव नाम भविष्यतीत्यादिना नाललोहितात्कालभैरवोदयस्य विविधवरलाभस्य चाभिधानात्तस्य तदंशत्वमवगम्यते। महादेवांशसंभूतं भैरवं भैरवाकृतिमित्यपि तत्रैवोक्तम्। इह महादेवः परमशिवस्तदंशो नीललोहितस्ततः संभूतस्य भैरवस्य परमशिवांशांशत्वं स्पष्टं प्रतीयते। एवं पाद्मादिष्वपि द्रष्टव्यम्। तथा चांशांशिनोरभेदोपगमात्परमशिवांशनीललोहितांशत्वाद्भैरवस्य सदाशिवाद्भेदाभावात्तत्त्वेन स्तुतिर्न विरुध्यते। साक्षात्परमशिवस्तु श्रीमल्लारिरेव सद्भिः सदा ध्येयः तदुक्तम्। ध्यायेन्मल्लारिदेवं कनकगिरिनिभं म्हालसाभूषिताङ्कं श्वेताश्वं खड्गहस्तं विविधबुधजनैः सेव्यमानं कृतार्थैः। युक्ताङ्घ्रिं दैत्यमूर्ध्नि डमरुविलसितं नैशचूर्णाभिरामं नित्यं भक्तेषु तुष्टं श्वगणपरिवृतं नित्यमोङ्कारगम्यमिति। अत्रान्त्येन नित्यपदेन प्रागभावाप्रतियोगित्वविशिष्टध्वंसाप्रतियोगित्वार्थकेन तस्य न कुतश्चिदुत्पत्तिर्न वा कुत्र चिल्लय इति प्रतिपादनात् सर्वकारणत्वं सूचितम्। पूर्वं तु ध्यायेदित्यनेन योजनीयम्। तथा चोङ्कारगम्यो ब्रह्मविष्णु-

शिवात्मकः स एव परमशिवो ऽन्यत्सर्वं परित्यज्य सदा ध्येयः शिव एको ध्येयः शिवंकरः अन्यत्सर्वं परित्यज्येति श्रुतेः । अयमेव हरिहरयोः स्वविभूतित्वेन ग्रहणान्मैलार इत्युच्यते । मः शंभुरश्च विष्णुश्च ताविलायां यदा गतौ । तदा मैलापदं भातं तावारातीति विग्रहात् । मैलार इति मल्लारेर्नाम ध्येयमभूत्किलेति निरुक्तेः रलयोर्व्यत्ययेनोच्चारणान्मैराल इत्यपि व्यवह्रियते । हरिहरयोस्तद्विभूतित्वे च विधेः सुतरां तत्सिद्धम् । विस्तृतं चैतन्माहात्म्यं ब्रह्माण्डादिपुराणेषु । तस्मादयमेव विश्वेश इत्याहुः ।

श्रीस्वामिकार्त्तिकेयोपासकास्तु सर्वगतत्वाद्भक्तानां सविलासाज्ञानशोषणाच्च स्कन्दपदाभिधेयः सर्वबुद्धिरूपा गुहा विद्यन्तआधारत्वेनास्येति व्युत्पन्नार्शआद्यजन्तगुहपदाभिधेयश्च सर्वान्तरात्मा सद्भजनीयानन्तकल्याणगुणो ब्रह्मादिविभूतिमान् तेषां कर्ता नेता च परमशिवः श्रीसुब्रह्मण्य एवेत्याहुः ।

एतेषु गाणपत्यादिमतेषु पुराणादिवचनानि तु लौकिकन्यायरत्नाकरे दर्शितानि । एवं ह्येकस्यैव सदाशिवस्य लीलाविग्रहेष्वेकाखण्डानन्तज्ञानानन्दघनस्वरूपेष्वप्यघटनघटनापटीयस्या तन्मायया ऽन्यदेहवद्भिन्नपरिच्छिन्नसच्छिद्रत्वादिना प्रतीयमानेषु कथं चिदुत्कर्षापकर्षकल्पकानां शैवम्मन्यानां कोलाहलो दर्शितः ।

तादृशेष्वेव वैष्णवावतारेषु कथं चिदुत्कर्षापकर्षकल्पकानां वैष्णवंमन्यानामपि कलहस्तथैव दृश्यते ।

केचिद्धि नृसिंहतापनीयानुसारेण श्रीनृसिंह एव मूर्त्तित्रयपरो वासुदेवाभिधो महाविष्णुः । अन्ये मूर्त्तित्रयान्तर्गतविष्णोरंशावतारा इति मन्यन्ते ।

अन्ये तु ब्रह्मा विष्णुश्च रुद्रश्चेत्यादिश्रीरामस्तुतिमाश्रित्य स एव तथाविधः अन्ये तदंशांशा इत्याहुः ।

श्रीकृष्णोपासकास्तु प्रकटैश्वर्यत्वात्साक्षाद्वासुदेवादिशब्दाभिधेयत्वाच्चक्रादिमत्वादन्ये ऽशकलाः पुंसः कृष्णस्तु भगवान्स्वयम् । मत्तः परतरं नान्यदित्यादिवचनकोटिभ्यश्च कृष्ण एव तथा अन्येंऽशांशा इत्याहुः ।

एवं वामनादिष्वपि बोध्यम् । किं बहुना एकस्मिन्नपि कृष्णे गोकुलस्थो ऽन्यो द्वारकास्थो ऽन्य इति भेदमारोप्य पूर्वः पूर्णो ऽन्योंऽश इत्येके । हरिवंशे जरासन्धभयादिव पलायितः कृष्णः परशुरामेण संगतस्ततो मन्त्रं पृष्टवान् । स च तस्मै मन्त्रमुपदीश्योवाच तत्र ते कृष्ण संग्रामे सुव्यक्तं वैष्णवं वपुः । द्रक्ष्यन्ति रिपवः सर्वे सुराश्च सुरभावन । तां भजस्व गदां कृष्ण चक्रं च चिरविस्मृतमिति । अनेनेतः पूर्वं विष्णोरंश एवासीत् अनन्तरं स्वयमागत इति गम्यते । अयमर्थश्चाग्रे तत्रैव गरुडाख्याने स्पष्टीकृतः तथा च पूर्वो ऽंशो ऽन्यः पूर्ण इत्यसंदिग्धमित्यन्ये ।

एवमेतादृशेष्वेव देवीविग्रहेष्वपि तन्माहात्म्यवचनान्याश्रित्य केचित्सरस्वतीम् अन्ये रमामन्यउमां सर्वोत्तमामाहुः ।

केचित्तु मार्कण्डेयान्तर्गतसप्तशतिकाप्रतिपाद्या महालक्ष्मीः सर्वोत्तमा ब्रह्मादयः भारत्यादयश्च सर्वे तद्विभूतयः । सैव सर्गादिहेतुर्बन्धमोक्षादिहेतुश्च । तया विसृज्यते विश्वं जगदेतच्चराचरम् । सैषा प्रसन्ना वरदा नृणां भवति मुक्तये । संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वरी । सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि । विष्णुः शरीरग्रहणमहमीशान एव च । कारितास्ते इत्यादितद्वचनात् ।

तत्रैव हंसयुक्तविमानस्थइत्यादिना वृत्रप्राणहरे चैन्द्रीत्यन्तेन सप्तमातॄणां तद्विभूतित्वं दर्शितम् । एतेषां ब्रह्मादीनां सर्वेषां तदंशत्वात्तदभिन्नत्वे ऽन्योन्यमप्यभेदः । तदभिन्नाभिन्नस्य तदभिन्नत्वमिति न्यायादिति वदन्ति । प्राधानिकरहस्यादिवचनावलम्ब्येतन्मतप्रपञ्चो ऽपि रत्नाकरे द्रष्टव्यः ।

एवमग्नीन्द्रादित्येश्वरवादा अपि तन्माहात्म्योपपादकश्रुतीतिहासपुराणवचनान्याश्रित्य तत्रैव प्रपञ्चिता ज्ञेयाः । तत्तद्भक्ता अपि सर्गादिहेतुत्वरूपेश्वरलक्षणं श्रुत्यादिप्रमाणं च तत्रतत्र दर्शयन्तो लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति न्यायेनेश्वरत्वं साधयन्ति । एवं हि वादिनो यद्विवाहस्तद्गीतगानमिति न्यायानुसाराणि स्वस्वेष्टदेवमाहात्म्यवाक्यानि पश्यन्तो ऽन्यानि तु पश्यन्तो ऽपि दुराग्रहपिनद्धदृष्टित्वादपश्यन्त इव तदेकवाक्यतादिकं चाजानन्तो ऽन्धगजन्यायेनान्योन्यं विवदन्ते अबुद्ध्वैव च मतान्तरं कूपमण्डूकन्यायान्निराकुर्वन्तो बुधैरुपहसनीयतां यान्ति । केचित्तु स्वस्वप्रीतिगोचरान्यक्षराक्षसभूतप्रेतपिशाचादीन्नृपनापितपुत्रन्यायेनायमेव सर्वोत्कृष्टो ऽयमेव सर्वोत्तम इति मन्यन्ते तेभ्यश्च स्वयं तत्तत्स्वाभिलषितार्थतृष्णाग्रस्तेभ्यो ऽपि स्वशिश्नमपि चुम्बन्तमिक्षुदण्डमयाचतेति न्यायेन स्वाभिलषितार्थान्याचन्ते ।

अन्ये वटाश्वत्थचैत्यचूतार्कवंशादीनि स्वस्वकुलदैवतानि मत्वा स्थावरयोनिप्राप्त्या ऽतिदुःखितेभ्यो ऽपि तेभ्यो महिषीप्रसवौन्मुख्ये महिषो मदनातुर इति न्यायेनेष्टं याचन्ते अन्धचटकन्यायेनाकस्माल्लब्धं चार्थं तद्दत्तं मन्यन्ते ।

अघटनघटनापटीयस्या माययोपहितं जगतामभिन्न-निमित्तोपादानं परब्रह्म परमेश्वरः तस्यांश इवांशैरीश्वर-कोटिभिर्ब्रह्मादिभिर्जीवकोटिभिश्च सूत्रविराडग्न्यादिभि-र्जगद्व्याप्तमित्यौपनिषदाः ।

तथा च श्रुतिः मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् । तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगदिति । एवं च जडानामप्यधिष्ठानानतिरेकात्तदीशत्ववादिभिरपि न विरोधः । सर्वे चैते सेविता ईश्वरत्वात्फलदा भवन्ति फलवैषम्यं तु पूज्यपूजादेः सात्त्विकादिवैषम्यात् । मोक्ष-स्तु प्रत्यगभिन्नब्रह्मसाक्षात्कारादेव । तदुक्तं वृद्धैः ईशसूत्र-विराड्वेधा विष्णुरुद्रेन्द्रवह्नयः । विघ्नभैरवमैरालमारि-कायक्षराक्षसाः । विप्रक्षत्रियविट्शूद्रगवाश्वमृगपक्षिणः । अश्वत्थवटचूताद्या यवव्रीहितृणादयः । जलपाषाणमृत्का-ष्ठवास्यकुद्दालकादयः । ईश्वराः सर्व एवैते पूजिताः फल-दायिनः । यथा यथोपासते तं फलमीयुस्तथातथा । फलो-त्कर्षापकर्षौ तु पूज्यपूजानुसारतः । मुक्तिस्तु ब्रह्मतत्त्वस्य ज्ञानादेव न चान्यथा । स्वप्रबोधं विना नैव स्वस्वप्नो हीयते यथा । अद्वितीयब्रह्मसत्त्वे स्वप्नो ऽयमखिलं जगत् । ईश-जीवादिरूपेण चेतनाचेतनात्मकमिति ।

ननु प्रत्यगभिन्नमेकमेवाद्वितीयं ब्रह्मेति भवतां सि-द्धान्तः । ईश्वराः सर्वे एवैत इत्युक्त्या तु पुत्रलिप्सया देवं भजन्त्या भर्त्ता ऽपि नष्ट इति न्यायेन जीवेशाभेदं साध-यितुं प्रवृत्तैर्भवद्भिः सर्ववादिसंमत ईशाभेदो ऽपि नाशितः स्यात् । न चैषां विकल्पेनेशत्वसम्भवः वस्तुनि तदयोगात् । नापि समुच्चयेन परेशितृत्वापत्तेः । नापि कल्पभेदेन व्य-वस्थया सर्वेषामप्यैश्वर्यस्य कालतः परिच्छिन्नतया न क-स्यापि सर्वेशत्वमिति दोषापातात् । तथा च वृद्धिमिष्टव-

तो मूलं विनष्टमिति न्यायापातः। अश्वत्थादीनां तु न तत्कथमपि सम्भवति। प्रत्यक्षादिविरोधात्। सर्वेषामीशाङ्गत्वाङ्गीकारेऽपि तस्य साङ्गत्वेन घटादिवद्विनाशापत्तिः। ब्रह्मादीशत्वबोधिकानामुत्कर्षापकर्षबोधिकानां च वाचां व्यवस्थाभावादप्रामाण्यापत्तिः। गता च जीवेशकोटित्वव्यवस्था तत्प्रयुक्ता बन्धमोक्षादिव्यवस्था च तत्प्रयुक्तं श्रुत्यादिप्रामाण्यं च। तथा च चर्मतन्तौ महिषीं हन्तीति न्यायापातः। तस्मात्कथं ब्रह्मादेरीशकोटित्वम्। कथं च तेषामत्यन्ताभेदः। का च तदुत्कर्षापकर्षबोधकवचसां व्यवस्था। कथं च तत्तन्माहात्म्यवचसामेकवाक्यता। ब्रह्मादेर्जीवकोटित्वे च का तदीशत्वबोधकवाचां गतिः। कथं च जीवेशाभेदः। कथं चान्योन्यजीवैक्यं कथं च ब्रह्मणो नात्मनां भेदाभावः। कथं च तेषामन्योन्यमपि भेदाभाव इति सर्वं सम्यगुपपादनीयम् येन स्वसिद्धान्तः प्रकृतन्यायसङ्गतिश्च सिध्येत्। अन्यथा ईश्वराः सर्वएवैत इति यथाश्रुतोपगमे प्रकृतन्यायसङ्गतिसिद्धावपि मण्डूकतोलनन्यायेन स्वसिद्धान्तप्रच्यवनादि वज्रलेपायते। अस्यावयवभूतैरिति श्रुतेः सावयवत्वोपगमे चाश्वत्थादीनां जन्मनाशादिमत्त्वेनोपयन्नपयन्धर्मो विकरोति हि धर्मिणमिति न्यायाद्ब्रह्मणः कूटस्थत्वहानिरिति चेदुच्यते। एक एवाद्वितीयो नित्यशुद्धबुद्धमुक्तस्वभावः कूटस्थः परमात्मा कार्यमात्रप्रकृतित्रिगुणमायोपहितः सर्वनियन्तृत्वादन्तर्यामी कर्त्तुमकर्त्तुमन्यथा कर्त्तुं शक्तत्वादीश इत्युच्यते। यथा चैक एव क्षेत्री क्षेत्रे बीजवापं कुर्वन्वापकः सस्योपेतं तमेव क्षेत्रं जलसेकादिना पालयन्पालकः अन्ते दात्रादिना तमुपसंहरँल्लावक इत्युच्यते तथैक एवेशः स्वोपाधिमायागुणत्रयप्रयुक्तसर्गादिकर्मभेदेन ब्रह्मविष्णुरुद्रशब्दैरु-

च्यते । तत्र कारणीभूतरजोगुणग्रहणेन सर्वप्रपञ्चस्य स्रष्टा सन्स एव ब्रह्मेत्युच्यते । हिरण्यगर्भस्तु यद्यप्यपञ्चीकृतस्रष्टृत्वाभावान्न ब्रह्मा । तथापि पञ्चीकृतभूतभौतिकस्रष्टृत्वात् क चिद्ब्रह्मेत्युपचर्यते । स च जीव एव कल्पान्तरीयसूत्रात्माहंग्रहोपासनया तद्भावं प्राप्त इति प्रसिद्धमितिहासादिषु । अतस्तदीशत्वबोधिका वाचस्तदन्तर्यामिपराः । एवं विराड्वह्नीन्द्रसूर्यादीशत्वबोधिका अपीति बोध्यम् । तदन्तर्यामिणश्च वस्तुतस्तदभेदे ऽपि भेदव्यपदेशाच्चान्य इत्यादिसूत्रेभ्यः य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयति । भीषा ऽस्माद्वातः पवत इत्यादिश्रुतिभ्यश्च व्यावहारिकभेदो ऽपि स्वीक्रियते । कारणीभूतसत्त्वगुणमादाय सर्वं चराचरं प्रपञ्चं पालयन्स विष्णुरित्युच्यते । तादृशतमोगुणमादायोपसंहरन्स एव रुद्र इति कथ्यते । एवं चैकस्यैव वस्तुनः परब्रह्मपरमशिवमहाविष्णुवासुदेवादिशब्दगोचरस्य चतुर्मुखचतुर्भुजपञ्चमुखरूपाः पुमाकाराः वाणीरमोमारूपाः स्त्र्याकारा लीलाविग्रहाः । ननु चतुर्मुखाकारो विधेश्चतुर्भुजाकारो हरेः पञ्चमुखाकारो हरस्य वाण्याकारो विधे रमाकारो हरेरुमाकारो हरस्य विग्रह इति विशिष्य वक्तव्यं गुणत्रयभेदेन तदवच्छिन्नानां भेदात्तथा च कथमेकस्येत्युक्तमिति चेच्छृणु । चतुर्भुजशरीरिणः पालकत्वप्रयोजकं विष्णुत्वमेवेति वक्तुमशक्यं दैत्यसंहारादिरूपस्य तमोऽवच्छिन्नरुद्रकार्यत्वात् । एवं पञ्चमुखाकारावच्छिन्नस्येशस्य त्रिपुरादिदैत्यसंहर्तृत्वे ऽपि न केवलरुद्ररूपत्वनिर्णयः संहारस्य देवादिपालनफलकत्वेन विष्णुकार्यत्वात् । शिव एको ध्येयः शिवंकरः प्रज्ञा च तस्मात्प्रसृता पुराणीत्यादिश्रुत्या स मोचयति सुप्रीतः मोचयामि श्वपाकं वे-

त्यादिस्मृत्या च मुक्तिज्ञानादिरूपस्य सत्त्वावच्छिन्नविष्णुकार्यस्य प्रतीतेश्च । तमूचूर्भ्रातरो रुद्रः सेवितः सात्त्विकैर्जनैः । मोचयेत्सत्त्वसंयुक्तः पूजयेच्छ्रमतो हरमिति कौर्मे तु रुद्रे साक्षादेव सत्त्वयोगः प्रतिपादितः । एतेन तामसत्वेन रुद्रस्यापकर्षत्वप्रलापो मूर्खाणां निरस्तः । निरन्तरं दुःखमयसंसारपरिवृत्तिभ्रान्तानां जीवानां कं चित्कालं विक्षेपविगमसमुल्लसदात्मानन्दानुभवेन विश्रान्तिं संपादयितुकामस्य तस्य संहाराय तमोग्रहणस्य दुश्चिकित्स्यव्रणपीडितानां व्रणं शिशमयिषोः शस्त्रग्रहणन्यायेन निदानज्ञस्य भिषजो रुग्णहिंसां प्रयुञ्जतः । न किं चिदपि नैर्घृण्यं घृणैवात्र प्रयोजिकेति शिवपुराणे व्याख्यातेन निरतिशयकरुणाम्बुधित्वलिङ्गात् । ब्रह्मकोटौ गुणवश्यत्वासम्भवात् निद्रालस्यादेस्तमःकार्यस्य तत्राप्रसिद्धेश्च । तमोयोगमात्रेण तत्पारवश्यस्य शङ्कितुमशक्यत्वात् । अन्यत्राप्यतिप्रसङ्गात् । उत्कर्षापकर्षभावे श्रुतिस्मृतिविगीतत्वस्य प्रतिपादयिष्यमाणत्वाच्च । सत्त्वोद्रिक्तस्ततो ब्रह्मेति विष्णुपुराणादौ ब्रह्मणो ऽपि सत्त्वगुणयोगेन विष्णुत्वं प्रतीयते । भारते चातिवृद्धानां प्रजानां विधेः कोपाग्निनोपसंहर्तृत्वस्मरणेन रुद्ररूपत्वं चावगम्यते । वासिष्ठे तु सत्त्वं देवा हरादय इति साम्येन सर्वेषां शुद्धसत्त्वप्रधानमायोपाधित्वमुक्तम् । एवं भवान्या दैत्यादिसंहर्तृत्वे ऽपि पालनरूपविष्णुकार्यप्रतीतेः नृणां भवति मुक्तयइति मोचकत्वरूपसत्वावच्छिन्नकार्यप्रतीतेः । महिषासुरयुद्धे ऽसंख्यगणोत्पादकत्वरूपरजोवच्छिन्नकार्यप्रतीतेश्च न केवलरुद्ररूपत्वनिर्णयः । ननु मोक्षप्रदत्वादिकमिदं महालक्ष्म्या उक्तम् । सा चान्यैव समष्टिरूपेति मार्कण्डेयप्राधानिकरहस्यगततन्माहात्म्यलोचनेन बुध्यते । तथा च कथमनेन पार्वत्या

यत्वमित्यादिकमालोचनीयमित्याहुः । अत्र कारणमुखेन चातुर्विध्यं तद्विशेषलक्षणानि चाह । समानेत्यादि । समानेन कोटिद्वयसहचरितधर्मेण प्रकारेण ज्ञानाद् धर्मितावाच्छेदकावच्छिन्नविशेष्यकज्ञानादिति यावत् । तथा अनेकेन तत्तद्भाववद्व्यावृत्तेन धर्मेण प्रकारेण ज्ञानात् । तथा विप्रतिपत्तेर्विरुद्धकोटिद्वयोपस्थापकशब्दात् । तथा उपलब्ध्यव्यवस्था प्रमात्वसंशयस्तस्मात् । अनुपलब्धिर्विरोधिभ्रमत्वं तदव्यवस्था तत्संशयस्तस्माच्च जायमानो विमर्षः संशय इत्यन्वयः । अत्र कल्पे पञ्चविधत्वं संशयस्येति । यद्वा संशयस्य त्रैविध्यमेव । संशयसामान्यहेतुमाह । उपलब्ध्येति । उपलब्धिस्तत्कोटिनिश्चयोऽनुपलब्धिस्तदभावकोटिनिश्चयस्तयोरव्यवस्थाऽभावस्तस्मात् । चकाराद् विशेषदर्शनाद्यभावाच्चेति । केचित्तु विप्रतिपत्तिवाक्यस्य न संशायकत्वं संशयात्मकपरोक्षज्ञानानभ्युपगमात् । परं तु विप्रतिपत्तिवाक्यात् कोटिद्वयोपस्थितौ मानसः संशय इत्याहुः । चकारेण व्याप्यसंशयस्य व्यापकसंशयहेतुत्वं समुच्चीयते । एतस्य प्राचीनैरपि सर्वैरनङ्गीकारान्न साक्षादुक्तमिति । वस्तुतः चकारो वार्थे विकल्परूपे विशेषापेक्षः कोटिद्वयस्मरणापेक्ष इत्यर्थः । अत्र च साधारणधर्मप्रकारेण धर्मिनिश्चयत्वादिना साक्षात् संशयहेतुत्वं कोट्युपस्थितिश्च संशयस्मृत्यादिसाधारणी विशेषणज्ञानविधया संशयहेतुः तेन न धारावाहिकसंशयानुपपत्तिः । साधारणधर्मवद्धर्मिज्ञानादिकार्यतावच्छेदके तादृशधर्मवद्धर्मिविशेष्यकज्ञानोत्तरत्वस्य निवेशान्न तद्विलम्बात् संशयधाराया अविरलत्वभङ्गो न वा कार्यकारणभावे व्यभिचार इति । अथवा सर्वाणि पञ्चम्यन्तानि विशेषेत्यनेनान्वितानि । तथा च साधारणधर्मवद्धर्मिज्ञानजन्यकोट्युपस्थि-

तित्वादिनैव संशयहेतुत्वमिति लभ्यते साधारणधर्मवद्धर्मिज्ञानादेश्च तादृशकोट्युपस्थितिद्वारैव संशयहेतुत्वम् । नव्यास्तु साधारणधर्मवद्धर्मिज्ञानत्वादिना तादृशधर्मज्ञानजन्यकोट्युपस्थितित्वादिना च न संशयहेतुत्वं किं तु कोटिद्वयविशिष्टबुद्धिसामग्रीसमाजादेव संशयः । एवं ज्ञानधर्मिकप्रामाण्याप्रामाण्यसंशयोऽपि न विषयसंशयहेतुः । अगृहीताप्रामाण्यकबाधनिश्चयस्य विरोधितया एककोटिज्ञाने प्रामाण्याप्रामाण्यसंशये विरोधापसरणेनापरकोटिभानसम्भवेन संशयसम्भव इति प्रामाण्यसंशयादेः संशयोपयोगः । तथा व्याप्यसंशयोऽपि न व्यापकसंशयहेतुरित्याहुः ॥ २३ ॥

क्रमप्राप्तं प्रयोजनं लक्षयति ।

यमर्थमधिकृत्य प्रवर्तते तत् प्रयोजनम्(१) ॥ २४ ॥

अधिकृत्य उद्दिश्य । तथा च प्रवृत्त्युद्देश्यताख्यविषयत्वं प्रयोजनत्वम् । प्रवृत्तेर्हि विषयता त्रयी उद्देश्यता साध्यतोपादानता च । तत्र यदिष्टसाधनताज्ञानाधीना यस्मिन्नुत्पाद्ये प्रवृत्तिस्तस्मिन्निष्टे उद्देश्यता तस्मिन्नुत्पाद्ये च साध्यता । यथा स्वर्गे उद्देश्यता यागे साध्यता हविराद्युपादाने चोपादानतेति । तद्धर्मिकेष्टसाधनताज्ञानाप्रयोज्यप्रवृत्त्युद्देश्यता तन्निष्ठा स्वतः प्रयोजनता । सा च सुखदुःखाभावयोस्तत्साक्षात्कारे च । इष्टसाधनताज्ञानाधीनप्रवृत्त्युद्देश्यता गौणप्रयोजनता सुखाद्युपायेषु । अथवा सूत्रेऽधि-

(१) उद्देशक्रमप्राप्तस्य प्रयोजनस्य लक्षणम् । यम—नम् । अत्रार्थशब्दो गौणमुख्यप्रयोजनावरोधार्थः । तत्र मुख्यं सुखदुःखाप्तिपरिहारौ गौणं तु तत्साधनम् । अत्र भाष्यं यमर्थमित्यादि । इति सूत्रांशोपन्यासानन्तरं भाष्यनाम धृत्वा भाष्यांशोपन्यासस्तात्पर्यटीकायां कृतः । प्रयोजनलक्षणाय सूत्रम् । यमर्थमधिकृत्य प्रवर्तते तत् प्रयोजनमिति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

कृत्येति । इच्छाविषयीकृत्येत्यर्थः । तथा चेच्छाविषयत्वमेव प्रयोजनत्वम् । अन्येच्छानधीनेच्छाविषयत्वं स्वतः प्रयोजनत्वम् । अन्येच्छाधीनेच्छाविषयत्वं गौणप्रयोजनत्वमिति ॥ २४ ॥

क्रमप्राप्तं दृष्टान्तं लक्षयति ।

लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः(१) ॥ २५ ॥

लौकिको यथार्थकोटिनिश्चयशून्यः प्रतिपाद्य इति यावत् । परीक्षको यथार्थकोटिनिश्चयवान् प्रतिपादक इति यावत् । बहुवचनं कथाबाहुल्याभिप्रायेण तथा च प्रतिपाद्यप्रतिपादकयोर्यस्मिन्नर्थे बुद्ध्या साध्यसाधनविषयिण्या साध्यसाधनयोरभावविषयिण्या वा बुद्ध्या साम्यं वैशिष्ट्यं सोऽर्थो दृष्टान्तः । तथा चोभयोः साध्यसाधननिश्चयविशेष्योऽन्वयिदृष्टान्तः । साध्याभावसाधनाभावनिश्चयविशेष्यो व्यतिरेकिदृष्टान्तः । सामान्यलक्षणं तु तादृशान्यतरनिश्चयविशेष्यत्वमिति ॥ २५ ॥

समाप्तं न्यायपूर्वाङ्गप्रकरणम् ॥

न्यायपूर्वाङ्गं न्यायप्रयोजकम् ॥

क्रमप्राप्तं सिद्धान्तं लक्षयति ।

तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः(२) ॥२६॥

(१) लौकिकपरीक्षकाणामिति सूत्रमिति वार्त्तिकम् ।

(२) अत्राधुनिकनैयायिकाः अत्र भाष्यकारः सिद्धान्तसामान्यलक्षणसूत्रमपठित्वैव तात्पर्यं व्याचष्टे अथ सिद्धान्त इत्यादिनेति तात्पर्यटीकायां दृश्यते तेन सिद्धान्तसामान्यसूत्रं किमप्यासीद् यदद्यत्वे न क्वाप्युपलभ्यत इत्याहुः । तत्र वयं ब्रूमः । अत्रैव तात्पर्यटीकायामन्नैवार्थे सूत्रमित्याह वार्त्तिककारः । अस्यार्थस्येति । तन्त्रा–न्तः । सूत्रार्थमाक्षिपति किं पुनरिति । इति वार्त्तिकप्रतीकधारणं दृश्यते । ईदृशी चात्रत्या वार्त्तिकपङ्क्तिः । अस्यार्थस्य प्रदर्शनार्थं सूत्रम् । तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्त इति । किं पुनरिदं सूत्रं लक्षणार्थमाहो विभागार्थमित्यादि । समाधानावसरे वार्त्तिक-

तन्त्रं शास्त्रं तदेवाधिकरणं बोधकतया यस्य स तन्त्राधिकरणः शास्त्रप्रतिपादितार्थः तस्याभ्युपगमस्य संस्थितिः सम्यक्प्रकारेण निश्चयरूपतयाऽप्रामाण्यज्ञानानास्कन्दिततया वा स्थितिः शास्त्रप्रतिपादितार्थनिश्चयः शास्त्रप्रतिपादितार्थाप्रामाण्यज्ञानानास्कन्दितनिश्चयो वा पर्यवसितः। अथवा शास्त्रेणाधिक्रियत उत्पाद्यते ऽभ्युपगमो यस्य तादृशार्थस्य संस्थितिर्निश्चय इति पूर्वोक्त एवार्थः। तथा च वार्त्तिकटीके। अभ्युपगमः सिद्धान्त इति। अभ्युपगमः शास्त्राधीननिश्चयः। यद्वा तन्त्राधिकरणाभ्युपगमेन संस्थितिर्यस्य स तन्त्राभ्युपगम्यमानोऽर्थः। तथा च भाष्यम्। अभ्युपगम्यमानोऽर्थः सिद्धान्त इति। तथा चाभ्युपगम्यमानोऽर्थोऽर्थाभ्युपगमो वा। अर्थाभ्युपगमयोर्गुणप्रधानभावभेदेन फलतो न कश्चिद्विशेष इति। केचित्तु तन्त्रे चाधिकरणं चाभ्युपगमश्च ते तन्त्राधिकरणाभ्युपगमास्तैः संस्थितिर्यस्य सोऽर्थ इति। तन्त्रपदेन सर्वतन्त्रप्रतितन्त्रयोस्तन्त्रत्वेन ग्रहणम्। तथा च तन्त्राधिकरणाभ्युपगमसंस्थित्यन्यतमत्वं सिद्धान्तसामान्यलक्षणम्। तत्र तन्त्रद्वैविध्येन चतुर्धा विभागमाह सर्वतन्त्रेत्यादीत्याहुः ॥ २६ ॥

कृता आद्यस्य लक्षणार्थत्वादुत्तरस्य विभागार्थत्वादित्यादिना सिद्धान्तसामान्यसूत्रत्वं यथोक्तसूत्रस्य व्यवस्थापितम्। तात्पर्यटीकाकृताप्यत्र तदेवं भाष्यकारेण व्याख्याय सामान्यलक्षणं पठितमेवं व्याख्यानपूर्वकं विभागसूत्रं पठति। तन्त्रार्थसंस्थितिरिति। इति सिद्धान्तविभागभाष्यमवतारितम्। एवं चैतादृशवार्त्तिकटीकादर्शनाद् भाष्यकारैर्व्याख्यानपूर्वकं तन्त्राधिकरणाभ्युपगमेत्यादिसिद्धान्तसामान्यलक्षणसूत्रं पठित्वा पुनर्व्याख्यानपूर्वमेव विभागसूत्रं पठतीत्येतदेवावगम्यते न तु सामान्यसूत्रं किमप्यासीदिति। न्यायाश्रयसिद्धान्तप्रकरणं तत्सामान्यलक्षणाय सूत्रम्। तन्त्राधिकरणेत्यादिन्यायतत्त्वालोकी वाचस्पतिमिश्रलेखदर्शनाच्चास्यैव सिद्धान्तसामान्यसूत्रत्वं निश्चीयते।

विभजते ।

सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात्[१] ॥ २७ ॥

सर्वतन्त्रसंस्थित्यादिभेदेन चतुर्धा । अर्थान्तरभावात् परस्परं भेदात् सिद्धान्तश्चतुर्विध इति पूरितसम्बलितोऽर्थः ॥ २७ ॥

सर्वतन्त्रसंस्थितिं लक्षयति ।

सर्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतः सर्वतन्त्रसिद्धान्तः[२] ॥ २८ ॥

तन्त्रेऽधिकृतः शास्त्राभ्युपगतः । सर्वतन्त्राविरुद्धः सर्वतन्त्रविरोधिभिन्नः । सर्वपदं सामान्यभेदलाभार्थम् । तेन शास्त्रोक्ताविरोधित्वे सति स्वीयशास्त्राभ्युपगतत्वं सर्वतन्त्रसिद्धान्तत्वम् । यथा जात्यादेरसदुत्तरत्वं तस्य सकलशास्त्रानुक्तत्वेऽपि सकलशास्त्रोक्ताविरोधित्वात् । वस्तुतः सर्वपदं वादिप्रतिवाद्युभयपरं तेन वादिप्रतिवाद्युभयतन्त्राभ्युपगतः । अविरुद्धपदस्याभ्युपगतपरताज्ञापनाय तन्त्रेऽधिकृत इति । यथा नैयायिकैर्मीमांसकस्य विचारे जीवात्मनो ज्ञानवत्त्वादिकं सर्वतन्त्रसिद्धान्तः तस्य वेदान्त्यादिभिरनभ्युपगतत्वेऽपि वादिभ्यामुपगतत्वात् ॥ २८ ॥

(१) सर्वतन्त्रप्रतितन्त्राधिकरणाभ्यपगमसंस्थित्यर्थान्तरभावादित्यस्य सूत्रार्थोऽन्यो वक्तव्य इति पूर्वमुत्तरं वा सूत्रमनार्षमिति । नानार्षम् । आद्यस्य लक्षणार्थत्वादुत्तरस्य विभागार्थत्वादिति च वार्त्तिकम् । तद्विभागसूत्रं सर्वतन्त्रेत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

(२) आदौ सर्वतन्त्रसिद्धान्तलक्षणाय सूत्रम् । सर्वतन्त्राविरुद्ध इत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः । तन्त्रेऽधिकृतोऽर्थ इत्यन्यत्र पाठः ।

द्वितीयं लक्षयति ।

समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः[1] ॥ २९ ॥

समानपदं स्वीयपरं परतन्त्रेत्युपादानात् । यथा मीमांसकैर्नैयायिकस्य कथायां शब्दानित्यत्वम् ॥ २९ ॥

तृतीयं लक्षयति ।

यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः[2] ॥ ३० ॥

प्रकरणपदं प्रकृतपरम् । यस्य सिद्धौ सत्यामेव अन्यस्य प्रकृतस्य सिद्धिर्भवतीत्यर्थः । यमधिकृत्य क्रियते प्रकृतसिद्धिः क्रियत इत्यधिकरणपदव्युत्पत्तेः । तथा च शास्त्राद्युक्तान्यथानुपपत्त्या स्वीकृतोऽर्थोऽधिकरणसिद्धान्तः । यद्वाऽधि शास्त्राद्युक्तमधिकृत्य क्रियते सिद्धिविषयीक्रियते य इतिव्युत्पत्त्या यत्सिद्धौ जायमानायां यस्यान्यप्रकरणस्य सिद्धिः सोऽर्थस्तदधिकरणसिद्धान्तः । तथा च वार्त्तिके । तत्र च वाक्यार्थसिद्धौ तदनुषङ्गी योऽर्थः सोऽधिकरणसिद्धान्त इति । एतद्व्याख्यातं चात्मतत्त्वविवेके दीधितिकृता । येन केनापि प्रमाणेन वाक्यार्थसिद्धौ जायमानायां योऽन्यार्थः सिध्यति स तथेति । यथा द्व्यणुकादौ उपादानगोचरप्रत्यक्षचिकीर्षाकृतिमज्जन्यत्वसिद्धौ तादृशप्रत्य-

---

(१) समा-न्तः । समानशब्द एकपर्यायः नैयायिकानां हि समानं तन्त्रं न्यायशास्त्रं परतन्त्रं सांख्यशास्त्रमित्यादि । तदेतत् सूत्रं वार्त्तिककृद् व्याचष्ट इति तात्पर्यटीका । उद्देशक्रमसङ्गत्या प्रतितन्त्रसिद्धान्तलक्षणाय सूत्रम् । समानतन्त्रसिद्ध इत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

(२) उद्देशक्रमसङ्गत्याधिकरणसिद्धान्तलक्षणाय सूत्रम् । यत्सिद्धावन्येत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

त्वादिमत ईश्वरस्य सर्वज्ञत्वम् । ज्ञानायौगपद्येन मनसः सिद्धौ तस्य विभुत्वाभाव इत्यादि । प्रत्यक्षतः स्थूलत्वसाधनानन्तरं सोऽयमधिकरणसिद्धान्तन्यायेन क्षणभङ्गभङ्ग इत्युक्तं दीधितिकृद्भिरात्मतत्त्वविवेके । केचित्तु लाघवज्ञानादिवशात् कारणीभूतज्ञाने व्यापकतावच्छेदकत्वेनाभातस्याप्यनुमितौ विधेयविशेषणतया भानम् । यथा क्षितिकर्तुरेकत्वादि । एवं पदानुपस्थितस्यापि शाब्दे विषयीभूतं घटादौ छिद्रेतरत्वादीत्याहुः । तन्न । भाष्यादिविरोधात् ॥ ३० ॥

चतुर्थं लक्षयति ।

अपरीक्षिताभ्युपगमात् तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः[१] ॥ ३१ ॥

अपरीक्षितः साक्षात् सूत्रानधीनो योऽभ्युपगमस्तस्मात् । विशेषपरीक्षणं विशेषधर्मसिद्धिः । सोऽभ्युपगमसिद्धान्तः । अभेदे पञ्चमी । साक्षादसूत्रिताभ्युपगम इति पर्यवसितम् । यथा मनस इन्द्रियत्वमिति ॥ ३१ ॥

समाप्तं न्यायाश्रयप्रकरणम् ॥

न्यायाश्रयः न्यायप्रामाण्यसम्पादकः ॥

इति न्यायाश्रयप्रकरणविवरणम् ॥

क्रमप्राप्तानवयवान् विभागमुखेन लक्षयति ।

प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः[२] ॥ ३२ ॥

---

(१) अपरीक्षिताभ्युपगमादिति सूत्रमिति वार्त्तिकम् ।

(२) अवयवानां विभागोद्देशार्थं सूत्रमिति वार्त्तिकम् । तत्राक्षिप्तसामान्यलक्षणं विभागोद्देशसूत्रम् । प्रतिज्ञेत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

तथा च प्रतिज्ञाद्यन्यतमत्वमवयवत्वमिति लक्षणम्। तत्र चोदासीनप्रतिज्ञादिसमानार्थकवाक्यवारणाय न्यायान्तर्गतत्वे सतीति पूरणीयम्। प्रतिज्ञादिकं पुनरत्र न्यायान्तर्गतत्वशून्यमेवोपादेयं पञ्चधा तन्निवेशे गौरवात्। न्यायत्वं तु प्रतिज्ञादिक्रमेणावयवनिर्देशात् तथैवाकाङ्क्षोदयाच्च उचितानुपूर्वीकप्रतिज्ञादिपञ्चकसमुदायत्वं सूत्रकृतोऽभिप्रेतम्। उचितानुपूर्वीकत्वं च प्रतिज्ञोत्तरहेतूत्तरोदाहरणोत्तरोपनयोत्तरनिगमनत्वघटकत्वम्। तच्च व्युत्क्रमप्रयुक्तविभिन्नपुरुषप्रयुक्तप्रतिज्ञादिभेदकूटवत्त्वपर्यवसितम्। यादृशयादृशानुपूर्व्यवच्छिन्ने न्यायव्यवहारस्तादृशान्यतमानुपूर्वीमत्त्वं न्यायत्वमित्यपि कश्चित्। केषाञ्चिन्मते उपनयमात्रस्य सौगतमते उदाहरणादिद्वयस्य मीमांसकमते प्रतिज्ञादित्रयस्य उदाहरणादित्रिकस्यैव वा केषाञ्चिच्च मते दशावयवा इति तन्निराकरणं प्रतिज्ञादिपञ्चकनिर्देशेन सूचितम्। दशावयवाश्च दर्शिता भाष्ये यथा। जिज्ञासा संशयः शक्यप्राप्तिः प्रयोजनं संशयव्युदासश्चेति। एते प्रतिज्ञादिसहिता दश। व्याख्याताश्च ते तात्पर्यटीकायाम्। प्रयोजनं हानादिबुद्धयः तत्प्रवर्तिका जिज्ञासा तज्जनकः संशयः शक्यप्राप्तिः प्रमाणानां ज्ञानजननसामर्थ्यं संशयव्युदासस्तर्क इति। एतेषां च वाक्यत्वाभावेन तद्घटितन्यायावयवत्वासम्भवादिति भावः। परं त्वेते न्यायाङ्गत्वेनोपयुज्यन्ते। समयबन्धकण्टकोद्धारयोः सार्वत्रिकत्वाभावेन न न्यायावयवत्वम्। कण्टकोद्धारस्तु नायं हेत्वाभास इत्याकारशब्दः। को वह्निमान् पर्वतो वह्निमान् कुतो धूमात् कथमस्य गमकत्वं योयो धूमवान् स वह्निमान् कुतोऽस्य पक्षधर्मत्वं वह्निव्याप्यधूमवानयमेतावता किमायातं तस्माद्वह्निमानित्यादिक्रमेण न्यायप्रयोगात् तत्रा-

काङ्क्षाव्यञ्जककिंपदस्तोमो न न्यायघटको विभिन्नपुरुषीयत्वादसार्वत्रिकत्वाच्च । एवमन्यदपि विवेच्यम् ॥ ३२ ॥

क्रमप्राप्तां प्रतिज्ञां लक्षयति ।

साध्यनिर्देशः प्रतिज्ञा[१] ॥ ३३ ॥

साध्यं विधेयतावच्छेदकावच्छिन्नं तस्य निर्देशः पक्षतावच्छेदकावच्छिन्ने तद्बोधकः शब्दः प्रतिज्ञेत्यर्थः । अथवा साध्यो विधेयधर्मविशिष्टो धर्मी पक्षस्तस्य निर्देश इत्यर्थः । तथा च पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकतापर्याप्त्यधिकरणपर्याप्तावच्छेदकताकप्रकारतानिरूपकबोधजनकवाक्यं प्रतिज्ञेति पर्यवसितम् । अत्राप्युदासीनवाक्यवारणाय न्यायान्तर्गतत्वे सतीति पूरणीयम् । निगमनवारणाय पर्याप्तिनिवेशनम् । सम्बन्धभेदेन हेतोरेव यत्र साध्यता तत्र हेत्ववयववारणाय पक्षविशेष्यतानिरूपितेति । तादृशहेतुत्वपक्षकस्थलीयहेत्ववयववारणाय साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं प्रकारताविशेषणं बोध्यमिति ॥ ३३ ॥

क्रमप्राप्तं हेतुं लक्षयति विभजते च सूत्राभ्याम् ।

उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः[२] ॥ ३४ ॥

---

(१) ननु साध्यनिर्देशः प्रतिज्ञेत्युक्ते साध्ययोर्हेतुदृष्टान्तयोरपि प्रसङ्गो यथाऽनित्यः शब्दश्चाक्षुषत्वात् नित्यः शब्दोऽस्पर्शत्वाद् बुद्धिवच्चेति । न । सूत्रार्थापरिज्ञानात् साध्यनिर्देशः प्रतिज्ञेति प्रज्ञापनीयधर्मविशिष्टस्य धर्मिणः परिग्रहवचनमित्येतत्सूत्रव्याख्याने वार्त्तिकम् । दृष्टावयवेषु प्रतिज्ञायाः प्राथम्यादादौ तल्लक्षणाय सूत्रम् । साध्यनिर्देशः प्रतिज्ञेति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

(२) हेतोरवसरप्राप्तस्य लक्षणापदेशद्वारेणोदाहरणसाधर्म्यमिति सूत्रमिति वार्त्तिकम् । श्रुत्यर्थाभ्यामुभयलक्षणसूचनात् सूत्रमिति तात्पर्यटीका । प्रतिज्ञानन्तरं हेतुलक्षणाय सूत्रम् । उदाहरणेत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

तथा वैधर्म्यात्[1] ॥ ३५ ॥

साध्यस्य साधनं साधकताविशिष्टं यत्रेतिव्युत्पत्त्या साध्यसाधकताविशिष्टहेतुबोधकवाक्यमिति पर्यवसितम्। साधकता च ज्ञापकता। तथा च प्रकृतपक्षविशेषणतापन्नसाध्यान्वितज्ञापकतान्वयिप्रकृतहेतुबोधकवाक्यत्वं हेतुत्वमिति सामान्यलक्षणं विवक्षितम्। अत्राप्युदासीनवारणाय न्यायान्तर्गतत्वे सतीति पूरणीयम्। धूमाद्वह्निमतः सधर्मा पर्वतो वह्निमानित्यादिप्रतिज्ञावारणाय प्रकृतपक्षविशेषणतापन्नेति। निगमनेऽयमादिपदस्यानुषङ्गपक्षेऽतिप्रसङ्गवारणाय प्रकृतहेत्विति। हेतुतावच्छेदकमात्रावच्छिन्नेति तदर्थः। निगमने तस्मादित्यत्र तत्पदेन व्याप्तिपक्षधर्मताविशिष्टहेतुबोधनान्नातिप्रसङ्गः। यद्वा साध्यान्वितज्ञापकत्वबोधकः साध्यान्वितस्वार्थबोधको वाऽवयव इति पर्यवसितोऽर्थः। अस्य त्रैविध्यमाह। उदाहरणसाधर्म्यात् तथा वैधर्म्यादिति। इदं च साधर्म्यवैधर्म्याभ्यामपीत्यस्योपलक्षकमुदाहरणपदं ज्ञातपरं साधर्म्यमन्वयव्याप्तिः वैधर्म्यं व्यतिरेकव्याप्तिस्तथा चान्वयव्याप्तिमात्रगृहीतहेतुबोधको हेत्ववयवः केवलान्वयी। व्यतिरेकव्याप्तिमात्रगृहीतहेतुबोधको हेत्ववयवः केवलव्यतिरेकी। उभयव्याप्तिगृहीतहेतुबोधको हेत्ववयवोऽन्वयव्यतिरेकीति। वस्तुतस्तु एकदा व्याप्तिद्वयानुपन्यासस्तथाकाङ्क्षाविरहादिति द्वैविध्यमेवास्य। तथा च गृहीतान्वयव्याप्तिहेतुबोधकोऽन्वयी गृहीतव्यतिरेकव्याप्तिकहेतुबोधको हेत्ववयवो व्यतिरेकी। वस्तुतस्तु उदाहरणसाधर्म्यात् साध-

(१) सूत्रान्तरमवतारयति। किमेतावदिति। इति तात्पर्यटीका। किमेतावद्धेतुलक्षणमिति नेत्युच्यते किं तर्हि तथा वैधर्म्यादिति वार्त्तिकम्। साधर्म्यनिरूप्यत्वात् तदनु वैधर्म्यहेतुलक्षणाय सूत्रम्। तथा वैधर्म्यादिति न्यायतत्त्वालोके वाचस्पतिमिश्राः।

र्थ्यबोधकोदाहरणात् साधर्म्यमन्वयसहचारो वैधर्म्यं व्यतिरेकसहचारः । उदाहरणस्य व्याप्तिबोधकतामते साधर्म्यमन्वयव्याप्तिर्वैधर्म्यं व्यतिरेकव्याप्तिः । प्रयोजकाकाङ्क्षोत्थापकत्वं पञ्चम्यर्थः । साध्यसाधनं परकीयसाध्यानुमितिप्रयोजकं वाक्यं न्यायावयव इति यावत् । तथा चान्वयव्याप्तिबोधकोदाहरणप्रयोजकाकाङ्क्षोत्थापको न्यायावयवोऽन्वयिहेत्ववयवः । व्यतिरेकव्याप्तिबोधकोदाहरणप्रयोजकाकाङ्क्षोत्थापको न्यायावयवो व्यतिरेकी । इत्थं चोदाहरणप्रयोजकाकाङ्क्षोत्थापको न्यायावयवो हेत्ववयव इति सामान्यलक्षणं बोध्यमिति ॥ ३४-३५ ॥

क्रमप्राप्तमुदाहरणं लक्षयति ।

साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणम्[1] ॥ ३६ ॥

साध्यसाधर्म्यात् हेतौ साध्यसामानाधिकरण्यं गृहीत्वा । ल्यब्लोपे पञ्चमी । तद्धर्मेति । तं साध्यरूपं धर्मं भावयत्यनुमापयति यो दृष्टान्तः सदृष्टान्तपदसमूहः । हेतौ साध्यसामानाधिकरण्यबोधकदृष्टान्तशाली न्यायावयव उदाहरणमन्वय्युदाहरणम् । उदाहरणसामान्यलक्षणं तु सदृष्टान्तन्यायावयवत्वम् । अवयवान्तरे दृष्टान्तविरहान्नातिव्याप्तिः । दृष्टान्तस्यासार्वत्रिकत्वमते साध्यस्य साधर्म्यमन्वयव्याप्तिर्यत्र तं हेतुमादाय तादृशहेतुमतीति यावत् । दृष्टान्तः साध्यवत्त्वबोधकः । तद्धर्मभावी न्यायावयवः । तेन साध्यान्वयव्याप्तिविशिष्टहेतुमद्धर्मिकसाध्यप्रकारकबोधजनको न्यायावयवोऽन्वय्युदाहरणमित्यर्थः । योयो धूमवान् स वह्निमानित्यत्र धूमपदेन वह्निव्या-

(१) साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणमिति सूत्रमिति वार्त्तिकम् ।

प्यधूमे लक्षणा। तेन वह्निव्याप्यधूमवान् वह्निमानित्यन्वयबोधः। यत्तत्पदं तु तादृशलक्षणाग्राहकमित्युदाहरणे यथोक्तलक्षणसम्भवः। सामान्यलक्षणं च प्रकृतसाध्यान्वयव्याप्तिविशिष्टहेतुमद्धर्मिकसाध्यवत्त्वबोधकसाध्याभावव्यापकहेत्वभाववत्त्वबोधकान्यतरावयवत्वम्। यन्मते यत्तत्पदवैयर्थ्यापत्त्या धूमपदे न लक्षणा किं त्वेकं यत्पदं महानसपरमपरं च यत्पदं महानसान्यपरम्। तेन योयो धूमवानित्यनेन महानसं धूमवन्महानसान्यच्च धूमवदित्यन्वयबोधः। एवं तत्पदेनापि महानसत्वेन महानसान्यत्वेन चोपस्थितिः। तेन महानसं वह्निमन्महानसान्यच्च वह्निमदित्यपरभागजन्यान्वयबोधः। एतस्य च भूयःसहचारदर्शनद्वारा व्याप्तिग्रहोपयोगित्वं व्याप्तिबोधस्तूपनयादेव। दृष्टान्तस्यापि न नियमस्तन्मते दृष्टान्त उदाहरणमिति सामान्यलक्षणम्। तत्र दृष्टान्तशब्दो दृष्टान्तयोग्यावयवार्थकः। दृष्टान्तयोग्यत्वं चावयवान्तरार्थानन्वितार्थकत्वम्। तच्चोदाहरणं द्विविधमन्वयिव्यतिरेकिभेदात्। तत्रान्वय्युदाहरणमाह साध्यसाधर्म्यात् हेतौ साध्यसहचारात् तद्धर्मभावी एकधर्मावच्छिन्ने साध्यसाधनवत्त्वबोधको न्यायावयव इत्यर्थः। दृष्टान्त इत्यनेनान्वयादवयवान्तरार्थानन्वितार्थकत्वे सत्येकधर्मावच्छिन्ने साध्यसाधनवत्त्वबोधको न्यायावयवोऽन्वय्युदाहरणमिति ॥ ३६ ॥

व्यतिरेक्युदाहरणं लक्षयति।

तद्विपर्ययाद्वा विपरीतं व्यतिरेक्युदाहरणम्[1] **॥ ३७ ॥**

---

(१) सूत्रस्थश्च वाशब्दः समुच्चय इत्येतत्सूत्रव्याख्यानावसरे तात्पर्यटीका। अत्र व्यतिरेक्युदाहरणमिति अन्यत्र सूत्रपाठपुस्तके वार्त्तिकतात्पर्यटीकादौ च न

तयोः साध्यसाधनयोर्विपर्ययाद् व्यतिरेकादेकधर्मिणीति यावत् । पूर्ववत् ल्यब्लोपे पञ्चमी । एकधर्मिणि साध्यसाधनयोरभावं बोधयित्वेत्यर्थः । विपरीतं साध्याभावविपरीतं साध्यसाधकमिति यावत् । वाशब्दो दृष्टान्तवचनसमुच्चायकः । तथा च साध्यसाधनाभावसामानाधिकरण्यबोधकदृष्टान्तशाली न्यायावयवो व्यतिरेक्युदाहरणमित्यर्थः । अथवा तद्विपर्ययात् साध्यव्यतिरेकव्यापकहेतुव्यतिरेकात् तथा च साध्याभाववति साध्याभावव्यापकत्वेन हेतुव्यतिरेकवत्त्वबोधको न्यायावयव इत्यर्थः । ह्रदो धूमाभाववान् वह्न्यभावादित्यादौ यत्र धूमस्तत्र वह्निरित्याद्युदाहरणे धूमवति धूमव्यापकत्वेन वह्निबोधनात् । अथवा तद्विपर्ययादेकधर्मिणि साध्यसाधनयोरभावात् । तथा च धर्मिणि साध्याभावसाधनाभावबोधकोऽवयवान्तरार्थानन्वितार्थकन्यायावयव इति पर्यवसितम् । वाशब्दो विकल्पपरः स च प्रयोगमपेक्ष्य । तथा चान्वय्युदाहरणं व्यतिरेक्युदाहरणं वा प्रयोक्तव्यमिति ॥ ३७ ॥

क्रमप्राप्तमुपनयं लक्षयति ।

उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः[1] ॥ ३८ ॥

तथाशब्देन बुद्धिस्थत्वेन साध्यव्याप्यहेतुमतो बोधने बुद्धिस्थत्वज्ञानमपेक्षितं तच्च न तादृशबुद्धिं विना सा

दृश्यते । व्यतिरेकोदाहरणलक्षणाय सूत्रम् । तद्विपर्ययाद्वा विपरीतमिति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

(१) उदाहरणानन्तरमुपनयं लक्षयति । उदा-यः । अपेक्षापदं भाष्यकृद्व्याचष्टे । उदाहरणतन्त्र इति । इति तात्पर्यटीका । उद्देशक्रमसङ्गत्योपनयलक्षणाय सूत्रम् । उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनय इति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

प्यधूमे लक्षणा। तेन वह्निव्याप्यधूमवान् वह्निमानित्यन्वयबोधः। यत्तत्पदं तु तादृशलक्षणाग्राहकमित्युदाहरणे यथोक्तलक्षणसम्भवः। सामान्यलक्षणं च प्रकृतसाध्यान्वयव्याप्तिविशिष्टहेतुमद्धर्मिकसाध्यवत्त्वबोधकसाध्याभावव्यापकहेत्वभाववत्त्वबोधकान्यतरावयवत्वम्। यन्मते यत्तत्पदवैयर्थ्यापत्त्या धूमपदे न लक्षणा किं त्वेकं यत्पदं महानसपरमपरं च यत्पदं महानसान्यपरम्। तेन योयो धूमवानित्यनेन महानसं धूमवन्महानसान्यच्च धूमवदित्यन्वयबोधः। एवं तत्पदेनापि महानसत्वेन महानसान्यत्वेन चोपस्थितिः। तेन महानसं वह्निमन्महानसान्यच्च वह्निमदित्यपरभागजन्यान्वयबोधः। एतस्य च भूयःसहचारदर्शनद्वारा व्याप्तिग्रहोपयोगित्वं व्याप्तिबोधस्तूपनयादेव। दृष्टान्तस्यापि न नियमस्तन्मते दृष्टान्त उदाहरणमिति सामान्यलक्षणम्। तत्र दृष्टान्तशब्दो दृष्टान्तयोग्यावयवार्थकः। दृष्टान्तयोग्यत्वं चावयवान्तरार्थानन्वितार्थकत्वम्। तच्चोदाहरणं द्विविधमन्वयिव्यतिरेकिभेदात्। तत्रान्वय्युदाहरणमाह साध्यसाधर्म्यात् हेतौ साध्यसहचारात् तद्धर्मभावी एकधर्मावच्छिन्ने साध्यसाधनवत्त्वबोधको न्यायावयव इत्यर्थः। दृष्टान्त इत्यनेनान्वयादवयवान्तरार्थानन्वितार्थकत्वे सत्येकधर्मावच्छिन्ने साध्यसाधनवत्त्वबोधको न्यायावयवोऽन्वय्युदाहरणमिति ॥ ३६ ॥

व्यतिरेक्युदाहरणं लक्षयति।

तद्विपर्ययाद्वा विपरीतं व्यतिरेक्युदाहरणम्(१) **॥ ३७ ॥**

(१) सूत्रस्थश्च वाशब्दः समुच्चय इत्येतत्सूत्रव्याख्यानावसरे तात्पर्यटीका। अत्र व्यतिरेक्युदाहरणमिति अन्यत्र सूत्रपाठपुस्तके वार्त्तिकतात्पर्यटीकादौ च न

तयोः साध्यसाधनयोर्विपर्ययाद् व्यतिरेकादेकधर्मिणीति यावत् । पूर्ववत् ल्यब्लोपे पञ्चमी । एकधर्मिणि साध्यसाधनयोरभावं बोधयित्वेत्यर्थः । विपरीतं साध्याभावविपरीतं साध्यसाधकमिति यावत् । वाशब्दो दृष्टान्तवचनसमुच्चायकः । तथा च साध्यसाधनाभावसामानाधिकरण्यबोधकदृष्टान्तशाली न्यायावयवो व्यतिरेक्युदाहरणमित्यर्थः । अथवा तद्विपर्ययात् साध्यव्यतिरेकव्यापकहेतुव्यतिरेकात् तथा च साध्याभाववति साध्याभावव्यापकत्वेन हेतुव्यतिरेकवत्त्वबोधको न्यायावयव इत्यर्थः । ह्रदो धूमाभाववान् वह्न्यभावादित्यादौ यत्र धूमस्तत्र वह्निरित्याद्युदाहरणे धूमवति धूमव्यापकत्वेन वह्निबोधनात् । अथवा तद्विपर्ययादेकधर्मिणि साध्यसाधनयोरभावात् । तथा च धर्मिणि साध्याभावसाधनाभावबोधकोऽवयवान्तरार्थानन्वितार्थकन्यायावयव इति पर्यवसितम् । वाशब्दो विकल्पपरः स च प्रयोगमपेक्ष्य । तथा चान्वय्युदाहरणं व्यतिरेक्युदाहरणं वा प्रयोक्तव्यमिति ॥ ३७ ॥

क्रमप्राप्तमुपनयं लक्षयति ।

उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः(१) **॥ ३८ ॥**

तथाशब्देन बुद्धिस्थत्वेन साध्यव्याप्यहेतुमतो बोधने बुद्धिस्थत्वज्ञानमपेक्षितं तच्च न तादृशबुद्धिं विना सा

दृश्यते । व्यतिरेकोदाहरणलक्षणाय सूत्रम् । तद्विपर्ययाद्वा विपरीतमिति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

(१) उदाहरणानन्तरमुपनयं लक्षयति । उदा–यः । अपेक्षापदं भाष्यकृद्व्याचष्टे । उदाहरणतन्त्र इति । इति तात्पर्यटीका । उद्देशक्रमसङ्गत्योपनयलक्षणाय सूत्रम् । उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनय इति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

च बुद्धिरुदाहरणादेवेत्युदाहरणापेक्षत्वम् । एतेन साध्यव्याप्यहेतुमद्वाचकत्वं तथाशब्दविशेषणं सूचितम् । साध्यस्य पक्षवाचकपदस्य उप समीपे पक्षवाचकपदसमभिव्याहृततया संहारः संहृत उपन्यस्तः साध्यव्याप्यहेतुमद्बोधकतथेतिशब्द इति समुदितार्थः । एतच्चान्वय्युपनयलक्षणं तत्र तथा चायमित्येवोपनयप्रयोगात् । व्यतिरेक्युपनयमाह । न तथेति । अत्राप्युदाहरणापेक्ष इत्यस्यान्वयः । वाशब्द उपसंहारेत्यनेनान्वयसूचकः । प्रयोगविकल्पार्थो वा । पक्षवाचकपदसमीपवर्ती न तथेतिशब्दो व्यतिरेक्युपनय इत्यर्थः । उदाहरणापेक्षेत्यनेन साध्याभावव्यापकहेत्वभावाभाववाचकत्वं न तथेतिशब्दविशेषणम् । तत्र तथाशब्देन साध्याभावव्यापकहेत्वभावो बोध्यते नञा चाभाव इति तस्य चान्वयार्थतया हेतुतावच्छेदकसम्बन्धेनेदंपदार्थे पक्षतावच्छेदकावच्छिन्ने ऽन्वयान्न तथायमिति व्यतिरेक्युपनयात् साध्याभावव्यापकहेत्वभावाभावत्वरूपव्यतिरेकव्याप्तिविशिष्टहेतुमत्पक्षलाभ इत्युभयत्रापि न्यायान्तर्गतत्वमुपादेयम् । तेन नोदासीने ऽतिव्याप्तिरिति । सामान्यलक्षणं तूदाहरणोत्थाप्याकाङ्क्षानिवर्तकन्यायावयवत्वमुदाहरणापेक्षेत्यनेन तथासूचनात् । अन्यतरोपनयत्वमिति केचित् । यद्वा उदाहरणापेक्ष उदाहरणोत्थापिताकाङ्क्षाप्रयोज्यन्यायावयव इति सामान्यलक्षणम् । तस्य चोदाहरणव्याप्तिभेदेन द्वैविध्यं तस्य च तथेति न तथेत्यादिना प्रदर्शनम् । तदप्युपलक्षणम् । तेन कदाचिद् वह्निव्याप्यधूमवानयमिति वह्न्यभावव्यापकीभूताभावप्रतियोगिमानयमिति चोपनयशरीरमिति । केचित्तु साध्यस्य पक्षस्य उदाहरणापेक्ष उदाहरणानुसारी उपन्यासः स्वप्रयोजकाकाङ्क्षोत्थापकोदाहरणबोधितव्याप्तिविशिष्टहेतु-

विशिष्टपक्षबोधजनको न्यायावयव इत्यर्थः । निगमनं तु हेतुविशिष्टत्वेन न पक्षबोधकं किं तु पक्षवृत्तिहेतुबोधकम् । व्याप्तिश्चान्वयव्याप्तिव्यतिरेकव्याप्त्यन्यतरत्वेन ग्राह्या । उदाहरणबोधितेत्यन्तं परिचायकमात्रम् । अन्वय्युदाहरणोत्तरमन्वय्युपनयस्यैव व्यतिरेक्युदाहरणोत्तरं व्यतिरेक्युपनयस्यैव च न्यायावयवत्वमिति नोदाहरणविपरीतव्याप्त्युपदर्शकवाक्यातिव्याप्तिः । स चोपनयो द्विविधोऽन्वयिव्यतिरेकिभेदात् । तथेति साध्यस्योपसंहारोऽन्वय्युपनयः । न तथेति साध्यस्योपसंहारो व्यतिरेक्युपनयः । एतच्च दिक्प्रदर्शनमात्रम् । तेन क्वचिद् वह्निव्याप्यवानयं वह्न्यभावव्यापकीभूताभावप्रतियोगिधूमवांश्चायमित्यादिप्रयोग इति प्राहुः ॥ ३८ ॥

निगमनं लक्षयति ।

हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम्[1] ॥ ३९ ॥

हेत्वपदेशात् प्रकृतसाध्यव्याप्तिपक्षधर्मताविशिष्टप्रकृतहेतुविशेषितहेतुत्वबोधकवाक्यसमभिव्याहारात् प्रतिज्ञायाः प्रतिज्ञार्थस्य पुनर्वचनं बोधकवाक्यम् । तथा च व्याप्तिपक्षधर्मताविशिष्टहेतुविशिष्टहेतुत्वान्वितसाध्यस्य पक्षे वैशिष्ट्यावगाहिबोधजनकन्यायावयवो निगमनमित्यर्थः । अस्य चोपनयस्थायमादिपदानुषङ्गेण पक्षस्य लाभः । आकारश्चास्य अयं तस्माद्वह्निमानित्यादिः अयं तस्मात्

(१) प्रतिज्ञायाः पुनर्वचनमिति । प्रतिज्ञाविषयस्यार्थस्याशेषप्रमाणोपपत्तौ साध्यविपरीतप्रसङ्गप्रतिषेधार्थं यत् पुनरभिधानं निगमनमिति । एतस्मिंश्च सूत्रार्थे परस्यावकाशो नास्तीत्येतत्सूत्रव्याख्यानावसरे वार्त्तिकम् । निगमनस्य व्याप्तपक्षधर्मलिङ्गोप ो यकत्वात् तदुपदर्शकोपनयानन्तरं तल्लक्षणाय सूत्रम् । हेत्वपदेशादित्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

तथेत्यादिश्च। अस्याप्यन्वयव्यतिरेकभेदेन द्वैविध्यं केचिदाहुः। तस्मान्न तथेत्यादिप्रयोगमप्यङ्गीकुर्वन्ति ॥ ३९ ॥

तर्कं लक्षयति।

अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः[१] ॥ ४० ॥

तर्क इति लक्ष्यनिर्देशः। कारणोपपत्तित ऊह इति लक्षणम्। कारणस्यापादकस्यापाद्यव्याप्यतया गृहीतस्येति यावत्। या उपपत्तिराहार्यारोपस्तत ऊह आपाद्यस्याहार्यारोप इत्यर्थः। अत्र चापाद्यग्रहस्याहार्यारोपत्वं स्वरूपकीर्तनमापाद्यग्रहस्याहार्यत्वसम्पत्त्यर्थमापाद्यव्यतिरेकनिश्चयो हेतुरन्यथेष्टापत्तिः स्यादिति सूचनायेति भावः। यत्र च ह्रदादौ वह्न्याद्यभावनिश्चयदशायां ह्रदादौ वह्नेः प्रत्यक्षं जायतामितीच्छया यो ह्रदो वह्निमानित्यारोपस्तत्रातिव्याप्तिवारणायापादकाहार्यारोपजन्यत्वं विशेषदर्शनजन्यस्य संशयोत्तरप्रत्यक्षस्य वारणायाहार्यत्वं विशेषितम्। अत्राप्यारोपत्वं स्वरूपकीर्तनमिति। उदाहरणं च पर्वतो यदि निर्वह्निः स्यात् तदा निर्धूमः स्यादित्यादि। ननु तर्कस्य किं फलमित्यत आह। अविज्ञातेति। तत्त्वज्ञानार्थं तत्त्वनिश्चयार्थं संशयनिवृत्तिद्वारेति शेषः। तथा चापादकवत्त्वसंशयप्रतिबन्ध एव तर्कस्य फलमिति भावः। केचित्तु ऊह इति तर्कलक्षणम्। कारणोपपत्तित इति कारणप्रदर्शनपरम्। ऊहत्वं चापादयामीत्यादिप्रतीतिसिद्धमानसत्वव्याप्यजातिविशेष इति। स चायं पञ्चविध आत्माश्रयान्योन्याश्रयचक्रकानवस्थाप्रमाणबाधितार्थप्रसङ्गभेदात्।

(१) अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्क इति सूत्रमिति वार्त्तिकम्।

श्रीः ।

श्रीगणेशाय नमः ।

ॐ नमः श्रीविघ्नवल्लीविध्वंसिने गजवदनाय ।

अथ ब्राह्मस्फुटसिद्धान्तस्य

पूर्वदशाध्याय्यां मध्यमाधिकारः ।

तत्रादौ ग्रन्थनिर्विघ्नसमाप्त्यर्थं महादेवं प्रणमति ।

जयति प्रणतसुरासुरमौलिगरत्नप्रभाच्छुरितपादः ।
कर्त्ता जगदुत्पत्तिस्थितिविलयानां महादेवः ॥ १ ॥

जयति स दशरथसूनुस्त्रिपथगता पादसेविनी यस्य ।
द्विजराजोऽभूद्यस्य सुधाकरोऽनुग्रहेणेह ॥ १ ॥
आदृता बहुविधा पुरातनैर्ब्रह्मगुप्तकृतिरत्र भास्करैः ।
या पृथूदकविचारवर्चिता सम्प्रकाशयति तां सुधाकरः ॥ २ ॥

प्रणता ये सुरासुरास्तेषां मौलिगानि यानि रत्नानि तेषां प्रभाभिर्दीप्तिभिः छुरितौ मिश्रीभूतौ पादौ यस्य स महादेवः । शेषं स्पष्टार्थम् ॥ १ ॥

इदानीं ग्रन्थारम्भे कारणमाह ।

ब्रह्मोक्तं ग्रहगणितं महता कालेन यत् *श्लथीभूतम् ।
अभिधीयते स्फुटं तज्जिष्णुसुतब्रह्मगुप्तेन ॥ २ ॥

ब्रह्मणोक्तं ब्रह्मोक्तं यद्ग्रहगणितं ब्रह्मसिद्धान्तः । स च सम्प्रति शाकल्यसंहितान्तर्गत एकः । विष्णुधर्मोत्तरपुराणान्तर्गतो गद्यमयो द्वितीयः । पञ्चसिद्धान्तिकान्तर्गतः, पञ्चवर्षमययुगवर्णनरूपस्तृतीयः । यद्यप्यत्र

* खिलीभूतम्-इति पाठान्तरम् ।

ब्रह्मगुप्तेनैतेषां कतमः स्फुटोऽभिधीयते—इति स्फुटं नास्ति तथाऽपि भगणादीनां मानैक्याद्ब्रह्मगुप्तेन विष्णुधर्मोत्तरपुराणान्तर्गतब्रह्मसिद्धान्तस्यागमत्वेनाङ्गीकृतः । पञ्चवर्षमययुगस्य तन्त्रपरीक्षाध्याये 'युगमाहुः पञ्चाब्द'मित्यादिना संहिताकारमतं प्रतिपादयतः आचार्यस्य मते ज्यौतिषवेदाङ्गं न ब्रह्ममतमिति स्फुटम् । वराहमिहिरमतादिदं विरुद्धमिति सुधीभिर्विचिन्त्यम् । 'अहो विष्णुधर्मोत्तरं चापि सम्यङ् न बुद्ध'मिति कमलाकरोल्लेखादपीति स्फुटम् । तस्मिन् सिद्धान्ते काः काः खिलता कालान्तरवशाज्जाता तत्र का का ब्रह्मगुप्तेन स्फुटीकृताः इति सर्वं ब्रह्मगुप्तग्रन्थे कुत्रापि नोपलभ्यते । केवलं ब्रह्मगुप्तवाक्यप्रमाणादेव तस्य स्फुटत्वं सिद्धान्तविद्भिर्न मान्यमिति विद्भिर्भृशं विचिन्त्यम् ॥ २ ॥

इदानीं ज्योतिःशास्त्रमूलभूतस्य सग्रहस्य भचक्रस्य चलनमाह ।

ध्रुवताराप्रतिबद्धज्योतिश्चक्रं प्रदक्षिणगमादौ ।
पौष्णाश्विन्यन्तस्थैः सह ग्रहैर्ब्रह्मणा सृष्टम् ॥ ३ ॥

स्पष्टार्थम् । 'सृष्ट्वा भचक्रं कमलोद्भवेन'त्यादि भास्करोक्तमेतदनुरूपमेव । (गणिताध्याय—मध्यमाधिकारस्य १३ श्लोको द्रष्टव्यः ।) ॥ ३ ॥

इदानीं कालस्य प्रवृत्तिमाह ।

चैत्रसितादेरुदयात् भानोर्दिनमासवर्षयुगकल्पाः ।
सृष्ट्यादौ लङ्कायां समं प्रवृत्ता दिनेऽर्कस्य ॥ ४ ॥

स्पष्टार्थम् । भास्करगणिताध्यायस्य १५ श्लोक एतदनुरूप एव ॥ ४ ॥

इदानीं कालमानानां विभागकल्पनामाह ।

प्राणैर्विनाडिकार्त्तौ षड्भिर्घटिका विनाडिकाषष्ट्या ।
घटिकाषष्ट्या दिवसो दिवसानां त्रिंशता भवेन्मासः ॥ ५ ॥
मासा द्वादश वर्षं विकलालिप्तांशराशिभगणान्तः ।
क्षेत्रविभागस्तुल्यः कालेन विनाडिकाद्येन ॥ ६ ॥

स्पष्टार्थौ । (भा० ग० १७–१८ श्लो०) ॥ ५–६ ॥

इदानीं युगमानमाह ।

खचतुष्टयरदवेदा ४३२०००० रविवर्षाणां चतुर्युगं भवति ।
सन्ध्यासन्ध्यांशैः सह चत्वारि पृथक् कृतादीनि ॥ ७ ॥

युगदशभागो गुणितः
कृतं १७२८००० चतुर्भिस्त्रिभिर्गुण १२९६००० त्रेता ।
द्विगुणो ८६४००० द्वापरमेके-
न सङ्गुणः ४३२००० कलियुगं भवति ॥ ८ ॥

स्पष्टार्थौ । (भा० ग० २१—२२ श्लो०) ॥ ७—८ ॥

इदानीं युगमाने विशेषं कथयति ।

युगपादानार्यभटश्चत्वारि समानि कृतयुगादीनि ।
यदभिहितवान् न तेषां स्मृत्युक्तसमानमेकमपि ॥ ९ ॥

आर्यभटो युगस्य महायुगस्य पादमितानि चतुर्थांशसमानि कृतयुगादीनि चत्वारि समानि तुल्यान्येवाभिहितवान् कथितवान् । यत् यस्मात् तस्मात् तेषां युगाङ्घ्रीणां मध्ये एकमपि स्मृत्युक्तं न । यतो मनुस्मृत्यादौ युगपादाः कृतादयो न समाः । अत आर्यभटोक्ताः समा युगपादाः स्मृतिविरुद्धा इत्यर्थः । तथा चार्यभटः । 'युगपादा ग ३ च, इति । पौलिशसिद्धान्ते च दिव्यमानेन कृतादीनामब्दा मनुस्मृत्यादिवत् पठिताः ।

लल्लवाक्यं च ।

अष्टाचत्वारिंशत् पादविहीना क्रमात् कृतादीनाम् ।
अब्दास्ते शतगुणिता ग्रहतुल्ययुगं तदैकत्वम् ॥ इति ॥ ९ ॥

इदानीं मनुमानं कल्पमानं चाह ।

मनुरेकसप्ततियुगः
कल्पो मनवश्चतुर्दश मनूनाम् ।
आद्यन्तरान्तसन्धिषु

कृतकालोऽस्मायुगसहस्रम् ४३२०००००० ॥ १० ॥

कृतकालः कृतयुगसमानकालः। अर्थात् १७२८००० एतानि सौरवर्षाणि। शेषं स्पष्टार्थम्। 'मनुः चमानगैर्युगै'रिति भास्करोक्तमेतदनुरूपमेव। (भा॰ ग॰ २३–२४ श्लो॰) ॥ १० ॥

इदानीं कल्पे विशेषं प्रतिपादयति।

आद्यन्तरान्तसन्धिषु
कल्पमनूनां कृताब्दसमकालम्।
नेच्छन्ति ये षडूनं
तेषां कल्पो युगसहस्रम् ४२९४०८०००० ॥ ११ ॥

ये कृताब्दसमकालमाद्यन्तरान्तेषु–आदिमध्यावसानेषु सन्धिं नेच्छन्ति तेषां मते षडूनं युगसहस्रं कल्पः। यतः कल्पे मनवश्चतुर्दश। चमानगैर्युगैरेकमनुः। अतः कल्पे युगमानम् = ७१ × १४ = ९९४ ॥ ११ ॥

इदानीं कल्पे आर्यभटमतं कथयति।

मनुसन्धिं युगमिच्छ-
त्यार्यभटस्तन्मनुर्यतः श्ख-युगः।
कल्पश्चतुर्युगानां
सहस्रमष्टाधिकं तस्य ४३५४५६०००० ॥ १२ ॥

आर्यभटोऽपि युगं युगसमं मनुसन्धिमिच्छति। यतस्तन्मते श्ख-युग एकमनुः। अर्थात् द्विसप्ततियुगैस्तन्मते एको मनुर्भवति। 'वर्गाक्षराणि वर्गे' इत्यादि–आर्यभटसङ्केतेन

श = ७०। ख = २ द्वयोर्योगेन श्ख = ७२।

(द्रष्टव्या मदीया गणकतरङ्गिणी)।

आर्यभटेन चमानगस्थाने द्विनगयुगानि गृहीतानि। अतस्तन्मते मनुसन्धिर्युगसम एव फलितार्थ इत्यनुमीयते।

अथैकस्मिन् कल्पे तन्मतेऽपि चतुर्दश मनवः। अत एकस्मिन् कल्पे

तन्मते युगानि = ७२ × १४ = १००८ । अतश्चतुर्युगानां सहस्रमष्टाधिकमित्युपपद्यते।

तथा चार्यभटः ।

काहो मनवो ढ १४ मनुयुग श्ख ७२ गतास्ते च ६ मनुयुग छ्ना २७ च ।
कल्पादेर्युगपादा ग ३ च गुरुदिवसाच्च भारतात् पूर्वम् ॥

(दशगीतिका)

दिव्यं वर्षसहस्रं ग्रहसामान्यं युगं द्विषट्कगुणम् ।
अष्टोत्तरं सहस्रं ब्राह्मो दिवसो ग्रहयुगानाम् ॥

(कालक्रियापा० श्लो० ८)

इदानीं रोमकं खण्डयति ।

युगमन्वन्तरकल्पाः कालपरिच्छेदकाः स्मृतावुक्ताः ।
यस्मान्न रोमके ते स्मृतिबाह्यो रोमकस्तस्मात् ॥ १३ ॥

रोमकसिद्धान्ते युगमन्वन्तरादीनां चर्चा नास्ति (द्रष्टव्या पञ्चसिद्धान्तिका) अतो रोमकः स्मृतिबाह्य इति स्पष्टार्थम् ॥ १३ ॥

इदानीं ग्रहयुगं परिभाषयति ।

कालार्कदेशयोगाद्भूयो ग्रहमन्दशीघ्रपातानाम् ॥
कल्पेन यतो योगस्ततः स्फुटं ग्रहयुगं कल्पः ॥ १४ ॥

अत्र चतुर्वेदाचार्यः । 'कालयोगश्चैत्रसितादेरुदयाद्भानोः । अर्कयोगः पौष्णाश्विन्यन्तस्थैः सह ग्रहैः । देशयोगो लङ्कायाम्—इति । तेनायमर्थः । कालार्कदेशयोगाद्भूय एवैतावत्या सामग्र्या पुनरपि ग्रहशीघ्रमन्दपातानां यतो यस्मात् कल्पेनैव योगो नार्वाक् अतस्तस्मात् कल्प एव ग्रहयुगं स्फुटम्'—इति ॥ १४ ॥

इदानीं ग्रहाणां मन्दोच्चानां चलोच्चानां ग्रहपातानां च भगणानाह ।

कल्पेऽर्कबुधसितानां

भगणाः शून्यानि सप्त रद्वेदाः ४३२००००००० ।
प्रागूव्रजता कुजगुरुशनि-
शीघ्रोच्चानां स्वकक्षासु ॥ १५ ॥

पञ्चाम्बराणि गुणगुण-
पञ्चमुनिस्वरशरैर्मिताः शशिनः ५७७५३३०००००० ।
भौमस्य द्वियमशरा-
ष्टपञ्चवसुरसनवद्वियमाः २२९६८२८५२२ ॥ १६ ॥

कृतवसुनवाष्टनवनव-
षट्त्रिनवागेन्दवो ज्ञशीघ्रस्य १७९३६९९८९८४ ।
जीवस्य शरेषूदधि-
षट्पञ्चद्विकृतरसरामाः ३६४२२६४५५ ॥ १७ ॥

सितशीघ्रस्य यमलगो-
वेदनवाष्टाग्निपञ्चयमखनगाः ७०२२३८९४९२ ।
अष्टनवपञ्चमुनिरस-
शररसमनवोऽर्कपुत्त्रस्य १४६५६७२९८ ॥ १८ ॥

खाष्टाब्धयो ४८० वसुशर-
वसुपञ्चखचन्द्रवसुवसुसमुद्राः ४८८१०५८५८ ।
द्विनवयमा २९२ द्वित्रिगुणाः ३३२
शरेषुवसव ८५५ स्त्रिपञ्चरसाः ६५३ ॥ १९ ॥

शशिवेदा ४१ मन्दाना-
मर्कादीनां विलोमपातानाम् ।
वसुरसरुद्रेन्दुगुण-
द्वित्रियमाः २३२३१११६८ सप्तरसपक्षाः २६७ ॥ २० ॥

शशियमशरा ५२१ गुणरसा- ६३
स्त्रिनन्दवसवः ८९३ समुद्रवसुविषयाः ५८४ ।

चन्द्रादीनां पश्चात्
व्रजतोऽश्विन्यादिभगणस्य ॥ २१ ॥

स्पष्टार्थाः । एत एव भास्करेणापि सिद्धान्तशिरोमणौ पठिताः । (ग्रहगणिते मध्यमाधिकार—भगणाध्याये १—६ श्लो॰) ॥ १५—२१ ॥

इदानीं अवमादीनाह ।

परिवर्त्ताः खचतुष्टय-
शराङ्घिरसगुणयमद्विवसुतिथयः १५८२२३६४५००००।
रविभगणोना भानोः
सावनदिवसाः कुदिवसास्ते ॥ २२ ॥
रविभगणा रव्यब्दा
द्वादशगुणिता भवन्ति रविमासाः ५१८४००००००।
भगणान्तरं रवीन्द्वोः
शशिमासाः ५३४३३३००००० सूर्यमासोनाः ॥ २३ ॥
अधिमासाः १५९३३००००० शशिमासा-
स्त्रिंशद्गुणिता १६०२९९९०००००० भवन्ति शशिदिवसाः ।
शशिसावनदिवसान्तर-
मवमानि तिथिः शशाङ्कदिनम् ॥ २४ ॥
सावनमुदयादुदयो
भानां चार्क्षं न्ववत्सरोऽर्काब्दः ।
पितृदिवसाः शशिमासा
दिव्यानि दिनानि रविभगणाः ॥ २५ ॥

स्पष्टार्था एते श्लोकाः । भास्करेण सिद्धान्तशिरोमणावप्येता एव अवमादीनां संख्याः पठिताः । अतः किं पिष्टपेषणेनेति ॥ २२—२५ ॥

इदानीं कल्पगतमाह ।

कल्पपरार्द्धे मनवः

षट् कस्य गताश्चतुर्युगत्रिघनाः ।
त्रीणि कृतादीनि कले-
र्गोऽगैकगुणाः ३१७९ शकान्तेऽब्दाः ॥ २६ ॥

नवनगशशिमुनिकृतनव-
यमनगनन्देन्दवः १९७२९४७१७९ शकनृपान्ते ।
सार्धमतीतमनूनां
सन्धिभिराद्यन्तरान्तगतैः ॥ २७ ॥

कस्य ब्रह्मणः कल्पपरार्धे कल्पस्य द्वितीयार्धे षट् मनवश्चतुर्युगानां त्रिघनाः सप्तविंशतिर्गताः । शेषं स्पष्टार्थम् ॥ २६–२७ ॥

गोद्रीन्द्वद्रिकृताङ्केत्यादि भास्करोक्तं द्रष्टव्यम् । (ग्रहगणित–मध्यमाधिकारे श्लो॰ २८)

इदानीं कल्पगते आर्यभटमतं प्रतिपादयति ।

अधिकः स्मृत्युक्तमनोरार्यभटोक्तश्चतुर्युगेण मनुः ।
अधिकं विंशांशयुतैस्त्रिभिर्युगैस्तस्य कल्पगतम् ॥ २८ ॥

स्मृत्युक्तमनोः सकाशादार्यभटोक्तो मनुश्चतुर्युगेणैकेन महायुगेनाधिकः । अर्थात् मनुस्मृत्यादौ समानगै७१र्युगैरेको मनुरार्यभटमते च ७२ युगैः । अतोऽनयोरन्तरसम एकयुगसमोऽधिक इत्यर्थः । तस्यार्यभटस्य मतेऽतः कल्पादौ विंशांशयुतैस्त्रिभिर्युगैरधिकं कल्पगतं भवति । अर्थादाचार्यमतेन पूर्वं यत् कल्पगतं तथाऽऽर्यभटमतेन च यत् तयोरन्तरं युगत्रयमेकयुगस्य विंशांशाधिकं भवतीत्यर्थः ।

अत्रोपपत्तिः । आर्यभटमते भारतादर्थात् कलियुगारम्भात् पूर्वं वर्तमानकल्पे ६ मनवो व्यतीता युगपादत्रयं च । तन्मते ७२ युगैरेको मनुः कृतादयश्च युगपादसमाः सर्वे समा इति पूर्वमेव सर्वं प्रतिपादितम् ।

अत आर्यभटमतेन कल्यादौ गतयुगानि $= ७२ \times ६ + \frac{३}{४} = ४३२\frac{३}{४}$ ।
आचार्यमतेन कृतयुगे युगमानम् $= \frac{४}{१०}$ । आदिमध्यावसानेषु षण्णां मनूनां

सप्तसन्धिषु युगमानम् $= \frac{७ \times ४}{१०} = \frac{२८}{१०}$ । षण्णां मनूनां मध्ये युगानि $=$ ४२६ । कृतत्रेताद्वापरयोगे युगमानम् $= \frac{४}{१०} + \frac{३}{१०} + \frac{२}{१०} = \frac{९}{१०}$ । सर्वयोगे कल्यादौ गतयुगानि $=$ ४२६ $+ \frac{२८}{१०} + \frac{९}{१०} =$ ४२९ $\frac{७}{१०}$ । अतो द्वयोर्मतयोरन्तरं युगानि $=$ ४३२ $\frac{३}{४} -$ ४२९ $\frac{७}{१०} =$ ४३२ $\frac{१५}{२०} -$ ४२९ $\frac{१४}{२०} =$ ३ $\frac{१}{२०}$ अत उपपद्यते सर्वम् ॥२८॥

इदानीमहर्गणानयनमाह ।

कल्पगताब्दद्वादशघातश्चैत्रादिमासयुक्तोऽधः ।
गुणितो युगाधिमासै रविमासाप्ताधिमासयुतः ॥ २९ ॥
त्रिंशद्गुणस्तिथियुतः पृथग्युगावमगुणो युगेन्दुदिनैः ।
भक्तः फलावमोनोऽर्कसावनाहर्गणोऽर्कादिः ॥ ३० ॥

स्पष्टार्थौ । सिद्धान्तशिरोमणिग्रहगणितमध्यमाधिकारे ग्रहानयनस्य १–३ श्लोका द्रष्टव्याः ॥ २९–३० ॥

इदानीं ग्रहानयनमाह ।

इष्टग्रहभगणगुणादहर्गणात् कल्पसावनद्युहृतात् ।
भगणादि फलं मध्यो लङ्कायां भास्करौदयिकः ॥ ३१ ॥

स्पष्टार्थम् (मध्य· ग्रहा· श्लो· ४) ॥ ३१ ॥

इदानीं निजानयनस्य प्रशंसामाह ।

आनयति दिवसवारं स्मृत्यविरोधेन मध्यमथवा वा ।
आम्नादन्यैस्तन्त्रैरार्यभटाद्यैर्न कश्चिदपि ॥ ३२ ॥

आम्नात्–आचार्योक्तात्तन्त्रादेव स्मृत्यविरोधेन स्मृत्यनुकूलेन हेतुना दिवसवारमर्थादहर्गणमथवा मध्यं मध्यग्रहान् आनयति गणक इत्यध्याहारः । आर्यभटाद्यैरार्यभटादिप्रणीतैरन्यैस्तन्त्रैश्च कश्चिदपि मध्यान् ग्रहानहर्गणं च नाऽऽनयति स्मृतिविरोधादित्यर्थः ॥ ३२ ॥

इदानीं वारप्रवृत्तिमाह ।

जगति तमोभूतेऽस्मिन् सृष्ट्यादौ भास्करादिभिः सृष्टैः ।
यस्माद्दिनप्रवृत्तिर्दिनवारोऽर्कोदयात् तस्मात् ॥ ३३ ॥

३१०

यस्माद्यतोऽस्मिन् तमोभूते प्राकृतिकप्रलये सूर्यादीनामभावादन्धकारमये जगति भास्करादिभिः सृष्टे रचितैः सृष्ट्यादौ दिनप्रवृत्तिर्जाता। अर्थात् रचनाकाले प्रथमं रवेरेव रचना ब्रह्मणा कृता लङ्कायामुदयकाल एव दिनप्रवृत्तिरभूत् तस्मादर्कोदयादेव दिनवारो ज्ञेय इति ॥ ३३ ॥

इदानीमहर्गणेन कुत्र ग्रहाः सिद्धा इत्याह।

लङ्कासमयाम्योत्तररेखायां भास्करोदये मध्याः।
देशान्तरोनयुक्ता रेखायाः प्रागपरदेशेषु ॥ ३४ ॥

लङ्कासमयाम्योत्तररेखायामर्थाल्लङ्कायाम्योत्तररेखायां ये तिष्ठन्ति तेषां भास्करोदये मध्यमरव्युदयकाले मध्या ग्रहा अहर्गणेन भवन्तीत्यर्थः। रेखायाः प्रागपरदेशेषु च गणितागता ग्रहा देशान्तरफलेन क्रमेणोनयुतास्तदा स्वनिरक्षोदयकालिका भवन्तीति सर्वं भास्करमध्यमाधिकारतः स्फुटम्। अत्रोदयान्तरसंस्कारेण वास्तवाः स्वनिरक्षोदये ग्रहा भवन्तीति भास्करेणोदयान्तरसंस्कार आनीत इति ॥ ३४ ॥

इदानीं वारादिमाह।


दिनवारादिः पश्चादुज्जयिनीदक्षिणोत्तरायाः प्राक्।
देशान्तरघटिकाभिः पश्चात् प्राग्भवति रव्युदयात् ॥ ३५ ॥

लङ्कोदये वारादिरिति परिभाषया 'अर्कोदयादूर्ध्वमधश्च ताभिः प्राच्यां प्रतीच्यां दिनपप्रवृत्ति' रिति भास्करोक्त्या सर्वं स्फुटमेव ॥ ३५ ॥

इदानीं देशान्तरमाह।

भूपरिधिः खखखशरा रेखा स्वाक्षान्तरांशसंगुणिताः।
भगणांशहृताः फलकृतिहीना देशान्तरस्य कृतिः ॥ ३६ ॥
शेषपदगुणा भुक्तिर्भूपरिधिहृता कलादिलब्धमृणम्।
उज्जयिनीयाम्योत्तररेखायाः प्राग्धनं पश्चात् ॥ ३७ ॥
मध्यग्रहे स्फुटे वा भूपरिधिहृतात् पदात् गुणात् षष्ट्या।
लब्धं घटिका अथ वा कर्मे तिथावृणधनं ग्रहवत् ॥ ३८ ॥

आचार्यमते भूपरिधिः = ५०७० । अयं 'व्यासवर्गाद्दशगुणात् पदं भूपरिधिर्भवे'दित्यादिना कुभुजङ्गसायकभूमिताद्व्यासात् सिध्यति । अत्र चित्रदर्शनेनैव व्याख्या स्फुटा । कल्प्यते ध्रु१ खसनि ध्रु२ स्वयाम्योत्तरवृत्तम् । ख = स्वस्थानम् । नि = स्वनिरक्षस्थानम् । ध्रु१रेलध्रु२ = लङ्कायाम्योत्तरवृत्तम् । खनि = स्वदेशाक्षांशसम्बन्धीनि योजनानि = $\frac{\text{भूप} \times \text{अक्षां}}{३६०}$ । लङ्कायाम्योत्तरवृत्ते 'रे' कोऽपि रेखादेशः । रेस = नाडीवृत्तसमानान्तरं लघुवृत्तम् । सनि = तद्रेखादेशाक्षांशसम्बन्धीनि योजनानि = $\frac{\text{भूप} \times \text{रे अक्षां}}{३६०}$ । खरे = रेखास्वदेशयोरन्तरयोजनानि ।



आचार्येण खरेसत्रिभुजमृजुजात्यत्रैवं कल्पितम् । तत्र रेसमानमेव पूर्वापरान्तरं देशान्तरयोजनसमानम् । तदानयनं जात्यत्रैवयुक्त्या ।

$$\text{रेस} = \sqrt{\text{रेख}^2 - \text{सख}^2} = \sqrt{\text{रेख}^2 - \left\{\frac{\text{भूप}}{३६०}(\text{स्वदेअक्षां} - \text{रेअक्षां})\right\}^2}$$

ततो यदि भूपरिधिना ग्रहभुक्तिस्तदा देशान्तरयोजनैः किमिति कलादिफलं प्राक्पश्चादृणं धनं मध्यग्रहे वा स्फुटे कार्यमित्यग्रे सम्बन्धः ॥

पञ्चसिद्धान्तिकायां वराहमिहिरानयनानुरूपमेवेदम् । (द्रष्टव्या पञ्चसिद्धान्तिकाप्रकाशिका पृ· १२—१३)

अत्र भूपरिधिहृता स्पष्टभूपरिधिहृता तथा देशान्तरस्य रेखास्वदेशयोरन्तरस्य योजनात्मकस्येति व्याख्या समीचीना । घटिकादिकं देशान्तरं तिथौ तिथिभुक्तघटिकासु ग्रहवज्ज्ञेयम् । शेषं स्पष्टार्थम् ॥ ३६-३८ ॥

इदानीमब्दादौ दिनादिचयाहादिसाधनमाह ।

कल्पगताब्दा गुणिता
रूपाष्टजिनै२४८१र्नवाग्निसप्तनगैः ७७३९ ।
खखरसनवभि९६००र्भक्ता
दिनावमान्यंशकाः शेषाः ॥ ३९ ॥

कल्पगताब्दा एकत्र रूपाष्टजिनैः२४८१रन्यत्र नवाग्निसप्तनगै-७७३९र्गुणिताः। उभयत्र खखरसनवभिः९६००र्भक्ताः फलमाद्यस्थाने सावनदिनानि द्वितीयस्थानेऽवमानि भवन्ति। शेषाश्च क्रमेण दिनांशका अवमांशकाश्च ज्ञेयाः।

अत्रोपपत्तिः। भास्करप्रत्यब्दशुद्धिस्थदिनाद्यवमाद्यानयनवत्। अत्रोभयत्र खखरसनवभिः ९६०० सवर्णनं कार्यमिति ॥ ३९ ॥

इदानीमब्दादावधिमाससाधनमाह।

तद्दिग्गुणाब्दयोगा अधिमासास्त्रिंशता हृता लब्धम्।
शेषास्तिथयः शुद्धिर्दिनानि विकलं दिनांशेभ्यः ॥ ४० ॥

दिनांशेभ्योऽवमदिनांशेभ्यो विकलं सत् दिनानि शुद्धिर्भवति। अर्थादधिशेषतिथयः क्षयशेषावयवेन रहिताः सत्यः शुद्धिर्भवति। शेषं स्पष्टम्।

अत्रोपपत्तिः। 'दिनादिक्षयाद्यादिदिग्घ्नाब्दयोग' इत्यादिना भास्करोक्तेन स्फुटा ॥ ४० ॥

इदानीमब्दाधिपं लब्धहर्गणं चाह।

कल्पगताब्ददिनयुतः सूर्याद्योऽब्दाधिपोऽब्दभगणयुगः।
कल्पाब्दहृतो भगणादिमध्यमाः सूर्यभगणान्ते ॥ ४१ ॥
चैत्रसिताद्यास्तिथयः शुद्धिविहीनाः पृथक् गुणा रुद्रैः।
अवमांशेभ्यो यमनवरसगुणितेभ्यो विभक्तेभ्यः ॥ ४२ ॥
स्वच्छेदेन फलयुता हृतास्त्रिखागैः ७०३ फलावमविहीनाः।
रविमेषादिद्युगणो मुनिहृत् शेषोऽब्दपत्यादिः ॥ ४३ ॥

स्पष्टार्थम्।

अत्रोपपत्तिः। 'तदब्दान्वितं भास्करादब्दपः स्या'दित्यादि भास्करोक्तेनाब्दाधिपानयनवासना सुगमा। तथा रव्यब्दान्ते ग्रहानयनं च

त्रैराशिकेनोपपद्यते । लघ्वहर्गणेऽवमानयनार्थं च त्रिखनग ७०३ चान्द्राहे रुद्र११मितान्यवमानि स्वल्पान्तरतः प्रकल्प्यानुपातः कृतस्तद्यथा ।

अब्दादेर्गततिथयः = इष्टति − अधिशेति । एता रुद्रगुणास्त्रिखनग७०३हृता अब्दादिवचशेषयुताः

$$\text{अवमानि} = \frac{११\,(\text{इष्टति} - \text{अधिशेति})}{७०३} + \frac{\text{वचशे}}{६६००}$$

$$= \frac{११\,(\text{इष्टति} - \text{अधिशेति}) + \dfrac{७०३\ \text{वचशे}}{६६००}}{७०३}$$

$$= \frac{११\,(\text{इति} - \text{अधिशेति}) + \dfrac{११\ \text{वचशे}}{६६००} + \dfrac{६९२\ \text{वचशे}}{६६००}}{७०३}$$

$$= \frac{११\left\{\text{इति} - \left(\text{अधिशेति} - \dfrac{\text{वचशे}}{६६००}\right)\right\} + \dfrac{६९२\ \text{वचशे}}{६६००}}{७०३}$$

$$= \frac{११\,(\text{इति} - \text{शु}) + \dfrac{६९२\ \text{वचशे}}{६६००}}{७०३}$$

अत उपपन्नमवमानयनम् । शेषं भास्करलघ्वहर्गणानयनवदिति सर्वं निरवद्यम् ॥ ४१–४३ ॥

इदानीं रव्यानयनमाह ।

द्युगणात्सप्तत्यंशं स्वनवार्कांशाधिकं विशोध्यांशाः ।
मध्यमबुधसूर्यसिताः शीघ्रोच्चं कुजगुरुशनीनाम् ॥ ४४ ॥

अत्र गणितन्यासेनैव व्याख्या सुगमा ।

$$\text{भागाद्या मध्यमरविबुधशुक्राः} = \text{अह} - \left(\frac{\text{अह}}{७०} + \frac{\text{अह}}{७० \times १२९}\right) ।$$

आचार्यमतेन महीमितादहर्गणात् कलादिका

रविगतिः = ५९ । ८ । १० । २२ । भास्करमतेऽन्तिमावयवे २२ स्थाने २१ आयाति ।

अत्रोपपत्तिः । 'मन्दोमिताद्द्युगणात् कलानि यानि तत्कलाः' इत्यादि भास्करविधिना मध्यमां गतिमाचार्यप्रकारेणानीय ततो विलोमेन खण्डगुणानसवर्णनादिना सर्वेषां मध्यग्रहानयनानामुपपत्तिः कर्त्तव्या किं ग्रन्थगौरवेणेति ॥ ४४ ॥

इदानीं चन्द्रानयनमाह ।

त्रिगुणमवमावशेषं विभजेद्गुणसप्तशशिभिराप्तांशैः ।
पृथगधिकोऽर्को रविगुणतिथ्यंशैः संयुतश्चन्द्रः ॥ ४५ ॥

स्पष्टार्थम् ।

अत्रोपपत्तिः । आचार्यावमशेषं रुद्रहृतं भास्करावमशेषम् $= \frac{\text{चशे}}{११}$ ।
ततः 'स्वनगभागयुतेन दशाहतचर्यदिनोर्वरितेन कलान्वित' इति भास्करविधिना कलात्मकं फलं षष्ट्या विभज्य जातमवमशेषसमुद्भवमंशात्मकं फलम् $= \frac{\text{८० चशे}}{\text{७ × ११ × ६०}} = \frac{\text{८ × ३ × चशे}}{\text{७ × ११ × ६ × ३}} = \frac{\text{३ चशे}}{\frac{\text{७ × ११ × ६ × ३}}{\text{८}}} = \frac{\text{३ चशे}}{\frac{\text{६९३}}{\text{४}}}$
$= \frac{\text{३ चशे}}{\text{१७३}}$ स्वल्पान्तरात् । शेषोपपत्तिर्भास्करोक्ता ज्ञेयेति ॥ ४५ ॥

इदानीं भौमबुधशीघ्रोच्चानयनमाह ।

एकादशलिप्तांशा भौमः शरसप्तवसुभि(८७५)रिन्दुयमैः २१ ।
कृतगुणितद्युगणांशाः घनरसैः ६५ षट् बुधः शाघ्रम् ॥ ४६ ॥

भौमः $= \frac{\text{११ अह}}{\text{२१}}$ अंशाः $+ \frac{\text{११ अह}}{\text{८७५}}$ कलाः ।

आचार्यमतेन कलादिका भौमगतिः = ३१ । २६ । २८ । ७ ।

इयमेव भास्करोक्ता च ॥

बुधशीघ्रोच्चं भागाद्यम् = ४ अह $+ \frac{\text{६ अह}}{\text{६५}}$ ।

आचार्यमतेन भागादिका बुधशीघ्रोच्चगतिः = ४ । ५ । ३२ । १८ । २८ ॥

इयमेव भास्करोक्ता च ॥

अत्रोपपत्ती रव्यानयनोपपत्तिवत् सुगमा ॥ ४६ ॥

इदानीं गुरुशुक्रशीघ्रोच्चानयनमाह ।

द्युगणेषुवधो लिप्ता जीवः कृतशरगुणैः शरकलोनः ।
भागकलाः सितशीघ्रं विषयैर्वसवो द्विषड्भ्यष्टौ ॥ ४७ ॥

कलात्मको गुरुः $= \text{५अह} + \frac{\text{५ अह}}{\text{३५४}}$

रूपाहर्गणेन कलादिका गुरुगतिः = ४ । ५९ । ९ । ९ ।

भास्करोक्तापीयमेव ॥

एवं शुक्रशीघ्रोच्चम् $= \frac{\text{८ अह}}{\text{५}}$ अंशाः $+ \frac{\text{८ अह}}{\text{६२}}$ कलाः ।

रूपाहर्गणे भागादिका गतिः = १ । ३६ । ७ । ४४ । ३१ ।

भास्करमतेन ३१ स्थाने ३५ आगच्छन्त्यन्तिमावयवे ॥

अत्रोपपत्तिरतिसुगमा रव्यानयनोपपत्तियुक्त्या ॥ ४७ ॥

इदानीं शनि-चन्द्रोच्चानयनमाह ।

द्विगुणः कला दिनगणस्तिथिरामैर्हृते च सूर्यसुतः ।
नवभिर्भागः सागरखशून्यवेदैश्च चन्द्रोच्चम् ॥ ४८ ॥

कलात्मकः शनिः $= \text{२ अह} + \frac{\text{२ अह}}{\text{३१५}}$ ।

आचार्यमते कलादिका गतिः = २ । ० । २२ । ५१ ।

इयमेव भास्करोक्तापि ॥

चन्द्रोच्चं भागाद्यम् $= \frac{\text{अह}}{\text{९}} + \frac{\text{अह}}{\text{४००४}}$ ।

आचार्यमते कलादिका गतिः = ६ । ४० । ५३ । ५६ ।

भास्करोक्तापीयमेव ॥

अत्रोपपत्तिश्च पूर्ववत् ॥ ४८ ॥

इदानीं चन्द्रपातानयनमिष्टदिने ग्रहानयनं चाह ।

भागा नन्दशशाङ्कैः शशिशून्यस्वरयमैश्च शशिपातः ।
रविमण्डलान्तिकयुता मध्या भगणान्तगाः शेषाः ॥ ४९ ॥

भागात्मकश्चन्द्रपातः $= \frac{\text{अह}}{१६} + \frac{\text{अह}}{२७०१}$ ।

आचार्यमते कलादिका गतिः = ३ । १० । ४८ । २२ ।

भास्करमतेऽन्तिमावयवे २२ स्थाने २० आयाति ॥

रविमण्डलान्ते रविभगणान्तेऽर्थाद्रव्यब्दान्ते ये ग्रहाः पूर्वमनुपातेन सिद्धास्ते रविमण्डलान्तिकाः कथ्यन्ते । तैरहर्गणोद्भवा युता इष्टदिने उदयकाले ग्रहा भवन्ति । शेषा मन्दोच्चादयो गत्यल्पत्वाद्भगणान्तगा रव्यब्दान्तोद्भवा एवेष्टदिने ज्ञेया इति ।

पातसाधनोपपत्तिर्ग्रहानयनोपपत्तिवदन्यस्यातिसुगमेति ॥ ४९ ॥

इदानीं ग्रहानयने विशेषं प्रतिपादयति ।

पादार्धविपाददिनै रात्र्यर्धास्तमयदिनदलौदयिकाः ।
ऊनाः कृत्वा तिथयो देशान्तरनाडिकोनयुताः ॥ ५० ॥

अत्र चतुर्वेदाचार्यः । 'पादार्धविपाददिनैरूनीकृत्य तिथयो यथासङ्ख्यं रात्र्यर्धास्तमयदिनदलोदयिका ग्रहा आगच्छन्ति । एतदुक्तं भवति । यास्तिथयोऽहर्गणानयने दीयन्ते ता यदि पादेनोना दीयन्ते पञ्चदशभिर्घटिकाभिरूना इत्यर्थः । तदा तत्र योऽहर्गणो भवति तेन ये ग्रहा आनीयन्ते तेऽतीतार्धरात्रकालिका भवन्ति' ।

एवं दिनार्धोनादहर्गणाद्ये ग्रहास्तेऽतीतास्तकालिकाः । विपाददिनोनादहर्गणाद्ये ग्रहास्तेऽतीतदिनार्धकालिकाः । दिनोनादहर्गणाच्च ये तेऽतीतदिनोदयिका भवन्तीत्यर्थः ।

एवं प्रागपरत्र देशान्तरनाडिकोनयुतास्तिथयो यद्यहर्गणार्थं गृह्यन्ते तदा स्वदेशे तत्तत्कालिका ग्रहा भवन्तीत्यर्थः ॥ ५० ॥

इदानीं कलिगतादेव शुद्ध्याद्यानयनाय विशेषं रविमण्डलान्तिकग्रहानयनार्थं प्रकारान्तरं चाह ।

कलिगतशुद्धिः प्रागवत्
शुद्ध्याद्योऽब्दाधिपोऽब्दभगणवधात् ।

असमवायात्यवान्तरविभागस्तु नास्मदीयैरभ्युपगतः पारिभाषिकत्वात् अन्यथा निमित्तकारणप्रत्यासन्नं कारणमनिमित्तमित्यादि विभागान्तरस्यापि परिभाषितुं शक्यत्वात् पटाद्यसमवायितया तन्तुसंयोगादयस्त्वसिद्धा एव अवयविभङ्गात् तावत एव तत्त्वात् संयोगादिकारणतया नोदनादयस्तु सिद्धा अपि निमित्तकोटेर्न व्यतिरिच्यन्ते ततश्च लक्षणद्वयमपीश्वरे सिद्धम् अविभक्तनामरूपचिदचिच्छरीरकस्य विभक्तनामरूपचिदचिदचिच्छरीरकत्वापेयोपादानत्वसिद्धेः, अविभक्तचिदचिच्छरीरकत्वातिरिक्तेन कुलालादिसाधारणसंकल्पविशेषवत्त्वाद्याकारेण निमित्तत्वसिद्धेश्च ईश्वरस्यैव क्वचिद्विषये कर्तृत्वमुपादानत्वं च परैरपि स्वीकार्यं, सन्ति हि संयोगादयो घटादिभिरीश्वरस्य ततश्चेश्वरस्तेषां समवायित्वात्सर्वकार्यकर्तृत्वाच्चोपादानं निमित्तं च नतत्कर्तृत्वानभ्युपगमे कार्यत्वात्सकर्तृकमित्यनुमानं दशमदशापन्नम् एवमनीश्वरेष्वपि बुद्धिपूर्वस्वज्ञानसुखाद्युत्पादने निमित्तोपादानत्वसमुच्चयः सिद्धः, ततः सिद्धं सूक्ष्मचिदचिद्वस्तुशरीरकं ब्रह्मैव स्थूलचिदचिद्वस्तुशरीरतया परिणमतीति वेदान्ताः प्रतिपादयन्तीति, तेन च तद्व्यतिरिक्तस्य निखिलस्याधाराधेयभावेश्वरेशितव्यत्वशेषशेषित्वशरीरशरीरिभावकार्यकारणभावादयो यथाग्रहणं सम्बन्धाः।

श्रिया सह तु दाम्पत्यं शाश्वतं तत एव तु।
तयोः साम्यैक्यशक्तित्वतद्वत्त्वादिगिरां गतिः॥

ज्ञानानन्दाद्यत्यन्तसाम्याज्जगज्जनकत्वशेषित्वशरण्यत्वप्राप्यत्वादिसाम्याच्च साम्यगिरां निर्वाहो व्यक्तः, एकत्ववादा अप्येवं द्वन्द्वरूपेणात्यन्तसमतया प्रकारैक्येन सम-

स्तत्प्रपञ्चप्रतियोगिकैकशेषित्वाश्रयत्वेन महेन्द्राग्नीषोमादि-वद्यथाविनियोगं श्रिया तद्वल्लभस्य वैशिष्ट्यात् समस्तात्महविःप्रत्युद्देश्यैकदेवतात्वादिविषेण वा निर्वाह्याः, शक्तित्ववादास्तु पत्नीत्वादिरूपेण विशेषणत्वाभिप्रायाः सृष्ट्यादिव्यापारेषु समानलीलतया प्रेरकत्वेन सहकारित्वाभिप्राया वा, प्रयुज्यते च सर्वत्र स्त्रीपुंसात्मकेषु द्वन्द्वान्तरेष्वपि स्त्र्यंशे शक्तित्ववादः, व्यूहवदवस्थाभेदवादास्त्ववतारविषयाः सर्वस्य भगवदात्मकत्वेन तस्य स्वेच्छया परेच्छया वा कार्यदशापन्नस्यापि भगवदवस्थाभेदत्वात् एवमिच्छासंविदहन्तादिव्यपदेशा अपि प्रणयानुविधेयत्वस्वयंप्रकाशत्वस्वरूपनिरूपकत्वविशेषरूपादिपरा द्रष्टव्याः अत्र वक्तव्यमखिलं षडर्थसंक्षेपे दिव्यस्थाननिरूपणानन्तरं श्रीराममिश्रै*रुक्तम् । अथ तत्रत्योऽयं ग्रन्थः समाननयान्महिष्यादिसिद्धिश्च । ननु शेषित्वविशिष्टविधिरशक्यः अन्यशेषस्य तदन्यशेषत्वायोगात्, न चानुवादः अत एव, किं च महिष्यादिकं परस्य शरीरम् अन्यथा एकमेवेति विरुध्यते आनन्दादिवदपृथग्भावाभावात् अतः समत्वान्न मिथः शेषशेषिता । मैवं पत्युः पत्न्या अपीति लोकसिद्धमुभयाधिष्ठानं चैकं शेषित्वम् अविभागस्मृतेः तदुक्तं नीतिविद्भिः अन्यतरानिच्छायां त्याग एव न संवर्ततेति न ह्यनिर्वृत्तिः पृथक्त्वे एतन्न्यायसहकृतवाक्येन च शेषित्वविशिष्टपत्नीसिद्धिः अनूद्य वा, न च लोके शरीरस्यापत्नीत्वं नाम मानान्तरागोचरे विरोधः, अचित्त्वाच्चापत्नीत्वं लोके स च स्वस्मिन्नात्माश्रयदोषः शेषत्वमन्यत्रापि अविरोधादिति अनेन च श्रीराममिश्रवचसा द्वन्द्वं प्रति जगतः शेषतैकरसत्वमुपपादितं, श्रुतिश्च ।

* राममिश्राचार्या यामुनमुनिभ्योऽपि प्राचीनाचार्याः ।

अकारेणोच्यते विष्णुः सर्वलोकेश्वरोहरिः ।
उद्धृता विष्णुना लक्ष्मीरुकारेणोच्यते तथा ॥

मकारस्तु तयोर्दास इति प्रणवलक्षणम् । इति मन्त्रान्तरेष्विव प्रणवेऽपि बहवोऽर्थाः बहुषु प्रदेशेषु प्रतिपाद्यन्त एव न चार्थविरोधः येनान्यपरता स्यात् अस्येशाना जगतो विष्णुपत्नी ईश्वरीꣳ सर्वभूतानामित्यादिका च आदित्यादिशब्दसामानाधिकरण्यादाद्या श्रुतिर्भूविषयेति केचित् दिग्विषयेति तु कुदृष्टिः श्रुतिलिङ्गादिविरोधात् आह च भगवान्पराशरः ।

त्वयैतद्विष्णुना चाम्ब जगद्व्याप्तं चराचरम् ॥
यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम ! ॥

नानयोर्विद्यते परमित्यादि, तथा च भगवच्छा*-स्त्रवचनम् एकतत्त्वमिवोदितौ ।

लक्ष्म्याः समस्तश्चिदचित्प्रपञ्चो व्याप्यस्तदीशस्य तु साऽपि सर्वम् ।

तथापि साधारणमीशितृत्वं श्रीश्रीशयोर्द्वौ च सदैकशेषीत्यादि ॥

अहिर्बुध्न्यसंहितालक्ष्मीतन्त्रादिषु च विस्तरेणायमर्थोऽवधार्यः, एतेन भूम्यादेरपि तदंशत्ववचनं निर्व्यूढम् अनुप्रवेशादेव ह्यनन्तविष्वक्सेनादेरपि सङ्कर्षणात्मकत्वमुच्यते यथाविनियोगमुपासनावान्तरभेदाद्ब्रह्मणः पत्नीपरिजनादिसाहित्यराहित्यविकल्पः न पुनर्भ्रान्तत्वशुद्धत्वकार्यकारणावस्थादिविषयत्वात् प्रागेव तत्र दूषणाभिधानात् व्यूहविभवादिषु हेतुकार्यभावं सर्वं विग्रह-

* पञ्चरात्रशास्त्रम् ।

विषयं वक्ष्यामः तत्तद्व्यूहाद्यनुरूपाश्च लक्ष्म्यादिव्यूहादयः शास्त्रसिद्धाः, व्यूहादिषु मिथोऽङ्गाङ्गिभावादिकं स्वसङ्कल्पमात्रायत्तमीश्वरस्य सर्वत्रैकत्वात् यत्तु । यन्त्रविशेषादिषु लक्ष्मीसुदर्शनादीन् प्रति वासुदेवादेरङ्गत्वं क्वचित्क्वचित्प्रतिपाद्यते तत्र यथावस्थितब्रह्मात्मकत्वानुसन्धाने स्वात्मानं प्रत्येव स्वस्यैच्छमङ्गत्वमिति न कश्चिद्विरोधः, ब्रह्मदृष्ट्याऽनुसन्धाने तु तत्तत्फलविशेषार्थं तदङ्गकत्वेन प्राधान्यदृष्टिरिति त्र्यय्यन्तोदितदृष्टिविध्यन्तरेष्विव न तत्त्वव्यवस्थाभङ्गः, न चैवमागमान्तरप्रतिपाद्यतत्त्वेष्वपि प्रसङ्गः तेषामागमानामप्रामाण्यस्य वक्ष्यमाणत्वात्, पञ्चरात्रप्रामाण्यस्यागम प्रामाण्ये †भाष्ये च श्रीपञ्चरात्राधिकरणे प्रपञ्चितत्वात् अस्माभिश्च न्यायपरिशुद्धावुक्तत्वात् न च यन्त्रादय एव सामान्यतो निर्मूला इति वाच्यं तापनीयोपनिषदादिषु तद्दर्शनात् प्रत्यक्षतः फलोपलम्भाच्च अतस्तत्त्ववैपरीत्यं तदुक्तिमूलशास्त्राप्रामाण्यं वा न शङ्कनीयम् । अतः सिद्धमशेषचिदचित्प्रकारं ब्रह्मैकः श्रीमन्नारायण इति ॥

स्फारास्तीर्णभुजङ्गपुङ्गववपुःपर्यङ्कवर्यं गतौ
सर्गस्थित्यवसानकेलिरसिकौ तौ दम्पती नः पती ।
नाभीपङ्कजशायिनः श्रुतिसुखैरन्योन्यबद्धस्मितौ
बिम्बस्याम्बुजसम्भवस्य वचनैरोन्तत्सदित्यादिभिः ॥

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु न्यायसिद्धाञ्जने ईश्वरपरिच्छेदस्तृतीयः ॥

* आगमप्रामाण्यनामा श्रीयामुनमुनिप्रणीतः संदर्भः ।
† श्रीभाष्ये ।

॥ श्रीः ॥

श्रियै नमः ।

श्रीधराय नमः ।

श्रीमते रामानुजाय नमः ।

न्यायसिद्धाञ्जने नित्यविभूतिपरिच्छेदश्चतुर्थः ।

अथास्य नित्यविभूतिरुच्यते त्रिगुणद्रव्यव्यतिरिक्तत्वे सति सत्त्ववत्त्वं, तमोरहितत्वे सति सत्त्ववत्त्वं, निःशेषाविद्यानिवृत्तिदेशविजातीयान्यत्वमित्यादि तल्लक्षणम् आदित्यवर्णं तमसः परस्तात् तेह नाकं, क्षयन्तमस्य रजसः पराके, यो अस्याध्यक्षः परमे व्योमन्, तदक्षरे परमे व्योमन्, सहस्रस्थूणे विमिते दृढ उग्र इत्यादिभिस्तत्सिद्धिः एवं च सति तद्विष्णोः परमं पदंसदा पश्यन्ति सूरयः इत्यत्रापि व्यतिरेकनिर्देशबलात् स्वरूपाद्भेदे सिद्धे पदशब्दस्वारस्यात्सदा दृश्यत्वबलाच्च सदापश्यदनेकद्रष्टृविशिष्टस्थानविशेषविधिः अगत्या विशिष्टविधिः यदाग्नेयोऽष्टाकपाल इतिवत्, प्रपञ्चितश्चायं स्थानविशेषो मोक्षधर्मे एते वै निरयास्तात स्थानस्य परमात्मनः इत्यादिभिः । सा च विभूतिः केनचित् प्रदेशेनानन्ता केनचित्त्ववच्छिन्ना आनन्त्यतमःपरत्वयोः श्रुतयोरवर्जनीयत्वात् आनन्त्यमात्रसाम्येऽप्यनन्तत्रिगुणादपीयमधिकतरा न्यूनाधिकभाववचनात् अनन्तत्वेऽपि मिथस्तारतम्यस्य सिद्धत्वात्, देशेऽपि निदर्शयामः आदित्यादूर्ध्वमपि गगनदेशोऽनन्तः भूमण्डलादनन्ततरः पातालादनन्ततम इति पादत्रिपादव्यपदेशश्च तदविषयोऽपि तद्देशतारतम्यस्यानुग्राहको भवति, अयं च विभागो न समचतुर्भागाभिप्रायः बुद्ध्यर्थः पादवदि-

त्युक्तत्वात्, अचेतना चेयं जीवेश्वरकोटिविलक्षणत्वात् स्वयंप्रकाशा च।

तत्रानन्दमया भोगा लोकाश्चानन्दलक्षणाः।
आनन्दं नाम तं लोकं परमानन्दलक्षणम्॥
तयोर्नौपरमव्योम निर्द्वन्द्वसुखमुत्तमम्।
षाड्गुण्यप्रसरो नित्यस्वाच्छन्द्याद्देशतां गतः॥

इत्यादिसामर्थ्यात् तथा किमात्मकैषा भगवतो व्यक्तिरिति प्रश्ने यदात्मको भगवानिति च सामान्यत उत्तरे कृते पुनः किमात्मको भगवानिति च प्रश्ने ज्ञानात्मक इत्याद्युत्तरमुक्तम् अतो दिव्यमङ्गलविग्रहस्य ज्ञानात्मकत्वात्तद्द्रव्यातिरिक्तायाः सर्वस्या नित्यविभूतेर्ज्ञानात्मकत्वमुचितं, ज्ञानात्मकत्वं चात्र स्वयंप्रकाशत्वमेव ज्ञानत्वेऽप्यात्मवदस्यानिर्विषयत्वाकर्तृत्वे युक्ते परस्मै भासमानत्वाच्च धर्मभूतज्ञानवत् पराक्त्वमुपपन्नं सुषुप्त्यादिकाले धर्मभूतज्ञानवद्बन्धकाले सा न प्रकाशते, तदा तु तद्वदेव ज्ञानविषयतयैव तत्सिद्धिः बन्धरहितानामतिवैभवे सत्यपि सा तन्निरपेक्षा आत्मवस्तुस्वरूपवत् ज्ञानविषयत्वेऽपि स्वयंप्रकाशत्वमप्यन्यत्राप्यभ्युपगतम्। एके तु निरतिशयदीप्तियोगात् ज्ञानावरकत्वाभावादेश्च स्वयंप्रकाशत्वज्ञानत्वादिव्यपदेशः अत्यन्तानुकूलरूपरसगन्धादियोगादानन्दसुखादिव्यपदेश इत्याहुः। इयं च पञ्चोपनिषत् प्रतिपाद्यपञ्चभूतेन्द्रियमयी नित्यमुक्तेश्वराणामिच्छानुरूपशरीरेन्द्रियप्राणविषयरूपेणावतिष्ठते त्रिगुणवदियमपि च चतुर्विंशतितत्त्वात्मिकेति केचित्। तथापि न तत्त्वानां प्रकृतिविकृतिभावः दिव्यमङ्गलविग्रहादेर्नित्यत्वश्रवणात् अप्राकृतानामपि महदादीनां सद्भाव आकाशादिवत् न

ह्याकाशाद्युपात्तास्तत्र वाय्वादयः तत्र च शरीरादीनां संस्थानादीनि प्रायशः प्राकृततुल्यानि शरीराणां शुभाश्रयादीनां पाण्यादिमत्त्वश्रवणात्तत्रेन्द्रियसद्भावसिद्धिः चक्षुरादिशब्दानां च प्रयुक्तानां गोलकादावमुख्यत्वात् इन्द्रियवच्छिद्रविधुरा द्योतमानाश्च सर्वः स इत्यादिवचनमुत्सर्गापवादनयेन कर्मकृतेन्द्रियप्रतिक्षेपपरम् अशरीरं वाव सन्तमित्यादिषु कर्मकृतशरीरादिप्रतिषेधवत् अभावं वादरिरित्यधिकरणे किंमुक्तस्य देहेन्द्रियाणि सन्तीति चिन्तितत्वाद्भूतेन्द्रियरूपषोडशतत्फलसद्भावो भाष्यकारैरेव सूचितः भट्टपराशरपादैश्चेश्वरादीनां मनःसद्भावो दर्शितः यथा यद्यप्येवं तर्कः स्वातन्त्र्येण स्वान्तसमर्थनासमर्थः तथाप्यागमानुग्रहेण प्रभवति, सन्ति चागमाः मनसैतान् पश्यन् रमते मनोऽस्य दिव्यं चक्षुः, सोऽन्यं कामं मनसा ध्यायीत मनसैव जगत्सृष्टम् एतस्माज्जायते प्राणोमनःसर्वेन्द्रियाणि चेत्येवमादयः परावरप्रकरणेष्विति स्वयमुक्तत्वात् बुद्धिरेवेदं मन इति मतान्तरमाचार्याणाम् बुद्धिमान् मनस्वीत्यविशेषनिर्देशात् क्षुभितं मे मनः प्रशस्तं मे मन इति तदवस्थापरोद्याच्चेति मतान्तरमुक्तं, विषयाश्चात्र भूषणायुधासनपरिवारायतनोद्यानवाटिकाक्रीडापवनादयोऽतिविचित्रा नित्याः। केचित्तु कृतका अनित्याश्च सन्ति हि तत्रापि तरुषु पल्लवकुसुमफलादयः परिणामाः नदीषु फेनतरङ्गबुद्बुदादयः विग्रहे च व्यूहविभवादयः कालकृतकर्माधीनपरिणाममात्रं हि तेषु निषेध्यं न तु भगवत्संकल्पमात्रकृतमपि, तदेवं शरीराण्यपि कानिचिन्नित्यादीनामीश्वरस्य च नित्येच्छापरिग्रहान्नित्यानि, कानिचिदनित्येच्छापरिग्रहादनित्यानि मुक्तानां तु कृतकान्येवानित्यान्यपि, ते हि कदाचिदशरीराः कदाचिच्च सशरीरा इति

भाष्यादिषु प्रदर्शितम्। इन्द्रियाणि तु तत्रत्यानि सर्वाण्यपि नित्यानि तत्र व्योमादिवदेवोपादाननिरपेक्षत्वात् तत्र कानिचिन्नित्यैरीश्वरेण च नित्यपरिगृहीतानि मुक्तैस्तु तत्परिग्रहः शरीरवत्कादाचित्क एव नित्यमुक्तानां शरीरादिपरिग्रहो भगवदभिमततत्कैङ्कर्यरूपभोगाय भगवतोऽपि स्वभोगाय स्वशेषभूतनित्यमुक्तानन्दनाय मुमुक्षूपास्यत्वसिद्धये च स च भगवतः स्वसङ्कल्पादेव मुक्तनित्यानां तु कदाचित्परमपुरुषमात्रसङ्कल्पात् कदाचित्परमपुरुषसङ्कल्पानुविधायिस्वसङ्कल्पाच्च तथा च सूत्रं तन्वभावे संध्यवदुपपत्तेः। भावे जाग्रद्वदिति। ननु नित्यस्यैकस्यैव ज्ञानस्य संसारदशायां कर्मणा सङ्कोचविकासभेदात्सुखदुःखेच्छाद्वेषादिरूपावस्थाभेद उपपन्नः ईश्वरस्य विपाकदशापन्नजीवकर्माख्यसहकारितारतम्याद्विषमत्रिगुणपरिणामहेतवः सन्तु नाम सङ्कल्पाः अप्राकृतविचित्रदेहादिपरिणामेषु कर्मकालाद्युपाधिरूपाणां सङ्कोचविकासरहितसमस्तवस्तुगोचरधियां मुक्तनित्येश्वराणां कथं कादाचित्केच्छासङ्कल्पतत्कृतानन्दादिज्ञानावस्थाविशेषा घटन्ते उच्यते—

उल्लेखभेदाः क्रमशः सन्ति सर्वज्ञसंविदि।
न चेत्कार्येषु भूतैष्यद्वर्तमानादिधीः कथम्॥
कर्माद्युपाध्यभावेऽपि मुक्तादीनां प्रवर्तते।
इच्छासङ्कल्पदेहादिरीश्वरेच्छाविशेषतः॥
ईशेच्छायास्तु वैषम्यं व्यष्टौ कर्मविशेषतः।
समष्टौ गुणवैषम्यात्तन्मूलात्कालतोऽपि वा॥
कालस्य तादृशावस्थाक्षणादीनां प्रवाहतः।
सोऽप्युपाधिप्रवाहाद्वा यद्वा पूर्वक्षणादितः॥
उपाधिभिः क्षणाद्यैर्वा पूर्वैरुपहितत्वतः।

तेषूत्तरेषु हेतुः स्यादिच्छासन्ततिरैश्वरी ॥
अप्राकृतविचित्रार्थसिसृक्षाविषमा तु या ।
सापि प्रवाहानादित्वान्नोपाध्यन्तरमीक्षते ॥
इच्छासङ्कल्पसृष्टीनां चक्रवद्वा प्रवर्तनात् ।
स्यादीशबुद्ध्यवस्थानां तत्र बीजाङ्कुरक्रमः ॥
आगमैरैश्वरीं शक्तिमतर्क्यामुपगच्छताम् ।
ईशस्य तत्तत्सृष्ट्यादौ सहकार्यन्तरेण किम् ॥
अनित्यमपि विज्ञानमीशस्यास्तीति केचन ।
तदा त्वप्राकृताद्यादेस्तद्धिक्रासोपयोगिता ॥

यथोक्तं वरदविष्णुमिश्रैः ईश्वरज्ञानस्यानित्यस्य सर्वविषयनित्यज्ञानगृहीतग्राहित्वादिति, अतः सिद्धं नित्यानित्येच्छाभेदादीश्वरादेर्नित्यानित्यशरीरादिमत्त्वम्, ईश्वरशरीरे च सूक्ष्मव्यूहविभवादिभेदाः पञ्चरात्रादिभिः प्रपञ्चिता अवगन्तव्याः । संग्रहस्तु सूक्ष्मं केवलषाड्गुण्यविग्रहं वासुदेवाख्यं परं ब्रह्म पूर्वोक्तं, परस्मिन्नेव शान्तोदितनित्योदितविभागो विभाव्यः, वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धरूपो व्यूहः उत्तरोत्तरः पूर्वपूर्वकारणकः तत्र वासुदेवे ज्ञानादिगुणाः षडप्याविर्भूताः, सङ्कर्षणादिषु शास्त्रप्रवर्तनसंहाराद्यौपयिकगुणद्वन्द्वत्रयोन्मेषेण चतुष्कमनाविर्भूतम् सर्वे ते सर्वत्र सन्त्येव एषां च प्रत्येकमवान्तरावतारा अनन्ताः पद्मनाभमत्स्यादिदशकादयो विभवभेदाः, स्वयंव्यक्तदैवार्षादयस्त्वर्चावतारभेदाः, दैवादिष्वपि विशिष्टप्रतिष्ठानन्तरं प्रसादोन्मुखेश्वरसङ्कल्पाधीनमप्राकृतत्वमनुसंधेयम् । प्राकृताप्राकृतसंसर्गोऽपि नानुपपन्नः अन्यथा प्राकृतलोकेषु भगवदवताराः परमपदेऽप्यर्चिरादिमार्गेण सूक्ष्मशरीरस्य वैदिकपुत्रादेर्वा गमनं कथं घटेत हृत्पद्मकर्णिका-

मध्यगतस्यान्तर्यामिणः परस्य विशेषतः सूक्ष्मान्तर्याम्यवतारः विचित्रा भगवत इव विग्रहस्यापि व्याप्त्यादिशक्तिः तयैव धर्मिग्राहकसिद्धया विपरीततर्काणां प्रतिक्षेपः श्रीमद्गीतैकादशाध्याये च विग्रहस्य व्यापकत्वकारणत्वादिकं व्यक्तमेव भाष्यकारैः प्रतिपादितम् ।

इहैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥ इति ।

पृथिव्यन्तरिक्षस्वर्गपातालवितलसुतलादिभोगोपकरणभोगस्थानभिन्नं प्रकृतिपुरुषात्मकं कृत्स्नं जगदित्युक्तं तथा ।

सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम ।
देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः ॥

इति ममेदं सर्वप्रशासनेऽवस्थितं सर्वाश्रयं सर्वकारणभूतं रूपं यद् दृष्टवानसि तत्सुदुर्दर्शं न केनापि द्रष्टुं शक्यमित्याद्युक्तम् अस्त्रभूषणाध्यायोक्तश्च सर्वाश्रयत्वप्रकारोऽनुसंधेयः, अन्यत्र चोक्तं भगवता पराशरेण ।

समस्ताः शक्तयश्चैता नृप यत्र प्रतिष्ठिताः ।
तद्विश्वरूप! वैरूप्यं रूपमन्यद्धरेर्महत् ॥
समस्तशक्तिरूपाणि तत्करोति जनेश्वर! ।
देवतिर्यङ्मनुष्याख्याचेष्टावन्ति स्वलीलयेत्यादि ॥

एषु सर्वेषु भगवतो विग्रहेषु सांसारिकफलप्रदान एव मात्रया तारतम्यं, निश्श्रेयसं तु व्यापकानुसंधायिनां सर्वत्र हस्तापचेयं यच्च विभवार्चनाद्यहं प्राप्येत्यादि तद्व्यापकानुसंधानविधुराधिकारिविशेषापेक्षयेति मन्तव्यमिति ॥

संविद्यानिरवद्यनन्दथुमयी निष्कृष्टसत्त्वाकृतिः
स्वाच्छन्द्यात्कमलापतेर्भगवतो भोगाय लोकायते ।

चिन्तादूरतराचिरन्तनतमोनिःशेषमोक्षस्थली
चित्ते सन्निदधातु मे शुभतरस्वैरावतारात्मिका ॥

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु न्यायसिद्धाञ्जने नित्यविभूतिपरिच्छेदश्चतुर्थः ॥

श्रियै नमः । श्रीधराय नमः श्रीमते रामानुजाय नमः ।
सन्तु शुभाशिषः पूर्वाचार्या लोकद्वयसर्वमङ्गलाय नः ॥

॥ श्रीः ॥

श्रियै नमः ।

श्रीधराय नमः ।

श्रीमते रामानुजाय नमः ॥

न्यायसिद्धाञ्जने बुद्धिपरिच्छेदः पञ्चमः ।

अथ मतिर्निरूप्यते सकर्मकावभासत्वं सकर्तृकावभासत्वमित्यादि तल्लक्षणं, न्यायतत्त्वे तु प्रथमाधिकरणे लक्षणान्तराणि बहूनि दूषयित्वा ॥

अत्यन्तवेगिताऽत्यन्तसौक्ष्म्यं निर्भरता तथा ।
स्वसत्ताकालभाव्याप्तिर्ज्ञाने लक्ष्मचतुष्टयम् ॥

इति स्वोक्तलक्षणोपसंहारः कृतः, अत्र यावदपेक्षितं विशेषणमूह्यं, सा च विषयप्रकाशवेलायां स्वाश्रयस्यैवात्मनः स्वयं प्रभा, अन्यकालान्यपुरुषगता तु स्मृत्यनुमानादिविषयः संसारिणामितरेषां तु सर्वज्ञतयाऽन्यकालान्यपुरुषनिष्ठापि स्वकीयेन प्रत्यक्षेण विषयीक्रियते तथा च भाष्यं यत्त्वनुभूतेः स्वयंप्रकाशत्वमुक्तं तद्विषयप्रकाशनवेलायां ज्ञातुरात्मनस्तथैव न तु सर्वेषां सर्वदा तथैवेति नियमोऽस्तीति ।

धियः स्वयंप्रकाशत्वे वेद्मीत्याद्युपलम्भनम् ।
मानसाऽध्यक्षभङ्गादिरपि मानमितीष्यताम् ॥

किंच ।

स्वधीविशेषं सर्वज्ञोऽप्यध्यक्षयति वा न वा ।
आद्ये सिद्धा स्वतःसिद्धिरन्यत्रासर्ववेदिता ॥
ज्ञानमस्तीति विज्ञानं स्वात्मानं साधयेन्न वा ।

पूर्वत्र स्वप्रकाशत्वं सर्वासिद्धिरतोऽन्यथा ॥
प्राकट्यानुमेयत्ववादिनं प्रत्युच्यते-
कल्प्यैव धीश्चेत्कल्प्येत तत्सामग्र्येव लाघवात् ।
प्रत्यक्षायास्ततोऽन्यत्वक्लृप्तौ नैवं प्रसज्यते ॥
ज्ञानयोगः प्रकाशोऽत्र तदसिद्धौ न सिध्यति ॥
कर्मकर्तृक्रियातन्त्रं ज्ञानं प्रत्ययभेदतः ।
प्रकाशते ज्ञायत इत्येतद्धातुविभेदतः ॥
भिनत्तिपातयत्यादौ यथा करणकर्मणोः ।
व्यवहारार्थनियतिप्रकाश्यत्वानि बुद्धितः ॥
स्वभावनियमोऽप्येष प्राकट्येऽपि न लङ्घ्यते ।
तत्रैवैतत्करणवत्तस्यैवास्तु प्रकाशकम् ॥
प्राकट्यजन्मभूतैष्यदभावज्ञाततास्तु किम् ।

आत्मसिद्धौ प्रकाशपदार्थनिर्णयार्थकस्तर्हि प्रकाशते पदार्थ इति प्रश्ने अनुभवादूरत्वं स्मृतिनिमित्तमिति न्यायतत्त्वग्रन्थस्मारणपूर्वकं संविददूरत्वं प्रकाश इत्यभिधाय अदूरविकल्पं प्रति चाभिहितम् ॥

भवत्वनुभवादूरं दूरादन्यद्विरोधि वा ।
तद्भावश्च प्रकाशत्वं किमत्र बहु जल्प्यते ॥

इति, भाष्यं च प्रकाशश्च चिदचिदशेषपदार्थसाधारणं व्यवहारानुगुण्यमिति तदेवं न बुद्धिः प्रकाशानुमेया किन्तु स्वतः सिद्धैव, प्रपञ्चितं चैतत्सर्वं तत्त्वरत्नाकरे भट्टपराशरपादैः, यथा-

धियः प्रत्यक्षभावत्वात् परतस्तदसम्भवात् ।
पारिशेष्यात्स्वतोभानं प्रमाणाच्च ततस्ततः ॥
प्रतीतेर्व्याहरणतः संदेहपरिवर्जनात् ।
सत्तायां सिद्धवत्कारात् ज्ञानं भातीति भावितम् ॥

३३०

परस्यादर्शनाद्व्याप्तादन्वयिव्यतिरेकतः ।
अर्थापत्तेश्च युक्तेश्च वचनाच्च स्वदृग्मतिः ॥

इति संग्रहः, व्याप्तादन्वयिव्यतिरेकत इत्यस्य विवरणदशायां चैवमुक्तं विप्रतिपन्ना संवित् स्वगतव्यवहारं प्रति स्वाधीनकिंचित्कारे सजातीयसम्बन्धानपेक्षा व्यवहारहेतुत्वात् अर्थेन्द्रियदीपादिवत्, न च चक्षुषः सजातीयतेजोऽपेक्षयाऽनैकान्त्यं तस्येन्द्रियत्वेनाहङ्कारिकत्वेन वाऽलोकाद्भिन्नजातीयत्वात् अन्यच्च ज्ञानसंस्कारः स्वैकार्थसमवायिज्ञानानुभवानपेक्षः संस्कारत्वात् अन्यसंस्कारवत् विषयसंस्कारो ज्ञानसंस्कारेण सहोत्पद्यते विषयसंस्कारत्वात् इदमहं जानामीति ज्ञानप्रभवसंस्कारवत्, न चोभयविषयज्ञानपूर्वकत्वं प्रयोजकं ज्ञानपूर्वत्वेन व्याप्तिसिद्धेर्व्यर्थविशेषणत्वादित्यस्यानन्तरं पुनश्चेत्युक्त्वा संविदनन्याधीनस्वधर्मव्यवहारेत्यादिभाष्योपात्तमेवानुमानमुक्तम्, अत्र प्रयोगनिष्कर्षः स्वयमेव भाव्यः, व्यतिरेकि चास्ति लिङ्गमित्यभिधायाजडत्वज्ञानत्वादीनि प्रयुज्य समर्थितानि प्रत्यक्षत्वानुपपत्तिर्व्यवहारविशेषकरत्वानुपपत्तिश्चार्थापत्ती समर्थिते, ज्ञानं न परप्रकाश्यं घटादिवदर्थाप्रकाशकत्वप्रसङ्गादित्यादितर्काश्च प्रतिपादिताः, वचनानि चेत्युक्त्वा अत्रायं पुरुषः स्वयंज्योतिर्भवति आत्मैवास्य ज्योतिः स्वेन ज्योतिषाऽऽस्ते आत्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितमित्यादीनि ज्ञानपदवाच्यजीवस्य स्वयंज्योतिष्ट्वपराणि ज्ञानपदाभिधेयायां संविद्यपि सम्भवलाघवाभ्यां स्वप्रकाशत्वं सम्भावयन्तीति मणितरणिदीपतत्प्रभासाधर्म्येण जीवतज्ज्ञानसमर्थनानि च ।

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ! ॥

इत्येवंविधानि ज्ञानात्मनोः स्वयं प्रभावत्वेन सजातीयत्वं ज्ञापयन्ति, न च किञ्चिदनिष्टं प्रसज्यत इत्युक्तं वेद्यत्वादिसाधकानि व्यवहार्यत्ववस्तुत्वप्रमेयत्वक्रियात्वाद्यनुमानानि योग्यानुपलम्भसिद्धसाधनासिद्ध्यादिभिर्दूष्याणि अधीकर्मणः सिद्धिरप्यज्ञातघटादिसद्भाववत् कदाचिद्धीकर्मत्वस्य ज्ञानेऽपि विद्यमानत्वात् अङ्गुल्यग्रचोद्यस्य कर्मत्वाद्यनभ्युपगमेन परिहृतत्वाच्च समर्थिता स्वयंप्रकाशत्वे सहोपलम्भनियमादभेदभयमपि विरुद्धप्रत्यक्षावरूढसाध्यत्वविरुद्धत्वाप्रयोजकत्वप्रभृतिभिरनुमानदूषणान्निःशेषितं, मानसप्रत्यक्षभङ्गसंग्रहे चैवमुक्तम् ।

योग्यानवग्रहात् स्वेन सम्भवादनवस्थितेः ।
इति बाधकहेतुभ्यः साधनद्वितयस्य च ॥
असिद्धिव्यभिचाराभ्यां वैकल्यात् साध्यसाधने ।
इत्यसाधनबाधाभ्यां न धीर्मानसगोचरः ॥

इति, स्वतःसिद्धिरेव संवित्सिद्धौ च पद्धतिरिति अखण्डवाक्यार्थखण्डनानन्तरं च प्राकट्यमानसप्रत्यक्षभङ्गपूर्वकमेता एव युक्तयः पुनः प्रतिपादिताः तत्र क्षणिकात्मविशेषगुणत्वादिसाधनद्वितयं तत्र क्षणिकत्वादेरसिद्धिः प्रायश्चित्तधर्मैरनैकान्तिकत्वमप्युक्तम् एवं पराभिमतजीवनपूर्वकप्रयत्नेनापि द्रष्टव्यम् । यत्तु वरदविष्णुमिश्रैः सुखदुःखे ज्ञानरूपे एवेत्युक्त्वाऽनन्तरमुक्तम् इच्छाद्वेषप्रयत्ना मानसप्रत्यक्षा इति, तन्नूनमिच्छादिगुणान्तरसद्भावाभिमानमूलं वा परमतमूलं वा सुखदुःखयोर्ज्ञानरूपत्वे चेच्छादिषु को विशेषः ।

मिथः संश्रयधीबाधमध्यावस्थोपलम्भनैः ।
न स्यात्परस्पराभावमात्रता सुखदुःखयोः ॥

इयं च प्रतिपुरुषनियता सर्वगोचरस्वभावा हि संसारावस्थायां कर्मणा सङ्कुचिता तत्तत्कर्मानुगुणतारतम्यवतीन्द्रियाधीनप्रसरणा तत एव तत्तत्प्रतिनियतविषया प्रसरणभेदाधीनप्रलयोदयभेदव्यपदेशवती च, तथा चोक्तं भाष्ये तमिममिन्द्रियद्वारा ज्ञानप्रसरमपेक्ष्योदयास्तमयव्यपदेशः प्रवर्तते इति, एतेन नित्यत्वेन कथमिन्द्रियाद्यपेक्षेति चोद्यं दत्तोत्तरम्, अत्र धारावाहिकविज्ञानं नीरन्ध्रनिर्यातमणिमयूखवदेकरूपं वा स्नेहदशादिसमवायसंतन्यमानदीपवत् सन्ततिरूपं वेति चिन्तनीयम् अत्र वरदनारायणभट्टारकैः प्रथमः पक्ष उक्तः, तथा हि प्रज्ञापरित्राणे स्मृत्यप्रामाण्यप्रसङ्गेनोक्तम् ।

धारावाहिकपङ्क्तिश्च स्वकालीनार्थभासिका ।
मेधातिरेकसद्भावान्नैरपेक्ष्यादपि प्रमा ।
स्तम्भःस्तम्भःस्तम्भ इति धीर्धारावाहिका मता ।
धारावाहिकविज्ञानमेकं ज्ञानं मतं हि नः ॥
प्रतिबन्धांशमोक्षाद्यैर्नित्यं ज्ञानं हि जायते ।
चिरमप्रतिबन्धेन चिरं तिष्ठति भासकम् ॥
चिरस्थितार्थधीरेव न धारावाहिका तु सा ।
न हीश्वरादिविज्ञानमागमादिकमिष्यते ॥
नित्यं हि तदतो नित्यं सर्वेषां ज्ञानमागमात् ॥

इत्यादि, उक्तं हि सन्मात्रग्राहिप्रत्यक्षभङ्गे भट्टपराशरपादैः—सङ्कोचेऽपि करणसंप्रयोगावधिकस्थैर्याभ्युपगमादिति, अस्मिन्नपि पक्षे यदा त्विन्द्रियसंयोगाः क्षणिकास्तदा ज्ञानस्यापि क्षणिकत्वमेष्टव्यमेव । अन्ये तु ज्ञानस्य क्षणिकत्वे ध्यानस्य सन्ततिरूपत्वे च स्मृतिभाष्यादिदर्शनात् द्वितीयः पक्ष इति अस्याः स्वतः प्रत्यक्षस्वभावाया एव

मोचकत्वाद्युक्त्या विष्णवादिरूपतोच्यतइति चेत्सत्यमेवं प्रतीयते अल्पश्रुतानां बहुश्रुतैस्तूमावतार एव सेति निर्धार्यते। तथा हि मार्कण्डेये तस्या महिषशुम्भादिहन्तृत्वं नन्दपुत्रीत्वादिकं च यदुक्तम् तत्सर्वं हरिवंशे गौर्या उक्तम्। तत्र तावत्प्रद्युम्नशम्बरयुद्धे। हतायां सर्वमायायां शम्बरोऽचिन्तयत्पुनः। अस्ति मे कालदण्डाभो मुद्गरो हेमभूषितः। पुरा यो मम पार्वत्या दत्तः परमतुष्टया। गृहाण शम्बरेमं त्वं मुद्गरं हेमभूषितम्। मायान्तकरणं नाम सर्वासुरविनाशनम्। अनेन दानवौ रौद्रौ बलिनौ कामरूपिणौ। शुम्भश्चैव निशुम्भश्च सगणौ सूदितौ मयेति पार्वत्या एव ससैन्यशुम्भादिहन्तृत्वमुक्तम्। ततः शक्रप्रेषितनारदे मुद्गरवृत्तान्तं तदुपशान्त्यै गौर्युपासनं चोपदिश्य गते सति। दैत्येन तस्मिन्गृह्यमाणे सति तदुत्थानादृद्धादशार्कोत्थानादीन् नानोत्पातान् दृष्ट्वा प्रद्युम्नः शंभुप्रियां हृदि स्मृत्वा भूमौ शिरसा प्रणम्य तुष्टाव। ओं नमः कात्यायन्यै गुहस्य जनन्यै नमः। नमस्त्रैलोक्यमायायै कात्यायन्यै नमो नमः। नमस्ये शुम्भमथनीं निशुम्भहृद्दिदारिणीम्। विन्ध्यवासिनीं दुर्गघ्नां रणदुर्गां रणप्रियाम्। त्रिशूलिनीं नमस्यामि महिषासुरघातिनीम्। सिंहवाहां नमस्यामीत्यादिना मध्यमोत्तमचरितोक्तं सर्वं गुहमातृविषयमुपपादितम्। प्रथमचरितदेवता तु योगनिद्रारूपा तामसी शक्तिः सा च रुद्रान्तर्भूतैवेति न विवादः। तथा च कथं दुर्गा मान्येति वाच्यम्। यद्यपि तत्र शुम्भनिशुम्भयोः शूलखड्गाभ्यां हननमत्र तु मुद्गरेणेति विरोधः। तथाऽपि स कालभेदेनाऽपास्तुं शक्यः। वैवस्वतेऽन्तर इत्यादिभगवत्युक्ते हरिवंशएवानिरुद्धविष्णुकृते भीष्मपर्वणि पार्थकृते च स्तवे पुराणान्तरगतोमामाहात्म्यवचनेष्वप्ययमर्थः स्पष्टः। ग्रन्थ-

विस्तरभयान्नेह वचनानि लिख्यन्ते । यानि तूमादेर्महालक्ष्मीविभूतित्ववचांसि तानि विष्ण्वादेर्नृसिंहादिविभूतित्वबोधकवचांसीवोपासनार्थं स्तुतिरूपाणि । वस्तुतस्तु गौरीत्वमेवेत्यादीनि साक्षादभेदपराण्येव । अन्यथा त्वमक्षरं ब्रह्मेत्यादेरपि तादृशवाक्यगणे पठितस्य तथात्वप्रसङ्गेनाक्षरस्य परब्रह्मणो ऽपि स्तुत्यश्रीरामादिविभूतित्वप्रसङ्गः । अवतारावतारिणोश्चात्यन्ताभेदमनुपदमेव वक्ष्याम इत्युपरम्यते ।

न मे नारायणाद्भेदो विद्यते हि विचारतः । तन्मयोहं परं ब्रह्म स विष्णुः परमेश्वर इति कौर्मे शिवस्यैव विष्णुरूपत्वं स्वस्योक्तं सदाशिवाङ्कमारूढा शक्तिरिच्छाह्वया शिवा । महालक्ष्मीरिति ख्यातेति शैवे साक्षान्महालक्ष्मीरूपतोमाया उक्ता लक्ष्मीतन्त्रे लक्ष्म्याः काल्यादेः स्वावतारत्वोक्तिरपि स्वोमयोरभेदपरैव । हिरण्यगर्भौ रुचिरौ स्त्रीपुंसौ कमलासनावित्यादिप्राधानिकरहस्ये रमाया रजोवच्छिन्नब्रह्मरूपत्वं प्रतीयते । अतो ऽस्या न केवलविष्णूरूपत्वनिश्चयः । न चैतेनास्याः केवलं विधिरूपत्वमस्तु कौर्मे इयं सा परमा शक्तिर्मन्मया ब्रह्मरूपिणीति विष्णूक्त्या विष्णुपुराणादिवचनैश्चास्या विष्णुरूपत्वस्यापि प्रतीतेः । एवं मोक्षदे भुक्तिमार्गे इत्यादौ सरस्वत्या मोक्षादिरूपसत्त्वावच्छिन्नकार्यप्रतीतेः सत्त्वाख्येनातिशुद्धेन गुणेनेन्दुप्रभं दधाविति प्राधानिकरहस्ये श्वेतरूपत्वात्साक्षात्सत्त्वयोगोक्तेश्च न केवलब्रह्मरूपत्वनिर्णयः । एतच्च शिवे ऽपि तुल्यम् । तस्मात्सर्वे देहाः सर्वेषामिति सिद्धम् । तथा चैकरूपत्वमेव सर्वेषां पर्यवसन्नं तदुक्तं हरिवंशे । यो विष्णुः स तु वै रुद्रो यो रुद्रः स पितामहः । एकमूर्त्तिस्त्रयो देवा रुद्रविष्णुपितामहाः । वरदा लोककर्त्तारो लोकनाथाः

स्वयंभुवः । अर्द्धनारीश्वरास्ते तु व्रतं तीव्रं समास्थिता इत्यादि । एतेन रुद्रो नारायणश्चैवेत्येकं सत्त्वं द्विधा कृतमित्यादि भारतादिवचनमाश्रित्य शिवविष्णू एव सत्त्वावच्छिन्नेशरूपौ ब्रह्मा तु जीव एवेशाविष्टः स्रष्टा भवतीति ब्रुवाणा निरस्ताः । यस्तु हरादिषु क्वचित्कस्माचित्कस्य चित्कदा चित्केन चिन्निमित्तेन लीलया वा ऽविर्भाव उच्यते सो ऽपि विचार्यमाण ऐक्यएव पर्यवस्यति । तथा हि क्वचिद्द्विधेरुभयोराविर्भाव उच्यते यथा यजुर्भ्यौथ विष्णुमित्यादिश्रुतावष्टमूर्त्तिर्ब्रह्मणे चान्यत्रापि च पुराणादिषु क्वचित् क्वचिद्धरात् । तथा च श्रुतिः । अण्डं हिरण्यमयं रुद्रस्य वीर्यात्प्रथमं संबभूव तत्र ब्रह्मा विष्णुर्जात इत्यादि । हरिवंशे च हरं प्रति हरिवचनम् । अहं ब्रह्मा कपिलो ऽथाप्यनन्तः पुत्राः सर्वे ब्रह्मणश्चातिवीर्यः । त्वत्तः सर्वे देवदेव प्रसूता एवं सर्वेशः कारणात्मा त्वमीड्य इति । क्वचिद्धरेः यथा नारायणाद्ब्रह्मा जायते नारायणाद्रुद्रो जायते नारायणाद् द्वादशादित्यारुद्राः सर्वा देवता इत्यादिश्रुतौ यथा च त्वद्विस्तारो यतो ब्रह्मा अहं भूतपतिस्तथेति भारते । एवमन्यान्यपि शैववैष्णवादिमतेषूदाहृतानीदृशानि वचांसि स्मर्त्तव्यानि । एतानि कल्पभेदेन व्यवस्थितानि । एतज्ज्ञातिविस्तरेण श्रीवसिष्ठो वासिष्ठे श्रीरामं प्रति कथयामास । तत्रैवेशश्चाह वसिष्ठं प्रति । एवं सर्गे हि कस्मिंश्चित् प्रथमो ऽथ सदाशिवः । कस्मिंश्चिद्विष्णुरित्युक्तो नाभ्युत्पन्नपितामहः । पितामहश्च कस्मिंश्चित् कस्मिंश्चिदपि चेतरइति इतरः दुर्गाभैरवविनायकादिः । तेषामपि तत्तन्माहात्म्यबोधकपुराणादिभागेषु ब्रह्माद्युद्भवहेतुत्वसिद्धेः । भगवान्वायुश्चाह । ब्रह्मनारायणौ पूर्वं रुद्रः कल्पान्तरे ऽसृजत् । कल्पान्तरे पुनर्ब्रह्मा रुद्रविष्णू

जगन्मयः । विष्णुश्च भगवांस्तद्वद्ब्रह्माणमसृजत्पुनः । नारायणं पुनर्ब्रह्मा ब्रह्माणं च पुनः शिवः । एवं कल्पेषु कल्पेषु ब्रह्मविष्णुमहेश्वराः । परस्परस्माज्जायन्ते परस्परजयैषिणः । तत्तत्कल्पान्तवृत्तान्तमधिकृत्य महर्षिभिः । प्रभावः कथ्यते तेषां परस्परसमुद्भवादिति । कौर्मे च । क्व चिद्रुद्रः क्व चिद्विष्णुः क्व चिद्ब्रह्मा प्रशस्यते । नानेन तेषामाधिक्यं न्यूनत्वं वा कथं च न । तत्तत्कल्पान्तवृत्तान्तमधिकृत्य महर्षिभिः । तानि तानि प्रणीतानि विद्वांस्तत्र न मुह्यतीत्युक्तम् । मार्कण्डेये ऽपि विष्णुः शरीरग्रहणमित्यादिना दुर्गाया विष्ण्वाद्युदयमुक्त्वा यस्तद्देहेभ्यो ऽस्या आविर्भाव उक्तः सो ऽपि कालभेदेन व्यवस्थितः । एवं गणेशपुराणादौ यो विनायकादेर्ब्रह्माद्याविर्भावो ऽभिहितः सो ऽपि कदा चिन्महेश्वरस्य तदात्मनैवाविर्भावस्ततो ब्रह्माद्याविर्भाव इति समाधातुं शक्य इति न कुत्रापि विरोधः । ईदृशैरपि वाक्यैः सर्वेषां सर्वदेहेषु सत्त्वैवावगम्यते । न हि यद्यत्र नास्ति तत्तत उदेति सिकतादेस्तैलोदयापत्तेः । तस्मादेकमेवाद्वितीयं ब्रह्माघटनघटनापटीयस्या मायया ऽनेकमिव सदेहमिव परस्परस्माज्जातमिव च प्रतीयते इति सिद्धम् । एतेन कतिपयवाक्यान्याश्रित्य कस्य चिदुत्कर्षसमर्थनं निरस्तम् । यच्च हरो हरिं प्रत्याह । अहं त्वं सर्वगो देवस्त्वमेवाहं जनार्दन । आवयोरन्तरं नास्ति शब्दैरर्थैर्जगत्पते । नामानि तव गोविन्द यानि लोके महान्ति च । तान्येव मम नामानि नात्र कार्या विचारणेति तस्याप्यत्यन्ताभेद एव सामञ्जस्यम् । अन्यथा त्वदुक्तरीत्या गुणभेदात्तदवच्छिन्नभेदे विष्णुशिवादिपदानां शिवविष्ण्वादिनामत्वासम्भवेनासामञ्जस्यं स्यात् ।

यत्तु शैवैरुक्तम् । शुद्धसत्त्वप्रधानत्रिगुणमायोपहित-

एकैकगुणावच्छिन्नमूर्त्तिभ्यः परस्तुर्यश्चन्द्रावतंसनीलकण्ठोमासहायश्च शुद्धसत्त्वमूर्त्युपलक्षितः परमशिव एव मुमुक्षूपास्यः। तदुपास्तेर्मोक्षे ऽन्तरङ्गत्वात्। उमासहायमित्यादिश्रुतेः। ब्रह्मादिस्तद्विभूतिः। स ब्रह्मा स शिव इत्यादिश्रुतेः। यस्याज्ञया जगत्स्रष्टा विरिञ्चिः पालको हरिः। संहर्त्ता कालरुद्राख्यो नमस्तस्मै पिनाकिने इत्यादिपुराणादिभ्यश्चेत्यादि। यच्च वैष्णवा आहुः। तादृशमायोपाधिमूर्त्तित्रयपरो वासुदेवमहाविष्ण्वाख्यः परेशः ब्रह्मादिस्तद्विभूतिः। स ब्रह्मा स शिव इत्यादिश्रुतेः तद्भक्तिर्मोक्षेऽन्तरङ्गसाधनं शिवादेस्त्वाषढ्यवधानेन आरोग्यं भास्करादिच्छेच्छ्रियमिच्छेद्धुताशनात्। ज्ञानं महेश्वरादिच्छेन्मोक्षमिच्छेज्जनार्दनादिति पुराणात्। मां च यो ऽव्यभिचारेणेत्यादितदुक्तेश्चेत्यादि। तदप्येतेनापास्तम्। सर्वेषां शुद्धसत्त्वप्रधानत्रिगुणमायोपाधित्वसाधनेनात्यन्ताभेदसाधनात्। किञ्च मैत्रेयोपनिषदि मायिब्रह्म प्रस्तुत्य तस्य प्रोक्ता अग्र्यास्तनवो ब्रह्मा रुद्रो विष्णुरिति परविग्रहेषु विग्रहत्रयस्यैवाग्र्यत्वं श्रूयते। यदि ततो ऽप्यग्र्या काचित्परमूर्त्तिः स्यात्तदा कथं तेषामग्र्यत्वं स्यात् अग्रेभवा ह्यग्र्या उच्यन्ते। अतः सर्वं विशेषणं सावधारणमिति न्यायाद्ब्रह्मादेर्न कुतश्चित्पाश्चात्त्यत्वम्। अनेन त्रयाणामपि महाकल्पादौ स्वत एवाविर्भावः। परस्परस्मादुदयस्त्ववान्तरकल्पेषु कदा चिल्लीलया कुतश्चिन्निमित्ताद्वा भवतीति। अमुमेवार्थमुपोद्बलयति भागवते। तत्र ह्यत्रेस्तपश्चर्य्यां प्रस्तुत्य शरणं तं प्रपद्ये ऽहं स एव जगदीश्वरः। प्रजामात्मसमां मह्यं प्रयच्छत्विति चिन्तयन्निति तस्य फलेच्छां चोक्त्वा ऽथ चिराद्वरदानाय ब्रह्मादित्रयसन्निधाने सति स्तुतिप्रणाम्यनन्तरं तान्प्रत्यत्रेरेको मया हि भगवान्विविधप्रधा-

नैश्चित्तीकृतः प्रजननाय कथं नु यूयम् । अत्रागतास्तनुभृतां मनसोऽपि दूरा ब्रूत प्रसीदत महानिह विस्मयो मइति प्रश्ने । यथा कृतस्ते संकल्पो भाव्यं तेनैव नान्यथा । सत्संकल्पस्य ते ब्रह्मन्यद्वै ध्यायसि तद्वयमिति तेषामुत्तरोपन्यासेन मूर्त्तित्रयातिरेकेण परस्य सर्वैश्वर्याभिव्यक्तिस्थानं तुर्यं मूर्त्यन्तरं नास्तीति व्यक्तीकृतम् । तत्सत्त्वे तेनैवाविर्भावापत्तेः । अन्यथा ऋषेः सत्संकल्पत्वविरोधात् । तस्मान्नैतदतिरिक्ततुरीयोपगमो युक्तः । एतेषां सर्वपरत्वबोधकासंख्यवाक्यविरोधाच्च शिवादेरेकैकस्यापि लीलाविग्रहा बहव इति पुराणादिषु प्रसिद्धम् । न च तेषु यद्यप्युत्कर्षापकर्षवार्ताऽप्यस्ति एकस्यैव शुद्धसत्त्वप्रधानमायोपहितस्य परब्रह्मणस्तत्तदाकारैर्विवर्त्तमानत्वात् तथाऽप्युपासकप्रेमास्पदे क चिद्विग्रहे तत्प्रेमाधिक्यायोत्कर्षं प्रकल्प्यायं सर्वपरस्तुरीयोऽन्य एतद्विभूतय इति शास्त्रेणोच्यते तथा च न परशिवादिबोधकवाक्यविरोधः । सर्वोपासनायाश्च तौल्येनैव ज्ञानद्वारा मोक्षसाधनत्वं न तु साक्षात् । तमेव विदित्वेत्यादिशास्त्रविरोधात् । एतेनान्तरङ्गत्वादिकल्पनाऽऽपास्ता । सर्वात्यन्ताभेदसाधनादपि सा न युक्ता । यानि च ध्यायन्मुनिर्गच्छति मां च योऽव्यभिचारेणेत्यादीनि हराच्युतादिभक्त्या मुक्तिबोधकानि तान्यपि वाक्यान्तरविरोधाद्वृद्धकुमारीवाक्यन्यायेन भक्तेः परम्परया मोक्षहेतुत्वपराणीति बोध्यम् । न च ज्ञानं महेश्वरादित्यत्रापि फलभेदोऽस्ति । विदित्वाऽति मृत्युमेतीत्यादिश्रुतेः ज्ञानं लब्ध्वेत्यादिस्मृतेर्देहात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकम् । आत्मन्येव भवेद्यस्य स नेच्छन्नपि मुच्यतइति भगवत्पादवचनाच्च सति ज्ञाने मोक्षे विलम्बाभावात् । श्रेयांसि तत्र खलु सत्त्वतनोरित्यपि न विरुद्धं नृणां सत्त्वतनोरि-

स्त्यप्यन्वयसम्भवात् सर्वेषां सत्त्वतनुत्वसाधनाच्च। तस्मान्न किमपि वाक्यं भेदपरं प्रयोजनाभावात् किन्तु किं चित्सात्त्वादभेदबोधकं किं चित्परम्परया तत्र पर्यवसन्नम् । किं च भेदस्य प्रामाणिकत्वे तन्निन्दा न स्यात्। दृश्यते च सा यथा नारदीये। हरिरूपी महादेवो लिङ्गरूपी जनार्दनः। ईषदप्यन्तरं नास्ति भेदकृन्नरकं व्रजेदिति । कौर्मे च। ये त्विमं विष्णुमव्यक्तं मां च देवं महेश्वरम् । एकीभावेन पश्यन्ति न तेषां पुनरुद्भवः। ये ऽन्यथा संप्रपश्यन्ति मत्वेमं देवतान्तरम्। ते यान्ति नरकान्घोरान्नतेषु च व्यवस्थितिमिति। इदं विधिभेददर्शननिन्दाया अप्युपलक्षणम्। तथा च भविष्योत्तरे। विष्णोरन्यं तु पश्यन्ति ये मां ब्रह्माणमेव च। कुतर्कमतयो मूढाः पच्यन्ते नरकेष्वध इत्यादि। कर्मविपाकस्मृतौ च। यो ब्रह्मविष्णरुद्राणां भेदमुत्तमभावतः। साधयेद्दुदरव्याधियुक्तो भवति मानव इति। वायुश्चाह। अयं परस्त्वयं नेति संरम्भाभिनिवेशिनः। यातुधाना भवन्त्येव पिशाचाश्च न संशय इति।

ये तु वैष्णवंमन्याः शिवादिद्वेषं कुर्वन्ति ते न चेक्षुरसन्यायेन माया बहुरूपा। यथेक्षुरसो बहुरूपो ऽपि बहिर्मलिनो दृश्यते तथा माया ऽप्यन्तर्बहुरूपा ऽपि बहिस्तमोरूपा दृश्यते तस्याश्च यद्विमलतमं रूपं तदेव सत्त्वम्। इक्षुरसस्येव सिता। यथा चेक्षुमाधुर्यं सितायां कृत्स्नमभिव्यज्यते अन्यत्र मलसम्पर्कादल्पमल्पतरं च एवं परैश्वर्यं सत्त्वे ऽतिशुद्धे सर्वमभिव्यज्यते अन्यत्र मलिनदर्पणन्यायेनाल्पमल्पतरं च । किञ्च व्रीहिबीजन्यायेनापि रजस्तमसोः सारः सत्त्वं यथा व्रीहिबीजस्य स्थूलस्तुषः स्पष्टस्तत आन्तरः सूक्ष्मस्तुषः फलीकरणनामा ततो ऽप्याङ्कुरोत्पत्ति रान्तरत्वादेवं तमोरजसोर्गर्भात्सत्त्वादेव चि-

यदाद्युत्पत्तिः अतस्तदवच्छिन्नस्य विष्णोरेव जगद्धेतुत्वादीशत्वमितरयोस्तदभावाज्जीवत्वम् । अतः श्रेयःकामैः सत्त्वावच्छिन्नः परमेश्वरो हरिरेवाराध्यः । अन्यौ तु राजसं तामसं चैव दूरतः परिवर्जयेदिति न्यायात्त्याज्यावित्यादि निन्दां कुर्वन्ति ये च शैवंमन्या विष्णवादिद्वेषं कुर्वन्ति तेन च तमो वाइदमग्रआसीदिति श्रुतौ वैकारेण प्रलये गुणान्तराभावो दर्शितः । एवं च यथा व्रीहिस्तम्बे-प्रथमं तुष एवाविर्भवति ततस्तद्गर्भे प्रकृत्यापूरेण क्षीरं भवति तदपि पुनः प्रकृत्यापूरेण घनतां गतं तण्डुलाख्यः सारो भवति तस्मिंश्च सिद्धे तद्बीजं दृढं सदङ्कुरोत्पादनक्षमं भवति एवं शिवे प्रथमं तम एवासीत्तच्चेश्वरेणावरकत्वस्वाभाव्यादेकदेशे प्रच्यावितं वैषम्यात्प्रवृत्तिस्वभावत्वापत्त्या रजःसंज्ञं भवति एवं रजो ऽपि प्रवृत्तिस्वाभाव्यादेकदेशे प्रच्यावितं वैषम्यात्प्रकाशस्वभावत्वापत्त्या सत्त्वं स्यात् एवं गुणसामस्त्यविवक्षायां त्रिगुणमय एकपुरुषः तत्पृथक्त्वविवक्षायां तु त्रयः । तत्रापि तमउपाधिः शिव ईशः । रजउपाधिर्विधिः सत्त्वोपाधिर्विष्णुः तौ च कार्यगुणोपाधित्वात्कारणोपाधेः शिवस्यानुगौ जीवौ स्तः कार्योपाधिरयं जीवः कारणोपाधिरीश्वर इत्यादिश्रुतेः । तथा च न हि भिक्षुक इत्यादिन्यायः तौ न श्रेयःकामोपासनार्हाविति त्वयोत्थापितो व्रीहिबीजन्यायो वक्ष्यमाणोऽष्ट्रलगुडन्यायेन तवैव मूर्ध्नि पतित इत्यादिनिन्दां कुर्वन्ति तेषां दुर्गतेर्माहात्म्यं तु किं वक्तव्यम् । यथा ऽऽह भगवान्युधिष्ठिरं प्रति भविष्योत्तरे । मम भक्तः शिवद्वेषी मद्द्वेष्टा च शिवप्रियः । तावुभौ नरकं यातो यावच्चन्द्रदिवाकराविति । भारते च शिवं प्रति । यस्त्वां द्वेष्टि स मां द्वेष्टि यस्त्वामनु स मामन्वित्यादि । कौर्मे चर्षीन्प्रति । ध्यानं योग-

स्तपस्तप्तं ज्ञानयज्ञादिको विधिः । तेषां विनश्यति क्षिप्रं ये द्विषन्ति पिनाकिनम् । यो मां समाश्रयेन्नित्यमेकान्तं भावमास्थितः । विनिन्दन्देवमीशानं स याति नरकं ध्रुवम् । तस्माद्धि परिहर्त्तव्या निन्दा पशुपतेर्द्विजाः । कर्मणा मनसा वाचा तद्भक्तेष्वपि यत्नतः । ये तु दक्षाध्वरे शप्ता दधीचेन महर्षयः । भविष्यन्ति कलौ भक्तैः परिहार्याः प्रयत्नतः । द्विषन्तो देवमीशानं युष्माकं वंशसम्भवाः । शप्ताश्च गौतमेनोर्व्यां न सम्भाष्या द्विजोत्तमैरिति । तत्रैव स्थलान्तरे । परात्परतरं यान्ति नारायणपरा जनाः । न ते तत्र गमिष्यन्ति ये द्विषन्ति महेश्वरमिति । हरश्चाह हरिं प्रति कैलासयात्रायाम् । यश्च त्वां द्वेष्टि गोविन्द स मां द्वेष्टि न संशय इत्यादि । कौर्मे चर्षीन्प्रति मूर्खं वा पण्डितं वा ऽपि ब्राह्मणं वा मदाश्रयम् । मोचयामि श्वपाकं वा न नारायणनिन्दकमिति । अतो ऽतिदुर्लभमिन्द्राद्यर्थनीयस्वगणभावं प्राप्तेनापि घण्टाकर्णेन हरिद्वेषिणा मोक्षायाराधितो ऽपि न तस्मै तं ददौ । यथा ऽऽह स हरिं प्रति । अहं पिशाचवेषेण संश्लिष्टः पापकर्मकृत् । सततं दूषयन्विष्णुं घण्टामाबध्य कर्णयोः । मम न प्रविशेन्नाम विष्णोरिति विचिन्तयन् । अहं कैलासनिलयमासाद्य वृषभध्वजम् । आराध्य तं महादेवमस्तुवं सततं शिवम् । ततः प्रसन्नो मामाह वृणीष्वेति वरं हरः । ततो मुक्तिर्मया तत्र प्रार्थिता देवसन्निधौ । मुक्तिं प्रार्थयमानं मां पुनराह त्रिलोचनः । मुक्तिप्रदाता सर्वेषां विष्णुरेव न संशयः । तस्माद्गत्वा च बदरीं तत्राराध्य जनार्दनम् । मुक्तिं प्राप्नुहि गोविन्दान्नरनारायणाश्रम इति । अत्र प्रसन्न इत्यनन्तरमिवेत्यध्याहार्यम् । यतः प्रसन्नतामुद्रादर्शनेन केवलं तं वञ्चितवान्न तु प्रसन्नः ।

यश्च त्वां द्वेष्टीत्यादितदुक्तिविरोधेन हरिद्वेषिणि प्रसादायोगात् । कथमन्यथा तं न मोचयेत् । न तद्भक्तेर्मुक्तिहेतुत्वं तस्य च मोचकत्वं नास्त्येवेति शङ्क्यम् । अथ हैनं ब्रह्मचारिण ऊचुः किञ्जप्येनामृतत्वं ब्रूहीति स होवाच याज्ञवल्क्यः शतरुद्रियेणेति एतानि ह वा अमृतस्य नामधेयानि एतैर्ह वा अमृतो भवति सर्वदा सकृद्वा जपेदनेन ज्ञानमाप्नोति संसारार्णवनाशनम् । शिव एको ध्येयः शिवङ्करः । प्रज्ञा च तस्मात्प्रसृता पुराणी । ध्यात्वा मुनिर्गच्छति भूतयोनिं ये भक्त्या वरदं देवं शिवं रुद्रमुमापतिम् । इह लोके सुखं प्राप्य ते यान्ति परमां गतिम् । सर्वग्रहैर्गृहीतान्वै सर्वपापसमन्वितान् । स मोचयति सुप्रीतः शरण्यः शरणागतानित्याद्यसंख्यश्रुतिस्मृतिवचनाप्रामाण्यापत्तेः । शम्भुशङ्करादिशब्दानां डित्थादिवदनर्थकत्वापत्त्या संसक्तानां नित्यदा यत्करोषि शममित्यादिनिरुक्तिस्मृत्यप्रामाण्यापत्तेश्च । तस्मात्स्वभक्तिजमोक्षफलकज्ञानप्रतिबन्धकहरिद्वेषस्य शिवानुयायिष्वनुपपन्नश्रोत्रियविप्रवधानुमितस्य राक्षसत्वस्य च निवर्त्तनायेयमीशोक्तिः । द्वेषे ऽपगते च तस्य राक्षसत्वापगमज्ञानलाभौ तत्रैवोक्तौ । तेन न तत्कृतेशभक्तिवैयर्थ्यम् । कथमन्यथा ब्रह्मवधादिनिरतस्य हरौ दृढा भक्तिर्ज्ञानलाभश्चातिशीघ्रं स्यात् । जन्मान्तरसहस्रेषु तपोध्यानसमाधिभिः । नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते । श्रवणायापि बहुभिर्यो न लभ्यः । मनुष्याणां सहस्रेषु बहूनां जन्मनामन्तइत्यादिना तयोरतिदुर्लभतोक्तेः । तस्मात्प्रतिबन्धापाये शिवाराधनादेवाच्युतभक्त्यवान्तरव्यापारकात्तस्य क्रमात्सदेहविदेहमुक्तिफलं ज्ञानं जातम् । तज्जन्यत्वे सति तज्जन्यजनकव्यापारत्वात् तन्निष्ठहरिभक्तेश्च तत्त्वात् ।

यत्त्वत्त्वयः स्वर्गवासस्तइत्यादिना कृष्णाज्ञया स्वर्गगमनं तस्य तत्रोक्तं तदपि ये स्वर्गमेव परं मन्यन्ते तदर्थं चातिप्रयासं कुर्वन्ति तैरप्यल्पायासा हरिभक्तिरेव कार्येति ज्ञापनार्थम् । न तु वस्तुत इन्द्राद्यैरप्यर्थनीयेशसामीप्यात्प्रच्याव्य ततो ऽतितुच्छे कारागारसदृशे स्वर्गे भक्तस्य पातनं युक्तम् न हि हरिभक्तिरधोगतये । महेशसामीप्यं त्वपारपुण्यपुञ्जप्रसादिततत्प्रसादलभ्यम् । यथा ऽऽहेशः स्वसामीप्यस्यातिदुर्लभतां सूचयन्दत्ताय भारते । परितुष्टो ऽस्मि ते दत्त स्तवेनानेन सुव्रत । बहुना ऽत्र किमुक्तेन मत्समीपे भविष्यसीति । ननु शताश्वमेधकर्त्तुः शक्रस्यापि क्षणमपि दुर्लभं ते सामीप्यमेकस्यापि क्रतोरसमापयितुर्मे कथं भवितेति शङ्कमानं प्रत्याह । अश्वमेधसहस्रस्य वाजपेयशतस्य च । प्रजापते मत्प्रसादात्फलभागी भविष्यसीति । ननु यः कुरुते स भुङ्क्तइति न्यायेन कर्त्तुरेव फलं भवति अन्यथा ऽतिप्रसङ्गात्तथा चाश्वमेधाद्यकर्त्तुर्मे कथं तत्फलभाक्त्वमित्याशङ्क्याह मत्प्रसादादिति । पुनरावृत्तिफलकैस्तैरपुनरावृत्तिरूपं ते सामीप्यं कथं स्यादिति तच्चिन्तामालक्ष्याह । भूयश्च ते वरं दद्मीत्यादिना त्यज्यतां मानसो ज्वर इत्यन्तेन । न चेमे वराः स्वसामीप्यादन्य एवेशेन दत्ता इति भ्रमितव्यम् । बहुना ऽत्र किमुक्तेनेति प्रागेव वरपर्यवसानोक्तेः । एकयज्ञनाशे शिवसामीप्याश्वमेधसहस्रवाजपेयशतलाभे च सति मानसज्वरासम्भवादन्यवरदानेन तत्प्रगानुज्ञानुपपत्तेश्च मदुक्तप्रकारेण तूभयं युज्यते । शिवधर्मोत्तरे च । ये संप्राप्ताः परं स्थानं ध्यानयोगरता नराः । न तेषां पुनरावृत्तिर्घोरसंसारसागरे । सर्वज्ञाः सर्वगाः शुद्धाः परिपूर्णा महेश्वराः । शिवतुल्यबलोपेताः परं शिवपुरं गताः । इतीशसामीप्यमहिमा

स्मर्यते । नन्विदं माहात्म्यं शिवपुरं गतानां तत्सामीप्यसारूप्यलक्षणां मुक्तिंप्राप्तानामयं तु तदनुचरो न तु तत्पुरवासीति चेच्छृणु तर्हि गीतज्ञो यदि गीतेनेत्यादियाज्ञवल्क्याद्युक्तरीत्या शिवप्रसादहेतुगानविद्याद्यभ्यासेनेशानुचरत्वं प्राप्तानामपि माहात्म्यम् । तेषां पदं हिरण्यगर्भादिपदेभ्योऽपि श्रेष्ठं स्मरन्ति पौराणिकः । भिन्दन्ति शैलानुदधीन्पिबन्ति व्यत्यासयन्ति क्षितिमन्तरिक्षम् । तृणीकृतब्रह्मपुरंदराणां किं दुष्करं शंकरकिङ्कराणामिति । ते हि साक्षाद्दिविषदो ह्यन्तरिक्षसदस्तथा । पृथिवीषद इत्येते विज्ञेयास्त्रिविधा गणा इत्यादिपुराणाद्युपबृंहिता देवव्रतरुद्रोपनिषदादयश्चैषामपरिमितं महिमानं ख्यापयन्ति । द्वितीयं जप्ता गाणपत्यमवाप्नोतीत्यथर्वशिरश्च महाफलप्रायपाठे शिवानुचरत्वं कीर्त्तयद्देवान्तरेभ्योऽस्यातीवोत्कर्षं स्फुटयति । अत एवोक्तं भक्तैः भजेम भवदन्तिकं प्रकृतिमेत्य पैशाचिकीं किमित्यमरसम्पदः प्रमथनाथ नाथामहे । भवद्भवनदेहलीविकटतुण्डदण्डाहतिस्फुटन्मुकुटकोटिभिर्मघवदादिभिर्भूयत इति । बहुगणसहायस्य चास्य गणाधिपत्वमवगम्यते आगतोऽहं महाशैलात्कैलासादिति तदुक्त्या कैलासवासित्वं च तथा च कथं तस्य स्वर्गगमनं हरिकृपालभ्यं स्यात् । ईदृशस्य हरिद्वेषे प्रवृत्तिस्तु जयविजययोः सनकादिशासने प्रवृत्तिरिव ब्रह्मद्वेषिणां दुर्गतिसूचनाय हरीच्छयैव । शैवापसदानामन्येषां विष्णुद्वेषिणां कैमुतिकन्यायेन दुर्गतिसूचनाय हरेच्छयैवेति बोध्यम् । तस्मादुक्ताभिप्रायैवाऽस्य स्वर्गगमनोक्तिः स शिवसमीप एवागत इति तु तत्त्वम् । अतः कृष्णाय वरं दातुमागतेनेशेनागतानां गणमुख्यानां वर्णनप्रसङ्गेऽस्यादावेव वर्णनम् । तस्याग्रे समपद्यन्त भूतसंघाः सहस्रशः । घण्टाकर्णो विरू-

पान्तः कुण्डधारो ऽकृमुद्वह इति। तस्मादुक्ताभिप्रायमेवे-दमाख्यानम्। एवं हरिविधिभक्तस्यापि दक्षस्येशद्वेषिणो दुःखाद्युक्तिरपि भारतादौ शिवद्वेषिणामन्येषां वैष्णवा-पसदादीनामुक्तन्यायेन दुर्गतिसूचिका द्वेषापाये सुगतेश्च सूचिकेति बोध्यम्। किंच तामसत्वात्कृष्णो रुद्रः सात्त्वि-कत्वेन शुक्लस्य हरेर्ध्यानात् कीटभृङ्गन्यायेन शौक्ल्यं गतः एवं श्वेतो हरिः श्यामस्येशस्य ध्यानात्कार्ष्ण्यं गत इति पुराणे प्रसिद्धम्। शिवाय विष्णुरूपाय विष्णवे शिवरू-पिणइति हरिवंशे च स्पष्टीकृतमिदम्। तथा च शुक्लं शिवं द्विष्यन्तो हरिमेव द्विष्यन्तीति कथं ते वैष्णवाः। एवं श्यामं हरिं द्विष्यन्तो हरमेव द्विष्यन्तीति कथं ते शैवा इति ध्येयम्। अथ प्रकृतमनुसरामः। वाल्मीकीयरामा-यणे वने रामगमनं मे ऽनुमतं नास्तीति कौशल्याप्रत्याय-नार्थं भरतो बहून् शपथान्कृत्वा ऽतिघोरमेतं शपथं सत्वा-न्ते चकार। भक्त्या विवदमानेषु मार्गमाश्रित्य पश्यतः। तस्य पापेन लिप्येत यस्यार्यो ऽनुमते गत इति। अत्रादौ हरिहरादेरिति शेषः। मार्गं तत्तन्माहात्म्यबोधकं शास्त्रम्। मार्गमित्युक्त्या तु शास्त्रोक्तं, तत्तदुपासनार्थं तत्तदुत्कर्ष-वर्णनरूपमार्गमेवाश्रित्य न तु तद्वार्दं ज्ञात्वेति ध्वन्यते। विवदमानेषु हरादेरुत्कर्षापकर्षोक्त्या कलहं कुर्वत्सु यत्पा-पम् अथ च पश्यतः शृण्वतो यत्पापं तस्य पापस्य सम्ब-न्धिना तत्तुल्येनेति यावत् न त्वन्यस्य पापेनान्यस्य लेपसम्भवः। तेनेति पाठस्तु सुगमः। अत्रापि पश्यत इत्यु-क्तेर्विवादं श्रुत्वा ऽयमुत्कृष्टो ऽन्ये ऽपकृष्टा इति यो निश्चि-नोति तस्य यत्स्यात्पापमिति भावः। यद्यप्यन्यतमविग्र-हावच्छिन्नेशनिन्दां शृण्वत उदासीनस्यापि पापं भवत्येव कर्णौ पिधाय निरियाद्यदकल्प ईशे धर्मावितर्यसृणिभिर्नृ-

भिरस्यमाने छिन्द्यात्प्रसह्य रुशतीमसतीं प्रभुश्चे ज्जिह्वाम-सूनपि ततो विसृजेत्स धर्म इति भगवत्येशनिन्दाश्रवण-स्यापि निषेधात् तथा ऽपि तस्येदमित्थमेवेति जानतः सकाशादस्ति किञ्चिदश्मलोष्टन्यायात्पापाल्पत्वमित्यभि-प्रायः । तथा स्कान्दे ऽप्युमापरीक्षार्थमागतेन मायावटुना शिवेन शिवनिन्दायां कृतायां तां शृण्वतीः सखीः प्रत्यु-मोक्तिः आर्याणां निन्दनं श्रुत्वा ये न यान्ति त्वरान्विताः स्थानान्तरं ह्यप्रतिष्ठास्ते ऽपि स्युः पापयोनय इति । अपिः कैमुतिकन्यायद्योतकः यदीशनिन्दां श्रुत्वा ये शीघ्रं देशा-न्तरं न यान्ति ते ऽपि न विद्यते प्रतिष्ठोत्तमलोकाप्ति-लक्षणा येषां तादृशाः सन्तः पापयोनयः कृमिमशकादि-जन्मानः स्युर्भवन्ति तर्हि निन्दकास्तादृशा भवन्तीति किमु वक्तव्यम् । यथा ऽऽहोपमन्युर्हरिं प्रति । यश्चाप्य-सूयते देवं कारणात्मानमीश्वरम् । स कृष्ण नरकं याति सह पूर्वैः सहात्मजैरिति । एवं हि दुर्गतिभिया शास्त्रे प्रवृ-त्तानामपि दुर्भगानां विध्यादिष्वेकभक्त्या ऽन्यनिन्दकानां बिल्वखल्वाटन्यायेन पुनर्दुर्गतौ प्रवेश इति कोटिशो वा-क्यानि बोधयन्ति विस्तरभयाद्दिङ्मात्रमेवेह दर्शितम् । यद्यप्येकपक्षपातेनान्यनिन्दकानामप्यस्ति तात्कालिकः कश्चिद्धर्षांशविशेषस्तेषां नास्तिकसुहृदां तथा ऽपि कोशपा-नन्यायान्मिथ्यावादिनां तेषां परिणामे ऽतिदुःसहं दुःख-मित्यास्तिकैस्त्याज्यो ऽयं दुराग्रहः । तेषां च सङ्गो ऽप्य-वश्यमेव त्याज्या दुस्तटिनीति न्यायात्त्याज्यः । अन्यथा चौरापराधान्माण्डव्यनिग्रह इतिन्यायात्तत्सङ्गिनामपि दु-र्गतेरवर्ज्यत्वात् । तत्तद्विग्रहावच्छिन्नेशाभेददर्शिनां त्वन्य-तमविग्रहावच्छिन्नोपासकानां निष्कामानां नितरां निर्म-लस्वान्तानां तत्प्रसादात्तत्तत्त्वसाक्षात्कारेण मोक्षः ।

सकामानामप्यर्चिरादिमार्गेण सत्यलोकं गतानां हिरण्यगर्भेण सह मोक्षः । तदुक्तमीश्वरगीतायाम् । ये त्विमं विष्णुमव्यक्तं मां च देवं महेश्वरम् । एकीभावेन पश्यन्ति न तेषां पुनरुद्भव इति । अत्र हरिहरयोर्ग्रहणं काकदधिघातकन्यायेन विधेरप्युपलक्षणं यथा ऽऽह हरिर्दक्षं प्रति भागवते । अहं ब्रह्मा च शर्वश्च जगतः कारणं परम् । आत्मेश्वर उपद्रष्टा स्वयंदृगविशेषण इत्यादिना त्रयाणामेकभावानां यो न पश्यति वै भिदाम् । सर्वभूतात्मनां ब्रह्मंत्स शान्तिमधिगच्छतीत्यन्तेन । एवं हरिहरद्वेषनिन्दानिन्दकं वचो ऽप्युपलक्षणं बोध्यम् । किं बहुना सर्वदेहावच्छेदस्य सर्वेषु साधितत्वादेकनिन्दाद्वेषयोः सर्वविषयत्वादेकनिन्दकः सर्वनिन्दक एकद्वेष्टा सर्वद्वेष्टा चेति बोध्यम् । ननु ब्रह्मादीनां सर्वेषां किं नाम सर्वेषु चतुर्मुखादिदेहेषु वृत्तित्वम् । न तावद्गणपतिन्यायेन भिन्नभिन्नावयवावच्छेदेनैकैकदेहे भिन्नभिन्नदेशवृत्तित्वं तत् । परिच्छिन्नत्वसावयवत्वादिप्रसङ्गेनानित्यत्वापातात् । अत एव न तिलतण्डुलन्यायेन सर्वदेहेष्वेषां संसृष्टिर्नीरक्षीरन्यायेन सङ्करो वा ऽपि सम्भवति । अतो ऽनुपपन्नो ऽयं पक्ष इति चेन्न वेण्याकाशन्यायेनात्यन्ताभेदस्यैव स्वीकारात् । न हि प्रयागे ऽन्योन्यसंसर्गेणैकप्रवाहीभूते श्वेतश्यामरक्तवर्णे गङ्गायमुनासरस्वतीनीरे प्रतिबिम्बितस्य तदवच्छिन्नस्य वा ऽऽकाशस्य भेदलेशो ऽप्यस्ति । किञ्च यतो वा इमानि भूतानि जायन्ते सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं सो ऽकामयत बहु स्यां प्रजायेयेत्यादिना ऽऽखण्डाद्वितीयं ब्रह्म सृष्टेः प्रागासीत्तस्मादेव मायोपहितादभिन्ननिमित्तोपादानात्सर्वं जगदुत्पन्नं तेनैव च सत्तास्फूर्तिमत् तत्रैव चान्ते लीयते इति बोध्यते । ऐतदात्म्य-

मिदं सर्वमित्यादिना च सर्वात्मत्वं तस्योच्यते । तं त्वौपनिषदं पुरुषं पृच्छामि सर्वे वेदा यत्पदमामनन्तीत्यादिश्रुतिभिरुपक्रमादिलिङ्गैश्च तत्रैव सर्ववेदतात्पर्यमिति ज्ञायते । अत एव तदुपबृंहणभूतपुराणादेरपि तत्रैव पर्यवसानम् । अस्य महतो भूतस्य निश्वसितमेतदृग्वेदो यजुर्वेदः सामवेद इत्यागमेन तस्यैवाखिलागमाविर्भावहेतुतोच्यते अयमर्थो, जन्माद्यस्य यतः शास्त्रयोनित्वात्तत्तु समन्वयादित्यादिसूत्रभाष्यादिषु प्रपञ्चितः । पुरुषान्न परं किंचित्सा काष्ठा स परा गतिरित्यादिश्रुत्या च तस्यैव सर्वोत्कृष्टत्वं मुक्तप्राप्यत्वरूपपरमगतित्वं चोक्तम् । अथ पुरुषो ह वै नारायणो ऽकामयत प्रजाः सृजेयेत्यादिश्रुतौ तु जगद्धेतुत्वं हरेरुच्यते । अथ नित्यो देव एको नारायणो ब्रह्मा च नारायण इत्यादिना च सर्वात्मत्वं तस्यैवाम्नायते । स्वतो ऽसङ्गोदासीनस्य कारणत्वासम्भवान्मायिनस्तद्वाच्यम् । तच्च मायित्वं दैवी ह्येषा गुणमयी मम मायेति हरिवाक्याद्धरेरेव ज्ञायते । तद्विष्णोः परमं पदमिति श्रुत्या यद्गत्वा न निवर्त्तन्ते तद्धाम परमं ममेति स्मृत्या च मुक्तप्राप्यता ऽपि तस्यैव प्रतीयते । अत्र सर्वत्र षष्ठी राहोः शिर इतिवदभेदे बोध्या । एकस्त्वमग्र्यं परमं पदं यदित्यादौ सामानाधिकरण्यदर्शनात् । एतेन तद्विष्णोरिति भेदे षष्ठीं पञ्चमीं च वदन्तो ऽपास्ताः । मत्तः परतरं नान्यत् न त्वत्समो ऽस्तीत्यादिना सर्वोत्तमता ऽपि तस्योच्यते । तथा नारायणपरा वेदा नारायणपरा मखाः । वेदे रामायणे चैव पुराणे भारते तथा । आदावन्ते तथा मध्ये हरिः सर्वत्र गीयते । वेदैरशेषैरहमेव वेद्यो वेदान्तकृदित्यादिना श्रुत्यादितात्पर्यभूमित्वं तत्कारणत्वं च हरेरवगम्यते । ओं देवा ह वै स्वर्गलोकमायन् ते देवा रुद्र-

यस्य स्वीकारे स्वस्मिन् स्वापेक्षारोपो भवति तदापादकक: प्रसङ्ग आत्माश्रयः । अपेक्षा चोत्पत्तिस्थितिज्ञप्तिषु साक्षादपेक्षा । यथैतद्घटो यद्येतद्घटजन्यः स्यादेतद्घटभिन्नः स्यात् । तथायं घटो यद्येतद्घटवृत्तिः स्यादेतद्घटभिन्नः स्यात् । तथैतद्घटज्ञानत्वं यद्येतद्घटज्ञानजन्यतावच्छेदकं स्यात् तदैतद्घटज्ञाननिष्ठभेदप्रतियोगितावच्छेदकं स्यादिति । स्वापेक्ष्यापेक्षितत्वारोपप्रयोजकारोपविषयापादकक: प्रसङ्गोऽन्योन्याश्रयः । अत्रापि साक्षादपेक्षा उत्पत्तिस्थितिज्ञप्तिषु बोध्या । यथायं घटो यद्येतद्घटजन्यजन्यः स्यादेतद्घटभिन्नः स्यादिति । ज्ञप्तौ स्थितौ च स्वयमुदाहार्यम् । स्वापेक्षणायापेक्षितापेक्ष्यत्वारोपप्रयोजकारोपविषयापादकक: प्रसङ्गश्चक्रक: । अत्र त्वपेक्षा साक्षात्परम्परासाधारणी उत्पत्तिस्थितिज्ञप्तिषु बोध्या । यथैतद्घटो यद्येतद्घटजन्यजन्यजन्यः स्यादेतद्घटभिन्नः स्यादित्यादि । अनवस्था चाप्रामाणिकानन्तप्रवाहारोपप्रयोजकारोपविषयापादकक: प्रसङ्गः । घटत्वं यदि घटजन्यताव्याप्यं स्याद् घटान्यवृत्ति स्यादित्यादि । उक्तचतुष्कान्यप्रसङ्गः प्रमाणबाधितार्थः । सोऽपि द्विविधो व्याप्तिग्राहको विषयपरिशोधकश्च । तत्राद्यो यथा धूमो यदि वह्निव्यभिचारी स्याद् वह्निजन्यो न स्यादिति । द्वितीयो यथा पर्वतो यदि निर्वह्निः स्यान्निर्धूमः स्यादित्यादि । प्रथमोपस्थितत्वोत्सर्गविनिगमनाविरहलाघवादिज्ञानं तु न तर्को यथोक्तलक्षणाभावात् किं तु तत्त्वनिर्णायकत्वसादृश्यात् क्वचित् तथा प्रयोगो गौणः ॥ ४० ॥

निर्णयं लक्षयति ।

विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं

निर्णयः[१] ॥ ४१ ॥

अर्थावधारणं निर्णयः कथास्थलीयनिर्णयः। अवधारणत्वं चावधारयामीतिप्रतीतिसाक्षिकविषयिताविशेषशालित्वं तच्च संशयव्यावृत्तं निर्णयविशेषवृत्ति। सा च विषयिता संशयोत्तरं विशेषदर्शनादिप्रयोज्येत्याह। विमृश्येत्यादि। विमृश्य सन्दिह्य पक्षप्रतिपक्षाभ्यां जायमानं यदर्थावधारणं स निर्णय इत्यन्वयः। पक्षोऽनुकूलो न्यायादिप्रयोज्यविशेषदर्शनमिति यावत्। प्रतिपक्षः प्रतिकूलः। विरोधिसाधनस्येति शेषः। तथा च परकीयसाधने दूषणोपन्यासादीति फलितम्। निर्णयसामान्यलक्षणं च तदभावाप्रकारकत्वे सति तत्प्रकारकज्ञानत्वमिति प्राञ्चः। नव्यास्तु संशयत्वघटकविषयताभिन्नप्रकारतानिरूपकज्ञानत्वम्। संशयत्वघटकत्वं च कस्यचिन्मते प्रकारताद्वयनिरूपितविशेष्यतानिरूपितत्वं कस्यचिन्मते प्रकारित्वावच्छिन्नप्रकारितानिरूपितत्वादिकमित्याहुः। नव्यास्तु अवधारणत्वाख्यविषयित्वान्तरे मानाभावः। अवधारणपदनिर्णयपदयोः पर्यायता। तथा चात्रार्थपदं तत्तदर्थपरमवधारणपदं चाभावाप्रकारकज्ञानपरं तत्तदर्थाभावाप्रकारकज्ञानमिति समुदितार्थः। अथवा अर्थपदमर्थप्रकारताकपरं तत्पुरुषे पूर्वपदस्य सम्बन्धिलाक्षणिकत्वात् अवधारणपदं च प्रकारताद्वयानिरूपितविशेष्यताशालिज्ञानपरं तेन न समुच्चयासङ्ग्रहः। प्रकारताद्वयानिरूपितविशेष्यतानिरूपित-

(१) एतस्मिंस्तर्कविषये विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णय इति सूत्रमिति वार्त्तिकम्। भाष्यकारो निर्णयलक्षणमवतारयति। एतस्मिंस्तर्कविषय इति तात्पर्यटीका। एवं च वार्त्तिके एतस्मिंस्तर्कविषय इति भाष्यलेखधारणमवशिष्टं सूत्रमित्यवगम्यते।

प्रकारताशालिज्ञानमवधारणपदार्थः तादात्म्येन चरमप्रकारतायामर्थपदार्थस्यार्थनिष्ठस्यान्वय इति वा । वस्तुतो निरुक्तप्रकारताशालिज्ञानमेवावधारणपदार्थः । अर्थपदं तादृशार्थतात्पर्यग्राहकम् । विमृष्येत्यादिकं तु जल्पवितण्डास्थलाभिप्रायेणेति । तदुक्तं भाष्ये । वादे विमर्षवर्जमिति । प्रत्यक्षतः शब्दाच्च निर्णये न विमर्षपक्षप्रतिपक्षाद्यपेक्षेति । इदमुपलक्षणम् । स्वार्थानुमानस्थले ऽपि न विमर्षाद्यपेक्षेति ॥ ४१ ॥

समाप्तं न्यायोत्तराङ्गप्रकरणम् ॥

उत्तराङ्गपदं प्रयोज्यसहकार्यन्यतरपरं तेन तर्कनिर्णययोः सङ्ग्रहः ॥

इति न्यायसूत्रे प्रथमाध्यायस्याद्यमाह्निकम् ॥

प्रकरणसमूह आह्निकम् । तत्समूहश्चाध्यायः । समूहत्वं चानेकत्वम् ॥

इति श्रीराधामोहनगोस्वामिभट्टाचार्यविरचितन्यायसूत्रविवरणे प्रथमाध्यायस्याद्याह्निकविवरणम् ॥

प्रथमाह्निकेन सप्रमेयप्रमाणनिरूपणानन्तरं सन्दिग्धार्थनिर्णयं सप्रयोजकं लक्षयित्वा द्वितीयाह्निकेन कथादिप्रकरणचतुष्टयात्मकेन वादादि लक्षयितुं निर्णयानुकूलतया प्रथमतो वादं लक्षयति ।

प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः(१) ॥ १ ॥

यद्यपि निर्णयानुकूलतया पूर्वाह्निक एवायं वक्तुमुचितस्तथापि कथान्तर्गततयाऽत्रास्य लक्षणम् । पक्षस्य प्रतिपक्षस्य परिग्रहो विरोधिकोट्युपन्यासो निर्णयानुकूलवचने यत्र वादिप्रतिवादिवाक्यजाते स वाद इत्यन्वयः । तथा च तत्त्वनिर्णयोद्देश्यकं विरोधिकोटिद्वयसाधनतयोपन्यस्तोक्तिप्रत्युक्तिरूपवाक्यजातमिति फलितम् । अथवा पक्षाय तत्त्वनिर्णयाय प्रतिपक्षयोः मिथो विरुद्धकोट्योः परिग्रहः साधनयोग्योक्तिप्रत्युक्तिरूपवाक्यजातं वादः । परिगृह्यते निर्णीयते ऽनेनेतिव्युत्पत्तेः । तत्त्वनिर्णयोद्देश्यकत्वनिवेशेन जल्पवारणम् । अप्रमाणेन तत्त्वनिर्णयदूषणाभिधानवारणाय विशेषणमाह । प्रमाणतर्कसाधनोपालम्भ इति । प्रमाणतर्काभ्यां साधनोपालम्भौ यत्र स इत्यर्थः । तत्र साधनं तत्त्वनिर्णयानुकूलव्यापारः । उपालम्भो विपरीतकोटिसाधने दूषणोपन्यासः । साधनदूषणाभिधानं सिद्धान्तानुसारेणेत्याह । सिद्धान्ताविरुद्ध इति । साधनं पञ्चावयवप्रयोगेनैवेत्याह । पञ्चावयवोपपन्न इति । एतेन प्रमाणाभासतर्काभासापसिद्धान्तन्यूनाधिकावयवाभास-

(१) तत्र प्रमाणतर्कसाधनोपालम्भ इति सूत्रमिति वार्त्तिकम् ।

दृष्टान्तासिद्ध्यादेरुद्भावनं नियम्यते । भाष्यकारानुसारिणस्तु वादस्य वीतरागकथात्वेन तत्त्वनिर्णयस्योद्देश्यतया पुरुषदोषस्याविज्ञातार्थादेरिव न्यूनाधिकयोरपि नोद्भावनं तेन पञ्चावयवोपपन्न इति प्रायिकत्वाभिप्रायेणेत्याहुः । केचित्तु सिद्धान्तेत्यादिविशेषणद्वयेन तावन्मात्रनिग्रहस्थानयोग्यत्वं तावदतिरिक्तनिग्रहस्थानोपन्यासायोग्यत्वं वा लक्षणघटकतया विवक्षितं निग्रहस्थानं प्रतिज्ञाहान्यादीनामेकैकं धृत्वा तदुपन्यासायोग्यत्वमिति निष्कर्षः । तेनोक्तजल्पविशेषवारणमित्याहुः । अन्ये तु वाद इति लक्ष्यनिर्देशः । पक्षप्रतिपक्षौ विप्रतिपत्तिकोटी तयोः परिग्रहस्तत्साधनोद्देश्यकोक्तिप्रत्युक्तिरूपवचनसन्दर्भः । यद्वा पक्षप्रतिपक्षौ विप्रतिपत्तिविषयकोटिद्वयसाधने तयोरुपग्रहस्तद्बोधकोक्तिप्रत्युक्तिरूपशब्दचयः । तावन्मात्रं च कथान्तरातिव्याप्तमित्यत आह । प्रमाणेत्यादि । प्रमाणतर्काभ्यां तत्त्वेन ज्ञाताभ्यां साधनोपलम्भौ यत्र स तथा । तथा चोभयत्रापि प्रमाणसद्भावे कोटिद्वयस्यापि सिद्धिः स्यादतस्तत्त्वेन ज्ञाताभ्यामिति । ज्ञानमनाहार्यं विवक्षितम् । उपालम्भो दूषणम् । जल्पादौ तु प्रमाणाभासत्वेन ज्ञाताभ्यामपि साधनोपालम्भौ भवत इति तद्वारणं तथेतरथा तद्धेतोरेव दुष्टत्वम् । इत्थं च प्रमाणाभासत्वप्रकारकतर्काभासत्वप्रकारकज्ञानविषयकरणकसाधनोपालम्भयोग्यान्यत्वे सतीत्यर्थस्तेन तादृशजल्पविशेषे नातिव्याप्तिः । तत्र च निग्रहस्थानविशेषनियमार्थं सिद्धान्तेत्यादि विशेषणद्वयमित्याहुः । वादाधिकारिणस्तु तत्त्वबुभुत्सवः प्रकृतोक्तिका अविप्रलम्भका यथाकालस्फुर्तिका अनाक्षेपका युक्तिसिद्धप्रत्येतारः । भाष्ये । अनुविधेयस्थेयःसभ्यपुरुषवती जनता

सभा। तत्रानुविधेयो राजा स्थेयान् मध्यस्थः। सा च वादे नावश्यकी वीतरागकथात्वादिति ॥ १ ॥

जल्पं लक्षयति।

यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनो[1]पालम्भो जल्पः[2] ॥ २ ॥

यथोक्तेन वादलक्षणेनोपपन्नो विशिष्टो यश्छलजातिनिग्रहस्थानैः साधनस्य परकीयसाधनस्योपालम्भो दूषणं यत्र तद्वाक्यजातं जल्प इत्यर्थः। छलेत्यादिना विजिगीषुत्वमात्रं तात्पर्यविषयीकृतं विजिगीषुणैव च्छलादिकरणात्। न तु च्छलादिभिरुपालम्भस्य लक्षणघटकत्वमिति। साधनोपालम्भः साधनाय स्वसाध्यसाधनायोपालम्भो परकीयसाधनदूषणं यत्रेति। तथा च च्छलादिभिः परकीयसाधनदूषणाभिधाने ऽर्थतः स्वसाध्यसिद्धिर्भवतीति केचित्। अत्र जयोद्देश्यकत्वलाभात् तत्त्वनिर्णयोद्देश्यकत्वं विहाय वादलक्षणमत्र विशेषणम्। तदपि वादेयमविरुद्धत्वात्। न चास्य वादविशेषत्वापत्तिः वादे जयेच्छाराहित्यस्य विशेषणात्। न च वितण्डायामतिव्याप्तिः वितण्डायां प्रतिपक्षस्थापनाहीनत्वस्य विशेषणस्य निर्देशादत्रोभयपक्षस्थापनावत्त्वलाभात्। इत्थं चोभयपक्षस्थापनावान् प्रमाणतर्कसाधनोपालम्भो जयोद्देश्यकपक्षप्रतिपक्षपरि-

(१) निग्रहस्थानेन साधनेति पाठ आदर्शपुस्तके। परं तु स्थानसाधनेत्यन्यत्र पाठदर्शनात् निग्रहस्थानैः साधनस्येतिव्याख्यानदर्शनाच्च स्थानसाधनेति पाठ एवोपनिबद्धः।

(२) उद्देशक्रमानुरोधेन वादलक्षणानन्तरं जल्पं लक्षयति। यथो–ल्पः। अत्रापि समानजातीयाभ्यां वादवितण्डाभ्यामसमानजातीयेभ्यः प्रमाणादिभ्यो व्यवच्छेदः सूत्रार्थ इति तात्पर्यटीका। वादद्वारा फलसम्बन्धेन जघन्यतया वादानन्तरमुभयपक्षस्थापनावत्त्वेन वितण्डात उत्कर्षात् ततः प्राग् जल्पलक्षणाय सूत्रम्। यथोक्तोपपन्नश्छलेत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः।

ग्रहो जल्प इति । केचित्तु यथोक्तेषु यदुपपन्नं तेनोपपन्न इत्यर्थः । मध्यपदलोपी समासः । तथा च प्रमाणतर्कसाधनोपालम्भः पक्षप्रतिपक्षपरिग्रह इत्यस्य योग्यतया परामर्शः । अन्यथा जल्पस्य वादविशेषत्वापत्तेः । प्रमाणतर्काभ्यां तद्रूपेण ज्ञाताभ्यां न तु ज्ञाने ऽनाहार्यत्वं विवक्षितमारोपितप्रमाणभावे ऽपि जल्पनिर्वाहात् । उभयपक्षस्थापनावत्वेन विशेषणान्न वितण्डायामतिव्याप्तिः । स्थापनावत्त्वादेव च पञ्चावयवनियमोऽपि लभ्यत इति वदन्ति । अत्र च्छलादिभिः सर्वैरुपालम्भो न विशेषणमपि तु लक्ष्योग्यतैव । योग्यतावच्छेदकं वादभिन्नकथात्वमेव । तत्र चोक्तवादत्वावच्छिन्नभेदस्तत्तद्वादभेदो वा विशेषणमिति ॥ २ ॥

वितण्डां लक्षयति ।

स प्रतिपक्षस्थापनाहीनो वितण्डा[1] ॥ ३ ॥

स जल्पः प्रतिपक्षस्थापनाहीनो वितण्डेत्यर्थः । स्थापनाहीनत्वविशेषणात् तच्छब्देनोभयपक्षस्थापनावत्त्वविशेषणं विहाय जल्पपरिग्रहः । प्रतिपक्षो द्वितीयपक्षस्तथा च प्रतिपक्षस्थापनाहीनविजिगीषुकथा वितण्डेति । न च स्वस्य स्थापनीयाभावात् कथमस्यां कथायां प्रवृत्तिरिति वाच्यम् । परपक्षखण्डनेनैव जयस्यैवोद्देश्यत्वात् । परे तु परपक्षखण्डनेनैव स्वपक्षसिद्धेरर्थादेव प्राप्तेस्तत्साधनाभावे ऽपि न प्रवृत्त्यनुपपत्तिरित्याहुः ॥ ३ ॥

वादादित्रयं कथात्वेनोपसंहरति ।

---

(१) तदेवं पक्षोऽस्यास्तीति साधनं तु नास्तीति सम्यक् सूत्रितं स प्रतिपक्षस्थापनाहीनो वितण्डेतीत्येतत्सूत्रव्याख्याने जयन्तभट्टः । जल्पोपजीवकत्वात् तदनन्तरं वितण्डालक्षणाय सूत्रम् । स प्रतिपक्षस्थापनाहीन इत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

समाप्तं कथाप्रकरणम् ॥

यद्यपि कथासामान्यं लक्षयित्वैव तद्विभागो युक्तस्तथापि विशेषलक्षणेषु कृतेषु सामान्यलक्षणं स्फुटं भविष्यतीति विशेषलक्षणान्येव कृतानि। कथासामान्यलक्षणं च तत्त्वनिर्णयविजयान्यतरस्वरूपयोग्यविप्रतिपत्तिविषयकोटिद्वयसाधनन्यायादिवचनत्वम्। लौकिकविवादवारणाय विप्रतिपत्तीत्यादि। कथाधिकारिणस्तु तत्त्वनिर्णयविजयाभिलाषिणः सर्वजनसिद्धानुभवानपलापिनः श्रवणादिपटवोऽकलहकारिणः कथौपयिकव्यापारसमर्था इति। तत्र क्रमः। वादिप्रतिवादिवाक्यात्मकविप्रतिपत्त्या मध्यस्थसंशयानन्तरं कः साध्यवानिति तेन पृष्टेन वादिना पक्षे साध्यनिर्देशः क्रियते ततो मध्यस्थस्य कुत इतिजिज्ञासायां वादिना स्वसाध्यसाधनं प्रयुज्य नायं हेत्वाभासस्तल्लक्षणायोगादितिसामान्यतो नायमसिद्ध इत्यादिविशेषतश्चोक्ते प्रतिवादिना स्वाज्ञानादिनिरासाय परोक्तमनूद्य तदनुवादं विनैव वा सम्भावनादेरलाभे उच्यमानग्राह्याणामप्राप्तकालार्थान्तरनिरर्थकापार्थकानामलाभे उक्तग्राह्याणां प्रतिज्ञान्तरप्रतिज्ञासंन्यासहेत्वन्तराप्रतिज्ञातार्थविक्षेपमतानुज्ञान्यूनाधिकपुनरुक्तनिरनुयोज्यानुयोगापसिद्धान्तानामलाभे पर्यनुयोज्योपेक्षणस्य मध्यस्थोद्भाव्यतया अनुपन्यासार्हत्वेन यथासम्भवं हेत्वाभासेन परोक्तं दूषयित्वा स्वपक्ष उपन्यसनीयः। ततो वादिना तृतीयपक्षाश्रितेन स्वपक्षदूषणमुद्धृत्य पूर्वनिर्दिष्टरीत्या यथासम्भवं प्रतिवादिनः स्थापनायां दूषणमभिधीयते ऽन्यथा क्रमविपर्यासे ऽप्राप्तकालमनवसरे दूषणोद्भावने च निरनुयोज्यानुयोगो यथा त्वदयसि चेत् प्रतिज्ञाहानिर्विशेषयसि चेद्धेत्वन्तरमित्यादि। प्रतिज्ञाहान्यादिवद्धेत्वाभासानामु-

क्षग्राह्यत्वाविशेषेऽप्यर्थदोषत्वेनाप्रधानत्वाच्चरममनुसन्धानमेवं यथायथं प्रधानस्य प्रथममुपन्यास इति । वादस्थले त्वर्थदोषाणामेव प्राधान्यं बोध्यम् ॥

विभागमुखेन हेत्वाभासान् लक्षयति ।

सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकाला हेत्वाभासाः(१) ॥ ४ ॥

अत्र बहुवचनेन सामान्यतो विशेषतश्चोद्भाव्यत्वमुक्तम् । लक्षणं तु सव्यभिचारादिनिर्देशेन सव्यभिचाराद्यन्यतमत्वमिति प्राञ्चः । तन्न । तादृशस्य हेत्वाभासत्वे ह्रदे वह्नेः साधने धूमो दुष्ट इत्यादिप्रयोगानुपपत्तेर्दुषधात्वर्थस्य तादृशान्यतमत्वस्य साधन इत्यनेनान्वयायोगात् । यत्तु हेत्वाभासपदस्य हेतुवदाभासन्त इतिव्युत्पत्त्या हेतुवदाभासमानत्वमेव लक्षणं स्फुटम् । तच्च हेतुभिन्नत्वे सति हेतुत्वेन ज्ञायमानत्वम् । हेतुत्वं च गमकत्वं पक्षसत्त्वसपक्षसत्त्वविपक्षासत्त्वाबाधितत्वासत्प्रतिपक्षितत्वरूपपञ्चोपपन्नत्वमिति यावत् । तत्र तादृशरूपपञ्चाभाववत्त्वमेव लक्षणं तस्यैव दूषकतायामुपयोगात् । न चासाधकतायां प्रत्येकाभावस्यैव गमकत्वसम्भवे समुदायाभावस्य व्यर्थत्वमिति वाच्यम् । प्रत्येकाभावस्य समुदायाभावाघटकत्वादिति । तन्न । पृथिवीतरेभ्यो भिद्यत इत्यादौ सपक्षाप्रसिद्धेः । न च सपक्षसत्त्वमित्यत्र सपक्षत्वं न निश्चितसाध्यवत्त्वं किं तु साध्यवत्त्वमात्रमिति पृथिवीतरेभ्यो भि-

(१) हेत्वाभासेषु लक्षयितव्येषु अर्थाक्षिप्तसामान्यलक्षणमेषां विभागोद्देशपरं सूत्रम् । सव्य-साः । इति तात्पर्यटीका । कः पुनरस्य सूत्रस्यार्थः विभागोद्देशो नियमार्थ इत्येतत्सूत्रव्याख्याने वार्त्तिकम् । तत्राक्षिप्तसामान्यलक्षणविभागोद्देशसूत्रम् । सव्यभिचारेत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

द्यत इत्यादौ न तदप्रसिद्धिरिति वाच्यम् । प्रमेयमाका-
शादित्यादौ विपक्षाद्यप्रसिद्धेः । एवं पर्वते वह्नेः साधने
धूमो न हेत्वाभास इत्यादिप्रयोगानुपपत्तेः साध्याभावव-
त्पक्षकत्वरूपबाधितत्वाद्यप्रसिद्धेः । अत एव हेतौ पक्षवृ-
त्तित्वग्रहविरोधितावच्छेदकं यद्रूपं यच्च हेतौ साध्यसामा-
नाधिकरण्यग्रहविरोधितावच्छेदकं यच्च हेतौ विपक्षावृत्ति-
त्वग्रहविरोधितावच्छेदकं रूपं यच्च पक्षे साध्यवत्त्वग्रहवि-
रोधितावच्छेदकं तावदन्यतमरूपवत्त्वमेव हेत्वाभासत्वं
प्रत्येकरूपस्यासाधकतागमकत्वसम्भवे ऽपि अधिकसङ्ग्रा-
हकतया न वैयर्थ्यमिति । ग्रहश्च निरूप्यनिरूपकभावापन्न-
भ्रमप्रमासाधारणविषयिताकज्ञानरूपस्तेन क्वचिद्विपक्षा-
द्यप्रसिद्धावपि न क्षतिरिति प्रत्युक्तम् । व्यापकताग्रहवि-
घटकतया दोषस्य हेतुमन्निष्ठाभावप्रतियोगितावच्छेदक-
त्वस्य साध्यतावच्छेदकनिष्ठस्यासङ्ग्रहापत्तेः । न च मणि-
मन्त्रादिन्यायेन तस्य विपक्षावृत्तित्वग्रहविरोधितया सङ्ग्र-
हः साध्याभाववदवृत्तित्वविशिष्टसाध्यसामानाधिकर-
ण्यस्यैव वा व्याप्तित्वमिति वाच्यम् । तथापि व्यतिरेकव्या-
प्तिविघटकस्य हेतुनिष्ठाभावाप्रतियोगित्वादेरसङ्ग्रहात् । न
च व्यतिरेकव्याप्तिरनुमितौ न प्रयोजिकेति तद्विघटकस्या-
लक्ष्यतया न दोष इति वाच्यम् । तथापि ह्रदे वह्नेः
साधने धूमो दुष्ट इत्यादिवाक्यस्यानन्वयापत्तेः । केचित्तु
पक्षसत्त्वविपक्षासत्त्वसपक्षसत्त्वव्यतिरेकेण व्याप्तिविशि-
ष्टपक्षधर्मताविरोधित्वम् । अबाधितत्वासत्प्रतिपक्षितत्व-
व्यतिरेकेण चानुमितिविरोधित्वम् । तेनानुमितितत्कारण-
ज्ञानान्यतरविरोधित्वं पर्यवस्यति । अथवा सव्यभिचारा-
दिपञ्चविधत्वप्रदर्शनेन तादृशान्यतरविरोधित्वमभिप्रेतं
सूत्रकृतः । हेत्वाभासपदं च हेतुवदाभासन्त इतिव्युत्प-

स्या दुष्टहेतुपरं व्यभिचारेण सह वर्तमानः सव्यभिचार इति तत्प्रदर्शनेन व्यभिचारादिदोषस्तद्वत्त्वं दुष्टत्वमिति न तु दुष्टपदं पारिभाषिकमिति सूचितम् । प्रकृतपक्षकप्रकृतसाध्यकानुमितित्वव्यापकप्रतिबध्यताप्रकृतसाध्यव्याप्यप्रकृतहेतुप्रकारकप्रकृतपक्षविशेष्यकग्रहत्वव्यापकप्रतिबध्यतान्यतरनिरूपितप्रतिबन्धकतानतिरिक्तवृत्तिविषयिताकविशिष्टवत्त्वं हेत्वाभासत्वमिति निष्कर्षः । तेन समूहालम्बनानुमित्यादिनिष्ठप्रतिबध्यतामादाय नातिप्रसङ्गः । न वा भ्रमादिविषयतामादायातिप्रसङ्गो भ्रमविषयविशिष्टस्याप्रसिद्धेः । प्रत्येकविषयतायाश्च प्रतिबन्धकतातिरिक्तवृत्तित्वादित्याहुः । अन्ये तु प्रकृतानुमितिविरोधिरूपवत्त्वमेव सामान्यलक्षणमभिप्रेतम् । अनुमितिश्च साध्यव्याप्यहेतुमान् पक्षः साध्यवानित्याकारिकैव जायत इति न कोऽपि दोष इति प्राहुः । अत्रेदमवधेयम् । ह्रदादौ वह्नेः साधने धूमो दुष्ट इत्यादौ तादृशसमभिव्याहारविशेषवशाद्ध्रदपक्षकवह्निसाध्यकधूमहेतुकानुमितिप्रतिबन्धकतानतिरिक्तवृत्तिविषयिताकविशिष्टो दुषधात्वर्थः । साधन इत्यन्तं तादृशानुमितिविशेषघटितनिरुक्तार्थतात्पर्यग्राहकम् । न त्वनुमितिप्रतिबन्धकतानतिरिक्तवृत्तिविषयिताकविशिष्टपदार्थ एव दुषधात्वर्थः । तदेकदेशे ऽनुमितौ ह्रदविशेष्यतानिरूपितवह्निविधेयतानिरूपकत्वस्य साधन इत्यन्तार्थस्यान्वय इति तथात्वे ऽनुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकत्वस्यानुमितिप्रतिबन्धकताशब्दार्थस्याप्रसिद्धेः । वस्तुतस्तु अनुमितित्वव्यापकताघटकपदार्थस्तोमप्रतिबध्यतादौ दुषधातोः खण्डशक्त्यैव प्रसिद्धिरुपपादनीया । तथाहि ह्रदपदं वह्निव्याप्यधुमत्वावच्छिन्नप्रकारतानिरूपितह्रदत्वनिष्ठविशेष्यतावच्छेदकतापरं तस्याश्च

निरूपकत्वसम्बन्धेन सप्तम्यर्थे ऽन्वयः। तत्र समभिव्याहारविशेषस्य नियामकत्वम्। सप्तम्यर्थौ विशेष्यता साधनपदार्थविधेयतान्वयिनी। साधनपदोत्तरसप्तम्या निरूपकत्वमर्थः। तथा च वह्निव्याप्यधूमवद्भ्रदत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नविधेयतानिरूपकत्वं साधन इत्यन्तार्थः तस्य चानुमितौ तस्या वृत्तौ तस्या भेदे तस्य च प्रतियोगितायां तस्या अवच्छेदकत्वे तस्याभावे तस्य प्रतिबध्यतायां तस्या निरूपितत्वसम्बन्धेन प्रतिबन्धकतायां तस्या अवच्छेदकत्वसम्बन्धेन विषयितायां तस्याः पुनरभावे तस्याधिकरणे तस्य पुनर्वृत्तौ तस्याः पुनरभावे तस्य मुख्यविशेष्यितायां तस्या निरूपकतायां तस्याश्च पुनरवच्छेदकतायां तस्याः पर्याप्तिसम्बन्धेन धर्मावच्छिन्नैकदेशे धर्मे धर्मावच्छिन्नस्य च निष्ठाप्रत्ययार्थसम्बन्ध्येकदेशे सम्बन्धे सम्बन्धिनश्चाभेदेन सम्बन्धेन धूमे ऽन्वयः। व्युत्पत्तिवैचित्र्यादेकपदोपात्तानां पदार्थानां परस्परान्वयात्। इत्थं च निरुक्तानुमितिनिष्ठभेदप्रतियोगितानवच्छेदकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयिताशून्यावृत्तिमुख्यविशेष्यितानिरूपकतावच्छेदकतापर्याप्तिमद्धर्मावच्छिन्नसम्बन्धी धूम इति पर्यवसितो बोधः। तादृशधर्मश्च साध्याभाववद्वृत्तिसाधनत्वादिकं संशयाहार्याप्रामाण्यज्ञानास्कन्दितनिश्चयसंस्कारादीनां दोषविषयकाणां प्रतिबन्धकतावच्छेदकविषयितावत्त्वान्न दोषविशेष्यितायां तादृशप्रतिबन्धकतानतिरिक्तवृत्तित्वहानिः। विषयितामपहाय मुख्यविशेष्यितानिवेशान्न व्यभिचारादिघटकसाध्यादावतिव्याप्तिः। सद्धेतौ च निरुक्तपर्याप्तिमद्धर्माप्रसिद्ध्या नातिव्याप्तिः। पर्वते वह्नेः साधने धूमो न दुष्ट इत्यादौ च धर्मत्वावच्छेदेन पर्याप्तिसम्बन्धेन निरुक्त-

निरूपकतावच्छेदकताया अभावो नञा बोध्यत इति दिक् ॥ ४ ॥

कारणीभूतपरामर्शविघटकतया सव्यभिचारं लक्षयति ।

अनैकान्तः[1] सव्यभिचारः[2] ॥ ५ ॥

एकस्य साध्यस्य साध्याभावस्य वाऽन्ते ऽधिकरणमात्रे यस्तिष्ठति स ऐकान्तः तदन्योऽनैकान्तः । तथा च साध्यवन्मात्रवृत्त्यन्यत्वे सति साध्याभाववन्मात्रवृत्त्यन्य इति पर्यवसितम् । सव्यभिचारोऽपि त्रिविधः साधारणासाधारणानुपसंहारिभेदात् साध्यसाध्याभाववद्वृत्तिः साधारणः साध्यसाध्याभाववद्व्यावृत्तोऽसाधारणः । एतदन्यः केवलान्वयिधर्मावच्छिन्नपक्षकोऽनुपसंहारीति प्राञ्चः । तन्न । निरुक्तस्य सव्यभिचारलक्षणत्वे पारिभाषिकत्वापत्तेः । एवं साधारणलक्षणे सध्यवद्वृत्तित्वस्यासाधारणलक्षणे साध्याभाववद्व्यावृत्तत्वस्यानुपसंहारिलक्षणे केवलान्वयिधर्मावच्छिन्नपक्षकत्वस्य च दूषकतायामनुपयोगित्वेन व्यर्थत्वात् । एतेनैकान्तः साध्यस्य साध्याभावस्य वा व्याप्यो नञा तद्विरोधी बोध्यते । तथा च साध्यव्याप्तिग्रहविरोधित्वे सति साध्याभावव्याप्तिग्रहविरोधि यद्रूपं स व्यभिचारः तद्वान् सव्यभिचारः साध्यवद्वृत्तित्वस्य साध्याभावाभाववद्वृत्तित्वरूपतया साध्याभावव्याप्तिग्रहविरोधितया साधारणे लक्षणसमन्वय इति प्रत्युक्तम् । नव्यास्तु ऐकान्तः साध्यव्याप्योऽनैकान्तस्तद्विरोधी व्या-

(१) अनैकान्तिक इति पाठोऽन्यत्र दृश्यते ।

(२) उद्देशक्रमसङ्गत्या सव्यभिचारलक्षणाय सूत्रम् । अनैकान्तिकः सव्यभिचार इति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

प्तिश्चान्वयतो व्यतिरेकतश्च ग्राह्या तेन हेतौ हेतुव्यापकसाध्यसामानाधिकरण्यात्मकान्वयव्याप्त्यवगाही यः साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्त्यवगाही बोधस्तत्प्रतिबन्धकतानतिरिक्तवृत्तिर्यादृशविशिष्टविषयिता तादृशविशिष्टो व्यभिचारः। तादात्म्यादियथाकथञ्चित्सम्बन्धेन तद्वान् सव्यभिचारः। तादृशविशिष्टं च साध्याभाववद्वृत्तिसाधनादि। तत्र साध्याभाववद्वृत्तिसाधनादि साधारण्यं तादात्म्यादिना तद्वान् साधारणः। विरुद्धोऽप्यनेन रूपेण लक्ष्य एव। एवं साध्यवदवृत्तिसाधनादिकमसाधारण्यम्। अभावाप्रतियोगिसाधनादिकमनुपसंहारित्वम्। एतज्ज्ञानं च व्यतिरेकव्याप्तिग्रहविरोधीत्याहुः॥ ५॥

विरुद्धं लक्षयति।

सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः[१]॥ ६॥

वादिना न्यायादिबोधितसिद्धान्तं तत्प्रतिज्ञातसाध्यरूपमभ्युपेत्यानूद्य तद्दूषणाय प्रयुक्तस्तद्विरोधी साध्याभावव्याप्यप्रकृतहेतुर्विरुद्ध इत्यर्थः। प्रयुक्त इत्यनेन पक्षवृत्तित्वे सतीति लभ्यते अन्यथा दूषणानुपपत्तेः। अथवा प्रतिज्ञायां सिद्धस्य पक्षस्यान्ते साध्यमभिधीयते तथा च साध्यमभ्युपेत्योद्दिश्य तत्साधनाय प्रयुक्तो यो वस्तुगत्या साध्याभावव्याप्यो हेतुः स विरुद्धः। यथा वह्निमान् ह्रदत्वादित्यादि। तथा चात्रापि कल्पे पक्षवृत्तित्वे सति साध्याभावव्याप्यः प्रकृतहेत्वादिरेव विरोधस्तादात्म्यादि-

(१) सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्ध इति०। कोऽस्य सूत्रस्यार्थ इति वार्त्तिकम्। उद्देशक्रमसङ्गत्या विरुद्धलक्षणाय सूत्रम्। सिद्धान्तमभ्युपेत्येत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः।

यथाकथञ्चित्सम्बन्धेन तद्वान् हेतुर्विरुद्धः । एतज्ज्ञानं च व्यावर्तकधर्मदर्शनविधया साध्यवत्तांशे विरोधि । न च सत्प्रतिपक्षाविशेषः तत्र द्वौ हेतू अत्र त्वेक एव साध्याभावव्याप्तः साध्यसाधकतयोपन्यस्त इत्यशक्तिविशेषोन्नायकत्वेन विशेषात् । वस्तुतस्तु साध्याभावव्याप्यः प्रकृतहेतुरेव विरोधो न तु पक्षवृत्तित्वघटितो हेतौ साध्याभावव्याप्तिग्रहसत्त्वे हेतुमद्धर्मिकसाध्यानुमित्यनुदयात् । अनुमितौ हेतुभानानियममते ऽपि साध्याभावव्याप्यो हेतुर्हेतुमानितिज्ञानद्वयस्यापि विरोधितया परामर्शे पक्षे हेतुमत्त्वभानात् हेतौ साध्याभावव्याप्तिग्रहे नियमतस्तद्धेतुकानुमितिप्रतिरोधाच्च । तत्र च व्याप्तेरन्वयव्यतिरेकभेदेन द्वैविध्याद् विशेष्यविशेषणभावाच्च नानाविधो विरोधः । तथा च साध्यव्यापकीभूताभावप्रतियोगी प्रकृतहेतुः हेतुनिष्ठतादृशप्रतियोगित्वं हेतुव्यापकः साध्याभावः साध्याभाववृत्ति हेतुव्यापकत्वमित्यादि । अन्वयव्याप्तिघटकसामानाधिकरण्यभागस्य दूषकतायामनुपयोगित्वेन परित्यक्त इति । लक्षणं तु हेतुमद्धर्मिकसाध्यवत्त्वग्रहविरोधिरूपवत्त्वम् । न च हेतुमत्त्वावच्छेदेन साध्याभावस्यापि तादृशग्रहविरोधितया तत्रातिव्याप्तिरिति वाच्यम् । साध्यव्याप्तिग्रहाविरोधित्वेन तादृशविरोधिविशेषणात् । अत एव तस्य व्यभिचारमध्य एव निवेश इति । केचित्तु साध्यासमानाधिकरणहेत्वादिकमेव विरोधो हेतौ साध्यसामानाधिकरण्यग्रहविरोधिरूपत्वं तल्लक्षणम् । एवं च व्यभिचारलक्षणे ऽन्वयव्याप्तिग्रहविरोधित्वस्थले साध्ये हेतुव्यापकताग्रहविरोधित्वं वक्तव्यम् । असाधारण्यं तु साध्यव्यापकीभूताभावप्रतियोगिहेत्वादिकं तज्ज्ञानं च कथञ्चित् साध्यधर्मिकहेतुव्यापकताग्रहविरोधीत्याहुः ॥ ६ ॥

प्रकरणसमं लक्षयति ।

यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः[1] ॥ ७ ॥

स हेतुः साध्यस्य साध्याभावस्य वा निर्णयार्थमपदिष्टः प्रयुक्तः प्रकरणसम इत्यर्थः । ननु हेतुमात्रस्य तथाप्रयोगात् तस्य प्रकरणसमत्वं स्यादित्यत आह । यस्मात् प्रकरणचिन्तेति । प्रकरणं पक्षप्रतिपक्षाविति भाष्यम् । तथा च प्रकरणस्य साध्यवतस्तदभाववतो वा पक्षस्य चिन्ता तुल्यबलाभ्यां हेतुभ्यां परस्परप्रतिरुद्धकार्यकत्वाद् विशेषतोऽनिर्णयाज् जिज्ञासेत्यर्थः । प्रकरणेन साध्यसाधकेन समः साध्याभावसाधकः साध्याभावसाधकेन वा समः साध्यसाधक इतिव्युत्पत्तेः । यद्वा प्रकृष्टं करणं लिङ्गं लिङ्गपरामर्शो वा तस्य चिन्ता को हेतुरनयोः स्वसाध्यसाधक एतयोः को वा परामर्शः प्रमेति वा जिज्ञासा । यस्मादित्यादि तु स्वरूपकीर्तनमात्रम् । लक्षणं तु तुल्यबलविरोधिपरामर्शकालीनपरामर्शविषयत्वम् । तुल्यबलत्वं चाप्रामाण्यग्रहानास्कन्दितत्वम् । एवं च विरोधिपरामर्शकालीनपरामर्शविषयत्वदशायां सद्धेतोरपि प्रकरणसमत्वं तादृशपरामर्शविरहदशायामसद्धेतोरपि न प्रकरणसमत्वमिति । नव्यास्तु यस्मादनन्तरं यस्य प्रयोगानन्तरमिति यावत् । प्रकरणस्य प्रकृष्टकरणस्य साध्याभावव्याप्तिपक्षधर्मताविशिष्टहेतोश्चिन्ता प्रयोक्तव्यत्वेन चिन्ता सम्भवतीति शेषः । निर्णयार्थं साध्यनिर्णयार्थमपदिष्टः सा-

(१) यस्मात् प्रकरणचिन्तेत्युक्तं सूत्रकृतेत्येतत्सूत्रव्याख्यानावसरे तात्पर्यटीका उद्देशक्रमसङ्गत्या प्रकरणसमलक्षणाय सूत्रम् । यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसम इति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

ज्ञप्तौ तु प्रमाणे ऽपि किं प्रमाणं दृष्टान्ते ऽपि को दृष्टान्त इति प्रमाणादिपरम्परानुयोगे नानवस्थेत्यनवस्थाभासप्रसञ्जनमिति लक्षणम् । पूर्वत्र कारणपरम्परापेक्षामुखेनासत्त्वारोपः कारणम् उत्तरत्रानिश्चितस्यानिश्चायकत्वाध्यारोपः अनवस्थालक्षणप्रतिकूलतर्कपराहतिरारोप्या हेतुदोषपर्यन्तचिन्तायां पूर्वत्र पक्षादेः स्वरूपासिद्धिरुत्तरत्राज्ञानासिद्धिः । अत्र साधारणो मूलदोषः सुगम एव । असाधारणं तु ज्ञप्तावयुक्ताङ्गाधिकत्वम् । ज्ञातस्यैव ज्ञापकत्वमयुक्तमेव रूपादिव्यवहारार्थं प्रदीप उपादीयमाने चक्षुरादिषु व्यवस्थादर्शनेनानवस्थाप्रसङ्गाभावात् । लिङ्गविशेषणत्वात् ज्ञातत्वमपि ज्ञातव्यं विशेषणान्तरवत् तच्च लिङ्गान्तरेणापि ज्ञातव्यम् तत्रापि तथेत्यनवस्थेति चेत् न साध्यविपर्ययसंसर्गव्यवच्छेदकानामेव लिङ्गविशेषणानामवश्यज्ञेयत्वं

ज्ञप्तिपक्षे । प्रतिकूलतर्कपराहतिरिति न कश्चिद्धेतुदोषोऽस्तीत्याशङ्क्याह । हेतुदोषेति । पक्षादेरिति पक्षहेतुदृष्टान्तानामनुत्पत्तौ हेतोराश्रयस्वरूपे व्याप्यत्वासिद्धय आरोप्यन्त इत्यर्थः । अज्ञानासिद्धिः अज्ञातस्य पक्षादेरज्ञापकत्वादाश्रयाज्ञानासिद्ध्यादिका आरोप्यन्त इत्यर्थः । सुगम एव नेदं स्वसाध्यसाधकं सिद्धत्वादिति प्रतिषेधहेतोरप्युत्पत्तिज्ञप्तिपक्षयोः पूर्वोक्तदोषः सुवचन इत्यर्थः । चक्षुरादिष्विति । अज्ञातस्यैव चक्षुरादेः ज्ञापकत्वाव्यभिचारादर्शनेनेत्यर्थः । विशेषणान्तरवत् सामान्यवत्त्वादिवत् । साध्यविपर्ययेति । हेतोर्व्यभिचारपरिहाराणामित्यर्थः ।

न तु लिङ्गसहकारिमात्रत्वेनोपयुक्तानामपि । तथा चाविषयवृत्तित्वं कृतौ तु न तावत्कारणापेक्षैव दोषः। तदपेक्षप्रदीपोपादाने ऽनवस्थाभावात् । असिद्धविषयानवस्थायां हि दोषः तस्य सिद्धविषयायामपि सञ्चारणादविषयवृत्तित्वम् । तदुक्तम् प्रदीपोपादाने प्रसङ्गनिवृत्तिवत् तद्विनिवृत्तिरिति । विपरीतप्रसञ्जिकेत्यपि काचित्प्रसङ्गसमास्तीति केचित् । यथा इह भूतले घटो नास्तीत्यप्राप्तौ घटो न प्रतिषेधमर्हति तेन घटप्राप्तिप्रसङ्ग इति । तदसत् प्राप्तिसमायामेवान्तर्भावादस्यां तत्र हि प्रतिषिध्यमपि ज्ञातव्यं तस्य ज्ञापकं चक्षुरादि करणं भूतलाद्यधिकरणं च अप्राप्य प्रतिषेधोऽतिप्रसङ्गात् प्रतिषेध्यं प्राप्य प्रतिषेधतीति वक्तव्यम् । प्राप्तिनिवृत्तिलक्षणत्वात् प्रतिषेधस्य प्राप्तौ च सत्त्वेनाविशेषात् प्रतिषेधायोग इति ॥ १६ ॥

तथा चेति । ज्ञानानपेक्षेषु ज्ञेयत्वापादानादविषयवृत्तित्वमित्यर्थः । ज्ञापकस्य कारणसापेक्षस्य च प्रदीपस्योपादाने कारणपरम्परापेक्षारूपानवस्थाप्रसङ्गविनिवृत्तिवदित्यत्रापि तथाविधानवस्था दोषाय न भवतीति । प्रसङ्गसमायाः प्रकारान्तरमाशङ्क्य निराकरोति । विपरीतप्रसञ्जिकेति । प्राप्तिसमायामस्यान्तर्भावमुपपादयति । इहेति । इह भूतले घटो नास्तीत्यज्ञातस्येति वक्तव्यम् तज्ज्ञापकं चक्षुरादि करणं भूतलाद्यधिकरणं च अधिकरणस्य घटस्य ज्ञानयोगात् ताभ्यामप्राप्तस्य ज्ञेयत्वायोगात् प्राप्तत्वे भूतलेघटसद्भावप्रसङ्गात् प्रतिषेधाभाव इति प्राप्तिद्वारायामप्रसङ्ग इति तत्रान्तर्भाव इत्यर्थः ॥ १६ ॥

अनङ्गत्वधिया हेतोः प्रतिदृष्टान्तमात्रतः ।
प्रत्यवस्थानमाचख्युः प्रतिदृष्टान्तलक्षणम् ॥ १७ ॥

हेतुरनङ्गं साध्यातिदेशो दृष्टान्त एवाङ्गमित्यभिमानेनोत्थानहेतुना प्रतिदृष्टान्तमात्रावष्टम्भेन बाधप्रतिरोधयोरन्यतरेण प्रत्यवस्थानं प्रतिदृष्टान्तसमः । यथा घटदृष्टान्तेनानित्यः शब्दः आकाशदृष्टान्तेन नित्यत्वस्यैव सिद्धेरिति बाधः । घटदृष्टान्तेनानित्यश्चेत् आकाशदृष्टान्तेन नित्यः किं न स्यात् । न चास्ति दृष्टान्तयोर्विशेष इति प्रतिरोधः । तदुक्तं प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रतिदृष्टान्तसम इति सूत्रखण्डेनेति । अयमस्योद्धारक्रमः । अधिकबलेन हि प्रतिदृष्टान्तेन बाधः स्यात् तुल्यबलस्यैव बाधकत्वे दृष्टान्तेनैव तद्बाधप्रसङ्गात् न च व्याप्तहेतुमत्तामन्तरेण साध्यधर्मवत्तामात्रेण प्रतिदृष्टान्तस्याधिकबलत्वं सम्भवति । ततश्च युक्ताङ्गहानिः । बाधं प्रत्यधिकबलस्याङ्गत्वेनानङ्गीकारात् तदिदमुक्तम् प्रतिदृष्टान्तहेतुत्वे च नाहेतुर्दृष्टान्तः अनधिकबलस्यैव प्रतिदृष्टान्तस्य बाधहेतुत्वे दृष्टान्तोऽपि किं बाधहेतुर्न स्यात् । बाधहेतुः स्यादेवेत्यर्थः । प्रतिरोधश्च तुल्यबलेन भवति न चानयोस्तुल्यबलत्वम् । दृष्टान्तस्य

प्रतिदृष्टान्तसमपक्षयोरेकसूत्रगतत्वप्रकाशनायोभयत्र सूत्रखण्डेनेत्युक्तम् । दृष्टान्तेनैव येन केनचिद्धर्मादिदृष्टान्तेनैव प्रतिदृष्टान्तहेतुत्वे च प्रतिदृष्टान्तमात्रस्य बाधहेतुत्वे

हेतुनावष्टब्धत्वात् प्रतिदृष्टान्तस्य तदभावादत्रापि युक्ताङ्गहानिः प्रतिरोधाङ्गस्य तुल्यबलत्वस्यानङ्गीकारात्। अत्रैवं सूत्रगमनिका। प्रतिदृष्टान्तमात्रस्य हेत्ववष्टम्भशून्यस्य हेतुत्वे दृष्टान्तोऽपि यद्यहेतुरविद्यमानहेतुः स्यात् तदाप्रतिरोधः न त्वयमहेतुः हेतुनावष्टब्धत्वादिति। अनङ्गं हेतुरिति चेत् तर्हि प्रतिदृष्टान्तः प्रतिषेधको न भवति गर्दभवदिति स्वव्याघात इति ॥ १७ ॥

अनुत्पन्ने साधनाङ्गे हेतुवृत्तेरभावतः।
भागासिद्धिः प्रसङ्गः स्यादनुत्पत्तिसमो मतः ॥१८॥

साधनाङ्गानां धर्मिलिङ्गसाध्यदृष्टान्ततज्ज्ञानानामन्यतमस्योत्पत्तेः पूर्वं हेतुवृत्तेरभावात् भागासिद्धा प्रत्यवस्थानमनुत्पत्तिसमः। तत्र धर्मिणोऽनुत्पत्तौ यथा अनित्यः शब्दः कार्यत्वादित्युक्ते अनुत्पन्नस्यापि शब्दस्य पक्षत्वात् तस्य चेदानीमभावादाश्रयभागासिद्धो हेतुरिति। लिङ्गानुत्पत्तौ यथा गुर्विदं पतनवत्त्वादित्युक्ते पतनोत्पत्तेः प्रागवस्थायामपि गुरुत्ववत्त्वस्य साध्यत्वेन तदवस्थस्यापि पक्षत्वात् भागासिद्धो हेतुरिति। साध्यानुत्पत्तौ यथा गन्धवद् घटः पार्थिव-

प्रतिरोधहेतुत्वे च सतीत्यर्थः। बाधहेतुः स्यादेव अतदूद्वयस्य(?)प्रस्तुतार्थसूचकत्वात्। अत्र प्रतिरोधपक्षे सूत्रगमनिका ॥ १७ ॥

त्वादित्युक्ते प्रथमक्षणे गन्धवत्त्वं नास्ति घटसमवायिकारणत्वेन तदुत्तरकालीनत्वाद्गन्धस्य । तथा च व्यापकस्य गन्धवत्त्वस्याभावेन व्याप्यस्यापि पार्थिवत्वस्याभावात् भागासिद्धो हेतुरिति । दृष्टान्तानुत्पत्तौ यथा द्रव्यमात्मा गुणवत्त्वाद् घटवदित्युक्ते प्रथमक्षणे घट एव निर्गुण इति दृष्टान्ते भागासिद्धो हेतुरिति । धर्मिज्ञानानुत्पत्तौ यथा द्रव्यं वायुः स्पर्शवत्त्वादित्युक्ते अज्ञातस्यापि वायोर्द्रव्यत्वं विवक्षितम् । न च तत्रायं हेतुः सिद्ध इति अज्ञातभागासिद्धो हेतुरिति । एवं लिङ्गादिज्ञानानुत्पत्तौ दर्शयितव्यम् । अकार्यं च कथमनित्यं निष्पतनं च कथं गुरु अपार्थिवं च कथं गन्धवत् निर्गुणं च कथं द्रव्यम् अनुपलब्धहेतुकं च कथं साध्यधर्मवदिति विरोधपर्यवसितं चेति । तदुक्तं प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसम इति । साधनाङ्गानामुत्पत्तेः प्राक् कारणस्य हेतोरभावात् प्रत्यवस्थानमनु-

---

तदुत्तरकालीनत्वात् द्वितीयक्षणभावित्वात् प्रथमक्षणे साध्याभावेऽपि कथं हेतोर्भागासिद्धिरित्यत्राह । तथा च व्यापकस्येति । दृष्टान्ते भागासिद्धं ततोऽसिद्धव्याप्तिकोऽयं हेतुरिति भावः । एवं लिङ्गादीति । प्रस्तुतप्रयोगे साध्यदृष्टान्तानामेकदेशाज्ञानेनापि भागासिद्धिरूहनीयेत्यर्थः । अस्या जातेरारोप्यान्तरमाह । अकार्यं चेति । अकार्यमनुपपन्नः शब्दः अपार्थिवं प्रथमक्षणे गन्धरहितत्वेनापार्थिवो घटः अनुपलब्धहेतुकं अज्ञातस्पर्शवत्त्वहेतुको घटज्ञानो (?)

त्पत्तिसम इत्यर्थः। अनुत्पन्नस्य स्वकार्यासामर्थ्यं द्वारं विरोधासिद्धी आरोप्ये उद्धारसूत्रं तथाभावादुत्पन्नस्य कारणोपपत्तेर्न कारणप्रतिषेध इति। उत्पन्नस्य शब्दादेस्तथाभावात् पक्षादिभावान्नाश्रयासिद्धिः। अनुत्पन्नस्यापि शब्दत्वात् कथं तद्व्यवच्छेद इति चेत् न तस्य तुच्छत्वेनाशब्दत्वात् तथा चाविषयवृत्तित्वम्। असिद्धिर्दोष एव न त्वपक्षीकृतस्येति। यदा कदाचिदुत्पन्नस्यापि पतनादेर्यावद्द्रव्यभाविना गुरुत्वेन व्याप्तेर्नोत्पत्तेः पूर्वमसिद्धिर्दोषः तथा च युक्ताङ्गत्यागः। व्याप्तिप्रकारमनपेक्ष्य दोषोद्भावनात् साध्यदृष्टान्तद्वारिकयोरपि तथा व्यापकत्वरूपं व्याप्यत्वरूपं चानपेक्ष्य प्रवृत्तेः। अज्ञानद्वारिकायां त्वविषयवृत्तित्वम् अज्ञानं हि पक्षादेर्दोषः न त्वनुपन्यस्तत्वेनापक्षादिभूतस्येति। एवमनङ्गीकारे सर्वत्र स्वव्याहृतिरूहनीयेति ॥ १८ ॥

सन्देहहेतुसद्भावात् सति निर्णयकारणे।
संशयस्य प्रसङ्गो यः स संशयसमो मतः ॥ १९ ॥

वायुः सर्वत्र सामान्यनिर्देशात् नपुंसकोक्तिः। तस्य तुच्छत्वेन भावप्रतियोगिनमित्युक्तत्वेन (?) साध्यदृष्टान्तद्वारिकयोरपि तथा पार्थिवत्वस्य यदा कदाचिदुत्पन्नेन गन्धवत्त्वेन व्याप्तत्वात् यदा कदाचिदुत्पन्नस्य गुणवत्त्वस्य द्रव्यत्वेन व्याप्तत्वाच्च पूर्ववद्युक्ताङ्गहानिरित्यर्थः। अत एवोपपादयति। व्यापकत्वरूपमिति। सर्वत्र अष्टस्वपि पक्षेषु ॥ १८ ॥

निर्णयकारणोपन्यासे ऽपि संशयहेतूनां समानधर्मादीनामन्यतमसद्भावमात्रात् संशयापादनेन प्रत्यवस्थानं संशयसमः यथा अनित्यः शब्दः कृतकत्वाद् घटवदिति अनित्यत्वनिर्णयप्रमाणोपन्यासे यदि निर्णायकसद्भावान्निर्णयः स्यात् तर्हि नित्यानित्ययोः सामान्यघटयोः समानमैन्द्रियकत्वं संशयहेतुः शब्दे ऽस्तीति नित्यानित्यत्वे संशयोऽपि स्यात् स्वकारणसद्भावे ऽपि वा संशयानुत्पत्तौ निर्णयोपि न स्यादविशेषादिति । समानधर्मादिसंशयकारणविधुरस्य निर्णयकारणस्य निर्णयहेतुत्वमित्यभिमानः कारणम् । कार्यापेक्षया सत्प्रतिपक्षत्वमारोप्यं निर्णयप्रतिपक्षस्य संशयस्योपस्थानात् । ज्ञाप्यापेक्षया विशेषणासिद्धिः संशयहेतुविरहे निर्णयहेतुत्वमित्यभिमानात् तस्य चात्राभावादिति। अत्र सूत्रम् । सामान्यदृष्टान्तयोरैन्द्रियकत्वे सामाने नित्यानित्यसाधर्म्यात् संशयसम इति । अत्र समान इत्यन्तमुदाहरणप्रदर्शनपरम् । नित्यानित्यशब्दौ सपक्षविपक्षावुपलक्षयतः साधर्म्यपदं च

समानधर्मादीनां समानधर्मानेकधर्मविप्रतिपत्त्या सद्भावमात्रादिति मात्रया निर्णयकारणसाहित्याभावे सतीति गम्यते संशयापादनेन प्रत्यवस्थानमिति विशेषः। अविशेषात् कारणसद्भावे विशेषाभावात्। उपस्थानात् आधानात् तस्य चात्राभावात् कृतकत्वादिनिर्णयहेतोः समानधर्मादिसंशयहेतुविरहस्याभावात् । उदाहरणप्रद-

संशयहेतुम्। ततश्च साध्यतदभावयोः संशयकारणा-दित्यर्थः। एवं च विषयतः कारणतश्च व्याप्तिर्भवति। दोषमूलं तु युक्ताङ्गहानिः निर्णायकाभावविशिष्टस्य समानधर्मादेः संशयहेतुत्वमित्यनङ्गीकारात्। अन्यथा निर्णायकसद्भावे ऽपि समानधर्मादेः संशयोत्पत्तौ तद-नुच्छेदप्रसङ्गात्। अयुक्ताङ्गाधिकत्वं वा समानधर्मादि-विरहस्य निर्णयाङ्गत्वाभ्युपगमात् व्याघातस्तु सुगम एव। सूत्रं तु साधर्म्यात् संशये न संशयो वैधर्म्यादु-भयथा वा संशये ऽत्यन्तसंशयप्रसङ्गो नित्यत्वानभ्युप-गमाच्च सामान्यस्याप्रतिषेध इति। तत्र साधर्म्यवैध-र्म्याभ्यां संशायकनिर्णायकावुपलक्षयति। सामान्य-ग्रहणेन च संशयहेतुम्। एतेनायमर्थः समानधर्मादेः संशये जनयितव्ये निर्णायकसद्भावान्न संशयः स्यात्। तस्मिन्नपि सत्येव संशयोत्पत्तौ संशयानुच्छेदप्रसङ्गः समानधर्मादेर्नित्यं संशयहेतुत्वं च नाभ्युपगच्छामः।

र्शनपरं न लक्षणोपयुक्तमिति भावः। साध्यतदभावयो-रिति। साध्यतद्विपरीतयोः संशयकारणस्य समानध-र्मादेः सद्भावादित्यर्थः। एवं चेति। नित्यानित्यसाधर्म्ये-शब्दानां एवमर्थस्वीकारे सति सर्वानुमानेषु सर्वसंशयहे-तुरियं जातिः प्रवर्तेत इत्यर्थः। अन्यथा युक्ताङ्गहीनत्वान-ङ्गीकारे। तदनुच्छेदप्रसङ्गात् संशयानवस्थाप्रसङ्गात्। स्व-व्याघातस्त्विति जातिवादिनः प्रतिषेधानुमाने ऽपि समा-नधर्मादिसद्भावात् प्रतिषेधवति कृतकत्वे हेतुरसिद्धो

ततश्च संशयापादनलक्षणप्रतिषेधो नास्तीति सूत्रार्थः ॥ १९ ॥

तुल्यत्वमभ्युपेत्यैव परहेतोः स्वहेतुना ।
बाधेन प्रत्यवस्थानं प्रक्रियासम इष्यते ॥ २० ॥

अभ्युपगतानधिकबलेन प्रतिप्रमाणेन परकीयहेतोर्बाधाभिमानेन प्रत्यवस्थानं प्रकरणसमा जातिः । तदुक्तम् उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसम इति । साधर्म्यमत्र प्रतिप्रमाणमात्रोपलक्षणपरम् । प्रक्रियत इति प्रक्रिया साध्योर्थः तस्य सिद्धेर्निश्चयादित्यर्थः । तथा च प्रतिधर्मसमानो भेदसिद्धिः । यथा अनित्यः शब्दः कार्यत्वादित्युक्ते मैवं श्रावणत्वेन नित्यत्वस्य सिद्धेः । प्रत्यभिज्ञाबाधितत्वाद्वेति प्रतिप्रमाणोपलम्भः कारणमस्याः बाध आरोप्यः । दुष्टत्वमूलं तु सौत्रः स्वव्याघातः । यथा प्रतिपक्षात् प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेरिति । अयमर्थः स्थापनानधिकबलात् प्रतिपक्षसाधकप्रमाणात् प्रक्रियमाणार्थसिद्धेर्हेतोर्नास्मत्पक्षस्य बाधलक्षणप्रतिषेधः । प्रतिषेधानधिकबलेनैव स्थापनाहेतुना भवत्प्रतिपक्षस्यास्मत्साध्यस्य सिद्धेरिति बाधाङ्गस्याधिकबलत्वस्यानङ्गीकारो युक्ताङ्गत्यागश्चेति हृदयम् ॥ २० ॥

विरुद्धः कालात्ययापदिष्टः प्रकरणसमो वा न वा आद्ये प्रस्तुतहेतुरपि तथा द्वितीये ऽर्थादापन्नः स्यात् तथेति सकलहेत्वाभासप्रसङ्गो द्रष्टव्य इत्यर्थः (?) ॥ १९ ॥

हेतोर्विकल्प्य साध्यार्थपूर्वापरसहोदयम् ।
त्रेधापि तस्य हेतुत्वभङ्गो हेतुसमो भवेत् ॥ २१ ॥

इयं च कृतिज्ञप्तिसाधारणी जातिः । साध्यार्थात् पूर्वं पश्चात् तेन सह वा साधनस्योदयः उत्पत्तिर्ज्ञानं वा तत्र सहभावो विशेषादहेतुः पूर्वभावे साध्यप्रतियोगित्वेन साधनत्वस्य साध्याभावे किमपेक्षेदं साधनं स्यादिति साधनत्वाभावः । पश्चाद्भावे पूर्वसिद्धस्य साध्यस्य कथमिदं साधनं स्यादिति । त्रेधापि हेतुत्वभङ्गेन प्रत्यवस्थानमहेतुसमः प्रतिकूलतर्कोद्धारं साध्यसाधनभावो दूष्यः इतरेतराश्रयलक्षणप्रतिकूलतर्कप्रतिघात आरोप्यः सूत्रं तु त्रैकाल्यासिद्धेर्हेतोरहेतुसम इति । सेयं जातिः सूत्रकारैरेव प्रमाणपरीक्षायामुदाहृतैव । प्रत्यक्षादीनामप्रामाण्यं त्रिकाल्यासिद्धेरिति । उद्धारसूत्रम् न हेतुतः साध्यसिद्धेस्त्रैकाल्यासिद्धिरिति । ज्ञप्तिपक्षे तावत् त्रिकालयुक्तादपि हेतोर्यथायथं साध्यज्ञानदर्शनान्न त्रैकाल्यासिद्धिरिति । भग्नव्याप्तिकत्वात् तर्कस्य युक्ताङ्गहानिः । कृतिपक्षे तु पूर्वकालीनादेव हेतोः पश्चाद्भाविनः साध्यस्योत्पत्तेर्न त्रैकाल्यासिद्धिः । साध्यप्रतियोगिनः साधनस्य कथं तदभावे सिद्धिरिति चेत् न साधनत्वव्यवहारस्तावद्बुद्धिस्थेनापि साध्येन सिध्यतीति न स्वरूपसत्तामपेक्षते । तद्व्यापारश्च स्वशक्तिमात्रेण भवन्न

प्रतियोग्यधीनः भिन्नकालयोः साध्यहेत्वोः कथं सम्बन्ध इति चेत् । साध्यसाधनसम्बन्धस्य तथाविधस्यैव दृष्टत्वात् ततश्चानङ्गाभ्युपगमः समानकालत्वस्य सम्बन्धानङ्गस्यैवोररीकरणात् । स्वव्याघातप्रदर्शनपरमपि सूत्रम् प्रतिषेधानुपपत्तेश्च प्रतिषेध्याप्रतिषेध इति । निगदव्याख्यातमेतत् ॥ २१ ॥

व्याप्तिं विना वादिवाक्यादर्थाक्षेपाभिमानतः ।
विपरीतसमारोपमर्थापत्तिसमं विदुः ॥ २२ ॥

असत्यामेव व्याप्तौ वादिवचनमात्रेणार्थादाक्षिप्तमित्यभिमानादुक्तविपरीतमारोप्य प्रत्यवस्थानमर्थापत्तिसमः । तदुक्तम् । अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसम इति । उक्तविपरीताक्षेपशक्तिरर्थापत्तिः ततस्तदाभासो लक्ष्यते अर्थापत्त्याभासात् प्रतिपक्षसिद्धिमभिधाय प्रत्यवस्थानमर्थापत्तिसम इत्यर्थः । यथा अनित्यः शब्द इत्युक्ते ऽर्थादाक्षिप्तमन्यन्नित्यमिति विशेषविधौ परिसंख्यान्यायेन शेषनिषेधस्य नान्तरीयकत्वात् । तथा च घटादेर्नित्यत्वात् साध्यविकलो दृष्टान्त इति विरोधः । अनित्यसाधर्म्यादनित्यत्वोक्तौ नित्यसाधर्म्यान्नित्य इत्यापन्नमिति प्रतिरोधः । अनुमानादनित्य इत्युक्ते ऽर्थादापन्नं प्रत्यक्षान्नित्य इति बाधः । सामान्यवत्त्वे सत्यस्मदादिबाह्येन्द्रियग्राह्यत्वादनित्य इत्युक्ते ऽर्थादापद्यते तदभावान्नित्य इति ।

ततश्चाप्रत्यक्षत्वाद्यादिशब्देषु भागासिद्धिः । अस्मिन्नेव हेतावुक्ते कृतकत्वमनित्यत्वस्साधनं न वेति विकल्प्य न चेदिदमपि न स्यात् अविशेषात् । साधकश्चेदुच्येतार्थादापद्यते नान्यत् साधकमिति । एवं तस्मिन्नेव प्रयुक्ते कृतकत्वमनैकान्तिकं न वेति विकल्प्य पूर्वत्रेदमपि तथा स्यादविशेषात् । यदि नेत्युच्यते ऽर्थादापन्नमन्यदनैकान्तिकमित्यादिसर्वदोषोपसंहारो द्रष्टव्यः । विशेषविधिः शेषान्तरनिषेधं गमयतीत्यभिमान उत्थानहेतुः । यथायथमसिद्धाद्यन्यतमसमारोप्यं व्याप्तिमनपेक्ष्यानुक्तमात्राक्षेपे त्वत्पक्षहानिरपि स्यात् । अनुक्तत्वलक्षणादूषणोपाधिसमाक्रान्तत्वादिति स्वव्याघातः युक्ताङ्गहानिश्च व्याप्तिमनपेक्ष्य प्रवृत्तेः । तदिदमुभयमप्यसूत्रयत् अनुक्तस्यार्थापत्तेः पक्षहानेरुपपत्तिरनुक्तत्वादनैकान्तिकत्वाच्चार्थापत्तेरिति ॥२२॥

व्याप्तिमनपेक्ष्य अग्निरस्तीत्युक्ते ऽर्थादापन्नं तत्र शैत्यं नास्तीति जलमस्तीत्युक्ते ऽर्थादापन्नं तत्राग्निर्नास्तीत्यादि । अव्याप्त्यमविवक्षानुक्तापक्षेपस्तं विहायेत्यर्थः (?)। अनुक्तत्वलक्षणा अनुक्ताक्षेपलक्षणा । अनुक्तस्येति । वादिनानुक्तस्य वादिसाध्यविपरीताक्षेपशक्तेर्हेतोर्वादिवाक्यप्रतिषेधे सति जातिवादिपक्षस्य च तत एव हानिरुपपन्ना । अनुक्तत्वादनुक्तत्वाक्षेपरूपदूषणोपाधिसद्भावादिति स्वव्याघातः । जातिवाद्युक्तोपपत्तेर्वाद्युक्ताभावेनैकान्ततः प्रतिषेधकत्वाभावाद्युक्ताङ्गहानिश्चेति सूत्रार्थः ॥ २२ ॥

धर्मैक्येन केषाञ्चिदविशेषप्रसञ्जनम् ।
साधनप्रतिबन्ध्या यत् सोऽविशेषसमो मतः ॥ २३ ॥

केषाञ्चित्पदार्थानां साधारणेनसत्त्वादिसाधनव्यतिरिक्तेन केनचिद्धर्मेण तेषामेकत्वेनैकधर्मत्वेनैकाकारधर्मत्वेन वा यदविशेषप्रसञ्जनं स्थापनाहेतुप्रतिबन्धभिप्रायेण क्रियते सोऽविशेषसमः । एवमस्याः प्रवृत्तिः यदि कृतकत्वेन धर्मेण शब्दघटयोरनित्यतारूपधर्माविशेषः स्यात् तर्हि सत्त्वादिना धर्मेण सर्वेषामपि पदार्थानामविशेषः किं न स्यात् । अत्रैकत्वेनाविशेषे पक्षाद्यविभागः । एकधर्मत्वेनाविशेषे सर्वस्याप्येकजातीयत्वम् । एकाकारधर्मत्वेनाविशेषे सर्वस्याप्यनित्यता स्यात् । एवं च पृथिव्यादीनां नवानां द्रव्य-

---

एकत्वेन एकस्यैव ह्यविशेषो मुख्यः स्यादतः पक्षमात्रत्वेन एकधर्मत्वेन सर्वेषामेकेन धर्मेणान्वितत्वेन प्रतिपदार्थभिन्नत्वेऽप्येकरूपधर्मत्वेन। सत्त्वादिना सत्त्वप्रमेयत्ववाच्यत्वज्ञेयत्वादिधर्मसद्भावेन। पक्षाद्यविभागः सत्त्वादिहेतुना सर्वस्यापि पक्षैक्ये सिद्धसाधनादिहेतोः पक्षसपक्षविपक्षविभागाभावादनुमानाप्रवृत्तिरिति भावः । एकजातीयत्वं सत्त्वादिना सर्वस्य साध्यधर्मजातीयत्वसिद्धौ पूर्ववदनुमानाप्रवृत्तिरिति भावः । सर्वस्याप्यनित्यता स्यादिति । सत्त्वादिना सर्वस्य प्रस्तुतसाध्यधर्मवत्त्वे सिद्धे व्याप्त्यसिद्धिरनुमानाप्रवृत्तिरित्यर्थः । विषयहेतोरनियमार्थमुदाहरणान्तराण्याह । एवं च पृथिव्यादीनामिति । एवं

त्वेन धर्मेण क्रियावत्त्वेनाविशेषः स्यात् । शब्दघटयो-रैन्द्रियकत्वेन मूर्तत्वेनाविशेषः स्यात् । एवं घटजाती-यत्वं घटतादात्म्यं चेति । कस्यचिद्धर्मस्य कञ्चित्प्रत्य-साधकत्वदर्शनं कारणमस्याः । असाधकत्वमारोप्यम् । सूत्रं तु एकधर्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात् सद्भावोपपत्तेरविशेषसम इति । एकधर्मोपपत्तेरविशेष इति साधनप्रतिबन्द्यभिप्रायेणेदं प्रत्यवस्थानमिति दर्शितम् । सद्भावः सत्त्वं तच्च साधारणधर्ममात्रोपल-क्षणम् । तस्योपपत्तेः सर्वस्याविशेषापादकधर्माक्रान्त-समुदायस्यैकत्वाद्यविशेषप्रसङ्गापादनेन प्रत्यवस्था-नमित्यर्थः । अस्याः स्वव्याघातः सुगम एवेति युक्त्य-ङ्गहानिमाह सूत्रकारः क्वचिद्धर्मानुपपत्तेः क्वचिच्चोप-पत्तेः प्रतिषेधाभाव इति । क्वचित् सत्तादौ हेतौ सति तद्व्यापकाभिमतस्य तादात्म्यादिधर्मस्यानुपपत्तेः । क्व-चित्कार्यत्वादौ सति तद्व्यापकस्यानित्यत्वादिधर्मस्यो-पपत्तेः प्रतिषेधाभाव इति । पूर्वत्र व्याप्त्यभावादुक्त-

---

घटजातीयत्वमिति । ऐन्द्रियकत्वेनोभयोरेकजातिमत्त्वमे-कत्वं स्यादित्यर्थः । असाधकत्वमारोप्यम् आश्रयासि-द्धिस्वरूपासिद्ध्यसाधारणत्वादिदोषदुष्टत्वाद्धेतोरसाधक-त्वमारोप्यमित्यर्थः । प्रतिबन्द्यभिप्रायेण दृष्टान्तबुद्ध्या । अविशेषापादनात्मकधर्मः सत्त्वद्रव्यत्वैन्द्रियकत्वादिः । सुगम एव विनीतमसाधकमाश्रयासिद्धत्वात्(?) प्रया-जास्तित्वसाधकत्वविश्वपरिणामित्ववदित्यादि प्रतिषेधहे-

रत्र तद्भावादिति भावः ॥ २३ ॥

अस्मत्पक्षे ऽपि किमपि प्रमाणमुपपत्स्यते[1] ।
त्वत्पक्षवदितिप्राप्तिरुपपत्तिसमो मतः ॥ २४ ॥

वादिना साध्यसिद्धये प्रमाणे ऽभिहिते मत्पक्षे किमपि प्रमाणं भविष्यति त्वत्पक्षवदिति प्रमाणसद्भावमात्रोपपादनेन प्रत्यवस्थानमुपपत्तिसमः । यथा अनित्यः शब्दः कार्यत्वादित्युक्ते यद्यनित्यत्वे प्रमाणं कार्यत्वमस्तीत्यनित्यः तर्हि नित्यत्वपक्षे ऽपि किञ्चित्प्रमाणं भविष्यति । वादिप्रतिवादिनोरन्यतरोक्तत्वात् त्वत्पक्षमत्पक्षयोरन्यतरत्वात् प्रकृतसन्देहविषयत्वात् विप्रतिपत्तिविषयत्वाद्वा त्वत्पक्षवत् । तथा च बाधः प्रतिरोधो वेति । इयं च प्रतिधर्मसमकरणसमाभ्यां भिद्यते अत्र प्रमाणस्यैवोपपादनात् तत्र सिद्धेन प्रमाणेन साध्योपपादनात् अस्याः सामान्यतः प्रमाणसम्भावनाद्वारं सूत्रं तु उभयकारणोपपत्तेरुपपत्तिसम इति । वादिसाधनानन्तरं प्रतिवादिनापि कारणस्य प्रमाणस्योपपादनादर्थादुभयकारणोपपत्तेरुप-

तावपि यथाश्रयासिद्धत्वेनोभयोरसाधकत्वेनाविशेषः स्यादित्यादिः सुखवेद्य इत्यर्थः ॥ २३ ॥

प्रकृतसन्देहविषयत्वात् शब्दो नित्योनित्यो वेति सन्देहे सतीदमनुमानं प्रवर्तते ऽतस्तद्विषयत्वादित्यर्थः । साध्यस्य वादिसाध्यविपरीतः स्यात् ॥ २४ ॥

(१) मुपपद्यते–पा॰ A पु॰ ।

पत्तिः न तु प्रतिवादिनैवोभयत्र प्रमाणोपपादनादिति । उपपत्तिकारणानुज्ञानादप्रतिषेध इति सूत्रारूढः स्वव्याघातः वादिसाध्योपपत्तेः कारणं प्रमाणं तस्य पक्षवदिति निदर्शयता प्रतिवादिनाप्यनुज्ञानान्न प्रतिषेधः । अनुज्ञाप्रतिषेधयोरेकत्रासम्भवादिति युक्ताङ्गहानिश्च । बाधप्रतिरोधौ प्रतिप्राबल्यसाम्ययोरङ्गत्वादनुपन्यस्तस्य प्रमाणस्य तन्निरूपणासम्भवाच्चेति ॥ २४ ॥

अवधारणतात्पर्यं वादिवाक्ये विकल्प्य यत् ।
तद्बाधात् प्रत्यवस्थानमुपलब्धिसमो हि सः (१) ॥ २५ ॥

वादिवाक्यस्यावधारणतात्पर्यं तावदारोप्य तद्विशेषं विकल्प्य सर्वथाऽवधारणबाधेन प्रत्यवस्थानमुपलब्धिसमः । यथा पर्वतोग्निमानित्युक्ते किं पर्वत एवाग्निः उत पर्वतोग्निमानेवेति । न प्रथमः महानसादीनामप्यग्निमत्त्वोपलम्भात् । न द्वितीयः अग्निं विनापि कदाचित्पर्वतस्योपलब्धेः । ततश्च साध्याभावे ऽपि धर्म्युपलभ्यत इति बाधः । तथा तस्यामेव

तद्विशेषमवधृतार्थविशेषम् । किं पर्वत एवेति । किं पर्वत एवाग्निमानुताग्निमानेव पर्वत इति विकल्प्येत्यर्थः ।

(१) समो मतः–पा॰ A पु॰ ।

क्षितिजस्य खत्रयाष्टर-

सप्तवसुखाग्निवेदयुतात् ४३०८७६८००० ॥ ५१ ॥

बुधशीघ्रस्य खखाम्बर-

रसनन्दाष्टाष्टवसुयमोदधिभिः ४२८८८६६००० ।

खचतुष्टययमशरगुण-

शशित्रिवेदैः ४३१३५२०००० सुरेन्द्रगुरोः ॥ ५२ ॥

भार्गवशीघ्रस्याम्बर-

खखाष्टवेदाब्धिखाग्निकृतैः ४३०४४८००० ।

भास्करसुतस्य खत्रय-

रविगुणशरखदहनसमुद्रैः ४३०५३१२००० ॥ ५३ ॥

शून्यचतुष्टयपक्षे-

न्दुरामगुणनवभि ९३३१२०००० रर्कमन्दस्य ।

इन्दोः खत्रययमशर-

नवपञ्चव्योमशरचन्द्रैः १५०५९५२००० ॥ ५४ ॥

खत्रययमनवपञ्चा-

ष्टरामधृतिभिः १८३८५९२००० शशाङ्कपातस्य ।

कल्पगतभगणघातात्

कुजादिमन्दोच्चपातानाम् ॥ ५५ ॥

भगणादि कल्पवर्षैर्लब्धं रविमण्डलान्तिका मध्याः ।

मेषादिद्युगणफलाधिका भवन्तीष्टदिनमध्याः ॥ ५६ ॥

कलेर्येऽब्दा गतास्ते कलिगतास्तेभ्यः शुद्धिः कलिगतशुद्धिः प्राग्वत् साध्या । अर्थात् कल्पगताब्देभ्यो यथा पूर्वं शुद्धिरानीता तथा कलिगताब्देभ्यः साध्या किन्तु तत्र कल्यादौ शुक्रवारस्थितत्वादब्दाधिपगणना शुक्रवारात् कार्या । अब्दभगणवधादिति । कलिगताब्दानां ग्रहभगणानां च वधात् पाठपठितस्वस्वक्षेपयुतात् कल्पवर्षैर्यद्भगणादि लब्धं ते रविमण्डलान्तिका मध्या ग्रहा भवन्ति । ते च मेषादिद्युगणफलेन लब्धग्रह-

र्गणभवखेटैरधिका इष्टदिने मध्या ग्रहा भवन्ति । शेषं स्पष्टार्थम् ।

अत्रोपपत्तिः । कलिगतशुद्ध्यादीनामति सुगमा । रव्यब्दान्ते ग्रहानयनाय कल्पगताब्दानां खण्डद्वयं कृतमाचार्येण कल्पात् कल्पादिपर्यन्तमेकं कलेरिष्टवर्षपर्यन्तं द्वितीयम् । ततोऽनुपातो यदि कल्पाब्दैर्ग्रहभगणास्तदा कल्पगताब्दैः किं जातोऽभीष्टवर्षान्ते भगणादिर्ग्रहः $= \frac{\text{कगव} \cdot \text{ग्रभ}}{\text{कव}}$

$$= \frac{\text{कल्पात् कल्पादिपर्यन्तवर्ष} \times \text{ग्रभ}}{\text{कव}} + \frac{\text{कलेर्गतव} \times \text{ग्रभ}}{\text{कव}}$$

अत्र प्रथमखण्डे यद्भगणशेषं तस्यैव क्षेपसंज्ञा कृताऽऽचार्येण ।

यथा कुजभगणाः = २२९६८२८५२२

कल्यादौ गतवर्षगणः = १९७२९४४०००

अनयोर्घातः = ८१९१८२७४३५९९२८ × ४३२०००

कल्पवर्षैः ४३२००००००० र्विभज्य लब्धम् = ८१९१८२७४३५

शेषं क्षेपः = ४२८८८९६००० । एवमन्येषां क्षेपा उत्पाद्याः ॥५१-५६॥

इदानीं रव्यब्दान्तचैत्रादिमध्ये कियन्ति सावनदिनानि तदर्थमाह ।

शुद्धीशवधे शुद्धेऽवमशेषात् सावनद्युगणसिद्धिः ।
व्येकावमं गृहीत्वा गुणखमुनियुतान्न शुद्धिश्चेत् ॥ ५७ ॥

शुद्धेरीशानामेकादशानां च वधेऽवमशेषाद्रव्यब्दान्ते प्रागानीतावमशेषात् यमनवरसगुणितात् खखरसनवहृतात् शुद्धे ततः सावनाहर्गणसिद्धिः 'हृतास्त्रिखागैः फलावमविहीना' इत्यादिना चैत्रादावहर्गणसिद्धिर्भवतीत्यर्थः । यद्यवमशेषादेकादशशुद्धिवधस्य न शुद्धिर्विशोधनं भवेत्तदा रव्यब्दान्ते कल्पाद्यान्यवमानि तानि व्येकानि कृत्वा गुणखमुनि ७०३युतादवमशेषात्तद्वधं विशोधयेत्—इति ।

अत्रोपपत्तिः । चैत्रादितिथिः शून्यमिता भवति तदा विपरीतशोधनेन ० − शु = − शु । ततो 'ऽवमांशेभ्यो यमनवरसगुणितेभ्यो विभक्तेभ्य' इत्याद्याचार्योक्तेनावमशेषम् $= \frac{\frac{\text{६९२ वक्षे}}{\text{६६००}} - \text{११ शु}}{\text{७०३}} = \text{इक्षे}$ ।

अत्र यदि $\frac{\text{६६२ वचशे}}{\text{६६००}} < \text{११ शु}$ तदा ऋणावमशेषं भवति तदा लब्धी रूपाल्पा भवति । ऋणात्मके शेषे धनार्थं रूपयोजनेन $\text{१} + \frac{\frac{\text{६६२ वचशे}}{\text{६६००}} - \text{११ शु}}{\text{७०३}}$

$= \frac{\text{७०३} + \frac{\text{६६२ वचशे}}{\text{६६००}} - \text{११ शु}}{\text{७०३}}$ इदं चैत्रादावमशेषं भवति—इति स्फुटमेव । एवं रव्यब्दात् प्राक् चैत्रशुक्लादौ विपरीताहर्गणस्य सिद्धिर्भवति । अयमेव चैत्रादावृणाहर्गण इति लल्लाद्यैरुच्यत इति ॥ ५७ ॥

इदानीं चैत्रादेरहर्गणं ततो मध्यग्रहानयनमाह ।

चैत्रसिताद्योऽब्दपतिः शुद्ध्यूनाया दिनाब्दरूपयुतेः ।
तद्द्युगणाद्दिनवारः शुद्ध्यूना मध्यमाः प्राग्वत् ॥ ५८ ॥

दिनानां पूर्वसाधितदिनाद्यस्य—अब्दानां कल्पगताब्दानां रूपस्य च या युतिः सा दिनाब्दरूपयुतिस्तस्याः शुद्ध्यूनायाश्चैत्रसिताद्योऽब्दपतिः साध्यः । अर्थाद्दिनाब्दरूपयुतेः शुद्ध्यूनाया यच्छेषं तत्सप्ततष्टं च रव्यादिकश्चैत्रादौ वारो भवेत्ततश्चैत्रादेर्योऽहर्गणो भवेत्तत्र चैत्रादिवाराद्दिनवारो ज्ञेयस्तस्माद्ये ग्रहास्ते शुद्ध्यूनाः शुद्धिदिनोद्भवखेटैरूनास्तदा सौराब्दान्तात् पूर्वसाधिताः प्राग्वत् मध्यमा ग्रहाः स्युः । यदि कश्चिदिष्टवर्षे चैत्रादेरहर्गणं ततो ग्रहान् ततश्च सौराब्दात् मध्यमान् ग्रहान् ज्ञातुमिच्छति तेनैवमुपरि प्रतिपादितेन प्रकारेण कार्यमित्यर्थः ।

अत्रोपपत्तिः । अमान्तरव्यब्दान्तमध्ये या इष्टतिथयस्ता अधिशेषतिथयस्ताभ्यो वर्षान्तक्षयशेषघटिका विशोध्य शुद्धिसंज्ञा कृता सैवामान्तवर्षान्तमध्ये सावनदिनानि ।

कल्पादेरिष्टसौरवर्षान्तं सावनानि दिनानि = ३६५ गव + दिनादि एभ्योऽमान्तरव्यब्दान्तमध्ये यानि सावनानि शुद्धिमितानि तानि विशोध्य चैत्रादौ सावनदिनानि = ३६५ गव + दिनादि – शु

एतानि सप्ततष्टानि वर्त्तमानवारार्थं सैकानि जातश्चैत्रादावर्का-द्वारः = गव + दिनादि + १ − शु। अत उपपन्नम्। शेषस्य वासना स्पष्टा। लघ्वहर्गणानयने कथं वारगणना कार्या इत्यत्र कमलाकरविशेषस्तस्यविवेके द्रष्टव्यः। तेन कदाचिद्व्ययोगं विनैव चैत्रादौ वारो जायते। वारार्थमहर्गणः सैको निरेकः कार्य इति सर्वं ज्योतिर्विदां स्फुटमेव किं लेखप्रयासेन ॥ ५८ ॥

इदानीं ग्रहाणां बीजकर्माह।

खखखार्क१२०००हृताब्देभ्यो
गतगम्याल्पाः खशून्ययमल२००हृताः।
लब्धं त्रि३सायक५हतं
कलाभिरूनौ सदार्केन्दू ॥ ५९ ॥
शशिवत् जीवे द्वि२हतं
चन्द्रोच्चे तिथि१५हतं तु सितशीघ्रे।
द्वीषु५२हतं च बुधोच्चे
द्वि२कु१वेद४हतं च पातकुजशनिषु ॥ ६० ॥

जीवे गुरौ शशिवत् फलं देयम्। अर्थाद्यच्चन्द्रे तदेव लिप्तिकाद्यं गुरावप्यृणं कार्यम्। शेषं स्पष्टार्थम्। 'खाभ्रखार्कैर्हृताः कल्पयाताः समा' इत्यादि भास्करोक्तमेतदनुरूपमेव।

अत्रोपलब्धिरेव वासना। 'यद्वर्षसहस्रषट्कं यावदुपचयस्ततोऽपचय इत्यत्रागम एव प्रमाणं नान्यत् कारणं वक्तुं शक्यते' इति भास्करो वदतीत्यत्र। 'द्विकुवेदहतं' चेत्यस्य स्थाने 'द्विकुवेदैः' इति पाठः साधुश्छन्दोऽभङ्गात् ॥ ५९–६० ॥

इदानीमार्यभटमतीयेन्दुपातोच्चयोर्दूषणमाह।

अकृतार्यभटः शीघ्रगमिन्दूच्चं पातमल्पगं स्वगतेः।
तिथ्यन्तग्रहणानां घुणाक्षरं तस्य संवादः ॥ ६१ ॥

आर्यभटमते चन्द्रोच्चभगणाः कल्पे = ४८८२१९०००

आचार्यमते चन्द्रोच्चभगणाः कल्पे = ४८८१०५८५८ ततोऽल्पाः ।

अत आर्यभट इन्दूच्चं शीघ्रगं शीघ्रगतिं स्वगतेराचार्योक्तगतेरकृत कृतवान् ।

एवमार्यभटमते चन्द्रपातभगणाः कल्पे = २३२२२६०००
आचार्यमते चन्द्रपातभगणाः कल्पे = २३२३११११६८ ततोऽधिकाः ।

अत आर्यभटेनाचार्यनिर्णीतपातगतेः स्वपातमल्पगमल्पगतिं कृतवान् । अतस्तस्य मते यदि कदाचित्तिथ्यन्तग्रहणानां मध्ये आचार्येण सह संवाद ऐक्यं भवेत्तद् घुणाक्षरं ज्ञेयम् । यथा काष्ठावयवभक्षणे कदाचित् ककाराद्यक्षराकृतिरुत्पद्यते परन्तु तदक्षरं घुणेन न बुद्ध्या लिखितं तथैव चार्यभटस्य ग्रहणादिष्वैक्यं न तद्बुद्धिभवमित्यात्मप्रशंसाऽऽचार्येण कृतेति ॥ ६१ ॥

भगणादिष्वार्यभटवाक्यानि च ।

युगरविभगणाः ख्युघृ शशि चयगियिङुशुछ्लृ कु ङिशिबुण्लृख्षृ प्राक् ।
शनि ढुङ्विघ्व गुरु ख्रिच्युभ कुज भद्लिझुनुखृ भृगुबुध सौराः ॥ १ ॥
चन्द्रोच्च ज्रुष्खिध बुध सुगुशिथृन भृगु जषबिखुछृ शेषार्काः ।
बुफिनच पातविलोमा बुधाह्न्यजार्कोदयाच्च लङ्कायाम् ॥ २ ॥
(आर्यभटस्य संख्याप्रकाशनार्थं सङ्केता गणकतरङ्गिण्यां द्रष्टव्यः)

इदानीमात्मप्रशंसामाह ।

मध्यगतिज्ञं वीक्ष्य श्रीषेणार्यभटविष्णुचन्द्रज्ञाः ।
सदसि न भवन्त्यभिमुखाः सिंहं दृष्ट्वा यथा हरिणाः ॥ ६२ ॥

मध्यगतिज्ञमाचार्यमध्यग्रहानयनवेत्तारं वीक्ष्य श्रीषेण–आर्यभट–विष्णुचन्द्रोक्तानां मध्यग्रहानयनवेत्तारः सदसि अभिमुखा न भवन्ति यथा हरिणाः सिंहं दृष्ट्वा तस्याभिमुखा न भवन्तीति स्पष्टोऽर्थः ॥ ६२ ॥

इदानीं मध्यमाधिकारस्योपसंहारमाह ।

युगभगणमानयाताहर्गणदिनवारमध्यमाद्येषु ।
मध्यमगतिस्त्रिषष्ट्यार्याणां प्रथमः कृतोऽध्यायः ॥ ६३ ॥

इति श्रीब्राह्मस्फुटसिद्धान्ते मध्यमाधिकारः प्रथमः ॥ १ ॥

आर्याणां त्रिषष्ट्याऽयं मध्यमगतिरध्यायः कृत इति ॥ ६३ ॥

मधुसूदनसूनुनोदितो यस्तिलकः श्रीपृथुनेह जिष्णुजोक्ते ।
हृदि तं विनिधाय नूतनोऽयं रचितो मध्यगतौ सुधाकरेण ॥

इति श्रीकृपालुदत्तसूनुसुधाकरद्विवेदिविरचिते ब्राह्मस्फुटसिद्धान्त-नूतनतिलके मध्यमाधिकारः प्रथमः ॥ १ ॥

अथ स्पष्टाधिकारः ।

तत्रादौ तदारम्भप्रयोजनमाह ।

यस्मान्न मध्यतुल्यः प्रतिदिवसं दृश्यते ग्रहो भगणे ।
तस्माद्दृक्तुल्यकरं वक्ष्ये मध्यस्फुटीकरणम् ॥ १ ॥

भगणे भवलये । शेषं स्पष्टार्थम् ॥ १ ॥

इदानीमर्धज्या आह ।

अर्धज्या मनुयमला मुनियमवेदा वसुज्वलनषट्काः ।
रसकृतवसवः शशिपञ्चखेन्दवश्चन्द्रशरसूर्याः ॥ २ ॥
षड्दधिमनवो भूताग्निरसशशाङ्का मुनीन्दुवसुचन्द्राः ।
इन्दुनवनन्दचन्द्रा रसतिथियमला रविस्त्रियमाः ॥ ३ ॥
छिद्रेषुजिनाः कृतनवपञ्चयमा नन्दचन्द्रमुनिपञ्चाः ।
दन्ताष्टयमा गुणरामनवयमाः शशियमखरामाः ॥ ४ ॥
ऋतुनवखगुणा नवशरचन्द्रगुणाः सप्तशून्ययमदहनाः ।
द्विजिनगुणास्त्रिरसरदाः खसप्तयमवह्नयो व्यस्ताः ॥ ५ ॥

मनुयमला इत्याद्यर्धज्याश्चतुर्विंशतिर्वृत्तपादे सन्ति । व्यस्ता उत्क्रमज्या इत्यस्याग्रे संबन्धः ।

अर्धज्याः क्रमज्याश्च चतुर्विंशतिः ।

२१४ । ४२७ । ६३८ । ८४६ । १०५१ । १२५१ । १४४६ । १६३५ ।
१८१७ । १९९१ । २१५६ । २३१२ । २४५९ । २५९४ । २७१९ । २८३२ ।
२९३३ । ३021 । ३०९६ । ३१५९ । ३२०७ । ३२४२ । ३२६३ । ३२७० ।

इदानीमुत्क्रमज्या आह ।

मुनयोऽष्टयमास्त्रिरसा रुद्रशशाङ्काः समुद्रमुनिचन्द्राः ।
नववेदयमा मुनिगुणहुताशना वसुगुणसमुद्राः ॥ ६ ॥
भूमीन्द्रियेषवो रसनगर्तवश्चन्द्रशीतकरवसवः ।

शरवसुनन्दाः सागररुद्रशशाङ्का नवाङ्कार्काः ॥ ७ ॥
त्रिविषयवेदशशाङ्काः पञ्चाग्निरसेन्दवोऽब्धियमधृतयः ।
अतिधृतिखयमा नवशशियमपञ्चाः सागरद्विजिनाः ॥ ८ ॥
रदरसयमला गुणवेदवसुयमाः षट्कविषयशून्यगुणाः ।
खमुनिरदा व्यासार्धं नवरदचन्द्रा जिनांशज्या ॥ ९ ॥

उत्क्रमज्याश्चतुर्विंशतिश्च वृत्तपादेऽधो लिखिताः सन्ति ।

७ । २८ । ६३ । १११ । १७४ । २४९ । ३३७ । ४३८ ।
५५१ । ६७६ । ८११ । ९८५ । १११४ । १२९९ । १४५३ । १६३५ ।
१८२४ । २०१९ । २२१९ । २४२४ । २६३२ । २८४३ । ३०५६ । ३२७० ।

नवरदचन्द्राः = १३२९ जिनांशानां परमक्रान्त्यंशानां ज्याऽस्तीयं सन्ततोपयोगित्वात् पठितेत्यर्थः ।

अत्रोपपत्तिः । वृत्तपादे चतुर्विंशतिः क्रमज्या उत्क्रमज्याश्च $\frac{९०^\circ}{२४} = \frac{९० \times ६०'}{२४} = २२५'$ कलावृद्ध्या आचार्येण खमुनिरद ३२७० व्यासार्धे ज्योत्पत्तिविधिनाऽऽनीय पठिता इति सुगमा । तद्यथा । भास्करादीनां मते वसुपावकवेदराम ३४३८ व्यासार्धे प्रथमज्या स्वल्पान्तरात् २२५ । इय-माचार्योक्तव्यासार्धेना ३२७० नेन गुणा वसुपावकवेदराम ३४३८ हृता जाताऽऽचार्योक्ता प्रथमज्या $= \frac{२२५ \times ३२७०}{३४३८} = \frac{२५ \times ३२७०}{३८२} = \frac{२५ \times १६३५}{१९१}$ $= \frac{४०८७५}{१९१} = २१४\frac{१}{१९१} = २१४$ स्वल्पान्तरात् । एवमन्याः क्रमज्या उत्क्रम-ज्याश्च सिध्यन्ति ।

आचार्येण किमर्थं त्रिज्या खमुनिरद ३२७० मिता गृहीता इत्यस्य मीमांसा भूमिकायां भविष्यति । एवं पठिताभिर्ज्याभिश्चतुर्विंशतिभागानां ज्या १३२९ एतावती परमक्रान्तिज्या भवतीति स्फुटा वासना ॥ ३–९ ॥

इदानीं चापात् ज्यानयनमाह ।

खिप्तास्तत्त्वयमहृता लब्धज्या ज्यान्तराहतात् शेषात् ।

तिथिकृतिहृतात् फलयुता लब्धज्या ज्याग्रहणमेवम् ॥ १० ॥

तिथिकृतिः शतद्वयाधिका पञ्चविंशतिः = २२५ । शेषं स्फुटार्थम् ।

अत्रोपपत्तिः । 'तत्त्वाश्विभक्ता असवः कला वे'त्यादि भास्करानयनोपपत्तिवत् स्फुटा ॥ १० ॥

इदानीं जीवातश्चापानयनमाह ।

ज्यां प्रोह्य शेषगुणितास्तत्त्वयमा ज्यान्तरोद्धृता लब्धम् ।
योज्यं विशुद्धजीवासंख्यातिथिकृतिवधे चापम् ॥ ११ ॥

स्पष्टार्थमुपपत्तिश्च ज्यासाधनवैपरीत्येन सुगमा ॥ ११ ॥

इदानीं मन्दशीघ्रकेन्द्रे केन्द्रबाहुकोटिज्ये चाह ।

मध्याद्विशोध्य मन्दं शीघ्रात्संशोध्य मध्यमं केन्द्रम् ।
अयुजि गतयेययोर्युजि पदेऽन्यथा बाहुकोटिज्ये ॥ १२ ॥

अयुजि पदे गतयेययोर्गतगम्ययोर्बाहुकोटिज्ये साध्ये । अर्थात् विषमपदे गताद्भुजज्या गम्यात् कोटिज्या साध्या । युजि समे पदेऽतोऽन्यथाऽर्थात् गम्याद्भुजज्या गतात्कोटिज्या साध्या । शेषं स्पष्टार्थम् ।

अत्रोपपत्तिः । 'मृदूच्चेन हीनो ग्रहो मन्दकेन्द्र'मित्यादि भास्करोक्तविधिना स्फुटा ॥ १२ ॥

इदानीं स्पष्टपरिध्यानयनमाह ।

त्रिज्याहृता भुजज्या युगयुक्परिधिद्वयान्तरगुणाप्त्या ।
युग्मान्तपरिधिरधिको हीने हीनोऽधिके स्पष्टः ॥ १३ ॥

भुजज्या केन्द्रज्या युगयुक्परिधिद्वयान्तरेण युग्मान्तौजान्तपरिध्योरन्तरेण गुणा त्रिज्याहृता । आप्त्या लब्ध्या युग्मान्तपरिधिरधिकः कार्यो यद्योजान्तपरिधेर्युग्मान्तपरिधिरल्पो भवेदधिके च लब्ध्या हीनः कार्यस्तदा स्पष्टः परिधिर्भवेत् ।

अत्रोपपत्तिः । त्रिज्यातुल्यया केन्द्रभुजज्यया यदि युग्मान्तौजपरिध्यन्तरं लभ्यते तदेष्टकेन्द्रज्यया किं लब्धं परिध्यन्तरस्य चयापचयवशाद्

धनर्णमित्यादिवासना सुगमा ॥ १३ ॥

इदानीं भुजकोटिफले स्पष्टां कोटिं चाह ।

तद्गुणिते ज्ये भांशैर्हृते फले कोटिफलयुता त्रिज्या ।
आद्यन्तयोर्विहीना पदयोर्द्वितृतीययोः कोटिः ॥ १४ ॥

ज्ये भुजकोटिज्ये तेन स्पष्टपरिधिना गुणिते भांशै ३६० र्हृते फले भुजकोटिफले भवतः । त्रिज्याऽऽद्यन्तयोः पदयोरर्थात् मृगादिकेन्द्रे कोटिफलेन युता कार्या । द्वितृतीययोः पदयोरर्थात् कर्क्यादिकेन्द्रे त्रिज्या कोटिफलेन विहीना कार्या तदा कोटिः स्पष्टा कोटिर्भवतीत्यर्थः ।

अत्रोपपत्तिः । 'स्वेनाहते परिधिना भुजकोटिजीवे' तथा 'त्रिज्या तथा कोटिफलेन युक्ता' इत्यादि भास्करोक्तेन विधिना स्फुटा ॥ १४ ॥

इदानीं कर्णानयनं प्रकारान्तरेण भुजफलानयनं चाह ।

तद्भुजफलकृतियोगात् मूलं कर्णः पदेष्वयुग्युक्षु ।
स्वपरिधिगुणा क्रमोत्क्रमजीवा भांशैर्हृता मन्दे ॥ १५ ॥

तस्याः स्फुटकोटेर्भुजफलस्य च कृत्योर्योगात् मूलं कर्णो भवेत् । अयुक्पदे क्रमज्या केन्द्रक्रमज्या स्वपरिधिगुणा युग्मपदे केन्द्रोत्क्रमज्या स्वपरिधिगुणोभयत्र भांशै३६०र्हृता, मन्दे इत्यस्यार्थे संबन्धः । एवमुत्क्रमज्यातो यत्फलं तत्परमे भुजफले हीनं कार्यमित्यध्याहार्यम् ।

अत्रोपपत्तिः । कर्णानयने भास्करोक्तैव । प्रथमपदे गतांशानां क्रमज्या स्वपरिधिगुणा भांशहृता पूर्वप्रकारेण भुजफलं स्फुटमेव । द्वितीयपदे गम्यांशानां क्रमज्या गतोत्क्रमज्योनत्रिज्यासमा सा परिधिगुणा भांशहृता जातं भुजफलम् $= \frac{\text{परि (त्रि} - \text{उत्क्रमज्या)}}{\text{भांश}}$

$= \text{परमभुजफल} - \frac{\text{परि} \times \text{उत्क्रमज्या}}{\text{भांश}}$ । एवं युग्मपदे उत्क्रमज्यातो यत्फलं तेन परमं भुजफलं हीनं तदा वास्तवं भुजफलम् । एवं क्रमेण चतुर्षु पदेषु भुजफलम् ।

प्रथमपदे

$\frac{\text{क्रमज्या}\cdot \text{प}}{\text{भांश}}$, पदान्ते परमं भुजफलम्

द्वितीयपदे

परमं भुजफलम् $-\frac{\text{उत्क्रमज्या}\cdot \text{प}}{\text{भांश}}$

पदान्ते शून्यं भुजफलम् ।

तृतीयपदे

$\frac{\text{क्रमज्या}\cdot \text{प}}{\text{भांश}}$, पदान्ते परमं भुजफलम्

चतुर्थपदे

परमं भुजफलम् $-\frac{\text{उत्क्रमज्या}\cdot \text{प}}{\text{भांश}}$

पदान्ते शून्यं भुजफलम् ।

अत्रोत्क्रमज्यागतं फलं परमे भुजफले ऋणं कार्यमित्याध्याहारश्चतुर्वेदाचार्यसम्मतः । वस्तुत आचार्यसूत्रतो नायमर्थ उत्पद्यते ॥ १५ ॥

इदानीं पूर्वागतफलस्य क्षयत्वं धनत्वं ततो भुजफलं च संस्कारेणाह ।

क्षयधनधनक्षयास्तत्फलानि शीघ्रेऽन्यथा धनं धनयोः ।
ऋणमृणयोर्योगोऽन्तरमृणधनयोस्तुल्ययोः शून्यम् ॥ १६ ॥

पूर्वागतफलानि मन्दे मन्दकर्मणि पदक्रमेण क्षय-धन-धन-क्षया भवन्ति । शीघ्रे शीघ्रकर्मणि चान्यथाऽर्थात् पदक्रमेण धनक्षयक्षयधनानि भवन्ति । ततो धनयोर्योगो धनमृणयोर्योगश्च ऋणं तथा ऋणधनयोरन्तरं च संस्कारवशतो धनर्णं भुजफलं भवति । धनर्णयोस्तुल्ययोर्वशात् शून्यमेव भुजफलमित्यर्थतः सिध्यति ।

अत्रोपपत्तिः । प्रथमद्वितीयपदयोर्मेषादिकेन्द्रम् । तृतीयचतुर्थपदयोश्च तुलादिकेन्द्रम् । मेषादिकेन्द्रे मन्दकर्मणि भुजफलचापसमं मन्दफलमृणं तुलादिकेन्द्रे च धनम् । अतः प्रथमे पदे भुजफलमृणं द्वितीये च ऋणम् । एवं तृतीयचतुर्थपदयोर्भुजफलं धनं यतस्तस्माद्बुनमन्दफलमुत्पद्यते ।

द्वितीयपदे भुजफलं पूर्वागतम् = परमभुजफ $-\frac{\text{प}\cdot \text{उत्क्रमज्या}}{\text{भांश}}$ धनर्णव्यत्यासेन भुजफलम् = $-$ परमभुजफ $+\frac{\text{प}\cdot \text{उत्क्रमज्या}}{\text{भांश}}$ । एवं चतुर्थपदे पूर्वागतं भुजफलं धनम् = परमभुजफ $-\frac{\text{प}\cdot \text{उत्क्रमज्या}}{\text{भांश}}$ । प्रथमे पदे ऋणं तृतीये धनं मेषतुलादिकेन्द्रत्वात् प्रसिद्धमेव । एवं पदक्रमेण फलानि मन्दे क्षयधन-

धनक्षयाख्यानि भवन्ति । शीघ्रे च व्यस्तशोधनेन केन्द्रं साधितमतस्तत्र मेषादिकेन्द्रे धनं तुलादिकेन्द्रे क्षयं फलं भवति । अतस्तत्रान्यथा भुजफलं साधितम् ॥ १६ ॥

इदानीं मन्दफलं शीघ्रफलं चाह ।

तच्चापं मन्दफलं फलयोगान्तरवशात् धनमृणं वा ।
शीघ्रफलं तद्गुणिताद्व्यासार्धात् कर्णलब्धधनुः ॥ १७ ॥

तस्य मन्ददोःफलस्य चापं मन्दफलं पूर्वसाधितयोः फलयोर्योगान्तरवशाद् धनं वा क्षयं भवति । व्यासार्धात् तेन पूर्वागतेन शीघ्रभुजफलेन गुणितात् शीघ्रकर्णेन तस्माद्यल्लब्धं तस्य धनुः शीघ्रं फलं भवति ।

अत्रोपपत्तिः । भास्करमन्दशीघ्रफलसाधनविधिना स्फुटा ॥ १७ ॥

इदानीं स्फुटौ रविचन्द्रावाह ।

देशान्तरे खमध्ये भुजफलचापे भुजान्तरे च कृते ।
उन्मण्डलेऽर्कचन्द्रौ स्पष्टौ रविचरदले क्षितिजे ॥ १८ ॥

यदि खमध्ये स्पष्टमध्याह्ने स्फुटौ रविचन्द्रावपेक्षितौ तदा मध्ये रवौ चन्द्रे वा भुजफलचापे मन्दफले भुजान्तरे देशान्तरे च संस्कृते सति रविचन्द्रौ स्फुटौ भवतः । एवमुन्मण्डले स्वनिरक्षक्षितिजे च फलत्रयसंस्कारेण स्फुटौ रविचन्द्रौ भवतस्तत्र रविचरदले रविचरार्धफले च संस्कृते स्वक्षितिजे रविचन्द्रौ स्फुटौ स्तः । अर्कोदयास्तमययोरित्यग्रिमश्लोकेन संबन्ध इति ।

अत्रोपपत्तिः । भास्करविधिना स्फुटा ॥ १८ ॥

इदानीं चरार्धसंस्कारे विशेषमार्यभटदूषणं चाह ।

अर्कोदयास्तमययोर्विना चरार्धेन रात्रिदिनदलयोः ।
न स्फुटमार्यभटोक्तं स्पष्टीकरणं स्फुटोक्तिरतः ॥ १९ ॥

रात्रिदिनदलयोरर्धरात्रे दिनार्धे च चरार्धेन विना विना चरसंस्कारेण स्फुटौ रविचन्द्रौ भवतः ।

आर्यभटोक्तं स्पष्टीकरणं न स्फुटमतः स्फुटोक्तिः स्फुटीकरणस्योक्तिः कथनं युक्ताऽस्ति—इत्यात्मस्फुटीकरणारम्भे कारणं कथयति ब्रह्मगुप्त इति ।

अत्रोपपत्तिः । गोलयुक्त्या स्वदेशनिरक्षयो राज्यर्धं दिनार्धे च युगपदेव भवति। अतस्तत्र चरसंस्काराभाव इति स्फुटं गोलविदामिति ॥ १९॥

इदानीं स्पष्टीकरणार्थं रविचन्द्रयोर्मन्दपरिधिभागानाह ।

सूर्यस्य मनुद्वितयं त्र्यंशोनं दिनदले नतस्य प्राक् ।
तिथिघटिकाभिस्त्र्यंशाधिकोनमूनाधिकं पश्चात् ॥ २० ॥
द्युदले जिनलिप्तोनं दशनद्वितयं द्विशरकलोनं प्राक् ।
पश्चात् युतोनमिन्दोः सूर्य इव ऋणे धने परिधिः ॥ २१ ॥

ऋणे वा धने मन्दफले सूर्यस्य दिनदले मनुद्वितयं त्र्यंशोनं कार्यम् । अर्थात् चतुर्दश भागा द्विधोभयत्र भागत्र्यंशेन हीनास्तदा ते ऋणे वा धने मन्दफले मध्याह्ने मन्दपरिधिभागा भवन्ति। ऋणे धने च फले मध्याह्नतः प्राक् पञ्चदशघटिकाभिर्नतस्य रवेर्दिनदलपरिधिमानं यथासंख्यं त्र्यंशाधिकोनं कार्यम् । पश्चिमे कपाले च पञ्चदशभिर्घटिकाभिर्नतस्य रवेर्ऋणे धने च फले तद्दिनदलपरिधिमानं यथासंख्यं भागत्र्यंशेनोनाधिकं कार्यम् । एवं प्राक् पश्चादुन्मण्डलस्थे रवौ तस्य मन्दपरिधिभागा भवन्ति । एवं चन्द्रस्य ऋणे धने च फले दशनद्वितयं जिनलिप्तोनं तदा द्युदले मन्दपरिधिभागा भवन्ति । सूर्य इव प्राक् पश्चात् पञ्चदशघटिकाभिर्नते विधौ ऋणे च फले तद्दिनदलपरिधिमानं द्विशरकलोनम् । धने फले ताभिर्घटिकाभिः प्राक् पश्चान्नते विधौ तद्दिनदलपरिधिमानं द्विशरकलाभिः क्रमेण युतोनं तदा प्राक् पश्चादुन्मण्डलस्थे विधौ तस्य मन्दपरिधिभागा भवन्ति ।

एवं रवेर्ऋणफले		धने मन्दफले	
प्रागुन्मण्डलस्थे रवौ	= १४° । ०′	प्रागुन्मण्डलस्थे रवौ	= १३° । २०′
मध्याह्ने	= १३ । ४०	मध्याह्ने	= १३ । ४०
पश्चिमोन्मण्डलस्थे रवौ	= १३ । २०	पश्चिमोन्मण्डलस्थे	= १४ । ०

चन्द्रस्य ऋणफले		धने फले	
प्रागुन्मण्डलस्थे विधौ	= ३०° । ४४′	प्रागुन्मण्डलस्थे विधौ	= ३०° । ४४′
मध्याह्ने	= ३१ । ३६	मध्याह्ने	= ३१ । ३६
पश्चिमोन्मण्डलस्थे	= ३२ । २८	पश्चिमोन्मण्डलस्थे	= ३० । ४४

अत्र भास्कराचार्यः । 'चतुर्वेदाचार्येणाप्युपलब्धिरेव वासनेत्यभिहितम् । यदीदृश्युपलब्धिरस्ति तदाऽस्माभिः किं नाङ्गीकर्त्तव्यमिति भावः ॥ २१ ॥

इदानीमभीष्टे नते स्फुटपरिध्यानयनमाह ।

तद्युदलपरिध्यन्तरगुणा हृता त्रिज्यया च नतजीवा ।
ऊने धनमृणमधिके दिनार्धपरिधौ स्फुटः परिधिः ॥ २२ ॥

स्पष्टार्थमुपपत्तिश्च त्रैराशिकेन स्फुटा । 'तिथ्यन्तनाडीनतबाहुमौर्व्या लघ्व्यार्कशीतांशुफले विनिघ्ने' इति भास्करोक्तं द्रष्टव्यं स्पष्टाधिकारे ॥ २२ ॥

इदानीं मन्दफलस्य धनर्णत्वमाह ।

भुजफलचापं केन्द्रे षड्राश्यूने रवावृणं मध्ये ।
स्वभुजफलचापमेवं षड्राश्यधिके धनं भवति ॥ २३ ॥

षड्राश्यूने केन्द्रे मेषादिकेन्द्रे षड्राश्यधिके तुलादिकेन्द्रे मध्ये रवौ भुजफलचापं मन्दफलं क्रमेण ऋणं धनं कार्यमिति ।

अत्रोपपत्तिः । 'तुलाजादिकेन्द्रे फलं स्वर्णमेवं मृदु ज्ञेय' मित्यादि भास्करोक्त्या स्फुटा ॥ २३ ॥

इदानीं रविचन्द्रस्फुटीकरणे विशेषमाह ।

देशान्तराद्यमेवं स्पष्टीकरणं दिनार्धपरिधिभ्याम् ।
कृत्वा तत्तिथ्यन्तस्फुटपरिधिभ्यां स्फुटावसकृत् ॥२४॥

एवं पूर्वोक्तं रविचन्द्रयोर्दिनार्धपरिधिभ्यां देशान्तराद्यं स्पष्टीकरणं कृत्वा स्फुटाभ्यां रविचन्द्राभ्यां ग्रहणे तिथ्यन्तं साधयेत् । ततस्तत्तिथ्यन्तकालिकाभ्यां रविचन्द्रयोः स्फुटपरिधिभ्यां पुनः स्पष्टौ रवि-

चन्द्रौ कार्यौ ताभ्यां पुनस्तिथ्यन्तस्ततः पुनः स्फुटपरिधिभ्यां स्फुटौ रविचन्द्रौ। एवमसकृत् स्फुटौ रविचन्द्रौ ग्रहणोपयोगिनौ भवत इति भास्करोक्त आचार्याभिप्रायः स्फुटः ।

श्रीब्रह्मगुप्तोक्तं नतकर्म सकृद्विधिनैव यथा स्यात् तथाऽत्र प्रदर्श्यते। कल्प्यते गणितागततिथ्यन्तकालस्यासकृत्साधितनतकर्मसंस्कृतरविचन्द्रोत्पन्नतिथ्यन्तकालस्य चान्तर्गता घट्यः = या। तत्संबन्धिनोंऽशाः = ६ या। गणितागततिथ्यन्तकाले रवेर्नतकालांशाः = न। अनयोः संस्कारो वास्तवनतकालांशाः = न ± ६ या। यदि षष्ट्या घटीभिर्गत्यन्तरकला लभ्यन्ते तदा 'या' घटीभिः का इति जाता 'या' घटीषु रविचन्द्रयोरन्तरकलाः $= \frac{(\text{चंगक} - \text{रगक})\,\text{या}}{६०} = \text{ग}\cdot\text{या}$। $\left(\text{अत्र ग} = \text{गत्यन्तरम्} = \frac{\text{चंगक} - \text{रगक}}{६०}\right)$

अथ 'तिथ्यन्तनाडीनतबाहुमौर्व्या' इत्यादि भास्करोक्तविधिना वास्तवं नतकर्म सूर्यस्य $= \frac{\text{रफ}\cdot \text{ज्या}\,(\text{न} \pm ६\,\text{या})}{४६२०} = \text{रफं}\cdot\text{ज्या}\,(\text{न} \pm ६\text{या})$।

चन्द्रस्य $= \frac{\text{चफ}\cdot\text{ज्या}\,(\text{न} \pm ६\text{या})}{४३७५} = \text{चफं}\cdot\text{ज्या}\,(\text{न} \pm ६\text{या})$ ।

अत्र $\text{रफं} = \frac{\text{रफ}}{४६२०}$ । $\text{चफं} = \frac{\text{चफ}}{४३७५}$ बोध्यम् ।

अनयोः संस्कारः पूर्वसाधितान्तरेण तुल्यो भवितुमर्हति कथमन्यथा गणितागतयोर्नतकर्मसंस्कृतयोश्च रविचन्द्रयोः 'या' घट्यन्तरे समानमन्तरमुपपद्येत । अतो जातौ तुल्यौ पक्षौ–

$$\text{गया} = \text{चफं ज्या}\,(\text{न} \pm ६\text{या}) - \text{रफं ज्या}\,(\text{न} \pm ६\text{या})$$

$= (\text{चफं} - \text{रफं})\ \text{ज्या}\,(\text{न} \pm ६\text{या})$ । उभयत्र (चफं – रफं) या इत्यनेन भजनात्

$\frac{\text{ग}}{\text{चफं} - \text{रफं}} = \frac{\text{ज्या}\,(\text{न} \pm ६\text{या})}{\text{या}} = \text{परः} = \text{प}$। यदि दशानामंशानां ज्या = २१

तदा '६या' मित्यंशानां केति ज्या६या $= \frac{२१ \times ६\text{या}}{१०}$ । एवम्, ज्या३या

$= \frac{२१ \times ३\text{या}}{१०} = \sqrt{\frac{\text{त्रि}\cdot\text{उज्या६या}}{२}} = \sqrt{६०\cdot\text{उज्या६या}}$ । अतो व्यस्त-

विधिना उज्याद्या $= \dfrac{२१^२ \times ३^२\text{या}^२}{१०^२ \times ६०}$ ॥ अथ 'चापयोरिष्टयोर्दोर्ज्ये' इत्या-

दिना $\text{ज्या}\,(\text{न} \pm \text{६या}) = \dfrac{\text{ज्यान}\cdot\text{कोज्या६या}}{\text{त्रि}} \pm \dfrac{\text{कोज्यान}\cdot\text{ज्या६या}}{\text{त्रि}}$

$$= \text{ज्यान} - \frac{\text{ज्यान}\cdot\text{उज्या६या}}{\text{त्रि}} \pm \frac{\text{कोज्यान}\cdot\text{ज्या६या}}{\text{त्रि}}$$

$$= \text{ज्यान} - \frac{\text{ज्यान}\cdot २१^२ \times ३^२\text{या}^२}{१०^२ \times ६० \times १२०} \pm \frac{\text{कोज्यान}\cdot २१ \times \text{६या}}{१० \times १२०}$$

$$= \text{ज्यान} - \frac{\text{ज्यान}\cdot\text{या}^२}{\left(\frac{२००}{२१}\right)^२ \times २} \pm \frac{\text{कोज्यान}\cdot\text{या}}{\frac{२००}{२१}}$$

$$= \text{ज्यान} - \frac{\text{ज्यान}\cdot\text{या}^२}{२\,\text{हा}^२} \pm \frac{\text{कोज्यान}\cdot\text{या}}{\text{हा}} \quad \left(\text{अत्र हा} = \text{हरः} = \frac{२००}{२१}\right)$$

पूर्वरीत्या, $\text{प} = \dfrac{\text{ज्या}\,(\text{न} \pm \text{६या})}{\text{या}} = \dfrac{\text{ज्यान}}{\text{या}} - \dfrac{\text{ज्यान}\,\text{या}}{२\,\text{हा}^२} \pm \dfrac{\text{कोज्यान}}{\text{हा}}$ ।

उभयत्र हरेण गुणनात् । $\text{ध्रु} = \text{ध्रुवः} = \text{परः} \times \text{हरः} = \dfrac{\text{ज्यान}\cdot\text{हा}}{\text{या}} - \dfrac{\text{ज्यान}\cdot\text{या}}{२\cdot\text{हा}}$ $\pm$ कोज्यान । समशोधनेन ज्यान-भक्तेन च । $\pm \text{अ} = \text{अपरः}$ $= \dfrac{\text{ध्रु} \mp \text{कोज्यान}}{\text{ज्यान}} = \dfrac{\text{हा}}{\text{या}} - \dfrac{\text{या}}{२\,\text{हा}}$ । छेदगमेन । $२\,\text{हा}^२ - \text{या}^२$ $= \pm २\,\text{अ}\cdot\text{हा}\cdot\text{या}$ । समशोधनेन । $\text{या}^२ \pm २\,\text{अ}\cdot\text{हा}\cdot\text{या} = २\,\text{हा}^२$ । वर्गपूरणेन, $\text{या}^२ \pm २\,\text{अ}\cdot\text{हा}\cdot\text{या} + \text{अ}^२\,\text{हा}^२$

$$= \text{अ}^२\text{हा}^२ + २\,\text{हा}^२ = \text{हा}^२\,(\text{अ}^२ + २)$$ । मूलग्रहणेन $\text{या} \pm \text{अ}\cdot\text{हा}$ $= \text{हा}\sqrt{\text{अ}^२ + २}$ । अतः $\text{या} = \text{हा}\,(\sqrt{\text{अ}^२ + २} \mp \text{अ})$ एतेन—

गत्यन्तरकलाः षष्टिभक्ता गत्यन्तरं भवेत् ।
फललिप्ताः स्वहाराप्ता रवीन्द्वोश्च फलं क्रमात् ॥

गत्यन्तरं फलवियोगहृतं विधोः प्राक्
स्वे तत्फलेऽन्यसमये युतिहृत् पराख्यम् ।
खाभ्राश्विनो विधुकरैर्विहृता हरस्त-
चिघ्नं परेण भवति ध्रुवसंज्ञकं तत् ॥

प्रत्यक्षानुमितित्वादिविभागोऽपि करणभेदोपाधिकः सर्वप्रसरणेष्वपि स्वात्मनि प्रत्यक्षप्रकाशात्मिकैव निरतिशयवेगित्वान्निरतिशयसूक्ष्मत्वाच्च सहसैव विप्रकृष्टसम्बन्धोऽप्रतिघातश्च संयोगलक्षणश्चास्याः सम्बन्धः तथोक्तं भाष्यादिषु—सम्बन्धश्च संयोगलक्षणः ज्ञानं च द्रव्यमेवेत्यादि कण्ठोक्तत्या ।

ननु बुद्धेर्नित्यत्वे किं प्रमाणं तथात्वे कथं जागरसुषुप्त्यादिभेदसिद्धिः । किञ्च प्रमाणं प्रसरणे कथं चात्मगुणभूताया बुद्धेर्द्रव्यत्वम् । किञ्च द्रव्यत्वे प्रमाणं कथं चात्मधर्मभूतायास्तस्याः स्वाश्रयादन्यत्र गमनं कथं चोपचयविरलभावाभावे परिमाणान्तरयोगः कथं चातीतानागतैः सम्बन्धः संयोगः कथं च गुणादिभिः कथं वा मध्यस्थितानां सम्बद्धानामप्रकाशत्वं कथं च मुक्तबुद्धेर्युगपत्क्रमेण वाऽनन्तदेशसंयोगः कथं च व्याप्तायां स्वबुद्धिचन्द्रिकायां प्लवमानस्य स्वजालातन्तुविताने लगन्त्या लूतिकाया इव संचाराधीनतत्तद्बुद्धिप्रदेश संयोगस्य स्वबुद्ध्या सह बुद्ध्यन्तरव्यावृत्तः स्वाभाविकः संबन्ध इति, तत्र पूर्वस्मिन्नागम उत्तरम् । यथा न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वादित्यादि, व्याख्यातं चैतदात्मसिद्धौ ज्ञातुरविनाशित्वादेव ज्ञानस्याप्यविनाशित्वमुपपादयन्ती श्रुतिरियं ज्ञातृस्वरूपप्रयुक्तं ज्ञानमिति दर्शयतीति अत्र स्मृतिरपि ।

यथा न क्रियते ज्योत्स्ना मलप्रक्षालनान्मणेः ।
दोषप्रहाणान्न ज्ञानमात्मनः क्रियते तथा ॥
यथोदपानकरणात् क्रियते न जलाम्बरम् ।
सदेव नीयते व्यक्तिमसतः सम्भवः कुतः ॥

तथा हेयगुणध्वंसादवबोधादयो गुणाः ।
प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो हि ते ॥

इत्यादि, सूत्रं च ज्ञोऽत एवेति यावदात्मभावित्वाच्च न दोषस्तद्दर्शनादिति च, द्वितीये तु प्रतिबन्धकं तमः यथा दाहकस्य वह्नेर्मण्यादिसन्निधावदाहकत्वं तदपगमे च हेत्वन्तरनिरपेक्षदाहकत्वं तद्वत्तमोविशेषसन्निधानाभ्यां स्वापादिसिद्धिः उक्तं च पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् इति, अतोजागरादिदशानियतप्रसारणविषयप्रकाशवेलायामेव बुद्धिः प्रकाशते नान्यदेति सुस्थम् ।

यत्तु षडर्थसंक्षेपे श्रीराममिश्रैरुक्तं सत्यं स्वतः सिद्धिः सा सुषुप्तावपि नास्फूर्तिः स्वाश्रयायैव हि सा भाति स एव विशेष इति, स्वावसरे वक्ष्यामः अव्यवहारनियमस्तु करणोपरतिनियमादिति, एवंप्रकारमेव, विवरणेऽप्युक्तं तदेतद्वैभववाद इति मन्तव्यम् अन्यथा पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगादिति सूत्रेण तद्भाष्येण च विरोधात् सर्वविषयप्रकाशनशीलायाः संविदो यथा समस्तबाह्यविषयवैमुख्यं तथाऽऽन्तरविषयविमुखत्वमपि भवतीति किमत्र चित्रम् ।

यत्तु भाष्ये एवं हि सुप्तोत्थितस्य परामर्शः सुखमहमस्वाप्समिति अनेन प्रत्यवमर्शेन तदानीमेवाहमर्थस्यैवात्मनः सुखित्वं ज्ञातृत्वं च ज्ञायत इत्युक्तं तत्स्वरूपानुकूल्यविवक्षया प्रत्यक्षत्वविवक्षया चेति न विरोधः तृतीये तु भगवद्यामुनमुनिभिरेवमेवोक्तं यथा अत इन्द्रियेण सह चैतन्यमपि निःसृत्य तेनतेनार्थेन सन्निकृष्यते हस्तादिनेव त्वगिन्द्रियमित्यभिधाय व्योमवदमूर्तस्य न क्रियावत्त्वमिति चेदित्याशङ्क्य केयं मूर्तिर्नाम यद्विरहिणः

क्रियाऽयोग इत्यादिना परिहृत्य व्यवहितविप्रकृष्टसंबन्धप्रकारं च प्रसाध्य यथाऽऽह भगवान् तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसीति, मनुश्च ।

इन्द्रियाणां हि चरतां यद्येकं क्षरतीन्द्रियम् ।
तेनास्य क्षरति प्रज्ञा दृतेः पादादिवोदकम् ॥

इतीति, अस्ति चात्र श्रुतिः प्रज्ञा च तस्मात्प्रसृता पुराणीति अन्यपरत्वं श्रुतिस्मृत्योरिति चेत् स्वरसप्रतीतेर्बाधकाभावात् बाधितेंऽशे हि तत्, चतुर्थे निदर्शनं प्रभादि यथोक्तं भाष्ये प्रभाद्रव्यस्य दीपगुणभूतस्येव ज्ञानस्याप्यात्मगुणभूतस्य द्रव्यत्वमविरुद्धमिति, प्रभायां च वक्तव्यं प्रागेवोक्तं, प्रपञ्चितं चैव भाष्ये क्वचिदाश्रितस्यैव द्रव्यस्यान्याश्रयित्वमवयविवादिनां त्ववर्जनीयम् । किञ्च न तावदस्माकमद्रव्यमेव गुण इति वैशेषिकादिवन्निर्बन्धः विशेषणादिवत् यो यदाश्रितस्वभावः स तस्य गुण इति हि गुणलक्षणं न तु पारिभाषिकं सर्वव्यवहारविरोधात्, एवं च गुणेषु कश्चिद्विशेषः द्रव्यात्मकगुणाः केवलगुणाश्चेति, पूर्वे ज्ञानादयः उत्तरे सत्त्वरजस्तमःप्रभृतयो वक्ष्यन्ते तत्र गुणैकरूपत्वमात्रादेव सत्त्वादिषु गुणशब्दस्य मुख्यत्वं ज्ञानादिषु गौणत्वं भाष्यस्य विवरणेऽप्युक्तं नित्यपारतन्त्र्याद्धीणो गुणव्यपदेश इति वदन्ति, तस्मिंस्तु पक्षे गुणत्वानभ्युपगमान्न चोद्यावकाशः । अन्ये तु तस्यैव प्रवृत्तिनिमित्तत्वेन मुख्यत्वोपपत्तेर्गौणकल्पनं नानुमन्यन्ते, अस्याश्चेत्यादिभाष्यं तु साधारणं प्रभा द्रव्यस्येत्यादिभाष्यं यद्यपि प्रभा प्रभावद्द्रव्यगुणभूता तथापि शौक्ल्यादिवन्न गुण इत्यादि भाष्यं च मुख्यपक्षस्वरसम् । यत्तु सत्त्वादीनां द्रव्यत्वप्रतिक्षेपेण गुणा इत्येव च सत्त्वादीनां प्रसिद्धिरितिभाष्यं तदपि अवधारणस्वारस्याद् द्रव्यत्वाप्रसिद्धेः,

एवं वरदनारायणभट्टारकपक्षेऽपि न चोद्यावकाशः, ज्ञाने द्रव्यशब्दस्यौपचारिकत्वात् अयमेव गुणः केषां चिद्विवक्षान्तरेण जातिगुणक्रियाद्रव्यरूपेणापि हि विकल्प्यते यथा अनेकेषां धर्मिणामन्तरङ्गोधर्मविशेषो जातिः यन्निरूपिते वस्तुनि प्रायशोविशेषाकाङ्क्षाशान्तिः सोऽन्तरङ्गः तदनुप्राणितस्य तस्य विशेषकः सिद्धो गुणः तथाविधं साध्यं क्रिया एतैर्विशिष्टं द्रव्यमिति एवमेव हि जातिगुणक्रियाद्रव्यवाचित्वं शब्दानाम् अत्रावान्तरगुणशब्दः कथासामान्यविशेषयोर्वादशब्दवत् अत्र चैकमेव वस्तु द्विधा त्रिधा चतुर्धा वा विकल्पयितुं शक्यम्, यथा ज्ञानमेव च संयोगादिमत्तया द्रव्यं तदेवात्मनः प्रत्यक्तया निरूपितस्वरूपस्य विशेषकतया गुणः, जानात्यादिनिर्देशे क्रिया, एवमन्यत्रापि चिन्त्यं सत्त्वं द्रव्यमसत्त्वमद्रव्यमिति वदतां तु सर्वेषां गुणानां द्रव्यत्वं विवक्षितमित्यलं प्रसक्तानुप्रसक्त्या। पञ्चमे तु ब्रूमः बुद्धिर्द्रव्यं प्रसरणादिमत्त्वात् संप्रतिपन्नवत् अत्रैव साध्ये ज्ञानत्वादात्मवदित्यादि। वरदविष्णुमिश्रैस्त्वेवमुक्तं ज्ञानं द्रव्यं संयोगादृष्टान्यत्वे सति भावनाकारणत्वादात्मवदिति, षष्ठस्य चतुर्थ एव वृत्तमुत्तरम्। यदि तु स्वाश्रयत्यागोऽभिमतः स नेष्यते उक्तं ह्यत्रैव संवाधभगवद्यामुनमुनिभिः आत्मप्रहाणानभ्युपगमादविहायैवात्मानमितस्ततश्चेतनेन्द्रियादिद्वारा निःसरति विच्छिन्नायाश्च तस्याः सन्धानासम्भवः शास्त्र एवोक्त इति सप्तमस्याहिकुण्डलदृष्टान्तेन निरासः, न च तावता वहलविरलत्वादिप्रसङ्गः, भिदुरभागवत्स्वेव तथा व्याप्तेः, अस्तु वा वहलत्वादि तथाऽपि न तथा द्रष्टुं स्प्रष्टुं वा शक्यम् अतीन्द्रियत्वात् स्पर्शादिरहितत्वाच्च, न च विरलत्वे सरन्ध्रत्वनियमः सर्वदेसनिरन्तरसंयोगयोग्यस्वरूपत्वात् कथं

तदल्पदेशे पूर्णमिति चेत् स्पर्शशून्यत्वेनाप्रतिघातात्, उक्तं हि निरतिशयसूक्ष्मत्वं न्यायतत्त्वे एतेनैकस्य द्रव्यस्य कालभेदेऽपि नानापरिमाणत्वं नास्तीति वदन्तः प्रत्युक्ताः कालभेदस्यैव विरोध*शामकत्वात् अवयव्यभावाच्च, एवं तर्ह्यात्मनस्तद्देहानुरूपविविधपरिमाणवादिनो दिगम्बरान् प्रति अन्त्यावस्थितेश्चोभयनित्यत्वादविशेष इति सौत्रं चोद्यमत्रापि स्यादिति चेन्न तत्र केवलयुक्त्यादिमूलार्थप्रतिक्षेपे तात्पर्यात्, अष्टमस्योत्तरमात्मसिद्धौ तथा हि कथमतीतानागतयोरसतोश्चैतन्येन संप्रयोग इत्याशङ्क्य विषयविषयिभावप्रकाशमानत्वसंख्यादियोगदवीयोदेशवर्तिज्ञानशीघ्रसंयोगप्रतिबन्धिभिः परिहृतम्। तथा अतीततयाऽनागततया च तावप्यद्यापि विद्येते इति तेन रूपेण बोधसन्निकर्षे नानुपपत्तिरिति च तद्द्रव्यसत्तया संयोगोपपत्तिरुपपादिता, तत्रैवमाशयः यथा कैश्चिदसतोरेव भूतभविष्यतोः सामान्यात्मनाद्यापि वृत्तेः प्राकट्याश्रयत्वमुपपादितं तथा तद्द्रव्यात्मनापि वृत्तेः संयोगोऽप्युपपन्न एव विशिष्टेनासंयोगश्चेद्विशेषाकारेण न प्राकट्यमिति तुल्यमिति, नवमस्य त्वनभ्युपगम उत्तरं, न हि गुणादिभिरपि संबन्धः संयोग एव किं तु संयोगिनिष्ठता यथा परेषां संयुक्तसमवायादिसंबन्धश्च संयोगलक्षण इत्यादिवचनानां संयोगावश्यम्भावे तात्पर्यम्। उक्तं च षडर्थसंग्रहे श्रीराममिश्रैः संयोगस्तदर्हेषु विषयत्वाकारः अनर्हेषु तत्तत्तदन्वयिष्विति, अस्यार्थः संयोगार्हवस्तुनि वर्तमानत्वादिविशिष्टद्रव्यप्रकाशनं संयोगः संयोगानर्हाणां तु रूपादीनां प्रकाशनं तदन्वयिषु आश्रयेषु कारणेषु कार्येषु च यथासम्भवं संयोग इति।

* शमधातोर्मित्त्वेन शमकत्वादित्युचितः पाठः।

यत्तु नैरन्तर्यापरपर्यायमत्यन्तसामीप्यमात्रं च संयोगः स एव परतन्त्राश्रितः समवायपदपरिभाषाभूमिर्वैशेषिकाणामपीति नार्थान्तरत्वमुररीकृत्य विकल्पः सम्भवतीत्यात्मसिद्धावुक्तं तदपि पराभ्युपगतसमवायानभ्युपगमात् स्वमते समवायस्य स्वरूपविशेषानतिरेकादतिरिक्तसम्बन्धाभावपरं न तु गुणगुणिनोः संयोगलक्षणसम्बन्धपरं गुणगुणिनौ संयुक्ताविति यदि केचित्प्रयुञ्जीरँस्तदानीमौपचारिकोऽयं व्यवहार इति ज्ञापयितुं नैरन्तर्यापरपर्यायमित्युक्तं निरन्तरत्वमात्रात् संयुक्तत्वव्यवहारः तावति वैशेषिका युक्त्याभासैरर्थान्तरत्वं पर्यभाषयन्तेत्युक्तं भवति अन्यथा गुणस्य संयोगवत्त्वे तस्यापि द्रव्यत्वं स्यात् द्रव्यलक्षणत्वात्तस्य अवस्थायोगित्वं द्रव्यलक्षणमस्त्विति वचनेऽपि गुणानां ज्ञानसंयोगलक्षणावस्थायोगित्वाद् द्रव्यत्वं दुष्परिहरं न च द्रव्याद्रव्यविभागो माभूदिति वाच्यं भाष्यकारैरेव सत्त्वरजस्तमसामद्रव्यत्वसमर्थनात् अतो यथोक्त एवार्थः। यद्वा नैरन्तर्यमात्रमङ्गीकृत्य संयोगमपि केचिन्नेच्छन्ति तन्मतेनोक्तमिति मन्तव्यं, दशमस्य नायनं तेजोनिदर्शनं योग्यतात्र नियामिकेति चेन्न अत्रापि तुल्यत्वात्, ज्ञानसंयोगे सति काऽपरा योग्यतेति चेत् इन्द्रियसंयोगे सति काऽपरेत्यपि सुवचत्वात् ज्ञानायोग्यत्वे तस्य वस्तुनः केनचिदपि ज्ञानेनाप्रकाश्यत्वं स्यादिति चेन्न ज्ञापकायोग्यत्वेऽपि तुल्यत्वात् स्वभावादेव किञ्चित् ज्ञापकं क्वचिदेव शक्तमिति चेत् तर्हि तत्रैव ज्ञानमिति, अस्तु तर्हि सामग्रीस्वभावादेव ज्ञानस्य प्रतिविषयं प्रतिनियमः किं सम्बन्धेनाधिकेनेति चेन्न ईश्वरज्ञानस्य नित्यस्य तदभावात् निर्विषयत्वेनाज्ञानत्वप्रसङ्गादीश्वराभावप्रसङ्गात् अनित्येषु ज्ञानेष्वयं नियम इति

चेत् सत्यं, तथापि संयुक्तसमवायाद्यविशेषेऽपि रसादिपरिहारेण रूपादौ वर्तमानस्य चक्षुरादेः स्वभावनियमे सत्यपि संयुक्तसमवायादिपरिग्रहवत् व्वन्तव्यम्। उक्तं च न्यायकुलिशे संयोगस्तु प्रसरणवैभवादिप्रतिपादकशास्त्रबलादाश्रित इति योग्यतामात्रेण रूपान्तरादीनामपि ग्रहणप्रसङ्गात्तत्परिहाराय सम्बन्धविशेषाङ्गीकार इति चेत् तर्ह्यत्रापि योग्यतामात्रेण सर्वदा प्रकाशः स्यादिति तत्परिहाराय सम्बन्धपरिग्रहः सामग्र्येवात्रातिप्रसङ्गं निवारयेदिति चेन्न तत्रापि तुल्यत्वात्, सम्बन्धोऽपि तत्र सामग्रीनिविष्ट इति चेत् तत्रापि तस्य निवेशः किं न स्यात् तत्सम्बन्धसामग्र्यैव तन्नियमस्याप्युपपत्तेः, तत्रैव सम्बन्ध इत्यपि हि सामग्रीस्वभावादेव, एकादशे वेगातिशयः शक्तिविशेष ईश्वरसङ्कल्पो वा प्रतिवक्तारः इष्टं च विचित्रवेगित्वं नायनतापनादिमहसां तच्च काष्ठाप्राप्तं युगपत्त्रिचतुरक्षणेन वा विश्वमास्कन्दत इति विश्वसिहि, द्वादशे तु स्वाभाविकं तदीयत्वं तदाश्रितत्वं चेति सञ्चारेऽपि न दोषः यथा व्यापकात्मवादिनः शरीरेन्द्रियादीनां यथैवेश्वरमनुमन्यमानस्य तदीशितव्यानां यथा वा लोके दासभृत्यादिद्वन्द्वानां, यथाच प्रभाप्रभावदादेः, यथाच वैशेषिकादीनां चलाचलत्वेऽप्ययुतसिद्धयोरवयवावयविनोः यथा चास्मत्पक्षे शरीरिणः पुरीतदादिसञ्चारेऽपि शरीराणामिति व्यपगतघनदुर्दिनोबोधभानुरौपनिषदानां बुद्धिरेवोपाधिभेदात्सुखदुःखेच्छाद्वेषप्रयत्नरूपा सुखादिजनकतयाऽभ्युपगतज्ञानातिरेके प्रमाणाभावात् इच्छामि द्वेष्मीत्यादिव्यवहारस्य स्मरामीत्यादिवत् ज्ञानविशेषेणैवोपपत्तेः, वैषयिकसुखदुःखरूपत्वं ज्ञानस्य विषयाधीनमित्यनुकूलत्वप्रतिकूलत्वाविशेषाद्विषयस्यापि सुखदुःखशब्दवाच्यत्वमस्त्येव

प्रपञ्चितमिदं भूमाधिकरणे, तथा वेदार्थसंग्रहे विषयाय-त्तत्वात् ज्ञानस्य सुखरूपतया ब्रह्मैव सुखमित्युक्तं सुषुप्त्याद्यवस्थासु प्रयत्नो नास्त्येव अनुपलम्भात्, अदृष्टादिवशाच्च निश्वसितादिसिद्धिः परैरपि तत्रैव प्रयत्नकारणतया अदृष्टादिकमभ्युपगतं तन्निश्वासाद्यर्थमेव भवतु अतो मध्ये प्रयत्नकल्पकप्रमाणं स्पन्दत्वादिहेतुरन्यथासिद्धः। उक्तं च अन्तराभूतग्रामवदित्याद्यधिकरणे भाष्ये प्रत्यगात्मनः सुषुप्तौ प्राणनं प्रति कर्तृत्वाभावादित्यादि, तस्य सुषुप्तिमूर्च्छादौ प्राणनादेरकर्तृत्वादित्यादि च, कर्तृत्वाभावेऽपि कृतिविजातीयकल्पनं प्रयत्नकृतिशब्दपर्यायत्वप्रसिद्धिगौरवाभ्यां प्रतिहतम्।

नन्वात्मगुणाः सुखादयो माभूवन् मानेवृत्तिभेदास्तु भविष्यन्ति तथा चात्मसिद्धावुक्तं यत्तु सुखादिनिदर्शनेनात्मविशेषगुणतया चितेरागन्तुकत्वमुपपादितं तदपि गुणवृत्तापरिज्ञानेनैत्युपक्रम्य सुखदुःखे च नात्मधर्मौ इन्द्रियसौष्ठवनाशयोरेव तद्भावोपपादनात् व्याकरिष्यते चैतदन्तिमपादार्थसमर्थनावसर इति, साधनविकलता च निदर्शनस्य रागद्वेषादयोऽपि मनोऽवस्थाविशेषाः न साक्षादात्मगुणः विज्ञायते हि कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरेतत्सर्वं मन एवेति, गीयते च इच्छा द्वेषः सुखं दुःखं संघातश्चेतनाधृतिरिति क्षेत्रलक्षणमिति गीतां चोदाहृत्य तदर्थं शरीरलक्षणं चोपपाद्य पुनः किमिदं धीरिति धीशब्दसहपाठमाशङ्क्य उत्प्रेक्षाभिप्रायं तत् न ज्ञप्तिविषयं, तस्याः स्वाभाविकत्वस्य तस्यामेव श्रुतौ श्रूयमाणत्वात्, श्रूयते हि न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यत इतीत्याद्युक्तं, तथा पञ्चवृत्तिर्मनोवद्व्यपदिश्यत इति सूत्रे यथा न कामादिकं मन-

स्तत्त्वान्तरं कामः सङ्कल्पो विचिकित्सा श्रद्धा श्रद्धा-धृतिरधृतिर्ह्रीर्धीर्भीरेतत्सर्वं मन एवेति वचनात् एवं प्राणोऽव्यनोऽपान उदानः समान इत्येतत्सर्वं प्राण एवेति वचनादपानादयोऽपि प्राणस्यैव वृत्तिविशेषाः न तत्त्वा-न्तरमित्यवगम्यत इति भाष्यं तत्कथं सुखादीनामात्म-गुणत्वम् अत्रोच्यते अश्रुतसिद्धान्तस्य पुस्तकनिरीक्षणा-दयं दोषः तथा हि आत्मसिद्धौ तावत् यत्तु सुखादिनि-दर्शनेनेत्यस्यानन्तरम्—

स्वरूपोपाधयो धर्मा यावदाश्रयभाविनः ।
नैवं सुखादिबोधस्तु स्वरूपोपाधिरात्मनः ॥

यथा च बोधोपाधिरात्मस्वभावस्तथोपपादितमिति स्वाभाविकत्वास्वाभाविकत्वाभ्यां बोधमात्रस्य सुखादेश्च भेदमभिधाय सुखदुःखे च नात्मधर्मावित्यादि तु वैभवेन मतान्तरेण वाऽभिहितम् अन्यथा कथमेवमुपसंहारारम्भे ब्रूयात् तदेवमात्मस्वभावभूतस्य चैतन्यस्य विषयसंश्लेष-विशेषगोचर एव निश्चयसंशयादिव्यवहारभेदः तद्विशेष-भाजि चैतन्ये वेति आगन्तुकत्वे इन्द्रियोपाधिकत्वाद्यवि-शेषात्, न च तथोक्तमन्यथा चोक्तम् ।

नन्वश्रुतसिद्धान्तस्येति भवत एव दोषः न स्यात् न्यायतत्त्वशास्त्रप्रकरणं ह्यात्मसिद्धिः तत्र च शास्त्रे ज्ञान-निरूपणात्मकप्रथमपादषष्ठाधिकरणे सर्वं स्पष्टं सूत्रभाष्य-योश्चायं भावः तत्तदवस्थज्ञानजनकत्वावस्थाभेदभिन्नं मन-स्तैर्व्यपदिश्यत इति निर्व्यूढञ्च तुल्यन्यायमसङ्गतेरित्य-धिकरणे अध्यवसायाभिमानचिन्तावृत्तिभेदान्मन एव बुद्ध्यहङ्कारचित्तशब्दैर्व्यपदिश्यत इति, उक्तं च वेदार्थ संग्रहे दुःखज्ञानमलाधर्माः प्रकृतेस्ते न चात्मन इति,

अत्र प्रकृतिसंसर्गकृतकर्ममूलत्वान्नात्मस्वरूपप्रयुक्तधर्मा इत्यर्थः प्राप्ताप्राप्तविवेकेन प्रकृतेरेव धर्मा इत्युक्तमिति, तथा तत्रैव भक्तिशब्दश्च प्रीतिविशेषे वर्तते प्रीतिश्च ज्ञानविशेष एवेत्युक्त्वा ननु च सुखं प्रीतिरिति नार्थान्तरं सुखं च ज्ञानविशेषसाध्यं पदार्थान्तरमिति हि लौकिका इति चोद्यं कृत्वा नैवं येन ज्ञानविशेषेण तत्साध्यमित्युच्यते स एवज्ञानविशेषः सुखम् एतदुक्तं भवति विषयज्ञानानि सुखदुःखमध्यस्थसाधारणानि तानि च विषयाधीनविशेषाणि तथा भवन्ति येन विषयविशेषेण विशेषितञ्ज्ञानं सुखस्य जनकमित्यभिमतं तद्विषयज्ञानमेव सुखम्। तदतिरेकि पदार्थान्तरं नोपलभ्यते तेनैव सुखित्वव्यवहारोपपत्तेश्चेत्याद्युक्तम् इच्छा द्वेष इत्यादिभगवद्गीतावचनन्तु तत्रैव भाष्यकारैर्निर्व्यूढम् इच्छा द्वेषः सुखं दुःखमिति क्षेत्रकार्याणि क्षेत्रविकारा उच्यन्ते यद्यपीच्छा द्वेषसुखदुःखान्यात्मधर्मभूतानि तथाऽप्यात्मनः क्षेत्रसम्बन्धप्रयुक्तानीति क्षेत्रकार्यतया क्षेत्रविकारा उच्यन्ते तेषांपु रुषधर्मत्वं पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यत इति वक्ष्यतीति, उक्तं च श्रीराममिश्रैः षडर्थसंक्षेपे वेद्यभेदधीभेदः सुखमन्यादृष्टेरित्यादि, उक्तं च श्रीवरदविष्णुमिश्रैरपि सुखदुःखे तावदनुकूलप्रतिकूलविषये ज्ञाने एवेति गुणेष्वन्तर्भाव एवेत्यादि, उक्तं च सङ्गतिमालायां श्रीविष्णुचित्तैः एवं परमात्मनः पावकप्रकाशौष्ण्यादिस्थानीयं जीवस्वरूपमपि सुषुप्तिसंहारयोः परमात्मनोभेदकसंशयनिर्णयविपर्यया यथा ज्ञानप्रत्यक्षानुमानागमरागद्वेषलोभमोहमदमात्सर्यधैर्यविचिकित्साश्रद्धालज्जाभयाद्यनन्तज्ञानप्रसरणरूपविकारभेद शून्यमित्यादि तत्सिद्धं सुखादयो बुद्धिविशेषा इति तर्हि नित्यसर्वविषयस्येश्वरज्ञानस्य कथ-

मिच्छाद्याकारत्वमिति चेत् उपाधिविशेषाद्वा अनित्यज्ञानान्तरसद्भावाद्वा यथातथा वा भवतु अभ्युपगतं हीन्द्रियजन्मानित्यमपि ज्ञानमीश्वरस्यास्तीति वरदविष्णुमिश्रादिभिः। यदुक्तमीश्वरज्ञानस्य सर्वविषयनित्यज्ञानगृहीतग्राहित्वादिति अस्यापीन्द्रियजत्वादिति च प्रज्ञापरित्राणे स्वयं सिद्धिप्रकरण एवमुक्तम्।

सुखदुःखे च विज्ञानविशेषाविति केचन।
तन्न साधुशरीरस्य पादादिषु हि ते अमू॥
तत्रतत्रात्मनस्तस्यासन्निधानादणुत्वतः।
तद्धर्मभूतविज्ञानस्यापि नैवास्ति सन्निधिः॥

इत्युक्त्वा अनन्तरं जीवस्यबन्धमोक्षावस्थयोर्द्वयोरप्यणुत्वमुपपाद्य।

यावदाश्रयवर्त्यैव विगीत ज्ञानमुच्यते।
धर्मत्वे सति धीत्वेन ब्रह्मविज्ञानवत्त्वतः॥
गुणत्वमेव ज्ञानस्य न तु द्रव्यत्वसम्भवः।
अतीतानागता अर्था अपि भान्ति च धीबलात्॥
संयोगमनपेक्ष्यैव सर्वत्राप्यर्थकृत्यकृत्।
तस्माद्विषयविषयिभावः सम्बन्ध एव हि॥
ज्ञानार्थयोस्तु सम्बन्धः सोऽखिलैरपि संविदः।
स्वतः सर्वार्थसम्बन्धिन्येषा धीः सर्वगोच्यते॥
अगत्वा सर्वसम्बन्धिसर्वग्राहि प्रचक्षते।
स्वाश्रयायुक्तवस्तुष्वप्यस्याः कार्यकरत्वतः॥
गुणवैरूप्यसद्भावाद् द्रव्यता भाष्यभाषिता।
स्वाश्रयश्लिष्ट एवार्थे स्पर्शाद्याः कार्यकारिणः॥
दाहस्फोटादि कार्यं ते कुर्वते नेदृशी हि धीः।

गुणवैरूप्यमेवास्या द्रव्यशब्देन लक्ष्यते ॥
भावान्तरं तदा प्राप्तं शक्तिवज्ज्ञानमप्यतः ।
द्रव्यत्वपक्षे ज्ञानस्य परिणामानिरूपणात् ॥
वैयर्थ्याच्च गुणो वा तद्भावान्तरमथापि वा ।
देहदेशोत्थमप्येतत्सुखं दुःखं च देहिनः ॥
आत्मनो धीमहिम्नैव भासेते ते तथातथा ।
अनात्मकशरीरे तदृष्टेरात्मनो गुणौ ॥
इति चेन्नाशरीरस्यासम्भवान्नात्मनो गुणौ ।
सकर्मकात्तु देहस्य गुणौ ते आत्मनो गुणात् ॥
ज्ञानाद्भात इति प्राज्ञैः परिकल्प्य इति स्थितिः ।
कर्मिणश्चेतनस्यानुभाव्यत्वेनैव सम्भवः ॥
तयोरिति प्रकाशेनाव्यभिचारोऽन्यथा वृथा ।
इच्छादयो न देहैकदेहवर्तिन इत्यतः ॥
आत्मनः स्युर्गुणा ज्ञानविशेषाश्च प्रकीर्तिताः ।
जलाधारेष्वनेकेषु भास्करस्योपलब्धिवत् ॥
अणोरप्यात्मनोऽनेकदेहेष्वस्तूपलम्भनम् ।
योगिनां शक्तिवैचित्र्यादीश्वरानुग्रहेण वा ॥
बहुदेहाः प्रवर्तन्त एकदेहवदञ्जसा ।
अन्तरालाग्रहात्तेषां स्वात्मनश्च स्वयेच्छया ॥
सन्निधानोपलब्धिः स्यात्तत्रतत्राहमित्यपि ।
प्रतिदेहं विविक्तानि मनःप्रभृतिकान्यपि ॥
इन्द्रियाणीश्वरेच्छाद्यैः प्रवर्तन्ते तु योगिनः ।
मुक्तश्चानेकदेहान् संगृह्णाति स्वेच्छयैव तु ॥
सर्वज्ञ एव कामान्नीकामरूप्यनुसञ्चरेत् ।
प्रदीपः प्रभयेवात्मा ज्ञानेनाखिलमाविशेत् ॥

इत्यादिव्यवहारश्च प्रकाश्यत्वनिबन्धनः ।
अतीतानागता नार्थाः प्रभया भान्ति जातु चित् ॥
ते च ज्ञानेन भान्त्यातो न साम्यं सर्वथा मतम् ।
स्वरूपेणाणुरात्मायं गुणद्वारेण सर्वगः ॥
उभयव्यवहारोऽपि युज्यते प्रत्यगात्मनः ।
परमात्मा स्वरूपेणाप्यशेषव्यापकः श्रुतेः ॥
सर्वान्तर्याम्यनन्तश्च तथाऽतः सर्वगो मतः ।
अक्षव्याप्त्यभावेन सुषुप्तौ नार्थभासनम् ॥
धियोधीमात्रमात्मा च तदा स्वैरं प्रकाशते ।
अस्वाप्सं सुखमेतावत्कालमित्युत्थितः पुमान् ॥
परामृशंस्तदाप्यात्मभासनं विविनक्ति हि ।
मामन्यं च न जानामीत्येवमादि निषेधधीः ॥
मानुष्यादिविशिष्टात्मपरागर्थैकगोचरा ।
अहंशब्दानुविद्धा धीः सुषुप्तौ नास्ति तत्र तु ॥
प्रत्यगर्थस्वरूपं तु भात्यर्थाग्राहिधीगुणम् ।

इत्यस्यानन्तरसहमर्थत्वमात्मनः प्रतिपाद्य ज्ञानस्यानुमेयत्वञ्च च निरस्य पुनरपि सुखदुःखे प्रयुज्य ।

प्रतिकूलानुकूले तु दुःखमन्यच्च कर्मिणः ।
भोक्तुर्भातोऽनयोस्तेन प्रकाशाव्यभिचारिता ॥
प्रकाशव्यभिचारे तु तत्सत्तैव वृथा भवेत् ।
भोगार्थं तु तदुत्पत्तिर्भोगो न स्यादभासने ॥
इच्छाद्वेषप्रयत्नादिशब्दैर्धीरभिधीयते ।
अर्थभेदानुविद्धास्ते धीविशेषाः प्रकीर्तिताः ॥
न च देहैकदेशेषु प्रकाशन्ते सुखादिवत् ।
चिन्धात्मस्था न हीच्छा मे पाद इत्यस्ति धीर्नृणाम् ।
पादे दुःखं हस्तयोर्मे सुखमित्यादिकाऽस्ति धीः ॥

धीभेदास्तत इच्छाद्याः सुखदुःखे तनोर्गुणौ ।

इत्युपसंहृतं, पाणिपादादिदेहैकदेशवर्तितयोपलम्भेन सुखदुःखयोर्देहैकधर्मत्वम्, इच्छादेस्तु तथाऽनुपलम्भेन ज्ञानविशेषत्वोपपत्तिः, ज्ञानस्य स्वाश्रयादन्यत्रावर्तमानत्वं संयोगमनपेक्ष्य विषयविषयिभावेन प्रकाशकत्वमद्रव्यत्वमित्याद्यर्था भाष्यादिविरुद्धाः परतन्त्रदन्तिदन्तादन्तितन्द्रालुतया परिगृहीताः । न्यायसुदर्शने तु तैरेव सुखदुःखयोरात्मधर्मत्वं चोक्तं, तथा हि भाष्ये मनुष्यादिपिण्डविशिष्टस्यात्मनः सुखित्ववचनं न विशेषणभूतशरीरस्यापि आत्ममात्रस्यैव सुखाश्रयत्वात्, किं तु शरीरे वर्तमानस्यैवात्मनो वैषयिकसुखादिमत्त्वमिति तद्विशिष्टात्मनस्तद्वत्त्वमयमात्मा सुखीत्यनेनापि प्रतीयत इत्यर्थः । एवमदृष्टमपीश्वरप्रीतिकोपात्मकमेव तद्विषयत्वप्रतिनियमादेव च क्षेत्रज्ञानां कर्मफलनियमोपपत्तिः शास्त्रगम्यत्वाच्चास्य तथात्वमवसीयते, तथा च द्रमिडाचार्यभाष्यं फलसम्बि*भत्सया कर्मभिरात्मानं पिप्रीषन्तीत्यादि भाष्यमपि शास्त्रैकसमधिगम्ये एवेत्यादि सूत्रकारैरेवैतद्विशदमुपपादितं फलमत उपपत्तेरित्यादिभिः । यत्तु शरीरादिकं भोक्तृविशेषगुणप्रेरितभूतपूर्वकं तद्भोगसाधनत्वात् स्रगादिवदिति सिद्धे ज्ञानाद्यनुपपत्तेः परिशेषाज्जीवसमवेतादृष्टसिद्धिरिति वैशेषिकादिभिः स्वीक्रियते तदसत् अस्मदुक्तादृष्टादेव नियमोपपत्तौ विपक्षे बाधकाभावात्, न चान्यत्र भोगप्रसङ्गः नियामकस्येच्छादेरध्यक्षत्वात्, एवं च सति धर्माग्नीन्द्रादिदेवताप्रीत्यादेरपि श्रुतिसिद्धत्वेनैवादृष्टतया स्वीकारे न दोषः तेषामपि फलप्रदातृत्वमीश्वराधीनं स-

* फलसम्बिभन्त्सयेति तूचितम् ।

र्वत्र साधारणमीश्वरप्रीत्यात्मकमदृष्टं तथा च स्वयमेवाह ।

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव चेति ।

ईश्वरज्ञानस्य कोपाद्यात्मकत्वं विविधकर्मोपाधिकं, न चैष दोषः स्वाज्ञापरिपालनानुरूपगुणत्वात् एवं सौशील्यवात्सल्यसौहार्दप्रभृतयोऽपि बुद्धिविशेषाः, भरतादिपठिताश्च रत्यादयः स्थायिभावास्तत्परिणामरूपाः सञ्चारिभावेषु च निर्वेदादयः स्वावमानादिरूपबुद्धिविशेषा एव ग्लान्यादयस्तु शरीराद्यवस्थाविशेषाः स्वप्नशब्दस्यापि स्वप्रदर्शनाभिप्रायत्वे बुद्धिविशेषविषयत्वं व्यक्तं सुषुप्त्यभिप्रायत्वेऽपि अमूर्च्छितस्य जीवतः समस्तज्ञानप्रसररहितावस्थाविषयत्वम् एवं जाड्यादिष्वपि चिन्त्यम् । निद्रा तर्हि कस्यावस्था चिन्तालस्यकश्मलादिभिः संमीलतो मनसो ज्ञानस्यैव वा, सैव च सुषुप्त्यादिकारणं, कथं तर्हि अभावप्रत्ययालम्बना वृत्तिर्निद्रेति पारमर्षं सूत्रम् इत्थं समाधिमधिगच्छतो वृत्त्यन्तरवन्निरोद्धव्यत्वाभिप्रायम् । निरोधपरत्वात्प्रकरणस्येत्ययमर्थं आत्मसिद्धावुक्तः । बुद्धेश्च निर्विषयत्वनिराश्रयत्वनिर्धर्मकत्वादिगोचरा दुरूहाः शून्यवादवदुपलम्भविरोधादिभिर्दूषणीयाः । असत्ख्यात्यात्मख्यात्यनिर्वचनीयख्यात्यादयश्च न्यायपरिशुद्धावस्माभिर्दूषिताः, तथा प्रमाणप्रमेयादिकं व्यवहारौपयिकमखिलमपि तत्रैव प्रपञ्चितमिति नेह प्रस्तूयते वैशेषिकशैलीमनुसृत्य यथावस्थितपदार्थस्वरूपं ह्यत्र विशोध्यत इति ।

माहाभाग्य*वशंवदीकृतयतिक्षोणीशवाणीशता
भूयाद्भोगसमेधकश्रुतिशिरःप्रासादमासेदुषी ।

* माहाभाग्य-शब्दे यकारद्वयं समुचितं भाति ।

नित्यानन्दविभूतिसन्निधिसदासामोददामोदर-
स्वैरालिङ्गनदौर्ललित्यललितोन्मेषा मनीषा मम ॥

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु न्यायसिद्धाञ्जने बुद्धिपरिच्छेदः पञ्चमः ॥

श्रियै नमः । श्रीधराय नमः ।

श्रीमते रामानुजाय नमः

सन्तु शुभाशिषः पूर्वाचार्या लोकद्वयसर्वमङ्गलाय नः ॥

ध्यव्याप्तिपक्षधर्मतयोरन्यतरभ्रमेण तद्रूपेण प्रयुक्तः स हेतुः प्रकरणसमः प्रकरणस्य समः तद्भिन्नत्वे सति अनुमित्युपयोगित्वेन प्रयुक्तः । इत्थं च साध्याभावव्याप्यहेत्वन्तरवत्पक्षादिरेव दोषो येन केनापि सम्बन्धेन तद्वान् दुष्ट इति फलितम् । अस्य सन् प्रतिपक्षो यस्येतिव्युत्पत्तिसिद्धं नामान्तरं सत्प्रतिपक्ष इति । एवं दोषे ऽपि सत्प्रतिपक्षपदप्रयोगः । सत्प्रतिपक्षदोषलक्षणं तु विशिष्टपक्षसाध्यग्रहाविरोधित्वे सति प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यग्रहविरोधित्वे च सति प्रकृतपक्षे साध्यवैशिष्ट्यग्रहविरोध्युन्नायकत्वम् । दलव्यावृत्तिरूहनीयेत्याहुः । अत्र काञ्चनमयः पर्वतो वह्निमानित्यादौ काञ्चनमयत्वाभावव्याप्यवत्पर्वतादिवारणाय विशिष्टपक्षग्रहाविरोधित्वदलम् । पर्वतः काञ्चनमयवह्निमानित्यादौ काञ्चनमयत्वाभावव्याप्यवद्वह्न्यादिवारणाय विशिष्टसाध्यग्रहाविरोधित्वदलम् । ह्रदो वह्निमानित्यादौ वह्न्यभावव्याप्यजलत्वव्याप्यवद्ध्रदादिवारणाय द्वितीयसत्यन्तदलम् । तत्रैव वह्न्यभाववद्ध्रदादिरूपबाधवारणाय विशेष्यदलम् ॥ ७ ॥

साध्यसमं लक्षयति ।

साध्यत्वात् साध्याविशिष्टः साध्यसमः(१) ॥ ८ ॥

साध्यत्वात् साधनीयत्वात् साध्याविशिष्टः साध्यवत् पक्षे ऽनिश्चितो हेतुः साध्यसमोऽसिद्ध इति च गीयते । यद्यपि पक्षे हेतोरनिश्चय एवासिद्धिरूपो दोष इति लभ्यते तथापि पक्षे हेतुसत्त्वे तदनिश्चयः पुरुषदोषा-

(१) साध्याविशिष्टः साध्यत्वात् साध्यसम इत्यन्यत्र सूत्रपाठो दृश्यते । यथा चास्माभिः सूत्रं वर्णितं तथा चोदाहृतम् । तथायमसम्बद्धो दोषो न सूत्रार्थो विज्ञातो नाक्षरार्थं इत्येतत्सूत्रव्याख्याने वार्त्तिकम् । उद्देशक्रमसङ्गत्या साध्यसमलक्षणाय सूत्रम् । साध्याविशिष्टः साध्यत्वात् साध्यसम इति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

देव न तु हेतोर्दुष्टत्वं तेनेति तदनिश्चयप्रयोजकपक्षनिष्ठहेत्वभावादिरेव मुनेरभिप्रेत इति। वस्तुतः साध्याविशिष्ट इत्यस्य साध्यं यथा पक्षवृत्तितया असिद्धं तथा हेतुरपि व्याप्तिपक्षधर्मतया असिद्धो व्याप्तिपक्षधर्मताविशिष्टहेतोरेव गमकत्वात्। निर्णयार्थमपदिष्ट इत्यनेनानुवृत्तपूर्वसूत्रस्थेनान्वयात् तथातात्पर्यादित्यर्थः। एवं च व्याप्यत्वासिद्धितदन्तर्गतसाध्यसाधनाप्रसिद्धीनां आश्रयासिद्धिस्वरूपासिद्ध्योश्च लाभो विशेषणस्यासिद्धत्वे विशिष्टस्याप्यसिद्धत्वात्। तेनासिद्धिस्त्रिविधा स्वरूपासिद्धिव्याप्यत्वासिद्ध्याश्रयासिद्धिभेदात्। यद्यपि व्यभिचारस्याप्यत्रैव व्याप्यत्वासिद्धावन्तर्भावसम्भवे तस्य पृथग्विभागः कथमिति तथापि स्वतन्त्रेच्छस्येत्यादिन्यायेन स्वातन्त्र्येणोपादानम्। असिद्धिसामान्यलक्षणं तु विशिष्टसाध्यसाधनग्रहविरोधितानवच्छेदकं यत् साध्यधर्मिकहेतुव्यापकत्वावगाहिहेतुधर्मिकसाध्यसामानाधिकरण्यावगाहिग्रहविरोधितावच्छेदकं तदन्यत्वे सति साध्याभाववदवृत्तित्वविशिष्टसाध्यसामानाधिकरण्यावच्छिन्नहेतुतावच्छेदकावच्छिन्नप्रकारकपक्षतावच्छेदकावच्छिन्नविशेष्यकग्रहविरोधितावच्छेदकरूपत्वमिति। निरुक्तविशिष्टसाध्यसामानाधिकरण्यग्रहं प्रति साध्याभाववदवृत्तित्वग्रहस्य साध्यासामानाधिकरण्यग्रहस्य च विरोधितया साधारण्यासाधारण्यरूपयोर्वारणाय सत्यन्तम्। साध्याप्रसिद्धिसाधनाप्रसिद्धिसङ्ग्रहाय सत्यन्तघटकमनवच्छेदकान्तम्। व्यापकताज्ञानस्य निरुक्तसाधारण्यग्रहाविरोधित्वे सत्यन्तदले व्यापकत्वावगाहित्वमपहाय हेतौ साध्याभाववदवृत्तित्वावगाहित्वं वक्तव्यम्। व्याप्यत्वासिद्धिरपि त्रिधा साध्याप्रसिद्धिसाधनाप्रसिद्धिव्याप्त्यसिद्धिभेदात्। तत्र

साध्यतावच्छेदकाभाववत्साध्यादिकं विशिष्टसाध्यग्रहविरोधितावच्छेदकत्वेन लक्षणीयं साध्याप्रसिद्धिः । यथा पर्वतः काञ्चनमयवह्निमान् धूमादित्यादौ । हेतुतावच्छेदकाभाववद्धेत्वादिकं विशिष्टसाधनग्रहविरोधितावच्छेदकत्वेन लक्षणीयं हेत्वप्रसिद्धिः । यथा पर्वतो वह्निमान् काञ्चनमयधूमादित्यादौ । तृतीयं यथा द्रव्यं सत्त्वादित्यादौ द्रव्यत्वाभाववदवृत्तित्वविशिष्टद्रव्यत्वसामानाधिकरण्याभाववत्सत्तादिकम् । एतल्लक्षणं च प्रकृतहेतौ प्रकृतसाध्याभाववदवृत्तित्वस्य साध्यसामानाधिकरण्यस्य च ग्रहविरोधितानवच्छेदकत्वे सति हेतौ साध्याभाववदवृत्तित्वविशिष्टसाध्यसामानाधिकरण्यग्रहविरोधितावच्छेदकत्वं व्याप्यत्वासिद्धिसामान्यलक्षणं तत्रैव सत्यन्तदलं विहाय विशिष्टसाध्यसाधनग्रहविरोधितानवच्छेदकं यद्धेतौ साध्याभाववदवृत्तित्वसाध्यसामानाधिकरण्यावगाहिग्रहविरोधितावच्छेदकं तदन्यत्वे सतीति दत्त्वा कर्तव्यम् । आश्रयासिद्धिश्च पक्षतावच्छेदकाभाववत्पक्षादिकं विशिष्टपक्षग्रहविरोधितावच्छेदकत्वेन लक्षणीयम् । यथा काञ्चनमयपर्वतो वह्निमान् धूमादित्यादौ । विशिष्टपक्षसाधनग्रहविरोधितानवच्छेदकं यत् प्रकृतपक्षे प्रकृतहेतुमत्त्वग्रहविरोधितावच्छेदकं तद्वत्त्वं स्वरूपासिद्धिः । यथा ह्रदो वह्निमान् धूमादित्यादौ धूमाभाववद्ध्रदादिकम् । सर्वत्र विरोधितावच्छेदकत्वं प्रतिबन्धकतावच्छेदकविषयितानतिरिक्तवृत्तिविषयिताकविशिष्टत्वमिति । केचित्तु नीलधूमत्वादेरपि व्याप्यत्वासिद्धावन्तर्भावं वदन्ति । तेषामयमभिप्रायः । साध्यसम्बन्धितावच्छेदकरूपवत्त्वं व्याप्तिः । अवच्छेदकत्वं च स्वरूपसम्बन्धविशेषस्तच्च गुरुधर्मे नीलधूमत्वादौ नास्तीति साध्यसम्बन्धितावच्छेदक-

त्वाभाववत्साधनतावच्छेदकादिरपि व्याप्यत्वासिद्धिः । सामान्यलक्षणे च साधनतावच्छेदकधर्मिकसाध्यसम्बन्धितावच्छेदकत्वप्रकारकत्वमपि ग्रहविशेषणमिति । परे तु साध्यसम्बन्धितायाः स्वरूपसम्बन्धरूपावच्छेदकत्वे मानाभावान्न तादृशं व्याप्तिलक्षणं नीलधूमादावपि व्याप्तिरस्ति नीलधूमादिप्रयोगे तु आधिक्येन निगृह्यत इत्याहुः ॥ ८ ॥

अतीतकालं लक्षयति ।

कालात्ययापदिष्टः कालातीतः[1] ॥ ९ ॥

कालात्ययेन यथोचितकालस्यातिक्रमेणापदिष्टः प्रयुक्तो हेतुः कालातीत इत्यर्थः । कालमतिक्रम्य इतः प्राप्तः प्रयुक्त इति यावत् । अतीतोऽतिक्रान्तः कालो येन सोऽतीतकाल इतिव्युत्पत्तिसाम्यात् कालातीत इत्युक्तः उचितकालश्चाबाधितसाध्यप्रयोगानन्तरः कालः । बाधसत्त्वे तत्प्रमाया असम्भवेन साध्यवत्त्वेन पक्षस्य हेतुप्रयोगेण साधयितुमशक्यत्वाद् बाधितसाध्यप्रयोगे कालातिक्रमो भवतीति कालातीतशब्देन बाधितो लक्ष्यते । उदाहरणं च वह्निरनुष्णः कृतकत्वादित्यादावुष्णत्ववद् वह्न्यादिकम् । यद्यप्याश्रयासिद्ध्यादिसत्त्वे ऽपि कालात्ययो भवति तथाप्याश्रयासिद्ध्यादीनां प्रागुलक्षितत्वेन बाधित एव कालातीतादिशब्देन लक्षितो मुनिभिरिति लभ्यते । न च बाधसत्त्वे व्यभिचारस्वरूपासिद्ध्यन्यतरस्यावश्यकत्वेन दोषत्वाद् बाधस्य कथं स्वतन्त्रदोषत्वमिति वाच्यम् । तद्-

(१) काला-तः । अत्र कालातीत इति लक्ष्यनिर्देश इत्यादिनैतत् सूत्रं व्याख्याय एवं व्यवस्थितं भाष्यकारः सूत्रं स्वपरमतश्लिष्टं व्याचष्टे कालात्ययेनेत्यन्तेनैतत्सूत्रस्य भाष्यकृद्व्याख्यानं प्रदर्शितं तात्पर्यटीकाकृद्भिः । उद्देशक्रमसङ्गत्या बाधलक्षणाय सूत्रम् । कालात्ययापदिष्टः कालातीत इति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

न्यतराज्ञाने बाधज्ञाने ऽनुमित्यनुत्पादेन तस्यापि दोषत्वात् । हेतोरैक्ये ऽपि दोषाणां भेदेन पञ्चधा विभागो नानुपपन्नः । असङ्कीर्णोदाहरणमपि गन्धप्रागभावकालावच्छिन्नो घटो गन्धवान् शिखरावच्छिन्नः पर्वतो वह्निमानित्यादि । बाधितस्थले सत्प्रतिपक्षनैयत्ये ऽपि पृथक् तयोर्विभागो न दोषायेत्युक्तमेव । केचित्तु क्षितिः सकर्तृका कार्यत्वादित्यादौ लाघवज्ञानवशादेककर्तृकत्वस्य सिद्धिर्योपकतानवच्छेदकरूपेणाप्यनुमितेः स्वीकारात् तथा च वह्निव्याप्यवत्त्वपरामर्शान्महानसीयवह्निधर्मिकलाघवज्ञानादिसहकृतात् पर्वतो महानसीयवह्निमानित्याद्यनुमितिर्जायमाना महानसीयवह्नेर्बाधसत्त्वे न भवतीति तत्रासङ्कीर्णबाधोदाहरणमित्याहुः । बाधलक्षणं तु विशिष्टपक्षसाध्यग्रहाविरोधित्वे सति प्रकृतपक्षे प्रकृतसाध्यग्रहविरोध्यनुन्नायकत्वे च सति प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहिग्रहविरोधित्वमिति । आश्रयासिद्ध्यादिवारणाय प्रथमसत्यन्तम् । सत्प्रतिपक्षवारणाय द्वितीयम् । उदासीनवारणाय विशेष्यदलमिति ॥ ९ ॥

हेत्वाभाससामान्यमुपसंहरति ।

समाप्तं हेत्वाभासप्रकरणम् ॥

छलं लक्षयति ।

वचनविघातोऽर्थविकल्पोपपत्त्या छलम्[1] ॥१०॥

अर्थस्य वादितात्पर्यविषयीभूतार्थस्य विकल्पो भिन्नो योऽर्थस्तस्योपपत्त्या तात्पर्यविषयकल्पनेन । यद्वार्थस्य विकल्पो विभिन्नार्थकल्पनं तदुपपत्त्या तदुपपादकयुक्तिविशेषेण वचनस्य वाद्युक्तस्य विघातो भ्रमजनकत्वेन कल्पनं

(१) छललक्षणप्रकरणम् । तत्र तत्सामान्यलक्षणाय सूत्रम् । वचनविघातोऽर्थेत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

छलमित्यर्थः । वक्तृतात्पर्याविषयार्थस्य तात्पर्यकल्पनेन दूषणाभिधानमिति फलितम् । कल्पनं च विशेष्ये । विशेषणे संसर्गे वा । यथा नेपालादागतोऽयं नवकम्बलवत्त्वादित्यादौ नवसंख्यापरत्वकल्पनयाऽसिद्ध्यभिधानम् । सर्वं प्रमेयं धर्मत्वादित्यत्र पुण्यरूपार्थकल्पनया भागासिद्ध्यभिधानम् । वह्निमान् धूमादित्यत्र धूमावयवे व्यभिचाराभिधानमिति ॥ १० ॥

विभजते ।

तत् त्रिविधं वाक्छलं सामान्यच्छलमुपचारच्छलं च[1] **॥ ११ ॥**

तत्र वाक्छलं लक्षयति ।

अविशेषाभिहिते ऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम्[2] **॥ १२ ॥**

अविशेषेणार्थविशेषनिर्णायकाभिधानशून्यस्याभिधानस्य स्वोच्चारितनानार्थशक्तपदस्य विषये ऽर्थे वक्तुरभिप्रायाद् वक्तुरभिप्राये ऽर्थान्तरकल्पना वक्तुरनभिप्रेतार्थे शक्त्या तात्पर्यप्रकटनेन दूषणाभिधानं वाक्छलमित्यर्थः । अभिपूर्वधाधातुयोगाच्छक्तिलाभः । तथा च शक्त्या एकार्थतात्पर्यप्रयुक्तशब्दस्य शक्त्यार्थान्तरतात्पर्यकल्पनया दूषणाभिधानमिति निर्गलितम् । यथा गौर्विषाणीत्युक्ते कुतो गजस्य शृङ्गमित्यादि । अन्ये तु स्वारसि-

(१) न सामान्यलक्षणे छलं शक्यमुदाहर्तुं विभागे तूदाहरणानि विभागश्च । तत्त्रिविधमित्यादिभाष्यग्रन्थः । विभागश्चेति । विभज्यते ऽनेनेति विभागः सूत्रमुच्यत इति तात्पर्यटीका । एतेन तत्त्रिविधमित्यादेः सूत्रत्वं ज्ञायते । तद्विभागाय सूत्रम् । तत् त्रिविधमित्यादिन्यायतत्त्वालोकीयवाचस्पतिमिश्रलेखदर्शनाच्च । आदर्शपुस्तके तत् त्रिविधमिति नास्ति ।

(२) अविशेषाभिहिते ऽर्थं इति सूत्रमिति वार्त्तिकम् ।

कलक्षणया प्रयोगस्य निग्रहस्थानविशेषत्वाच्छक्त्या निरूढलक्षणया वा एकार्थतात्पर्यकशब्दस्य शक्त्यान्यार्थतात्पर्यकल्पनया दूषणाभिधानं छलमिति तत्राद्ये गौर्विशालविषाण इत्युक्ते कुतो गजस्य शृङ्गमिति । द्वितीये श्वेतो धावतीति श्वेतरूपवदभिप्रायेणोक्ते श्वेतो न धावतीति कथनम् । श्वेतशब्दस्य लाघवात् श्वेतगुणे शक्तिस्तद्विशिष्टे च निरूढलक्षणा । निरूढत्वं च शास्त्राद्यनादिप्रसिद्धत्वमित्याहुः ॥ १२ ॥

सामान्यच्छलं लक्षयति ।

सम्भवतोऽर्थस्यातिसामान्ययोगादसम्भूतार्थकल्पना सामान्यच्छलम्(१) ॥ १३ ॥

वादितात्पर्यविषयीभूतस्य तदभिहितवाक्यार्थस्य सम्भवतः प्रसिद्धस्यातिसामान्ययोगादध्याहृतपदसमभिव्याहारादिकल्पनयाऽन्यार्थयोगेनासम्भूतार्थकल्पना अप्रसिद्धार्थतात्पर्यकल्पनया दूषणाभिधानं सामान्यच्छलमित्यर्थः । यथा ब्राह्मणोऽयं विद्याचरणसम्पन्न इत्यत्र यतो ब्राह्मणोऽसौ विद्याचरणसम्पन्न इति यत् पदपूरणेन ब्राह्मणत्वहेतुकविद्याचरणसम्पन्नत्वबोधतात्पर्यकल्पनेन कुतो ब्राह्मणत्वेन विद्याचरणसम्पन्नत्वं व्रात्ये व्यभिचारादित्याद्यभिधानम् ॥ १३ ॥

उपचारच्छलं लक्षयति ।

धर्मविकल्पनिर्देशे ऽर्थसद्भावप्रतिषेध उपचारच्छलम्(२) ॥ १४ ॥

(१) शब्दशक्त्युपजीवनादनन्तरं सामान्यच्छललक्षणाय सूत्रम् । सम्भवत इत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

(२) धर्मविकल्पनिर्देश इति सूत्रमिति वार्त्तिकम् ।

धर्मो वाद्युक्तशब्दधर्मोऽर्थबोधानुकूलः शक्तिनिरूढलक्षणान्यतररूपः। तयोरर्थनिष्ठत्वे ऽपि निरूपकतासम्बन्धेन शब्दधर्मत्वम्। अथवा धर्मः पदपदार्थयोः सम्बन्धः तादृशान्यतररूपोऽर्थनिष्ठधर्मः तस्य विकल्पो विविधः कल्पो द्विविधरूपो यत्र। निर्देशे वाद्युक्तशब्दे सति। अर्थसद्भावेन तादृशैकतरवृत्त्या सदर्थतात्पर्यप्रयुक्तवाक्ये ऽपरवृत्त्यार्थान्तरतात्पर्यकल्पनया प्रतिषेधो दूषणाभिधानमुपचारच्छलमित्यर्थः। मञ्चाः क्रोशन्तीत्यत्र मञ्चस्थे लक्षणया प्रयुक्ते मञ्चपदस्य शक्यार्थकल्पनया कथं मञ्चानामप्राणिनां क्रोशनमित्यभिधानम्। एवमहं नित्य इति शक्त्यात्मतात्पर्येण प्रयुक्ते लक्षणया शरीरतात्पर्येण अमुकस्मादुत्पन्नस्त्वं कथं नित्य इत्यभिधानम्। अन्ये तु अर्थसद्भावेन शक्यार्थसम्बन्धरूपलक्षणया वक्तुरनभिप्रेतार्थतात्पर्येण प्रतिषेधो दूषणमित्यर्थः। उपचारेण लक्षणया छलमिति व्युत्पत्तेः। इत्थं च शक्त्या निरूढलक्षणया वा एकार्थप्रयुक्तस्य निरूढलक्षणयान्यार्थकल्पनेन दूषणाभिधानमिति पर्यवसितम्। शक्त्या उदाहृतस्योदाहरणमहं नित्य इत्याद्युक्तमिति। निरूढलक्षणयोदाहृतं यथा दीर्घायुर्घृतमिति दीर्घायुर्जनकतात्पर्येण प्रयुक्ते कुतो दीर्घायुषः पुरुषस्य घृतत्वमिति। बहुव्रीहावुत्तरपदस्य लाक्षणिकतया तथातात्पर्येण दूषणाभिधानमित्याहुः। वाद्यभिप्रेतार्थादूषणतया असदुत्तरत्वं छलस्य। न च श्लिष्टलाक्षणिकपदप्रयोगे वादिनो दोष इति वाच्यम्। तत्तदर्थप्रसिद्धवाक्यस्य तत्तदर्थतात्पर्येण प्रयोगस्य कथकसम्प्रदायसिद्धत्वात्। अन्यथा पर्वतो वह्निमानित्यादिप्रसिद्धप्रयोगमपि न कुर्यात् तत्रापि नञ्प्रश्लेषेणावह्निमानित्यस्यापि सम्भवात्। एवं पर्वतो वह्निमानिति पर्वतत्वसामानाधिकरण्येन वह्निमुद्दिश्य

प्रयोगो न स्यात् पर्वतत्वावच्छेदेन वह्नेर्बाधेन दूषणसम्भवादेवंरीत्या सर्वत्र प्रायशो दोषसम्भवात् प्रयोग एव न स्यादिति ॥ १४ ॥

ननु आद्यन्तयोरेकार्थतात्पर्यकशब्दस्यार्थान्तरतात्पर्यकल्पनत्वेनाविशेषात् कथं पृथगुपन्यासः किं तूपचारच्छलं वाक्छलान्तर्गतं स्यादिति पूर्वपक्षयति ।

वाक्छलमेवोपचारच्छलं तदविशेषात्[1] ॥ १५ ॥

सिद्धान्तयति ।

न तदर्थान्तरभावात्[2] ॥ १६ ॥

उपचारच्छलपदबोध्यं न वाक्छलपदप्रतिपाद्यं तदर्थान्तरभावाद् वाक्छलार्थभिन्नार्थकत्वात् । यथाश्रुतेनान्यार्थकल्पनरूपधर्मेणाभेदसम्भवे ऽपि शक्त्यार्थान्तरकल्पनरूपधर्मस्य लक्षणयार्थान्तरकल्पनरूपधर्मस्य च मिथो भेदेन विभागसम्भव इति भावः ॥ १६ ॥

विशेषणपरित्यागेन विशेष्यमादायैक्येन विभागाकरणे सामान्यधर्ममादायैक्येन विभाग एव न स्यादित्याह ।

अविशेषे वा किञ्चित्साधर्म्यादेकच्छलप्रसङ्गः[3] ॥ १७ ॥

किञ्चित्साधर्म्यात् किञ्चिद्धर्ममादाय । ल्यब्लोपे पञ्चमी । अविशेषे ऐक्येन विभागासम्भवे । एकच्छलप्र-

(१) वाक्छलमेवोपचारच्छलमिति सूत्रमिति वार्त्तिकम् ।

(२) सिद्धान्तसूत्रम् । न त-त् । इति तात्पर्यटीका । सिद्धान्तसूत्रम् । न तदर्थान्तरभावादिति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

(३) अविशेषे वा किञ्चित्साधर्म्यादेकच्छलप्रसङ्गः । कोऽस्य सूत्रस्यार्थ इति वार्त्तिकम् ।

सङ्गः छलत्वेनैक्याद्विभागासम्भव इति भवदुक्तच्छलद्वित्वमपि न स्यादिति । एवं प्रमाणादिविभागोऽपि न स्यादिति भावः ॥ १७ ॥

उपसंहरति ।

समाप्तं छलप्रकरणम् ॥

छलत्वरूपसामान्यघटितविशेषरूपेणैव तद्विभाग इति धर्मैक्येन छलमित्येकवचनमित्येवमन्यत्रापीति ॥

जातिं लक्षयति ।

साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः(१) ॥ १८ ॥

साधर्म्यवैधर्म्याभ्यामिति सावधारणम् । तेन व्याप्तिनिरपेक्षत्वलाभः साधर्म्यं साध्यसहचरितधर्मः वैधर्म्यं साध्याभावसमानाधिकरणाभावप्रतियोगिधर्मस्ताभ्यां तदन्यतरधर्मेण व्याप्तिमपुरस्कृत्य प्रदर्शितेन यदवस्थानं वादिनः साध्यसाधनं तत् प्रति तथैव व्याप्तिनिरपेक्षयत्किञ्चित्पदार्थसाधर्म्यादिनानिष्टप्रदर्शनेन दूषणाभिधानं जातिरित्यर्थः । तेन दूषणे सर्वत्र साधर्म्यवैधर्म्ययोरन्यतराभावे ऽपि न क्षतिरवस्थान एव तदन्वयात् । यद्वा साधर्म्यवैधर्म्याभ्यां यत्किञ्चित्पदार्थसाधर्म्यवैधर्म्याभ्यामेव यत् प्रत्यवस्थानं दूषणाभिधानं सा जातिरित्यर्थः । एवकारेण व्याप्तिनिरपेक्षत्वं सूचितम् । यद्यपि साधर्म्यवैधर्म्यान्यतरप्रदर्शनं सर्वत्र जातौ नास्ति तथापि व्याप्तिनिरपेक्षतया दूषणाभिधाने तात्पर्यं तेन च दूषणासमर्थत्वं स्वव्याघातकत्वं वा दर्शितम् । तथा च च्छलादिभिन्नं दूषणासमर्थमुत्तरं स्वव्याघातकमुत्तरं वा जातिरित्यर्थः । साध-

(१) सूत्रार्थस्तु यथाश्रुतोऽत्येतत्सूत्रव्याख्याने वार्त्तिकम् । प्रथमं जातिलक्षणाय सूत्रम् । साधर्म्येत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

र्थसमाद्यन्यतमत्वे तात्पर्यमित्यपि कश्चित् । तन्न । तथा सति विभागाकाङ्क्षानुत्थितेः ॥ १८ ॥

प्रमाणादिपञ्चदशपदार्थेषु लक्षितेषु तत्परीक्षाश्रवणोत्कण्ठितेन संसारदुःखजिहीर्षुणा जातिविभागमस्मृत्वैव निग्रहस्थानमात्रमवशिष्टमिति तज्जिज्ञासायामाह ।

विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्(१) ॥ १९ ॥

निग्रहस्य स्वलीकारस्य स्थानं ज्ञापकम् । विप्रतिपत्तिः विरुद्धा प्रतिपत्तिर्यतः । यत इति ज्ञापके पञ्चमी । एवमप्रतिपत्तिः प्रतिपत्तेरभावो यत इति विग्रहः । तेन विरुद्धज्ञानप्रकृताज्ञानान्यतरज्ञापको धर्म इत्यर्थः । यद्यपि विरुद्धत्वं दुर्वचं सुवचत्वे ऽपि तत्र प्रकृताज्ञानमस्ति तथाप्युद्देश्यानुगुणसम्यग्ज्ञानाभावलिङ्गमित्यत्र तात्पर्यम् । प्रतिज्ञाहान्याद्यन्यतमत्वं लक्षणमित्यपि कश्चित् ॥ १९ ॥

प्रधानतया प्रमाणादिपदार्थपरीक्षाश्रवणोत्कण्ठितान् शिष्यान् प्रति जातिनिग्रहस्थानयोर्विभागजिज्ञासायामाह ।

तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वम्(२) ॥ २० ॥

तयोर्विकल्पाद् विशेषणभेदेन जातिनिग्रहस्थानयोर्विविधभेदसत्त्वाद् बहुत्वं बहुविधत्वमिति । एतेन तयोर्विभागकथने कालविलम्बः सूचितः । ततश्च बलवत्या

(१) निग्रहस्थानेनैव कथावसानादर्थतः पश्चात् तदभिधानमित्युद्देशक्रमसङ्गत्या तल्लक्षणाय सूत्रम् । विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानमिति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

(२) किं पुनर्दृष्टान्तवज्जातिनिग्रहस्थानयोरभेदोऽथ सिद्धान्तवद्भेद इत्यत आह । तद्विकल्पादित्यादि भाष्यग्रन्थः । सूत्रान्तरमवतारयितुं भाष्यकार आह किं पुनरिति तात्पर्यटीका । इदानीं जातिनिग्रहस्थानविशेषलक्षणमुचितं तदप्रणयनसमर्थनाय सूत्रम् । तद्विकल्पादित्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

प्रमाणादिपरीक्षाजिज्ञासया तद्विभागजिज्ञासाप्रतिरोधेन नेदानीं मुनिना तद्विभागः कृत इति ॥ २० ॥

समाप्तं पुरुषाशक्तिलिङ्गदोषसामान्यलक्षणप्रकरणम् ॥

प्रथमाध्याये द्वितीयमाह्निकम् ॥

इति न्यायसूत्रविवरणे प्रथमाध्यायसूत्रविवरणम् ॥

न्यायसूत्रविवरणे

द्वितीयोऽध्यायः ।

अथ परि सर्वतोभावेन अप्रामाण्यज्ञानाद्यनास्कन्दिता ईक्षा निर्णयो यतो युक्तेः सा परीक्षा । तस्यां च प्रमाणादीनां क्रियमाणायां संशयमादौ परीक्षयति । संशयं विना विवादाप्रसक्तौ प्रमाणाद्यनुत्थानात् परीक्षणे ऽपि संशयस्याङ्गत्वाच्च । तत्र संशयहेतुविप्रतिपत्त्यर्थं पूर्वपक्षं सूत्रयति ।

समानानेकधर्माध्यवसायादन्यतरधर्माध्यवसायाद्वा न संशयः[(१)] ॥ १ ॥

कारणनिरासेनैव संशयनिरास इति सूत्रकृतामाशयः । संशयसिद्धावेव तत्परीक्षायां संशयो हेतुर्वाच्यः सैव नास्तीति संशयपरीक्षायां संशयस्याहेतुत्वान्नात्र स प्रदर्शित इति । केचित्तु सन्देह्मीतिप्रत्यक्षसिद्धत्वात् संशयो न सन्दिग्धः परं तु तत्र समानधर्मदर्शनादिजन्यत्वे संशय इति तादृशजन्यत्वं परीक्षयितुं तादृशसंशयसम्पादनाय विपरीतकोटिरत्र प्रदर्शिता । एवं प्रमाणादिपरीक्षायामपि संशयो नाभिहितः किं तु तद्धेतुविपरीतकोटिप्रदर्शनमात्रं कृतम् । यद्वा वादस्थले संशयस्यानावश्यकत्वात् पूर्वपक्षनिरासायैव परीक्षारम्भ इति संशयो नाभिहित इति प्राहुः । सूत्रार्थस्तु समानधर्माध्यवसायादनेकधर्माध्यवसायाच्च न संशयो मिथो व्यभिचारादन्यतरधर्माध्यवसायत्वेनापि न संशयहेतुत्वं विप्रतिपत्त्यादिजन्यसंशये व्यभिचारात् । समानधर्मदर्शनादिसत्त्वे ऽपि संशयानुत्पादात् समानत्वस्य तद्भि-

(१) समानानेकधर्माध्यवसायादित्येवमादि सूत्रमिति वार्त्तिकम् ।

न्नत्वे सति तद्गतधर्मरूपस्य प्रमेयत्वादिमादायाव्यावर्तकत्वात्। अनेकत्वस्य च न एको धर्मो यस्येतिव्युत्पत्त्या तदवृत्तिधर्मवत्त्वस्यापि तद्व्यक्तित्वादिकमादाय तथात्वात्। न च समानधर्मः साधारणधर्मोऽनेकधर्मोऽसाधारणधर्मस्तदन्यतरनिश्चयात् संशयो भवति। अथवा साधारणधर्मवत्त्वनिश्चयोत्तरसंशयत्वावच्छिन्नं प्रति तादृशनिश्चयस्य हेतुत्वमेवमसाधारणनिश्चयादेरपि तदव्यवहितोत्तरसंशयहेतुत्वमिति न व्यभिचारादिरिति वाच्यम्। प्रमाणाभावात्॥ १॥

विप्रतिपत्त्यादिनोऽपि न संशयो मिथो व्यभिचारात् संशयविशेषहेतुतया व्यभिचारवारणेऽपि प्रमाणाभावेन हेतुत्वासम्भवादित्याह।

विप्रतिपत्त्यव्यवस्थाध्यवसायाच्च(१) ॥ २ ॥

न संशय इत्यनुषज्यते। अव्यवस्थापदेन उपलब्ध्यनुपलब्ध्योरव्यवस्था बोध्यते। अध्यवसायपदं न निश्चयपरमव्यवस्थायाः प्रामाण्यसंशयादेः स्वरूपत एव हेतुत्वस्योक्तत्वात् किं तु स्वरूपपरः। अथवा अध्यवसायः कोट्युपस्थितिः तथा च विप्रतिपत्त्यादिजन्यकोट्युपस्थितेर्न संशय इत्यर्थः। वस्तुतोऽध्यवसायपदं ज्ञानपरं तथा चाव्यवस्थात्मकज्ञानादित्यर्थः। विप्रतिपत्तिपदं च तज्ज्ञानपरं पदज्ञानस्यैव शाब्दहेतुत्वात् ज्ञायमानपदस्य हेतुत्वे यथाश्रुतमेवेति॥ २॥

विप्रतिपत्तेः संशयहेतुत्वे बाधकमप्याह।

विप्रतिपत्तौ च सम्प्रतिपत्तेः(२) ॥ ३ ॥

(१) सूत्रम्। विप्रतिपत्त्यव्यवस्थाध्यवसायाच्चेति न्यायतत्त्वालोके वाचस्पतिमिश्राः।

(२) विप्रतिपत्तौ च सम्प्रतिपत्तेर्न विप्रतिपत्तिरस्तीति सूत्रार्थ इति वार्त्तिकम्। पुनः सूत्रे। विप्रतिपत्तौ च सम्प्रतिपत्तेः। अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थाया इति न्यायतत्त्वालोके वाचस्पतिमिश्राः।

विप्रतिपत्तिदशायां सम्प्रतिपत्तेर्वादिनोरेकनिश्चयान्न संशय इत्यर्थः । अथवा विप्रतिपत्तौ सम्प्रतिपत्तेर्निश्चयजनकत्वान्न संशयहेतुत्वं शाब्दसंशयानभ्युपगमादिति भावः ॥ ३ ॥

अव्यवस्थायाः संशयहेतुत्वे बाधकमप्याह ।

अव्यवस्थात्मनि व्यवस्थित्वाच्चाव्यवस्थायाः[1] ॥४॥

अव्यवस्थात्मनि अप्रामाणिकस्वरूपे व्यवस्थितत्वात् । अव्यवस्थायाः प्रामाण्यभ्रमत्वसंशययोर्न संशयहेतुत्वमित्यर्थः । तथा समानधर्मदर्शनादेर्हेतुत्वाभावेन प्रामाण्यसंशयादेरप्यसिद्धा कुतस्तस्य विषयसंशयहेतुत्वमिति भावः ॥ ४ ॥

समानधर्मदर्शनादीनां पञ्चानां हेतुत्वे बाधकमाह ।

तथात्यन्तसंशयस्तद्धर्मसातत्योपपत्तेः[2] ॥ ५ ॥

तथा तथा सति समानधर्मदर्शनादीनां संशयहेतुत्वे सति । अत्यन्तसंशयः संशयानुच्छेदः स्यात् । तद्धर्माणां तेषां धर्माणां समानधर्मदर्शनादीनामन्यतमस्य सातत्योपपत्तेः सर्वदा सम्भवादित्यर्थः । केचित्तु उपलब्ध्यनुपलब्ध्यव्यवस्थायाः संशयहेतुत्वं तदा स्याद् यदि स्वस्मिन्नव्यवस्थितत्वं स्यान्न चैवम् । तथा च स्वस्मिन् व्यवस्थितायास्तस्याः कथमन्यत्राव्यवस्थात्वमित्यव्यवस्थात्मनीति सूत्रार्थः । नन्वव्यवस्था प्रामाण्यसंशयस्तस्य च न संशय-

(१) अव्यवस्थात्मनि व्यवस्थितत्वाद्वाव्यवस्थाया नाव्यवस्था वेद्यत इति सूत्रार्थं इति वार्त्तिकम् ।

(२) समानधर्मादीनां सातत्याचित्यः संशय इति सूत्रार्थं इति वार्त्तिकम् । पुनः सूत्रम् । अत्यन्तसंशयस्तद्धर्मसातत्योपपत्तेरितिन्यायतत्त्वालोकलेखदर्शनादवगम्यते तथाशब्दरहितः सूत्रपाठस्तद्ग्रन्थकर्तृवाचस्पतिमिश्रसम्मत इति ।

स्वरूपत्वं संशयस्य विषयविशेषघटितत्वात् तस्य चान्यसंशयहेतुत्वं न विरुद्धमतो दूषणान्तरमाह । तथात्यन्तसंशयेति । तथा तथा सति अव्यवस्थाया हेतुत्वे सति । तथाशब्दोऽयं न सूत्रान्तर्गतोऽपि तु भाष्यस्थ इत्यन्ये । अत्यन्तसंशयः संशयानुच्छेदः स्यात् तद्धर्मस्य तज्जनकस्य ज्ञानत्वादिसाधारणधर्मदर्शनस्य सातत्योपपत्तेरित्याहुः ॥ ५ ॥

इत्थं च कारणाभावान्न संशय इति पूर्वपक्षे समाधानमाह ।

यथोक्ताध्यवसायादेव तद्विशेषापेक्षात् संशये नासंशयो नात्यन्तसंशयो वा(१) ॥ ६ ॥

यथोक्ताध्यवसायात् साधारणधर्मदर्शनाद्यन्यतमानन्तरं संशये ऽनुभवसिद्धे एवकारेण तादृशान्यतमानुत्तरक्षणे संशयाभावे च सति नासंशयो न कारणाभावात् संशयानुत्पादोऽन्वयव्यतिरेकाभ्यां तादृशान्यतमस्य कारणत्वावधारणात् । तत्र चान्यतमत्वस्य बहुतरभेदघटितत्वेन गुरुतया तत्तद्भेदानां विशेष्यविशेषणभाववैपरीत्येनानेककार्यकारणभावप्रसङ्गेन च तादृशान्यतमत्वेन न संशयकारणता किं तु साधारणधर्मदर्शनत्वादिप्रत्येकरूपेणैवाव्यवहितोत्तरत्वस्य कार्यतावच्छेदकघटकतया न व्यभिचार इति भावः । विप्रतिपत्तौ च मध्यस्थस्यैव संशयोदयात् तस्य च नैकतरकोटिनिश्चय इति न प्रागुक्तदोष इति बोध्यम् । नन्वेवमत्यन्तसंशयः स्यादित्यत आह । तद्विशेषापेक्षादिति । तेषां ये विशेषाः सहकारिणो दुरत्वादिदो-

(१) न सूत्रार्थापरिज्ञानादिति सूत्रार्थं इत्येतत्सूत्रव्याख्याने वार्त्तिकम् । सिद्धान्तसूत्रम् । यथोक्ताध्यवसायादेवेत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

मपृच्छन् को भवानिति । सो ऽब्रवीदहमेकः प्रथममासं वर्त्तामि च भविष्यामि च नान्यः कश्चिन्मत्तो व्यतिरिक्त इत्यादिश्रुतौ तु शम्भोरेव सृष्टेः प्राक्सत्त्वमद्वितीयत्वं जगत्कारणत्वं सर्वात्मत्वं चाम्नायते । मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति मायित्वमपि तस्य श्रूयते । न चात्र महेश्वरशब्दो ऽन्यपरः । तत्र मन्त्रे बहूनां शिवनाम्नामेवोपलब्धेः दक्षस्य महेश्वरं प्रति निमन्त्रणाभावे सर्वभूतकरो यस्मात्सर्वभूतपतिर्हरः । सर्वभूतान्तरात्मा च तेन त्वं न निमन्त्रितः । त्वमेव हीज्यसे यस्माद्यज्ञैर्विविधदक्षिणैः । त्वमेव कर्त्ता सर्वस्य तेन त्वं न निमन्त्रित इति हेतूक्तिव्याजेन तस्य सर्वहेतुत्वं सर्वान्तरात्मत्वं सर्वयज्ञयष्टृव्यत्वं च विशेष्यसम्बन्धित्वेनान्ययोगव्यवच्छेदिभ्यामेवकाराभ्यामन्ययष्टृत्वकर्तृत्वयोर्निषेधं चोपपाद्य अथवा मायया देव सूक्ष्मया तव मोहितः एतस्मात्कारणाद्वा ऽपि प्रभो त्वं न निमन्त्रित इति तत्रैव हेत्वन्तरोक्तिच्छलेन शुद्धे तस्मिन्नसम्भवि पूर्वोक्तकारणत्वोपपादकं मायित्वमपि तस्यैवोवाच । एवं यो मां वेत्ति स वेदान्वेत्ति साङ्गानित्यथर्वशीर्षे शम्भुज्ञानस्य साङ्गवेदज्ञानव्याप्यत्वोक्तेस्तज्जन्यत्वोपलम्भात्तद्विषयीभूतमहेशस्य तत्प्रतिपाद्यत्वं निश्चीयते । वेदाः साङ्गोपनिषदाः पुराणाध्यात्मनिश्चयः । यदत्र परमं गुह्यं स वै देवो महेश्वर इति द्रोणपर्वान्तर्गतशतरुद्रीये । पठ्यते सर्वसिद्धान्तैर्वेदान्तैर्यो मुनीश्वरेति पाद्मे च स्पष्टं साङ्गवेदपुराणादितात्पर्यभूमित्वं शम्भोः स्मर्यते । तस्मात् परतरं नान्यत्किंचिदस्ति महेश्वरादिति । तस्मान्नान्यः परो देवस्त्रिषु लोकेषु विद्यतइति च क्रमेण तयोरेवास्य सर्वात्तमतोच्यते हरिवंशे च हरिवाक्ये । नान्यस्त्वत्तः परमो देवदेव जगत्पत्तिः सुरवीरारिहन्तरा । नान्य-

क्रूतं त्वत्समं देवभूतं भूतं भव्यं भवदेवाथ नास्तीति । तत्रैव । वेदा वेदाङ्गैः सहितास्त्वत्प्रसूता यज्ञो दीक्षा च दक्षिणा चाभिरूपेति वेदादिहेतुत्वमपि तस्योक्तम् । मुक्तप्राप्यत्वमपि परमपरायणं तत्त्वमिति तस्य श्रूयते । स्मर्यते च त्वं धाम परमं पदमित्यादि । अपि च भगवता गीतायाः सप्तमनवमदशमाध्यायेषु स्वस्य सर्वात्मत्वज्ञापको यो विभूतियोगो दर्शितः अन्यत्रापि तत्परपुराणादिषु च सोऽपि हरपरेतिहासपुराणादिषु तस्य दर्शितः । यथा मोक्षधर्मे दक्षस्तवराजे । व्याघ्रो मृगाणां पततां तार्क्ष्योऽनन्तश्च भोगिनामित्यादि । यच्चैकादशे तत्प्रत्यायकं विश्वरूपं हरिणा दर्शितं तदप्यत्र शम्भोरुक्तम् । भवच्छरीरे पश्यामि सोममग्निं जलेश्वरम् । आदित्यमथ वै विष्णुं ब्रह्माणं च बृहस्पतिमित्यादि । किंचैकादशएवामी हि त्वामित्यादिना मया हतांस्त्वं जहीत्यन्तेन हरिणा हता एव भीष्मादयोऽर्जुनेन हता इति ज्ञायते । शतरुद्रिये चार्जुनप्रश्नोपन्यासवाक्यार्थं इति न्यायात्तेन हता एव कौरवाः पार्थेन हता इति निश्चीयते । किंच एष एव साधु कर्म कारयति अन्नादो वसुदानः फलमत उपपत्तेरित्यादिश्रुतिसूत्रैः परात्मनः शुभाशुभकर्मफलदातृतोच्यते । अन्नमासमन्ताद्ददातीत्यन्नादः । ततो ह्यस्य बन्धविपर्ययावित्यादिना च बन्धकत्वं मोचकत्वं चेशस्योच्यते । लभते च ततः कामान्, क्षिपाम्यजस्रमशुभान्, तेषामहं समुद्धर्तेत्यादिना तत्सर्वं हरेरुच्यते । स मोचयति सुप्रीतः शरण्यः शरणागतान् । आयुरारोग्यमैश्वर्यं वित्तं कामांश्च पुष्कलान् । स ददाति मनुष्येभ्यः स चैवाक्षिपते पुनः । सेन्द्रादिषु च देवेषु तस्य चैश्वर्यमुच्यते । स कामानां प्रभुर्देवो ये दिव्या ये च मानुषाः । समेधयति यन्नित्यं सर्वार्थं

सर्वकर्मसु । शिवमिच्छन्मनुष्याणां तस्मादेष शिवः स्मृतः । सर्वथा यः पशून्पाति तैश्च यद्रमते पुनः । तेषामधिपतिर्यच्च तस्मात्पशुपतिः स्मृत इत्यादि भारते । ब्रह्मादिस्तम्बपर्यन्तान्पशून्बद्ध्वेत्यादिपुराणेषु च तत्सर्वं हरस्योक्तम् । देव्यथर्वशिरसि तु यत्सृष्टेः प्राग्विद्यमानाद्वितीयरूपत्वादिकं प्रागुदाहृताथर्वशीर्षे शिवस्योक्तं तत्सर्वं शिवाया दर्शितम् । हरिवंशे च हरिप्रणीतेमास्तवे । आद्या सा सर्वभूतानां निष्ठा च परमा गतिरिति तस्याः सर्वाधिष्ठानत्वं मुक्तप्राप्यत्वं चोक्तम् । तत्रैव । लक्ष्मीरूपेण दानवानां वधाय चेत्यादिना त्वया व्याप्तमिदं सर्वं जगत्स्थावरजङ्गममित्यन्तेन तस्याः सर्वात्मता चोक्ता । तथा भविष्योत्तरे उमोक्तिः यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति । तस्याहं नित्यदेहस्था स च नित्यं मयि स्थितः । न पश्येत्सर्वभूतेषु न च सर्वं मयि स्थितम् । स तु पर्वतदुर्गेषु मार्गमाणो विनश्यतीति । मात्स्ये च सर्वगा सर्वभूतेषु द्रष्टव्या परमेश्वरी । सर्वलोकेषु यत्किं चिद्रहितं न तया विनेति । मार्कण्डेये तु तया विसृज्यते विश्वं जगदेतच्चराचरम् । सैषा प्रसन्ना वरदा नृणां भवति मुक्तये । संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वरीत्यादिना प्रागुक्तं सव गौर्या दर्शितम् । सनत्कुमारसंहितायाम् । विद्ये वेदान्तगीते श्रुतिपरिपठिते मोक्षदे मुक्तिमार्गे मार्गातीतस्वरूपे इत्यादिना वेदान्तोपपाद्यत्वमोचकत्वादिकं सरस्वत्या उक्तम् । सरस्वतीं नमस्यामि चेतनां हृदि संस्थिताम् । मतिदां वरदां चैव सर्वकामफलप्रदाम् । सुखमोक्षप्रदामित्यादिना बृहस्पतिश्च तत्सर्वं तस्या दर्शितवान् । तस्याः समुद्रा अधि क्षरन्ति तेन जीवन्ति प्रदिशश्चतस्रः । क्षरत्यक्षरं तद्विश्वमुपजीवतीत्यादिश्रुत्या ऽप्यस्या जगदुत्पाद-

कत्वपालकत्वादिकमुक्तम् । अयमर्थः । तस्या वाचः सकाशात्समुद्रा मेघा नद्यश्च समुद्द्रवन्ति जलमस्मादिति व्युत्पत्तेः । अधि अधिकं प्रभूतमुदकं विक्षरन्ति वाग्देवतारूपेणान्तर्यामिणा प्रेरिता मेघादयो जलक्षरणादिकं कुर्वन्ति । अक्षरं प्रधानं तदधिष्ठितं सत्क्षरति ईक्षणादिघटाद्यन्तकार्याकारेण परिणमते । अत्र तस्या इति तेनेति च स्त्रीपुल्लिङ्गनिर्देशेनास्या मायामहेशोभयरूपत्वं ध्वनितम् । तच्च मायोपहितब्रह्मरूपत्वे पर्यवस्यति । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियमिति लक्ष्म्याः सर्वेश्वरत्वं श्रूयते । स्मर्यते च जगत्कारणत्वसर्वात्मत्वमोचकत्वादिकं वैष्णवे । नमस्ये सर्वभूतानां जननीमब्जसम्भवाम् । त्वं सिद्धिस्त्वं स्वधा स्वाहा सुधा त्वं लोकपावनीत्यादिना शरीरारोग्यजैश्वर्यमरिपक्षक्षयः सुखम् । देवि त्वद्दृष्टिदृष्टानां पुरुषाणां न दुर्लभमित्यन्तेन तत्रैव । तन्निबोध यथा सर्गे भगवान्संप्रवर्त्तते । नारायणाख्यो भगवान्ब्रह्मा लोकपितामहः । उत्पन्न उच्यते विद्वन्नित्य एवोपचारतः । एकार्णवे तु त्रैलोक्ये ब्रह्मा नारायणात्मकः । भोगिशय्यागतः शेते त्रैलोक्यग्रासबृंहितः । जनस्थैर्योगिभिर्देवश्चिन्त्यमानोऽब्जसम्भवः । प्रजाः ससर्ज भगवान्ब्रह्मा नारायणात्मक इत्यादिना विधेर्जगदुत्पत्तिप्रलयहेतुत्वयोगिचिन्त्यत्वादिकमुक्तम् । एवं शैववैष्णवादिमतेषु दर्शितान्यदर्शितानि चापीदृशानि सर्वाण्येव स्मर्त्तव्यानि । एतानि च यदि संभवत्येकवाक्यत्वे वाक्यभेदो हि नेष्यतइति न्यायात्प्रागुदाहृतसामान्यवाक्यैरेकवाक्यतां नीत्वैतत्प्रतिपाद्यानां हरिहरादीनामेकवाक्यतापन्नानां संभूयैकार्थप्रतिपादकत्वमिति न्यायेनैकाद्वितब्रह्मरूपतोपेयते तदा प्रमाणानि भवन्ति । अन्यथा त्वन्योन्यं विरोधं प्राप्य विनिगमना-

विरहेण सर्वाण्यपि सुन्दोपसुन्दन्यायाद्बाधितानि स्युः। न हि सर्वेषामन्योन्यभिन्नानां तत्तच्छास्त्रोक्तं सर्वेश्वरत्वाद्वयत्वादिकं संभवति विकल्पसमुच्चयादीनां प्रागेव निरस्तत्वात्। तस्माच्छ्रुतिस्मृतिप्रामाण्यमिच्छद्भिस्तदभेद एवोपेयः। यस्तु ते उल्लङ्घ्य दुराग्रहात्कुतर्कैस्तद्भेदं साधयति स न शैवो न वा वैष्णवः किं तु नास्तिक एवेति मन्तव्यम्। यथा ऽऽह हरिः। श्रुतिस्मृती ममैवाज्ञे यस्ते उल्लङ्घ्य वर्त्तते। आज्ञाच्छेदी मम द्वेषी मद्भक्तो ऽपि न वैष्णवः इति। मनुश्च श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः। ते भूते यो ऽवमन्येत हेतुशास्त्राश्रयो द्विजः। स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दक इति। ईदृशश्च बन्धुभिरपि त्याज्यः। अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चतीति न्यायात्। किंच दुराग्रही वैष्णवो वा शैवो वा प्रष्टव्यो बुधैः। किं विष्णोर्भिन्नः शिवः शिवाद्भिन्नो वा विष्णुः। नाद्यः। घटाद्भिन्नस्य पटादेरघटत्ववद्विष्णुभिन्नस्याविष्णुत्वापत्त्या ऽऽनन्दात्मकशिवरूपत्वमपि न स्यात्। यो वै भूमा तत्सुखं नाल्पे सुखमस्तीति श्रुतेः। पुरुषोत्तमाद्भिन्नस्यापुरुषोत्तमत्वं मुकुन्दभिन्नस्यामुकुन्दत्वं च ध्रुवम्। तथा चालं तदुपासनया मुमुक्षूणाम्। न द्वितीयः। शिवशम्भुशङ्करमहेश्वरभिन्नस्याशिवाशम्भ्वशङ्करामहेश्वरत्वापत्त्या ऽनुपास्यत्वप्रसङ्गात्। शिव एको ध्येयः शिवंकरः अन्यत्सर्वं परित्यज्येति श्रुतेः। अत एवोक्तं हरिवंशे न विना शङ्करं विष्णुर्न विना केशवं शिव इत्यादि। शिवस्य विष्णोर्भिन्नत्वे ऽपि न विष्णोः शिवाद्भिन्नत्वमिति तु न वैष्णवेन वक्तुं शक्यम् एवमन्यत्रादर्शनात्। न विना केशवं शिव इत्युक्तिविरोधाच्च स्वपक्षक्षतेश्च। तथा च वध्यतां वध्यतां बालो नानेनार्थो ऽस्ति जीवता। स्वपक्षहानिकर्तृ-

त्वाच्चः कुलाङ्गारतां गत इति न्यायविषयता नातिवर्तते । एवं शैवमते ऽपि बोध्यम् । तस्मात्तत्तल्लीलाविग्रहावच्छिन्ने परे ब्रह्मणि नौपाधिको ऽपि भेदः कल्प्यः । तथा च व्याससूत्रम् न स्थानतो ऽपि परस्योभयलिङ्गं सर्वत्र हीति । अपि चैवमेके इति च । स्थानत उपाधितो ऽपि परस्येशस्योभयलिङ्गमनेकरूपत्वं नास्ति सर्वत्र ब्रह्मपरेषु वेदान्तेषु तदेकत्वस्य श्रवणादित्याद्यसूत्रार्थः । एके शाखिनो मृत्योः स मृत्युमाप्नोतीत्यादिभेदनिन्दापूर्वकमभेदमेव परमात्मनः समामनन्तीति द्वितीयार्थः । तर्हि तत्तत्पुराणेष्वितरासाधारण्येन तत्तत्प्रतिपादनमप्रमाणं स्यात् । वैष्णवं शैवमित्यादिपुराणसंज्ञाभेदाश्चानर्थकाः स्युः । चतुर्भिर्भगवान्विष्णुर्द्वाभ्यां ब्रह्मा तथा रविः । अष्टादशपुराणेषु शिष्टैस्तु भगवाञ्छिव इत्यादिप्रभासखण्डादिगतं विभागवचनं चाप्रमाणं स्यात् । तथा चाभेदवचःप्रामाण्यसाधने प्रवृत्तानां भवतामेकं संधित्सतो ऽपरं प्रच्यवत इति न्यायविषयत्वं दुर्वारम् । तथा चौपधिको भेदो ऽवश्यमुपेय इति चेन्न । तत्तद्गुणकार्यसर्गादिप्राधान्यविवक्षया रजआद्यवच्छिन्न इव तत्तल्लीलाविग्रहावच्छिन्ने ऽपीशे तत्तच्छब्दप्रवृत्तिसम्भवात् । एतद्विवक्षया ऽपि च संज्ञाभेदमात्रं परस्य कृषीवलस्येव पूर्वोक्तसंज्ञाभेदः । तदुक्तं वैष्णवे । सृष्टिस्थित्यन्तकरणाद् ब्रह्मविष्णुशिवात्मिकाम् । स संज्ञां याति भगवानेक एव जनार्दन इति । मार्कण्डेये ऽपि कृषीवलदृष्टान्तपूर्वकमेवमेवोक्तम् । केचित्तु सत्त्वादिगुणावच्छिन्नेशवचतुर्भुजादिदेहवृत्तिजातिविशेषविशिष्टस्यापीशितुर्विष्णवादिशब्दवाच्यत्वम् । तथा च श्रुत्यादौ तत्तच्छब्देन तत्तन्मात्रव्यवहारोपपत्तिरित्याहुः । एवं च रुद्रशब्दितस्य तमोवच्छिन्नचैतन्यस्य चतुर्भुजदेहाभिमानित्वात् तदभिमानविषयस्य

च त्रिनेत्रदेहस्य विष्णुशब्दितस्य सत्त्वावच्छिन्नचिदभिमानविषयत्वात् चतुर्मुखदेहस्यापि तयोरभिमानगोचरत्वात् रजोऽवच्छिन्नस्योभयाभिमानित्वाच्च यो विष्णुः स तु वै रुद्रो यो रुद्रः स पितामह इत्यादेराञ्जस्यम्। चतुर्भुजदेहस्येव तदभिमानिनोर्हरिहरयोरपि हरिनारायणादिशब्दाभिधेयत्वान्नामानि तव गोविन्देत्यादेराञ्जस्यम्। उक्तविवक्षया संज्ञाभेदादसाधारणव्यवहारादेराञ्जस्यं चेति सर्वं चतुरस्रम्। कारणीभूततमःप्रभृत्यवच्छिन्नेशस्य रुद्रादिसंज्ञा मैत्रायणीशाखादौ श्रूयन्ते। अथ यो ह खलु वावाऽस्य तामसोंऽशो ऽसौ स ब्रह्मचारिणो योऽयं रुद्रः अथ यो ह खलु वावाऽस्य राजसोंऽशोऽसौ स ब्रह्मचारिणो योऽयं ब्रह्माऽथ यो ह खलु वावाऽस्य सात्त्विकोंऽशोऽसौ स ब्रह्मचारिणो योऽयं विष्णुः स वा एकस्त्रिधाभूत इत्यादि। अयमर्थः तामसः तमःप्रधानत्वेन तत्कार्यसंहारक्रियाप्रधानत्वेन वा विवक्षितोंऽश इवांशो हे ब्रह्मचारिणः। एवमग्रेऽपि। न च तामसादिपदेन केवलतमआद्यवच्छिन्ना विवक्षितः तमआदेरन्योन्यसहचरस्वभावत्वात्। यथाऽऽहुः सांख्याः। अन्योन्यमिथुनवृत्तय इति। आगमश्चात्र भवति। अन्योन्यमिथुनाः सर्वे सर्वे सर्वत्र गामिनः। रजसो मिथुनं सत्त्वं सत्वस्य मिथुनं रजः। तमसश्चापि मिथुने ते सत्त्वरजसी उभे। उभयोः सत्त्वरजसोर्मिथुनं तम उच्यते। नैषामादिः संप्रयोगो वियोगो वोपलभ्यत इति। मिथुनपदेन सर्वत्राविनाभाववर्त्तित्वलक्षणं सहचरणशीलत्वं विवक्षितम्। तथा च यथोक्तव्याख्यानमेव तामसादिपदेषूचितम्। एतेन प्रलये तम एवावशिष्यतइत्यादिकल्पनाऽप्यपास्तेत्यलमतिप्रसङ्गेन। तथा मैत्रेय श्रूयतामेतद्यत्पृष्टोऽहमिदं त्वया। विष्णोरशांशसंभू-

तिचरितं जगतो हितमित्यादिर्वैष्णवादौ कृष्णादावप्यंशत्वव्यवहार औपचारिकः। न ह्येतत्पाषाणांशोऽयं कणइतिवत्सम्भवति निष्कलत्वश्रुतिविरोधात्। अत एवेन्दोरंशो गुरुरितिवदपि न। तद्वदेव भिन्नत्वापत्तेश्च। नापि बिम्बप्रतिबिम्बभावेन सः अवताराणां जीवत्वापत्तेः। नन्वैश्वर्यावृतत्वाविद्यावद्विषयकर्मकर्तृत्वादिरूपजीवलिङ्गसत्त्वात् जगदुत्पादकत्वादीशलिङ्गासत्त्वाच्चेषृमेव तेषां तदिति चेन्नूनं दुर्मतिरसि यतः अजोऽपि सन्नव्ययात्मेत्याद्यसंख्यवाक्यानि पश्यन्नपि न पश्यसीव। कर्मकर्तृत्वं तु लोकानुग्रहायैवेशस्य। यदि ह्यहं न वर्त्तेयमित्यादितदुक्तेः। एवं रामादिष्वपि बोध्यम्। तमुद्दिश्य ह्युक्तं भागवते स्त्रीसङ्गिनां गतिरियं प्रथयंश्चकारेत्यादि। शिवावतारस्य भैरवस्य ब्रह्महत्याव्रताचरणं लोकसंग्रहायेति काशीखण्डादौ स्पष्टम्। महादेवांशसंभूतमित्यादिना ऽत्रांशत्वोक्तिरप्युक्तरीत्यौपचारिक्येव। एवं श्रीगणेशस्य ब्रह्मवैवर्त्ते विष्णवंशत्वोक्तिः अन्यत्र क चिद्धरांशत्वोक्तिः क चिद् ब्रह्मांशत्वोक्तिर्या सा ऽपीदृशी। गुहे क चिद्विष्णवंशत्वोक्तिः क चिच्छिवांशत्वोक्तिश्चैवमेव। मल्लारिस्तु साक्षाच्छिव एव न तत्रांशत्वकथापीति प्रसिद्धं ब्रह्माण्डपुराणे। कथं तर्हि रामकृष्णादौ गर्भवासादिपुरःसरं जन्म क्रमेण च बाल्याद्यवस्थाः युद्धे मूर्छादिकं भार्याद्यर्थं विलापादिरिति चेति चेत् मायैव। यतो दृश्यतएवेन्द्रजालवन्न तु वस्तुतो ऽस्ति अखण्डचिदानन्दघनत्वाद्रामादेः। तदुक्तं ब्रह्माण्डपुराणे। स्त्रीपुंमलानुषङ्गात्मा देहो नास्य विजायते। किं तु निर्दोषचैतन्यं सुखं नित्यां स्वकां तनुम्। प्रकाशयति सैवेयं जनिर्विष्णोर्न चापरा। तथा ऽप्यसुरमोहार्थं परेषां च क चित्क चित्। दुःखाज्ञानश्रमादींश्च दर्शयेच्छुद्धसद्गुणः। क व्रणा-

THE SAMBANDHAVĀRTIKA OF SURESVARĀCHĀRYA.

1. I bow with devotion to Him Who is considered as multiple[1] by those whose conception of *Atman* is blinded by the deep-rooted delusion that springs from their extreme nescience and from the consequent sense of universal duality; who, nevertheless, is the indivisible, changeless, eternal, all-pervading One, far beyond the scope of all word and thought, in Whom all the worlds rejoice.[2]

2. With the object of clearing away certain doubts created by sophists, this work is begun on a small scale, to bring out, by logical reasoning, the meaning of the *bhāshya* (or *vṛitti*), written for the instruction (*lit* .pacification) of the virtuous, wherein the venerable teacher (*Ṣankara*), pursuing the path of his predecessors, has examined the import of the entire Vedas under the pretext of a commentary on the *Kānvōpanishad.*[3]

3. Here (as elsewhere) the word *upanishad* has but one meaning, namely, the knowledge of the Supreme Self (or *brahmavidyā*); for,[4] the literal interpretation of

---

[1] The allusion here is to the Mīmāmsakas who uphold the distinction between the enjoyed (*bhōgya*) and the enjoyer (*bhōktṛi*.)

[2] Hence, Himself full of bliss, since one must possess what he is able to impart to others.

[3] Another name for the *Bṛihadāranyakōpanishad*, also called the *Vājasanēyibrāhmaṇōpanishad.*

[4] The objection is raised that the word *upanishad* is a *rūḍhi* word, used as the name of the several Vedic texts so called. This is met by saying that it should be interpreted etymologically as a *yōga* word, and, the several parts of the Scripture are named *Upanishads*, because they teach *upanishad* or *brahmavidyā*. See sloka 8.

तिचरितं जगतो हितमित्यादिवैष्णवादौ कृष्णादावप्यंश-
त्वव्यवहार औपचारिकः । न ह्येतत्पाषाणांशो ऽयं कणइति-
वत्सम्भवति निष्कलत्वश्रुतिविरोधात् । अत एवेन्दोरंशो
गुरुरितिवदपि न । तद्वदेव भिन्नत्वापत्तेश्च । नापि बिम्ब-
प्रतिबिम्बभावेन सः अवताराणां जीवत्वापत्तेः । नन्वैश्व-
र्यावृतत्वाविद्यावद्विषयकर्मकर्तृत्वादिरूपजीवलिङ्गसत्त्वा-
त् जगदुत्पादकत्वादीशलिङ्गासत्त्वाच्चेषामेव तेषां तदिति
चेन्नूनं दुर्मतिरसि यतः अजो ऽपि सन्नव्ययात्मेत्याद्यसंख्य-
वाक्यानि पश्यन्नपि न पश्यसीव । कर्मकर्तृत्वं तु लोका-
नुग्रहायैवेशस्य । यदि ह्यहं न वर्त्तेयमित्यादितदुक्तेः । एवं
रामादिष्वपि बोध्यम् । तमुद्दिश्य ह्युक्तं भागवते स्त्रीस-
ङ्गिनां गतिरियं प्रथयंश्चचारेत्यादि । शिवावतारस्य भैर-
वस्य ब्रह्महत्याव्रताचरणं लोकसंग्रहायेति काशीखण्डादौ
स्पष्टम् । महादेवांशसंभूतमित्यादिना ऽत्रांशत्वोक्तिरप्यु-
क्तरीत्यौपचारिक्येव । एवं श्रीगणेशस्य ब्रह्मवैवर्त्ते विष्णवं-
शत्वोक्तिः अन्यत्र क चिद्रुद्रांशत्वोक्तिः क चिद् ब्रह्मांश-
त्वोक्तिर्या सा ऽपीदृशी । गुहे क चिद्विष्ण्वंशत्वोक्तिः क
चिच्छिवांशत्वोक्तिश्चैवमेव । मल्लारिस्तु साक्षाच्छिव एव न
तत्रांशत्वकथापीति प्रसिद्धं ब्रह्माण्डपुराणे । कथं तर्हि राम-
कृष्णादौ गर्भवासादिपुरःसरं जन्म क्रमेण च बाल्याद्य-
वस्थाः युद्धे मूर्छादिकं भार्याद्यर्थं विलापादिरिति चेति
चेत् मायैव । यतो दृश्यतएवेन्द्रजालवन्न तु वस्तुतो ऽस्ति
अखण्डचिदानन्दघनत्वाद्रामादेः । तदुक्तं ब्रह्माण्डपुराणे ।
स्त्रीपुंमलानुषङ्गात्मा देहो नास्य विजायते । किं तु निर्दो-
षचैतन्यं सुखं नित्यां स्वकां तनुम् । प्रकाशयति सैवेयं ज-
निर्विष्णोर्न चापरा । तथा ऽप्यसुरमोहार्थं परेषां च क चित्क
चित् । दुःखाज्ञानश्रमादींश्च दर्शयच्छुद्धसद्गुणः । क व्रणा-

THE SAMBANDHAVĀRTIKA OF SURESVARĀCHĀRYA.

1. I bow with devotion to Him Who is considered as multiple[1] by those whose conception of *Atman* is blinded by the deep-rooted delusion that springs from their extreme nescience and from the consequent sense of universal duality; who, nevertheless, is the indivisible, changeless, eternal, all-pervading One, far beyond the scope of all word and thought, in Whom all the worlds rejoice.[2]

2. With the object of clearing away certain doubts created by sophists, this work is begun on a small scale, to bring out, by logical reasoning, the meaning of the *bhāshya* (or *vṛitti*), written for the instruction (*lit*. pacification) of the virtuous, wherein the venerable teacher (*Ṣankara*), pursuing the path of his predecessors, has examined the import of the entire Vedas under the pretext of a commentary on the *Kānvōpanishad*.[3]

3. Here (as elsewhere) the word *upanishad* has but [o]ne meaning, namely, the knowledge of the Supreme Self (or *brahmavidyā*); for,[4] the literal interpretation of

[1] The allusion here is to the Mīmāmsakas who uphold the distinction between the enjoyed (*bhōgya*) and the enjoyer (*bhōktṛi*.)

[2] Hence, Himself full of bliss, since one must possess what he is able to impart to others.

[3] Another name for the *Bṛihadāranyakōpanishad*, also called the *Vājasanēyibrāhmaṇōpanishad*.

[4] The objection is raised that the word *upanishad* is a *rūḍhi* word, used as the name of the several Vedic texts so called. This is met by saying that it should be interpreted etymologically as a *yōga* word, and, the several parts of the Scripture are named *Upanishads*, because they teach *upanishad* or *brahmavidyā*. See sloka 8.

the word leads only to that. How, then, is this (interpretation)?

4. The prefix *upa* denotes proximity, namely in relation to the Self (*pratyag ātman*): and the prefix *ni* qualifies the threefold meaning of the verb *sad*.[1]

5. Bringing this soul (*Jīvātman*) into union with *Brahman* who is without a second, it dispels (or shatters) nescience (*avidyā*) and its consequences. Hence it (the *Brahma-vidyā*) is termed *upanishad*.

6. Or, destroying our nescience which is the prime source of all misery, it makes us attain the indivisible Supreme in Its aspect of the Inner Self (*pratyag*). Hence, also, the term *upanishad*.

7. Or else, knowledge (*vidyā*) puts an end to the source of all worldliness by cutting off its very root. Hence, too, the term *upanishad*.

8. Because the text inculcates the knowledge referred to above (*brahmavidyā*), and does not differ, therefore, from the knowledge itself,[2] the name *upanishad* is applied to it, in the same way as the plough is spoken of as one's livelihood.[3]

9. It (the text) is termed *āraṇyaka*, because it is (or, must be) recited in the forest (*araṇya*.) It is named (*bṛihadāraṇyaka*) by reason of the great length of the text, as also of its deeply philosophical signification.

---

[1] The three meanings are 'shattering,' 'motion,' and 'termination': षद्लृ विशरणगत्यवसादनेषु
Each of these is dealt with in order in the 5th, 6th and 7th verses.

[2] This is a sort of metonymy, where no difference is made between what teaches (*vyutpādaka*) and what is taught (*vyutpādya*), between the effect (*sādhya*) and that by which it is effected (*sādhaka*).

[3] Whereas it is only a means to it.

10. Thus, under the guise of an etymological explanation, suitable to the context, the commentator has indicated that the sole purpose of all *upanishads* is final liberation (*mukti.*)

11. The commentator then says, " For (the benefit of) such as wish to escape from birth and death," with the object of establishing a mutual difference (or contrast) between the doer of rituals (*karmādhikārin*) and the aspirānt of spiritual knowledge (*jnānādhikārin.*)[1]

12. He alone is authorised to study the *Vedāntas*, who has renounced all action (*kriyā*), and who wishes to be free from birth and death (*samsāra*), and, also to understand the unity of the Self (*aikātmya*).

13. Even the Scripture, in the passage. " This only, etc." (*ētam ēva*),[2] says that he alone who has relinquished all action (*karman*) has the right to acquire knowledge whereby to understand the real nature of the inner Self (*pratyag*).

14. To stimulate a desire for realising the supreme Self, the reciting of the Vedas (and other rites) are prescribed ; but all of them must be renounced if *Brahman* is sought to be attained. This is supported by the use of *ipsanti* in the Vedic text (quoted above).

15. With a view to bestow knowledge on a student so entitled, it is next written, " From the cause of births and deaths, etc.,"[3] a phrase full of evidently right principles.

---

[1] That is to say, only seekers after knowledge are fit to be students of this *Upanishad*.

[2] एतम् एव प्रव्राजिनो लोकम् इच्छन्तः (or ईप्सन्तः) प्रव्रजन्ति ।

[3] *Ṣankara* writes that his *bhāshya* is intended to confer on the student a knowledge of the identity of the soul with *Brahman*, and that this knowledge is the instrument of liberation from the root of *samsāra* : संसारहेतु-निवृत्ति-साधन-ब्रह्म-आत्म-एकत्व-विद्या-पतिपत्तये ।

16. Since no other topic is comprised in the teachings of *Vēdānta* than the unity (of the soul with *Brahman*), a knowledge of that unity, therefore, will dispel spiritual darkness.

17. This sacred Vedāntic *upanishad*, was compiled with great pains to facilitate the acquisition of that knowledge which alone could destroy nescience, the origin of *samsāra*.

18. A true understanding of the nature of the Supreme Self alone can root out the ignorance of that Self, and such an understanding springs from the (spontaneous) awakening of the soul (*ātmotpatti*). Nothing else[1] is necessary for the dispulsion of darkness.

19. The methods for obtaining what is sought and the persons authorised to pursue those methods, have now been differentiated with respect to the *karmakāṇḍa* and the *jnānakāṇḍa*. Now, directions are given for such persons in the pursuit of those methods.

20. 'May we not take it that final liberation, like happiness (*svarga*, etc), is by virtue of scriptural injunctions (*vidhi*)?[2] For, without something being enjoined to be done (*kārya*) there can be neither a person authorised (*adhikārin*), nor the relation of cause and effect between sacrifices and their fruits.

21. 'It is so even in temporal matters; why not so

[1] That is, not only is *karman* not necessary for gaining the highest knowledge, but even reflection or meditation (*prasankhyāna*) is only secondary.

[2] Or, in other words, even liberation (*mukti*) is the result of performing *karman*. This and the next two are the arguments of the opponent, the *Mimāmsaka*.

in Scripture?[1] There are also passages in the *Vēdas* to show that liberation is dependent on the carrying out of Vedic injunctions.

22. 'Just as there are mandatory texts like "One should perform sacrifice, etc." in the case of temporal happiness, so, too, there are texts like "One should worship" in regard to emancipation (*mukti*).'

23. No, it is not correct to assume a common means for the attainment of temporal happiness and of final liberation, for the two are essentially different in the facility or difficulty, in the certainty or uncertainty, of their attainment.

24. What is best (*jnāna*) is one thing, and what is agreeable (*karman*) is another (i. e. the two are different) both of them affect the same individual with different results (*mukti* and *svarga*). Good (final liberation) will come to him who chooses the best, but he who chooses the agreeable will lose the fruit (heavenly happiness, etc. which are only temporary).[2]

25. Having examined the nature of the life (in other worlds) that results from the performance of action the *Brāhmaṇa* (lit. one who has studied the Vedas) will begin to despair (by reason of the transitoriness of such life), thinking, "How can that which is non-action *mukti*) be the effect of action (*karman*)?" And, to gain that knowledge, he must needs go, *samidh* (fuel for the sacred fire) in hand, to a teacher who is well-versed in the Vedas and ever bent on a contemplation of the Supreme (*brahmanishṭha*).

[1] The Vedas are supposed to conform to common usage. Hence there too there can be no *adhikāriṇ* without a *kārya*.

[2] Kaṭha, II. 1.

26. Is not liberation, like temporal bliss, a thing to be accomplished,[1] being of the nature of something not attained? Not so; liberation is not even a thing to be accomplished, for, it is not like temporal happiness.

27. Since the knowledge of the Self destroys the nescience of a person when the obstacles to his progress have spontaneously disappeared, it is therefore said, in figurative language (*upaçhārāt*) that liberation is to be accomplished by such knowledge.

28. As a sick man is restored to health by medical treatment, so also does one obtain liberation when his ignorance of the Self is destroyed by spiritual wisdom.[2]

29. Scripture says "This was *Brahman*, etc.,"[3] and *Brahman* alone, etc."[4] So the student (who desires liberation), like one who is asleep, is merely to be awakened by Scriptural teaching, but not to be made to act, by it.

30. What purpose does injunction serve, since knowledge is independent of human endeavour. Such texts as do occur are meaningless in this connection, since they cannot have a mandatory signification.

31. The objection that there can be no authorisation (*adhikāra*) without something ordained to be done (*kartavya*), will be confuted later on,[5] by saying that it

[1] Hence, requiring a means of accomplishing it. *Mukti* is not like *svarga*, the result of conscious effort.

[2] The medicine is not the direct cause of health, which is but the natural state. It simply removes the ailment. So knowledge merely removes *avidyā*, and is hence figuratively said to be the means of *mukti*.

[3] ब्रह्म वा इदं अग्र आसीत् ।

[4] ब्रह्मैव सन् ब्रह्माप्येति ।

[5] See verse 228. That is, the previlege of performing sacrifices, etc., may be hemmed in by limitations, but knowledge is open to every one universally, and hence requires neither *adhikāra* nor *vidhi*.

(knowledge) may be prescribed for all.

32. Another (opponent) says, "If you desire to attain liberation (*ṣrēyas*), which is no other than the natural condition of the soul, that end can be accomplished only by performance of rites (*karmabhyaḥ*), for *karman* is mentioned in the Vedas [as the means to *purushārthas* of which *mukti* is one.]

33. "Since, in *Sruti* as well as in *Smṛiti*, *karman* alone is ordained to be done, there can be no other means than *karman* both for final liberation (*mukti*) and for temporal happiness (*abhyudaya*).

34. "Let us endeavour and reason it out, considering it in its Vedic aspect. For, every Vedic text can only mean either a prohibition or an injunction.

35. "'But (says the opponent's opponent), I have already quoted several Vedic passages, which are not injunctory; and therefore what you say is unreasonable.'

36. "There will be consistency of meaning (*ēkavākyatva*)[1] if such passages are construed to be injunctory, on the authority of the aphorisms, "Because the Vedas aim at rites, etc.,"[2] and "Since it explains the injunction, etc."[3]

37. "But if we construe these texts which do not enjoin actions as syntactically different (*vākyabhēda*),[4]

[1] This is a canon of the Mimamsa, by which a merely affirmative passage, occurring in the same context as a mandatory text, is interpreted to be explanatory of the latter, and, therefore, to be included in the injunction. Of a different interpretation the Mimamsaka would say that his is the more natural and the other is strained.

[2] आम्नायस्य क्रियार्थत्वात्, etc.

[3] विधिना तु एकवाक्यत्वात्, etc.

[4] That is, as not explanatory of, or as not supplementing, the injunctory passage.

such an interpretation will be far-fetched. 'Now (says the opponent's opponent again) the reward of final liberation is said to be everlasting (not transitory).

38. "'How can it be everlasting, if it is the reward for performing rites (*karman*); for, nothing in this world that results from *karman*, is known to be permanent (*dhruva*)?

39. "'Liberation must be the result of some means Hence (if *karman* is not the means), what remains, namely, *jnana*, must be the means,[1] since it is also so said in the *Vedānta*.'

40. "It is not so, since *mukti* is established to be the result of *karman*. 'But (the opponent's opponent again) how can it be permanent if it is the fruit of *karman*?' Listen, then, to my explanation.[2]

41 & 42. "By the non-performance of prohibited rites (*nishiddha*) and of rites having special objects (*kāmya*), by the performance of prescribed (or necessary) duties (*nitya*), by the consequent removal of impediments, and the wearing out, by enjoyment and suffering (*bhōga*), of the germs of a second bodily life, the inner soul will reach liberation by dint of *karman* alone in the manner aforesaid, even without any instruction as to the unity of the Self (*aikātmya*).

43. "It may be said, 'In such Vedic passages as "Having realized him, etc." and "knowing *Brahman*, etc."[3] a reward (*mukti*) is prescribed for knowledge of

[1] Though not directly, at least as the means of removing the impediments to *mukti*.

[2] Surēśvara's opponent tries to show that *mukti* may be permanent, and yet be the result of *karman*.

[3] निचाय्यतंमृत्युमुखात्प्रमुच्यते and ब्रह्मवेदब्रह्मैवभवति ।

स्वीयध्रुवो नतजकोटिगुणेन हीनो
मौर्व्या नतासुभवया विहृतोऽपरोऽस्य ।
वर्गात् पदं कयुतादपरोनितं त-
द्वारघ्नमेवमिह दण्डमुखं विधोः प्राक् ॥
अस्वे फले रविफलात् स्वफलस्य बाल्ये
हीनान्यथा च सहितेष्टफलेन नूनम् ।
तिथ्यन्तदण्डमितिरत्र भवेत् स्फुटा सा
प्राक् चेद्विधोर्धनफलाल्पमथात्र सौरम् ॥
तर्हि ध्रुवात् सनतकोटिगुणाद्विहान्यः
साध्यो विदा गणितगोलविदा मुदैव ।
श्रीब्रह्मगुप्तनतकर्म भवेत् सुसूक्ष्म-
मेवं सकृत् सकलसज्जनरञ्जनार्थम् ॥

इति मदुक्तमुपपद्यते। अत्र विधोः प्रागित्यादिभिर्यो विशेषोऽभि-हितस्तस्योपपत्तिर्धनर्णगणितेनोह्या । इति ॥

इदानीं ग्रहणे रविचन्द्रयोर्नतकालमाह ।

प्राक् पश्चाद्वा याभिर्घटिकाभिर्दिनदलान्नतः सूर्यः ।
तिथ्यन्ते तद्विहितं त्रिंशद्घटिकावशेषाभिः ॥ २५ ॥
विपरीतमर्धरात्रात् चन्द्रग्रहणे शशी रविग्रहणे ।
सूर्यो यतो नतस्ताभिरेव घटिकाभिरिन्दुरपि ॥ २६ ॥

चन्द्रग्रहणे तिथ्यन्ते पूर्णान्तसमये प्राक् वा पश्चाद्याभिर्घटिका-भिर्दिनदलात् दिनार्धतो नतो रविर्भवति तत् सूर्यस्य नतकालमानं वि-हितं भवति । ताभिर्घटिकाभिः किंविशिष्टाभिस्त्रिंशद्घटिकावशेषाभि-र्विपरीतमर्धरात्रात् शशी नतो भवति । अर्थात्तिथ्यन्ते याभिर्घटिकाभी रविर्नतस्ताभ्यस्त्रिंशद्घटिका विशोध्य शेषं शशिनोऽर्धरात्राद्विपरीतं नतं यदि रवेः प्राक् तदा शशिनः पश्चाद्यदि रवेः पश्चात्तदा शशिनः प्राक् नतमर्धरात्राद्भवतीति । रविग्रहणे यतो याभिर्घटिकाभिः सूर्यो नत-स्ताभिरेव घटिकाभिस्तस्मिन्नेव कपाले चन्द्रोऽपि नत इत्यर्थः ।

अत्रोपपत्तिः । चन्द्रग्रहणे पूर्णान्ते रविचन्द्रौ षड्भान्तरितावत ऊर्ध्वयाम्योत्तरवृत्ताद्याभिर्घटिकाभी रविर्नतस्त्रिंशता रहिताभिस्ताभिर्विपरीतकपाले शशी नतो भवति । रविग्रहे द्वयोरेकराश्याद्यवयवगतत्वादेककपाले समा एव नतघटिका इति सर्वं सिद्धान्तविदां स्फुटमेव ॥ २५–२६ ॥

इदानीं नतकर्माह ।

दिनदलपरिधिस्फुटतिथि-
नतकेन्द्रज्यावधो गुणोऽर्केन्द्वोः ।
इन्दुतिधृति१९१भिर्नवनव-
वेदै४९९र्व्यासार्धकृति१०६९२९००भक्तः ॥ २७॥

फलविकला वा सूर्ये प्राग्ऋणमसकृन्नते धनं पश्चात् ।
केन्द्रफलमृणं चन्द्रेऽन्यथा धनं प्राग्ऋणे स्पष्टौ ॥ २८ ॥

दिनदलपरिधिभ्यां यौ स्फुटौ रविचन्द्रौ ताभ्यां या तिथिस्तिथ्यन्तस्तत्र यो नतो नतकालस्तस्य केन्द्रस्य च ज्ययोर्वधः कार्यः । स यदि रवेस्तर्हि विधुनवभूमिभि१९१र्गुणितश्चन्द्रस्य चेत्तदा नवनववेदै४९९र्गुणितः । उभयत्र त्रिज्यावर्गं १०६९२९०० भक्तः फलं विकला भवन्ति । प्राक् नते सूर्ये तत्फलमृणं पश्चान्नते च धनं कार्यम् । चन्द्रे तत्केन्द्रफलं पूर्वागतं विकलात्मकं प्राक् कपाले ऋणे मन्दफले धनं कार्यमन्यथा प्राक् वा पश्चिमे ऋणमेव विधेयमेवमसकृत्तदा स्फुटौ रविचन्द्रौ वा भवतः । 'तद्द्युदलपरिध्यन्तरगुणा' इत्यादिना पूर्वं नतकर्मानीतमिदानीं पुनः साधितमतो 'वा' शब्दप्रयोगो युक्तः ।

अत्रोपपत्तिः । पूर्वप्रकारेण दिनार्धपरिधिना मन्दफलकला रवेः $= \frac{२२५ \text{ दिप} \times \text{ज्याके}}{२१४ \times \text{भांश}}$ । एतद्विकलाः $= \frac{६० \times २२५ \times \text{दिप} \times \text{ज्याके}}{२१४ \times \text{भांश}}$ । रवेः परिध्यन्तरम् $= \frac{१}{६} \times \frac{\text{ज्यान}}{\text{त्रि}}$ । ततोऽनुपातो यदि दिनार्धपरिधिना पूर्वागता मन्दफलविकलास्तदाऽऽनीतेन परिध्यन्तरेण किं जाताः परिध्यन्तरसंब-

न्धिन्यः फलविकला रवेः

$$= \frac{\text{६०} \times \text{२२५} \times \text{दिप} \times \text{ज्यार्के} \times \text{ज्यान}}{\text{३} \times \text{२१४} \times \text{भांश} \times \text{त्रि} \times \text{दिप}} = \frac{\text{२०} \times \text{२२५} \times \text{ज्यार्के} \times \text{ज्यान} \times \text{त्रि}}{\text{२१४} \times \text{३६०} \times \text{त्रि}^{\text{२}}}$$

$$= \frac{\text{२२५} \times \text{३२७०} \times \text{ज्यार्के} \times \text{ज्यान}}{\text{१८} \times \text{२१४} \times \text{त्रि}^{\text{२}}} = \frac{\text{२५} \times \text{१६३५}}{\text{२१४}} \times \frac{\text{ज्यार्के} \cdot \text{ज्यान}}{\text{त्रि}^{\text{२}}}$$

$$= \frac{\text{४०८७५}}{\text{२१४}} \times \frac{\text{ज्यार्के} \cdot \text{ज्यान}}{\text{त्रि}^{\text{२}}} = \frac{\text{१९१ ज्यार्के} \cdot \text{ज्यान}}{\text{त्रि}^{\text{२}}}$$

। एवं चन्द्रपरिध्यन्तरेण चन्द्रगुणक उत्पद्यते । धनर्णवासना भास्करविधिना स्फुटा ॥ २७–२८ ॥

इदानीं भुजान्तरं स्फुटभुक्तिं चाह ।

अर्कफलभुक्तिघाताद्भगणकलाप्तं भुजान्तरं रविवत् ।
स्फुटभुक्तिरतीतैष्यग्रहान्तरं वर्त्तमानेऽह्नि ॥ २९ ॥

भगणकला अहोरात्रासवः । अतीतैष्यग्रहान्तरं दिनान्तरस्पष्टग्रहान्तरं वर्त्तमाने दिवसे स्फुटभुक्तिर्भवति । अर्थादद्यतनश्वस्तनस्फुटग्रहयोरन्तरमेव तत्समयान्तराले स्फुटगतिर्भवतीति । शेषं स्पष्टार्थम् ।

अत्रोपपत्तिः । आचार्येण स्वल्पान्तरादर्कफलकलासमा एव भास्वत्फलोत्थासवः स्वीकृतास्ततोऽनुपातेन वासना सुगमा । 'मध्यमार्कोदयात् प्राक् स्फुटार्कोदयः स्यादृणे तत्फले' इत्यादिभास्करविधिना धनर्णवासना 'दिनान्तरस्पष्टखगान्तरं स्याद् गतिः स्फुटा तत्समयान्तराले' इत्यादिभास्करोक्तेरेव स्फुटगतिवासना च सुगमेति ॥ २९ ॥

इदानीं नतकर्मवशेन रविचन्द्रयोर्गतिफलमाह ।

क्षयधनहानिधनानि प्राक् पश्चादन्यथा रवेरिन्दोः ।
प्राग्वत् पश्चात् स्वगतौ धनक्षयक्षयधनानि प्राक् ॥ ३० ॥

'दिनदलपरिधिस्फुटतिथिनते'त्यादिनाऽद्यतनश्वस्तनफलविकलानां यदन्तरं तानि विकलात्मकान्यन्तराणि प्राक्कपाले रवेः केन्द्रपदवशेन क्षयधनहानिधनानि भवन्ति स्वगतौ पूर्वसाधितरविमन्दस्फुटगतौ । पश्चात् कपाले चान्यथाऽर्थात् धनक्षयधनक्षयात्मकानि भवन्ति । इन्दोः पश्चात् कपाले प्राग्वत् । अर्थात् क्षयधनहानिधनानि भवन्ति ।

प्राक्कपाले च तान्येव धनक्षयक्षयधनानि भवन्ति चन्द्रमन्दस्पष्टगता-वित्यर्थः ।

अत्रोपपत्तिः । प्रथमपदे केन्द्रज्योपचीयते द्वितीये चापचीयते । एवं तृतीये पदे केन्द्रज्योपचीयते चतुर्थे चापचीयते । रवेः प्राक्कपाले नतकर्म ऋणं पश्चिमे च धनं भवति । अतः प्रथमपदे ऋणफलस्योपचयाच्चतकर्मान्तरमृणं द्वितीये ऋणफलस्यापचयाच्चतकर्मान्तरं धनं तृतीये पुनरपि ऋणफलस्योपचयाच्चतकर्म ऋणं चतुर्थे च ऋणफलस्यापचयाद्धनम् । पश्चिमकपाले नतकर्मणो धनत्वादन्यथा विपरीतं स्फुटमेव । चन्द्रस्य पश्चिमकपाले ऋणे धने च मन्दफले सर्वदा ऋणमेव नतकर्म । अतः क्षयधनहानिधनानि केन्द्रपदवशात् फलान्युत्पद्यन्ते । प्राक्कपाले प्रथमपदे ऋणमन्दफले नतकर्मणो धनत्वात् केन्द्रज्याया उपचयत्वाच्च नतकर्मान्तरं धनं भवति । द्वितीये पदे केन्द्रज्याया अपचयत्वात् नतकर्मान्तरमृणं तृतीये पदे मन्दफलं धनं नतकर्म ऋणं भवति केन्द्रज्यायाश्चोपचयोऽतो नतकर्मान्तरमृणम् । चतुर्थे केन्द्रज्याया अपचयत्वाच्चतकर्मणश्च क्षयत्वाच्चतकर्मान्तरं धनं भवतीति सर्वं निरवद्यम् । दिनान्तरस्पष्टखगान्तरं स्फुटा गतिरिति नियमात् द्वितीयदिनेऽपि गतदिननतकालसम एव नतकालस्तेन केन्द्रज्याया एवोपचयापचयवशाच्चतकर्मान्तररूपद्वितीयगतिफलस्य धनर्णत्वं समुचितमेवेति स्फुटं सिद्धान्तविदाम् ॥ ३० ॥

इदानीमात्मप्रशंसामाह ।

ब्रह्मोक्तमध्यरविशशितदुच्चतत्परिधिभिः स्फुटीकरणम् ।
कृत्वैवं स्पष्टतिथिर्दूरभ्रष्टान्यतन्त्रोक्तैः ॥ ३१ ॥

एवं ब्रह्मोक्तमध्यरविशशितदुच्चतत्परिधिभिः स्फुटीकरणं कृत्वा स्पष्टतिथिः साध्या । यतोऽन्येषामार्यभटादीनां तन्त्रेषु य उक्ता मध्यरविशशिपरिध्यादयस्तैः स्पष्टतिथिर्दूरभ्रष्टा भवति—इति स्फुटोऽर्थः ॥ ३१ ॥

इदानीं व्यवहारोपयोगि रविचन्द्रयोः स्फुटीकरणमाह ।

स्वदिनार्धपरिधिभुजफलचापं मध्यार्कचन्द्रयोः कृत्वा ।

पूर्ववदन्यत् स्पष्टं संव्यवहारार्थमेवं वा ॥ ३२ ॥

स्वदिनार्धपरिधिना यद्भुजफलचापं मन्दफलं तदेव मध्यार्कचन्द्रयोः ज्ञात्वा संस्कृत्य अन्यद्देशान्तरादि पूर्ववत् ज्ञात्वा संव्यवहारार्थमेवं वा स्पष्टं स्पष्टीकरणं कार्यम् । ब्रह्मगुप्तेनेदं स्पष्टीकरणं नतकर्मसंस्कारमन्तरा व्यवहारार्थं स्थूलं प्रतिपादितमिति स्फुटमेव परन्तु भास्करेणेदं स्थूलमेव रविचन्द्रयोः स्पष्टीकरणं सूक्ष्मत्वेन सर्वकर्मार्हमङ्गीकृतम् । केवलं रविचन्द्रग्रहणयोरेव नतकर्मसंस्कार आनीतः । 'वाग्बलादेव मुहुः स्फुटातो ग्रहणे रवीन्द्वोस्तिथिस्त्विदं जिष्णुसुतो जगाद' इति भास्करेण ब्रह्मगुप्तमतमन्यथा प्रतिपादितमिति सुधीभिर्भृशं विचिन्त्यम् ॥ ३२ ॥

इदानीं भौमादिस्पष्टीकरणे कारणमाह ।

आर्यभटस्याज्ञानान्मध्यममन्दोच्चशीघ्रपरिधीनाम् ।
न स्पष्टा भौमाद्याः स्पष्टा ब्रह्मोक्तमध्योच्चैः ॥ ३३ ॥

स्पष्टार्थम् ॥ ३३ ॥

इदानीं भौमादीनां मन्दशीघ्रपरिधिभागान् स्फुटीकरणं चाह ।

मन्दोच्चनीचवृत्त-
स्य परिधिभागाः सितस्य विषमान्ते ।
नव ९ युग्मान्ते रुद्राः ११
शीघ्रौजान्तेऽग्निरसयमलाः २६३ ॥ ३४ ॥
युग्मान्तेऽष्टशरयमा २५८मन्दफलान्मध्यमः स्फुटो मध्यः ।
शीघ्रफलात् स्पष्टोऽसकृदेवं स्वफलैर्ज्ञगुरुसौराः ॥ ३५ ॥
बुधमन्दपरिधिभागा
वसुरामाः ३८ सुरगुरोस्त्रयस्त्रिंशत् ३३ ।
रविजस्य शून्यरामा ३०
ज्ञशीघ्रपरिधिर्द्विगुणचन्द्राः १३२ ॥ ३६ ॥
देवगुरोरष्टरसा ६८ भास्करपुत्रस्य शरगुणाः ३५ स्पष्टाः ।
कुजशीघ्रकेन्द्रपदगतयेयाल्पज्या त्रिभागोनैः ॥ ३७ ॥

प्राक्कपाले च तान्येव धनक्षयक्षयधनानि भवन्ति चन्द्रमन्दस्पष्टगता-वित्यर्थः ।

अत्रोपपत्तिः । प्रथमपदे केन्द्रज्योपचीयते द्वितीये चापचीयते । एवं तृतीये पदे केन्द्रज्योपचीयते चतुर्थे चापचीयते । रवेः प्राक्कपाले नतकर्म ऋणं पश्चिमे च धनं भवति । अतः प्रथमपदे ऋणफलस्योपचयाच्चतकर्मान्तरमृणं द्वितीये ऋणफलस्यापचयाच्चतकर्मान्तरं धनं तृतीये पुनरपि ऋणफलस्योपचयाच्चतकर्म ऋणं चतुर्थे च ऋणफलस्यापचयाद्धनम् । पश्चिमकपाले नतकर्मणो धनत्वादन्यथा विपरीतं स्फुटमेव । चन्द्रस्य पश्चिमकपाले ऋणे धने च मन्दफले सर्वदा ऋणमेव नतकर्म । अतः क्षयधनहानिधनानि केन्द्रपदवशात् फलान्युत्पद्यन्ते । प्राक्कपाले प्रथमपदे ऋणमन्दफले नतकर्मणो धनत्वात् केन्द्रज्याया उपचयत्वाच्च नतकर्मान्तरं धनं भवति । द्वितीये पदे केन्द्रज्याया अपचयत्वात् नतकर्मान्तरमृणं तृतीये पदे मन्दफलं धनं नतकर्म ऋणं भवति केन्द्रज्यायाश्चोपचयोऽतो नतकर्मान्तरमृणम् । चतुर्थे केन्द्रज्याया अपचयत्वाच्चतकर्मणश्च क्षयत्वाच्चतकर्मान्तरं धनं भवतीति सर्वं निरवद्यम् । दिनान्तरस्पष्टखगान्तरं स्फुटा गतिरिति नियमात् द्वितीयदिनेऽपि गतदिननतकालसम एव नतकालस्तेन केन्द्रज्याया एवोपचयापचयवशाच्चतकर्मान्तररूपद्वितीयगतिफलस्य धनर्णत्वं समुचितमेवेति स्फुटं सिद्धान्तविदाम् ॥ ३० ॥

इदानीमात्मप्रशंसामाह ।

ब्रह्मोक्तमध्यरविशशितदुच्चतत्परिधिभिः स्फुटीकरणम् ।
कृत्वैवं स्पष्टतिथिर्दूरभ्रष्टान्यतन्त्रोक्तैः ॥ ३१ ॥

एवं ब्रह्मोक्तमध्यरविशशितदुच्चतत्परिधिभिः स्फुटीकरणं कृत्वा स्पष्टतिथिः साध्या । यतोऽन्येषामार्यभटादीनां तन्त्रेषु ये उक्ता मध्यरविशशिपरिध्यादयस्तैः स्पष्टतिथिर्दूरभ्रष्टा भवति—इति स्फुटोऽर्थः ॥ ३१ ॥

इदानीं व्यवहारोपयोगि रविचन्द्रयोः स्फुटीकरणमाह ।

स्वदिनार्धपरिधिभुजफलचापं मध्यार्कचन्द्रयोः कृत्वा ।

पूर्ववदन्यत् स्पष्टं संव्यवहारार्थमेवं वा ॥ ३२ ॥

स्वदिनार्धपरिधिना यद्भुजफलचापं मन्दफलं तदेव मध्यार्कचन्द्रयोः कृत्वा संस्कृत्य अन्यद्देशान्तरादि पूर्ववत् कृत्वा संव्यवहारार्थमेवं वा स्पष्टं स्पष्टीकरणं कार्यम् । ब्रह्मगुप्तेनेदं स्पष्टीकरणं नतकर्मसंस्कारमन्तरा व्यवहारार्थं स्थूलं प्रतिपादितमिति स्फुटमेव परन्तु भास्करेणेदं स्थूलमेव रविचन्द्रयोः स्पष्टीकरणं सूक्ष्मत्वेन सर्वकर्मार्हमङ्गीकृतम् । केवलं रविचन्द्रग्रहणयोरेव नतकर्मसंस्कार आनीतः । वाग्बलादेव 'मुहुः स्फुटातो ग्रहणे रवीन्द्वोस्तिथिस्त्विदं जिष्णुसुतो जगाद' इति भास्करेण ब्रह्मगुप्तमतमन्यथा प्रतिपादितमिति सुधीभिर्भृशं विचिन्त्यम् ॥ ३२ ॥

इदानीं भौमादिस्पष्टीकरणे कारणमाह ।

आर्यभटस्याज्ञानान्मध्यममन्दोच्चशीघ्रपरिधीनाम् ।
न स्पष्टा भौमाद्याः स्पष्टा ब्रह्मोक्तमध्योच्चैः ॥ ३३ ॥

स्पष्टार्थम् ॥ ३३ ॥

इदानीं भौमादीनां मन्दशीघ्रपरिधिभागान् स्फुटीकरणं चाह ।

मन्दोच्चनीचवृत्त-
स्य परिधिभागाः सितस्य विषमान्ते ।
नव ९ युग्मान्ते रुद्राः ११
शीघ्रौजान्तेऽग्निरसयमलाः २६३ ॥ ३४ ॥
युग्मान्तेऽष्टशरयमा २५८मन्दफलान्मध्यमः स्फुटो मध्यः ।
शीघ्रफलात् स्पष्टोऽसकृदेवं स्वफलैर्ज्ञगुरुसौराः ॥ ३५ ॥
बुधमन्दपरिधिभागा
वसुरामाः ३८ सुरगुरोस्त्रयस्त्रिंशत् ३३ ।
रविजस्य शून्यरामा ३०
ज्ञशीघ्रपरिधिर्द्विगुणचन्द्राः १३२ ॥ ३६ ॥
देवगुरोरष्टरसा ६८ भास्करपुत्रस्य शरगुणाः ३५ स्पष्टाः ।
कुजशीघ्रकेन्द्रपदगतयेयाल्पज्या त्रिभागोनैः ॥ ३७ ॥

सप्तभिरंशैर्गुणिता ६ । ४० दला*द्यराशिज्ययाप्तांशैः ।
अधिकोनः कुजमन्दो मृगकर्क्यादौ स्फुटो भवति ॥ ३८ ॥
तत्†स्फुटपरिधिः खनगाः ७०
शीघ्रस्फुटपरिधिराप्तभागोनाः ।
वेदजिनाख्यंशोनाः २४३ । ४०
स्पष्टीकरणं कुजस्यैवम् ॥ ३९ ॥
मन्दफलं मध्येऽर्धं तच्छीघ्रफलस्य मध्यमे सकले ।
मध्येऽसकृत् क्षितिसुतः स्पष्टो भुक्तिः स्फुटा ग्रहवत् ॥ ४० ॥

शुक्रस्य मन्दनीचोच्चवृत्तस्य परिधिभागा विषमान्ते ओजान्ते नव ९। युग्मान्ते रुद्रा एकादश ११। शीघ्रपरिधिभागा ओजान्ते २६३ युग्मान्ते २५८ । मन्दफलान्मध्यमः संस्कृतः स्फुटो मध्यो मन्दस्पष्टो भवति। शीघ्रफलात् मन्दस्पष्टः संस्कृतः स्पष्टोऽसकृत् । अर्थात् स्पष्ट-ग्रहात् पुनर्मन्दफलमानीय तत्संस्कृतो मध्यो मन्दस्पष्टः साध्यस्तस्मा-न्मन्दस्पष्टात्पुनः शीघ्रफलं विधाय तत्संस्कृतो मन्दस्पष्टः स्पष्टग्रहो भवति। पुनरस्मात् स्पष्टग्रहात् पूर्ववन्मन्दस्पष्टस्पष्टौ साध्यौ यावदवि-शेष इति। एवं बुधगुरुशनयः स्फुटा भवन्ति शुक्रश्चैवमित्यर्थत एव सिध्यति। बुधमन्दपरिधिभागाः ३८। गुरोः ३३ । शनेः ३० । एते ओजान्ते युग्मान्ते च । अर्थाद्बुधगुरुशनिमन्दपरिधिभागेषु संस्कारा-भावः । बुधशीघ्रपरिधिभागाः १३२ । सुरगुरोः ६८। भास्करपुत्रस्य शनेः ३५। एतेषु बुधगुरुशनिशीघ्रपरिधिभागेष्वपि संस्काराभावः सर्वत्रै-करूपत्वात् ॥ कुजशीघ्रकेन्द्रं यस्मिन् पदे स्यात्तत्र गतयेययोर्गतगम्य-योर्येऽल्पा भागास्तेषां ज्या कार्या सा त्रिभागोनैः सप्तभिरंशैर्गुणिता दलाद्यराशिज्यया पञ्चवेदभागज्यया भक्ता । आप्तांशैर्मृगकर्क्यादिशीघ्र-केन्द्रे कुजमन्दः कुजमन्दोच्चं क्रमेणाधिको हीनश्च कार्यः । एवं स्पष्टी-

* दिवार्धराशिज्ययाप्तांशैः—इति पाठान्तरम् ।
दिवार्धराशिज्यया = सार्धराशिज्यया इति चतुर्वेदाचार्यः ।
† स्फुटमन्दनीचोच्चवृत्तपरिधिः ।

करणोपयोगि कुजमन्दोच्चं स्फुटं भवति । तत्स्फुटपरिधिस्तत्स्फुटमन्दपरिधिः । अर्थात् भौमस्य मन्दपरिधिभागाः ७० । त्र्यंशोना वेदजिना २४३ं । ४०′ भागा मन्दोच्चसंस्कारार्थं ये पूर्वमाप्ता भागास्तैः सर्वदा ऊनास्तदा भौमस्य स्फुटः शीघ्रपरिधिः स्यात् । तत एवं वक्ष्यमाणं कुजस्य स्पष्टीकरणं भवति । मध्ये गणितागते मध्यमभौमे प्रथमं मन्दफलमर्धं धनं वा ऋणं यथागतं देयम् । ततो मध्यमेऽर्धमन्दफलसंस्कृतमध्यमभौमेऽर्धमन्दफलसंस्कृतान्मध्यभौमाद्यच्छीघ्रफलं तस्यार्धं यथागतं धनं वा ऋणं देयम् । पुनरर्धफलद्वयसंस्कृतान्मध्याद्यन्मन्दफलं तत्संस्कृतान्मध्याद्यच्छीघ्रफलं च ते सकले सम्पूर्णे मध्ये गणितागते भौमे देये ततो ज्ञगुरुशनिवदसकृत् कार्यं यावदविशेषः । एवं क्षितिसुतो भौमः स्पष्टो भवति । स्फुटा भुक्तिश्च ग्रहवत् साध्या । अर्थात् दिनान्तरस्पष्टखगान्तरमेव तत्समयान्तराले ग्रहस्फुटभुक्तिर्भवति । भास्कराचार्योक्तं स्पष्टीकरणं सर्वमेतदनुरूपमेव । किन्तु शनेर्मन्दपरिधिभागा अत्र ३० भास्करेण ५० गृहीताः । एवमत्र शनेः शीघ्रपरिधिभागा ३५ भास्करेण च ४० गृहीताः । केन हेतुना भास्करेण भास्करपुत्रस्य परिधिभागेषु वैषम्यं कृतमिति सुधीभिर्विभावनीयम् । चतुर्वेदाचार्यटीकायां यादृशः पाठस्तादृश एवास्माभिर्मूले निवेशितः ।

अत्रोपपत्तिः । पृथुस्वामिना चतुर्वेदाचार्येणोपलब्धिरेवाभिहिता । यदीदृशी वस्तोपलब्धिस्तर्हि यदि दृग्गणितैक्यकर्त्तर्हि मान्यैवेति ॥ ३४–४० ॥

इदानीं मन्दस्पष्टां स्फुटां गतिं चाह ।

ग्रहमन्दकेन्द्रभुक्ति-
ज्यान्तरगुणिताऽऽद्यजीवया २१४ भक्ता ।
लब्धं स्फुटपरिधिघ्नं
भगणांशहृतं कलाभिस्तु ॥ ४१ ॥

मृगकर्क्यादावूनाधिका स्वमध्यमगतिः स्फुटाऽकेन्द्रोः ।
शीघ्रगतिं मन्दफलस्फुटभुक्त्यूनां कुजादीनाम् ॥ ४२ ॥

शीघ्रफलं भोग्यज्यासङ्गुणितं त्वाद्यजीवया विभजेत् ।
फलगुणितं व्यासार्धं विभाजयेत् शीघ्रकर्णेन ॥ ४३ ॥
लब्धोना शीघ्रगतिः स्फुटभुक्तिर्भवति लब्धमधिकं चेत् ।
शीघ्रगतेः शीघ्रगतिं लब्धात् संशोध्य वक्रगतिः ॥ ४४ ॥

मन्दकेन्द्रज्यायां क्रियमाणे यद्भोग्यखण्डं तदत्र ज्यान्तरशब्देनोच्यते । तेन ज्यान्तरेण ग्रहमन्दकेन्द्रगतिर्गुणिताऽऽद्य २१४ जीवया भक्ता लब्धं स्फुटमन्दपरिधिगुणितं भगणांशैर्हृतं लब्धाभिः कलाभिर्मृगकर्क्यादिकेन्द्रे स्वमध्यमगतिरूनाधिका तदा रवीन्द्वोः स्फुटा भुक्तिरन्येषां कुजादीनां मन्दस्पष्टा गतिर्भवति ।

शीघ्रगतिः शीघ्रोच्चगतिः स्वमन्दस्पष्टगत्यूना तदा कुजादीनां शीघ्रकेन्द्रगतिर्भवति । तां शीघ्रफलस्य ज्यायां क्रियमाणायां या भोग्यजीवा ज्यान्तरं तया सङ्गुणितां कृत्वाऽऽद्यजीवया भजेत् । यल्लब्धं तेन व्यासार्धं सङ्गुण्य शीघ्रकर्णेन विभाजयेत् । शीघ्रोच्चगतिर्लब्धोना कुजादिकानां स्फुटभुक्तिर्भवति । चेल्लब्धं फलं शीघ्रोच्चगतेरधिकं तदा लब्धात् शीघ्रोच्चगतिं विशोध्य शेषं कुजादीनां वक्रगतिर्भवतीति ।

अत्रोपपत्तिः । त्रैराशिकेन । यदि शरद्विदस्र २२५ मितेन चापेन भोग्यखण्डं लभ्यते तदाऽद्यतनश्वस्तनकेन्द्रान्तरेण केन्द्रगतिमितेन किम् । लब्धमद्यतनश्वस्तनकेन्द्रज्ययोरन्तरम् । मन्दगतिफलसाधने तत्स्फुटमन्दपरिधिगुणं भांशैर्हृतं भुजफलान्तरं भवति । तत् पञ्चद्विदस्रगुणमाद्यजीवया भक्तं स्वल्पान्तराज्जातमद्यतनश्वस्तनमन्दफलान्तरं गतिफलम् $= \frac{\text{केग} \times \text{भोखं}}{२२५} \cdot \frac{\text{स्फुप}}{३६०} \cdot \frac{२२५}{\text{आज्या}} = \frac{\text{केग} \cdot \text{भोखं}}{\text{आज्या}} \cdot \frac{\text{स्फुप}}{३६०}$ । एवं शीघ्रकर्मणि शीघ्रफलस्य शीघ्रकेन्द्रगत्यधिकशीघ्रफलस्य च ज्ययोरन्तरम् $= \frac{\text{शीकेग} \times \text{शी} \cdot \text{फ} \cdot \text{भोखं}}{२२५}$ इदं त्रिज्यागुणं शीघ्रकर्णहृतं स्थूलं स्फुटकेन्द्रज्यान्तरं भवति तदाद्यचापगुणमाद्यज्याहृतं जाता स्थूला स्पष्टकेन्द्रगतिः $= \frac{\text{शीकेग} \cdot \text{भोखं}}{२२५} \cdot \frac{\text{त्रि}}{\text{शीक}} \cdot \frac{२२५}{\text{आज्या}} = \frac{\text{शीकेग} \cdot \text{भोखं}}{\text{आज्या}} \cdot \frac{\text{त्रि}}{\text{शीक}}$ इत्यानयनमुपपद्यते ।

शेषोपपत्तिर्भास्करविधिना स्फुटा । इदं सर्वं स्थूलं तात्कालिकभोग्यखण्डेन सूक्ष्ममित्येतदर्थं 'फलांशखाङ्कान्तरशिञ्जिनीघ्नी' त्यादिभास्करविधिस्तथा तदुपपत्तिप्रकारश्च मदीयस्तत्त्वविवेकटिप्पण्यां विलोकनीय इति ॥ ४१–४४ ॥

इदानीमिदं स्पष्टीकरणं कस्मै न देयमित्याह ।

देयमसुताय नेदं शपथैरपि दत्तसुकृतनाशाय ।
यात्राविवाहजातकफलस्फुटत्वं यतः स्पष्टैः ॥ ४५ ॥

यतो दत्तस्य सुकृतं दत्तसुकृतं तस्य नाशाय भवति । तथा स्पष्टैः खेटैरेव यात्राविवाहजातकफलानां स्फुटत्वं भवति । अतः शपथैरपीदं स्पष्टीकरणमसुताय न देयम् । अर्थाद्भक्ताय चिरोषिताय शिष्याय परीक्षिताय देयमित्यर्थः ॥ ४५ ॥

इदानीमार्यभटादीनां दूषणमाह ।

मेषादितः प्रवृत्ता नार्यभटस्य स्फुटा युगस्यादौ ।
श्रीषेणस्य कुजाद्याः *खेटाः सर्वे हि विष्णुचन्द्रस्य ॥ ४६ ॥
दूरभ्रष्टाः स्पष्टाः श्रीषेणार्यभटविष्णुचन्द्रेषु ।
यस्मात्† कुजादयस्ते विदुषां नैवादरस्तस्मात् ॥ ४७ ॥

आर्यभटस्य श्रीषेणस्य विष्णुचन्द्रस्य च सर्वे खेटाः कुजाद्या युगस्यादौ मेषादितो न प्रवृत्ता अतस्ते स्फुटा न सन्तीत्यर्थः । तेषां मते युगादौ कुजाद्याः सर्वे खेटा मेषादौ नासन् ॥ ४६ ॥

यतः श्रीषेणार्यभटविष्णुचन्द्रेषु अर्थात्तेषां तन्त्रेषु ते कुजादयः स्पष्टा दूरभ्रष्टा न दृग्योग्यास्तस्माद्विदुषां मध्ये तेषां तन्त्राणां नादर इति ॥ ४७ ॥

इदानीं भौमादीनां वक्रावक्रत्वमाह ।

अग्न्यष्टिभि १६३ रिषुमनुभिः १४५
शरसूर्यै १२५ रिषुरसेन्दुभि १६५ स्त्रिभवैः ११३ ।

* सूर्याद्या विष्णुचन्द्रस्येति पाठान्तरम् ।

† यस्मात् कुजादयस्तेषु न विदुषामादरस्तस्मात्–इति पाठान्तरम् ।

शीघ्रान्त्यकेन्द्रभागै-
भौमादीनां भवति वक्रम् ॥ ४८ ॥
चक्रांशकै३६०स्तदूनैरनुवक्रं तदधिकोनभागकलाः ।
मन्दफलस्फुटभुक्त्यूनशीघ्रभुक्त्या हृता दिवसाः ॥ ४९ ॥

मन्दफलस्फुटभुक्तिर्मन्दस्पष्टा गतिस्तदूना शीघ्रगतिः शीघ्रोच्चगतिः शीघ्रकेन्द्रगतिर्भवति । तया तदधिकोनभागकला हृता गतैष्या दिवसा भवन्ति । शीघ्रान्त्यकेन्द्रभागैरसकृद्विधिनाऽविशेषकर्मणि स्थिरीभूतैः केन्द्रांशैरिति । शेषं स्पष्टार्थम् । द्राक्केन्द्रभागैस्त्रिनृपैः शरेन्द्रैरित्यादि तथा 'अवक्रवक्रास्तमयोदयोक्तभागाधिकोनाः' इत्यादि च भास्करोक्तमेतदनुरूपमेव । गणिताध्यायस्पष्टाधिकारस्य ४१–४४ श्लोकौ द्रष्टव्यौ ।

अत्रोपपत्त्यर्थं मत्कृता ग्रहलाघववासना विलोक्या ॥ ४८–४९ ॥

इदानीं वक्रातिवक्रानुवक्रपरिभाषामाह ।

शीघ्रात् स्फुटग्रहोनाच्छेषे मध्यस्फुटान्तरार्धं वा ।
अधिके धनमृणमूने स्फुटग्रहान्मध्यमे चापि ॥ ५० ॥
राशिषु चतुर्षु वक्रं षट्स्वतिवक्रमनुवक्रमष्टासु ।
अप्राप्ताऽतीतकला भुक्त्यास्यैवोद्धृता दिवसाः ॥ ५१ ॥

स्फुटग्रहोनात् शीघ्रात् शीघ्रोच्चात् यच्छेषं तस्मिन् स्फुटग्रहान्मध्यमे ग्रहेऽधिके मध्यस्फुटयोरन्तरार्धं धनं स्फुटग्रहान्मध्यमे ऊने तदन्तरार्धं हीनं कार्यम् । एवं संस्कृतेषु चतुर्षु राशिषु वक्रं षट्सु राशिषु अतिवक्रमष्टासु राशिषु अनुवक्रं च ज्ञेयम् । अत्राप्यप्राप्तातीतकलाः । अर्थात् यथा वक्रज्ञाने इष्टदिने 'शीघ्रात् स्फुटग्रहोना' दित्यादिविधिना शेषं मध्यस्फुटान्तरार्धसंस्कृतं यदि राशिचतुष्कादल्पं तदा संस्कृतस्य राशिचतुष्कस्य चान्तरे याः कलास्ता अप्राप्तकलाः । एवं चेत् संस्कृतं राशिचतुष्कादधिकं तदा तयोरन्तरे अतीतकला भवन्ति । ता एष्यगताः कलाः । अस्य संस्कृतस्य भुक्त्यैव अर्थात् गतैष्यदिनयोः 'शीघ्रात् स्फुटग्रहोना' दित्यादिविधिनाऽऽनीतयोः संस्कृतयोरन्तरतुल्यया भुक्त्या हृता दिवसा भवन्ति ।

अत्रोपपत्तिः। फलार्थे वक्रातिवक्रानुवक्राणां संज्ञा संहिताकारव-द्दुपनिबद्धा। एष्यातीतदिवसानयनं त्रैराशिकेन सुगमम् ॥ ५०-५१ ॥

इदानीं भौमादीनामुदयास्तसंभवमाह।

अष्टयमैः २८ कृतचन्द्रैः १४
मुनीन्दुभि १७र्भौमजीवरविजानाम्।
उदयः प्रागस्तमय-
स्तदूनचक्रांशकैः ३६० पश्चात् ॥ ५२ ॥
खशरै ५०र्जिनै २४र्ज्ञसितयो-
रिषुतिथिभि १५५ र्मुनिनगेन्दुभिः १७७ पश्चात्।
उदयास्तमयौ व्यस्तौ
मण्डलभागै ३६०स्तदूनैः प्राक् ॥ ५३ ॥

मण्डलभागैश्चक्रांशैस्तदूनैः प्राक् व्यस्तावुदयास्तौ भवतः। अर्थात् बुधशुक्रयोः पश्चादुदयकेन्द्रांशैरूनाश्चक्रांशास्तयोः प्रागस्तकेन्द्रांशा भवन्ति। एवं पश्चादस्तकेन्द्रांशैर्हीनाश्चक्रभागाः प्रागुदयकेन्द्रांशा भवन्ति। शेषं स्पष्टार्थम्। 'प्राच्यामुदेति क्षितिजोऽष्टदस्रै'रित्यादि भास्करोक्तमेतदनुरूपमेव। (गणिताध्यायस्पष्टाधिकारस्य ४२ श्लोको द्रष्टव्यः।)

अत्रोपपत्त्यर्थं मदीया ग्रहलाघववासना निरीक्षणीयेति ॥ ५२-५३ ॥

इदानीं स्वदेशे कथं स्पष्टा भवन्तीत्येतदर्थमाह।

स्पष्टा द्युरात्रिदलयो रव्युदयास्तमययो रविचरार्धात्।
एष्ये ह्यधिकेऽतीतादवक्रितो वक्रितो हीने ॥ ५४ ॥

पूर्वं ये भौमाद्याः साधितास्ते द्युरात्रिदलयोर्दिनार्धे वा निशीथे यथागताः स्पष्टाः स्युः। अर्थात् तत्र चरसंस्काराभावः। यदि रव्युदये वा रव्यस्तमये साधितास्तदा रविचरार्धात् रविचरफलसंस्कारात् स्वदेशे उदये वाऽस्तमये ते स्पष्टा भवन्ति। अतीताद्ग्रहाद्यदि एष्य आगामिदिनोद्भवः स्पष्टो ग्रहोऽधिकस्तदाऽवक्रितो मार्गी यदि हीनस्तदा वक्रितो वक्री ज्ञेय इति सर्वं स्फुटम्।

अत्रोपपत्तिः स्फुटा ॥ ५४ ॥

इदानीं पञ्चज्यानयनमाह ।

जिनभागज्यागुणिता सूर्यज्या व्यासदलहृता लब्धम् ।
इष्टापक्रमजीवा विषुवदुदग्दक्षिणा सवितुः ॥ ५५ ॥
इष्टापक्रमवर्गं त्रिज्यावर्गाद्विशोध्य शेषपदम् ।
विषुवदुदग्दक्षिणतः स्वाहोरात्रार्धविष्कम्भः ॥ ५६ ॥
क्रान्तिज्यां विषुवच्छायया गुणा द्वादशोद्धृता क्षितिजा ।
स्वाहोरात्रेऽनष्टा व्यासार्धेनाहता भक्ता ॥ ५७ ॥
स्वाहोरात्रार्धेन क्षयवृद्धिज्याधनुश्चरप्राणाः ।
ते*षड्हृता विनाड्यो विनाडिका नाडिकाः षष्ट्या ॥ ५८ ॥

सूर्यज्या रविभुजज्या । इष्टापक्रमवर्गमिष्टक्रान्तिज्यावर्गम् । स्वाहोरात्रार्धविष्कम्भो द्युज्या । स्वाहोरात्रे द्युज्यावृत्ते क्षितिजा क्षितिज्याऽर्थात् कुज्या साऽनष्टा पृथक् स्थाप्या । स्वाहोरात्रार्धेन द्युज्यया । क्षयवृद्धिज्या चरज्या । शेषं स्पष्टार्थम् । 'युक्तायनांशादपमः प्रसाध्यः' इत्यादि भास्करोक्तमेतदनुरूपमेव । (गणिताध्याय-स्पष्टाधिकारस्य ४७ श्लोको द्रष्टव्यः) ।

अत्रोपपत्तिश्च भास्करोक्ता सिद्धान्तविदां स्फुटा ।

रविभुजज्या, क्रान्तिज्या, द्युज्या, क्षितिज्या, चरज्या—इति पञ्चज्यानयनमत्र । आचार्यमतेऽयनभागाभावोऽतो यथागतरविरेव सायनो रविः । भास्करेण सायनरवेर्भुजज्या साधिता । इत्येव तन्मते विशेष इति ॥ ५५–५८ ॥

इदानीं चरकर्माह ।

चरदलघटिकागुणिता भुक्तिः षष्ट्या हृता कलाद्याप्तम् ।
ऋणमुदयेऽस्तमये धनमुत्तरगोलेऽन्यथा याम्ये ॥ ५९ ॥

स्पष्टार्थम् । 'चरघ्नभुक्तिर्द्युनिशासुभक्ता' इत्यादि भास्करोक्तमेत-

* षट्कोद्धृता—इति पाठान्तरम् ।

दनुरूपमेव । (गणिताध्याय-स्पष्टाधिकारस्य ५३ श्लोको द्रष्टव्यः ।)

अत्रोपपत्तिश्च त्रैराशिकेन स्फुटा ॥ ५९ ॥

इदानीं दिनरात्रिमानमाह ।

दिनमानरात्रिघटिकाश्चरार्धघटिकाभिरुत्तरे गोले ।
पञ्चदश युक्तहीना याम्ये हीनाधिका द्विगुणाः ॥ ६० ॥

स्पष्टार्थम् । 'चरघटीसहिता रहिताः क्रमा' दित्यादि भास्करोक्तमेतदनुरूपमेव । (गणिताध्याय-स्पष्टाधिकारस्य ५२ श्लोको द्रष्टव्यः ।)

अत्रोपपत्तिश्च गोलयुक्त्या स्फुटा ॥ ६० ॥

इदानीं ग्रहाणां नक्षत्रानयनमाह ।

भान्यश्विन्यादीनि ग्रहलिप्ताः खखवसूद्धृता८००लब्धम् ।
भुक्तिहृते गतगम्ये दिवसाः षष्ट्या गुणे घटिकाः ॥ ६१ ॥

गतगम्ये गतगम्यकले भुक्तिहृते गतगम्या दिवसा भवन्ति । तच्छेषे षष्ट्या गुणे पुनर्भुक्त्या हृते घटिका भवन्ति । 'ग्रहकलाः सरवीन्दुकला हृताः खखगजैः' इत्यादि भास्करोक्तेन शेषा व्याख्योपपत्तिश्च स्फुटा ॥ ६१ ॥ (गणिताध्याय-स्पष्टाधिकारस्य ६७ श्लोको द्रष्टव्यः ।)

इदानीं तिथ्यानयनमाह ।

अर्कोनचन्द्रलिप्ताः खयम*स्वरभाजिताः फलं तिथयः ।
गतगम्ये षष्टिगुणे भुक्त्यन्तरभाजिते घटिकाः ॥ ६२ ॥

स्पष्टार्थम् । 'रविरसैर्विरवीन्दुलवा हृताः' इत्यादि भास्करोक्तं चिन्त्यम् ॥ ६२ ॥ (गणिताध्याय-स्पष्टाधिकारस्य ६६ श्लोको द्रष्टव्यः ।)

इदानीं योगानयनमाह ।

रविचन्द्रयोगलिप्ताः खखवसुभिर्भाजिताः फलं योगाः ।
गतगम्ये षष्टिगुणे भुक्तिसमासोद्धृते नाड्यः ॥ ६३ ॥

स्पष्टार्थम् । संप्रत्युपलब्धचतुर्वेदाचार्यटीकायामियमार्या नोपलभ्यते ॥ ६३ ॥

* खयमनगैर्भाजिता इति पाठान्तरम् ।

इदानीं रविचन्द्रान्तरमाह ।

राश्यंशकलाविकलाः स्फुटमासान्तेऽंशलिप्तिकाविकलाः ।
पक्षान्ते तिथ्यन्ते समा रवीन्द्वोः कलाविकलाः ॥ ६४ ॥

स्पष्टार्थम् । 'यातैष्यनाडीगुणिता स्वभुक्ति' रित्यादि भास्करोक्तं तथा 'मासान्ते रविशशिनौ समौ भवेता' मित्यादि लल्लोक्तं च विचिन्त्यम् ।

अत्रोपपत्तिः । रविचन्द्रयोरन्तरं यदा द्वादशभागसमं तदैका तिथिरिति ज्योतिर्विदां परिभाषा । स्फुटमासान्ते त्रिंशत् तिथयः । अतो रविचन्द्रान्तरभागाः (= ३० × १२ = ३६०°) वा शून्यसमाः । अतो राश्याद्यवयवै रविचन्द्रौ समौ । पक्षान्ते पञ्चदशतिथयः । अतो रविचन्द्रान्तरम् = १५ × १२° = १८०° = ६ राशयः । अतो रविचन्द्रावंशाद्यवयवैः समौ । अन्यथा कथं तयोरन्तरे केवलं राशय एव भवन्ति । एवं कस्मिन्नपि तिथ्यन्ते रविचन्द्रयोरन्तरभागा द्वादशापवर्त्या एव । अतस्तदन्तरे कलाविकलासमत्वादेव केवलं भागा उत्पद्यन्त इति गणितविदां स्फुटमेव ॥ ६४ ॥

इदानीं स्थिरकरणान्याह ।

कृष्णचतुर्दश्यन्ते शकुनिः पर्वणि चतुष्पदं प्रथमे ।
तिथ्य*र्धेऽन्ते नागं किंस्तुघ्नं प्रतिपदाद्यर्धे ॥ ६५ ॥

स्पष्टार्थम् । 'शकुनितोऽसितभूतदलादनु' इति भास्करोक्तमेतदनुरूपमेव ॥ ६५ ॥ (गणिताध्याय-स्पष्टाधिकारस्य ६६ श्लोको द्रष्टव्यः ।)

इदानीं चरकरणान्याह ।

व्यर्केन्दुकला भक्ताः खरसगुणैर्लब्धमूनमेकेन ।
चरकरणानि ववादीन्यगहृतशेषे तिथिवदन्यत् ॥ ६६ ॥

अत्राचार्येण व्यर्केन्दुकला गृहीता भास्करेण 'रविरसैर्विरवीन्दुलवा हृताः' इत्याद्यात्मप्रकारे रविचन्द्रान्तरांशा गृहीताः । अतस्तत्र

* तिथ्यन्तेऽर्धे इति पाठान्तरम् ।

षड् हरोऽत्र षष्टिगुणाः खरसगुणाः ३६० । शेषं सर्वं भास्करोक्तं चिन्त्यम् ॥ ६६ ॥ (गणिताध्याय-स्पष्टाधिकारस्य ६६ श्लोको द्रष्टव्यः ।)

इदानीमवशिष्टं स्फुटगत्युत्तराध्याये वक्ष्यामीत्येतदर्थमाह ।

इह नोक्तानि बहुत्वात् स्पष्टगतेरुत्तरेऽभिधास्यामि ।
सङ्क्रान्तिभतिथिकरणव्यतिपाताद्यन्तगणितानि* ॥६७॥

स्पष्टार्थम् ॥ ६७ ॥

इदानीमध्यायोपसंहारमाह ।

ज्यापरिधिस्पष्टीकरणदिनगतिचरार्धभतिथिकरणेषु ।
स्फुटगतिरध्यायः सप्तषष्टिरार्या द्वितीयोऽयम् ॥ ६८ ॥

इति श्रीब्राह्मस्फुटसिद्धान्ते स्पष्टाधिकारो द्वितीयः ॥ २ ॥

स्पष्टार्थमार्या ॥ ६८ ॥

मधुसूदनसूनुनोदितो यस्तिलकः श्रीपृथुनेह जिष्णुजोक्ते ।
हृदि तं विनिधाय नूतनोऽयं रचितः स्पष्टगतौ सुधाकरेण ॥

इति श्रीकृपालुदत्तसूनुसुधाकरद्विवेदिविरचिते ब्राह्मस्फुटसिद्धान्तनूतनतिलके स्पष्टाधिकारो द्वितीयः ॥ २ ॥

* करणानि इति पाठान्तरम् ।

अथ त्रिप्रश्नाधिकारः ।

तत्रादौ दिग्ज्ञानमाह ।

पूर्वापरयोर्विन्दू तुल्यच्छायाग्रयोर्दिगपराऽऽद्यः ।
पूर्वान्यः क्रान्तिवशात् तन्मध्याच्छङ्कुतलमितरे ॥ १ ॥

पूर्वापरकपालयोस्तुल्यच्छायाग्रयोर्यौ विन्दू तत्राऽऽद्योऽपरा पश्चिमा दिक् । अन्यः पश्चिमकपालस्थे रवौ य उत्पन्नः स पूर्वा दिक् । अत्र पूर्वापरकपालयोस्तुल्यच्छायाग्रयोर्यं क्रान्ती तयोर्वशाद्भेद उत्पद्यत इत्यध्याहार्यम् । तयोश्छायाग्रयोर्मध्यं तन्मध्यं तस्माच्छङ्कुतलं शङ्कुमूलपर्यन्तं या रेखा तत्रेतरे याम्यासौम्ये भवत इत्यर्थः । अत्रैतदुक्तं भवति । जलवत् समीकृतायां भूमावभीष्टदिने तद्दिनमाध्याह्निकच्छायाप्रमाणतोऽधिकेन कर्कटकेन वृत्तमुत्पाद्य वृत्तमध्ये द्वादशाङ्गुलशङ्कुर्निवेश्यः । तस्य प्राक्कपालस्थे सवितरि यत्र पश्चिमभागे वृत्तपरिधौ छायाग्रं लगति तत्राद्यो विन्दुः कार्यः । पुनः पश्चिमकपालस्थे रवौ तस्यैव शङ्कोर्भाग्रं यतः पूर्वभागे वृत्तपरिधौ निर्गच्छति तत्रान्यो विन्दुः कार्यः । आद्यः पराऽन्यः पूर्वा दिग्व्यवहारोपयोगिनी ज्ञेया । तद्गता रेखा पूर्वापरा तस्यां तयोश्छायाग्रयोर्मध्यं यत्तस्माच्छङ्कुमूलगामिनी रेखा दक्षिणोत्तरा । तत्र याम्योत्तरे भवत इति बुद्धिमतानुक्तमपि ज्ञायते । अत्र क्रान्तिवशाद्दिक्साधने कथं भेद उत्पद्यते इत्येतदर्थं चतुर्वेदाचार्येण कर्णवृत्ताग्रान्तरं यत् स्वटीकायां साधितं तदेव भास्करेण 'तत्कालापमजीवयोस्तु विवराङ्गाकर्णमित्याहता' दित्यादिनोपनिबद्धम् । 'वृत्तेऽम्भःसुसमीकृतक्षितिगते' इत्यादि भास्करोक्तमेतदनुरूपमेव ।

अत्रोपपत्तिर्भास्करोक्तैव स्फुटा । कर्णवृत्ताग्रान्तरदानेनापि न स्फुटा प्राची भास्करादिविधिना भवतीत्येतदर्थं मदीया दिग्मीमांसा विलोकनीया किमत्र गौरवेणेति ॥ १ ॥

दि क चाज्ञानं स्वतन्त्राचिन्त्यसद्गुणे । मोक्षाभावाय तेषां तु दर्शयेत्तानजो हरिः । कृष्णो ह्यत्यक्तदेहो ऽपि त्यक्तदेहस्य देहवत् । लोकानां दर्शयामास स्वरूपसदृशाकृतिमिति । विष्णोरित्युपलक्षणम् । नन्दगृहादौ दुर्गादेरवतारो ऽप्येवमेव । तथा च रामावतारे शोकज्ञापनाफलं रावणस्येश्वरत्वबुद्धिप्रतिबन्धेन मुक्त्यभावो मृत्युसिद्धिश्च । मनुष्यातिरिक्तेन मरणाभावस्य तेन वृतत्वात् । कृष्णावतारे देहत्यागज्ञापनस्य मर्त्यानां वैराग्यं फलम् । यत्तु वैष्णवे । एवं संस्तूयमानस्तु भगवान्परमेश्वरः । उज्जहारात्मनः केशौ सितकृष्णौ महामुने । उवाच च सुरानेतौ मत्केशौ वसुधातले । अवतीर्य भुवो भारक्लेशहानिं करिष्यत इत्युक्तम् । तस्यायं भावः सुराः समस्ताः सुरनाथ कार्यमेभिर्मया यच्च तदीश सर्वम् । आज्ञापयाज्ञां परिपालयन्तः सदैव तिष्ठाम सदा ऽस्तदोषा इति सुरैरुक्तो भगवान्मम दुष्करं चेद्युष्माभिः साहाय्यं कार्यं स्यान्न त्वेवमस्ति भूभारनिवारणादौ कर्त्रन्तरापेक्षया महत्यपि कार्ये मत्केशयोरपि शक्तत्वादिति । न तु केशमात्रावतार इति भ्रमितव्यम् । ततः क्षयमशेषास्ते दैतेया धारणीतले । प्रयास्यन्ति न संदेहो मद्दृक्पातविचूर्णिताः । कृष्णाष्टम्यामहमुत्पत्स्यामीत्यादिषु तत्रैव स्वावतारत्वोक्तिविरोधात् । कृष्णस्तु भगवान्स्वयमित्यादिपुराणान्तरविरोधाच्च । अजरामरेशस्यार्द्धपलितत्वासम्भवादेकः केश ईशेच्छया रामस्य श्वेतरूपतार्थं तदैव श्वेतो ऽभूदिति गम्यते । एतेनैतत्तुल्यं भारतवाक्यजातमपि व्याख्यातम् । तस्माद् ब्राह्मादौ मत्स्यादौ चांशत्वोक्तिरौपचारिकीति सिद्धम् । तच्चांशत्वं ब्रह्मादिष्वाविष्कृतोत्पत्त्यादिहेतुशक्तित्रयाल्पोत्पत्त्याद्येकैकहेतुशक्तित्वमेव न तु स्वांशित्वेनाभिमतानन्तशक्तिमायीशापेक्षया वस्तुतो ऽल्प-

शक्तित्वेनानीशत्वापत्त्या तदनन्तशक्तित्वबोधकानन्तवाक्याप्रामाण्यापत्तेः । तस्मात्त्रिगुणमायोपहित एक एवेशो विषवृक्षो ऽपि संवर्द्ध्य स्वयं छेत्तुमसांप्रतमिति न्यायात्तत्तदुपयोगितत्तद्गुणमादाय तत्तद्विग्रहावच्छेदेनोत्पत्त्याद्येकैकं कर्म कुर्वन्ब्रह्मादिसंज्ञामात्रभेदेन व्यवह्रियतइति सिद्धम् । एवं मत्स्यादिष्वप्यवतार्यपेक्षया ऽऽविष्कृताल्पशक्तित्वमेवांशत्वव्यवहारहेतुः । अल्पशक्त्याविष्करणमप्यधिकाया अनुपयोगात् न त्वभावात् । यथा हि कश्चित्सर्वशास्त्रज्ञो बहून्देशान्विचरन्यत्र यद्विद्योपयोगं पश्यति तत्र तामेव प्रकटयंस्तद्व्यवहारभाग्भवति यत्र तु सर्वोपयोगात्सर्वाः प्रकटयति तत्र सर्वज्ञो ऽभिधीयते तथा प्रकृते ऽपि । एवं चान्यें ऽशकलाः पुंसः कृष्णस्तु भगवान्स्वयमिति भागवतं सङ्गच्छते । कृष्णावतारे विश्वरूपदर्शनाद्यनेकशक्त्याविष्करणात् । अन्यत्र तथा ऽभावात् । वस्तुतस्तु सर्वेषामप्यारोपितसर्वशक्तित्वाद्यनन्तकल्याणगुणाद्वितीयब्रह्मरूपत्वमेव । सर्वत्र चोक्तलक्षणमौपचारिकांशत्वमपि । ये त्वाहुः यस्मिन्नवतारे भगवतो विग्रहान्तरं नोपलभ्यते स पूर्णः । यत्रोपलभ्यते सो ऽंश इति तेषामीशस्वरूपं किमभिमतमिति तु तएव प्रष्टव्याः । किं चैषां तत्तत्कार्येषु प्रवृत्तिलिङ्गेन रजोवच्छिन्नब्रह्मरूपत्वं दैत्याद्युपसंहारलिङ्गेन रुद्रत्वं तस्य पालने पर्यवसितत्वेन विष्णुत्वं च ज्ञेयम् । एतेन गुहगणेशयोर्हरिहराद्यवतारत्वबोधकवाक्यस्य रामस्य क्वचिच्छिवावतारत्वोक्तेः कृष्णस्य क्वचिच्छिवावतारत्वोक्तेः क्वचित्काल्यवतारत्वोक्तेश्च विरोधो ऽपास्तः । सर्वेषां सर्वावतारत्वोपगमेन प्रत्युत तेषां वाक्यानामनुकूलत्वात् । मत्स्यादेर्विष्णुत्वं प्रसिद्धं विधित्वं तु वैष्णवे ऽभिहितम् । सत्त्वोद्रिक्तस्तदा ब्रह्मा शून्यं लोकमवैक्षत । तोयान्तः स

महीं ज्ञात्वा जगत्येकार्णवे प्रभुः। अनुमानात्तदुद्धारं कर्तुकामः प्रजापतिः। अकरोत्स तनूमन्यां कल्पादिषु यथा पुरा। मत्स्यकूर्मादिकां तद्वद्वाराहं च पुरा स्थित इत्यादि। शिवसहस्रनामादिषु सर्वावतारनामोपलम्भात्तेषां रुद्रत्वनिश्चयः। प्रवृत्त्युपसंहारयोरपि पालने पर्यवसानेनास्य प्राधान्याद्विष्ण्वतारत्वव्यवहारप्राचुर्यम्। यत्तु भागवते विराजं प्रस्तुत्योक्तम्। एतन्नानावताराणां निधानं बीजमव्ययमिति तदपि तात्स्थ्यात्ताच्छब्द्यमिति न्यायात्तत्रत्यविराडुपपादकशब्दजातस्य तत्स्थान्तर्यामिपरत्वादविरुद्धम्। एते च लीलाविग्रहा अनन्ताः। नन्वीशस्य ब्रह्मादिसंज्ञा अपि रामादिसंज्ञावल्लीलाविग्रहमात्रकृता एव किं न स्युरिति चेन्न। चतुर्मुखादिविग्रहाणां प्रतिमहाकल्पभेदेनानन्त्याद्ब्रह्मादेरप्यानन्त्यापत्तेः। एतेनैक एवेशस्तत्तद्विग्रहावच्छिन्नो विष्णुशिवादिव्यपदेशभागिति तार्किकमतं निरस्तम्। एकैकस्यापि विग्रहबहुत्वस्मरणेन प्रतिकल्पं तद्भेदेनच तेषामपि मत्स्यादिवदानन्त्यापातात्। न चेष्टापत्तिः एको विष्णुरेको रुद्र इत्यादि श्रुतिविरोधात्। तस्मात्सत्त्वाद्यवच्छेदकृत एव विष्ण्वादिसंज्ञाभेदः। स च तत्तद्गुणकार्यतत्तत्क्रियाप्राधान्यविवक्षया तत्तद्विग्रहावच्छिन्ने ऽपीशे प्रवर्त्ततइत्येव साधु। यत्तु केचिन्मन्यन्ते विग्रहबोधकश्रुत्यादेरुपासनापरत्वादारोपितविग्रहेणाप्युपासनासिद्धेर्नेशस्योक्तविग्रहसिद्धिरिति। तन्न उपासनापरेभ्यो ऽप्यविरोधे देवताधिकरणन्यायात्प्रतीयमानार्थसिद्धेरनिवार्यत्वात्। न चापाणिपाद इति श्रुतिविरोधो ऽस्तीति वाच्यम्। निर्गुणश्रुतिविरोधात्सत्यकामादिगुणानामप्यनभ्युपगमापत्तेः। इष्टापत्तिरिति वदतां तु सत्यकामादिगुणोपदेशे तद्गुण ईश्वरः प्रसिध्यतीति व्यतिहाराधि-

करणभाष्यविरोधः । मायिका गुणा वास्तवं निर्गुणत्वं न विघ्नन्तीति न्यायस्त्विहापि समः । यत्तु रूपोपन्यासाच्चेति सूत्रे विग्रहोपन्यासपरत्वेन सूत्रव्याख्यानानन्तरं ब्रह्मणो विग्रहाभावात्तद्व्याख्यानमयुक्तं मन्यमानानामन्यथा व्याख्यानमुपन्यस्तं भाष्यकारैस्तन्मुण्डकश्रुतौ निर्विशेषब्रह्मपरोपक्रमविरोधान्न विग्रहोपन्यासः संगच्छतइत्याशयेन.। उक्तश्च तैरेवान्यत्र विग्रहसद्भावः स्यात्परमेश्वरस्यापीच्छावशान्मायामयं रूपं साधकानुग्रहार्थमिति । सूत्रकारेण च भोगमात्रसाम्यलिङ्गाच्चेत्यहंग्रहोपासकानां ब्रह्मणश्च भोगसाम्यं वदता स्पष्टीकृतम् । शरीरसापेक्षे वैषयिकानन्दे भोगशब्दप्रसिद्धेः । न च वाग्धेन्वादिवद्ध्यानायारोपिता एव देहा इति शक्यं वक्तुम् छान्दोग्ये समानप्रकरणे गुणोपसंहारन्यायेनोपास्यब्रह्मण उदाहृतमन्त्रवर्णादिसिद्धवत्कारेण एष आत्मा ऽपहतपाप्मेत्यादिना देहित्वसाम्यात्प्रसक्तानां जरादीनां निषेधदर्शनात् । अन्यथा ऽप्राप्तनिषेधापत्तेः । न च देहवदजरत्वादयो ऽपि ध्यानपरिकल्पिताः तत्रैवास्मिन्कामाः समाहिता इत्यादिना तेषामनारोपितव्यावहारिकेशगुणत्वस्फुटीकरणात् । नन्वजरत्वादि न देहत्वेनोपास्यम् एष आत्मेत्यादिना ऽत्मगुणत्वोक्तेः । तद्गुणैः सत्यकामादिभिः सह पाठाच्च । यत्प्राये श्रूयते यच्च तत्तादृगवगम्यत इतिन्यायेनात्मगुणत्वसिद्धेः । तत्र तत्प्रसक्त्यभावे ऽपि स्वतः सिद्धमेव तदुपास्यतया निर्गुणप्रकरणस्थाजरत्वादिवन्निर्दिश्यतइति चेन्न । सर्ववेदान्तप्रत्ययन्यायेन तत्र विशिष्टस्यैव ब्रह्मण उपास्यत्वे स्थिते औचित्यात् कोटिशो दृश्यमानोपबृंहणानुरोधाच्चाजरत्वादेर्विग्रहगुणत्वसिद्धेः । स्वधीकल्पितैर्न्यायैर्व्यवस्थापनादुपबृंहणानुरोधाद्व्यवस्थापनं ज्यायः विभे-

त्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति। इतिहासपुराणाभ्यां वेदार्थमुपबृंहयेत्। वेदार्थो यः स्वयं ज्ञातस्तत्राज्ञानं भवेदपि। ऋषिभिर्निश्चिते तस्मिन्का शङ्का स्यान्महात्मनामिति स्मृतेः। तथा च तस्योपरि शिवं ध्यायेत्साम्बं सर्वमनोहरम्। सर्वलक्षणसंपन्नं गाढयौवनशोभनमित्याद्युपबृंहणानुरोधाद्विग्रहगुणत्वेनैवान्वयो युक्तः। तथात्वेऽपि तद्द्वारा आत्मगुणत्वसम्भवेन तद्व्यपदेशस्य तद्गुणैः सह पाठस्य च त्रिलोचनं नीलकण्ठमित्यादाविवोपपत्तेः। पुराणैर्निर्णीते ऽर्थे संशयाद्ययोगाच्च। न च तेषामप्यर्थवादत्वं कल्प्यं पुराणेष्वर्थवादत्वं ये वदन्ति नराधमाः। तैरर्जितानि पुण्यानि तद्वदेव भवन्ति हीत्यादितन्निन्दास्मरणात्। तस्माद्विग्रहगुणस्याजरत्वादेः स्वरूपतो विद्यमानत्वेन निर्दिश्योपास्यतया विधानेनानारोपितत्वाध्यवसायाद्धर्मिणो विग्रहस्याप्यनारोपितत्वं निश्चीयते। अतो ऽङ्गीकार्या एव मायिनो महेशस्य पूर्वोक्ताः शास्त्रसिद्धाः स्त्रीपुमाकारा विग्रहास्त्याज्या यवनानुयायिना।

एते च विग्रहा मायामात्रस्वरूपाः आकाशशरीरं ब्रह्मेति श्रुतेः। एषा माया मया सृष्टा यन्मां पश्यसि नारद। सर्वभूतगुणैर्युक्तं न तु मां द्रष्टुमर्हसीति स्मृतेश्चेति केचित्।

अन्ये तु सर्गादिषु स्वयं भान्ति ब्रह्माद्या ये स्वयम्भुवः। विज्ञप्तिमात्रदेहास्ते सर्वात्मानः सदा स्थिता इत्यादिवासिष्ठादिवचांस्याश्रित्य चिन्मात्रस्वरूपा एव ते मायातु शुद्धचैतन्यस्य विग्रहाकारेण भाने निमित्तमित्याहुः।

अवतारा अपीदृशा बोध्याः। ननु सत्यसङ्कल्प ईशः किमिति नरतिर्यगादिभावेन युद्धैश्च क्लिश्यतीति चेत् भ-

क्ताभिध्यानाय मनोहराणि चरितानि तत्तद्रूपैर्विधत्ते । तद्रूपधारणमपीशस्य तादृगेव न त्ववतार्यवतारदेहेष्वणुरपि विशेषः क्लेशहेतुरस्ति । तदुक्तं शिवरहस्ये । जगद्रक्षायै त्वं नटसि ननु वामैव विभुतेति । नटसि नटवदाचरसि भैरवाद्यैर्मत्स्याद्यैश्चावतारैर्विहरसीत्यर्थः । स्कन्दश्च कृष्णं प्रस्तुत्याह स्कान्दे । कैवल्यं यत्परं ब्रह्म निराकारमगोचरम् । तच्च मूर्त्या परिणतं भक्तानां भक्तिहेतुत इति । अभियुक्तैश्चोक्तम् । परमिममुपदेशमाद्रियध्वं निगमवनेषु नितान्तखेदखिन्नाः । विचिनुत भवनेषु वल्लवीनामुपनिषदर्थमुलूखले निबद्धमिति । युद्धमपीशस्यासुरोद्धारार्थमेव तदुक्तम् । मार्कण्डेये । दृष्ट्वैव किं न भवती प्रकरोति भस्म सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम् । लोकान्प्रयान्तु रिपवोपि हि शस्त्रपूता इत्थं मतिर्भवति तेष्वहितेषु साध्वीति । न च युद्धं तस्य क्लेशावहं किंतु क्रीडैव मोहादेस्तु नाट्यत्वं प्राङ्निवेदितं हरिवंशे च निकुम्भपरिघप्रहारान्मूर्छित इव कृष्णे ऽभिहितं नूनमात्मेच्छया कृष्णस्तथा चक्रे सुरोत्तमः । को हि शक्तो महात्मानं युद्धे मोहयितुं हरिमिति । न चात्र त्वन्मुखाभेच्छया नूनं पद्मैर्वैरायते शशीत्यत्रेव नूनमित्युत्प्रेक्षायामिति भ्रमितव्यम् । यैस्तु भक्त्या स्मृता नूनं तेषामृद्धिः प्रजायतइत्यत्रेव निश्चयार्थत्वात् । किं चेशमायाया अचिन्त्यत्वेनातर्क्यत्वात्तन्मयानि चरितान्यप्यतर्क्याणि । नैषा तर्केण मतिरापनेयेति श्रुतेः । अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेदिति वृद्धोक्तेश्च । तस्मादतर्क्ये ऽर्थे शास्त्रेणैव निर्णयः शास्त्राच्चैकमेवाद्वितीयं ब्रह्म स्वमायया हरिहराकारै रमोमाद्याकारैर्मत्स्यभैरवाद्याकारैश्च प्रतीयतइति निश्चीयते । अतो ऽयमेवार्थः श्रद्धेय आस्तिकैः ।

ननु हरादेरेकब्रह्मरूपत्वं चेत्तर्हि तत्तन्माहात्म्यपरपुराणादिष्वितरनिन्दा न स्यात् दृश्यते च सा तथा च तदन्यथानुपपत्त्या साम्यमपि दुर्लभम् ऐक्यस्य तु का कथा ततश्च पतन्तमनुधावतो बद्धो ऽपि गत इति न्यायापात इति चेदत्र के चिदाहुः। श्यालशुनकन्यायाद्भेदवादिनः कोपोत्पादाय तदिष्टदेवस्यान्यपरपुराणेष्वपकर्षवर्णनमिति।

परे तु प्रागुक्तवचांस्याश्रित्य कल्पभेदेन स्वेच्छया परस्परस्माज्जन्मनिमित्तकं क चिदुत्कर्षापकर्षवर्णनमित्याहुः।

न हि निन्दा निन्दितुं प्रवर्त्तते अपि तु विधेयं स्तोतुमिति न्यायाद्विधेयं हि स्तूयते वस्त्विति न्यायप्राप्ततत्तद्विग्रहावच्छिन्नेशध्यानादिस्तुतये तदन्यविग्रहावच्छिन्नेशापकर्षवर्णनम्। तच्च यत्परः शब्द इति न्यायात्स्तुतिपरमेव न त्वन्यनिन्दापरमपि फलाभावात् उभयपरत्वे वाक्यभेदापत्तेश्च। अन्यत्रापि ह्येवं दृश्यते तद्यथा सर्वशाखाप्रत्ययमेकं कर्मेति न्यायान्नानाशाखाविहितमप्यग्निहोत्रं न भिद्यते इति स्थिते के चिदुदिते जुहोतीति श्रुतिमाश्रित्योदिते ऽर्के होमं कुर्वन्ति के चिदनुदिते जुहोतीति श्रुतिमवलम्ब्यानुदिते जुह्वति तत्र ये शाखिन उदिते जुह्वति ते उदयन्नु खलु वा आदित्य आहवनीयेन रश्मीन्संदधातीत्युपक्रम्य प्रातःप्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति यो ऽग्निहोत्रम्। दिवाकीर्त्त्यमदिवाकीर्त्तयन्तः सूर्यो ज्योतिर्न तदा ज्योतिरेषामित्यनुदितहोमं निन्दन्ति। ये त्वनुदये जुह्वति ते आदित्यो वा अस्तं यन्नग्निमनु प्रविशतीति श्रुतिमुपजीव्य यदुदिते सूर्ये प्रातर्जुहुयाद्यथा ऽतिथये प्रद्रुताय शून्यायावसथायाहार्यं हरति तादृगेव तदित्युदित-

होमं निन्दन्ति । अनयोः स्वार्थतात्पर्यकल्पने रागप्राप्तसुरापानादिवत्कालद्वये ऽपि त्याज्यस्य शेषिणो होमस्यैव बाधः स्यात्तथा च यावज्जीवमग्निहोत्रं जुहुयादित्यादयश्चोदना उपरुध्येरन् । एवं च कालभेदेनाग्निहोत्रमिव गुणभेदेन विग्रहभेदेन वा नेशो भिद्यते । ततश्च य एकस्मिन्नीशे गुणादिभेदेन भेदं प्रकल्प्यैकविग्रहावच्छिन्नमुपासीनो ऽन्यं निन्दति स ईशविमुखः स्वामिद्रोहान्नरकमेतीति ज्ञेयम् । तस्मान्नैतावता सर्वविग्रहावच्छिन्नेशैकत्वविघातः शङ्क्य इत्यन्ये ।

ननूमादेर्बहुषु पुराणादिषु शक्तित्वोक्तेः कथमीशत्वमिति चेत्तर्हि सेयं चैतन्यदीप्ता ब्रह्मविष्णुशिवरूपिणीत्यादिश्रुतौ शक्तयो यस्य देवस्य ब्रह्मविष्णुशिवादिका इत्यादिपुराणे च ब्रह्मादीनामपि शक्तित्वोक्तेरीशत्वं न स्यात् । तेषामीशत्वबोधकशास्त्रात्तत्त्वमिति चेत्तदत्रापि तुल्यमिति न वयं पर्यनुयोज्याः । यत्रोभयोः समो दोषः परिहारो ऽपि वा समः । नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणइति न्यायात् । तथा च चित्प्राधान्यविवक्षायामीशत्वस्य उपाधिप्राधान्यविवक्षायां शक्तित्वस्य उपाधेर्मिथ्यात्वेनात्यन्तोपेक्षायां शुद्धचिन्मात्रत्वस्य च व्यपदेशः सर्वत्र समः । तस्मान्न कथमपि भेदलेशावकाशः । येषां तु धीमान्द्याद्भूयो भूयः श्रूयमाणो ऽप्यभेदो न बुद्धिमारोहति तैस्तूपवासाद्वरं भिक्षेतिन्यायेन भेदबुद्ध्या ऽपि स्वप्रेमास्पदविग्रहावच्छिन्नेशाराधनं कार्यं तत्प्रसादान्मेधोदये शालिसमृद्धौ कोद्रवाशनन्यायेन त्याज्या भेदधीः । भेदधिया तस्यापि किंचित्पापं स्यात्तन्निन्दाश्रवणादिति चेत्तर्हि तदपि कूपखानकन्यायेनेशभक्तिजसुकृतैर्नाश्यते ।

Self (*ātmabōdha*).' Not so; they are mere explanatory remarks (*arthavāda*).

44. "This is because we see everywhere in Scripture (*Ṣāstra*) that passages prescribing rewards in the case of the materials and the preparation for rites and the rites themselves, are but explanatory remarks[1] (*arthavāda*), as, for example, the passages enjoining a reward for the use of *parṇamayī*.[2]

45. "Since the soul must be purified by *karman* (*karmaṣēshatvāt*)[3] knowledge of the Self also depends on *karman*. And, though you hold that the *Vedānta* is not injunctory, you must, however, concede that such passages are mere explanatory remarks (*arthavāda*)."

46. It is not so; since final liberation and temporal happiness differ from each other, both as to their means (*hētu*) and as to their nature (*rūpa*),[4] your argument is, therefore, unsound.

47. You say that liberation is the natural (or unmodified) condition of the soul (*svarūpa*) and that this is the result of avoiding rites with special objects, etc., (*kāmyādivarjanādibhyah*).

48 & 49. Is the soul, then, previously out of its

---

[1] Compare द्रव्य-संस्कार-कर्मसु परार्थत्वात् फलश्रुतिर् अर्थवादः स्यात् । (Jaimini's Sutras, IV. 3. 1.)

[2] The use of the wood called *parnamayi* for the *juhū* or sacrificial ladle, is said to be meritorious, and rewards are ordained for its use.

[3] *Karman* purifies the soul which is the doer (*kartṛi*), and is hence the indirect cause of *jnāna*. With this verse ends the argument of Surēsvara's opponent, who holds that *karman* is the only means to *muktī*.

[4] The means of *muktī* is *jnāna* which springs from *vivēka*, while that of *abhyudaya* is *karman* which springs from *avivēka*. The nature of *mukti* is *dhruva*, and, of the other, *adhruva*.

natural state, so that it stands in great need of a means for bringing it to such a state? If so, that state cannot be its natural condition, in which it does not, of itself, exist, but to which it has to be brought by forcible means. If, on the other hand, it already exists in its natural state, why seek for a means to attain that state?

50. If (it be said that) even in its natural condition, it might be performing rites, then there will be no liberation at all.[1] Hence the liberation of the soul cannot be the result of avoiding prohibited rites, rites with special objects, etc.

51. If it be argued that liberation is the removal of the unnatural state (of the soul) that results from the repeated contact with objects of sense, what is the cause (we ask) of such contact?

52. If you hold that such contact is accidental, then, since there is nothing to prevent such contact even after liberation, there will be, according to you, no liberation at all.

53. If you say that the cause of such contact is virtue and vice (*dharmādharma*), then, do virtue and vice cause this contact by force, even for the soul which is, by its very nature, non-attached (*asanga-svabhāvasya*)?

54 & 55. In the same way as the *bhallātaka* (marking nut) produces a stain on cloth, it is not possible even for an able and intelligent potter to make a pot of the atmosphere (*vyōman*) which is not of the nature of a pot, as he could make one of clay; nor can the (cool) breeze cool the fire. If you say that the soul is of the nature of a doer, etc., then you need not, in the least, hope for liberation.

[1] Since for performing *karman*, a corporeal existence is necessary.

56. For, the nature of things, like the heat of the sun, cannot change. If a thing loses its nature, it becomes unnatural (or non-existent, impossible), like the sky-blossom (*kha-pushpa*).

57. Just as fire does not, in any case, lose its heat without itself being quenched, so, too, unless the soul ceases to be the doer, etc.,[1] there can be no liberation by any other means.

58 & 59. You may say, "Since the bondage of the soul (*ātmasamsṛiti*) is the *kārya* (result), and not the *ṣakti*,[2] of its being doer and enjoyer, if we suppose that its *ṣakti* alone remains, the soul's liberation is possible by reason of its freedom from all misery."[3] Not so; it leads to a fallacy whether we differentiate between *ṣakti* and *kārya*, or not.

60. For, there is no difference between *ṣakti* and its *kārya*. If we assume such a difference, the invariable relation (of cause and effect) will be lost.

61. If they differ in their essence, there cannot then be the relation of cause and effect. If they do not differ, then, since they become identical, how can they be cause and effect?

---

[1] And hence loses its nature as doer.

[2] *Ṣakti* is the inherent power of a cause to produce its effect. The following extract from Anandagiri's gloss makes clear the aim of stanzas 55, etc. आत्मेति ॥ कर्तृत्वादिस्वभावस्तावदात्मा तस्य विषयसम्बन्धधर्माधर्मावाधत्तस्तदभ्यासजास्वास्थ्यनुत्त्यर्थं काम्यादिवर्जनमित्यर्थः । स किं कर्तृत्वादिकार्यस्वभावः किं वा तच्छक्तिस्वभावः । आद्ये कर्तृत्वादिकार्यध्वस्ता वात्मनो मुक्तिस्तदध्वस्तौ वा । नाद्यइत्याह । मार्कांक्षीरिति । .... न द्वितीयइत्याह न चेति । .... कर्तृत्वादिकार्यत्वरूपत्वपक्षं प्रतिक्षिप्य तच्छक्तिस्वभावत्वपक्षमालम्बते नन्विति ॥

[3] For, *anartha* is the *karya*, not the *ṣakti* of *kartṛitva*, since during sleep, for instance, when *ṣakti* alone remains, the sense of misery is altogether absent.

62, 63 and 64. We have not known of a cause that does not produce an effect, or of a result that is not caused. If they do not differ, then, when the *kārya* is destroyed, its *ṣakti* too would be destroyed, since they are identical. And when the nature of *ṣakti* is lost, that of which it is the *ṣakti* (*ṣāktimat*)[1] also loses its nature, since these two are not distinct from one another. This leads to the same undesirable conclusion referred to before, namely, the non-existence of the soul.[2] Hence such an argument is unsound.

65. If it be argued that liberation is merely the non-resulting of *kārya* from *ṣákti* owing to the complete absence of its causes,[3] such a reasoning is improper, since *ṣakti* and the causes of the *kārya* will still exist.

66. Moreover, there is an invariable connection of the nature of *ṣakti*, between causes (*nimitta*) and effects (*naimittika*). Hence it will be like the heat of fire, etc.[4]

67. For, if *kārya* is dependent on *ṣakti*, then since the cause (*kāraṇa*, hence *ṣakti*), always exists, there will therefore be incessant manifestation of *kārya*, like that of heat in summer.[5]

68 & 69. In the same way, even if we suppose that *kārya* is independent of *ṣakti* (*ṣaktyatantratvē*) the same fallacy would result, for, since the cause (*kāraṇa*) ceases

---

[1] The *ṣaktimat* is the *kartṛi*, or *ātman*, since it is *kartṛitvādisvabhāva*.

[2] See stanzas 56 and 57.

[3] And not, as the former opponents said, the destruction of *ṣakti* or *kārya*. The causes of *kārya* are *dharmādharmau*, etc.; which will not cease to exist even after *mukti*.

[4] i. e. the causes must produce their effects even after *mukti*, as fire inevitably produces heat.

[5] Here *Ānandagiri* makes out *ṣakti* and *kāraṇa* to be identical, meaning *pushkalakāraṇa* or *samagra-hētu*.

to exist forever, the *kārya* will also never be produced, as, for example, cold in summer. Therefore such an argument is fallacious. If *kārya* be said to result without a cause, then it would be so produced for ever.

70 & 71. Further, how can it be *kārya*, if it is not dependent on *kāraṇa*? It is not possible, even for the ablest of men, to vow the avoidance, from their birth to their death, of all prohibited rites, rites with special objects, etc.; for, even the most diligent have been known to fall into minute errors.

72. At least such a possibility is to be doubted, and this itself disproves the proposition.[1] But you may say that he, to whom it might be so possible, will be liberated.

73. It cannot be as you say, since it is illogical. With respect to liberation, a *certain* means, namely, *jnāna* must be predicated.[2]

74. A wise man ought not to speak of success as depending on mere accident. Such a thing would be within the scope, not of human effort, but of destiny.

75. It cannot be said that it is also within the scope of human effort, on the principle that injunction implies endeavour; for, there is no injunction (*ākhyāta*) to that effect.[3]

76. There is no injunction anywhere in the *Vēda* that he who longs for liberation should avoid rites with

[1] For none will venture on a doubtful project, which is especially not an easy one.

[2] And not a doubtful means as you suggest.

[3] Such a principle will hold good, only when there is a *vidhi*, But there is no rule that a *mumukshu* should abandon *kāmya*, etc. Here *śakti* means *manushyaśakti*.

special objects, etc., that will enable you to say that endeavour is implied in the injunction.

77. Since then the abandonment of *kāmya*, etc., is a mere product of your fancy, it cannot, in any way, be argued that human endeavour also plays a part in such abandonment.

78. Not by the performance of prescribed rites, etc., nor by the abandonment of *kāmya*, etc., can liberation be attained; for, in that case, knowledge (*vidyā*) would become fruitless.[1]

79. Even if heaven (*svarga*), etc., cease to result from *kāmya* rites, and the corresponding results (hell, etc.,) from prohibited rites,[2] still there is nothing to prevent their resulting from other causes or by themselves (*arthāntarāt svabhāvāt vā*).

80. If you say there is no proof positive of their springing from other causes, such a thing is at least open to doubt; and that very doubt is enough to vitiate and disprove your proposition.

81. There is not even this doubt, since such persons, as disobey all injunctions (*vidyā* and *karman*) are also subject to pleasure and pain, as is evident from the passage, "Then, of these two, etc."[3]

[1] Since such passages as निचाय्यतं मत्युमुखात्प्रमुच्यते । would be meaningless.

[2] i. e. even after the avoidance of *kāmya*, *nishiddha*, and other rites, there will be no *mukti*, since heaven and hell may result in other ways.

[3] अथैतयेः पथोर्नकतरेण च न......Compare Vedanta-sutras, III. 1. 18, all which show that such persons enter the lowest forms of creation, which is called the third way, the other two being the *dēvayāna* and *pitṛiyānu*.

82. Though the non-performance of prescribed (*nitya*) rites is sin, and their performance not, yet there is no proof that such sin cannot result from other causes[1] or by itself.

83. If it be said that sins already incurred will be atoned, by the present performance of *nitya* and other rites, still there springs a doubt, as before, with respect to sins that might be incurred in the future.

84. Though sins, which yield evil fruits (*ānabhīshta-phala*), might be obliterated, virtues, that lead to temporal happiness, will not cease, being the very thing you desire.[2]

85. It cannot be said that virtue, like vice, is an evil (even for one who longs for liberation), for, what is enjoined cannot be an evil. It is not like hawk-sacrifice, etc.,[3] since there, the fruit being evil, it too is evil.

86. If it be said that liberation results from a knowledge of the unity of Self, it is vain, then, to argue that it depends on performance of rites. That knowledge is a direct means to attain it, is seen from passages like '*tam etam*, etc.'

87. It has been shown[4] that rites which, in the manner aforesaid, purify the doer, are also helps towards a knowledge of the unity of Self.

88. Therefore he who knows the true signification of the Vedas, will learn the fruitlessness of rites, and,

---

[1] Such as non-performance of such rites in a former life or lives.

[2] Hence a birth in consonance with those virtues, and consequently no *mukti*.

[3] There the fruit is evil, because it contravenes the principle नहिंस्यात्.

[4] In the Vedanta-sutras.

destroying his sins by penance, strive for a knowledge of the unity of Self.

89. [1]He who is, by reason of action in former lives, free from all desire, is qualified at the very outset, and does not stand in need of further rites.

90. For, he who is free from worldly attachment and thirsts for knowledge, longs only for accurate knowledge and for nothing else. Rites are needed when an object is to be accomplished, but are unnecessary when the end has been achieved.

91.. Religious studentship is known to have been properly begun, in the case of *Vāmadēva*, *Maitrēyī* and *Gārgī*, because (immediate) renunciation is enjoined.

92. Since the means of attaining heaven, such as Vedic and Smartic rites (*ishṭāpūrta*), are of endless variety, it is difficult to understand why (even if *kāmya*, etc. be abandoned) there cannot be other causes (of another birth,) for other causes may exist.

93 & 94. The same reasoning applies in the case of prohibited rites (*nishiddha*) and of prescribed rites (*nitya*) Hence such methods do not guarantee liberation; for, there exists *karman*, both good and bad, stored up through innumerable lives, and, like the killing of a *Brāhmaṇa*, giving rise to endless births.

95. The existence of *karman* that has not begun to bear fruit (*anārabdhaphala*) is indicated in such passages as '*tatah ṣeshēṇa, etc.*'[2] and '*tad ya iha, etc.*'[3]

[1] Stanzas 89, 90 and 91 justify *sannyāsa* even iu the first *āsrama*.

[2] वर्णाश्रमाश्चस्वकर्मनिष्टाःपत्यकर्मफलमनुभूयततःशेषेणविशिष्टदेशजातिकुलरू-पायुःश्रुतवृत्तवित्तसुखमेधसोजन्मप्रतिपद्यन्तेविष्वञ्चोविपरीतानश्यन्ति ।

[3] तद्यइहरमणीयचरणा रमणीयां योनिमापद्येरन्, etc.

॥ श्रीः ॥

श्रियै नमः ।

श्रीधराय नमः ।

श्रीमते रामानुजाय नमः ।

अथ न्यायसिद्धाञ्जने अद्रव्यपरिच्छेदः षष्ठः ।

अथाद्रव्यम्, संयोगरहितमद्रव्यं, तत्र च त्रिगुणे सदृशविसदृशरूपोऽवस्थासन्तानः कालेऽपि क्षणलवनिमेषत्वादिपरार्द्धपर्यन्तः, बुद्धौ प्रत्यक्षत्वानुमितित्वश्रौतत्वादिरूपः, शुद्धसत्त्वेऽपि केचित् त्रिगुणसमा इत्यनन्तप्रकारो यथाप्रमाणमनुसन्धेयः, एतदपेक्षया च वरदविष्णुमिश्रैरुक्तम्-गुणाश्चानन्ता इति, तेषां चानन्तवैषम्यस्य विविच्य निर्देष्टुमशक्यत्वात्, शक्यांशस्य च द्रव्यनिरूपणेनैव निरूपितप्रायत्वात्, तथाऽतिरिक्तनिरूपणस्य च लोकव्यवहारादृष्टाद्युपयोगाभावादन्यानि स्फुटपरिगणनीयान्यद्रव्याणि निरूप्यन्ते-तानि सत्त्वरजस्तमांसि शब्दादयः पञ्च संयोगः शक्तिरिति दशैव, एवंविधेष्वेवाद्रव्येषु गुरुत्वद्रवत्वस्नेहसंस्कारसंख्यापरिमाणपृथक्त्वविभागपरत्वापरत्वकर्मसामान्यसादृश्यविशेषसमवायाभाववैशिष्ट्यादीनां यथासम्भवमन्तर्भावः। एष्वपि केषाञ्चिदनन्तर्भावः सयूथ्यसम्मतस्तत्रतत्र वक्ष्यते सयूथ्याङ्गीकृतैः कैश्चित्सहैकत्वादयस्तत्त्वमुक्ताकलापे अद्रव्यभेदा अस्माभिरुक्ताः, तत्र प्रकाशसुखलाघवादिनिदानमतीन्द्रियं शक्त्यतिरिक्तमद्रव्यं सत्त्वम् । तद् द्विधा शुद्धमशुद्धं चेति, रजस्तमःशून्यद्रव्यवृत्ति सत्त्वं शुद्धसत्त्वं तन्नित्यविभूतौ, रजस्तमःसहवृत्ति सत्त्वमशुद्धसत्त्वं तत्त्रिगुणे सत्त्वलक्षण एव लोभप्रवृत्त्यादि-

निदानं प्रमादमोहादिनिदानमिति विशेषणविनिमयेन रजस्तमसोर्लक्षणे त्रीण्यपेतानि यावत्प्रकृतिव्याप्तान्यनित्यानि तानि प्रलयदशायामत्यन्तसमानि सृष्ट्यादौ विषमाणि क्रमात् सृष्टिस्थितिसंहारोपयुक्तानि ईश्वरसङ्कल्पादिसहकारिभेदात् परस्पराभिभवोद्भवसहकारित्वादिमन्त्येतानि तत्तदुदृष्टोपष्टब्धपुरुषभेदादुद्भवसमत्वादिभावात्, यथोक्तं भगवता पराशरेण वस्त्वेकमेवेत्यादि, तदेव प्रीतये भूत्वेत्यादि च, भगवद्गीतायां तद्भाष्ये चैतद्विशदमनुसंधेयं सात्त्विकराजसतामसकार्यगतिकर्माहारदानादिविभागोऽपि तत्रैव प्रपञ्चेन द्रष्टव्यः, एषां चाद्रव्यत्वं शारीरकभाष्ये व्यक्तं रचनाऽनुपपत्तेश्चेत्यादिसूत्रे चकारादन्वयस्यानैकान्त्यं समुच्चिनोतीत्युपक्रम्य यतः सत्त्वादयो द्रव्यधर्मा न तु द्रव्यस्वरूपं, सत्त्वादयो हि पृथिव्यादिगतलघुत्वप्रकाशादिहेतुभूतास्तत्स्वभावविशेषा एव न तु मृद्धिरण्यादिवद् द्रव्यतया कार्यान्विता उपलभ्यन्ते गुणा इत्येव च सत्त्वादीनां प्रसिद्धिरिति, तथा दीपे च चकारात्सत्त्वादीनां द्रव्यगुणत्वेन शौक्ल्यादेरिवोपादानकारणत्वासम्भवं समुच्चिनोति सत्त्वादयो हि कार्यगतलाघवादिहेतवः कारणभूतपृथिव्यादिगतास्तत्स्वभावविशेषा इति । यत्तु द्रव्यं षड्विंशतिविधं सत्त्वरजस्तमांसात्यादिना सत्त्वरजस्तमसां द्रव्यत्वमुक्तं वरदविष्णुमिश्रैः तत्सांख्याधिकरणसूत्रभाष्यादिविरोधाच्चासङ्गतम् ।

शब्दोऽस्मदादिश्रोत्रग्राह्यः पञ्चभूतवर्ती स द्विधा वर्णात्मकोऽवर्णात्मकश्चेति अकचटतपयादिप्रकाराभावसमुदायशून्यो वर्णात्मकः स एव देवमनुष्यादिताल्वादिव्यङ्ग्यः, तस्यैव पूर्वोक्तवाचकत्वादिविचारः, स च ळकारेण सहैकपञ्चाशत्प्रकारः मातृकापाठे ळलयोरभेदात् क्वचित्प-

ञ्चाशत्प्रकारतैवोच्यते यरलादेरेव भेदभिन्नः क्यक्रादिः, संध्यक्षराणां ह्रस्वाःसन्तीत्येव प्रयुज्यन्ते प्राकृतादिभाषासु निबध्नन्ति च मातृकायां द्रमि*डादयः संस्कृते वाचकत्वाभावान्मातृकाबहिष्कारः, एवमेषामेव यथाकथञ्चित् त्रिषष्टिवर्णता मोक्षधर्मादौ गीयते परनाम्नि च सहस्राक्षरत्वाम्नानं तु तत्रैव वर्णान्तरसद्भावेन वा तेषामेव वर्णानां सन्दर्भसंयोगादिविशेषेण सहस्राक्षरत्वायुताक्षरत्वादिभेदेनोपपत्तेर्वा । अकचटतपयादिसमस्तप्रकाराभावसमुदायवानवर्णात्मकः, स च वादित्रवारिधरमारुतविभागादिव्यङ्ग्यः । द्विविधोऽपि श्रोत्रदेशसन्निहित एव मारुतङ्ग्य इति पक्षे नभोनिष्ठस्यैव तस्य ग्राह्यत्वं, वादित्रादिस्थित एव गृह्यत इति पक्षे पञ्चभूतवर्तिनोऽपि ग्राह्यत्वमुपपद्यते तत्र दूरस्थशब्दग्रहणे श्रोत्रव्यापृतिरेव वरदनारायणभट्टारकैरुक्ता दूरे शब्दः समीपे च प्राच्यां चेत्यादिदर्शनात् गत्वा श्रोत्रेन्द्रियं तत्रतत शब्दग्रहक्षमम् आगता दूरतः शब्दमाला श्रोत्रेण गृह्यते समवायाद्यदि तदैवं न गृह्येत दूरजा–शब्दमान्द्यादिभिर्दूरोत्थत्वादिग्रहसंभवे अपि प्राच्यां प्रतीच्यां नेत्येवं न ग्रहसंभव इति, स चायं शब्द आकाशेन सहोत्पद्यते तद्विलये च विलीयते वाय्वादीनामप्याकाशभागत्वान्न भूतान्तरोत्पत्तिविनाशयोरस्योत्पत्तिविनाशौ, यद्वाऽऽकाशनिष्ठस्याकाशेन सहोत्पत्तिविनाशौ वाय्वादिनिष्ठस्यापि तत्तद्भूतैः सहेति अत्यन्ततीव्रताद्यापन्नेषु शब्देषु विरुद्धधर्मविरुद्धप्रत्यभिज्ञानात्स्थिरत्वम् ।

वेणुरन्ध्रविभेदेन भेदः षड्जादिसंज्ञितः ।

---

* द्रविड़ादय इत्युचितं भाति द्रमिडाचार्यशब्दे तु द्र–शब्दानन्तरं मि–शब्दो न तु वि–शब्दः ।

अभेदव्यापिनो वायोस्तथाऽसौ परमात्मनः ॥

इत्यादिभिः षड्जादीनां तीव्रत्वादिभेदानां व्यञ्जकवायुधर्मत्वं श्रूयते अत एवाकल्पवर्तिनां सर्वगकाराणामेकत्वम् एवमन्येषामपि। यत्तु श्रीविष्णुचित्तैरुक्तं श्रोत्रमपीतरेन्द्रियविषयवच्छब्दत्वगत्वमृदुत्वपरुषत्वमन्दत्वमध्यमत्वाद्यनन्तविशेषात्मकवस्तुग्राहकमिति तदपि निर्विशेषवस्तुग्रहणनिराकरणाभिप्रायम् उपनिषद्व्याख्याने त्वमेव प्रत्यक्षं ब्रह्मासीत्यत्र वायोर्व्यञ्जकत्वस्यैवाभिधानात् नमस्ते वायो त्वमेव प्रत्यक्षं ब्रह्मासि त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामीति श्रुतिवशात् वेणुरन्ध्रेत्युपबृंहणवशात् कल्पनालाघवाच्च व्यञ्जकत्वेन परैरभिमतो वायुविशेष एव तत्तद्द्रव्यविशेषघट्टनसंस्कारवशोत्पन्नतत्तच्छब्दगुणविशिष्ट उपलभ्यत इति भावयन्ति। संग्रहस्तु अव्यक्तपरिणामविशेषशरीरकपरमात्मोपादानकाः सर्वे शब्दाः न पुनः पृथग् द्रव्यतया गुणतया वा भट्टप्रभाकरमतवन्नित्याः। न चानुपादानकाः वर्णानां स्फोटाद्युपादानकत्वं चागमाध्यक्षविरुद्धं स्फोटे च नास्मादाद्यध्यक्षं प्रमाणं, योगिप्रत्यक्षं तु संदिग्धं न चागमः, कल्पकास्त्वन्यथासिद्धाः, प्रत्येकसमुदायादिविकल्पा वाचकत्व इव स्फोटाभिव्यक्तावपि समाः कल्पनं तु भवतामधिकम्। एतेन वाक्यस्फोटोपि स्फुटितः शब्दादर्थं प्रतीम इत्यपि न निरंशैक्यविषयकमेकवचनं विपरीतोपलम्भात् ब्रह्मण एव स्फोटशब्दवाच्यत्वे न नो विरोधः अध्यासादयस्त्वद्वैतमतवद्दूष्याः शाब्दस्मृतिः स्फोटाभावोऽपि सिध्यति न च तैः सर्वं समञ्जसं वाच्यं न च पाणिन्यादिभिस्तथोक्तम्। इतरे तु नीरन्ध्रकायासिनोऽनादरणायाः उक्तं च भट्टपराशरपादैः।

प्राक्प्रयोगानुसारेण प्रकृतिप्रत्ययस्वरान्।

प्रकल्प्य वैयाकरणैर्व्युत्पाद्या पदपद्धतिः ॥

इति, सत्त्वादिगुणोक्तनयाच्च शब्दानाद्रव्यत्वसिद्धिः।
ननु शब्दस्याद्रव्यत्वव्यङ्ग्यत्वे सिद्धान्तयितुं न शक्यं द्रव्यत्वकार्यत्वादेः श्रुत्यादिसिद्धत्वात्, तथा हि यद्वेदादौ स्वरः प्रोक्त इत्यादिभिर्वर्णानां वर्णान्तरोपादानत्वमुच्यते न चाद्रव्यस्योपादानत्वं निमित्तत्वमात्रविवक्षायामुपादानप्रकृतिलीनादिस्वारस्यभङ्गः निमित्तस्य प्रकृतिलयस्थानत्वाभावात् न चायमुपचारः बाधाभावात् भाष्यकारवचनविरोधाच्च, तथा च वेदार्थसंग्रहे वेदाद्यन्तरूपतया वेदबीजभूतप्रणवस्येत्युपक्रम्य वेदजातस्य सर्वस्य प्रकृतिः प्रणवः प्रणवस्य च प्रकृतिरकारः प्रणवविकारो वेदः स्वप्रकृतिभूते प्रणवे लीनः प्रणवोऽप्यकारविकारः स्वप्रकृतावकारे लीनः तस्य प्रणवप्रकृतिभूताकारस्य यः परः वाच्यः स एव महेश्वर इति सर्ववाचकजातप्रकृतिभूताकारवाच्यः सर्ववाच्यजातप्रकृतिभूतनारायणो यः स महेश्वर इत्यर्थ इत्युक्त्वा अकारो वै सर्वा वागिति चोपादाय वाचकजातस्याकारप्रकृतित्वं वाच्यजातस्य ब्रह्मप्रकृतित्वं च सुस्पष्टमित्युक्तं यथा श्रीमद्गीताभाष्ये अक्षराणामकारोऽस्मि अक्षराणां मध्ये अकारो वै सर्वा वागिति श्रुतिप्रसिद्धः सर्ववर्णानां प्रकृतिरकारोऽहमिति । तथा परिणामत्वं च शब्दस्योक्तं भाष्ये प्राकृतप्रलये स्रष्टुः प्रजापतेर्भूताद्यहङ्कारपरिणामशब्दस्य च विनष्टत्वादिति, तथा दीपेऽपि अव्याकृतपरिणामशब्दमयेषु वेदेष्वित्यादि, यथा यस्य वेदाः शरीरमित्यादिभिरपि द्रव्यत्वं सिद्धं द्रव्यस्यैव हि शरीरत्वं शरीरलक्षणसिद्धम् । आत्मसिद्धावपि दृश्यन्ते गुणा अपि शब्दगन्धसूर्यालोकरत्नप्रभादयो गतिमन्तो धर्म्यति-

वर्तिनश्च अतिसूक्ष्मो दूरगमनधर्मा भौतिको हि शब्दः स खलु शङ्खमुखादेर्दवीयसोऽपि दृशां नोदनविशेषेण लोष्टादिरिव यावद्वेगमभिप्रतिष्ठते स्पर्शरहितोऽपीत्यारभ्य शब्दस्य नभोगुणत्वप्रतिक्षेपो वायवीयत्वमुच्चारणानन्तरभावित्वं व्यञ्जकपक्षदूषणानि च विशदमुपपादितानीति एवं स्थिते वर्णानामुपादानत्वादिर्यथार्थ एवेति वा काल्पनिक इति वा दृष्टिविधिरिति वा औपचारिक इति वा निर्वाहः स्यात्, तत्र न प्रथमः वर्णनित्यत्ववादिनां मत उपादानोपादेयभावाभावात् नैयायिकमते त्वसमवायित्वाभ्युपगमात् सदनारम्भाच्च। भगवद्यामुनमुनिपक्षेऽपि वायोरेव वर्णोपादानत्वात् भाष्यकारैरप्यहङ्कारपरिणामत्वमात्राभिधानात् अव्याकृतपरिणामवचनवदारम्भपर्यायाभ्युपगमज्ञापकाभावात्, वचनेषु च वर्णानामनियतोपादानत्वोपादेयत्वदर्शनात् विरुद्धोपादानोपादेयभावदर्शनात् सिद्धे च विकल्पायोगात्, गोमयवृश्चिकादिनये च गौरवात् भेदादृष्टेश्च उपादानावच्छेदकतयोपादनत्वमिति चेन्न तथात्वेऽपि मृत्पिण्डगतपिण्डत्वादिवदनुपादानत्वं विशिष्टस्योपादानत्वेऽपि विशेषणानां विशिष्टत्वाभावेन तदभावात् रूपवत्त्वाभिधानं चात्यन्तदुःस्थं तेजःप्रभृतिष्वेव रूपोत्पत्तेः घटादिवच्चाक्षुषत्वप्रसङ्गात् स्पर्शवत्त्वादिप्रसङ्गाच्च सर्वत्रोपलभ्यमानस्य स्थानविशेषानुपपत्तेश्च। नापि द्वितीयः स हि सर्वस्य वा प्रपञ्चस्य वा वर्णानामेव वा नाद्यौ स्ववचनविरोधादिभिः शून्याद्वैतादिमतभङ्गात् नेतरः आगमिकत्वाविशेषेण प्रकृत्यादावपि प्रसङ्गात्, अनुपपत्तेश्च सर्वत्र सुहृत्वात् आगमिकस्योपपत्तिबाध्यत्वाभावात् तत्प्रामाण्यस्य च स्थितत्वात् अनुप-

लम्भस्य चायोग्ये बाधकत्वाभावात् अन्यथाऽतिप्रसङ्गाच्च। अस्तु तर्हि तृतीयः पक्षः तथा हि केषुचिद् ग्रन्थेषु प्रणवांशभूताकारोकारादिविकारत्वं वर्णानामुच्यते केषुचित् हृल्लेखांशभूतहकारादिविकारत्वं तथा च प्रक्रियान्तरेण श्रुतिः भूरित्येव ऋग्वेदादजायत भुव इति यजुर्वेदात् सुवरिति सामवेदात् तानि शुक्रियाण्यभ्यतपत् तेभ्योऽभितप्तेभ्यस्त्रयो वर्णा अजायन्त अकार उकारो मकार इति तानेकधा समभरत्तदेतदोमितीति। स्मृतिश्च।

अकारं चाप्युकारं च मकारं च प्रजापतिः।
वेदत्रयान्निरदुहद्भूर्भुवः स्वरितीति च॥

इति, तथा सर्वमन्त्राणां प्रणवबीजत्वं साधारणमुक्त्वा प्रतिमन्त्रबीजाक्षराणि च कल्पैरुच्यन्ते तथा प्रलये मन्त्रं संछाद्य रक्षतीति छन्दांसि च वर्ण्यन्ते तथा तत्तदक्षराणां सितरक्तपीतकृष्णादयो रूपविशेषाश्चाभिधीयन्त एकस्यैव वाक्षरस्य विनियोगभेदेन मन्त्रभेदेन रूपभेदः प्रकीर्त्यते एवं नियतानियतस्थानविशेषादयोऽपि। न च परमार्थतोरूपस्थानादिभेदो वर्णानां किंतु तादृशानुसंधानेनादृष्टविशेषो भवतीत्येतदेवाभिप्रेतं यन्त्रवृत्तान्तवत्, अन्यथा व्याकुलोपादानोपादेयभावरूपस्थानाद्युपदेशेन तेषामप्रामाण्यप्रसङ्गः, अतो दृष्टिविधानमेवात्रोचितमिति, अयमपि पक्षो वलक्षितः तथा हि ॐमित्येतदक्षरमुद्गीथमुपासीतेत्यादिवत् प्रणवं सर्वाक्षरोपादानमुपासीतेत्येवमादिरूपेण विधिर्न दृश्यते किंतु तत्त्वोपदेशवचनव्यक्तिः तथाऽपि दृष्टिविधित्वे ब्रह्मणो जगत्कारणत्वादावपि प्रसङ्गात् तत्त्वतर्कप्रतिपादकभाष्यकारवचसि च दृष्टिविधित्वं दूरापेतम् अकारावच्छिन्नाकारांशे वर्णोत्पत्तिरित्यादिकुशकाशावल-

त्वेन प्रकृतिविकृतिभाव इति चेत् तर्हि तद्विशिष्टस्य प्रकृतित्वं तस्मिन्नुपचरितं स्यात्, दृष्टिविधिश्च गतः अस्त्वेवमेवात्रेति चेत् तर्हि वाचकजातप्रकृतिभूताकारस्य वाच्यजातप्रकृतिभूतपरमात्मवाचकत्वाभिधानमयुक्तम् अतः प्रशंसापरतया तत्तत्कार्यशक्त्यादियोगेन वा प्रकृतिविकृतिभावरूपविशेषादिव्यपदेश औपचारिकः गुणत्रयादौ लोहितशुक्लकृष्णादिव्यपदेशवत् इत्येवं स्थिते पञ्चमः पक्ष उच्यते क्वचिद्याथार्थ्यं क्वचिद्भ्रान्तिः क्वचिद् दृष्टिविधिः क्वचिदुपचारश्चेति अबाधिते प्रथमः बाधिते निर्मूले च द्वितीयः ध्यानविधौ प्रायशस्तृतीयः बाधिते समूले संबन्धशालिनि चतुर्थ इति । नन्वेवमपि न कश्चित्सिद्धान्तः तथा हि शब्दो द्रव्यमद्रव्यं वा द्रव्यत्वे च किं कस्योपादानं रूपादिसंबन्धश्च कीदृशः, अद्रव्यत्वे तु कथमुपादानत्वरूपसंबन्धादिरिति अत्रोच्यते सयूथ्यमतभेदेन द्रव्यमद्रव्यं च शब्दः द्रव्यत्वपक्षेऽपि वायवीयोऽवायवीयश्चेति वायवीयत्वेऽपि दीपादिधर्मभूतप्रभावद्भेर्यादिधर्मभूतः प्रहारप्रकाश्य इत्येकः पक्षः व्यजनेन पवनत्प्रहारेण जातः प्रसरतीत्यपरः पक्षद्वये चायं स्पर्शरहितः स्पर्शरहितोऽपीति वचनात् वायवीयत्वेऽप्यनुपलम्भात्स्पर्शाभावः भेरीशब्द इत्यादिव्यवहारस्वारस्यात्प्रथमः पक्षः तरङ्गमारुतादिवत्तथाव्यवाहारोपपत्तावन्वयव्यतिरेकात्तदानीमेवोत्पत्तिरित्यपरः व्यञ्जकस्य कारकस्य वा वायोरागमनावश्यंभावात्तद्व्यङ्ग्यस्य तदुत्पाद्यस्य वा शब्दान्तरस्याभ्युपगमे गौरवात् वाय्वन्तरादृष्टव्यञ्जकत्वादिशक्तिकल्पनवच्छब्दत्वमेव श्राणत्वनिबन्धनं वायोरस्त्विति वायवीयत्वमिच्छतामभिमानः तत्र चोपादानादिवादादृष्टिविध्यादय एव, अवायवीयद्रव्यत्वे तु यथोपदेशं कल्पभेदेनाण्डभेदेन वोपादाना-

नियमः तत एव रूपस्थानाद्यनियमोऽपि, अनुपलम्भस्तु रूपादीनामयोग्यत्वात् अनुपलम्भबाधितांशे वा दृष्टिविधित्वादिस्वीकारः । अथाद्रव्यत्वपक्ष उच्यते तत्र तावत्सत्त्वरजस्तमसामद्रव्यत्वाय भाष्यकारोक्ता युक्तयः शब्दस्यापि समानाः अव्याकृताहङ्कारपरिणामव्यपदेशोऽप्यागन्तुकधर्मत्वाभिप्रायेण घटते आत्मसिद्ध्यादिवचनं परमतेनैकदेशिमतेन वा घटते भट्टपराशरपादैर्वाक्यनिपरूणे शब्दस्य गगनगुणत्वमेवाभिहितं गगनगुणशब्दादिस्वरूपस्थितीः प्रवर्तयता भगवतैव योग्यार्थैदमर्थ्येन वाक्यप्रवाहस्य पूर्वमेवोपात्तत्वादिति यस्य वेदाःशरीरमित्यादि तु देवताविशेषविषयत्वेनोपपन्नम् एवमेवोपादानरूपस्थानादिव्यवहारोऽपि, एवं तस्य प्रकृतिलीनस्येत्याद्युपपन्नं भवति तत्तद्देवतान्तरेषु तत्तदुपादानत्वादिव्यवहार उपचारदृष्टिविध्यादिना तत्प्रयोगानुकूलमुपपाद्यः अनियतोपादानत्वादिकं तु तत्त्वेष्वेवानियतोपादानत्ववदागमतदाभासयोः प्रामाण्याप्रामाण्याभ्यां निर्वाह्यम् आगमेषु न्यायतो नेयम् एतेनाकारहकारविवादो निरस्तः तत्र च न विरोध इत्येके तथा हि अकार एव पूर्वतया परतया वा स्थित्वा षोडशवर्णमुपलक्षयति स एवोपादानम् अत एव चाचां हलां च मध्ये ह्यात्मकस्य तस्य पाठः अनुभवसिद्धं च प्रथमषोडशयोर्विपर्यस्तसंहितायां हत्वम् यथैकारादीनां यत्वादिकमिति उक्तं चैतल्लक्ष्मीतन्त्रे अत एव अ इति ब्रह्मेति षोडशकशिरस्क एवाकार आम्नायते । अन्ये त्वेवं मन्यन्ते न तावत्प्रणवे तस्य श्रवणमस्ति नाप्यकारो वै सर्वा वागित्याम्नातं नाप्योकारादेशः सविभक्तिकतया घटते विष्णुरेव सर्वकारणमिति प्रमाणनिर्णीतं तस्य प्रथम एव वाचकतया प्रसिद्धः यद्यपि क्ष-

चित् प्रमाणभूते तन्त्रे हकारपरिग्रहोऽप्यस्ति तथापि तस्य परमात्माक्षरत्वमभ्युपगम्येति मन्तव्यम् । प्रणवात्सर्वोत्पत्तिप्रकारस्तदंशद्वारेति श्रुत्यादिभिरनुसंधेयः । तत्र त्रिवेदीप्रसङ्गे मकारपर्यन्तनिरूपणमथर्वादिविवक्षायां तु नादशिरस्त्वं तदेवमकारगार्हपत्यगायत्रीप्रथमपाद ऋग्वेदस्वर्लोकादिप्रकारेणावान्तरगर्भभेदोऽनुसंधेयः अकारात्प्रणवोत्पत्तिः कथमिति चेत् अकारवाच्यात्परमात्मनः प्रणवाधिष्ठातृदेवताया वा तदंशदेवतादीनां वोत्पत्तेरिति सुस्थम् । तदेवमद्रव्यत्वपक्ष एव शब्दस्य श्लाघ्यः, एवं च सति श्रोत्रवृत्तिर्वा व्यञ्जकवाय्वागमनं वा शब्दवद्वेर्याद्यवयवागमनं वा शब्दवद्वाय्वागमनमेव वा यथाप्रतीति भाव्यमिति ॥

अस्मदादिस्पर्शनेन्द्रियग्राह्यविजातीयव्यावृत्ताद्रव्यं स्पर्शः स त्रिविधः शीतोष्णानुभयात्मकभेदात्, अप्सु शीतः तेजस्युष्णः क्षितिपवनयोरनुष्णाशीतः भूतान्तरसंसर्गात्सर्वत्र स्पर्शसंकरावभासः न तत्त्वतः तथा ऽन्वयव्यतिरेकात्, एवं क्वचित्स्पर्शानवभासोऽपि तत एव च त्वचा रत्नालोकाद्यग्रहणं तदुक्तमन्वयाधिकरणे भेदाभेदविरोधनिदर्शने विवरणकारैः यथाशीतं न कदाचिदप्युष्णं वाय्वौष्ण्यं तु तत्स्थाग्नेः न तु तत्त्वाकारात्, पाकजो हि गुणः पाकादपैतीति हि तत्त्वविदः वह्निरूपानुपलम्भस्तुल्यरूपाभिभवात् तत्स्पर्शोपलम्भस्त्वन्यस्पर्शानभिभवादित्युपलब्धिव्यवस्थाप्यमिति अनुष्णाशीतोऽपि स्पर्श एव न तु शीतोष्णविरहमात्रम् आकाशादावपि तथोपलम्भप्रसङ्गात् वायुपृथिव्योः स्पर्शवत्त्वस्य श्रुत्यादिसिद्धत्वाच्च न च सामान्यं तदिति वाच्यं निर्विशेषसा-

मान्याभावात्, अनुपलब्धशीतोष्णविशेषं तदेवेत्यपि न वाच्यम् अत्यन्तानुपलब्धस्य विशेषस्य कल्पकाभावात् आगमाभावाच्च । केचित् तु सजातीयवृद्धिहेतुत्वस्य सामान्यतोदर्शनात् शीतस्य वातवृद्धिहेतुत्वाद्वातो ऽपि शीत इति वर्णयन्ति तदसत् रसादिसाम्ये प्रभावादिवैषम्यवदत्रापि स्वभाववैचित्र्योपपत्तेर्विपक्षे बाधकाभावात्, न च वायोः शैत्यानुपलम्भप्रसङ्गो बाधकः हिमाद्यनुपहिततदशायामातपाद्युपहितदशायां च प्रसङ्गस्येष्टत्वात् हिमाद्युपहितदशायां तु शीतोपलम्भस्यौपाधिकतयाऽन्यथासिद्धत्वात् अन्यथा उष्णानुपलम्भप्रसङ्गादुष्णस्य कल्प्यत्वात् । किं तत्रानुग्राह्यमिति चेत् उष्णारम्भकत्वं न ह्यनुष्णमुष्णद्रव्योपादानमस्ति उष्णस्य च तेजसो वायुरुपादानमिति तदेवमनुष्णाशीतो वायुः पृथिवी च, स्पर्शः पुनर्द्विधा पाकजोऽपाकजश्चेति पृथिव्यां पूर्वः, उत्तरेषु त्रिषु परः तत्रामृतगरलकपिकच्छुतूलोपलगोब्राह्मणचण्डालादिस्पर्शविशेषा अपाकजभेदाः, अनुष्णाशीतस्पर्शवत्त्वमात्रेण प्रथममप्स्यः पृथिव्युत्पत्तिः परस्तात्पाकभेदाद्भेदोऽन्वयव्यतिरेकादिसिद्धः, मृदुकठिनभावादयोऽपि स्पर्शविशेषा एव स्पर्शनेनैव तदुपलब्धेः चक्षुषा तु तदविनाभूतरूपादिग्रहणद्वारा स्पर्शमात्रस्यैव तेषामपि यथायथमनुमानमेव करकादिकाठिन्यं पृथिवीयोगात् मृदुपचनादिव्यवहारो वेगमान्द्यादिना । केचित्तु तेषां संयोगविशेषत्वमातिष्ठन्ते गोब्राह्मणचण्डालादिषु कथं स्पर्शभेद इति चेत् तदधीनशुद्ध्यशुद्ध्यादिभेदात् जातिभेदादेव तदुपपत्तिरिति चेत् जातिभेद एव कुतः, मातापितृसंबन्धप्रकारभेदादिति चेन्न मानसब्राह्मणादिषु तदभावात् । यद्वा धर्माधर्मतारतम्याधीनसत्त्वरजस्तारतम्याच्छक्तितारतम्याद्वा शुद्ध्यादिसि-

द्धिरिति न स्पर्शभेदास्ते अपाकजस्पर्शेषु तु तारतम्यं संसर्गादिभेदात् पवनसलिलयोरपि पाकजस्पर्शः किं न स्यादिति चेत् औष्ण्यशान्तौ स्पर्शान्तरस्य पाकजस्य पृथिवीवदननुवृत्तेः औष्ण्यमेव हि तर्हि पाकजं तत्र स्यादिति चेन्न वायुशैत्यवदौपचारिककत्वोपपत्तेरिति एवं पृथिव्यामपि शीतोष्णस्पर्शोपलम्भ औपाधिकः उपाधिसन्निधिमन्तरेण कदाचिदप्यनुपलम्भात् पाकजत्वे तु पश्चादपि रूपादिवदनुवृत्तिः स्यात् निर्मृष्टेऽपि सलिले निर्वाणेपि शिखिनि पार्थिवेषु शीतोष्णस्पर्शावुपलभ्येते इति चेत् सूक्ष्मसंश्रयणात्क्षणान्तरे तु तावतोऽपि निवृत्तेरिति ॥

असमदादिचक्षुरिन्द्रियैकग्राह्यविजातीयव्यावृत्तमद्रव्यं रूपम्, तच्च सितरक्तकृष्णपीतभेदं सितादिप्रतिपत्तिव्यवहारास्तल्लक्षणानि, तत्र सलिलकलधौतशङ्खशुक्तिशशाङ्कादीनां रूपविशेषाः सितभेदाः, हुतवहजपादाडिमबन्धुजीवविद्रुमपद्मरागादीनां रक्तभेदाः, काञ्चनारहरितालहरिद्रादीनां पीतभेदाः, मरकतमधुकरजलधरतिमिरतमालदूर्वादीनां कृष्णभेदाः, पीतरूपमपि रक्तावान्तरभेदं केचिदिच्छन्ति रोहितशुक्लकृष्णानामेव तेजोऽबन्नेषु श्रवणात् प्रकारान्तरेण रूपं द्विधा भास्वरमभास्वरं चेति तेजोगतं भास्वरं क्षितिसलिलगतमभास्वरं, तेजसि रूपं रक्तभास्वरं सलिले तु शुक्लभास्वरम् । पृथिव्यां बहुविधमभास्वम् अत्रापि संसर्गादनियतभासादिचित्रं नाम पञ्चमं रूपमिति वैशेषिकादयः तदसत् एषामेवैकसंघातवर्तिनां समुदायविशेषतस्तत्प्रतीतिव्यवहारयोरुपपत्तेः नानावर्णचूर्णपु ञ्जरञ्जितस्थलादिविलक्षणप्रतीत्यभावात् अवयविरूपारम्भकतयाभवद्भिस्तेषामेवाभ्युपगतत्वात् अवयव्यभ्युपगमेऽपि

नानारूपाश्रयत्वस्य प्रतीतिव्यवस्थाप्यत्वात् संयोगतदभावादिवद्भागभेदस्योपलभ्यमानस्य नियामकत्वात् व्याप्यवृत्तिरूपान्तरजातीयरूपारम्भकतया बाधे तु गुणत्वादिमात्रेण संयोगादावपि प्रसज्यते, एवमेव चित्ररसगन्धानामपि निर्वाहः ।

अस्मदादिजिह्वैकग्राह्यविसजातीयेतरोरसः, स षोढा मधुराम्ललवणतिक्तोष्णकषायभेदात्, एषां लक्षणं पूर्ववत् तत्रेक्षुक्षीरगुडादिरसा मधुरभेदाः चूतचिञ्चामलकादिरसा अम्लभेदाः, सैन्धवलवणाविकारादिरसा,लवणभेदाः । किंपाकनिम्बादिरसास्तिक्तभेदाः, शुण्ठीमरीचिसर्षपादिरसा उष्णभेदाः, हरीतकीविभीतकचूताङ्कुरादिरसाः कषायभेदाः, तिक्तावान्तरभेद एवोष्णादिरिति केषाञ्चित्प्रतिभासः आयुर्वेदतश्चैते विशदमनुसंधेयाः ।

अस्मदादिघ्राणग्राह्यविसजातीयेतरोगन्धः, स च द्विविधिः सुरभिरसुरभिश्चेति तयोरपि लक्षणादिकं पूर्ववत् पटीरमृगमदघुसृणचम्पकादिगन्धाः सुरभिभेदाः, पूतिविस्रादिगन्धा असुरभिभेदाः, अयं च गन्धः पृथिव्येकवृत्तिः अयो दहतीतिवत् सलिलपवनादिषु चम्पकपाटलादिसंसर्गात्तदुपलम्भः तत्तत्संसर्गाधीनत्वस्यान्वयव्यतिरेकसिद्धत्वात् स्यादेतत् पञ्चीकरणादेव पञ्चभूतेषु स्पर्शादिसङ्करः प्रागेव सिद्धः ततश्चेदानीं व्यञ्जकविशेषवशात् क्वचित् क्वचिद्गुणोव्यक्तरूप उपलभ्यतां मृगजलादिवदिति चेत् अस्त्वेवं-किमेतावता भूतान्तरेषु गुणानां स्वाधारसंसर्गमन्तरेण वृत्तिरुपपादिता संसर्गस्तु प्राक्तन इदानीन्तनो वेति विचार्यम्, तत्र यथायथं द्वयमपि पूर्वस्यागमसिद्धत्वात् पाटलादिसंसर्गस्य चेदानीमध्यक्षसिद्धत्वात् । अथौपनिषदानां

पाकजगुणप्रक्रिया उत्पत्तिदशायां कृष्णरूपा पृथिवी यत्कृ-
ष्णं तदन्नस्येति श्रुतिस्वारस्यात् भाष्यकारैश्चाकाशनैल्यस्य
पञ्चीकरणलभ्यपृथिव्यंशनिबन्धनत्वाभिधानात् पञ्चीक-
रणात् प्राक् च पाकजत्वायोगात्, प्रथममेव विशेषयोगिनी
कथं सा जातेति चेत् सलिलदहनरूपस्पर्शविशेषावालोक्य
संतोष्टव्यम्, अस्त्वेवं प्रथमं कृष्णा पृथिवी स्पर्शरसगन्धास्त-
दानीं तत्र किंप्रकाराः उच्यते स्पर्शस्तावच्छायाविवानु-
ष्णाशीतमात्रः तद्वदेवापाकजश्च विषामृतदुःस्पर्शादिस्प-
र्शविशेषा एव पाकाधीनाः अनुष्णाशीतमात्रं हि सर्वेष्वपि
पार्थिवेषूपलभ्यते अतस्तावन्मात्रस्य स्वाभाविकत्वमुचितं
रसोऽपि मधुर एव प्राथमिकः विशेषादर्शने कारण-
भूतजलगतमाधुर्यानुविधानस्योचितत्वात् स्पर्शवदस्यापि
प्राचुर्योपलम्भात् महापृथिवी सर्वा प्रायशो मधुरैव ह्युप-
लभ्यते, आम्ललवणादयः काचित्का रसविशेषाः पाका-
धीनाः, तथा मधुरविशेषा अपि अन्वयव्यतिरेकाविशेषात्
गन्धोऽपि सुरभिरेव प्राथमिकः अस्यैव महापृथिव्यां पूर्व-
वत्प्राचुर्यात् पूतिविस्रप्रभृतयः सुरभिविशेषाश्च पूर्ववत्पा-
काधीनाः एवमनुष्णाशीतकृष्णमधुरसुरभिस्वभावा प्रथमं
पृथिव्युत्पन्ना अतः पाकभेदेनानुष्णाशीतस्यैव भेदैर्दुष्परि-
मर्शादिस्पर्शैः कृष्णभेदैश्च मरकतहरिततमालकुवलयादि-
रूपैः अकृष्णैश्च सितरक्तादिभिः मधुरभेदैश्चेक्षुक्षीरगुडा-
दिरसैः, अमधुरैश्चाम्ललवणादिभिः सुरभिभेदैश्च चम्पकमृ-
गमदादिगन्धैः, असुरभिभिश्च पूतिविस्रादिभिः संबध्यते
अस्यां च गन्धरसरूपस्पर्शशब्दाः क्वचित्सहैवोत्पद्यन्ते स-
हैव च विनश्यन्ति क्वचिच्चान्यतमानुवृत्तिरन्यतमनिवृत्तिश्च
यथोपलम्भं पाकवैषम्यस्याङ्गीकर्तव्यत्वात्, अत्र चैकेना-
ग्निसंयोगेन पूर्वसमुदायनिवृत्तिः अन्येनोत्तरसमुदायोत्प-

त्तिरित्येके एकेनैव पूर्वनिवृत्तिरुत्तरोत्पत्तिरपीति वयं वदामः यथैकयैव सामग्र्योत्पत्स्यमानप्रागभावमात्रभेदभिन्नयाऽनेककार्योत्पत्तिर्निर्व्यूढा तद्वत्प्रध्वंसमानतत्तत्स्वरूपसहकारिभेदभिन्नयाऽनेकप्रध्वंसोऽप्युपपन्नः उभयविधप्रागभावादिभेदभिन्नया च तथैव पूर्वसमुदायनिवृत्तिरुत्तरसमुदायोत्पत्तिश्चोपपन्ना निवृत्तेश्चोत्तररूपमात्रतयाऽस्माभिरभ्युपगमात् परमार्थतो न कार्यद्वैविध्यमस्ति प्रतियोगिभेदभेदतो व्यपदेशभेद एव केवलम् ॥

यत्तु प्राक् निरासप्रसङ्गेन भट्टपराशरपादैरुक्तं न खलु पूर्वरूपविनाशिकैव व्यक्तिरुत्तरोत्पादिका पाकलक्षणाग्निसंयोगानां भिन्नत्वादिति तत्परमतानुसारेणेति मन्यामहे एकस्यैवानेककार्यहेतुत्वोपपादनादिति पाकावान्तरभेदाच्च गन्धाद्यवान्तरभेदसिद्धिः, पाके च पीलुपिठरपाकभेदाद्विप्रतिपद्यन्ते तत्र नोभयमप्यस्माकं परमाण्ववयविनोरभावात्, अतः संहितावस्थायां पाकोविभक्तावस्थायां वेति चिन्ता परिशिष्यते तत्र यथा संभवमुभयमपि, प्रथमं तावद् घटादीनामशिथिलानामेव पाकभेदेन रूपभेदोपलम्भात् उपलम्भस्तावद्वैशेषिकाराणामपि समः किं त्ववयविरूपादीनां यावदाधारभावित्वनियमाभ्युपगमादवयवविशेषगुणैरवयविविशेषगुणारम्भनियमाभ्युपगमाच्च पूर्वावयविनः परमाणुपर्यन्तो नाशः द्व्यणुकादिक्रमेण पुनरन्यस्यादृष्टवशादारम्भइति कल्पितं, द्वितीयमपि दहनसन्निकर्षमात्रेण विलयविशरणादीनामेव मधूच्छिष्टानां पाक उपलम्भादिति एतेनैकदेशपाकोऽप्युपपन्न इत्युक्तं भवति ।

संयुक्तप्रत्ययनिमित्तं संयोगः स च स्वरूपमात्रस्वरूपोनैरन्तर्यमात्रस्वरूपो वेति. केचित् तत्र न स्वरूपमात्रं

स्वरूपयोः सतोरेव पूर्वोत्तरकालयोः संयुक्तप्रत्ययाभावात्, नापि द्वितीयः भावान्तराभाववादिनं प्रत्यविवादादेव सोऽपि ह्यासन्नदेशसंयोग एव ह्यस्मन्मते स्यात् देशेनापि नैरन्तर्यमेव स्यादिति चेन्न तत्राप्युक्तविकल्पानतिक्रमात्, तत्रापि हि स्वरूपातिरिक्तस्य नैरन्तर्यस्य भिन्नदेशविशेषसंयोगाभावरूपतया सिद्ध एव संयोगः अस्य च स्वाभावसादेश्यमुपलभ्यमानमंशभेदप्रयुक्ततया न विरोधावहं निरवयवेष्वपि संयोगहेतुरौपाधिकोंऽशः न चोपाधावप्येवमित्यनवस्था ज्ञप्तावुपाधिसंश्लेषमात्रातिरिक्तानपेक्षणात्, 'उत्पत्तावन्येनावच्छेदेऽपि वीजाङ्कुरानवस्थावद्दोषात्। यद्वा निरवयवेष्वभिदुरतया पृथङ्निर्देशायोग्यत्वात् स्वाभाविकांशभेदो भवतु न चैवं सत्येकत्वानेकत्वमवयवित्वं संघातत्वं वा प्रसज्यत इति वाच्यं तादृशस्यांशस्य भेदव्यपदेशहेतुत्वाभावात् एतावदेकानेकत्वं प्रमाणबलाद्दुरपह्नवमभ्युपगतं वा भवतु। यद्वा यन्निरवयवं तन्नैयायिकाद्यभिमतजातिवत्सर्वत्र संयोगिनि संपूर्णं वर्तताम्, तदेतत्सूत्रकारैरेवाशङ्क्य परिहृतं कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वेत्यादिना, तत्र च दीपः* सकलेतरविसजातीयंश्रुत्येकसमधिगम्यं सर्वशक्तियुक्तं ब्रह्म निरवयवमपि कार्यं च भवत्यनन्तं च भवतीति परिमितशक्ति वस्तु चोद्यं न तत्र प्रसज्यते यथा जातिवादिनो जातिरेवामूर्ता खण्डमुण्डादिष्वत्यन्तविलक्षणेष्वनन्तेष्वपि परिसमाप्यैववर्तते न तत्रेतरवस्तुचोद्यमिति जगत्कारणत्वं सम्भवतीति तत्रैवाधिकरणे स्वपक्षदोषाच्चेति सूत्रे प्रधानादिकारणपक्षे दोषाच्च ब्रह्मैव कारणं तत्रैव लौकिकवस्तु-

* अयं च श्रीदश्रीभाष्याचार्यप्रणीतः संक्षिप्तो ब्रह्मसूत्रार्थनिरूपणपरो ग्रन्थः।

षविशेषादर्शनादयस्तदपेक्षात् तत्सहितादित्यर्थः । तथा सहकारिविलम्बादेव नात्यन्तसंशय इति भावः ॥ ६ ॥

प्रयोजनादिपरीक्षायां संशयापेक्षामाह ।

यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्गः(१) ॥ ७ ॥

एवमेवं च । प्रयोजनादिषु मध्ये यत्र संशयस्तत्र उत्तरोत्तरप्रसङ्ग उत्तरं प्रत्युत्तरं तत्प्रसङ्गः । उक्तिप्रत्युक्तिरूपपरीक्षा कर्तव्येत्यर्थः । यद्वा एवं पूर्वपक्षोत्तरोपन्यासरीत्या उत्तरोत्तरेषु प्रसङ्गः । परीक्षा कर्तव्येति शेषः । तत् किं प्रयोजनादिकं सर्वं परीक्षणीयमित्यत आह । यत्रेति । एतस्य संशयपरीक्षानङ्गत्वे ऽपि प्रसङ्गतः संशयपरीक्षाधीनतया संशयपरीक्षाप्रकरणे कथनम् ॥ ७ ॥

समाप्तं संशयपरीक्षाप्रकरणम् ॥

संशयपरीक्षा साधारणधर्मदर्शनादिजन्यत्वेन संशयव्यवस्थापनम् ॥

अवसरसङ्गत्या प्रमाणप्रामाण्यं परीक्षयितुं तदङ्गसंशयार्थं पूर्वपक्षयति ।

प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः(२) ॥ ८ ॥

त्रैकाल्यासिद्धेः प्रमायाः पूर्वं समकालमुत्तरकालं वा असिद्धेः प्रमाणत्वेन निर्णयस्य वक्तुमशक्यत्वात् प्रत्यक्षादीनां न प्रामाण्यमित्यर्थः ॥ ८ ॥

त्रैकाल्यासिद्धिं क्रमेण विवृणोति ।

---

(१) यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्गः । कोऽस्य सूत्रस्यार्थ इति वार्त्तिकम् ।

(२) तत्र पूर्वपक्षसूत्रम् । प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेरिति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

पूर्वं हि प्रमाणसिद्धौ नेन्द्रियार्थसन्निकर्षात् प्रत्यक्षसिद्धिः[१] ॥ ९ ॥

प्रमाणसामान्यपरीक्षाया उपक्रान्तत्वात् प्रमाणसिद्धावित्यत्र सामान्यतः प्रमाणशब्दोपन्यासाच्चेन्द्रियार्थसन्निकर्षशब्देन तदादिप्रमाणसामान्यस्य प्रत्यक्षसिद्धिरित्यत्र प्रत्यक्षपदेन प्रमासामान्यस्य प्राप्तिः। पूर्वं प्रमायाः पूर्वं प्रमाणत्वं प्रमाकरणत्वम्। तथा च प्रमाकरणत्वस्य प्रमाघटितमूर्त्तिकत्वेन प्रमाग्रहं विना न तज्ज्ञानं तद्ग्रहश्च प्रमां विना नेति पूर्वमेव प्रमा सिद्धेति कथं प्रमाणाधीना प्रमोत्पत्तिरिति। इदं च प्रमाणत्वेन निर्णयदशायामेव प्रमोत्पादकत्वमितिभ्रमेण। एवमुत्तरत्रापि ॥ ९ ॥

पश्चात् सिद्धौ न प्रमाणेभ्यः प्रमेयसिद्धिः[२] ॥ १० ॥

पश्चात् प्रमोत्पत्त्यनन्तरं प्रमाणनिश्चये प्रमाणेभ्यो न प्रमेयसिद्धिः। प्रमेयस्य प्रमाविषयस्य सिद्धिः प्रमेत्यर्थः। प्रमायाः पूर्वमेव सिद्धत्वादिति भावः। यद्यपि प्रमेत्यनुक्त्वा प्रमेयसिद्धिरिति यदुक्तं तच्छिरोवेष्टनेन नासिकास्पर्शमनुधावतीतिन्यायेनायुक्तं तथापि प्रमायाः प्रमाणानधीनत्वे प्रमैवासिद्धेति प्रमेयत्वेनाभिमतस्य विश्वस्यालीकत्वमापद्येतेति भावः ॥ १० ॥

युगपत्सिद्धौ प्रत्यर्थनियतत्वात् क्रमवृत्तित्वाभावो बुद्धीनाम्[३] ॥ ११ ॥

---

(१) प्रत्यक्षोत्पत्तिरित्यन्यत्र सूत्रपाठः। पूर्वं हि प्रमाणसिद्धाविति सूत्रमिति वार्त्तिकम्।

(२) पश्चात् सिद्धाविति सूत्रमिति वार्त्तिकम्।

(३) युगपत्सिद्धाविति सूत्रमिति वार्त्तिकम्।

युगपत्सिद्धौ प्रमासमकालं प्रमाणनिर्णये प्रत्यर्थनियतत्वात् प्रतिकारणनियमेन प्रत्यक्षानुमित्यादिविजातीयप्रमाद्वयसामग्रीनियमेन बुद्धीनां प्रत्यक्षानुमित्यादिविजातीयज्ञानानां क्रमवृत्तित्वाभावो युगपदुत्पादप्रसङ्गः । तथाहि प्रत्यक्षप्रमाणं चक्षुरादि तस्य हि ज्ञानमनुमितिरूपं तेषामतीन्द्रियत्वात् तज्जन्यज्ञानं हि प्रत्यक्षमिति तयोर्युगपदुत्पादप्रसङ्गः । तथा शब्दस्य हि ज्ञानं श्रावणप्रत्यक्षरूपं तज्जन्यं हि ज्ञानं शाब्दमिति तयोर्युगपदुत्पादप्रसङ्गः । एवमनुमानस्य धूमादेर्ज्ञानं प्रत्यक्षरूपं तस्यानुमितेश्च युगपदुत्पादप्रसङ्गः । एवमुपमानस्य सादृश्यस्य ज्ञानं प्रत्यक्षादिरूपं तस्योपमितेश्च युगपदुत्पादप्रसङ्गः । न च प्रमाणप्रमेययोरेकं ज्ञानं जातिसङ्करप्रसङ्गात् । यद्वा प्रत्यर्थनियतत्वात् कारणनियमितत्वाद् बुद्धीनां यत् क्रमवृत्तित्वं युगपदनुत्पादस्तन्न स्यादिति । निरुक्तयौगपद्यप्रसङ्गेन न प्रमाणप्रमेययोः समकालसिद्धिसम्भव इति । अथवा प्रमोत्पत्तिसमकालं प्रमाणत्वेन निर्णये विशेषणज्ञानविधया प्रमाज्ञानापेक्षायां प्रमापि पूर्वं सिद्धेति प्रत्यर्थनियतत्वात् प्रमाणाधीनत्वाद् बुद्धीनां प्रमाणां यत् क्रमवृत्तित्वं प्रमाणानन्तरोत्पत्तिकत्वं तन्न स्यादिति । त्रिसूत्र्या प्रमाणानधीनत्वमेव प्रमाणां प्रसञ्जितम् । केचित्तु त्रैकाल्यं कालत्रयवृत्तित्वं प्रमाणानां तस्मिन् सत्यसिद्धा प्रमाणाधीनप्रमोत्पत्त्यसम्भवेन प्रत्यक्षादीनां न प्रामाण्यमिति पूर्वपक्षसूत्रार्थः । त्रैकाल्यासिद्धिं क्रमेण त्रिसूत्र्या दर्शयति । पूर्वं हीत्यादि । प्रमाणसिद्धौ प्रमाणसत्त्वे प्रमाविशिष्टस्य प्रमाकरणस्येन्द्रियादेः सत्त्वं इति यावत् । प्रमाविशिष्टस्यैव प्रमाकरणत्वमित्यभिमानः । तथोत्तरत्रापि । पश्चात् सिद्धाविति । प्रमोत्पत्त्यनन्तरमेव प्रमाणसत्त्व इत्यर्थः ।

युगपत्सिद्धाविति । युगपदेव सत्त्वे प्रत्यर्थनियतत्वात् प्रमाणनियम्यतया यत् क्रमवृत्तित्वं तद् बुद्धीनां न स्यात् प्रमाणाधीनत्वं प्रमाया न स्यात् प्रमाणस्य पूर्वमसत्त्वादिति भावः । यत्तु युगपत्सिद्धौ युगपत्सत्त्व इत्यर्थकत्वे पूर्वकालीनप्रमाणस्य प्रमाकाले ऽपि सम्भवाद् युगपदुत्पत्तावित्यर्थो वाच्य इति । तत्र मनःश्रवणयोरजन्यत्वाच्चक्षुरादेश्च पूर्वसिद्धत्वेनावधारणादनुमानाद्यभिप्रायेण सूत्रमिदम् । इत्थं च बुद्धीनामनुमानानुमित्यादीनां प्रत्यर्थनियतत्वादर्थविशेषविषयत्वनियमाद् यत् क्रमवृत्तित्वं तन्न स्यात् । अनुमानं लिङ्गविषयकं प्रत्यक्षरूपमनुमितिश्च साध्यविषयिका परोक्षरूपा अनयोर्न यौगपद्यम् । एवं पदज्ञानं शब्दविषयकं श्रावणप्रत्यक्षरूपं शाब्दश्च पदार्थविषयकस्तद्विजातीय इत्यनयोरपि न यौगपद्यं सम्भवति कार्यकारणभावबलात् क्रमिकत्वेनैव सिद्धेरिति तच्चिन्त्यमित्याहुः ॥ ११ ॥

प्रत्यक्षादिकं प्रमाणं न वेति विप्रतिपत्तौ निषेधसाधको हेतुः प्रमापूर्वं प्रमाणत्वेनानिर्णीतत्वं प्रमापूर्वं प्रमावैशिष्ट्याभावो वेति पर्यवसितं तादृशहेतोरप्रयोजकत्वं प्रदर्शयन् सिद्धान्तयति ।

त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिः(१) ॥ १२ ॥

त्रैकाल्यासिद्धेर्हेतोः प्रतिषेधसिद्धिर्न भवतीत्यर्थः । प्रतिषेधः प्रत्यक्षादीनामप्रामाण्यम् । तथा हि त्रैकाल्यासिद्धिर्न स्वरूपसती प्रतिषेधज्ञापिका तथा सति प्रतिषेध-

(१) अथासम्भवो ज्ञाप्यत इति प्रमाणलक्षणप्राप्तस्तर्हि प्रतिषेधः एवं त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिरिति । अयमपि प्रतिषेधस्त्रिष्वपि कालेषु नोपपन्न इत्ययं सूत्रार्थ इत्येतत्सूत्रव्याख्याने वार्त्तिकम् । सिद्धान्तसूत्रम् । त्रैकाल्यासिद्धेरित्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

ज्ञानस्य सार्वदिकत्वापत्तेः किं तु तज्ज्ञानमेव निषेधसाधकं वक्तव्यं तज्ज्ञानस्य भवदुक्तयुक्त्या त्रैकाल्यासिद्ध्या निषेधसाधकत्वं न स्यादित्यप्रयोजकत्वं तस्या भवतापि वक्तव्यमिति भावः ॥ १२ ॥

(१) त्रैकाल्यासिद्धेः प्रतिषेधसाधकत्वमनुमानविधयैव वक्तव्यमित्यायातमनुमानप्रामाण्यं तत्प्रामाण्यानुरोधेन । त्रैकाल्यासिद्धेरप्रतिषेधकत्वे प्रत्यक्षादीनामपि न प्रामाण्यप्रतिषेध इत्याह ।

तत्प्रामाण्ये वा न सर्वप्रमाणविप्रतिषेधः[२] ॥ १३ ॥

ननु त्रैकाल्यासिद्धेः प्रतिषेधानुमापकत्वं मया नोच्यते किं तु त्रैकाल्यासिद्धिसम्भावनयैव प्रतिषेधसम्भवेन प्रतिषेध्यप्रतिषेधयोर्न वास्तविकत्वं सर्वत्र व्यवहारोऽपि सम्भावनादेव विश्वस्य शून्यत्वेऽपि भानाङ्गीकारात् प्रमाणप्रमेयभावोऽपि त्रैकाल्यासिद्ध्या वास्तविको न भवितुमर्हतीति सोऽपि सम्भावित एवेत्यत आह ।

त्रैकाल्याप्रतिषेधश्च शब्दादातोद्यसिद्धिवत् तत्सिद्धेः[३] ॥ १४ ॥

अत्र चकारान्तः टीकाकारसम्मतः पाठः । तत्त्वालोके

(१) अत्र सर्वप्रमाणप्रतिषेधाच्च प्रतिषेधानुपपत्तिरित्येकमधिकं सूत्रं न्यायसूचीनिबन्धे । न्यायतत्त्वालोके विश्वनाथकृतवृत्तौ च व्याख्यानं दृश्यते न तु सूत्रत्वेनोल्लेखः । एतद्वन्यकृता तु न व्याख्यातम् ।

(२) तत्प्रामाण्ये वा न सर्वप्रमाणविप्रतिषेध इति सूत्रमिति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः । आदर्शपुस्तके तु न सर्वप्रतिषेध इति पाठः ।

(३) त्रैकाल्याप्रतिषेधश्च शब्दादातोद्यसिद्धिवदिति सूत्रमिति वार्त्तिकम् । तत्सिद्धेरित्यादर्शपुस्तके पाठः ।

युगपत्सिद्धाविति । युगपदेव सत्त्वे प्रत्यर्थनियतत्वात् प्रमाणनियम्यतया यत् क्रमवृत्तित्वं तद् बुद्धीनां न स्यात् प्रमाणाधीनत्वं प्रमाया न स्यात् प्रमाणस्य पूर्वमसत्त्वादिति भावः । यत्तु युगपत्सिद्धौ युगपत्सत्त्व इत्यर्थकत्वे पूर्वकालीनप्रमाणस्य प्रमाकाले ऽपि सम्भवाद् युगपदुत्पत्ताविल्यर्थो वाच्य इति । तत्र मनःश्रवणयोरजन्यत्वाच्चक्षुरादेश्च पूर्वसिद्धत्वेनावधारणादनुमानाद्यभिप्रायेण सूत्रमिदम् । इत्थं च बुद्धीनामनुमानानुमित्यादीनां प्रत्यर्थनियतत्वादर्थविशेषविषयत्वनियमाद् यत् क्रमवृत्तित्वं तन्न स्यात् । अनुमानं लिङ्गविषयकं प्रत्यक्षरूपमनुमितिश्च साध्यविषयिका परोक्षरूपा अनयोर्न यौगपद्यम् । एवं पदज्ञानं शब्दविषयकं श्रावणप्रत्यक्षरूपं शाब्दश्च पदार्थविषयकस्तद्विजातीय इत्यनयोरपि न यौगपद्यं सम्भवति कार्यकारणभावबलात् क्रमिकत्वेनैव सिद्धेरिति तच्चिन्त्यमित्याहुः ॥ ११ ॥

प्रत्यक्षादिकं प्रमाणं न वेति विप्रतिपत्तौ निषेधसाधको हेतुः प्रमापूर्वं प्रमाणत्वेनानिर्णीतत्वं प्रमापूर्वं प्रमावैशिष्ट्याभावो वेति पर्यवसितं तादृशहेतोरप्रयोजकत्वं प्रदर्शयन् सिद्धान्तयति ।

त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिः(१) ॥ १२ ॥

त्रैकाल्यासिद्धेर्हेतोः प्रतिषेधसिद्धिर्न भवतीत्यर्थः । प्रतिषेधः प्रत्यक्षादीनामप्रामाण्यम् । तथा हि त्रैकाल्यासिद्धिर्न स्वरूपसती प्रतिषेधज्ञापिका तथा सति प्रतिषेध-

(१) अथासम्भवो ज्ञाप्यत इति प्रमाणलक्षणप्राप्तस्तर्हि प्रतिषेधः एवं त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिरिति । अयमपि प्रतिषेधस्त्रिष्वपि कालेषु नोपपन्न इत्ययं सूत्रार्थ इत्येतत्सूत्रव्याख्याने वार्त्तिकम् । सिद्धान्तसूत्रम् । त्रैकाल्यासिद्धेरित्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

ज्ञानस्य सार्वदिकत्वापत्तेः किं तु तज्ज्ञानमेव निषेधसाधकं वक्तव्यं तज्ज्ञानस्य भवदुक्तयुक्त्या त्रैकाल्यासिद्धा निषेधसाधकत्वं न स्यादित्यप्रयोजकत्वं तस्या भवतापि वक्तव्यमिति भावः ॥ १२ ॥

(१) त्रैकाल्यासिद्धेः प्रतिषेधसाधकत्वमनुमानविधयैव वक्तव्यमित्यायातमनुमानप्रामाण्यं तत्प्रामाण्यानुरोधेन । त्रैकाल्यासिद्धेरप्रतिषेधकत्वे प्रत्यक्षादीनामपि न प्रामाण्यप्रतिषेध इत्याह ।

तत्प्रामाण्ये वा न सर्वप्रमाणविप्रतिषेधः(२) **॥१३॥**

ननु त्रैकाल्यासिद्धेः प्रतिषेधानुमापकत्वं मया नोच्यते किं तु त्रैकाल्यासिद्धिसम्भावनयैव प्रतिषेधसम्भवेन प्रतिषेध्यप्रतिषेधयोर्न वास्तविकत्वं सर्वत्र व्यवहारोऽपि सम्भावनादेव विश्वस्य शून्यत्वे ऽपि भानाङ्गीकारात् प्रमाणप्रमेयभावोऽपि त्रैकाल्यासिद्धा वास्तविको न भवितुमर्हतीति सोऽपि सम्भावित एवेत्यत आह ।

त्रैकाल्याप्रतिषेधश्च शब्दादातोद्यसिद्धिवत् तत्सिद्धेः(३) **॥ १४ ॥**

अत्र चकारान्तः टीकाकारसम्मतः पाठः । तत्त्वालोके

(१) अत्र सर्वप्रमाणप्रतिषेधाच्च प्रतिषेधानुपपत्तिरित्येकमधिकं सूत्रं न्यायसूचीनिबन्धे । न्यायतत्त्वालोके विश्वनाथकृतवृत्तौ च व्याख्यानं दृश्यते न तु सूत्रत्वेनोल्लेखः । एतद्वन्यकृता तु न व्याख्यातम् ।

(२) तत्प्रामाण्ये वा न सर्वप्रमाणविप्रतिषेध इति सूत्रमिति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः । आदर्शपुस्तके तु न सर्वप्रतिषेध इति पाठः ।

(३) त्रैकाल्याप्रतिषेधश्च शब्दादातोद्यसिद्धिवदिति सूत्रमिति वार्त्तिकम् । तत्सिद्धिरित्यादर्शपुस्तके पाठः ।

तु चकारान्तं न सूत्रसम्मतमिति[१]। अयमर्थः। त्रैकाल्यस्य न प्रतिषेधः। प्रमाणं हीन्द्रियादिकं करणतावच्छेदकरूपेणेन्द्रियत्वादिना प्रमापूर्ववर्त्त्येव तथैवान्वयव्यतिरेकात्। न हि प्रमाविशिष्टत्वेन करणता येन तां विना तत्करणस्य सत्त्वं न स्यात्। करणता च सव्यापारकारणत्वम्। कारणता चानन्यथासिद्धत्वे सति नियतपूर्ववर्तितावच्छेदकधर्मवत्त्वम्। व्यवहारेऽपि तदेव प्रयोजकं न तु प्रमावैशिष्ट्यमपि पाकविरहदशायामपि पाचकोऽयं गच्छतीतिप्रयोगात्। ननु चक्षुरादेः पूर्वं सत्त्वे किं मानमत आह। शब्देति। तत्सिद्धिः शब्देन कार्येण यथा मुरजादेः सिद्धिस्तथा चाक्षुषादिकार्येण चक्षुरादेः प्रमाणस्य सिद्धिः प्रमाणतयैवेति। केचित्तु चो हेतौ तत्सिद्धिः ततः प्रमाणेभ्यः प्रमेयसिद्धिः। अत्र चक्षुरादेरतीन्द्रियतयानुमानतस्तत्सिद्धावेवान्वयव्यतिरेकग्रहेण प्रमाणताग्रहः करणीयः। चक्षुराद्यनुमानं च पश्यामीतिप्रतीतिसिद्धचाक्षुषादिकं किञ्चित्करणकं ज्ञानत्वादित्यादि। एवं शब्दादेरपि प्रामाण्यमनुमेयमेवेत्यनुमानविशेषदृष्टान्तेन तद् द्रढयति। शब्दादातोद्यसिद्धिवदिति। शब्दाच्छब्दश्रवणेन आतोद्यस्य मुरजादेः सिद्धिरिव निर्णय इवेत्यर्थः। शब्दश्रवणं हि लिङ्गविधयैव मुरजादिप्रकाशकं तथाहि मुरजादिकं विना शब्दविशेषाश्रवणाच्छब्दविशेषे मुरजादिकं हेतुरिति ग्राह्यम्। तदधीनानुकूलतर्केण शब्दविशेषे मुरजादिव्याप्यत्वं गृहीतम्। शब्दविशेषश्रवणेन च तत्स्मृत्या तादृशस्य पक्षधर्मताग्रहान्मुरजादिज्ञानं तदज्ञाने तदानीं तदानयनादिव्यवहारो न स्या-

(१) अत्र च तात्पर्यटीकापुस्तके त्रैका-द्धेः इति पाठधारणं दृश्यते। अनियमोपदर्शनमुखेन माध्यमिकं प्रति हेत्वसिद्धतोद्भावनपरं सूत्रम्। शब्दादातोद्यसिद्धिवत् तत्सिद्धेरिति न्यायतत्त्वालोके दृश्यते।

दिति शब्दज्ञानस्य नियतपूर्ववर्त्तित्वादेव प्रमाणत्वमङ्गीकार्यमन्यथा शब्दविशेषे मुरजादेरपि हेतुता न स्यात् । तथा च शब्दादेर्यथा कादाचित्कत्वाद्यनुरोधेन सहेतुकत्वसिद्धौ मुरजादेरन्वयव्यतिरेकेण मुरजत्वादिनैव हेतुत्वं तत्र पूर्वं शब्दवैशिष्ट्यापेक्षा नास्ति तथा मुरजादिव्याप्यतया पक्षधर्मतया च शब्दविशेषग्रहस्य ताद्रूप्येणान्वयव्यतिरेकात् कादाचित्कत्वाद्यनुरुद्धसिद्धहेतुताकमुरजादिज्ञानविशेषं प्रति हेतुत्वमिति सिद्धं प्रमाणमिति भाव इति प्राहुः ॥ १४ ॥

ननु प्रमा न स्वीक्रियते कुतस्तत्करणं प्रमाणमित्यत आह ।

प्रमेयता च तुलाप्रामाण्यवत्[1] ॥ १५ ॥

तुलया प्रामाण्यं स्वार्थपरष्यङ्प्रत्ययान्तः भावल्युटा प्रमेत्यर्थः । तथा च सुवर्णादीनां गुरुत्वेयत्तादिपरिच्छेदरूपा प्रमा यथा तुलया भवति तां विना क्रयविक्रयादिव्यवहारो न स्यात् तथेतरेषां प्रमेयता प्रमेत्यर्थः । सम्भावनायाः सकम्पप्रवृत्तावेव हेतुतया निष्कम्पसंवादिप्रवृत्त्यर्थं यथार्थनिर्णयरूपा प्रमा स्वीकार्या । विश्वस्य मिथ्यात्वे तज्ज्ञानस्य भ्रमरूपतया ततो व्यवहारानिष्पत्तेः रज्जुसर्पादितो व्यवहारानिष्पत्तिवदिति । केचित्तु प्रमाणता प्रमेयता च प्रमावैशिष्ट्यादिति यत् प्रागाशङ्कितं तत्राह । प्रमेयता चेति । यथा कदाचिद् गुरुत्वेयत्तादिप-

(१) प्रमेयता चेति पाठो विश्वनाथवृत्तिसम्मतः । तात्पर्यटीकायां तु अत्रेदमुत्तरसूत्रम् । प्रमेया च तुलाप्रामाण्यवदितीति सूत्रप्रतीकधारणं दृश्यते । न्यायतत्त्वालोके तु प्रमेया चेत्येव पाठः । अस्य चार्थस्य ज्ञापनार्थं सूत्रम् । प्रमेयेत्यादि वार्त्तिकम् । तत्र च पुस्तकभेदेन द्विधैव पाठः ।

रिच्छेदकत्वात् तुलायाः प्रामाण्यव्यवहारस्तथेन्द्रियघटादेरपि प्रमाणप्रमेयव्यवहार इत्याहुः ॥ १५ ॥

अनवस्थया प्रमाणासिद्धिमाशङ्कते ।

प्रमाणतः सिद्धेः प्रमाणानां प्रमाणान्तरसिद्धिप्रसङ्गः(१) ॥ १८ ॥

प्रमेयस्य घटादेः प्रमाणतः सिद्धौ प्रमाणसिद्ध्यपेक्षेति तत्सिद्धौ प्रमाणान्तरस्वीकारस्तत्सिद्धौ च प्रमाणान्तरमित्यनवस्थेत्यर्थः ॥ १८ ॥

नन्वनवस्थाभयात् प्रमाणं विनैव प्रमाणसिद्धिरित्यत आह ।

तद्विनिवृत्तेर्वा प्रमाणसिद्धिवत् तत्सिद्धिः(२) ॥ १७ ॥

तस्य प्रमाणान्तरस्य विनिवृत्तेः प्रमाणसिद्धावनपेक्षणात् प्रमाणसिद्धिवत् प्रमाणस्य यथा स्वतः सिद्धिस्तथा तस्य प्रमेयस्य स्वतः सिद्धिः स्यात् किं प्रमाणेन । तथा च रज्जुसर्पादिवन्मिथ्या निरधिष्ठानतया शून्यमेव वा जगत् स्यादिति । वाकारोऽनवस्थापेक्षया विकल्पपरः ॥ १७ ॥

---

(१) न्यायतत्त्वालोके तु प्रमाणतः सिद्धेः प्रमाणान्तरसिद्धिप्रसङ्ग इति सूत्रपाठो दृश्यते । न्यायतत्त्वालोके व्याख्यातत्वेन न्यायसूचीनिबन्धे चास्य दर्शनाच्च सूत्रत्वमवसीयते । विश्वनाथवृत्तौ पूर्वपक्षसूत्रत्वेनोल्लेखाच्च ।

(२) अस्य सूत्रत्वे प्रमाणं नोपलभ्यत इति केचित् । निःसाधनैव प्रमाणानां सिद्धिरित्याशङ्क्य सूत्रं तद्विनिवृत्तेर्वा प्रमाणसिद्धिवत् प्रमेयसिद्धिरितिन्यायतत्त्वालोकीयवाचस्पतिमिश्रलेखदर्शनात् सूत्रत्वमेवेति वयं ब्रूमः । अन्यत्रापि पुस्तके तत्सिद्धिरित्यत्र प्रमेयसिद्धिरिति पाठः ।

सिद्धान्तयति ।

न प्रदीपप्रकाशवत् तत्सिद्धेः[1] ॥ १८ ॥

यथा दीपाद्घटादिप्रकाशो घटादिज्ञापकालोकस्तथा प्रमाणेभ्यो घटादिप्रमेत्यर्थः । तथा च दीपेनालोकद्वारा घटादिज्ञापने तदानीं न दीपादिज्ञानापेक्षा तथा प्रमाणेन चक्षुरादिना प्रमाजनने न तदानीं चक्षुरादिज्ञानापेक्षेति नानवस्थादिः । एतेन दीपादेर्घटादिप्रकाशकत्वग्रहे दीपादिज्ञानापेक्षासत्त्वेऽपि तस्य स्वप्रकाशतया दीपान्तरापेक्षाविरहात् प्रमाणानां स्वतः प्रमाणताविरहेण दृष्टान्तवैषम्येऽपि न क्षतिः । न च प्रमाणप्रमेयभावज्ञानं विना न तद्व्यवहार इति तज्ज्ञानार्थं प्रमाणान्तरापेक्षायामनवस्थेति वाच्यम् । तत्रापि प्रमाणान्तरापेक्षाविरहात् किं त्वनुमानादिकमेवात्रापेक्ष्यते तच्च क्लृप्तप्रमाणान्तर्गतमेव । न च प्रमाणताज्ञापकानुमानस्य प्रमाणताज्ञानार्थमनुमानान्तरमपि कल्प्यमितिरीत्यानवस्थेति वाच्यम् । संवादिप्रवृत्तिजनकत्वादिलिङ्गेन घटादिज्ञानस्य प्रमात्वमनुमायान्वयव्यतिरेकादिलिङ्गेन तत्करणत्वरूपप्रमाणत्वमनुमीयते तत्र चानुमाने प्रमाणत्वसंशय एवानुमानान्तरापेक्षेत्यविरलधाराविरहाद् व्यवहितधारायाश्च बीजाङ्कुरवददोषत्वादिति । प्रदीपस्य प्रदीपान्तरं विना प्रकाशकत्ववत् प्रमाणानामपि प्रमाणान्तरमन्तरेणैव प्रमेयप्रकाशकत्वमिति यथाश्रुतसूत्रार्थं दूषितवान् भाष्यकारो यथा । क्वचिन्निवृत्तिदर्शनादनिवृत्तिदर्शनाच्च क्वचिदनैकान्त[2] इति ।

---

(१) सिद्धान्तसूत्रम् । प्रदीपप्रकाशवत् तत्सिद्धेरिति न्यायतत्त्वालोके वाचस्पतिमिश्राः । तत्र च नकाररहितः सूत्रपाठः । आदर्शपुस्तके न दीपप्रकाशवत् तत्सिद्धेरिति पाठः ।

(२) एतन्मते विश्वनाथमते चास्य भाष्यत्वमेव । न्यायसूचीनिबन्धे चास्य

तदर्थश्च क्वचित् प्रदीपादौ प्रमाणान्तरस्य निवृत्तिदर्शनात् क्वचिद्रूपादिप्रकाशकघटादौ प्रमाणान्तरानिवृत्तिदर्शनात् प्रमाणान्तरापेक्षादर्शनात् त्वदीयः प्रकाशकत्वरूपो हेतुरनैकान्तो गृहीतव्यभिचार इत्यर्थः। तथा च प्रदीपदृष्टान्तात् प्रमाणान्तरापेक्षानिवृत्तिः साध्यते घटदृष्टान्तेन प्रमाणान्तरापेक्षैव किं न साध्यते। दृष्टान्तसमजात्युत्तरमेतदिति ॥ १८ ॥

जिज्ञासान्तरसम्पत्तये प्रमाणसामान्यपरीक्षाजिज्ञासां निवर्तयितुमुपसंहरति।

समाप्तं प्रमाणसामान्यपरीक्षाप्रकरणम् ॥

प्रथमोद्दिष्टतया बहुवादिसम्मतत्वाच्च प्राक् प्रत्यक्षं प्रमाणतया परीक्षयितुं पूर्वपक्षयति।

प्रत्यक्षलक्षणानुपपत्तिरसमग्रवचनात्(१) ॥ १९ ॥

प्रत्यक्षलक्षणस्य इन्द्रियार्थसन्निकर्षोत्पन्नज्ञानत्वलक्षणस्यानुपपत्तिः। असमग्रवचनात् कारणसमुदायात्मकसामग्रीजन्यत्वाघटितत्वात्। आत्ममनोयोगरूपेन्द्रियसन्निकर्षजन्यतया ज्ञानमात्रेऽतिव्याप्तेरिति यावत्। अर्थपदस्य विषयपरतया घटाद्यनुमितिवारणेऽपि आत्मविषयकानुमित्यादावतिव्याप्तेरशक्यपरिहारात्। नन्वेतावता निरुक्तलक्षणस्य तद्रूपेण विभागस्य चानुपपत्तिर्न तु प्रत्यक्षप्रमाकरणत्वानुपपत्तिस्तथापि प्रत्यक्षत्वस्य इन्द्रियजन्य-

---

सूत्रत्वमिति। न्यायतत्त्वालोके चास्य व्याख्यानं दृश्यते परं तु सूत्रत्वेनोल्लेखो न दृश्यते। तात्पर्यटीकायां च क्वचि-न्तः इत्याकारिका सूत्रप्रतीकधारणरीतिर्दृश्यते।

(१) पूर्वपक्षस्तु यथाश्रुतोत्पादकाभिमतस्य सामग्रीत्वेन लक्षणत्वं कारणमात्राद्वा आद्ये सूत्रम्। प्रत्यक्षलक्षणानुपपत्तिरित्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः। पूर्वपक्षसूत्रम्। प्रत्यक्षलक्षणानुपपत्तिरसमग्रवचनादिति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः।

त्वन्यूनवृत्तितया तदवच्छेदकत्वासम्भवेन तदवच्छेदकतया प्रत्यक्षत्वरूपप्रमावैजात्याप्रसिद्ध्या तदवच्छिन्नकरणत्वाप्रसिद्धिरिति पूर्वपक्षे तात्पर्यम् । अथवा इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षमितिलक्षणानुपपत्तिः । असमग्रवचनात् सकलप्रत्यक्षासङ्ग्रहात् । सुखादिमानसप्रत्यक्षे योगजप्रत्यक्षे चाव्याप्तेरित्यर्थः । मनसोऽनिन्द्रियत्वाद् योगिप्रत्यक्षस्य मनःसंयोगादिरूपसन्निकर्षाजन्यत्वाच्च । एवं च प्रत्यक्षत्वस्यातिप्रसक्ततया नेन्द्रियजन्यतावच्छेदकत्वसम्भव इति न प्रत्यक्षत्वावच्छिन्नकरणत्वमिन्द्रियस्येति भावः ॥ १९ ॥

नन्वात्ममनोयोगस्य कारणत्वमेव नास्ति कुतस्तज्जन्यत्वमादायातिव्याप्तिरित्यत आह ।

नात्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिः[1] ॥ २० ॥

शरीरावच्छिन्नात्मनो मनसा सन्निकर्षाभावे न प्रत्यक्षोत्पत्तिः न ज्ञानोत्पत्तिः । तथा च ज्ञानोत्पत्त्यभावप्रयोजकाभावप्रतियोगित्वेनात्ममनःसन्निकर्षस्य कारणत्वमनुमितमिति भावः । यद्वा ननु बहिरिन्द्रियव्यापारमन्तरेण मनसा प्रत्यक्षमेव न जन्यते कुतोऽव्याप्तिरत आह ।

(१) तदिदं सूत्रमुक्तभाष्यम् । नात्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिरितीति वार्त्तिकम् । तदिदं नात्ममनसोः सन्निकर्षेत्यादिसूत्रपाठस्य पुरस्तात् कृतभाष्यम् । तदेतद्वार्त्तिककारो भाष्यमनुभाष्य पूर्वपक्षसूत्रं पठति । नात्म–त्तिः । इति तात्पर्यटीका । यत इति शेषः सुगमः सूत्रार्थ इत्येतत्सूत्रव्याख्याने न्यायतत्त्वालोके वाचस्पतिमिश्राः । नात्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिरिति पूर्वपक्षसूत्रं तदुपपादकतयैव भाष्यकृता व्याख्यातत्वात् सिद्धान्तसूत्रत्वे चेत्यादि न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः ।

नात्मेति । आत्ममनःसन्निकर्षाभावे बहिरिन्द्रियव्यापारविरहदशायामात्ममनःसन्निकर्षाभाव एव न प्रत्यक्षोत्पत्तिः । तथा च सुखादिप्रत्यक्षं साक्षात्करोमीत्यनुभवसिद्धप्रत्यक्षभावं प्रत्यन्वयव्यतिरेकाभ्यां मनःसन्निकर्षस्य हेतुत्वं सिद्धमिति भावः ॥ २० ॥

ननु नियतान्वयसत्त्वं यदि कारणतासाधकं तदा दिगादेरपि कार्यविशेषहेतुता स्यादित्याशङ्कते ।

दिग्देशकालाकाशेष्वप्येवं प्रसङ्गः[1] ॥ २१ ॥

अथैतेषामन्यथासिद्धत्वमिति चेन्मनःसन्निकर्षादेरपि तथात्वमिति भावः ॥ २१ ॥

मनःसन्निकर्षादेरन्यथासिद्धत्वं निराकरोति ।

ज्ञानलिङ्गत्वादात्मनो नानवबोधः[2] ॥ २२ ॥

ज्ञानलिङ्गत्वात् ज्ञानसमवायित्वात् प्रत्यक्षसमवायित्वाद्वा नात्मनोऽनवबोधः । अनवबोधकत्वं बोधसामान्ये प्रत्यक्षविशेषे वा अन्यथासिद्धत्वं नात्मन इत्यर्थः । यद्वा आत्मनः सकाशादनवबोधो नेत्यर्थः । भावकार्यत्वेन ज्ञानस्य समवायिकारणे कल्पनीये परिशेषादात्मैव तथेति भावः । इत्थं चासमवायिकारणतयात्ममनोयोगादेरपि कारणतासिद्धिरपि बोध्या । दिगादीनां च साधकविरहेणाक्लृप्ततयान्यथासिद्धिरित्याशयः ॥ २२ ॥

(१) अस्य सूत्रत्वे प्रमाणं नोपलभ्यत इति केचिदाधुनिकाः । पूर्वपक्षिसूत्रम् । दिग्देशेत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

(२) सिद्धान्तसूत्रम् । ज्ञानलिङ्गत्वादित्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः । उदयनाचार्या अप्यस्य सूत्रत्वं मन्यन्ते । परसूत्रटिप्पणी द्रष्टव्या । अन्यत्र च ज्ञानलिङ्गत्वादात्मनो नानवरोध इति पाठो दृश्यते । वार्त्तिके च व्याहतत्वादहेतुरितिसूत्रव्याख्यावसरे एतत्सूत्रं धृतं तत्र नानवबोध इति पाठो दृश्यते ।

नन्वात्मशरीरसंयोगादेरेवासमवायिकारणत्वमस्तु एवं भावकार्यत्वमेकत्वादौ व्यभिचारितया नासमवायिकारणतासाधकं तथा मनसोऽतीन्द्रियतया तत्सन्निकर्षस्यान्वयव्यतिरेकाभ्यां कार्यान्वयव्यतिरेकौ दुर्ग्रहौ कुतस्तस्य कारणत्वमित्यत आह ।

तदयौगपद्यलिङ्गत्वान्मनसः(१) ॥ २३ ॥

नानवबोध इत्यनुषज्यते । सन्निकर्षद्वारेत्यादि । तदयौगपद्यं लिङ्गं ज्ञापकं यस्य तत्त्वात् । तथा चैकदा चाक्षुषरासनाद्युत्पादवारणाय मनः स्वीकार्यं यत्सम्बन्धविरहे चक्षुरादिकं न चाक्षुषादिकं जनयति तस्य चाणुतया नैकदा नानेन्द्रियसम्बन्धः । शरीरसम्बन्धस्य सर्वदैवेन्द्रिये सत्त्वान्न तेन तन्नियमः परमाणूनां क्लृप्तानामनन्ततया विनिगमनाविरहेण ततोऽपि न तन्नियम इति सिद्धौ च मनसि असमवायिकारणसंयोगाश्रयतया तस्यैवोपस्थिततया सिद्धिरुचिता अतिरिक्तकल्पने गौरवात् । शरीरात्मसंयोगस्यासमवायिहेतुत्वसम्भवे ऽपि प्रमाणसिद्धस्य मनसोऽपि तथात्वमङ्गीकार्यं विनिगमनाविरहात् । असतिबाधके भावकार्यत्वस्यासमवायिकारण-

---

(१) वार्त्तिके तदयौगपद्यलिङ्गत्वाच्च न मनस इति सूत्रपाठो दृश्यते । अस्य सूत्रत्वे प्रमाणं नोपलभ्यत इत्याधुनिकैः कैश्चिदुक्तम् । तदपरिशीलितन्यायवार्त्तिकतात्पर्यपरिशुद्ध्यादिभाषितम् । यतो न्यायवार्त्तिकतात्पर्यपरिशुद्धौ ननु नात्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिरिति पूर्वपक्षसूत्रं तदुपपादकतयैव भाष्यकृता व्याख्यातत्वात् सिद्धान्तसूत्रत्वे च ज्ञानलिङ्गत्वादात्मनो नानवरोधः तदयौगपद्यलिङ्गत्वाच्च मनस इति सूत्रद्वयमनर्थकमापद्येत पूर्वेणैव गतार्थत्वाद् वार्त्तिककारस्तु अर्थतो वाभिधानमिति सिद्धान्तमुपक्रम्य तदर्थप्रकाशकतया सूत्रमवतारयतिस्मेति लेखो दृश्यते । सिद्धान्तसूत्रम् । तदयौगपद्येत्यादिन्यायतत्त्वालोकीयवाचस्पतिमिश्रलेखदर्शनाच्च । एवं च नकाररहितः सूत्रपाठोऽप्युदयनसम्मत इति बोध्यम् ।

साधकत्वादेकत्वादौ तु तद्बाधादिति भावः। इदमत्रावधेयम्। तत्पुरुषीयचाक्षुषं तत्पुरुषीयचक्षुर्विषयसंयोगादिभिन्नकिञ्चित्पदार्थविरहप्रयुक्तविरहप्रतियोगि तत्पुरुषीयचक्षुर्विषयसंयोगादिसत्त्वे ऽपि तत्पुरुषीयरासनाद्युत्पत्तिक्षणानुत्पत्तिकत्वादित्यनुमानेन किञ्चित्पदार्थसिद्धौ विषयरसनासंयोगादिसत्त्वकालीनचाक्षुषक्षणानुत्पत्तिकत्वेन रासने ऽपि हेतुतया तथाविधपदार्थान्तरकल्पने गौरवं चाक्षुषरासनादिहेतुविभिन्नकालीनसम्बन्धप्रतियोगितयैकपदार्थस्वीकारे लाघवम्। तादृशपदार्थस्य गुणादित्वे एकस्य गुणादेर्विभिन्नकालावच्छेदेन नानेन्द्रियसम्बन्धासम्भवाद् द्रव्यत्वमेव स्वीकार्यं तथापि विभुत्वे सर्वदैव नानेन्द्रियसम्बन्धप्रसक्त्या न यौगपद्यवारणम्। सावयवत्वे चावयवकल्पने गौरवमित्यणुत्वमेव स्वीकार्यम्। तत्सम्बन्धस्य च विषयस्यात्मनश्चैक्यान्न तन्निष्ठतया हेतुत्वेन यौगपद्यवारणमितीन्द्रियनिष्ठस्यैव हेतुत्वं युक्तमित्यादितर्कसहकारेणेन्द्रियसंयोग्यणुतया मनः सिध्यतीति ॥ २३ ॥

सिद्धान्तयति।

प्रत्यक्षनिमित्तत्वाच्चेन्द्रियार्थयोः सन्निकर्षस्य पृथग्वचनम्[१] ॥ २४ ॥

इदं सूत्रं भाष्यकारस्य न मुनेरिति केचित्। अर्थस्तु इन्द्रियार्थसन्निकर्षस्य पृथक् स्वातन्त्र्येण प्रत्यक्षनिमित्त-

(१) नेदं कारणावधारणार्थमत्युक्तं न यावदसाधारणं सर्वं तद्वक्तव्यमपि तु न साधारणं वक्तव्यमित्ययं सूत्रार्थ इति वार्त्तिकम्। तत्र च स्वशब्देन वचनमिति सूत्रपाठः। इदं सूत्रं न्यायतत्त्वालोके न धृतम्। विश्वनाथपञ्चाननैश्च सिद्धान्तसूत्रत्वेन व्याख्यातम्। परिहरति प्रत्यक्षेत्यादि। इत्यादिकं तात्पर्यटीकायां धृत्वा परमः समाधिरिति तत्रैवोक्तम्। तात्पर्यपरिशुद्धौ च परमः समाधिः सौत्र इति शेष इति व्याख्यातम्। २६ सूत्रटिप्पण्यप्यत्र द्रष्टव्या।

त्वात् प्रत्यक्षत्वावच्छिन्नं प्रति हेतुत्वात् वचनं तथा लक्षणम् । अथवा पृथग्वचनं केवलसन्निकर्षजन्यत्वघटितं लक्षणम् । तथा चेन्द्रियत्वावच्छिन्नजनकताघटितलक्षणकरणान्नातिव्याप्तिरिति विवृतं प्राक् । यद्वा इन्द्रियार्थसन्निकर्षस्य सन्निकर्षद्वारा इन्द्रियत्वावच्छिन्नस्य प्रत्यक्षनिमित्तत्वात् प्रत्यक्षहेतुत्वात् पृथग्वचनं सुखादिसाक्षात्कारात्मकप्रत्यक्षविशेषे बहिरिन्द्रियविनाकृते हेतुभूतेन्द्रियतया मनसः स्वीकार इति न लक्षणाव्याप्तिरित्याशयः । सन्निकर्षस्य च लौकिकालौकिकभेदेन योगजप्रत्यक्षादेरपि सङ्ग्रह इति बोध्यम् । मनःषष्ठानीन्द्रियाणीति श्रीभगवद्वाक्यमपि प्रमाणमवसेयम् ॥ २४ ॥

समाधानान्तरमाह ।

सुप्तव्यासक्तमनसां चेन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात्(१) **॥ २५ ॥**

सुप्तानां व्यासक्तमनसां चेन्द्रियार्थसन्निकर्षनिमित्तकत्वात् । ज्ञानस्येति शेषः । घनगर्जितादिना श्रोत्रसन्निकर्षाद् वह्न्यादिना त्वक्सन्निकर्षाच्च प्रागेव ज्ञानोत्पत्तेस्तादृशसन्निकर्षाणां प्राधान्यादित्यर्थः । पृथग्वचनमित्यनुसञ्जनीयम् । इन्द्रियार्थसन्निकर्षजन्यत्वेन प्रत्यक्षकथनम् । अयं भावः । इन्द्रियार्थसन्निकर्षजन्यज्ञानत्वं न प्रत्यक्षलक्षणमात्ममनोयोगजन्यतया ज्ञानमात्रे तत्सत्त्वात् । न चेन्द्रियसन्निकर्षत्वावच्छिन्नजन्यता विवक्षणीयेति वाच्यम् । सन्निकर्षस्य संयोगसंयुक्तसमवायादिभेदेनाननुगमात् । नापीन्द्रियत्वेन जनकत्वं विवक्षणीयमिन्द्रियत्वस्याप्ये-

(१) इन्द्रियार्थसन्निकर्षस्य प्राधान्यपरमिदं सूत्रमिति वार्त्तिकम् । परसूत्रटिप्पण्यत्र द्रष्टव्या ।

कस्याभावात् कथञ्चित् सम्भवे ऽपि तेन रूपेण हेतुत्वे मानाभावात्। इत्थं च ज्ञानाकरणकज्ञानत्वं प्रत्यक्षत्वादिकमेव वा लक्षणम्। इन्द्रियाणां सन्निकर्षाणां च विशेषतः प्रत्यक्षहेतुताज्ञापनायोक्तमिन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षमिति। न चात्ममनोयोगादिकमपि प्रत्यक्षहेतुस्तत् कथं विशेषतो नोक्तमिति वाच्यम्। तेषां साधारणत्वात्। प्रत्यक्षासाधारणकारणमिन्द्रियं तत्सन्निकर्षश्चेति तद्धेतुतयोक्तम्। इन्द्रियमनोयोगादिकं न सकलप्रत्यक्षकारणमिति तन्नोक्तम् ॥ २५ ॥

लक्षणाभिप्रायेण पुनराह।

तैश्चापदेशो ज्ञानविशेषाणाम्[१] ॥ २६ ॥

तैरिन्द्रियसन्निकर्षैर्ज्ञानविशेषाणां चाक्षुषादीनां व्यपदेशो ज्ञापनं तेन चाक्षुषाद्यन्यतमत्वं लक्षणं चाक्षुषवृत्त्यनुमित्यवृत्तिजातिमत्त्वादीनि लक्षणानीति वा। अथवा तैर्ज्ञानविशेषाणामनुमित्यादीनां व्यपदेशो व्यावर्तनं तथा चानुमित्यादिविजातीयप्रत्यक्षसामान्यहेतुतायामिन्द्रियत्वमवच्छेदकं वक्तव्यमन्यथा प्रत्यक्षसामान्याभावप्रयोजकतया चक्षुराद्यभावानां वक्तव्यतया गौरवापत्तेः। न च सन्निकर्षात्मकसम्बन्धानामननुगमात् कथं तादृशसम्बन्धावच्छिन्नेन्द्रियत्वावच्छिन्नाभावैक्यं प्रत्यक्षविषयताप्रयोजकसम्बन्धत्वेन तेषामुपलक्षणात्। एवं च यथोक्तलक्षणमेव सम्यगिति दिक् ॥ २६ ॥

---

(१) व्याहतत्वादहेतुरितिपरसूत्रव्याख्यावसरे वार्त्तिककृता व्याहतत्वादित्यनेन त्रिसूत्रीं प्रत्याचष्टे प्रत्यक्षनिमित्तत्वादिन्द्रियार्थयोः सन्निकर्षस्य, सुप्तव्यासक्तमनसां चेन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात्, तैश्चापदेशो ज्ञानविशेषाणामितीयं किल त्रिसूत्रीत्युक्तम्।

इदानीं भाभ्रमरेखां तद्वशतोऽपि दिग्ज्ञानमाह ।

त्रिच्छायाग्रजमत्स्यद्वयमध्यगसूत्रयोर्युतिर्यत्र ।
सोत्तरगोले याम्या शङ्कुतलाद्दक्षिणे सौम्या ॥ २ ॥

छायाग्रभ्रमरेखा सूत्रयुतेर्वृत्तपरिधिरग्रस्पृक् ।
मध्यच्छायाऽन्तरमुदगितरद्वा शङ्कुमण्डलयोः ॥ ३ ॥

इष्टेऽह्नि दिग्मध्यस्थशङ्कोश्छायात्रयं ज्ञात्वा तदग्रैर्मत्स्यद्वयमुत्पाद्य तन्मुखपुच्छमध्यगरेखयोर्यत्र युतिः सोत्तरगोले याम्या दिग् ज्ञेया । यदि जिनाल्पाक्षे देशे कदाचिच्छङ्कुमूलाद्दक्षिणे छायाग्रे सा युतिर्भवति तदा सा सौम्या ज्ञेया ॥ २ ॥ सूत्रयुतेर्मत्स्यद्वयमुखपुच्छनिर्गतसूत्रयुतेर्यो वृत्तपरिधिः सोऽग्रस्पृक् छायाग्रस्पृक् भवति । अतः परिधिरेखैव छायाग्रभ्रमरेखा भाभ्रमरेखा भवति । शङ्कुमण्डलयोः शङ्कुमूलभाभ्रमरेखयोर्यदन्तरं सैव मध्यच्छाया दिनार्धे छाया भवतीति । सा चोदग् वेतरद् दक्षिणा भवति । अर्थाज्जिनाधिकाक्षेदेशे मध्यच्छाया सर्वदोत्तरा भवति । उत्तरगोले जिनाल्पाक्षे देशे यदा रवेरुत्तरा क्रान्तिरक्षाधिका तदा शङ्कोर्मध्याह्ने छाया दक्षिणाभिमुखी भवति । 'इष्टेऽह्नि मध्ये प्राक् पश्चाद्धृते बाहुत्रयाग्रान्तरे । मत्स्यद्वयान्तरयुतेस्त्रिस्पृक् सूचेण भाभ्रमः' । इति संप्रतिप्रसिद्धसूर्यसिद्धान्तेऽप्येवमेव । लल्लादिभिरप्येवमेवोदितं स्वतन्त्रे । भास्करेणास्यैव 'भात्रितयाद्भाभ्रमणं न सदस्माद् दिक् पलाद्यं चे' त्यादिना भाभ्रमणस्य खण्डनं कृतम् ।

मेरौ यदि रविक्रान्तिरेकस्मिन् दिने स्थिरा स्यात्तर्हि भाभ्रमरेखा वृत्तपरिध्याकारा स्यात् । वस्तुतोऽभीष्टदेशे भाभ्रमरेखा कीदृशी—इत्येतदर्थं मत्कृतं भाभ्रमरेखानिरूपणं द्रष्टव्यम् ॥ ३ ॥

इदानीं द्वादशाङ्गुलशङ्कोर्भुजानयनमाह ।

छायावृत्तेऽर्काग्रा कर्णगुणा व्यासदलहृताऽर्काग्रा ।
विषुवच्छाया याम्या तदन्तरैक्यं भुजोऽस्याग्रे ॥ ४ ॥

अर्काग्रा कर्णगुणा छायाकर्णगुणा व्यासदलहृता तदा छायावृत्ते छायाव्यासार्धाद्भवृत्तेऽर्काग्राऽर्थात् कर्णवृत्ताग्रा भवेत्तथा विषुवच्छाया पलभा सदा याम्या भवेत्तदन्तरैक्यं भुजः स्यात्। भिन्नदिशोरन्तरमेकदिशोर्योगः संस्कारदिक्को भुजः स्यादिति।

अत्रोपपत्तिः। 'त्रिभज्याहृताऽर्काग्रका कर्णनिघ्नी भवेत् कर्णवृत्ताग्रका व्यस्तगोला' इत्यादि भास्करविधिना स्फुटा। भास्करेण छायाग्रप्राच्यपरयोरन्तरं भुज इत्यङ्गीकृत्य कर्णवृत्ताग्रा व्यस्तगोला पलभा सौम्या च कल्पिता। इहाऽऽचार्येण लघुशङ्कुमूलप्राच्यपरयोरन्तरं भुज इति स्वीकृत्याग्रापलभे यथा दिक्के एव स्थापिते इति सिद्धान्तविदां स्फुटम्।

अस्य भुजस्याग्रे इत्यग्रे संबन्धः॥ ४॥

इदानीं कोटिसाधनमाह।

शङ्कुः प्राच्यपरायाश्छायाभुजकृतिविशेषमूलं यत्।
तत् प्राच्यपरा छायाभुजाग्रयोरन्तरं कोटिः॥ ५॥

प्राच्यपरारेखायाः सकाशाद्यथादिग्गतस्य भुजस्याग्रे शङ्कुः शङ्कुमूलमिति ज्ञेयम्। छायाभुजकृत्योर्विशेषादन्तरान्मूलं यद्भवेत्तदेव छायाभुजाग्रयोरन्तरं प्राच्यपरा पूर्वापररेखारूपा कोटिर्भवेदिति।

अत्रोपपत्तिः। शङ्कुमूलप्राच्यपरयोर्यदन्तरं तदेव दिग्वैपरीत्येन दिग्मध्यगतस्य शङ्कोश्छायाग्रस्य पूर्वापररेखायाश्चान्तरमतो 'दिक्सूत्रसम्पातगतस्य शङ्कोश्छायाग्रपूर्वापरसूत्रमध्यम्। दोर्दोःप्रभावर्गवियोगमूलं कोटिर्नरात् प्रागपरा ततः स्या' दिति भास्करोक्त्यावशिष्टा वासना स्फुटा। इह शङ्कुमूलस्य प्राच्यपरायाश्चान्तरं भुजः। शङ्कुमूलाद्दिग्मध्यावधिच्छाया तद्वर्गान्तरपदं पूर्वापररेखायां छायाग्रभुजाग्रयोरन्तरं कोटिरिति सर्वं स्फुटम्॥ ५॥

इदानीं शङ्कुच्छायाग्रयोः स्थितिमाह।

दिङ्मध्ये छायाग्रं कृत्वा शङ्कोर्यथादिशं भ्रमणम्।
दिङ्मध्यस्थितशङ्कोश्छायाग्रं भ्रमति विपरीतम्॥ ६॥

पूर्वापररेखातः शङ्कुमूलं यद्दिक्कं भ्रमति तद्विपरीतं दिग्मध्यस्थित शङ्कोश्छायाग्रं भ्रमतीति स्फुटोऽर्थः ।

वासना च पूर्वश्लोकतः स्फुटा ॥ ६ ॥

इदानीं विषुवत्कर्णमाह ।

शङ्कुर्लम्बश्छायाक्षज्या तद्वर्गसंयुतेर्मूलम् ।
विषुवति विषुवत्कर्णश्छायाकर्णोऽन्यदा शङ्कुः ॥७॥

विषुवति विषुवद्दिने मध्याह्ने द्वादशाङ्गुलशङ्कुरेव लम्बो लम्बज्या कल्प्या । तत्र या छाया साऽक्षज्या च कल्प्या । तद्वर्गसंयुतेर्यन्मूलं स विषुवत्कर्णो भवति । अन्यदाऽन्यस्मिन् दिने मध्याह्नादन्यस्मिन् काले वा पूर्वविधिना यः कर्ण उत्पद्यते स द्वादशाङ्गुलशङ्कोश्छायाकर्णो भवति ।

अत्रोपपत्तिः । 'क्रियतुलाधरसङ्क्रमपूर्वतोऽयनलवोत्थदिनैर्विषुवद्दिनम्' इति भास्करोक्तेन तत्र मध्याह्ने छाया विषुवती । ततः शङ्कुपलभावर्गयोगपदान्मूलं विषुवत्कर्णः स्फुट एव । त्रिज्या कर्णः । लम्बज्या कोटिः । अक्षज्या भुजः । इत्यक्षक्षेत्रस्य सजातीयमपवर्तितं लघु पलभाक्षेत्रमतोऽस्य कोटिभुजयोर्लम्बाक्षज्ये नामनी समुचिते एवेति । शङ्कुरित्यस्यार्थे संबन्धः ॥ ७ ॥

इदानीं संज्ञाविशेषानाह ।

उन्नतजीवा कोटिश्छाया दृग्ज्या भुजो नतज्या वा ।
कर्णश्छायावृत्ते व्यासार्धं क्रमतोऽन्यत्र ॥ ८ ॥

शङ्कुः । उन्नतजीवा वा कोटिः । इत्येकपर्यायिनः शब्दाः । एवं छाया दृग्ज्या नतज्या वेते शब्दा एकपर्यायाः । यत्रैते भुजकोटी तस्मिन् छायावृत्तेऽनयोर्भुजकोट्योर्वशेन यः कर्णस्तदेव व्यासार्धं ज्ञेयम् । अतोऽस्मादन्यत्रापि द्वयं ज्ञेयम् । अर्थात् कोटिर्भुजश्चेति यद्द्वयं तद्द्वयं तयोर्वर्गयोगपदव्यासार्धाद्वृत्ते वृत्ते कल्पनीयमिति ॥ ८ ॥

इदानीं लम्बाक्षज्ये आह ।

शङ्कुच्छायाकृत्योस्त्रिज्याकृतितत्समासगुणहृतयोः ।

मूले लम्बाक्षज्ये तदंशकास्तद्धनुर्भागाः ॥ ९ ॥

शङ्कुशब्देन द्वादशाङ्गुलशङ्कुस्तथा छायाशब्देनाच पलभा गृह्यते। तेनायमर्थः। द्वादशकृतिः पलभाकृतिश्च त्रिज्याकृतिगुणा। उभयत्र तत्कृतिसमासेन तयोः शङ्कुपलभयोर्वर्गयोगेन हृता। तन्मूले क्रमेण लम्बाक्षज्ये भवतः। तयोर्धनुर्भागाश्च तदंशका लम्बाक्षभागा भवन्ति।

अत्रोपपत्तिः। यदि पलकर्णवर्गेण द्वादशवर्गः कोटिवर्गः पलभावर्गश्च भुजवर्गो लभ्यते तदा त्रिज्यावर्गेण किं जातो

$$लम्बज्यावर्गः = \frac{१४४ \ त्रि^२}{१४४ + वि^२} । तथाऽक्षज्यावर्गः = \frac{वि^२ त्रि^२}{१४४ + वि^२} ।$$

अत उपपन्नं मूलोक्तम्। अन्यत्सुगममिति ॥ ९ ॥

इदानीं प्रकारान्तरेण लम्बाक्षज्ये आह।

विषुवत्कर्णहृते वा शङ्कुच्छायाहते पृथक् त्रिज्ये।
अक्षज्येतरजीवे लम्बाक्षांशोत्क्रमज्योने ॥ १० ॥

त्रिज्ये पृथक् शङ्कुच्छायाहते द्वादशपलभाहते विषुवत्कर्णहृते वा लम्बाक्षज्ये भवतः। लम्बाक्षांशोत्क्रमज्योने त्रिज्ये वाऽक्षज्येतरजीवे अक्षज्यालम्बज्ये भवतः। अर्थाल्लम्बोत्क्रमज्योना त्रिज्याऽक्षज्या। अक्षोत्क्रमज्योना त्रिज्या लम्बज्या।

अत्रोपपत्तिः। पूर्वार्धस्यानन्तरार्योक्तप्रकारान्तर्गता। उत्तरार्धस्य ज्योत्पत्त्या सुगमा ॥ १० ॥

पुनः प्रकारान्तरेण लम्बाक्षज्ये आह।

नवतेर्लम्बाक्षांशान् प्रोह्य ज्या वेतराऽक्षलम्बज्ये।
शङ्कुच्छायागुणिते छायाद्वादशहृते वान्ये ॥ ११ ॥

लम्बाक्षांशान् नवतेः प्रोह्य हित्वा ज्या साध्या तदा सा वा प्रकारान्तरेणेतरा ज्या स्यादर्थाल्लम्बांशोननवतेर्ज्याऽक्षज्या। अक्षांशोननवतेर्ज्या लम्बज्या। अक्षलम्बज्ये शङ्कुच्छायागुणिते द्वादशपलभाहते ततः क्रमेण छायाद्वादशहृते पलभाद्वादशहृते तदा वा प्रकारान्तरेणाऽन्ये

लम्बाक्षज्ये भवतः । अर्थादक्षज्या द्वादशगुणा पलभाहृता लम्बज्या भवति । लम्बज्या पलभाहता द्वादशहृताऽक्षज्या भवति ।

अत्रोपपत्तिः । पूर्वार्धस्य ज्योत्पत्त्या सुगमा । उत्तरार्धस्याक्षक्षेत्रानुपातेनातिसुगमा ॥ ११ ॥

इदानीं पुनः प्रकारान्तरेणाह ।

लम्बाक्षज्यावर्गं प्रोह्य त्रिज्याकृतेः पदं वान्या ।
अन्यत्र सर्वदोन्नतनतजीवांशानयनमेवम् ॥ १२ ॥

त्रिज्याकृतेर्लम्बज्यावर्गं प्रोह्य पदं याह्यं साऽन्याऽक्षज्या भवेत् । एवं त्रिज्याकृतेरक्षज्यावर्गं प्रोह्य पदं वाऽन्या लम्बज्या भवेदिति । एवमन्यत्र सर्वदा नतोन्नतजीवांशानयनं कार्यम् । अर्थादुन्नतज्यावर्गोनात् त्रिज्यावर्गात् पदं नतज्या । नतज्यावर्गोनात् त्रिज्यावर्गात् पदमुन्नतज्या ततश्चापात्तयोर्भागा भवन्ति ।

अत्रोपपत्तिः । जात्यत्र्यस्रसिद्धान्तेन स्फुटा । 'त्रिज्ये पृथक् कोटिभुजाहते ते कर्णोद्धृते लम्बपलज्यके स्तः' इत्यादि भास्करप्रकारा लम्बाक्षज्यानयने आचार्यप्रकारसमा एव ॥ १२ ॥ (गणिताध्यायत्रिप्रश्नाधिकारस्य १८ श्लोको द्रष्टव्यः ।)

इदानीं दिनार्धे नतांशक्रान्त्यंशज्ञाने सति पलज्ञानमाह ।

इष्टदिनार्धनतांशक्रान्त्यंशैक्यान्तरं क्रियतुलादौ ।
अक्षांशा याम्यायां छायायामन्तरमजादौ ॥ १३ ॥

क्रियतुलादौ सवितरि क्रमेणेष्टदिनार्धे नतांशानां क्रान्त्यंशानां चैक्यमन्तरं वाक्षभागा भवन्ति । अजादौ मेषादौ रवौ मध्याह्नच्छायायां याम्यायां सत्यां नतांशक्रान्त्यंशान्तरमेव पलभागा भवन्ति ।

अत्रोपपत्तिः । 'नतांशापमांशान्तरं तुल्यदिक्त्वे युतिर्भिन्नदिक्त्वे पलांशा भवेयुः' इति भास्करविधिना स्फुटा ॥ १३ ॥ (गणिताध्याय–त्रिप्रश्नाधिकारस्य ७१श्लोको द्रष्टव्यः ।)

इदानीं मेषादिराशीनां चरखण्डसाधनमाह ।

मेषवृषमिथुनजीवा स्वाहोरात्रार्धचरदलप्राणान् ।
प्राग्वत् कृत्वा स्वाधो विशोध्य चरखण्डकप्राणाः ॥ १४ ॥

मेषवृषमिथुनजीवातः स्वाहोरात्रार्धं द्युज्यावृत्ते प्राग्वत् स्पष्टाधिकारोक्तविधिना 'जिनभागज्यागुणिता' इत्यादिना चरासून् कृत्वा तान् स्वाधः विशोध्य चरखण्डप्राणा मेषादिराशित्रयस्य ज्ञेया इति ।

अत्रोपपत्तिः । 'मेषादिराशित्रितयस्य यानि चराण्यधोऽधः परिशोधितानी' त्यादिभास्करविधिना स्फुटा (स्पष्टाधि० गणिता०) ॥ १४ ॥

इदानीं लङ्कोदयसाधनमाह ।

मिथुनाहोरात्रार्धं क्रियाद्यहोरात्रदलहृतं गुणितम् ।
तज्ज्याभिराद्यचापान्तराणि लङ्कोदयप्राणाः ॥ १५ ॥

स्पष्टार्थम् ।

उपपत्तिश्च 'मेषादिजीवा त्रिगृहद्युमौर्व्या गुण्या हृता स्वस्वदिनज्यया वा' इत्यादिविधिना स्फुटा (स्प० अधि० गणि० भ्र०) ॥ १५ ॥

इदानीं प्रकारान्तरेण लङ्कोदयसाधनमाह ।

ज्यावर्गात् क्रान्तिज्यावर्गोनात्तत्पदाहता त्रिज्या ।
स्वाहोरात्रार्धहृता चापश्चापान्तराण्यथवा ॥ १६ ॥

स्पष्टार्थम् ।

अत्रोपपत्तिः । 'एकस्य राशेर्बृहती व्यक्राया द्वयोस्त्रिभस्यापि कृतीकृतानाम्, इत्यादि भास्करविधिना स्फुटा । (गणिताध्याय-स्पष्टाकारस्य ५४ श्लोको द्रष्टव्यः ।)

इदानीं स्वदेशोदयसाधनमाह ।

स्वचरासुभिरूनयुताः क्रमोत्क्रमस्थैः क्रमोत्क्रमस्थास्ते ।
उदयप्राणा व्यस्ताश्चार्कं तात्कालिकं कृत्वा ॥ १७ ॥

ते पूर्वप्रकारागता मेषादिराशित्रयोदयाः क्रमस्था उत्क्रमस्थाश्च धार्याः । ततस्ते यथाक्रमं क्रमोत्क्रमस्थैः स्वचरासुभिरूनयुताः सन्तो मेषा-

द्विषण्णां स्वदेशे उदया भवन्ति । तत एत एव व्यस्तास्तुलादिषण्णा-मुदयप्राणा ज्ञेयाः । अर्कं तात्कालिकं कृत्वा' इत्यस्याग्रे संबन्धः ।

अत्रोपपत्तिः । 'तेऽभ्राद्रिभूपा गुणगोऽद्रिचन्द्राः'—इत्यादिभास्कर-विधिना स्फुटा (स्प· अधि· गणि· अ·) ॥ १७ ॥

...ीं स्वदेशे लग्नानयनमाह ।

रविभुक्तहीनराशेः कला गुणाः स्वोदयासुभिर्भक्ताः ।
राशिकलाभिर्लब्धाः प्रश्नासुभ्योऽसवः शोध्याः ॥ १८ ॥
प्रक्षिप्य राश्यभुक्तं शेषासुभ्यः क्रमेण यावन्तः ।
शुध्यन्त्युदयाः सूर्ये तावन्तो राशयः क्षेप्याः ॥ १९ ॥
शेषात्त्रिंशद्गुणितादविशुद्धस्योदयासुभिर्विभजेत् ।
लब्धं भागादि रवौ प्रक्षेप्यं स्यात्तथाकृते लग्नम् ॥ २० ॥

रविभुक्तहीनराशेः कला भोग्यकलाः । प्रश्नासुभ्य इष्टकालासुभ्यः । राश्यभुक्तं राशिभोग्यभागान् सूर्ये प्रक्षिप्य संयोज्य । शेषं स्पष्टार्थम् ।

अत्रोपपत्तिः । 'तात्कालिकार्केण युतस्य राशेरभुक्तभागैर्गुणितोद-यात् स्यात्' इत्यादि भास्करविधिना स्फुटा । (त्रिप्र· अ· गणि·) ॥ १८–२० ॥

इदानीं लग्नात् कालानयनमाह ।

रविराश्यभुक्तलिप्तास्तदुदयगुणिता हृता गृहकलाभिः ।
लब्धं प्राणाः स्थाप्याः प्रक्षिप्यार्के गृहाभुक्तम् ॥ २१ ॥
तावत्सूर्ये राशीन् क्षिपेत् समं राशिभैर्यावत् ।
क्षिप्तगृहाणां प्राणान् प्रक्षिप्य स्थापितेष्वसुषु ॥ २२ ॥
तदधिककलोदयवधं राशिकलाभिर्भजेत् फलप्राणान् ।
प्रक्षिप्य प्राणेषु प्राणाः सूर्योदयादसकृत् ॥ २३ ॥

गृहाभुक्तं भोग्यकलाः । राशिभैर्लग्नराशिभिः । समं तुल्यम् । तद-धिककला लग्नभुक्तकलाः । उदयो लग्नराश्युदयप्राणाः । शेषं स्पष्टा-र्थम् ।

अत्रोपपत्तिः । 'अर्कस्य भोग्यस्तनुभुक्तयुक्तो मध्योदयाढ्यः समयो विलग्नादि' त्यादि भास्करविधिना स्फुटा (त्रि॰ प्र॰ ग॰ अ॰) ॥ २१—२३ ॥

इदानीं विलोमलग्नं ततः कालानयनमाह ।

प्रागुदये प्रश्नासुभिरूनोऽर्को भुक्तराशिभिर्लग्नम् ।
कृत्वैवमूनमर्कं लग्नसमं प्राग् भवेत् कालः ॥ २४ ॥

'प्रश्नासुभिः प्राक् पूर्वमुदये लग्नेऽपेक्षिते भुक्तराशिभिर्भुक्तभागै-र्भुक्तै राशिभिश्चार्क ऊनस्तदा लग्नं भवेत् । लग्नात् कालानयने चार्कं लग्नसममूनं कृत्वा एवं प्राक् सूर्योदयात् प्राक् काल इष्टकालो भवेत् । अर्थाद्यैर्भागैर्यैराशिभिरूनोऽर्को लग्नसमो भवेत्तत्संबन्धिनामसूनां योग इष्टकालो भवेत् ।

अत्रोपपत्तिः । 'भुक्तासुशुद्धेर्विपरीतलग्नं भुक्तांशगेहाप्तलवोनितोऽर्कः । इत्यादि भास्करविधिना स्फुटा (त्रि॰ प्र॰ ग॰) ॥ २४ ॥

इदानीमिष्टशङ्कुमाह ।

गतशेषाल्पस्याह्नः सौम्येतरगोलयोश्चरार्धेन ।
ऊनाधिकस्य जीवा स्वाहोरात्रार्धसङ्गुणिता ॥ २५ ॥
त्रिज्याहृता युतोना क्षितिज्यया सौम्ययाम्ययोश्छेदः ।
छेदोऽवलम्बकगुणो व्यासार्धविभाजितः शङ्कुः ॥ २६ ॥

अह्नो दिवसस्य गतशेषयोर्योऽल्पस्तस्यार्थादुन्नतकालस्य सौम्येतरगोलयोश्चरार्धेन क्रमेणोनाधिकस्य जीवा सूत्रं द्युज्यासङ्गुणा त्रिज्याहृता कला भवतीत्यर्थः । सा सौम्ययाम्ययोर्गोलयोः क्षितिज्यया युतोना छेद इष्टहृतिर्भवति । स छेदोऽवलम्बकेन लम्बज्यया गुणो व्यासार्धेन त्रिज्यया विभाजितः शङ्कुरिष्टो भवेदिति ।

अत्रोपपत्तिः । 'अथोन्नतादूनयुताच्चरेण' त्यादिभास्करविधिना छेदानयनं सुगमम् । ततस्त्रिज्यया यदि लम्बज्या कोटिस्तदा छेदेन किं जात इष्टशङ्कुरिति ॥ २५—२६ ॥

इदानीं प्रकारान्तरेण शङ्कुं ततो दृग्ज्यां चाह ।

विषुवत्कर्णविभक्तश्छेदो वा द्वादशाहतः शङ्कुः ।

शङ्कुकृतिविहीनाया व्यासार्धकृतेः पदं दृग्ज्या ॥ २७ ॥

स्पष्टार्थम् । उपपत्तिश्चात्रत्रैराशिकेनानुपातेन स्फुटा ॥ २७ ॥

इदानीं छायाकर्णावाह ।

दृग्ज्या द्वादशगुणिता विभाजिता शङ्कुना फलं छाया ।
व्यासार्धं छेदहृतं विषुवत्कर्णाहतं कर्णः ॥ २८ ॥

स्पष्टार्थम् ।

अत्रोपपत्तिः । पूर्वार्धस्य 'दृग्ज्यात्रिजीवे रविसङ्कुणे ते शङ्कूद्धृते भाश्रवणौ भवेता' मित्यादिभास्करविधिना स्फुटा । कर्णानयनेऽनुपातो यदि विषुवत्कर्णेन द्वादश कोटिस्तदा छेदेन किं जात इष्टशङ्कुः । पुनरिष्टशङ्कुना यदि त्रिज्या कर्णस्तदा द्वादशाङ्गुलशङ्कुना किं जात-शछायाकर्णः $= \frac{\text{त्रि} \times १२}{\text{इशं}} = \frac{१२\ \text{त्रि}}{\frac{१२\ \text{छे}}{\text{विक}}} = \frac{\text{विक} \cdot \text{त्रि}}{\text{छे}}$ । अत उपपन्नं कर्णानयनम् ।

इदानीं प्रकारान्तरेण कर्णानयनमिष्टान्त्यां चाह ।

गुणितं वा द्वादशभिर्व्यासार्धं शङ्कुना हृतं कर्णः ।
जीवा चयवृद्धिज्यायुतहीना ज्या क्रियतुलादौ ॥ २९ ॥

जीवा गतशेषाल्पस्य गोलक्रमाच्चरार्धानयुतस्य । अर्थात् सूत्रम् । सा चयवृद्धिज्यया चरज्यया क्रियतुलादौ युतोना । एवं ज्या-इष्टान्त्या भवेत् ।

अत्रोपपत्तिरतिस्पष्टा ॥ २९ ॥

इदानीं प्रकारान्तरेण छेदाद्यानयनमाह ।

स्वाहोरात्रार्धगुणा व्यासार्धविभाजिताऽथवा छेदः ।
शङ्क्वादि प्राग्वज्ज्यास्वाहोरात्रार्धघातहृता ॥ ३० ॥

सा पूर्वसाधितेष्टान्त्या द्युज्यागुणा त्रिज्याहृताऽथवा प्रकारान्तरेण छेद इष्टहृतिः स्यात्ततः प्राग्वत् शङ्क्वादि भवेत् । ज्याया इष्टान्त्यायाः स्वाहोरात्रार्धस्य द्युज्यायाश्च यो घातस्तेन हृता का व्यासार्धकृतिरित्यग्रे संबन्धः ।

अत्रोपपत्तिः । पूर्वार्धस्यातिसुगमा । उत्तरार्धस्याग्रिमश्लोकेन सह भविष्यति ॥ ३० ॥

इदानीं प्रकारान्तरेण छायाकर्णं शङ्कुं चाह ।

व्यासार्धकृतिर्गुणिता विषुवत्कर्णेन वा भवेत् कर्णः ।
लम्बगुणो वा घातः शङ्कुर्व्यासार्धकृतिभक्तः ॥ ३१ ॥

घातो वाऽर्कगुणस्त्रिज्याविषुवत्कर्णवधहृतः शङ्कुः ।
कर्णकृतेः संशोध्य द्वादशवर्गं पदं छाया ॥ ३२ ॥

घात इष्टान्त्याद्युज्याघातः । शेषं स्पष्टार्थम् ।

अत्रोपपत्तिः । इष्टान्त्या द्युज्यागुणा त्रिज्याहृता जातश्छेदः $= \frac{\text{ज्या}\cdot\text{द्यु}}{\text{त्रि}}$ । ततो 'व्यासार्धं छेदहृतं विषुवत्कर्णाहतं कर्णः' इत्यादिना छायाकर्णः $= \frac{\text{त्रि}^{2}\cdot\text{विक}}{\text{ज्या}\cdot\text{द्यु}}$ । 'त्रिज्यार्कघातः श्रुतिहृच्चरः स्या'दित्यादि भास्करोक्तेन विधिना इष्टशङ्कुः $= \frac{१२\,\text{त्रि}\times\text{ज्या}\cdot\text{द्यु}}{\text{त्रि}^{२}\,\text{विक}} = \frac{१२\,\text{ज्या}\cdot\text{द्यु}}{\text{त्रि}\cdot\text{विक}}$
$= \frac{१२\,\text{त्रि}}{\text{विक}}\cdot\frac{\text{ज्या}\cdot\text{द्यु}}{\text{त्रि}^{२}} = \frac{\text{लंज्या}\cdot\text{ज्या}\cdot\text{द्यु}}{\text{त्रि}^{२}}$ इत्यनेन शङ्क्वानयनमुपपद्यते । छायानयनोपपत्तिरतिसुगमा ॥ ३१–३२ ॥

इदानीमिष्टच्छेदान्त्ययोर्विशेषमाह ।

अल्पाः प्रश्नासूनां यदि बहवश्चरदलासवः क्षितिजा ।
हृतयोना जीवोना त्र्यवृद्धिज्योक्तवच्छेषम् ॥ ३३ ॥

यदि प्रश्नासूनामिष्टासूनां संख्या अल्पाश्चरासवश्च बहव उत्तरगोले तदा चरासुभ्य इष्टासूनपास्य शेषस्य जीवा सूत्रसंज्ञा स्यात् । सा द्युज्यागुणा त्रिज्याभक्ता ऽर्थात् कला स्यात् । तया हृतयोना क्षितिजा कुज्या छेदो भवेत् तथा त्र्यवृद्धिज्या चरज्या च जीवया सूत्रसंज्ञयोना शेषमिष्टान्त्या स्यात् । तत इष्टहृत्यन्त्याभ्यां शेषं शङ्क्वादि उक्तवत्साध्यमित्यर्थः । अत्र चतुर्वेदाचार्यस्यापीदृशी व्याख्या ।

अत्रोपपत्तिः । 'यत्र क्वचिच्छुद्धिविधौ यदेह शोध्यं न शुध्येद्वि-परीतशुद्ध्या' इत्यादि भास्करविधिना विपरीतशोधनेन स्फुटा ॥ ३३ ॥ (गणिताध्याय–त्रिप्रश्नाधिकारस्य ६३ श्लोको द्रष्टव्यः ।)

इदानीं हृत्यन्त्ययोः साधनमाह ।

स्वाहोरात्रार्धमुदग्दक्षिणयोः क्षितिजया युतविहीनम् ।
द्युदलान्त्यज्या त्रिज्या क्षयवृद्धिज्यायुतोनान्त्या ॥ ३४ ॥

उदग्दक्षिणयोर्गोलयोः स्वाहोरात्रार्धं द्युज्या क्षितिज्यया यथाक्रमं युतविहीनं तदा द्युदलान्त्यज्या हृतिर्भवेत् । एवं गोलक्रमेण त्रिज्या क्षयवृद्धिज्यया चरज्यया युतोनाऽन्त्या स्यादिति ।

अत्रोपपत्तिः । 'क्षितिज्ययैवं द्युगुणश्च सा हृतिश्चरज्ययैवं त्रिगुणोऽपि सान्त्यका' इत्यादि भास्करविधिना स्फुटा (त्रि· प्र· गणि·) ॥ ३४ ॥

इदानीं प्रकारान्तरेणेष्टकर्णसाधनमाह ।

छेदहृता द्युदलान्त्या दिनार्धकर्णेन सङ्गुणा कर्णः ।
भक्ता ज्ययाथवान्त्या दिनार्धकर्णाहता कर्णः ॥ ३५ ॥

द्युदलान्त्या हृतिर्दिनार्धकर्णेन दिनार्धच्छायाकर्णेन गुणा छेदेन हृत्या हृता फलं कर्णो इष्टकर्णो भवेत् । अथवाऽन्त्या दिनार्धकर्णगुणा ज्यया इष्टान्त्यया भक्ता कर्णो भवेत् ।

अत्रोपपत्तिः । 'त्रिज्यार्कघातः श्रुतिहृच्चरः स्या' दित्यादिभास्कर-विधिना मध्याह्नशङ्कुः $= \frac{\text{१२ त्रि}}{\text{मक}}$ । ततोऽत्रत्रैराशिकानुपातेन यदि हृत्या दिनार्धशङ्कुस्तदेष्टहृत्या किं जात इष्टशङ्कुः $= \frac{\text{१२ त्रि· इहृ}}{\text{मक· हृ}} = \frac{\text{१२ त्रि}}{\text{मक}} \cdot \frac{\text{इश्रं}}{\text{श्रं}}$

ततो 'दृग्ज्यात्रिजीवे रविसङ्गुणे ते शङ्कूद्धृते भाश्रवणौ भवेताम्'–इत्यादि-भास्करोक्तेन इष्टच्छायाकर्णः $= \frac{\text{१२ त्रि· मक· हृ}}{\text{१२ त्रि· इहृ}} = \frac{\text{मक· हृ}}{\text{इहृ}}$

$= \frac{\text{१२ त्रि· मक· श्रं}}{\text{१२ त्रि· इश्रं}} = \frac{\text{मक· श्रं}}{\text{इश्रं}}$ । अत उपपन्नं सर्वम् ।

इदानीं प्रकारान्तरेणेष्टहृतिमाह ।

द्युदलान्नतोत्क्रमज्यां स्वाहोरात्रार्धसङ्गुणां विभजेत् ।
व्यासार्धेन फलोना द्युदलान्त्यज्याथवा छेदः ॥ ३६ ॥

द्युदलाद्या नतोत्क्रमज्या भवेदर्थादिष्टकाले मध्याह्नाद्यो नतकालस्तस्योत्क्रमज्या या तां द्युज्यागुणां त्रिज्यया विभजेत् । द्युदलान्त्यज्या हृतिः फलोना पूर्वागतेन फलेनोनाऽथवा छेद इष्टहृतिः स्यात् ।

अत्रोपपत्तिः । 'नतोत्क्रमज्या शर इत्यनेन हीनान्त्यका वाऽभिमतान्त्यका स्या'दित्यादिना भास्करोक्तेन विधिना स्फुटा (त्रि॰ प्र॰ य-ग॰) ॥ ३६ ॥

इदानीं प्रकारान्तरेणेष्टान्त्यां छायानयनभेदांश्चाह ।

अन्त्या नतोत्क्रमज्याहीना ज्या षट् पृथक् छेदः ।
ज्याभ्यां च सह फलानि छायानयनानि षट्त्रिंशत् ॥ ३७ ॥

नतोत्क्रमज्याहीनाऽन्त्या ज्येष्टान्त्या स्यादेवमत्र द्वाभ्यामिष्टान्त्याभ्यां सह छेदः पृथक् षट् । अर्थादेवं छेदस्य चत्वारः प्रकारा इष्टान्त्यायाश्च प्रकारद्वयम् । 'जीवा चयवृद्धिज्यायुतहीना ज्या क्रियतुलादा' वित्यनेनैकः प्रकारोऽत्र 'अन्त्या नतोत्क्रमज्याहीना ज्येत्यनेन द्वितीयः प्रकारः । एवमिष्टान्त्यायाः प्रकारद्वयम् । द्वाभ्यामिष्टान्त्याभ्यां 'स्वाहोरात्रार्धगुणा व्यासार्धविभाजिताऽथवा छेदः' इत्यनेन इष्टहृतेः प्रकारद्वयम् । 'ऊनाधिकस्य जीवा स्वाहोरात्रार्धसङ्गुणिता' इत्यादिना छेदस्यैकः प्रकारः । 'द्युदलान्नतोत्क्रमज्या' मित्यादिना द्वितीयः प्रकारः । एवमत्रेष्टान्त्यया द्वाविष्टहृतेश्चत्वारो यद्योगेन षड् भवन्ति । 'छेदोऽवलम्बकगुणः' इत्यनेन 'विषुवत्कर्णविभक्तश्छेदो वा' इत्यनेन शङ्कोरानयने प्रकारद्वयम् । 'व्यासार्धं छेदहृत' मित्यनेन छायाकर्णानयनस्य प्रकार एकः । 'दृग्ज्या द्वादशगुणिता' इत्यनेन द्वाभ्यां शङ्कुभ्यां छायानयने प्रकारद्वयम् । 'गुणितं वा द्वादशभिर्व्यासार्धं' मित्यनेन द्वाभ्यां शङ्कुभ्यां छायाकर्णानयने प्रकारद्वयम् । 'छेदहृता द्युदलान्त्ये' त्यादिना छेदेन क-

र्णानयने प्रकार एकः । एवमत्र छेदतः कर्णानयने प्रकारचतुष्कम् । 'कर्ण-कृतेः संशोध्य द्वादशवर्गं पदं छाया' इत्यनेन कर्णतश्छायानयने प्रकारचतुष्कम् । प्रकारद्वयं च छेदजनितशङ्कुतः सिद्धमेव । एवमत्र छेदतश्छायानयने षट् प्रकाराः । 'व्यासस्वाहोरात्रार्धघातहृते' त्यादिनैकः प्रकारः कर्णवशतः । 'लम्बगुणो वा घातः शङ्कु' रित्यादिना शङ्कुतो ('दृग्ज्या द्वादशगुणि' तेत्यनेन, 'गुणितं वा द्वादशभि' रित्यादिना च) प्रकारद्वयम् । 'घातो वाऽक्षगुणः' इत्यादिना शङ्कुतः पुनः पूर्ववत् प्रकारद्वयम् । 'भक्ता न्ययाऽथवान्त्या दिनार्धकर्णाहता कर्णः' इत्यादिना कर्णत एकः प्रकारः । एवमिष्टान्त्यायाश्छायानयनेऽपि प्रकारषट्कम् । पूर्वमिष्टहृतेश्चत्वारो भेदा इष्टान्त्याया द्वौ भेदाविति षड्भेदा येभ्यश्छायानयने षट्त्रिंशदानयनानि फलानि भवन्ति ।

अत्रोपपत्तिः । दृष्टान्त्यानयने 'नतोत्क्रमज्या शर इत्यनेनेत्यादि-भास्करोक्तेन स्फुटा ॥ ३७ ॥

इदानीमुन्नतकालं नतकालं चाह ।

छायाकर्णविभक्ता विषुवत्कर्णेन सङ्गुणा त्रिज्या ।
लब्धं सौम्येतरयोः क्षितिज्यया हीनसंयुक्तम् ॥ ३८ ॥
गुणितं व्यासार्धेन स्वाहोरात्रार्धभक्तलब्धधनुः ।
उत्तरगोले युक्तं याम्ये हीनं चरप्राणैः ॥ ३९ ॥
दिनगतशेषप्राणाः प्रागपरदिनार्धयोर्विशोध्यास्तम् ।
व्यासार्धात् शेषोत्क्रमजीवाचापं नतप्राणाः ॥ ४० ॥

सौम्येतरयोरुत्तरदक्षिणगोलयोः । प्रागपरदिनार्धयोः पूर्वापरकपालयोः । आप्तं 'गुणितं व्यासार्धेन स्वाहोरात्रार्धेनाप्तोद् द्युज्यया भक्तं, यल्लब्धं सूत्रसंज्ञम् । शेषोत्क्रमजीवाचापं शेषस्योत्क्रमजीवाखण्डैश्चापम् । शेषं स्पष्टार्थम् ।

अत्रोपपत्तिः । इष्टशङ्कुः $= \frac{\text{१२ त्रि}}{\text{इछाक}}$ । ततोऽवत्तेत्रानुपातेन इष्ट-

हृतिः $= \frac{\text{विक}}{\text{१२}} \cdot \frac{\text{१२ त्रि}}{\text{इछाक}} = \frac{\text{विक} \cdot \text{त्रि}}{\text{इछाक}}$ । अतः कुज्यासंस्कारेण कलानयनं सुगमम् । ततो द्युज्यानुपातेन लब्धं सूत्रम् । तस्य धनुरुन्मण्डलादुन्नतकालस्तत्र चरसंस्कारेण स्वदेशे पूर्वापरकपालयोरुन्नतकाल एव दिनगतशेषप्राणाः । आप्तं सूत्रं नतकालकोटिज्यासमं व्यासार्धात् विशोध्य शेषं नतकालोत्क्रमज्या । उत्क्रमज्याखण्डैस्तच्चापं पूर्वापरकपालयोर्नतप्राणा भवन्तीति सर्वं स्फुटम् ॥ ३८–४० ॥

इदानीं प्रकारान्तरेणोन्नतकालं नतकालं चाह ।

स्वाहोरात्रार्धेन छायाकर्णेन भक्तायाः ।
विषुवत्कर्णगुणाया व्यासार्धकृतेः फलं सौम्ये ॥ ४१ ॥
क्षयवृद्धिज्याहीनं युक्तं याम्ये धनुश्चरप्राणैः ।
सौम्ये युतं विहीनं याम्ये प्रागपरयोः प्राणाः ॥ ४२ ॥
अह्नो गतावशेषाः फलमन्त्याया विशोध्य शेषस्य ।
धनुरुत्क्रमजीवाभिः पूर्वापरयोर्नतप्राणाः ॥ ४३ ॥

विषुवत्कर्णगुणाया व्यासार्धकृतेः स्वाहोरात्रार्धेन द्युज्यया छायाकर्णेन च भक्तायाः फलं ग्राह्यम् । तत् सौम्ये गोले क्षयवृद्धिज्यया चरज्यया हीनं याम्ये युक्तं यद्भवेत्तस्य धनुरुत्तरगोले चरासुभिर्युतं याम्ये विहीनं तदा पूर्वापरकपालयोरह्नो दिवसस्य गतावशेषा उन्नतकालो भवेत् । शेषं स्पष्टार्थम् ।

अत्रोपपत्तिः । इष्टशङ्कुः $= \frac{\text{१२ त्रि}}{\text{इछाक}}$ । तत इष्टहृतिरक्षक्षेत्रानुपातेन $= \frac{\text{विक}}{\text{१२}} \cdot \frac{\text{१२ त्रि}}{\text{इछाक}} = \frac{\text{विक} \cdot \text{त्रि}}{\text{इछाक}}$ । द्युज्यानुपातेन इष्टान्त्या $= \frac{\text{विक} \cdot \text{त्रि}^2}{\text{द्युज्या} \cdot \text{इछाक}}$ अन्यत् सर्वं भास्करत्रिप्रश्नाधिकारतः स्फुटम् ॥ ४१–४३ ॥

इदानीं पुनः प्रकारान्तरेणोन्नतकालं नतकालं चाह ।

दिनदलकर्णगुणान्त्या छायाकर्णोद्धृता फलोनान्त्या ।
शेषस्योत्क्रमजीवा धनुर्दिनार्धान्नतप्राणाः ॥ ४४ ॥

चरदलजीवोनाधिकफलक्रमज्याधनुश्चरार्धैन ।
युतहीनं पूर्वाह्णे दिवसगतं शेषमपराह्णे ॥ ४५ ॥

अन्त्या दिनार्धकर्णेन गुणा इष्टच्छायाकर्णेन भक्ता यल्लब्धं तत् फलसंज्ञं ज्ञेयम् । शेषं सुगमम् ।

अत्रोपपत्तिः । दिनदलशङ्कुः $= \frac{\text{१२ त्रि}}{\text{दिदक}}$। इष्टशङ्कुः $= \frac{\text{१२ त्रि}}{\text{इक}}$। दिनार्धशङ्कुकोट्या यदि हृतिर्लभ्यते तदाभीष्टशङ्कुना किं जातेष्टहृतिः $= \frac{\text{हृ· दिदक}}{\text{इक}}$। ततो द्युज्यानुपातेनेष्टान्त्या $= \frac{\text{त्रि· हृ· दिदक}}{\text{द्यु· इक}} = \frac{\text{अन्त्या· दिदक}}{\text{इक}}$ । इष्टान्त्याया एव फलसंज्ञा । गोलक्रमात् चरदलजीवयोनमधिकं च फलं सूत्रसंज्ञं भवति तस्य क्रमज्याखण्डैर्धनुरुन्मण्डलादुन्नतकालस्ततो दिनगतशेषानयनं सुगमम् । शेषवासना चातिस्फुटा ॥ ४४–४५ ॥

इदानीं नवत्यधिकचापस्योत्क्रमज्यां त्रिज्यातोऽधिकाया उत्क्रमज्यायाश्चापं चाह ।

उत्क्रमजीवाभ्यधिकक्रमज्यया संयुतं धनुर्धनुषा ।
व्यस्तविशुद्धौ हीनाश्चरासवः पूर्ववच्छेषम् ॥ ४६ ॥

अत्र व्यासार्धं नवतेः कलाः खखाब्धिबाणाः ५४०० इति द्वयमध्याहार्यम् । तेनायमर्थः । खखाब्धिबाणेभ्यो यावत्यः कला अभ्यधिकास्तासां क्रमज्यया युतं व्यासार्धं (त्रिज्या) खखाब्धिबाणाधिकचापस्योत्क्रमज्या स्यात् । एवं त्रिज्यातो यावत्यधिकोत्क्रमज्या क्रमज्याखण्डैस्तच्चापं खखाब्धिबाणैः संयुतं धनुः स्यात् । एवमुत्तरगोले चरासुभ्य उन्नतकालासवो यदाल्पास्तदा व्यस्तविशुद्धिस्तस्यां सत्यां धनुषोन्नतकालासुभिश्चरासवो हीनास्तज्ज्या विपरीतं सूत्रसंज्ञं भवेत् । ततः शेषमिष्टहृत्यादिकं पूर्ववज्ज्ञेयं किन्तु धनर्णयोरन्तरमेव योग इति बीजयुक्त्या सुधिया योगे वियोगो विधेयः ।

अत्रोपपत्तिः । विपरीतक्रियया सुगमा ॥ ४६ ॥

इदानीं दिनदलोन्नतनतांशसाधनमाह ।

दिनमध्यार्कक्रान्त्यक्षभागयोगान्तरं समान्यदिशोः ।
नतभागा नतभागान्नवतेः प्रोह्योन्नताः शेषाः ॥ ४७ ॥

स्पष्टार्थम् ।

अत्रोपपत्तिः । 'पलावलम्बावपमेन संस्कृतौ नतोन्नते ते भवतो दिवादले' इत्यादिभास्करविधिना स्फुटा ॥ ४७ ॥

इदानीमिष्टदिनार्धे छायासाधनमाह ।

नतभागज्या द्वादशगुणोन्नतांशज्यया हृता लब्धम् ।
इष्टदिनार्धच्छाया यथोक्तकरणैर्दिनार्धाद्वा ॥ ४८ ॥

दिनार्धात् सकाशाद्यथोक्तकरणैर्हृत्यादिभिर्वा दिनार्धच्छाया साध्या । शेषं स्पष्टार्थम् ।

अत्रोपपत्तिः । 'दृग्ज्यात्रिजीवे रविसङ्गुणे ते' इत्यादिभास्करविधिनाऽतिस्फुटा ॥ ४८ ॥

इदानीं प्रकारान्तरेण मध्यच्छायासाधनमाह ।

उन्नतजीवाभक्तं व्यासार्धं द्वादशाहतं कर्णः ।
मध्यच्छाया कर्णद्वादशकृत्यन्तरपदं वा ॥ ४९ ॥

व्यासार्धं त्रिज्या । उन्नतजीवा मध्याह्नशङ्कुः । शेषं स्पष्टार्थम् ।

अत्रोपपत्तिः । पूर्वप्रकारेणातिस्फुटा ॥ ४९ ॥

इदानीं हृत्यादीनां बहुसाधनत्वमाह ।

द्युदलान्त्या ज्या छेदो मध्यच्छाया यथोक्तकरणैर्वा ।
अन्त्याज्याछेदाद्यैर्मध्यच्छायाथवा बहुधा ॥ ५० ॥

यथोक्तकरणैर्दिनगतशेषाल्पस्येत्यादिप्रकारैर्मध्याह्ने द्युदलान्त्या हृतिः । ज्या इष्टान्त्या छेद इष्ट हृतिः । मध्यच्छाया प्रसिद्धा । एतत् सर्वं वा भवति । अथवा अन्त्याज्याछेदाद्यैरन्त्येष्टान्त्येष्टहृत्यादिभिः पूर्वोक्तविधिना बहुधाऽनेकधा मध्यच्छाया साध्या ॥ ५० ॥

Others, again, holding that the vṛtti in the form of the *I* is indeed a vṛtti of the Inner Organ, deny that it is knowledge in the sense of a produced mental activity (ज्ञानं); for it is not produced by any of the causes of mental activity;[1] thus, it is unlike the vṛtti that is produced in the case of religious meditation, or in the case of desire etc. It cannot be said that a perceptional knowledge of the *I* is produced by the organ of vision or by any other organ of sense. Nor can inference be the instrument; for it is a common fact that a man is conscious of the *I* even when he has not gone through any inferential process. Nor is the Inner Organ the instrument; for in no other case has it been proved that the Inner Organ, which is the *material* cause of all vṛttis, is also their *instrumental* cause.[2] Nor do these writers admit that their view implies that the recognition of the identity of the *I* is not a form of mental activity (jñāna). For although such recognition is not a form of mental activity as regards the I *per se*, it has this character in regard to the object-element, (तत्तांशे, viz. the *I* recognised as a self-identical object); because this recognition is an activity produced out of existing mental retenta by means of remembrance as the instrument. And, further, since the object of knowledge has different aspects,[3] it is possible for a vṛtti (ज्ञाने) in the form of the object to have the character of a mental activity in regard to one

1. Knowledge as a mental activity (मानसी क्रिया) demands some instrument (करणं) whereby it may be aroused.

2. A thing cannot be both material (substantial) and instrumental cause of the one product.

3. अंशभेदेनेति । विषयैकदेशोऽत्रांशः स च प्रागेव दर्शितः अहमंशे तत्तांशे च इति ॥ Ṭī.

aspect and not to have it in regard to another aspect of the object; just as a vṛtti is said to be *immediate* and *mediate*, according as the object is, or is not, in contact with some organ of sense; or is said to have, or not to have, the character of pramā, according as the object is one now presented for the first time or is a re-presented object.[1]

But other writers[2] hold that the vṛtti in the form of the *I* is certainly that mental activity termed knowledge (jñāna); for our immediate assurance expresses itself in the words—I know myself. And an instrument for this activity is possible; for, in accord with the assurance expressed above, we must suppose that the manas,[3] which is the Inner Organ, is also the instrument of this mental activity.

Page 38.

If this be so, i. e. if an *immediate* vṛtti in the form of the *I* is really produced, then the law that a vṛtti has the power to overcome the Nescience concealing the object has in the end to be confined to the case of an *immediate* vṛtti in the form of an *external* object.[4]

But some would deny any such law on the ground that in the case of the false judgment—This thing is

---

1. notes pp. 95, 96, 98.

2. The Ṭīkā explains that this view is based on II. 2. 25, and the Bhāṣya thereto, which teach that Jīva, the thing denoted by *I* (अन्तःकरणोपहितचैतन्यरूपो जीवोऽहमर्थः), is a permanent entity.

3. अत एव च अहङ्कारधर्माणां ज्ञानसुखादीनां केवलसाक्षिभास्यत्वेऽप्यहमर्थ-रूपस्य मनःप्रत्यसाधारणविषयस्य सत्त्वात् तस्येन्द्रियत्वम् । Ṭī. For केवलसाक्षिभास्यत्वं see notes pp. 75, 118, 135.

4. मनसो ऽहमर्थे प्रमाणत्वं न सम्भवति । अहमर्थस्यानावृतसाक्षिचैतन्ये ऽध्यस्तस्याज्ञातत्वाभावेन मनसो ऽज्ञातज्ञापकत्वाभावात् । Ṭī.

silver—the vṛtti that has taken the bare form of the presented object viz. mother-of-pearl, which is denoted by the word *this*, cannot overcome the Nescience which conceals the object; or, that if the vṛtti be supposed to have this power (अन्यथा), then the false silver cannot come into being at all, since (*ex hypothesi*) its material cause, sc. Nescience, has been destroyed previously by the vṛtti.

To this objection some writers reply as follows: The material cause of the false silver is only that Nescience which conceals all the distinctive properties of the mother-of-pearl shell; since these properties continue to be hidden, i. e. unperceived, even after a vṛtti in the form of the object has destroyed the Nescience which concealed the object as a bare something (idamaṃça); and because the false silver is presented to consciousness only when the distinctive properties of the pearl shell are not thus presented, and is not presented when these properties are presented.[1] And their view (say these writers) is supported by the Vivaraṇa,[2] which in treating of false predication declares that its material cause is that Nescience whose presence and absence we perceive as attendant on our non-perception and perception, respectively, of the falsely surmised object. And it is on this very ground (say they) that a distinction is made in the Saṃkṣepaçārīraka[3] between two aspects of the real thing,

1. प्रथमतत्पदं विशेषांशपरं द्वितीयतत्पदमध्यासपरम् । Ṭī.

2. In Vedānta literature, Çaṇkara's Introduction to the first sūtra is commonly described as the Adhyāsabhāṣya, and Padmapāda's Pañcapādikā as the Ṭīkā, and Prakāçātman's Pañcapādikāvivaraṇa as the Vivaraṇa, (see Viz. Sansk. Series).

3. Saṃkṣepaçārīraka. I. 31, 32.

which may be regarded (in the order of existence) as the *adhiṣṭhāna* or material cause of the false silver, i. e. the pearl shell, which is concealed by the Nescience that projects the false silver in its place; and (in the order of thought) as the *ādhāra* or logical subject, the bare something denoted by the word *this*, i. e. the pearl shell, which though really different from the false silver appears as the logical subject of the judgment with the attributes of silver as its predicate.[1]

Others, however, hold that the false silver, which is perceived as identical with the bare thing denoted in the judgment—this thing is silver—, has as its material cause only that Nescience which conceals the bare thing;[2] and that although its *concealing* power is destroyed by the vṛtti that has taken the form of the bare thing, yet as continuing to exist as a *projecting* power,[3] this Nescience can be the material cause of the false silver. And this must be admitted (say these writers) on the same grounds that Nescience as aided by its projecting power is held to be the material cause of the unreal inverted tree seen reflected in water, and of the unreal manifold sense-experience which continues to present itself to the man who is emancipated while still living, although the concealing power of Nescience was destroyed after a full and complete knowledge was obtained of that reality (adhiṣṭhāna) in regard to which the false predication was made in each case.

1. अस्मिन्मते अधिष्ठानारोप्ययोरेकज्ञानविषयत्वं नास्ति किन्तु आधारारोप्ययोरेव तत् इति न भ्रमस्य शुक्त्यंशोल्लेखापत्तिरिति भावः। Ṭi.

2. नन्वधिष्ठानारोप्ययोरारोपे प्रकाशमानत्वस्य सम्भावनाभाष्यटीकाविवरणादिषु समर्थितत्वात् तद्विरोध इत्याशङ्क्य मतान्तरं तदविरुद्धमाह 'अपरे तु' इति। Ṭi.

3. Cf. p. 41.

On the other hand, the Kavitārkika Cakravartin, Nṛsiṃhabhaṭṭa Upādhyāya maintains that, previous to the production of the false silver, no vṛtti in the form of the bare thing exists at all, as a vṛtti distinct from the erroneous one which finds expression in the judgment—this thing is silver—; and that, therefore, it is a groundless task to inquire whether a vṛitti in the form of the bare thing can, or cannot, destroy Nescience.[1] To explain further: It cannot be said that such a vṛitti is vouched for by our direct consciousness of it as distinct from the false vṛtti expressed in the judgment—this thing is silver—; since we are not conscious of two judgments (the one expressed by "*this* is" and the other by "this is silver"). Nor can it be said that the cause of false predication is a general or indefinite knowledge of the underlying real object, and hence a vṛtti in the form of the bare object must be inferred to exist from the existence of the effect, viz. false predication. For no proof is forthcoming that such general or indefinite knowledge produces a false judgment. Nor as a proof of this can it be urged that, where no contact of a sense-organ with the real object exists, there no false predication of silver and the like is brought about. For this would prove that it was only the contact of a *defective* sense-organ that

1. पूर्व्वमतद्वये इदमाकारवृत्तिसत्त्वात् तदभिव्यक्तचैतन्यरूपमेव शुक्तिरजतादिज्ञानं न तु वृत्तिरूपम्। अस्मिन्मते तदभावाद्वृत्तिरूपमेव तज्ज्ञानमितिमन्तव्यं तच्चाग्रे स्फुटं भविष्यति । Ṭī.

The views which Nṛsiṃha opposes are known technically as DHARMIJÑĀNAKĀRAṆAVĀDA i. e. as teaching that a vṛtti in the form of the bare thing presented to the senses is a necessary condition of adhyāsa The Ṭikā explains:—धर्मिज्ञानकारणवादे हि प्रथमम् 'इदम्' इत्येवमाकारा वृत्तिरुदेति तया च वृत्त्या अभिव्यक्ते शङ्खजलाद्यवच्छिन्नचैतन्ये पीतनीलरूपादेरध्यास इति प्रक्रिया।

was the cause of false predication. Nor in reply to this can it be said that false judgment is not invariably attended by such contact, whereas the presentation of the real thing invariably attends the false identification of the Inner Organ and its properties with the self-luminous Inner Self. For this general or indefinite presentation of the underlying reality (तत्त्व) is not found in the case of the erroneous predication of the common things of practical life (ghaṭādi), since, prior to the perception of these common things, there could be no vṛtti of the visual organ in the form of the Reality underlying them, i. e. of the pure formless Brahman; and because the Illumining Principle underlying these things is concealed by Nescience. And if it be said that the cause of adhyāsa is nothing but Brahman the Principle of Reality and Illumination, whether concealed or not concealed by Nescience, then since this Principle exists, though concealed, as the basis of the perceived object, viz., the mother-of-pearl shell, even before the contact of a sense-organ with this object has taken place, it would follow logically that adhyāsa should occur prior to the contact of sense-organ and object (which is not the case). Nor can it be urged here that the common cause of adhyāsa in general[1] is the underlying Illumining Principle *per se*, and that the special cause of a special kind of adhyāsa, i. e. the prātibhāsika kind (in which the perceived thing has no practical reality), is the same Principle when disclosed to our consciousness (abhivyakta) by means of a vṛtti, and that thus the logical inconsequence noted above is avoided—it being logically con-

Page 39.

1. धर्मिज्ञानकारणवादी शङ्कते 'न चाध्याससामान्ये' इति । Ṭi.

sistent to assign a common cause for a class of facts, and a special cause for a special fact. For if this point be conceded, the Bhaṭṭa replies that the alleged cause of the prātibhāsika or special kind of adhyāsa is not invariably present, e. g. in the case of the conch shell which *appears* yellow (to the jaundiced eye) and the water which *appears* dark as it lies in a well: for there can be no visual consciousness of a colourless object (as Brahman is), and prior to the adhyāsa there is no perception of the (real) white lustre of the shell and the water; hence prior to the adhyāsa there can be no vṛtti in the form of the Real Illumining Principle, which itself colour-less underlies the lustrous shell and the water. Nor can the opponent hold that among the various cases of the special kind of adhyāsa termed prātibhāsika already explained, the special cause viz. the underlying Principle of Reality, when disclosed to our consciousness by means of a vṛtti, operates to bring about only an adhyāsa of silver (in mother-of-pearl). For if the other cases, e. g. the yellow conch shell &c., be excluded from the operation of this special cause (तथा सति), they must be explained as due to the contact of some defective sense-organ; otherwise a false perception of such things should occur prior to the contact of a sense-organ: but in accordance with the law of parcimony it is just this contact of a defective organ that is proved to be the cause of all cases of prātibhāsika adhyāsa; and the operation of this cause serves to explain the fact that false silver is perceived only on certain occasions: hence (the Bhaṭṭa concludes,) it has not been proved that Brahman, the underlying Illumining Principle, whether considered *per se* or as disclosed to

our consciousness by means of a vṛtti, is the cause of any kind of false predication.[1]

But here the opponent rejoins:[2] Although Brahman may not be the cause of those other kinds of adhyāsa which do not depend on the recognition of a certain similarity (between the real object and the false object perceived in its stead); yet in such cases of adhyāsa as that of silver, which do depend on the recognition of a certain similarity, we must admit that the cause is our vague perception of the underlying reality, i. e. is our judgment in which the subject (viz. the mother-of-pearl) has for its predicate those definite points of similarity which it shares with the false silver: for if contact with a defective organ be held to be the *sole* cause, then we ought to perceive silver in the place of a piece of charcoal no less than in the place of mother-of-pearl. Nor will the opponent admit that a real similarity in itself (as distinct from our recognition of it) is the cause of adhyāsa, so far as it may be termed a defect in the perceived object; for adhyāsa occurs in regard to a *dissimilar* object, if a *false* recognition of similarity has previously taken place:—thus, the (white coloured) stream of ocean seen at a distance appears like the flat surface of dark coloured rocks. Nor will he accept as satisfactory the statement that the sole cause of adhyāsa is the means or process by which a recognition of similarity is effected, as in accord with the rule that by the cause of a

1. सामान्यत इति। अधिष्ठानप्रकाशमात्रमध्यासमात्रे कारणम्। अभिव्यक्ताधिष्ठानप्रकाशः प्रातिभासिकाध्यासे कारणम्। इतिपूर्वोक्तकार्यकारणभावद्वयमपि न सिद्ध्यति इत्यर्थः। Ṭi.

2. शुक्तिरजताध्यासात्प्रागिदमाकारवृत्तिसिद्धये प्रकारान्तरेण धर्मिज्ञानस्य कारणत्वं शङ्कते। ननु च सादृश्यमिति। Ṭi.

प्रतिज्ञायां धूमवत्त्वादित्युक्ते धूमः किं धर्मिणान्ययोगव्यवच्छेदेन सम्बध्यते उतायोगव्यवच्छेदेन। न प्रथमः पर्वते वृक्षादेरप्युपलब्धेः। न द्वितीयः धूमाभावे ऽपि कदाचित् पर्वतोपलब्धेः। ततश्च साधनाभावे ऽपि धर्म्युपलभ्यत इत्यसिद्धिः। तथा पूर्वोक्तद्वयसमाहारेण साध्यसाधनयोरभावे ऽपि धर्म्युपलभ्यत इति बाधासिद्धी। तथा तस्मिन्नेव प्रयोगे किमत्रावधार्यते। किं पर्वत एवाग्निमान् उताग्निमानेव पर्वतः किं धूमवत्त्वादेवेति। न प्रथमद्वितीयौ महानसादेरग्निमत्त्वोपलम्भात् पर्वते वृक्षाद्युपलब्धेश्च। न तृतीयः धूमाभावे ऽपि तत्रत्यालोकादेरग्निसत्त्वोपलम्भात्। तेन साधनाभावे ऽपि साध्योपलम्भादव्याप्तिरिति। समव्याप्तिके तु कृतकत्वापरामर्शे ऽपि प्रत्ययभेदभेदित्वादेः शब्दानित्य-

---

अग्निसत्त्वोपलम्भात् ततो बाधितः प्रतिज्ञातार्थ इति शेषः। तथा पूर्वोक्तेति। एकैकं विहाय प्रतिज्ञाहेतू युगपत् पूर्ववद्विकल्प्येत्यर्थः। एवं प्रतिज्ञाहेत्वोः प्रत्येकसमुदायपरमवधारणविकल्पं दूषयित्वा तत्साध्यस्यैकस्यावधारणं विकल्प्याद्यं दूषयति। तथा तस्मिन्नेवेति। किं पर्वत एवेति किं धूमवत्त्वात् पर्वतोऽग्निमानेवेति अथ धूमवत्त्वादेव पर्वतोऽग्निमानिति वा साध्यत इत्यर्थः। आलोकादेरित्यादिशब्देन महानसादिशब्दे विशेषः। अत्र विशेषश्च गृह्यते(?) सपक्षैकदेशवृत्तिहेतावेवंविधप्रत्यवस्थानावकाशः सपक्षव्यापिनि कथमिति चेत् तत्राह। समव्याप्तिके त्विति। कृतकत्वापरामर्शे ऽपीति। शब्दोऽनित्यः कृतकत्वादित्युक्ते किमत्राव-

त्वोपलब्धेरव्याप्तं कृतकत्वमिति ज्ञानाभावद्वारेण प्रवृत्तिर्दर्शिता। तथा साध्याभावे ऽपि साधनमुपलभ्यत इति अतिव्याप्त्यापि प्रत्यवतिष्ठते। यथा केवलान्वयिप्रयोगे साध्याव्यापीदं साधनं व्यतिरेकाभावात् प्रसिद्धानैकान्तिकवदिति। अत्र सूत्रं निर्दिष्टकारणाभावे ऽप्युपलम्भादुपलब्धिसम इति। वादिना निर्दिष्टस्य प्रमित्यङ्गस्य व्यापारवतोऽप्यभावे साध्योपलम्भात् प्रत्यवस्थानमित्यर्थः। बीजं तु वाक्यस्यावधारणतात्पर्यं तावदवश्याभ्युपगन्तव्यम्। एवकारार्थमनावृत्त्याप्यार्थेन प्रयोगादित्यभिमानेनावधारणविकल्पे क्रियमाणे तदनुपपत्तिः। बाधादय आरोप्याः दोषसू-

धार्यते किं शब्द एवानित्य इति वा उत कृतकत्वादेव शब्दोनित्य इति वा। नाद्यः घटादेरप्यनित्यत्वात्। न द्वितीयः कृतकत्वापरिज्ञाने ऽपि तीव्रस्तीव्रतरस्तीव्रतमः शब्द इत्यादिविलक्षणबुद्धिपरिच्छेद्यत्वसामान्यवत्त्वे सत्यस्मदादिबाह्येन्द्रियग्राह्यत्वादेर्हेतोः शब्दानित्यत्वसिद्धेः कृतकत्वहेतोरप्रयोजकत्वप्रसङ्गादित्यर्थः। न केवलमव्याप्त्या प्रत्यवस्थानमियं जातिः किं त्वतिव्याप्त्यापीत्याह। तथा साध्याभावे ऽपीति। प्रमित्यङ्गस्य अनुमितिजनकस्य व्यापारवतः प्रत्यावृत्तसाध्यज्ञापनशक्तिमतः हेतोरिति शेषः। एवकारार्थमवधारणम्। आर्थेन कारणान्तरादपि तद्धर्मोपपत्तेरित्यत्रापि शब्दार्थेन प्रयोगात् सूत्रकारस्येति शेषः। बाधासाधारणस्वरूपव्याप्यत्वासिद्धयः। अयोग-

लमयुक्ताङ्गाधिक्यम् । अयोगव्यवच्छेदमात्रेणावधारणोपपत्तावन्ययोगव्यवच्छेदेनावधारणास्वीकारात् । तथाभ्युपगमे स्वोक्तिव्यापनाद्व्याघातः । तदुक्तम् कारणान्तरादपि धर्मोपपत्तेरप्रतिषेध इति । अनेन हेत्वन्तरादपि साध्योपपत्तिं वदन् हेतावधारणानङ्गीकारप्रदर्शनेन सर्वत्रापि तदनङ्गीकारं सूत्रयतीति ॥ २५ ॥

स्वस्मिन् विषयिधर्माणां तदतद्रूपकल्पनात् ।
विपर्ययप्रसङ्गः स्याज्जातिश्चानुपलब्धितः ॥ २६ ॥

विषयनिघ्ना धर्मा विषयिधर्माः । ते चोपलब्ध्यनुपलब्धी इच्छानिच्छे द्वेषाद्वेषौ कृत्यकृती शक्त्यशक्ती उपपत्त्यनुपपत्ती व्यवहृत्यव्यवहृती भेदाभेदावित्येवमादयः । एते स्वात्मनि ताद्रूप्येण वर्तन्ते उताताद्रूप्येणेति विकल्प्योभयथापि स्वरूपव्याघातप्रसञ्जनेन प्रत्यवस्थानमनुपलब्धिसमः । नन्वेवं विषयिधर्मसमेत्यभिधीयेत सत्यं सैवार्थानुगता सञ्ज्ञा उपलक्षणसञ्ज्ञे-

व्यवच्छेदमात्रेण यदा धर्मी तदा हेतुः स्वेन सम्बद्ध्यत इति पक्षं विहाय यदा हेतुः तदा धर्मिणा सम्बद्ध्यत एवेत्यङ्गीकारमात्रेण । सर्वत्रापीति । प्रतिज्ञासाध्यादावप्यवधारणानङ्गीकारं सूत्रितवानित्यर्थः ॥ २५ ॥

विषयनिघ्ना विषयमवलम्ब्य प्रवृत्ताः धर्माः कस्यचित् गुणभूताः उपपत्त्यनुपपत्तीसम्भावनासम्भवने । ताद्रूप्येणानुलब्ध्यादिरूपेण उताताद्रूप्येण यद्वा ताद्रूप्येण न वर्तन्त

यमनुपलब्धिसमेति । तद्ध्युपलब्धिरेव मूर्द्धाभिषिक्तो विषयिधर्म इति तदेवोपलक्षणमुचितम् मैवम् उपलब्धिसमसङ्करप्रसङ्गात्। केचित्तु भावात्मकेषु विषयिधर्मेषु प्रवृत्तमिदमेव प्रत्यवस्थानमुपलब्धिसमः अभावात्मकेषु त्वनुपलब्धिसम इति व्याचक्षते। तदशिष्यम् अनादेशिकत्वात् । व्यवच्छेदकवाक्यार्थरुचीनां पूर्वोदाहृतप्रत्यवस्थानस्याजातित्वप्रसङ्गाच्च तस्यान्यत्रानन्तर्भावात् । उपलब्धं लिङ्गं साध्याङ्गमिति तदर्थोऽयं प्रयोगः। सा चोपलब्धिः स्वात्मन्यनुपलब्धिरूपेण वर्तते चेत् साप्युपलभ्या स्यात् नोपलब्धिः विषय-

इत्यर्थः अनुपलब्धिसमः। सङ्करेति। जातिद्वयस्योपलब्धिसम इत्येकनामप्रसङ्गादित्यर्थः । भावात्मकेषु अनन्तरप्रयोगेषु उपलब्धीच्छाद्वेषादिषु अभावात्मकेष्वनन्तरप्रयोगेष्वनुपलब्ध्यनिच्छादिषु । अशिष्यमसाम्प्रदायिकमयुक्तं च। अनादेशिकत्वाद्भाष्यकारादिभिरनुक्तत्वात्। व्यवच्छेदवाक्यार्थरुचीनां नित्यसामान्यानङ्गीकारेण घटादिशब्दानां घटत्वादिसमारोपश्लिष्टव्यक्तिवाचकत्वाभावेनायं घट इति शब्दस्यायं पटादिर्न भवतीति व्यावृत्तिरेवार्थ इतिवदतां बौद्धानामित्यर्थः। पूर्वोदाहृतेति । उपलब्धिसमायां प्रयुक्तावधारणविकल्पस्य अजातित्वप्रसङ्गात् अङ्गाधिक्येनासदुत्तरस्य छलाद्यनङ्गभूतस्य जात्यन्तरोक्तलक्षणहीनस्य भावाभावधर्मरहितस्य च जातावप्यन्तर्भावाभावप्रसङ्गः। अत एव जातिसामान्यलक्षणमतिव्याप्तं स्यादिति भावः। तदर्थोऽयमिति । लिङ्गपक्षदृष्टान्तादीनामुपलब्धिप्रयोजनो-

वत् । अवृत्तेरुपलब्धिरूपेणावर्तमानघटादिवदुपलब्धिर्न स्यादिति तद्विषयो लिङ्गादिर्नोपलभ्यः स्यादिति व्यर्थः प्रयोगः । एवमनुपलब्धत्वाच्छब्दो नास्तीत्युक्ते अनुपलब्धेः स्वात्मनि तद्रूपेण वृत्तौ विषयवत् स्वस्याप्यनुपलब्धत्वात् तद्वदेवाभावप्राप्तावनुपलब्ध्यभावश्चोपलब्धिरेवेति विपरीतापत्तिः स्वात्मनि स्वरूपेणावृत्तौ तु सैव न स्यादिति तद्विषयः शब्दोऽनुपलब्धो न स्यादित्युभयथाप्यसिद्धो हेतुः तदुक्तम् तदनुपलब्धेरनुपलम्भादभावसिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिसमः । यदि ताद्रूप्येण वृत्तावप्यनुपलब्धा न भवति शब्दोप्यनुपलब्धो न स्यात् अनुपलब्धोपि वा

यमनुप्रयोग इत्यर्थः । उपलब्धिरूपेणेति । यथा स्वस्मिन्ननुपलब्धिरूपेण वर्तमानो घटादिर्नोपलब्धिर्भवत्येवमित्यर्थः । तद्विषय उभयमप्यनुपलब्धिरूपोपलब्धिगोचरः । तद्विषय उभयप्रकारेणापि अनुपलब्धिरूपानुपलब्धिगोचरः । असिद्ध इति हेतुः पूर्वं श्रुतशब्दोद्य नास्ति अनुपलब्धत्वादितिहेतुरसिद्धस्ततः शब्दोऽनित्य इत्यभिप्रायः । तदनुपलब्धेरिति । तस्य शब्दादेरनुपलब्धेः कदाचिदनुपलब्धत्वात् कदाचिन्न तदुभयसमाहारेणोपलब्धत्वात् कदाचित् स्वरूपाभावान्न स्वभावसिद्धौ तस्य शब्दादेरनुपलब्धिरिति परोपलब्धिरूपपन्ना तत एव नित्यत्वप्रसङ्ग इति प्रत्यवस्थानमनुपलब्धिसम इति सूत्रार्थः । ताद्रूप्येण वृत्तावप्यनुपलब्धिः स्वस्यामनुपलब्धिरूपेण प्रवर्तत इति पक्षाङ्गीकारेऽपि अनुपलब्धो न भवति शब्द इत्यनुवर्तते तदेवोपपाद-

नैव नास्तीत्युच्येत । तर्ह्यनुपलब्धत्वादिति हेतुस्तत्रा-नैकान्तिकः शब्दे नास्तितां न साधयेदिति । एवमन्यत्रापि विषयिधर्मेषु दर्शयितव्यम् । अनुमानविषयावलम्बनेनापि प्रवर्तते । यथा सन्दिग्धे न्यायः प्रवर्तते सन्देहस्य स्वात्मनि ताद्रूप्येण वृत्तौ विषयवत् स्वयमेव सन्दिग्धः कथं विषयं सन्दिग्धं कुर्यात् । अवृत्तौ तु घटादिवत् सन्देहो न स्यादिति न्यायविषयाभावः । तथा शब्दप्रत्यभिज्ञानं भ्रान्तमित्युक्ते भ्रमयोगाद्भ्रान्तिः । भ्रमः स्वस्मिंस्ताद्रूप्येण वृत्तौ स्वयमेव भ्रान्तः कथं विषयं भ्रान्तं कुर्यात् । अन्यथा स्वव्याघातः । इयं संशयपरीक्षायां सूत्रकारैरुदाहृता विप्रतिपत्तौ च संप्रतिपत्तेः, अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थाया इति ।

यति । अनुपलब्धोपीति । अनुपलम्भात्मकत्वात् अनुपलब्धेरिति सूत्रकारवचनादनुपलब्धावपि भवत्येवानुपलब्धिः ततस्तद्विषयः शब्दोऽनुपलब्धः ततः शब्दो हेतुरिति भावः । तत्पक्षे दोषान्तरमाह । तर्ह्यनुपलब्धत्वादिति । तत्र अनुपलब्धत्वेऽपि सत्यामनुपलब्धौ । एवमन्यत्रापीति । साध्यार्थज्ञानेच्छायां सत्यां तन्निवृत्तये खल्वनुमानप्रसङ्गः सा चेच्छा स्वात्मनि ताद्रूप्येण वर्तते वा न वा उभयथापीच्छा न स्यात् अतस्तन्निवर्तकप्रयोगो व्यर्थ इत्यादिकमूहनीयमित्यर्थः । पूर्वमनुमानमवलम्ब्यास्या जातेः प्रवृत्तिरुक्ता इदानीमनुमेयमवलम्ब्य प्रवृत्तिमाह । अनुमानविषयावलम्बनेनापीति । अन्यथा ताद्रूप्येणावृत्तौ । विप्रतिपत्तौ चेति । विप्रतिपत्तिः संशयकारणमिति न वक्तव्यं विप्रति-

तथा शब्दपरीक्षायां अन्यदन्यस्मादनन्यदित्यन्यता-भावः अनियमे नियमान्नानियम इति। अस्यां च विषयिधर्मोपलम्भः कारणम्। आपाततः प्रतिकूल-तर्क आरोप्यः अतिपीडायामसिद्धिरनैकान्तिकं वा। प्रत्युत्तरं विषयिधर्मः स्वात्मनि ताद्रूप्येण वर्तत इति पक्षं कक्षीकुर्मः। न च स्वात्मनो विषयीकरणं किं तु तदात्मकत्वमिति न स्वरूपव्याघातप्रसक्तिः। तदिदमनङ्गाधिक्यं स्वात्मनो विषयत्वस्यानङ्गस्यैवा-ङ्गीकारात्। तदुक्तम् अनुपलम्भात्मकत्वादनुपलब्धेर-हेतुरिति। अस्याप्युपलक्षणत्वादुपलम्भात्मकत्वादुप-

---

पत्तिरूपेण स्वात्मनि वृत्तावृत्तौ विप्रतिपत्त्यभावादव्यव-स्थात्मकं ज्ञानं संशय इति न वक्तव्यमुभयथाप्यव्यवस्थाया अभावादिति सूत्रतात्पर्यम्। अन्यदन्यस्मादिति। पूर्वो-क्तेभ्यः पश्चादुक्तानां वर्णानामन्यत्वात् न वर्णा नित्या इति न वक्तव्यम् अन्यत्वस्य धर्मेभ्योऽन्यत्वेन अनन्याभा-वादभिव्यञ्जकानां प्रतिवादिनामभिव्यङ्ग्यविशेषे निय-माभावान्न वर्णविशेषाः प्रयत्नव्यङ्ग्या इति न वक्तव्यम् उभयथाप्यनियमाभावादिति सूत्रान्तराभिप्रायः। प्रति-कूलतर्क आत्माश्रयरूपः न विषयीकरणं विषयवन्न स्वमव-लम्ब्य प्रवर्तनं तदात्मकत्वं तत्तद्रूपम् अनुपलम्भात्म-कत्वादनुपलब्धिरूपत्वादनुपलब्धेरसत्त्वप्रतिपादकहेतुना स्वानुपलब्धेरहेतुरिच्छात्मकत्वादिच्छाया अहेतुरित्याद्या-

लब्धो हेतुरित्यादिसूत्रविपरिणामेन सर्वत्र समाधानमूहनीयम् ॥ २६ ॥

साधर्म्यादेर्विपक्षाणां सपक्षत्वप्रसञ्जनम् ।
साधनप्रतिबन्ध्या यत् स ह्यनित्यसमोदयः ॥ २७ ॥

साधर्म्येण वैधर्म्येण वा वादिना साध्योपसंहारे कृते तत्प्रतिबन्द्यभिप्रायेण साधर्म्यादिना सर्वस्यापि साध्यधर्मवत्तां प्रदर्श्य विपक्षस्यापि सपक्षत्वापादानमनित्यसमः । तर्हि साध्यधर्मसमेति लक्ष्येति । सत्यम् एषैवान्वर्थसञ्ज्ञा उपलक्षणनामेदमनित्यसम इति । सूत्रमप्युपलक्षणपरम् यथा साधर्म्यात् तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसम इति । अत्र साधर्म्यग्रहणं वैधर्म्यस्याप्युपलक्षणम् । सर्वानित्यत्वप्रसङ्गादिति सर्वस्यापि साध्यधर्मवत्त्वप्रसङ्गादित्यर्थः । उपलक्षणाभिप्रायसूचनार्थं तुल्यधर्मोपपत्तेरिति सामान्येनोक्तम् । अन्यथा अनित्यत्वधर्मोपपत्तेरित्यवक्ष्यत् तदियमेवं प्रवर्तते यद्याकाशवैधर्म्यादनित्यः शब्दः त्रैलोक्यमपि तद्वैधर्म्यादनित्यं भवेत् । यथा

कारान्तरं सूत्रस्य कल्पयित्वेत्यर्थः ॥ २६ ॥

एषु वक्तव्यत्वादुद्देशक्रममतिलङ्घ्यानित्यसमजातिं तावल्लक्षयति । साधर्म्यादेरिति । साधर्म्यादेर्हेतोः वादिसाध्यसिद्धिश्चेत् तत एव सर्वस्यापि साध्यवत्त्वं स्यादिति प्रत्यवस्थानमनित्यसम इति सूत्रार्थः । तद्वैधर्म्यात् शब्दगु-

वस्तुतस्तु भेदधीनिन्दा ये दुराग्रहेण तां न त्यजन्ति तद्विषया । ये ऽपास्तभेदधियो ऽपि भवान्तरीयभाववशे-नैकविग्रहध्यानादावेव प्रवर्त्तन्ते ते तु न निन्द्या अनेकमूर्त्तिध्यानादेर्युगपत्कर्त्तुमशक्यत्वात् कालभेदेनानुष्ठाने चित्तस्थैर्यासिद्धेः । अन्यत्र प्रवृत्तस्य जन्मान्तरीयध्यानादिरूपचित्तवृत्तिप्रवाहस्य निम्नगाप्रवाहन्यायेनान्यत्र नयने ऽतिक्लेशाच्च । यथा ऽऽह श्रीहरिः पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशो ऽपि स इति । न चैवं भेदबुद्ध्यनुवृत्तिरपि स्यात् परमेश्वरप्रसादासादितशाब्ददैशिकपूर्वकाभेदधिया तन्निवृत्तेः । प्रत्यगभिन्नक्रमबुद्धौ सत्यां तु शते पञ्चाशदिति न्यायेनैतद्बाधस्याप्ययत्नसिद्धश्च । एकविग्रहविषयत्वनियमो ऽपि ध्यानादेरेव बाह्यपूजादि तु पञ्चाङ्गपूजादिविधिसामर्थ्यात्सर्वविषयं कार्यम् । यस्त्वनेकजन्मार्जितपापपुञ्जजन्यदुराग्रहादेकभक्तिच्छलेनान्यं निन्दति असकृद्बोध्यमानो ऽपि ऋजुमार्गेणाभेदं नोपैति भ्रामयति च मन्दान् स यादृशो यक्षस्तादृशो बलिरिति न्यायात्तत्प्रतिपादितोत्कर्षापकर्षविपरीतोत्कर्षापकर्षोपपादनेन विजित्य पश्चात्पूर्वोक्तरीत्या ऽऽत्यन्ताभेदोपपादनेन बोधनीयः । एवं हि स मारणाय गृहीतो ऽङ्गच्छेदं स्वीकरोतीति न्यायेनाभेदं स्वीकरिष्यति । स्वयं तु शिष्टैर्हरिहरादिभेदधीः श्वमांसेव श्वपाकी दूरतस्त्याज्या ये तु दुराग्रहात्तां न त्यजन्ति ते नास्तिका एवेति दिक् ॥

श्रुतिस्मृतिपुराणादिसिद्धाभेदापमानिनः ।
ये ते चेदास्तिकास्तर्हि नास्तिका वद कीदृशाः ॥

आनन्दामृतसागरे सुमनसां ध्यानादिमन्थोद्भवः
प्रेमाख्यो हि हिमांशुराविरभवत्पुण्यौघरश्मिव्रजम् ।

स्वर्व्यस्मिन्ससुशैत्यसंचरवशात्सान्द्रत्वमापादय-
न्मन्ये तेन सुखाम्बुधिर्विजयते संप्राप्य मूर्त्तित्रयमिति ॥

एकमेवाद्वितीयं, नेह नाना ऽऽस्ति किं चन, यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते ऽथ तस्य भयं भवति, द्वितीयाद्वै भयं भवति, मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीत्यादिश्रुतयस्तु जीवेशयोर्जीवानां च परस्परमात्मानात्मनोरनात्मनां चान्योन्यभेदमपि वास्तवं न सहन्ते । नानेवेतीवशब्देन यो व्यावहारिकमपि नानात्वं पश्यति सो ऽप्यनर्थादनर्थान्तरमेति चेत्तर्हि वास्तवं तं पश्यतः का कथेति सूचितम् । तस्मात्तुच्छमेव द्रष्टव्यम् । तुच्छत्वबोधश्चैताभिः श्रुतिभिरेव भवति तदुक्तं तुच्छा ऽनिर्वचनीया च वास्तवी चेत्यसौ त्रिधा । ज्ञेया माया त्रिभिर्बोधैः श्रौतयौक्तिकलौकिकैरिति । परं तु वास्तवनानात्वभ्रमनिरासाय सोपानारोहणन्यायात्तत्तुच्छत्वबोधोदयाय च तदनिर्वचनीयत्वबोधकसत्तर्का अप्युपेयाः । न हि श्रुत्या ऽऽपि सकृदेव तुच्छत्वं बोधयितुं शक्यं जातो ऽपि वा बोधो न स्थिरीभवति अन्यथा मननविध्यानर्थक्यापत्तेः ।

नन्वेकमेवाद्वितीयमिति कथमद्वैतं बोधयति यदि यदेकमेव तदद्वितीयं यदद्वितीयं तदेकमेव वा बोध्येतोभयथा ऽप्यप्रमाणमिदं वाक्यं स्यात् यदि यदद्वैतं तदद्वितीयमिति कल्पने तु माता मे वन्ध्येतिवत्केवलं वक्तुर्लज्जापादकमिदं वाक्यं स्यात् । उच्यते कार्यस्य हि द्वैतस्य कारणसत्तैव सत्ता । कारणं चास्य ब्रह्मैव सदेवेति पूर्ववाक्येन तथा ऽवधारणात् । वाक्यशेषेण च कारणस्य ब्रह्मणः सजातीयादिभेदनिरासेनाखण्डैकरसत्वं बोध्यते । नन्वेकाकिनी प्रतिज्ञा हि प्रतिज्ञातं न साधयेदिति न्यायेन प्रतिभय

ऽर्थसिद्ध्यभावान्नाद्वैतं साधयितुं मानमिति भेदवादिनो हि जीवेशाभेदमपि न क्षमन्ते ऽन्यस्य का कथा। तद्भेदे ऽपि किं मानमिति चेन्नाहमीश्वर इति प्रत्यक्षमित्यवेहि। नचेदं भ्रमः। अबाधात् अहमीश्वर इति प्रत्यक्षानुपलब्धेः मानान्तरस्य तूपजीवकत्वेन बाधकत्वायोगादिति चेन्न। न ह्यात्मनीशभेदप्रत्यक्षं सम्भवति हेत्वभावात् न हि बहिरिन्द्रियं तत्र हेतुः रूपादिरहितेशग्रहे ऽसमर्थस्यास्य तद्भेदग्रहे ऽप्यसमर्थत्वात्। नापि मनः। तस्य प्रमाणसहकारित्वेनालोकादिवदप्रमाणत्वात्। न च परोत्प्रेक्षिते क्रमिककार्यजनके ऽणौ मनसि मानमप्यस्ति सर्वेन्द्रियेषु तत्तद्विषयसंबद्धेषु युगपदनेकबोधोदयस्य केषु चिन्मेधाविष्वनुभूयमानतया तदनुत्पत्तिरूपलिङ्गस्यासिद्धेः। शतपत्रपत्रशतभेदन्यायेन क्रमे सत्यप्यतिसूक्ष्मकालभेदस्य दुरवगाह्यतया तत्र यौगपद्यप्रत्ययो भ्रम इति चेन्नबाधाभावात्। किञ्च प्रत्यक्षेणोपलब्धुं योग्यस्य प्रतियोगिनो ऽनुपलम्भो योग्यानुपलम्भः सो ऽभावरूपभेदग्राहकेन्द्रियस्य सहकारी वाच्यः। स च मनसेशभेदग्रहे न संभवति तत्प्रतियोगिन ईशस्य प्रत्यक्षायोग्यत्वात्। न च योग्यत्वमनुपलब्धेरेव विशेषणं तच्चानुपलब्धेस्तद्ग्राह्याभावप्रतियोगितद्व्याप्येतरसकलतदुपलम्भककालिकत्वमेवेति वाच्यम्। प्रतियोगिप्रत्यक्षजनकस्य तदुपलम्भकपदाभिलप्यत्वात्तत्प्रत्यक्षस्याभावप्रत्यक्षहेतुत्वापत्त्योक्तदोषानिस्तारेण घट्टकुटीप्रभातन्यायापत्तेः। ननु यत्र यत्सत्त्वमनुपलम्भाविरोधि तत्र तदभावः प्रत्यक्षः ततश्च स्तम्भे पिशाचाभेदसत्त्वे स्तम्भाभेदवत्तस्याप्युपलम्भापत्त्या ऽनुपलम्भविरोधित्वात्तदभावरूपः पिशाचभेदः स्तम्भः पिशाचो न भवतीति यथा स्तम्भे प्रत्यक्षस्तथा जीवे ब्रह्माभेदसत्त्वे जीवाभेदवदनुपलम्भायोगात्तत्र

तदभावरूपो ब्रह्मभेदः प्रत्यक्ष इति चेन्न। साक्षादभावविरोधित्वं हि प्रतियोगिन एव अन्यस्य तु तद्व्याप्यत्वेनेति स्थितिः। तथा च प्रतियोगिसत्त्वस्यानुपलम्भविरोधित्वं तत्प्रतियोग्युपलम्भव्याप्यत्वेनैवेति वक्तव्यम्। एवं चान्यत्र प्रतियोगिसत्त्वस्याभावस्थलीयोपलम्भाव्याप्तत्वेन तत्रत्यानुपलम्भविरोधित्वायोगात् यत्र यत्सत्त्वमित्यादि वदता ऽभावाधिकरण एव प्रतियोगिसत्त्वं तदुपलम्भश्च वक्तव्यः। ततश्च नाभावधीसंभव इति वरघाताय कन्यावरणमिति न्यायापातः। यन्मनसा न मनुतइत्यादिश्रुतिनिषिद्धं चात्मनो मनोविषयत्वम्। औपनिषदत्वविशेषणेनापि चात्मनो मनोगम्यत्वं निषिध्यते सर्वं विशेषणं सावधारणमिति न्यायात्। यद्यपि यतो वाचो निवर्त्तन्तइत्यादिश्रुतेर्न शब्दशक्यं ब्रह्म तथा ऽप्यौपनिषदत्वश्रुतेर्वेदान्तप्रमाणकं तदिति निश्चीयते प्रमाणकृत्यं च तस्मिन्नज्ञाननिवृत्तिरेव नानधिगतार्थाधिगतिः स्वप्रभत्वात्तस्य। अज्ञानबाधश्च जीवेशाभेदविषयकतत्त्वमस्यादिवाक्यजबोधेन। तत्र हि तत्त्वंपदयोः सामानाधिकरण्यं प्रतीयते तच्च प्रकारान्तरेणाघटमानं लक्षणया प्रत्यग्ब्रह्मैक्ये वाक्यपर्यवसानं गमयति। तथा हि न तावद्गौरश्वदेव्यामिक्षेतिवदुभयोरेकार्थाभिधानेन सामानाधिकरण्यं भिन्नार्थवाचकत्वात्। नाप्यजहत्स्वार्थयोर्विशेषणविशेष्यभावेन नीलमुत्पलमितिवद्युज्यते विरुद्धार्थयोस्तदयोगात्। न वा जहत्स्वार्थत्वेन संबन्धे लक्षणया कुसुमितद्रुमा गङ्गेतिवत्तदुपपत्तिः। एकार्थत्वस्य विवक्षितत्वात्। अतो जहदजहल्लक्षणया विरुद्धांशत्यागेनानुगतचिदंशोपादानेन चैक्यएव पर्यवसानम्। लक्षणा च न पदमात्रवृत्तिः किं तु वाक्यवृत्तिरपि यथा गम्भीरायां नद्यां घोष इत्यत्र पदद्वयस्य तीरे शक्त्या

पदसंबन्धेन यज्ज्ञाप्यते तत्संबन्धो लक्षणा शक्तिज्ञाप्यश्च यथा पदार्थस्तथा वाक्यार्थो ऽपीति न काचिदनुपपत्तिः। अत एव विध्यपेक्षितप्राशस्त्यप्रत्यायकतया ऽर्थवादपदानां पदस्थानीयतया विधिवाक्येनैकवाक्यता भवतीत्यर्थवादवाक्यानां पदैकवाक्यता। यत्र तु प्रत्येकं भिन्नभिन्नसंसर्गप्रतिपादकयोर्वाक्ययोराकाङ्क्षावशेन महावाक्यार्थबोधकत्वं तत्र नष्टाश्वदग्धरथन्यायेनान्योन्याकाङ्क्षिताङ्गाङ्गिभावबोधकतया वाक्यैकवाक्यता यथा दर्शपूर्णमासाभ्यामित्यादेः समिधो यजतीत्यादेश्च। तदुक्तं भट्टपादैः। स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया। वाक्यानामेकवाक्यत्वं पुनः संहत्य जायतइति। प्रकृतमनुसरामः।

तस्माद्वाक्ये ऽपि लक्षणासंभवाद्वेदान्तानां लक्षणया निर्विशेषब्रह्मप्रतिपादकत्वान्न श्रुतिविरोधः। मनसस्तु न लक्षणादिकं सम्भवति शब्दवृत्तित्वात्तस्य। नाहमीश इत्यनुभवस्त्वविद्यावृत्तिरूपो भ्रम एव सविशेषणे हि वर्त्तमानौ विधिनिषेधौ सति विशेष्यबाधे विशेषणमुपसंक्रामत इति न्यायेनोपाधिभेदविषयो बोध्यः विशेष्यांशे च श्रौतो बाध उक्त एव। न चानुभवेन श्रुतेर्बाधः शङ्क्यः श्रुतेर्निरवकाशत्वात् निरवकाशस्य च सावकाशनिरवकाशयोर्निरवकाशो बलीयानिति न्यायाद्बाधकत्वोपपत्तेः। ननु जीवेशयोः क्वचिद्भेदः क्वचिच्चाभेदो निर्दिश्यते। तथा च यद्यभेद एव गृहीत तदा भेदनिर्देशो निरालम्बनः स्यात् न चैतद्युक्तम्। तस्मादहिकुण्डलन्यायेन जीवेशभेदश्रुती तयोस्तात्त्विकत्वमुपेत्यैव व्याख्येये यथैकस्याहेरहित्वेनाभेदस्तस्यैव कुण्डलावस्थस्य प्रांशुत्वावस्थाद्भेदश्च तात्त्विकः। एवं ब्रह्मणो ऽपि चैतन्यरूपेणाभेदः जीवत्वेश्वरत्वरूपेण भेदश्च तात्त्विक इति। यद्वा जीवचैतन्यमीशचैतन्यं च वस्तु

तो भिन्नमेवास्तु अभेदनिर्देशस्तु प्रकाशाश्रयन्यायेन चैतन्यरूपत्वसाजात्येन द्रष्टव्यः । यथा रवेस्तदाश्रितप्रभारूपद्रव्यस्य च सत्यपि भेदे तेजस्त्वरूपसाजात्येनाभेदनिर्देश इति चेन्न। तात्त्विकभेदावलम्बिनोः पक्षयोः श्रुत्यादिविरुद्धत्वात् । भेदश्रुतिस्त्वनृतभेदेनाप्युपपद्यते । एतेन श्रुतेर्भेदे प्रमाणत्वं निरस्तम् । अत एवार्थापत्तिरपि न तत्र मानम् । तात्त्विकभेदादृते ऽनुपपन्नार्थाभावात् विरुद्धधर्माक्रान्तत्वहेतोस्तु भेदसिद्धेः प्रागसिद्धिरेव । ननु श्रुतित्वसाम्ये ऽद्वैतश्रुतेरेव कुतः प्राबल्यमिति चेत्तात्पर्यवत्त्वादित्यवेहि । तदपि कुत इति चेदुपक्रमोपसंहारावभ्यासो ऽपूर्वता फलम् । अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णय इत्यभियुक्तप्रसिद्धतात्पर्यलिङ्गैरिति गृहाण। तत्र सदेवेत्युपक्रम्यैतदात्म्यमिदं सर्वमित्युपसंहरति इदमुपक्रमोपसंहारैकरूप्यं तात्पर्यलिङ्गम् । तथा तत्त्वमसीति नवकृत्वो ऽभ्यासः । रूपादिहीनाद्वितीयब्रह्मणः परिनिष्ठितरूपत्वे ऽपि मानान्तरायोग्यत्वादपूर्वत्वमुक्तम् । अत्र वाव किल सत्सोम्य न निभालयसइति संघाते स्थितं प्रत्यग्ब्रह्म न जानासीत्यर्थः तस्य तावदेव चिरमित्यादि ब्रह्मबोधात्फलमुक्तम् । अनेन जीवेनात्मनेत्याद्यद्वितीयज्ञानार्थो ऽर्थवादः । मृदादिदृष्टान्तैः प्रकृत्यतिरेकेण विकारो नास्तीत्युपपत्तिरुक्ता एवं षड्विधानि तात्पर्यलिङ्गानि व्यस्तानि समस्तानि च प्रतिवेदान्तं दृश्यन्ते ॥

ननु द्वा सुपर्णेत्यादि भेदे ऽप्यस्ति मानम् उपक्रमादयो ऽपि तत्र सन्तीति कथमभेद एव तात्पर्यम् । तथा हि । द्वा सुपर्णेत्युपक्रमः परमं साम्यमुपैतीत्युपसंहारः तयोरन्यः अनश्नन्नन्यः अन्यमीशमित्यभ्यासः ईशस्यापूर्वत्वात्तद्भेदो ऽप्यपूर्वः पुण्यपापे विधूयेति फलम् अस्य

महिमानमित्यर्थवादः । अनश्नन्नित्युपपत्तिः । अत्र द्वित्वं साम्यं च भेदव्याप्यम् अभ्यासे तु कण्ठोक्त एव भेद इति। उच्यते कस्मिन्नु भगवो विज्ञातइति परमोपक्रमे ऽभेदस्यैव प्रक्रान्तत्वान्नायमुपक्रमः । नापि द्वित्वं भेदव्याप्यं रामकृष्णावित्यादौ तथा ऽनुपगमात् । परममिति विशेषणादुपसंहारो ऽपि न भेदपरः अभ्यासस्त्वताच्त्विकभेदपरः । ईशो ऽपि सामान्यतो ऽनुमितो भेदप्रतियोगीति नापूर्वो ऽस्य भेदः । फलार्थवादौ त्वस्माकमपि न प्रतिकूलाविति भेदे तात्पर्यलिङ्गाभावान्न भेदे वेदतात्पर्यम् । अस्ति चाभेदे तत्सत्त्वात् । तथा चोपपन्नमभेदश्रुतेः प्राबल्यम् । पूर्वकाण्डस्यापि परम्परया ब्रह्मपरत्वं स्वर्गादिफलप्रदर्शनं तदज्ञेय्यत्वादिप्रदर्शनं च गुडजिह्विकान्यायेनाज्ञतोषार्थं यत्कृतकं तदनित्यमितिन्यायेनानित्ये तत्र श्रुतितात्पर्यायोगादित्यलं विस्तरैः ।

जीवानामन्योन्यताच्त्विकभेद एकेनेशेनाभेदासम्भवादेषामप्यभेदः । सुखदुःखादिव्यवस्था तु कल्पितभेदेनाप्युपपद्यते । प्रत्युत विभ्वनेकात्मवादएव तदनुपपत्तिः । एतच्चोष्ट्रलगुडन्याये स्पष्टीभविष्यतीत्युपरम्यते । अनात्मनामपि चिदात्मनि रज्जौ स्रगादिवत्कल्पितत्वेन न ततो भिन्नत्वं संभवति । नन्वेवमपि नाद्वैतसिद्धिः । अन्योन्यानात्मभेदस्य न हि दृष्टे ऽनुपपन्नं नामेति न्यायेन जागरूकत्वात् तथा च भक्षिते ऽपि लशुने न शान्तो व्याधिरिति न्यायापात इति चेन्न दृष्टत्वस्यासिद्धेः । दृश्यतएव सर्वभिन्नो घट इति चेन्न न हि घटे सर्वभेदप्रत्यक्षं संभवति भेदग्रहे प्रतियोगिग्रहस्य हेतुत्वात् सर्वस्य चासर्वज्ञेन ज्ञातुमशक्यत्वात् । ततश्च सर्वभिन्नो घट इति प्रत्यक्षं भ्रमः अनुमानादेस्तु पूर्वोक्तैव गतिरित्येकस्यैव ब्रह्मणो रज्जुस-

र्न्यायेनाज्ञातस्य प्रपञ्चाकारेण भानान्नाद्वैतश्रुतिर्मानान्तरविरुद्धा ज्ञातस्य च निर्विशेषत्वेन भानान्न प्रपञ्चोपशमत्वश्रवणमपि विरुद्धमिति संक्षेपः ।

एवं हि सर्वदोषसमाधानान्नापसिद्धान्तो न वा प्रकृतन्यायोदाहरणासंगतिः ये ऽपीशे केवलनिमित्तकारणत्ववादिनो न तैरपि विरोधः । उभयविधकारणत्ववत्त्वि केवलनिमित्तत्वस्यापि सत्त्वात् । न च केवलनिमित्तत्वं नामोपादानत्वाभावसमानाधिकरणनिमित्तत्वं तच्च त्वदभिमतईशे नास्ति तथा च विरोध इति शङ्क्यम् । ब्रह्मण्युपादानत्वस्य कल्पितत्वाङ्गीकारेण वास्तवतदभावस्यापि सत्त्वात् तस्मात्सर्वं निरवद्यम् । इति वृक्षप्रकम्पनन्यायः ८ । ४५ ।

अथात्रत्याः प्रासङ्गिकास्तत्सङ्गताश्च लिख्यन्ते । क्रिया हि विकल्प्यते न वस्त्विवति न्या० ५ । ४६ ।

यः कारयति स करोत्येवेति न्या० । राजादिर्हि भृत्यैर्युद्धादिकं कारयन्स्वयमपि करोतीति प्रसिद्धम् । ४७ ।

ज्ञानादेर्निष्कर्षवदुत्कर्षो ऽप्यङ्गीकार्यो बाधकाभावादिति न्या० । यथा ज्ञानापकर्षावसानभूमित्वं स्थावराणां तथा तदुत्कर्षावसानभूमित्वमीशस्येत्यङ्गीकार्यं तच्चोत्कृष्टत्वं ज्ञानस्य सर्वविषयत्वमेवेति भावः ३ । ४८ ।

काकतालीयन्या० । अत्र काकतालशब्दौ समासविषये काकतालसमवेतक्रियावर्त्तिनौ । तेन काकागमनमिव तालपतनमिव काकतालमिति समासाच्च तद्विषयादिति ज्ञापकादिवार्थे समासः । इवार्थे समासाभावे तद्विषयादित्यनेनेवार्थविषयसमासानुवादस्यानुपपन्नत्वात्तज्ज्ञापकत्वम् । तत्र काकागमनमुपमेयं विधेः क्व चिद्गमनं

तालपतने तु तत्रैव हरेरवस्थानम् । तेन च काकतालसमवेतक्रियापरयोः काकतालपदयोरिवार्थे समासेन विधेहंरेश्च समागमः काकतालसमागमसदृश इति फलति । काकागमनतालपतनयोरुपमानत्वे तदुपमेययोर्विधिगमनहर्यवस्थानयोः पृथगनुपात्तत्वेनान्वयायोगात् काकतालसमागम एवोपमानम् । एवं च काकतालसमागमसदृशं काकतालमिव काकतालीयमिति द्वितीयस्मिन्निवार्थे समासाच्च तद्विषयादिति सूत्रेण इवे प्रतिकृताविस्त्यधिकारस्थेन छप्रत्ययः तस्य ब्रह्मविष्णवोः समागमानन्तरं जातो वादिप्रतिवादिभावः काकतालफलयोर्भोक्तृभोग्यभावसदृश इत्यर्थः । न च सकृदुच्चरिताभ्यां काकतालपदाभ्यां कथमुपमाद्वयावबोध इति शक्यम् । अनुभवानुसार्यनुशासनेन व्युत्पत्तिवैचित्र्यस्य स्फुटप्रतिपत्तेरिति ।

अजाकृपाणायन्यायोऽपीदृशः अत्रापि ह्यजाकृपाणपदाभ्यां तदागमनपतने लक्ष्येते एवमन्यदपि सर्वं तुल्यमेव । एतावांस्तु विशेषः । यत्सोऽवितर्कितेष्टलाभेऽनिष्टलाभे चावतरति अकस्मान्महाफलस्याग्रे पतने काकस्य भोगलाभवच्छिरसि पतने मरणस्यापि सम्भवात् अयं त्वकस्मात्केवलानिष्टावाप्तौ प्रवर्त्ततइति । ५ । ५० ।

न हि भिक्षुको भिक्षुकमिति न्यायः स्पष्टः । ६ । ५१ ।

योजनप्राप्यायां कावेर्यां मल्लबन्धनन्या० ।

कावेर्याख्यायां नद्यां योजनेन योजनचलनेन प्राप्यायां मल्लस्य कैवर्त्तस्य बन्धनं यथा न युज्यते तथा प्रकृतेऽपीत्यर्थः । के चित् मल्लो बाहुयुद्धकुशलस्तद्वदधोलम्बितवाससां कटौ बन्धनं मल्लबन्धनं तद्यथा योजनप्राप्यायां तस्यामयुक्तं तथेत्यन्ये । ७ । ५२ ।

अवश्यापेक्षितानपेक्षितयोरिति न्या० । ८ । ५३ ।

कृताकृतप्रसङ्गी यो विधिः स नित्य इति न्या० । यथा रन्धयतीत्यत्र रधिजभोरचीति नुम्विधिरत उपधाया इति वृद्धौ कृतायामकृतायां च प्रसङ्गितया नित्यत्वेन बलीयस्त्वाद्वृद्धिविधेर्बाधकस्तथा गणेशाराधनविधिरन्याराधनविधेर्बाधक इति गाणपतानामभिमानः । ९ । ५४ ।

अनधीते मर्हस्भाष्यइति न्या० । १० । ५५ ।

एकफलाकाङ्क्षायां तदाराधनमन्यदपि फलं प्रयच्छतीति विवक्षायां तु फलवत्सहकारन्यायः यथा सहकारः आम्रश्चूतो रसालो ऽसौ सहकारो ऽतिसौरभइत्यभिधानादतिसौरभ आम्रवृक्षो ऽतिमधुरपक्वफलनमितशाखः स्वमुपसन्नाय छायार्थिने जनाय फलं परिमलं चाप्रार्थितमपि ददाति तथा प्रकृते ऽपीत्यर्थः । ११ । ५६ ।

तदभिन्नाभिन्नस्य तदभिन्नत्वमिति न्या० । १२ । ५७ ।

लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिरिति न्या० ।१३।५८।

केवलमानेनार्थसिद्धिविवक्षायां मानाधीना मेयसिद्धिरिति न्यायः प्रवर्त्तते । १४ । ५९ ।

यद्विवाहस्तद्गीतगानमिति न्या० केचित्तु प्रागुदाहृतं वरगोष्ठीन्यायमेतदर्थकत्वेन व्याचक्षते । १५ । ६० ।

अन्धगजन्या० अन्धैर्निर्धारितो गजो ऽन्धगजस्तस्य न्याय इति मध्यमपदलोपिगर्भः षष्ठीतत्पुरुषः । यथा हि लोके श्रूयते जन्मान्धा बहवः कं चिदनन्धं पुरुषमूचुरस्मान् गजं दर्शयेति । स च गजशालायां तान्नीत्वा तं तं गजावयवं तेन तेन ग्राहयित्वा चोवाचायं गज इति । ते च तं तमवयवमेव गजत्वेन निश्चित्य स्वस्थानमागताः परस्परं कलहं चक्रुः । शूर्पसदृशो गज इति कर्णस्पर्शी । महा-

सर्पसदृश इति शुण्डाग्राही। स्तम्भतुल्य इति जङ्घाग्रहीता। पुच्छग्राहकस्तु स्थूलरज्जुसमो गज इत्युवाचेति। तथा शास्त्राभिप्रायानभिज्ञा वादिनो ऽपि स्वस्वेष्टदेवमाहात्म्यबोधकानि वाक्यानि पश्यन्त इतराणि तु पश्यन्तो ऽप्यपश्यन्त इव सर्वमाहात्म्यबोधकवाक्यैकवाक्यतां चाजानन्तो ऽन्योन्यं विवदन्त इत्यर्थः। एवमेव स्थूलारुन्धतीन्याये प्रदर्शितान्वाक्याभासानाश्रित्य तत्तात्पर्यानभिज्ञाश्चार्वाकादयो माध्यमिकान्तास्त्वंपदार्थविषये विवदन्त इति बोध्यम्। १६। ६१।

कूपमण्डूकन्या०। समुद्रमण्डूकः कथं चित्तत्तीरसमीपस्थकूपे प्रविष्टस्तं दृष्ट्वा कूपमण्डूकवर्यो ऽदृष्टचरो ऽयमिति ज्ञात्वा पप्रच्छ कुत आगतो भवानिति। समुद्रादिति वचनं श्रुत्वा कियान्स इति पृष्टवान् महानिति तेन प्रत्युक्तः। स्वजङ्घां प्रसार्य किमेतावानित्युवाच। न हि महत्तमः स इति प्रतिवचनमाकर्ण्य द्वितीयजङ्घां प्रसार्य तर्ह्येतावान्भविष्यतीत्युवाच पुनरपि तेन निराकृतस्तृतीयां तुरीयां जङ्घां प्रसार्याप्लुत्य च क्रमेण प्रादेशवितस्तिहस्तपरिमितं देशं किमेतावानिति पृच्छंस्तेन निरस्तश्चेत्तर्हि कूपसदृशो भविष्यतीत्युवाच। भूयो ऽपि भ्रातर्नास्ति तत्तुल्यो ऽन्यः स हि सरितां पतिरनवगाह्यगाम्भीर्यो ऽलक्ष्यपारावारो ऽतीव महत्तम इति तेन प्रत्युक्तस्तर्हि नास्त्येव स यः कूपादपि महान् त्वं तु मिथ्यैव प्रलपसीति तं निराचक्रे। स च स्वमनसि तं हसितवानिति गाथा लोके गीयते तथा च यथा ऽम्भोनिधिमज्ञात्वा निराकुर्वन्कूपमण्डूक उपहास्यतां प्राप्तस्तथा ऽन्यमतानभिज्ञस्तद्दूषणपर उपहासास्पदीभवतीति न्यायसङ्गतिः। १७। ६२।

तत्त्ववित्त्वाभिमानी मूढो न तद्गतिं वाञ्छन्नपि

लभते उपहसनीयश्च भवतीति विवक्षायां चतुर्वेदविन्नया-
यो ऽवतरति । यथा गोहिरण्यादिरूपं बहुधनं चतुर्वेदविदे
देयमस्तीति कस्य चिद्दातुर्वचनं श्रुत्वा मुग्धः कश्चिद्वेदाश्च-
त्वार इत्यहं जाने मह्यमिदं देयमिति वदन्न तल्लभे उपहा-
स्यतां च प्राप्तस्तथा यः सच्चिदानन्दरूपं प्रत्यगभिन्नं ब्रह्मे-
त्यादिशब्दाभिज्ञस्तदर्थाभिज्ञो वा तत्त्ववित्त्वाभिमानेन
तद्गतिमिच्छन्ति न स तामेति उपहसनीयश्च भवतीति
ज्ञेयम् । १८ । ६३ ।

नृपनापितपुत्रन्या० । इत्थं हि लौकिकी गाथा कस्य
चिन्नृपस्य भृत्यो नापितः कश्चित्प्रातः सर्वं पुरमन्विष्यो-
तीव रम्यो बालो मे दर्शनाय त्वयात्रानेय इति नृपेणाज्ञप्तः
प्रातरुत्थायाखिलपुरमन्विष्य दृष्ट्वा ऽपि च तत्र तत्राति-
रम्यान्बालान्स्वपुत्रतुल्यानमत्वा तमेव राजवेश्मनि नी-
त्वा राज्ञे निवेदयामास स्वामिन्नानीतो ऽयं रम्यतमो बाल
इति । राजा च तमुपशान्तानलाङ्गाराभं काणं खल्वाटं
कृशह्रस्वबाहुजङ्घं स्थूललम्बोदरं दृष्ट्वोपहासमयं खलः कृत-
वान्मयीति मत्वा चुकोप उवाच च अरे जाल्म किमि-
दमिति । नापितश्च कुपितं नृपं ज्ञात्वा कृताञ्जलिर्भूत्वो-
वाच राजेन्द्रमौले तव चरणमुपालभे नायमुपहासः किं
तु मे मनसीत्थमेव निश्चयो नास्तीदृक् त्रिलोक्यां तव पुर्या-
स्तु का कथेति । राजा च सत्यमादृश्येव रागग्रहगृहीतचि-
त्तदशेति मत्वा कोपं तत्याजेति । तथा च यथा ऽतिकुरूपे
ऽपि पुत्रे रागातिशयवशान्नापितस्य सर्वोत्तमत्वधीस्तथा
मन्दधियां केषां चिज्जन्मान्तरीयसंस्कारप्रयुक्तरागातिशय-
वशात्कस्मिंश्चिदतिक्षुद्रे ऽपि देवे सर्वोत्तमत्वधीः । परित्य-
ज्य च हरिहरादींस्तदुपासने प्रवृत्तिरिति न्यायसङ्गतिः ।
१९ । ६४ ।

स्वशिश्नमपि चुम्बन्तमिति न्या० । २० । ६५ ।

महीषीप्रसवौन्मुख्य इति न्या० । २१ । ६६ ।

अन्धचटकन्या० । यथा ऽकस्मादन्धस्य हस्ते पतितश्चटको ऽन्धेन गृहीत इति लोके प्रसिद्धिमगात्तथा दैवाल्लब्धमभीष्टं स्वेष्टदेवत्वेनाभिमतवंशार्कादिदत्तं मन्यन्तइत्यर्थः । २२ । ६७ ।

घुणाक्षरन्यायो ऽपीदृशः घुणेन भक्षिते काष्ठादावकस्मात्ककारादिसदृशच्छिद्रेषु सत्सु घुणेनाक्षराणि निर्मितानीत्यबुधैः कल्प्यते यथा तथा प्रकृते ऽपि २३ । ६८ ।

पुत्रलिप्सया देवं भजन्त्या भर्त्ता ऽपि नष्ट इति न्या० । २४ । ६९ ।

वृद्धिमिष्टवतो मूलं विनष्टमिति न्या० । २५ । ७० ।

चर्मतन्तौ महिषीं हन्तीति न्या० । सप्तमीह निमित्ते निमित्तं च फलं तथा च चर्मतन्त्वर्थमित्यर्थः स्पष्टमन्यत् । २६ । ७१ ।

मण्डूकतोलनन्या० । केषु चिन्मण्डूकेष्वभीष्टमानपूरणार्थं तुलायामारोपितेष्वन्ये उत्प्लुत्य गच्छन्तीति नाभीष्टसिद्धिस्तथा प्रकृते ऽपि २७ । ७२ ।

सच्छिद्रघटाम्बुन्यायः २८ । ७३ ।

एकामसिद्धिं परिहरतो द्वितीया ऽऽपद्यतइति न्यायो ऽपि चेह प्रवर्त्तते । इयं बौद्धधिकारे उदयनाचार्योक्तिः । यथाङ्कुराद्यकर्तृकं शरीरजन्यत्वादित्यत्र शरीरीति विशेषणेन स्वरूपासिद्धिं परिहरतो बौद्धस्य व्याप्यत्वासिद्धिरापद्यपते तथा प्रकृते ऽपि २९ । ७४ ।

उपयन्नपयन्धर्मो विकरोति हि धर्मिणमिति न्या० । यथा पूर्वस्य रूपरसादिरूपधर्मस्य परावृत्तौ च रूपरसाद्य-

न्तरोत्पत्तौ च तण्डुलादेर्धर्मिणो विकृतिर्दृश्यते तथा प्रकृते ऽपि स्यादित्यर्थः ३० । ७५ ।

व्रणं शिशमयिषोः शस्त्रग्रहणन्या० स्वस्थाने स्पष्टो ऽयम् । ३१ । ७६ ।

सर्वं विशेषणं सावधारणमिति न्या० शङ्खः श्वेत इत्यत्र श्वेत एवेत्यर्थः एवमन्यत्र प्रकृते ऽपि च ॥ ३२ । ७७ ।

सर्वं वाक्यं साधारणमिति न्यायो ऽपि कैश्चनोदाह्रियते । तत्रावधारणार्थक एवकारस्त्रिविधः क्रियान्वितो विशेषणान्वितो विशेष्यान्वितश्च । तत्र पूर्वस्यात्यन्तायोगव्यवच्छेदो ऽर्थः यथा नीलं पद्मं भवत्येव । द्वितीयस्यायोगव्यवच्छेदः स चोक्तः । तृतीयस्यान्ययोगव्यवच्छेदः यथा पार्थ एव धनुर्धर इत्यादौ एवमन्यत्रापि बोध्यम् । ३३ । ७८ ।

वृद्धकुमारीवाक्यन्या० । अयं महभाष्ये व्याख्यातः । तद्यथा वृद्धकुमारी इन्द्रेणोक्ता वरं वृणीष्वेति सा च वरमवृणीत पुत्रा मे बहुक्षीरघृतमोदनं कांस्यपात्र्यां भुञ्जीरन्निति । न च तावदस्याः पतिर्भवति कुतः पुत्राः कुतो गावः कुतो धान्यम् । तत्रानया एकेन वाक्येन पतिः पुत्रा गावो धान्यमिति सर्वं संगृहीतं भवतीति तथा तत्तदुपासनया मोक्षबोधकवाक्यैरपि यदन्तरेण तदसिद्धिस्तत्संगृहीतं भवति । एवं काशीमरणान्मुक्तिरिति श्रुतिवाक्यं तदुपबृंहणभूतानि पुराणादिवाक्यानि च यानि काशीमरणान्मोक्षं बोधयन्ति तेषां यथाश्रुतार्थोपगमे तमेव विदित्वा ऽति मृत्युमेति नान्यः पन्था विद्यते ऽयनायेत्यादिवचनविरोधः स्यात्तद्वारणाय तत्त्वज्ञानद्वारैव मोक्ष इत्यङ्गीक्रियते । तच्च ज्ञानं ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः । ब्राह्मणो निर्वेद-

मायान्नास्त्यकृतः कृतेन शान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वा ऽऽत्मन्येवात्मानं पश्येत्, आत्मा वा अरे द्रष्टव्यः श्रोतव्यः, नावेदविन्मनुते तं बृहन्तम्, आचार्यवान् पुरुषो वेद, प्रोक्तो ऽन्येनैव सुज्ञानाय प्रेष्ठेत्यादिशास्त्रप्रामाण्यादनेकजन्मार्जितपुण्यपुञ्जक्षपितपापस्य साधनचतुष्टयसंपन्नस्य गुर्वधीतवेदान्तश्रवणादिमत एव नान्धस्य। ततश्च काशीमरणान्मोक्षबोधकवाक्यजातेन यद्न्तरेण मोक्षासिद्धिस्तत्सर्वमनेन न्यायेन संगृहीतं भवति। न चैतत्सर्वमत्र कल्प्यं किं तु मानसिद्धम्। तत्र तावत्पापनिवृत्तौ काशीप्रवेशदर्शनस्पर्शनैः तत्रत्यगङ्गादिस्नानदेवदर्शनादिना च तन्निवृत्तिबोधकानि वचनानि प्रमाणम्। तत्र काशीदर्शनमाहात्म्यं काशीखण्डे ऽभिहितम्। यैर्दृष्टा दूरतः काशी ते पुण्याः पापशत्रवः। स्पृष्टा यैस्ते ऽपि च ततः श्रेष्ठा मोक्षैकभाजनम्। मात्स्ये च अज्ञानाज्ज्ञानतो वा ऽपि वर्त्तमानमतीतकम्। सर्वं तस्य च तत्पापं क्षेत्रं दृष्ट्वा विनश्यति। पाद्मे। अस्याः संदर्शनं व्यास सर्वपातकनाशनम्। अस्या निवासो निर्वाणं साधयत्यञ्जसा मुने। ब्रह्मवैवर्त्ते। पश्य तात परमर्चितां पुरीं योगिभिः सुकृतिभिर्मुनीश्वरैः। यां निरीक्ष्य पुरुषः पुरा कृतैः पातकैः शरमितैर्वियुज्यते। पञ्चमहापातकैरित्यर्थः। तथा बहिः कृतानि पापानि पूर्वजन्मार्जितान्यपि। काशीदर्शमात्रेण नाशमेष्यन्ति नान्यथा अत्र बहिः कृतानीति निर्देशात्पूर्ववाक्यान्यप्येतद्विषयाण्युपसंह्रियन्ते चतुर्धाकरणवाक्यानीवाग्नेयविषयत्वेन। अन्यथा पञ्चक्रोशयात्रादिविधानं व्यर्थं स्यात् तथा पूर्वजन्मतशकोटिसंचितं पापराशिमतुलं विनाशयेत्। काशिका परपदप्रकाशिका दर्शनश्रवणकीर्त्तनादिभिः। एवमन्येष्वपि पुराणादिषु द्रष्टव्यम्। अथ काशीप्रवेशमहिमा ब्रह्म-

वैवर्त्ते । महापातकयुक्तो ऽपि श्रद्धया रहितो ऽपि वा । काशीप्रवेशादनघः सम्यक् स्थित्वा सुखी भवेत् । यत्तु कश्चिदाह । काशीप्रवेशात्पापं न नश्यति किं तु बहिरेव तिष्ठति एतदेवानघत्वं नाम अत एव लिङ्गपुराणे वाराणस्यां तु यः कश्चित्प्रविष्टो ब्रह्मघातकः । तिष्ठते बाह्यतः पापं निर्गते गृह्यते पुनरित्युक्तम् । एवमन्यान्यपि पुराणवाक्यानि बोध्यानीति तन्न क्षोदक्षमम् । अदृष्टरूपस्य तस्यान्तःकरणधर्मत्वेन बहिर्निराश्रयावस्थानायोगात् । अथ तार्किकमतमाश्रित्यादृष्टस्यात्मधर्मत्वमुपेत्य पापं प्राक् देहावच्छिन्ने स्थितमिदानीं तु विभुत्वादात्मनो बहिरवच्छिन्ने तस्मिंस्तिष्ठति न तु काश्यवच्छिन्नइति मन्यसे न तदपि चारु । तस्य देशावच्छेदेन वृत्त्यभावात् । अन्यथा ऽऽत्मगुणस्यास्याश्रयगमनं विना ऽन्यत्र गमनासम्भवेनात्र नरदेहावच्छिन्ने जातस्यादृष्टस्य स्वर्गादौ देवादिदेहे भोगानुत्पादकत्वप्रसङ्गात् । किं च यदि प्रागेव बहिरवच्छिन्ने जातं पापं न काश्यवच्छिन्ने तर्हि काशीप्रवेशेन किमधिकं कृतम् । अतः स्वार्थासम्भवाद्बहिः पापस्थितिबोधकानि वाक्यानि बहिर्न गन्तव्यं किं त्वत्रैव सदा स्थेयमित्येवंपराणि निर्गते गृह्यते पुनरिति तु न हि निन्दा निन्दितुं प्रवर्त्तत इति न्यायेन बहिर्न यायादिति स्फुटमेवाह । किंच बहूनि वाक्यानि पापनाशमेवोपपादयन्ति तत्र तावच्छैवे । अत्र प्रविष्टमात्रस्य जन्तोः पापं पुरा ऽर्जितम् । विनाशमाप्नोति परं पुण्यराशिश्च वर्द्धते । लैङ्गे च जन्मान्तरसहस्रेण यत्पापं पूर्वसंचितम् । अविमुक्तं प्रविष्टस्य तत्सर्वं व्रजति क्षयम् । एवमन्यान्यपि बोध्यानि । अत्र काशीदर्शनादिभिः पापसामान्यध्वंसश्रवणे ऽप्यारब्धातिरिक्तस्यैव पापस्य ध्वंसो द्रष्टव्यः । तत्त्वज्ञानेनापि तद्ध्वंसानभ्युपगमात् । इदं त्वत्र

विसजातीयत्वेन प्रधानादेरुक्तदोषा नैव प्रसज्येरन्नित्युक्तम् । एतेन प्रधानपरमाणुवासनासंविद्ब्रह्मप्रभृतीनां निरंशानामेव यथाभागपरिणामावरणानावरणानेकविषययोगादिरुपपद्यत इत्युपरम्यते, तद्वदेव संयोगस्य संयोगिनो वा पूर्णस्य नानेकसंबन्धोऽनुपपन्नः क्षणिकपरमाणुवादिनापि पुञ्जदशायामेकस्य परमाणोरंशभेदमन्तरेणानेकनैरन्तर्यमभ्युपगतं विज्ञानवादिनामेकस्यानेकाकारत्वं, माध्यमिकस्य तु संयोगे को विशेषप्रद्वेषः, इदमेव शून्यत्वद्वारं वस्त्विति चेन्न शून्यत्वसदसत्त्वयोरुक्तौ विरोधात्, द्विष्ठं न किञ्चिद्दृष्टमिति चेन्न अस्यैव दृष्टत्वात्, न चान्यस्य तथात्वादर्शनादन्यस्यापि तथात्वाभावः प्रत्येकं प्रतिनियतासाधारणस्वभावानां भङ्गप्रसङ्गादिति, स चायं संयोगो द्विधा कार्योऽकार्यश्चेति पूर्वः परिमितानां, परिमितापरिमितानां च उभयप्रेरणादन्यतरप्रेरणाद्वा यथा मेषयोः स्थाणुश्येनयोर्वा, संयोगजमपि संयोगं वैशेषिका वर्णयन्ति तदसत् अवयव्यभावात्, अवयवसंयोग एव हि संघातस्य संयोगः, उपलम्भोऽपीदानीमेकदेशेन संयुक्तमित्येव, अस्तु वाऽवयवी तथापि येन हेतुना यदैवावयवः संयुज्यते तेनैव तदैवावयव्यपि संयुज्यतां, न हि हस्तपुस्तकसंयोगानन्तर्यं देवदत्तपुस्तकसंयोगस्योपलभ्यते हस्तस्पन्देनैव कारणकारणवर्तित्वादसमवायितामापन्नेन देवदत्तपुस्तकसंयोगस्याप्युत्पत्तिरुपपद्यते, हस्तस्पन्दे च तदवच्छिन्नशरीरस्यापि स्पन्दसिद्धेस्ततो वा तत्संयोगः कर्मणोऽपि संयोगादिवद्यथोपलम्भं स्वाभावसादेश्यमङ्गीकर्तव्यं यदा चान्यानीतपुस्तकेन देवदत्तहस्तः संयुज्यते तदा देवदत्तेनापि कथं न युज्येत हस्तस्य तस्य च निःस्पन्दत्वाविशेषात्, आभिमुख्यस्याप्युभयोरविशेषात् । एतेन विभागजविभागोऽपि निराकृतः,

विभागं चान्तर्भावयिष्यामः। अकार्यस्तु संयोगो निरन्तरयोर्निःस्पन्दयोर्द्रव्ययोः स नास्तीति वैशेषिकादयः। विभवो मिथः संयुक्ताः निरन्तरद्रव्यत्वात् संप्रतिपन्नवत् असंयुक्तत्वे सान्तरत्वप्रसङ्गः, यश्च विभूनां नैरन्तर्यमात्रमिच्छेत् तेनापि तत्रायमपरिहार्यः, अस्मन्मते नैरन्तर्यस्य समासन्नदेशसंयोगरूपत्वात् गुणादिषु तु निरन्तरत्वबुद्ध्यभावात्, न च हेत्वभावात्संयोगाभाव इति वाच्यं ज्ञापकस्योक्तत्वात् कारणस्य निवृत्तौ कार्यमात्रस्य निवृत्तिरितीश्वरज्ञानचिकीर्षाप्रयत्नेषु भवद्भिरेव प्रतिपादनात् विभूनामपि स्वकार्यजननादेरीश्वरानुप्रवेशनिबन्धनत्वात्। औपनिषदश्चायमर्थः तथा च श्रुतयः सर्वव्यापी च भगवान्, अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः इत्यादिकाः न च बहिश्चेति वचनादीश्वरज्ञानव्यतिरिक्तानां सर्वेषामप्यविभुत्वमिति वाच्यं बाह्यदेशवत्स्वेव बहिर्व्यपदेशेऽपि मुख्यान्वयात् अन्यथा ईश्वरधर्मभूतज्ञानस्याप्यविभुत्वप्रसङ्ग इति, अनुमानान्तराणि च विगीतं विभु द्रव्यं विभुद्रव्यसंयोगवत् द्रव्यत्वात् घटवत् न च व्याप्तिबलात्स्वेन संयोगप्रसङ्गः। विभुद्रव्याणामनेकत्वात् स्वेतरविभुद्रव्यसंयोगेन साध्यसिद्ध्युपपत्तेः, तथा विगीतमीश्वरसंयुक्तं द्रव्यत्वात् घटवत् ईश्वरो वा कालादिसंयुक्तः द्रव्यत्वात् घटवत्, न च कालसंयोगे कालकार्यत्वप्रसङ्गः तस्यापि तदधीनविकारत्वात् कालं स पचते तत्र न कालस्तत्र वै प्रभुरित्यादिविशेषवचनाच्चेति। यत्तु भट्टपराशरपादैर्मनोऽणुत्वसमर्थनदशायामजसंयोगो निरस्तः तदपि युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् आत्मेन्द्रियार्थसन्निकर्षे ज्ञानस्य भावोभावश्च मनसोलिङ्गम् इत्यक्षपादकणभक्षसूत्रोपादानप्रसङ्गेन तत्तत्सिद्धान्तसंस्कारोन्मेषवशादिति मन्या-

महे। अत एव हि तत्र कालस्वरूपाप्रत्यक्षत्वमप्युक्तम्। यत्तु तत्र न चाजसंयोगमन्तरेण किंचिदनुपपन्नमित्युक्तं यच्च स्तम्भादेर्विभुसंयोगे किं मानं न प्रत्यः ' प्रत्यक्षाप्रत्यक्षसंयोगत्वात्, न चानुमानं मूर्तद्वयाश्रयनियमादिति चेदित्यत्र परत्वापरत्वशरीरगतितद्विकारोर्द्ध्वज्वलनादीनां संभवार्थं विभुसंयोगावश्यंभावादिति तत्र पूर्वमेव दत्तमुत्तरम्। यथा च मूर्तगतविकारविशेषसिद्ध्यर्थं विभुसंयोग उक्तः तथैव कालादिगतविकारसिद्ध्यर्थमपीश्वरसंयोगोऽवश्याभ्युपेत्यः, अन्यथेश्वरशरीरत्वमपि कालादेर्न स्यादिति॥

अथ शक्तिः सर्वकारणानां कारणत्वनिर्वाहकः कश्चिद् द्रव्यविशेषः शक्तिः तर्कागमाभ्यां तत्सिद्धेः प्रतिबन्धकमणिमन्त्रादिसन्निधौ स्वरूपसहकारिवैकल्याभावेऽपि यदुपरोधाद्दहनो न दहति सा ह्यतीन्द्रिया शक्तिः अयस्कान्तदुन्दुभिस्वनादिवृत्तिः तेषु चैषा विशदमवगम्यते प्रतिबन्धकाभावपर्यवसायिनां शक्तितद्धर्मनाशतदुत्पत्त्यनुत्पत्त्यादिप्रसङ्गानामन्तत आगमेन प्रतिहतिरिति। नन्वस्तु तत्सिद्धिः तथाऽपि सा प्रतिबन्धकेन नाश्यते वा तद्धर्मो वा नाश्यते विरोधिनोः शक्त्यन्तरधर्मान्तरयोर्वोत्पत्तिः [illegible]विशिष्टाऽपि वा कार्यं न करोतीति पञ्चसु पक्षेषु कोऽभ्युपगम्यत इति सौहार्देन पृच्छाम इति चेत् अस्त्वेषामन्यतमः तर्हि पुनः शक्त्युत्पादानियतकारणत्वप्रसङ्गपरिहारः कथमिति चेदित्थं प्रतिबन्धकाभावसहिताद्वह्निस्वरूपात्तदुत्पत्तिः अप्रतिबद्धा शक्तिर्वा कार्यकरीत्यादिभवन्निर्वाहस्यैव शक्तौ सुवचत्वात्, सा तर्हि किमर्थं कल्प्यत इति न वाच्यं दत्तोत्तरत्वात्। ननु शक्तिः शक्ता वा न वा पूर्वत्र शक्तियोगाच्छक्तौ सा च शक्तिस्तथेत्यन-

वस्था, उत्तरत्र तस्याः कारणत्वं न स्यात् अशक्तत्वात् अन्यथा सिकताभ्योऽपि तैलमुत्पद्येत शिलाशकलादिभ्यश्चाङ्कुरादिकमिति चेन्न शक्त्यन्तराभावेऽपि कारणानां कार्यानुगुण्यरूपतया तस्याः सिद्धत्वात् अन्यथा उष्णत्वमुष्णं न वा पूर्वत्रानवस्था उत्तरत्र कार्यं न जनयेत् शातवदित्यादिप्रसङ्गस्यापि दुर्वारत्वात्, उक्तं चैतद्भगवता पराशरेण।

शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः।
यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः॥
भवन्ति तपतांश्रेष्ठ पावकस्य यथोष्णता।

इत्यादिप्रमाणसिद्धस्वभावा न कथंचिदपि परित्यागमर्हतीत्यर्थः। एवमहिर्बुध्न्यसंहितायामपि।

शक्तयः सर्वभावानामचिन्त्या अपृथक्स्थिता।

इत्यादि, एवं सर्वत्रानुसंधेयम्।

इतरे त्वेवं वदन्ति सर्वकारणानां सन्निधिमात्रोपकारिणी शक्तिः तामन्तरेण निःसारमखिलमशक्तत्वात् तथान्वयव्यतिरेकात्, अत एव सा विशेषणतया स्फुरन्त्यपि वस्तुतः प्रधानभूता सर्वत्रैका कल्पनालाघवात् तदुक्तम् एकैव तु परा शक्तिर्ज्ञानानन्दक्रियामयीति। निर्विकारा तत्संबन्धिगत्वाद्विकाराणां न शक्त्यन्तरमपेक्ष्यते शक्तत्वादनवस्थानाच्च अपर्यनुयोज्यवैभवा चेयम् अघटितघटकतया धर्मिग्राहकसिद्धेः एकत्वादेव देशकालापरिच्छिन्ना तदुक्तं व्यापिका तु पराशक्तिर्व्याप्यं विश्वमिदं जगदिति सर्वाकारोल्लासिनीत्वाद्वस्तुपरिच्छेदरहिता अचिच्छक्तिरूपेण सकला निष्कृष्टचिच्छक्तिरूपेण निष्कला तां कार्यकारणरूपप्रपञ्चकञ्चुकितां प्रपञ्चप्रलयव-

तीमेव तत्परतोभावयेदिति, तदन्ये न मन्यन्ते तथा हि न तावत्प्रधानभूता तद्विशिष्टस्यैव तत्त्वात्, अत एव नोपादानत्वादिकमप्यस्याः प्रागुत्तरावधिव्यतिरिक्तपरिणामस्तु नेष्यत एव, नापि सर्वत्रैका प्रतिवस्तुनियततयैव तत्सिद्धेः, नापि सर्वत्र नित्या अनित्येषु नित्यत्वे प्रमाणाभावात्, नाप्यनादिः कारणैः सहैव स्वरूपलाभात्, नाप्यपर्यनुयोज्यवैभवा प्रतिनियतविषयत्वात्, एवं तु वस्तुपरिच्छेदवत्त्वमपि सिद्धम्। ननु ब्रह्मशक्तिरेव सर्वेषां शक्तिः तद्विषयतया शक्तत्वं नियतविषयत्वं चान्येषामस्तु किं सर्वत्र शक्तिभेदाभ्युपगमेनेति चेन्न प्रत्येकं शक्त्याश्रयत्वव्यपदेशस्वारस्यबाधात् यद्यपि ब्रह्मशक्तिस्तु न शक्त्यन्तरवत् तथापि तच्छक्तिरित्येव सिद्धेः तत्प्रधानत्वसमत्ववचनान्यपि विवक्षया घटन्ते अधिकत्ववचनानि तु न सन्त्येव यामलादितन्त्रं तु पाशुपताधिकरणेनैव निराकृतं, संविदद्वैतदूषणानि च सर्वाण्यत्राप्यनुसंधेयानि, इयं च द्रव्येष्वेव वर्तते अद्रव्येष्वपि वेति सयूथ्यवादः आत्मसिद्धौ भगवद्यामुनमुनिवचनं सर्वद्रव्येषु तत्कार्यसमधिगम्यस्तत्प्रतियोगिशक्त्याख्यो गुणः साधारण इति अत्र सर्वद्रव्येष्वित्यस्य द्रव्येष्वेवेत्यवधारणं केचिदिच्छन्ति सर्वेषु द्रव्येष्वस्त्येवेत्यन्ये। उक्तं च वरदविष्णुमिश्रैः शक्तेर्गुणत्वेऽपि गुणकर्मणोस्तत्संभव इति पूर्वस्मिन्पक्षे द्रव्यगतयैव शक्त्या समानाधिकरणया रूपरसादीनां शक्तत्वम्। इतरस्मिंस्तु पक्षे रूपादिष्वपि शक्तिरस्ति एवं द्रव्यमात्रे रूपादिष्वपीति वृत्तिस्तावद्यथाकथञ्चिदस्तु शक्तिमात्रं साम्प्रदायिकमिति स्थितम्। भाष्यकारैरपि शक्तिः शरीरनिरूपणेऽभिहिता अग्न्यादेः शक्तिप्रतिबन्धादौष्ण्याद्यनुदय इति। ननु स्वशक्त्या वस्तु वस्तुतामित्यत्र शक्तिशब्दः सहकार्य-

र्थतया स्थापितो भाष्यकारैः यथा स्वशक्त्या स्वकर्मणैव देवादिवस्तुताप्राप्तिरिति तथा अघस्य विनाशकरणमुत्पन्नायास्तच्छक्तेर्विनाशकरणं शक्तिरपि परमपुरुषाप्रीतिरेवेत्युक्तं तथा भगवता पराशरेणापि ।

विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथाऽपरा ।
अविद्याकर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते ॥
यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप ! सर्वगा ।
समस्ताः शक्तयश्चैता नृप ! यत्र प्रतिष्ठिताः ॥
तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत् ।
परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत् ॥

इत्यादिषु शक्तिशब्दो ह्यपृथक्सिद्धविशेषणमात्रे प्रयुक्तः तथा वेदार्थसंग्रहे शक्तयः सर्वभावानामचिन्त्येत्यस्य व्याख्याने अतो विचित्रानन्तशक्तियुक्तं ब्रह्मेत्यर्थ इत्युक्त्वा तदाह ।

जगदेतन्महाश्चर्यं रूपं यस्य महात्मनः ।
तेनाश्चर्यवरेणाहं भवता कृष्ण ! संगतः ॥

इतीत्युदाहृतं, तत्र च शक्तिशब्दार्थतया जगदेतन्महाश्चर्यं रूपं यस्येत्युक्त्या नातिरिक्ता शक्तिरिष्यत इत्यवगम्यते । स्यादेवं नैतावता शक्तिलक्षणधर्मविशेषस्यानभिमतत्वसिद्धिः मणिमन्त्रादिप्रतिबन्धार्हतया दाहादिकार्यहेतुभूतायाः शक्तेः साक्षादुक्तत्वात् गौण्या लक्षणया वा वृत्त्या तत्रतत्र शक्तिशब्दप्रयोगास्तु न तद्वस्तूनां शक्तिरूपत्वप्रतिपादनपराः कर्मणां जीवशक्तित्वव्यपदेशः परमपुरुषप्रीत्यप्रीत्योः कर्मशक्तित्वव्यपदेशश्च तत्तदधीनोत्पत्तित्वेन तत्तत्पारतन्त्र्यमात्रात् अत एव क्षेत्रज्ञाविद्यादीनां जगतश्च परब्रह्मशक्तित्वव्यपदेशोऽपि निरतिशयश-

क्तिमूलत्वाद्वा अत्र विष्णोः शक्तित्वव्यपदेशस्तु शक्तिशक्तिमतोरभेदोपचारात् विचित्रानन्तशक्तियुक्तमित्यत्र जगदेतन्महाश्चर्यमिति वचनोदाहरणं, तत्र विचित्रजगत्स्रष्टृतया विचित्रशक्तियुक्ततोपपादनार्थमतो न कश्चिद्विरोध इति अतः शक्तिर्नाम धर्मविशेषः सिद्ध इति ॥

स्वतः पतनहेतुस्वभावो गुरुत्वं तच्च सलिलपृथिवीगतं पतनकल्प्यं तोलनादिदशायां स्पार्शनप्रत्यक्षमपीति केचित् तोलनादेश्च सहकारित्वात्पर्यन्तोर्ध्वभागस्पर्शे तदनुपलम्भो न दोषः, अन्यथा मातापितृसंबन्धग्रहणसापेक्षे ब्राह्मणत्वादावप्रत्यक्षत्वापातादिति । अन्ये त्वाहुः नास्ति पृथिवीसलिलस्वरूपातिरिक्तं गुरुत्वं स्वरूपादेवाप्रतिबद्धास्तयोः पतनसिद्धिः स्वभावादेव ह्यधिकगुरुत्वस्यापि पतनहेतुत्वं, स च स्वभावः स्वरूपस्यैवास्तु लाघवात्, पतनतारतम्यपलादिनियमोऽप्यवयवाधिक्यन्यूनतानिबन्धनः न तदनुगुणतयैव हि पलादिनियमं स्मर्तारोऽपि निबध्नन्ति उक्तं च न्यायतत्त्वे प्रमेयपादसप्तमाधिकरणे अधःपतनस्वभावात्सगुरुत्वं तदभावो लघुत्वमिति यदि च पतनात्किञ्चित्स्वरूपातिरिक्तं कल्प्यते तर्ह्यूर्ध्वज्वलनतिर्यक्पतनाभ्यां दहनपवनयोरपि द्वयमपि स्यात्, स्वभावाददृष्टादीश्वरसंकल्पाच्छक्तिविशेषाद्वा तत्सिद्धिरिति चेत् तर्ह्यत्रापि तथा स्यात् अविशेषात् एतदभिप्रायेण तत्रैवोक्तं त्रिविधं गुरुत्वमौर्ध्वतिर्यगधोभेदेन वाय्वग्निजलानि तिर्यगूर्ध्वाधोगुरूणीति, भूतद्वयनिष्ठत्वं तेषामनुपपन्नमिति चेत् भवदभिमतस्य वा कथमुपपद्यते, स्वभावादिति चेत्तुल्यम्, यथा चोर्ध्वज्वलनस्य एकभूतावान्तरव्यक्तिषु वह्नीषु वृत्तिस्तथात्रापीति भाव्यं सलिलमेव चास्माकमवस्थान्त-

र्थतया स्थापितो भाष्यकारैः यथा स्वशक्त्या स्वकर्मणैव देवादिवस्तुताप्राप्तिरिति तथा अघस्य विनाशकरणमुत्पन्नायास्तच्छक्तेर्विनाशकरणं शक्तिरपि परमपुरुषाप्रीतिरेवेत्युक्तं तथा भगवता पराशरेणापि ।

विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथाऽपरा ।
अविद्याकर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते ॥
यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप! सर्वगा ।
समस्ताः शक्तयश्चैता नृप! यत्र प्रतिष्ठिताः ॥
तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत् ।
परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत् ॥

इत्यादिषु शक्तिशब्दो ह्यपृथक्सिद्धविशेषणमात्रे प्रयुक्तः तथा वेदार्थसंग्रहे शक्तयः सर्वभावानामचिन्त्येत्यस्य व्याख्याने अतो विचित्रानन्तशक्तियुक्तं ब्रह्मेत्यर्थ इत्युक्त्वा तदाह ।

जगदेतन्महाश्चर्यं रूपं यस्य महात्मनः ।
तेनाश्चर्यवरेणाहं भवता कृष्ण! संगतः ॥

इतीत्युदाहृतं, तत्र च शक्तिशब्दार्थतया जगदेतन्महाश्चर्यं रूपं यस्येत्युक्त्या नातिरिक्ता शक्तिरिष्यत इत्यवगम्यते । स्यादेवं नैतावता शक्तिलक्षणधर्मविशेषस्यानभिमतत्वसिद्धिः मणिमन्त्रादिप्रतिबन्धार्हतया दाहादिकार्यहेतुभूतायाः शक्तेः साक्षादुक्तत्वात् गौण्या लक्षणया वा वृत्त्या तत्रतत्र शक्तिशब्दप्रयोगास्तु न तद्वस्तूनां शक्तिरूपत्वप्रतिपादनपराः कर्मणां जीवशक्तित्वव्यपदेशः परमपुरुषप्रीत्यप्रीत्योः कर्मशक्तित्वव्यपदेशश्च तत्तदधीनोत्पत्तित्वेन तत्तत्पारतन्त्र्यमात्रात् अत एव क्षेत्रज्ञाविद्यादीनां जगतश्च परब्रह्मशक्तित्वव्यपदेशोऽपि निरतिशयश-

क्तिमूलत्वाद्वा अत्र विष्णोः शक्तित्वव्यपदेशस्तु शक्ति-शक्तिमतोरभेदोपचारात् विचित्रानन्तशक्तियुक्तमित्यत्र जगदेतन्महाश्चर्यमिति वचनोदाहरणं, तत्र विचित्रजगत्स्र-ष्टृतया विचित्रशक्तियुक्ततोपपादनार्थमतो न कश्चिद्वि-रोध इति अतः शक्तिर्नाम धर्मविशेषः सिद्ध इति ॥

स्वतः पतनहेतुस्वभावो गुरुत्वं तच्च सलिलपृथिवी-गतं पतनकल्प्यं तोलनादिदशायां स्पार्शनप्रत्यक्षमपीति केचित् तोलनादेश्च सहकारित्वात्पर्यन्तोर्ध्वभागस्पर्शे तद-नुपलम्भो न दोषः, अन्यथा मातापितृसंबन्धग्रहणसापेक्षे ब्राह्मणत्वादावप्रत्यक्षत्वापातादिति । अन्ये त्वाहुः नास्ति पृथिवीसलिलस्वरूपातिरिक्तं गुरुत्वं स्वरूपादेवाप्रतिबद्धा-स्तयोः पतनसिद्धिः स्वभावादेव ह्यधिकगुरुत्वस्यापि पत-नहेतुत्वं, स च स्वभावः स्वरूपस्यैवास्तु लाघवात्, पतन-तारतम्यपलादिनियमोऽप्यवयवाधिक्यन्यूनतानिबन्धनः न तदनुगुणतयैव हि पलादिनियमं स्मर्तारोऽपि निबध्नन्ति उक्तं च न्यायतत्त्वे प्रमेयपादसप्तमाधिकरणे अधःपतनस्व-भावात्सगुरुत्वं तदभावो लघुत्वमिति यदि च पतना-त्किञ्चित्स्वरूपातिरिक्तं कल्प्यते तह्यूर्ध्वज्वलनतिर्यक्पत-नाभ्यां दहनपवनयोरपि द्वयमपि स्यात्, स्वभावाददृष्टा-दीश्वरसंकल्पाच्छक्तिविशेषाद्वा तत्सिद्धिरिति चेत् तर्ह्य-त्रापि तथा स्यात् अविशेषात् एतदभिप्रायेण तत्रैवोक्तं त्रिविधं गुरुत्वमौर्ध्वतिर्यगधोभेदेन वाय्वग्निजलानि ति-र्यगूर्ध्वाधोगुरूणीति, भूतद्वयनिष्ठत्वं तेषामनुपपन्नमिति चेत् भवदभिमतस्य वा कथमुपपद्यते, स्वभावादिति चेत्तु-ल्यम्, यथा चोर्ध्वज्वलनस्य एकभूतावान्तरव्यक्तिषु बह्वीषु वृत्तिस्तथात्रापीति भाव्यं सलिलमेव चास्माकमवस्थान्त-

रापन्नं पृथिवीत्यतोऽपि न दोषः, तोलनादावपि प्रत्यक्षत आक्रमणमनुपलभ्यते यथा वाय्वादिभिरभिघातादिः तावतैव तत्रापि च गुरुत्वव्यवहार उपलभ्यते चैतत् बलवता पुरुषेणाक्रम्यमाणेऽतिगुरुत्वप्रत्ययात् तस्मिन्नेव च मन्दमाक्रामति मान्द्यव्यवहारात् अतोऽनुमानतः प्रत्यक्षतो वा न भवदभिमतगुरुत्वसिद्धिः। अस्तु तर्हि सलिलपृथिवीसाधारण उपलभ्यमानो रसादिरेव पतनहेतुरिति चेन्न तत्रानुविधानात्पतनतारतम्यस्य वैपरीत्योपलम्भाच्च। किं तर्हि वस्तुतो गुरुत्वं श्रूयताम् शक्त्यनभ्युपगमपक्षे विलक्षणं स्वरूपमेव तदभ्युपगमपक्षे तद्विशेष एव सर्वत्र हेतुत्वनिर्वाहकतयाऽभ्युपगतायास्तस्या एवात्रापि स्वीकर्तुमुचितत्वादिति। यत्तु सांख्यैः तमस्कार्यतया पृथिवीजलयोः पतनहेतुर्गुरुत्वलक्षणो गुणविशेषोऽभ्युपगम्यते तैस्तेजःपवनयोरूर्ध्वतिर्यग्गमनहेतुतया सत्त्वकार्यौ लघुत्वलक्षणो गुणविशेषोऽभ्युपगन्तव्यः किं तु हेतुना येन पृथिव्यादिषु गुरुत्वलघुत्वयोर्नियमं वदसि अनेनैव हेतुना पतनादिकार्यनियमोऽस्तु मध्ये गुणान्तरकल्पनं गुरुतरम् अतो गुरुत्वगुणकल्पनं गुरुत्वपराहतमिति॥

द्रवत्वप्रत्ययविषयो द्रवत्वं, तच्च स्यन्दननिदानं न जलमात्रवृत्ति पार्थिवतैजसेष्वपि क्षीरकाञ्चनादिद्रव्येषु तदुपलम्भात्, द्विधा चेदं सांसिद्धिकपाकजभेदात् सलिले सांसिद्धिकं पृथिवीतेजसोः पाकजमिति। यद्वा सलिल एव द्रवत्वं काञ्चनादिद्रव्येषु सलिलनिष्ठमेव तदुपलभ्यते पञ्चभूतमयत्वात्सर्वेषां कदाचित्तदंशोद्भवसिद्धेः तदिदं मृगसलिलवृत्तान्ते भगवता भाष्यकारेण दर्शितं, तथाऽप्येतन्न जलत्वमात्रं तस्य करकाद्यवस्थायां काठिन्योपलम्भात्।

अन्ये त्वाहुः सलिलनिष्ठमेव द्रवत्वमिति यदुक्तं तत्सा-
धूक्तं सलिलत्वमात्रातिरिक्तमिति कुतः सिद्धं स्यन्दन-
हेतुतया तत्कल्पनमिति चेत् तदपि तत एव किं न स्यात्
अग्निरुष्ण इत्यादिवत् द्रवं जलमिति विशेषणतया स्फुर-
णादतिरिक्तत्वमिति चेत् अस्त्वेवमतिरेकः तथापि जल-
त्वपर्यवसितसंस्थानविशेषोऽयमिति यथोपलम्भमङ्गीक्रि-
यतां यथा काठिन्यं, स्पर्शविशेषः काठिन्यमिति चेत् अत्रा-
पि तथाऽस्तु अविशेषात्, न च केवलं स्पर्शविशेषः काठि-
न्यं संयोगविशेषसापेक्षः पृथिवीत्वैकार्थसमवायी स्पर्श-
विशेषः, उक्तं च न्यायतत्वे प्रमेयपादसप्रमाधिकरणे वि-
रलसंयोगप्रयुक्तः स्पर्शो मृदुः निर्विरलसंयोगप्रयुक्तस्स्पर्शः
कठिन इति, निम्नोन्नतिलेशरहितसंयोग एव किंनिबन्धन
इति चेत् जलत्वनिबन्धन एवेति मन्वीथाः जलत्वं नाम
किमिति चेत् हन्त किं द्रवत्वाभिलाषेण जलत्वमपलपितु-
मिच्छसि किं वा जलत्ववद् द्रवत्वसिद्धिरिति मन्यसे न
चोभयमपि युज्यते तथापि किमिदं जलत्वमिति चेत् जा-
तिविशेषः किं तस्य व्यञ्जकमिति चेत् तादृशसंयोगविशेष-
रूपविशेषादि, तर्हि तदभ्युपगमेन जलत्वमपि परित्यज्य-
तामिति चेत् अस्तु नैतावता द्रवत्वस्य बहिर्भावः यदि
द्रवत्वं न स्यात् क्षितितल इव सलिले ऽपि दुष्प्रवेशत्वं
स्यादिति चेन्न आकाशादिभिर्व्यभिचारात् स्पर्शवत्त्वे
सतीति चेन्न पवनातपादिभिर्व्यभिचारात् तेषां प्रशिथिल-
स्वभावत्वात् तदेव कथं सावकाशत्वात्तेषामिति चेन्न अनु-
पलम्भात्, न हि मध्यन्दिनातपे मात्रयाप्यवकाशमुपल-
भामहे तथापि तदुपगमेऽत्रापि तदभ्युपगम्यताम्। अवि-
शेषात् प्रवेशादियोग्यः समसंयोगविशेष एव किंनिब-
न्धन इति चेन्न पवनातपादिभिः समाधानम्। यत्तु कर-

काद्यवस्थायां काठिन्योपलम्भाज्जलत्वातिरिक्तं द्रवत्वमित्युक्तं तदपि न उपष्टम्भकभेदादेव तदानीं काठिन्योपलब्धेः यथा काञ्चनादितेजसां, न हि तेजसः स्वतोऽन्यतो वा काठिन्यमस्ति, न च करकाद्यवस्थासु कस्यचिज्जलप्रतीतिः, नापि विद्रुतावस्थायां जलत्वद्रवत्वयोरन्यतराप्रतीतिर्येन व्यतिरेकोपलम्भः स्यात् पर्यायत्वं कथमिति चेत् संयोगविशेषाद्युपाधिभेदादित्युक्तमेव एतदेव वैशेषिकाद्यभिमतं द्रवत्वम् ॥

अथ स्नेहो निरूप्यते स्नेहप्रत्ययविषयः स्नेहः स जलैकवृत्तिः घृतादिषु संसर्गाद् दृश्यते न चासौ द्रवत्वमात्रं शातकुम्भादिद्रवाणां पांसुसंग्राहकत्वाभावात्, नापि तोयत्वमात्रम् स्निग्धमिति तोयमिति पृथग्व्यवहारात्, जलप्रत्ययमन्तरेणापि मधूच्छिष्टादिषु स्निग्धमिति प्रत्ययदर्शनाच्च। तदेवं प्रत्यक्षसिद्धः सलिलैकवर्ती पांसुसंग्रहणहेतुः स्नेहाख्यो गुणोऽस्तीति वैशेषिकानुसारिणोऽस्मदीयाः। अन्ये त्वाहुः स्निग्धमिति प्रत्ययस्तावदस्त्येव स तु रूपस्पर्शविशेषादिष्वेव न ह्यन्यो गुणो विविच्योपलभ्यते मासृण्यमात्रेण सलिलेऽपि स्निग्धप्रत्ययः स काञ्चनादिद्रव्येष्वपि समः। यद्वा न कश्चिदपि सलिलं स्निग्धमिति जानाति मृदादिरेव हि तथोपलभ्यते पांसुसंग्रहणमपि सलिलत्वप्रयुक्तं सलिलत्वैकार्थसमवायिशक्तिविशेषप्रयुक्तं वा अतः काञ्चनादिद्रव्याणामसंग्राहकत्वोपपत्तिः। किंच यदि संग्राहकत्वात् सलिले स्नेहाख्यो गुणः स्वीक्रियते विश्लेषकत्वादग्नौ रौक्ष्याख्यं गुणान्तरमपि किं न कल्प्यते यदि तत्रौष्ण्यादिभिरेव विश्लेषादिसिद्धिः तर्ह्यत्रापि शैत्यादिभिरेव संग्रह इति

किं न स्वीक्रियते। उक्तं च न्यायतत्त्वे प्रमेयपादसप्तमाधिकरणे दुष्करवियोगस्वभावसंयोगस्पर्शत्वं पिच्छिलत्वं सुकरवियोगस्वभावसंयोगस्पर्शत्वं विश्लिष्टत्वमिति, यदि च संग्रहात् स्नेहसिद्धिः तर्हि पनसनिर्यासादिष्वपि स कल्प्येत संग्रहातिरेकात् तेषामेव वा तत्तत्क्लृप्तिरुचिता। यद्वा चुम्बकशिलाया इव शक्तिविशेषात् संग्राहकत्वमस्तु न च सलिलं संग्राहकमित्येव नियममुपलभामहे शुष्कमृत्पिण्डादीनां सलिलसेकेन विलयस्यापि दर्शनात्, तस्मात्सलिलस्वरूपमेव सहकारिविशेषमासाद्य संग्राहकं विभेदकं चेति यथोपलम्भमङ्गीकार्यम्। चेतनानां तु स्नेहः प्रीतिरूपादित्सा वा, रौक्ष्यमपि दुःखं जिहासा क्रोधो वा अतो न गुणान्तरसिद्धिरिति॥

अनुभवजा स्मृतिहेतुर्वासना सा कार्यैकरूप्या न तावदनुभवहेतुः स्मृतिः तस्य चिरध्वस्तत्वात्, नापि तदुपलक्षित आत्मादिः प्रध्वस्तस्याप्यज्ञायमानस्योपलक्षणतयापि कारणत्वासंभवात् नापि तद्ध्वंसः संस्कारप्रमोषाभावप्रसङ्गात्, नापि सदृशदर्शनादि केवलस्यातिप्रसङ्गित्वात्, विशिष्टस्यासिद्धेः, अनुभवजनितादृष्टविशेष इति चेत् तर्हि सिद्धा वासना सा पुण्यापुण्यरूपा वा ततोऽन्या वेति विशेषः तत्र न पूर्वा विधिनिषेधागोचरेषु तदयोगात् अतो द्वितीयैव परिशिष्यते, साप्याधेयशक्तिर्वा ततोऽन्या वा कार्यकारणादिप्रक्रिया सर्वा समा सा चात्मनिष्ठा ज्ञानद्रव्यनिष्ठा वेत्येकदेशिविवादः, तत्रानुभवस्मृत्यन्तरङ्गत्वात् ज्ञानद्रव्यनिष्ठत्वमेवोचितम्। यत्तु वरदविष्णुमिश्रैरुक्तं भावनाकल्पकप्रमाणेनैव स्थिरात्माश्रयत्वकल्पनादस्थिरज्ञानाश्रयत्वस्य प्रमाणाभावादिति

तन्नूनं परमताभिप्रायेणोक्तं स्वेनैव ज्ञानस्य द्रव्यत्वनित्यत्वयोः समर्थनात्, यदुक्तं समन्वयाधिकरणे भेदाभेदिमतदूषणप्रसङ्गेन विवरणकारैः न ह्युपाधिः प्रतिसंधाता प्रदेशभेदस्तु तुल्यः न ह्यन्यगतः संस्कारोऽन्यत्र प्रतिसंधिहेतुः, यदि स्यात्तर्ह्यनियमः अनुभवसमानाधिकरणश्च संस्कार इति तन्नूनं धर्मभूतज्ञानस्य द्रव्यत्वमनभ्युपगच्छतां मतेनोक्तम् । अस्मन्मते त्वनुभवसंस्कारस्मृतीनां ज्ञानावस्थाविशेषरूपत्वान्न कश्चिद्दोषः । एतेन वासनारेणुकुण्ठित इत्याद्यपि गतार्थम् ॥

वेगो भावना स्थितस्थापक इति त्रिविधः संस्कार इति वैशेषिकाः तदनुपपन्नं वेगस्य कर्मविशेषव्यतिरेके प्रमाणाभावात् शीघ्रं गच्छतीत्याद्युपलम्भस्यापि कर्मातिशयमात्रेण चरितार्थत्वात् कर्मातिशयस्य चोभयसिद्धत्वात्, उक्तं च न्यायतत्त्वे प्रमेयपादे कालनिरूपणप्रसङ्गे संयोगकालसामीप्यं हि वेग इति वेगेन गच्छतीत्यादौ प्रयत्नहेतुकर्मण्यपि वेगशब्दप्रयोगात् वेगस्य शरादिधर्मत्वेन प्रतिभासस्य मान्द्यप्रतीतिनिरस्तत्वात् संस्कारत्वं स्पन्दजनकवृत्तिसंस्कारजातित्वादित्यादेरतिप्रसङ्गासिद्ध्यादिदुष्टत्वात्, श्रीविष्णुचित्तार्यैः क्रियावेगार्थत्वेन पठिता तथा हि ईश्वरानुमाननिराकरणे सर्वा क्रिया कृतिपूर्विका क्रियात्वात् गमनवदिति चेन्न शरवेगजलस्पन्दनादौ व्यभिचारात् तेषां स्वभावत्वकल्पने हेतुमत्त्वकल्पनाविरोधादित्युक्तम् । स्थितस्थापकोऽपि संस्थानविशेष एव संस्थानविशेषतारतम्यानुरोधेन हि प्रतिगमनतारतम्यं दृश्यते सर्वदा क्रियोत्पत्तिप्रसङ्गः कर्षणमोक्षणादि सहकारिसाहित्येन परिहारश्च समौ

अतिरिक्तस्यापि स्थितस्थापकस्य तादृशतारतम्यं संस्थानतारतम्याधीनमिति वक्तव्यं तद्वरमदृष्टगुणान्तरकल्पनात् तेनैव संस्थानविशेषेण स्वस्थानगमनसिद्धिः परिशुद्धिरतिरिक्तवदत्रापि चिन्त्या । ये पुनर्ज्ञानसंस्कारः कर्मसंस्कार इति द्वैविध्यमाहुः तेषां कोऽयं कर्मसंस्कार इष्टः न तावद्वेगस्थितस्थापकरूपः तस्य निराकृतत्वात् नापि पुण्यापुण्यरूपक्रिया प्रवृत्तिहेतुः तस्याः अपि पूर्वपूर्वादृष्टस्वस्वातन्त्र्यादिभिरेव निर्वाहात्, नापि मृदङ्गवादनादौ पूर्वपूर्ववादनादिभिराहित उत्तरोत्तरक्रियासु हस्तलाघवादिहेतुः तत्र हस्तलाघवादेः पूर्वपूर्ववादनाकृतकाठिन्यविशेषाभावादिप्रयुक्तत्वात् हस्तप्रेरणादिशैघ्र्यस्य पूर्वपूर्ववादनाधिकृतसंस्कारजनितप्रेरणस्मृतिशैघ्र्यप्रयुक्तत्वात्, यानि पुनः अघस्याश्लेषकरणं वैदिककर्मायोग्यतावासनाप्रत्यवायहेतुशक्त्युत्पत्तिप्रतिबन्धकरणम् एतदुभयकार्यकारणभूतानादिविपरीतवासनाबद्धोपीत्यादिभाष्यकारवचनानि तेषामप्यनुभववासनातिरिक्तसंस्कारकल्पननिर्बन्धाभावात् अघस्येत्यादिवाक्यान्तरं चैवमुक्तम् अघानि हि कृतानि पुरुषस्य वैदिककर्मायोग्यतां सजातीयकर्मान्तरारम्भरुचिं प्रत्यवायं च कुर्वन्ति, अघस्य विनाशकरणमुत्पन्नायास्तच्छक्तेर्विनाशकरणं शक्तिरपि परमपुरुषाप्रीतिरेवेति, एवं पापकर्मणः परमपुरुषाप्रीतिद्वारा सजातीयकर्मान्तरारम्भरुचिजनकत्वमिति सिद्धत्वान्न तत्र वासनान्तरमस्तीति गम्यते अनारब्धकार्ये एवेत्वित्यधिकरणे च व्यक्तमभाषयत् यथा न च पुण्यापुण्यजन्यभगवत्प्रीत्यप्रीतिव्यतिरेकेण शरीरस्थितिहेतुभूतसंस्कारसद्भावे प्रमाणमस्तीति अन्यत्राप्येतत्तुल्यन्यायमिति बोद्धव्यम् एवं श्रीमद्गीताभाष्येऽप्युक्तम् ।

त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥

इत्यस्य व्याख्याने स्वभावः स्वासाधारणो भावः प्राचीनवासनानिमित्तस्तत्तद्रुचिविशेषः यत्र रुचिस्तत्र श्रद्धा जायते श्रद्धा हि स्वाभिमतं साधयत्येतदिति विश्वासपूर्विका साधने त्वरा वासना रुचिश्च श्रद्धा चात्मधर्मा गुणसंसर्गजाः तेषामात्मधर्माणां वासनादीनां जनका देहेन्द्रियान्तःकरणविशेषगता धर्माः कार्यैकनिरूपणीयाः सत्त्वादयो गुणाः सत्त्वादिगुणयुक्तदेहाद्यनुभवजा इत्यर्थ इत्युक्तम् । यच्चात्मसिद्धौ निर्धूतनिखिलकरणकलेवरज्ञानकर्मवासनानुबन्धस्यापवृक्तस्य न खलु स्वपरसंवेदनोदयनिबन्धनं किञ्चित्संभाव्यत इति भगवद्यामुनमुनिभिर्ज्ञानकर्मवासनयोर्भेदेनोपादानं तदपि भाष्यकारवचनवन्निर्वाह्यम् । यत्तु कैश्चित् कार्पासवीजे लाक्षारागरूषिते सति तद्रक्ततापगमेऽपि तत्कुसुमफलादौ रक्तादर्शनाद्वासनानुवृत्तिरङ्गीकार्येति, तत्र विचारणीयं किं तत्कार्येष्वङ्कुरादिषु वासनोदयः क्रमेण पुष्पाद्यात्मना परिणममानेषु वीजावयवेषु वा नाद्यः वैयधिकरण्येनाश्रयाभावाच्च वासनोदयानुपपत्तेः अन्यथातिप्रसङ्गात्, वीजावयवेषु तु लाक्षावयवानुवृत्तिस्यूतिबलेनैव रक्ततोपपत्तौ वासना निष्प्रयोजना । यत्तु गारुडमन्त्राद्यभिमृष्टेषु जलादिषु विषनिर्हरणादिदर्शनात् कश्चित्संस्कारोऽङ्गीकार्य इति तदनुपपन्न मन्त्रबलाहितशक्तिविशेषेणैव तत्तत्कार्योपपत्तेः, न हि सजातीयकार्यनिष्पादकतया नियतस्य संस्कारस्यैतादृशकार्यहेतुत्वं युज्यते । यस्तु मीमांसकैः व्रीहीन् प्रोक्षतीत्यादिविहितकर्मसु व्रीह्यादिद्रव्यनिष्ठः कश्चित्संस्कारोऽङ्गीक्रियते ।

संस्कारः* कर्तुरेवैष प्रोक्षणाभ्युक्षणादिषु ।

इति तस्य कर्तृसंस्कारत्वमभ्युपगम्यते नैयायिकैः किमयं भावनाख्यः संस्कारः उताहृष्टरूप इति विवेचनीयं नाद्यः तस्यानुभूतिजन्यत्वेन क्रियाजन्यत्वानुपपत्तेः, न द्वितीयः द्रव्येषु किञ्चित्कारमनाधाय केवलात्मसमवेतादृष्टजनकत्वे प्रयाजादिवदाराडुपकारकत्वप्रसङ्गात् ततश्च नैवारादिचरुयुक्तायां विकृतौ व्रीहीणामेव प्रोक्षणं स्यात् न तु नीवाराणां तत्प्रोक्षणस्य प्रकृतावविहितत्वेनात्मसमवेतादृष्टासिद्धेः ततो व्रीह्यादिष्वेव संस्कारोऽभ्युपगन्तव्य इति अत्रोच्यते यद्यप्येवम् अथाप्ययं संस्कारस्तत्तद्देवताभिमतिविषयत्वं वा सत्त्वादिगुणोद्बोधेन यागयोग्यत्वं वा अनेन न ततोऽतिरिक्तगुणविशेषसिद्धिः ॥

अथ संख्या, एकद्वित्र्यादिप्रतिपत्तिव्यवहारविषयः संख्या, तां द्रव्यमात्रनिष्ठां केचिदाहुः । केचित्तु द्रव्यगुणादिसमस्तपदार्थवर्तिनीं, द्रव्यमात्रनिष्ठावादिनश्च नित्यद्रव्येष्वेकत्वं नित्यम् अनित्यद्रव्येष्ववयवगतैकत्वैर्जन्यं, द्वित्वत्रित्वादयस्त्वपेक्षाबुद्धिसहकृतैः प्रत्येकवर्त्तिभिरेकत्वैर्जन्या इत्याहुः तत्र तावद् द्वित्वादिव्यवहाराणां द्वित्वादिसामग्र्येव निष्पत्तिः तत्तदपेक्षाबुद्धिविषयतयैव तेषां स्फुरणात् द्वित्वादीनां बाह्यनिष्ठानामपि व्यवहर्तृनियमस्तत एव वाच्यः अन्यथा साधारणोपलम्भप्रसङ्गात् रूपादिवत् ततस्तेनैव व्यवहारस्तन्नियमश्चेत्यस्मिन् पक्षे तूपपन्नतरं तादृशबुद्धिनिवृत्तौ च द्वित्वादिनिवृत्तिरभ्युपगता एवं च कारणनिवृत्तिमात्रात्कार्यनिवृत्तिकल्पनं गरीयः तादृशबुद्धिनिवृत्तिमात्राद्व्यवहाराभाव इति तूपपन्नतरम्

* संस्कारः कर्तुरेवेष्टः प्रोक्षणाभ्युक्षणादिभिः । इति तु ग्रन्थान्तरे पाठ उपलभ्यते ।

ननु बुद्धिविशेष एव तात्त्विकमारोपितं वा द्वित्वादिक-मनाश्रित्य कथंचिदपि न घटत इति चेत् भवतो वा कथं घटते शक्तिविशेषादिति चेन्न द्वित्वापलापापातात् द्वित्वादिप्रागभावः शक्तिरिति चेन्न द्वित्वत्रित्वादिसर्वप्रा-गभावसन्निधौ कस्य शक्तित्वमिति नियमासिद्धेः, ईश्वरबु-द्धिपरिग्रहविशेषाददृष्टाद्वा नियम इति चेत् तुल्यं, निर्विष-यव्यवहारप्रसङ्गो वैषम्यमिति चेन्न विषयाविधानात्। किं च द्वित्वादिषु प्रमाणसिद्धेषु तत्प्रागभावानां सहका-रित्वकल्पनं तेषु च प्रमितेषु तन्नियमेन द्वित्वाद्युत्पत्तिप्र-तिनियतिरिति दुरुत्तरम् अतः सिद्धं द्वित्वादिसंख्या बुद्धिविशेषविषयत्वमिति ॥

एकत्वं चिन्त्यते तत्र तावत्कार्यमेकत्वं नास्त्येव अवयविन एवानभ्युपगमात् कुतस्तदैक्यं समुदायैकत्वं राश्येकत्ववत् तत्रापि हि भागप्रधानव्यवहारे नैकत्वं व्यवहरन्ति संहतिदशायामेकत्वावस्था जायते विभक्त-दशायामनेकत्वकिमिति चेन्न भेदाभेदविरोधप्रसङ्गात्, प्रत्ययस्य च संहतिविभागाभ्यामेवान्यथासिद्धत्वात् स्वरूपस्य च वस्तुतो भेदाभेदविरुद्धत्वप्रसङ्गात् पटाव-स्थायामेकतन्तूपलम्भप्रसङ्गाच्च प्रलयावस्थायां प्रपञ्चैक्यं कथमिति चेत् न कथंचित् श्रुतिविरोधस्तर्हि इति चेन्न भेदप्रहाणपरत्वात् तदेवैक्यमिति चेन्न प्रकृतित्वावस्था-रूपत्वात् यथा तृणोपलादिपरिणामकलायां पृथिवीतः पृथग्व्यवहारो जायते तेषामेव परिणामान्तरमापन्नानां पुनःपृथिवीत्वव्यवहारः, न च तावता तृणोपलाद्यंशानां परस्परं तावदैक्यम्, अथ महापृथिव्या वा किं तर्हि विजातीयावस्थाप्रहाणेन सजातीयावस्थापत्तिमात्रम् एव

इदानीं सममण्डलशङ्कुसाधनमाह ।

विषुवत्कर्णेन गुणा विषुवच्छायोद्धृतोत्तरा क्रान्तिः ।
यद्यूनात्त्र्ज्यायाः शङ्कुः सममण्डलस्थेऽर्के ॥ ५१ ॥

उत्तरा क्रान्तिः क्रान्तिज्या यद्यग्रज्याया ऊना तदाऽर्के सममण्डलस्थे शङ्कुः स्यात् । शेषं स्पष्टार्थम् ।

अत्रोपपत्तिः । क्रान्तिज्या भुजः । कुज्योना तद्धृतिः कोटिः । सममण्डलशङ्कुः कर्णः । इत्यग्रक्षेत्रं प्रसिद्धम् । ततोऽनुपातो यद्यग्रभाभुजेन विषुवत्कर्णो लभ्यते तदा क्रान्तिज्याभुजेन किं जातः समशङ्कुः $= \frac{\text{विक}\cdot\text{ क्रान्तिज्या}}{\text{पलभा}}$ । उत्तरा क्रान्तिर्यदाऽग्रोना तदैवार्कस्य सममण्डलप्रवेशो भवेदिति 'मार्त्तण्डः सममण्डलं प्रविशति स्वल्पेऽपमे स्वात् पलादि' ति भास्करविधिना स्फुटमेव ॥ ५१ ॥

इदानीं पुनः प्रकारान्तरेण समशङ्कुसाधनमाह ।

सूर्यज्या जिनभागज्यया गुणात्त्र्ज्ययाथ वा भक्ता ।
अग्रा द्वादशगुणिता विषुवच्छायाविभक्ता वा ॥ ५२ ॥

सूर्यज्या रविभुजज्या जिनभागज्यया गुणाऽग्रज्यया भक्ताऽथ वा प्रकारान्तरेण सममण्डलशङ्कुर्भवेत् । वाऽग्रा द्वादशगुणा विषुवच्छायाविभक्ता तदापि समशङ्कुर्भवेत् ।

अत्रोपपत्तिः । रविभुजज्या जिनज्यागुणा त्रिज्याभक्ता जाता क्रान्तिज्या $= \frac{\text{जिज्या}\cdot\text{ भुज्या}}{\text{त्रि}}$ । ततोऽग्रज्याभुजेन त्रिज्याकर्णस्तदा क्रान्तिज्याभुजेन किं जातः समशङ्कुः $= \frac{\text{जिज्या}\cdot\text{ भुज्या}}{\text{त्रि}} \cdot \frac{\text{त्रि}}{\text{अग्रज्या}} = \frac{\text{जिज्या}\cdot\text{ भुज्या}}{\text{अग्रज्या}}$ ।

द्वितीयानयने । अग्रा भुजः । समशङ्कुः कोटिः । तद्धृतिः कर्ण इत्यग्रक्षेत्रं प्रसिद्धम् । ततो विषुवच्छायया यदि द्वादश कोटिस्तदाग्रया किं जातः समशङ्कुः $= \frac{\text{१२ अग्रा}}{\text{वि}}$ । अत उपपन्नं सर्वम् ॥ ५२ ॥

इदानीं सममण्डलस्थेऽर्के छायाकर्णसाधनमाह ।

द्वादशविषुवच्छायागुणिते पृथगक्षलम्बजीवे वा ।
क्रान्तिहृते सममण्डलकर्णौ प्राग्वत् पृथक् छाये ॥ ५३ ॥

अक्षज्या द्वादशगुणा वा लम्बज्या विषुवच्छायागुणा । एते द्वे क्रान्तिहृते क्रान्तिज्याहृते तदा सममण्डलकर्णौ भवतः । ताभ्यां प्राग्वत् पूर्वविधिना पृथक् छाये साध्ये ।

अत्रोपपत्तिः । अक्षक्षेत्रानुपातेन समशङ्कुः $= \frac{\text{त्रि} \cdot \text{क्रांज्या}}{\text{अक्षज्या}}$ । ततो 'दृग्ज्यात्रिजीवे रविसङ्गुणे ते शङ्कूद्धृते भाश्रवणौ भवेता' मित्यादिभास्करविधिना सममण्डलकर्णः $= \frac{\text{१२ त्रि}}{\text{स शं}} = \frac{\text{१२ त्रि} \cdot \text{अक्षज्या}}{\text{त्रि} \cdot \text{क्रांज्या}} = \frac{\text{१२ अक्षज्या}}{\text{क्रांज्या}}$
$= \frac{\text{१२ अक्षज्या} \cdot \text{लम्बज्या}}{\text{लम्बज्या} \cdot \text{क्रांज्या}} = \frac{\text{वि} \cdot \text{लम्बज्या}}{\text{क्रांज्या}}$ । अत उपपन्नौ प्रकारौ ॥ ५३ ॥

इदानीं कोणशङ्कोरानयनमाह ।

अर्काग्रावर्गोनं त्रिज्यावर्गार्धमर्ककृतिगुणितम् ।
आद्योऽन्योऽग्राद्वादशविषुवच्छायावधो हृतयोः ॥ ५४ ॥
विषुवच्छायाकृत्या द्व्यगसंयुतयान्यकृतियुतादाद्यात् ।
पदमन्ययुतविहीनं सौम्येतरगोलयोः शङ्कुः ॥ ५५ ॥
विदिशोः सौम्येतरयोरुत्तरगोले पदोनयुक्तोऽन्यः ।
सममण्डलदक्षिणगे न च्छाया नाडिकाः प्राग्वत् ॥ ५६ ॥

अस्य व्याख्या 'त्रिज्यावर्गार्धतोऽग्राज्यावर्गोनाद् द्वादशाहता 'दि-त्यादिप्रसिद्धसूर्यसिद्धान्तप्रकारेण स्फुटा ।

अत्रोपपत्तिः । कोणवृत्तस्थेऽर्के शङ्कुमूलप्राच्यपरयोरन्तरं शङ्कुमूल-दक्षिणोत्तरयोरन्तरेण सममिति क्षेत्रमितितः स्फुटम् । अथ शङ्कुप्रमाणं य । ततोऽनुपातेन शङ्कुतलम् $= \frac{\text{वि} \cdot \text{य}}{\text{१२}}$ । उत्तरदक्षिणगोलयोः क्रमेण भुज-मानम् $= \text{अ} \mp \frac{\text{वि} \cdot \text{य}}{\text{१२}}$ । भुजवर्गो द्विगुणो दृग्ज्यावर्गः $= \text{२} \left(\frac{\text{१२ अ} \mp \text{वि} \cdot \text{य}}{\text{१२}} \right)^{\text{२}}$

$$= \frac{१४४\ अ^२ \mp २४\ अ\cdot वि\cdot य + वि^२ य^२}{७२} = त्रि^२ - य^२ ।$$

समशोधनादिना $(७२ + त्रि^२)\ य^२ \mp २४\ अ\cdot वि\cdot य$

$$= ७२\ त्रि^२ - १४४\ अ^२ = १४४\left(\frac{त्रि^२}{२} - अ^२\right)$$

$$वा,\ य^२ \mp \frac{२४\ अ\cdot वि}{७२ + वि^२}\cdot य = \frac{१४४\left(\frac{त्रि^२}{२} - अ^२\right)}{७२ + वि^२}$$

आचार्येण यगुणकार्धस्यान्यसंज्ञा व्यक्तपक्षीयांशमानस्याऽऽद्यसंज्ञा कृता। तौ द्वगसंयुतया विषुवच्छायाकृत्या हृतावपि अन्याद्यौ भवतः। एवं कृते जातौ पक्षौ $य^२ \mp २\ अन्य\cdot य = आद्य$। ततो वर्गविधिना

$$य^२ \mp २\ अन्य\cdot य + अन्य^२ = अन्य^२ + आ$$

$$\therefore\quad य \mp अन्य = \sqrt{अन्य^२ + आ}$$

$$वा\quad य = \sqrt{अन्य^२ + आ} \pm अन्य$$

अत उपपन्नम्। यदा त्रिज्यावर्गार्धतोऽग्रावर्गोऽधिकस्तदोत्तरगोले आद्यस्य ऋणत्वात् कोणशङ्कुचतुष्टयमुत्पद्यते दक्षिणगोले च कोणशङ्कोरभाव इत्यादि सर्वं भास्करसिद्धान्तशिरोमणितः स्फुटम् ॥ ५४–५६ ॥

इदानीं भुजद्वयज्ञानात् पलभामाह।

प्राच्यपराशङ्कुतलान्तरद्वयव्यस्तकर्णवधविवरम्।
समदिशि विषुवच्छायान्यदिगैक्यं कर्णविवरहृतम् ॥ ५७ ॥

प्राच्यपराशङ्कुतलान्तरं शङ्कुमूलप्राच्यपरान्तरम्। अर्थात् द्वादशाङ्गुलशङ्कोर्भुजः। एवं भुजद्वयस्य व्यस्तकर्णवधस्य समदिशि विवरमन्यदिश्यैक्यं कर्णयोर्विवरेण हृतं विषुवच्छाया भवति।

अत्रोपपत्तिः। 'भाद्वयस्य भुजयोः समाशयोर्व्यस्तकर्णहतयोर्यदन्तरम्' इत्यादिभास्करविधिना स्फुटा ॥ ५७ ॥

इदानीं प्रकारान्तरेण पलभानयनमाह।

छायावृत्ताग्रोना सौम्येन युतान्तरेण याम्येन।
विषुवच्छायाजादिषु तुलादिषु तथान्तरं हीनम् ॥ ५८ ॥

छायावृत्ताया यथादिक्का कर्णवृत्ताया सौम्येन अन्तरेण द्वादशाङ्गुलशङ्कुतलप्राच्यपरान्तरेणार्थाद् भुजेनोना याम्येन भुजेन च युता । एवमजादिषु राशिषु अर्थादुत्तरगोले । तुलादिषु चार्थाद्दक्षिणगोले तथैव तदन्तरं भुजमानं हीनं छायावृत्ताग्रया तदा विषुवच्छाया भवतीत्यर्थः ।

अत्रोपपत्तिः । बृहच्छङ्कुतलाग्रासंस्कारेण भुजो भवति । लघुशङ्कौ तु शङ्कुतलं विषुवती । अग्रा छायाकर्णवृत्ताग्रा यथादिक्का । उत्तरगोले सममण्डलप्रवेशात् पूर्वं छायावृत्ताग्रा पलभोना सौम्यो भुजोऽतः सौम्येन भुजेनोना छायावृत्ताग्रा पलभा । सममण्डलप्रवेशादुपरि पलभातश्छायावृत्ताग्रा शुद्धा भवति ततोऽवशिष्टं दक्षिणो भुजोऽतस्तेन युता साऽग्रा विषुवती भवति । दक्षिणगोले सर्वदा विषुवतीछायावृत्ताग्रयोर्योगेन भुजमानमतस्तच्छायावृत्ताग्रया हीनं पलभा भवेदिति स्फुटमेव ॥ ५८ ॥

इदानीमिष्टच्छायावृत्ते पलभाग्रयोः संस्थानमाह ।

इष्टच्छायावृत्ते तदग्रयोर्यदुदयास्तमयसूत्रम् ।
अनुपातात्तच्छङ्कोर्विषुवच्छायान्तरमिहाग्रा ॥ ५९ ॥

इष्टच्छायावृत्ते पूर्वापराग्रयोर्ये तदग्रे अर्थाच्छायावृत्ते परिणते अग्रे तयोर्गतं सूत्रमुदयास्तसूत्रम् । तच्छङ्कोः । तस्य रवेः शङ्कुस्तच्छङ्कुस्तस्यानुपातात् प्रपातान्मूलादुदयास्तसूत्रपर्यन्तमन्तरं विषुवच्छाया भवति । एवमिहास्मिन् छायावृत्ते भुजविषुवतीभ्यामग्रा च ज्ञेया—इति फलितार्थो बोध्यः ।

अत्रोपपत्तिः । महाशङ्कावुदयास्तसूत्रात् शङ्कुमूलपर्यन्तं शङ्कुतलं लघुद्वादशाङ्गुलशङ्कौ चाक्षक्षेत्रसाजात्याच्छायावृत्तीयोदयास्तसूत्राल्लघुशङ्कुमूलपर्यन्तमन्तरं पलभेति सर्वं गोलविदां स्फुटमेवेति ॥ ५९ ॥

इदानीं भुजच्छायाभ्यां क्रान्तिज्यानयनमाह ।

शङ्कुप्राच्यपरान्तरविषुवच्छायाङ्गुलान्तरं याम्ये ।
उदगैक्यं लम्बगुणं छायाकर्णोद्धृतं क्रान्तिः ॥ ६० ॥

शङ्कुप्राच्यपरान्तरं लघुशङ्कुसंबन्धी भुजः । विषुवच्छाया पलभा

प्रसिद्धा । याम्ये याम्यभुजेऽनयोरङ्कुलान्तरमुदगुत्तरभुजेऽनयोरैक्यं यत्तल्लम्बगुणं लम्बज्यागुणं छायाकर्णोद्धृतं फलं क्रान्तिः क्रान्तिज्या स्यादिति ।

अत्रोपपत्तिः । उत्तरगोले पूर्वविधिना याम्यो भुजः = वि − कअग्रा = भु । अतः कर्णवृत्ताग्रा = वि − भु । दक्षिणगोले सर्वदा याम्यो भुजः = वि + कअ = भु । अतः कर्णवृत्ताग्रा = भु − वि । एवं याम्ये भुजे भुजपलभयोरन्तरं कर्णवृत्ताग्रा फलिता । उत्तरगोले सौम्यो भुजः = कअ − वि = भु । अतः कअ = वि + भु । एवं कर्णवृत्ताग्रानयनमुपपन्नम् । कर्णवृत्ताग्रा त्रिज्यागुणा छायाकर्णहृता जाताऽग्रा = $\frac{\text{कअ} \cdot \text{त्रि}}{\text{छाक}}$ । इयं लम्बज्यागुणा त्रिज्याभक्ताऽक्षक्षेत्रसाजात्याज्जाता क्रान्तिज्या = $\frac{\text{लंज्या} \cdot \text{कअ}}{\text{छाक}}$ । अत उपपद्यते क्रान्तिज्यानयनम् ॥ ६० ॥

इदानीं क्रान्तिज्यातो रव्यानयनमाह ।

क्रान्तिर्व्यासार्धगुणा जिनभागज्याहृता धनुरजादौ ।
कर्क्यादौ चक्रार्धात् प्रोह्य तुलादौ सभार्धेन ॥ ६१ ॥
चक्रात् प्रोह्य मृगादौ स्फुटोऽसकृद् धनमृणे धने त्वृणकम् ।
अर्कोऽस्माद्देशान्तरयुगयुगतो मध्यमः प्राग्वत् ॥ ६२ ॥

क्रान्तिः क्रान्तिज्या व्यासार्धेन त्रिज्यया गुणा जिनज्यया हृताऽर्कदोर्ज्या भवति । तद्धनुर्वर्षस्य प्रथमपादेऽजादौ राशित्रये स्फुटः सूर्यः । कर्क्यादौ राशित्रये तद्धनुश्चक्रार्धात् प्रोह्य शेषं स्फुटार्कः । एवं तुलादौ राशित्रये तद्धनुषा सभार्धेन समः स्फुटोऽर्कः । मृगादौ राशित्रये च चक्राद् द्वादशराशिभ्यस्तद्धनुः प्रोह्य शेषं स्फुटोऽर्को ज्ञेयः । तत्रासकृद्गणे मन्दफले धनं धने च ऋणं मन्दफलं देयं तदा स्वदेशे मध्यमोऽर्को भवति । अस्माद्देशान्तरयुगयुगतः । अर्थात् प्राग्देशान्तरफलसहितात् पश्चिमदेशान्तरफलरहितादस्मात् स्वदेशीयमध्यमार्कात् प्राग्वद्द्युगणागतो मध्यमः स्यादित्यर्थः ।

अत्रोपपत्तिः । विपरीतक्रियया स्फुटा । 'तद्धनुराद्ये चरणे वर्ष-

स्यार्कः प्रजायतेऽन्येषु' इत्यादिभास्करविधिना पदवशाद्धविज्ञानं सुगममिति ॥ ६१-६२ ॥

इदानीं शशिशृङ्गोन्नतौ रविशङ्क्वर्थं विशेषमाह ।

शशिशृङ्गोन्नत्यर्थं रात्रेर्गतशेषनाडिकाशङ्कुः ।
विपरीतगोलविधिना रात्र्यर्धार्कान्तराभिर्वा ॥ ६३ ॥

पश्चिमदिशि शृङ्गोन्नत्यर्थं रात्रेर्गतनाडिकाभिरुन्नताभिः प्राग्दिशि च रात्रिशेषनाडिकाभिरुन्नताभिः 'गतशेषाल्पस्याङ्कः' इत्यादिना विपरीतगोलविधिना रवेः शङ्कुः साध्यः । यदि नताभिर्नाडीभिरर्कशङ्कुरपेक्षितस्तदा रात्र्यर्धार्कान्तराभिर्नतनाडिकाभिः स शङ्कुरानेयः ।

अत्रोपपत्तिः । 'निशावशेषैरसुभिर्गतैर्वा' इत्यादिभास्करशृङ्गोन्नतिविधिना स्फुटा । दृश्यशृङ्गोन्नतौ रवेः क्षितिजाधःस्थत्वादधोयाम्योत्तरवृत्तान्नतकालोऽपेक्षितोऽतो रात्र्यर्धार्कान्तरतो नतनाडिकासाधनायातिदेशं चकाराऽऽचार्यः ॥ ६३ ॥

इदानीमग्रामुदयास्तसूत्रं चाह ।

क्षितिजेऽग्रा प्राच्यपरा क्रान्तिस्त्रिज्यागुणाऽवलम्बहृता ।
द्विगुणमुदयास्तसूत्रं तत्त्रिज्याकृतिवियुक्तपदम् ॥ ६४ ॥

क्रान्तिः क्रान्तिज्या त्रिज्यागुणाऽवलम्बेन लम्बज्यया हृता तदाऽग्रा स्यात् । इयमग्रा क्षितिजे प्राच्यपरा भवति । अर्थात् क्षितिजे प्राचि प्रतीच्यां च प्रागपरस्वस्तिकाभ्यां यथादिक्काऽग्रा भवतीत्यर्थः । तत्त्रिज्याकृतिवियुक्तपदं द्विगुणमुदयास्तसूत्रं भवेदिति ।

अत्रोपपत्तिः । कुज्या भुजः । क्रान्तिज्या कोटिः । अग्रा कर्णः । इत्यक्षक्षेत्रं प्रसिद्धम् । ततो यदि लम्बज्याकोट्या त्रिज्या कर्णस्तदा क्रान्तिज्याकोट्या किं जाताग्रा= $\frac{\text{क्रांज्या. त्रि}}{\text{लंज्या}}$ । अग्रावर्गोनात्त्रिज्यावर्गात् पदमग्राकोटिज्या तद्द्विगुणमेवोदयास्तसूत्रं प्रसिद्धमिति ॥ ६४ ॥

इदानीं शङ्कुतलानयनमाह ।

अग्रज्याशङ्कुवधाल्लम्बकलब्धोदयास्तमयसूत्रात् ।

दक्षिणतः शङ्कुतलं दिवसे रात्रौ तदुत्तरतः ॥ ६५ ॥

स्पष्टार्थम् ।

अत्रोपपत्तिः । अक्षवशतो दिवाऽहोरात्रवृत्तानि दक्षिणतो रात्रावुत्तरतो नतान्यतो दिवा शङ्कुतलं दक्षिणं रात्रावुत्तरं भवति । अक्षक्षेत्रानुपातेन शङ्कुतलानयनं स्फुटम् ॥ ६५ ॥

इदानीमध्यायोपसंहारमाह ।

दिग्लम्बाक्षस्वोदयलग्नच्छायादिषूपदिष्टेषु ।
षट्षष्ट्यार्याणां त्रिप्रश्नाध्यायस्तृतीयोऽयम् ॥ ६६ ॥
इति श्रीब्राह्मस्फुटसिद्धान्ते त्रिप्रश्नाध्यायस्तृतीयः ॥ ३ ॥

स्पष्टार्थम् ॥ ६६ ॥

मधुसूदनसूनुनोदितो यस्तिलकः श्रीपृथुनेह जिष्णुजोक्ते ।
हृदि तं विनिधाय नूतनोऽयं रचितः प्रश्नविधौ सुधाकरेण ॥

इति श्रीकृपालुदत्तसूनुसुधाकरद्विवेदिविरचिते ब्राह्मस्फुटसिद्धान्तनूतनतिलके त्रिप्रश्नाधिकारस्तृतीयः ॥ ३ ॥

अथ चन्द्रग्रहणाधिकारः ।

तत्रादौ तदारम्भे कारणमाह ।

कालज्ञानं प्रायः पर्वज्ञानार्थमिष्यते सद्भिः ।
शशिभास्करग्रहणयोर्वास्तवभेदाः स्फुटा भेदैः ॥ १ ॥
दिग्वर्णवलनवेलानिमीलनोन्मीलनस्थितिविमर्दाः ।
स्पर्शच्छायामोक्षग्रासेष्टग्रासपरिलेखाः ॥ २ ॥
भेदाश्चतुर्दश तयोरिन्द्वर्कग्रहणयोः परिज्ञानात् ।
यस्माद्भेदज्ञानं तस्माद्ग्रहणे प्रवक्ष्यामि ॥ ३ ॥

सद्भिः सद्गणकैः प्रायो बाहुल्येन पर्वज्ञानार्थं कालज्ञानमिष्यते । तद्विपरीतेनार्थात् पर्वज्ञानात् कालज्ञानं च स्फुटम् । कालज्ञानाद्यज्ञादि-क्रिया स्फुटेति फलितार्थः । शशिभास्करग्रहणयोर्ज्ञानार्थं ये वास्तवभेदा दिग्देशकालावरणाद्यास्ते भेदैर्वक्ष्यमाणैः स्फुटाः । चतुर्दश भेदाश्च दिग्वर्णवलनवेलाद्याः स्फुटाः । (दिग्भेदश्चन्द्रस्य प्राक् प्रग्रहणं रवेः पश्चात् । वर्णभेदश्चन्द्रस्यार्धाल्पार्धादिग्रासे धूम्रादयो वर्णा रवेः सर्वदा कृष्णः । वलनभेदश्चन्द्रग्रहे स्पर्शमोक्षोद्भववलने प्राक्पश्चिमतो देये रविग्रहे पश्चिमपूर्वतः । वेला समयश्चन्द्रग्रहे सदा तिथ्यन्त एव मध्य-ग्रहः सूर्यग्रहे स नियमो नैव । निमिलनोन्मीलने च शशिसूर्यग्रहणयो-र्मिथो व्यस्ताशतो भवत इति तत्रापि भेदः । स्थितिश्च चन्द्रग्रहे महती रविग्रहे लघुरिति । एवं विमर्दकालश्च चन्द्रग्रहे महान् रविग्रहे लघुः । स्पर्शः स्पर्शकालनिर्णयश्च चन्द्रग्रहे स्थित्यर्धाद्रविग्रहे लम्बनसंस्कृतस्थि-त्यर्धात् । छायाभेदश्च प्रग्रहणादिषु स्वस्वशङ्कुभेदात् प्रसिद्धः । मोक्ष-भेदश्च चन्द्रग्रहे पश्चाद्रविग्रहे प्राक् मोक्षः । ग्रासभेदश्चन्द्रग्रहे शरतो रविग्रहे नतिसंस्कृताच्छरतः । इष्टग्रासभेदश्चन्द्रग्रहे तत्कालशराद्गणिता-गतस्थित्यर्धाच्च रविग्रहे नतिसंस्कृतशरात् स्पष्टस्थित्यर्धाच्च । परिलेखभे-दश्च चन्द्रग्रहे गणितागतशरात् रविग्रहे नतिसंस्कृतात् । एवमत्र दिक्

१ । वर्ण २ । वलन ३ । वेला ४ । निमीलन ५ । उन्मीलन ६ । स्थिति ७ । विमर्द ८ । स्पर्श ९ । छाया १० । मोक्ष ११ । ग्रास १२ । इष्टग्रास १३ । परिलेख १४ । चतुर्दश भेदाः ।) यस्मादिन्द्वर्कग्रहणयोः परिज्ञानादिति चतुर्दशभेदज्ञानं भवति तस्माच्छशिरविग्रहणे ग्रहं प्रवक्ष्यामीति ॥ १–३ ॥

इदानीं तात्कालिकीकरणमाह ।

तिथिगतगम्ये भुक्तिगुणे भुक्त्यन्तरहृते फलोनयुतौ ।
रविशशिनौ समलिप्तौ पातस्तात्कालिको भवति ॥ ४ ॥

तिथिगतगम्ये तिथिगतगम्यकले भुक्तिगुणे रविभुक्त्या चन्द्रभुक्त्या च गुणे । उभयत्र रविचन्द्रभुक्त्यन्तरेण हृते । गतचालने फलोनौ गम्ये फलयुतौ रविशशिनौ । एवं तौ तात्कालिकौ तिथ्यन्ते समलिप्तौ भवतः । एवं पातगत्या पातोऽपि तात्कालिको भवति ।

अत्रोपपत्तिः । तिथिगतगम्ये कले षष्टिगुणे रविचन्द्रगत्यन्तरभक्ते गतैष्या घटिकास्ता गतिगुणाः षष्टिहृताश्चालनकलाः स्युः । एवमत्र षष्टितुल्ययोर्गुणहरयोर्नाशाद्यथोक्ता क्रियोत्पद्यते ॥ ४ ॥

इदानीं तिथ्यन्ते शरकलानयनमाह ।

खत्रिघन २७० गुणा व्यासार्धभाजिता चन्द्रपातयोगज्या ।
विक्षेपकलाः सौम्याः षड्राश्यूनेऽधिके याम्याः ॥ ५ ॥

षड्राश्यूने चन्द्रपातयोगे सौम्या अधिके याम्या विक्षेपकला भवन्ति । शेषं स्पष्टार्थम् ।

अत्रोपपत्तिः । 'सपाततात्कालिकचन्द्रदोर्ज्या खभैर्हते' त्यादिभास्करविधिना स्फुटा ॥ ५ ॥

इदानीं बिम्बान्याह ।

रविशशिभुक्ती भवदशगुणे नखैः स्वरजिनैर्हृते माने ।
तत्त्वाष्टगुणितभुक्त्योर्विवरं षष्ट्या हृतं तमसः ॥ ६ ॥

रविशशिभुक्ती भवदशगुणे नखैः स्वरजिनैर्हृते अर्थाद्रविगतिरेकादशगुणा नख२०हृता । चन्द्रगतिर्दशगुणा स्वरजिनै२४७र्हृता तदा रवि-

चन्द्रयोर्माने विम्बमाने भवतः । तत्त्वाष्टगुणितभुक्त्योः पञ्चविंशतिगुण-रविगतेरष्टगुणितचन्द्रगतेश्च विवरं षष्ट्या हृतं तमसो राहोर्विम्बमानं भवेत् ।

अत्रोपपत्तिः । 'भानोर्गतिः स्वदशभागयुतार्धिता' वेत्यादिभास्कर-विधिना रविं= $\frac{\text{११ रग}}{\text{२०}}$ । चंविं= $\frac{\text{३ चंग}}{\text{७४}}=\frac{\text{चंग}}{\frac{\text{७४}}{\text{३}}}=\frac{\text{१० चंग}}{\frac{\text{७४०}}{\text{३}}}=\frac{\text{१० चंग}}{\text{२४७}}$ स्व-ल्पान्तरात् । 'भानोर्गतिः शरहता रविभिर्विभक्ता' इत्यादिभास्करविधि-ना राहुविं= $\frac{\text{२ चंग}}{\text{१५}}-\frac{\text{५ रग}}{\text{१२}}=\frac{\text{८ चंग}-\text{२५रग}}{\text{६०}}$ । अत उपपन्नं सर्वम् ॥ ६ ॥

इदानीं ग्रासमानमाह ।

छाद्यच्छादकमानैक्यार्धं विक्षेपहीनितं छन्नम् ।
सर्वग्रहणं ग्राह्यादधिके खण्डग्रहणमूने ॥ ७ ॥

स्पष्टार्थेयमार्या ।

अत्रोपपत्तिः । 'यच्छाद्यसञ्छादकमण्डलैक्यखण्डं शरोनं स्थगि-तप्रमाणं' मित्यादिभास्करविधिना स्फुटा ॥ ७ ॥

इदानीं स्थितिविमर्दार्धानयनमाह ।

छाद्येन युतोनस्य छादकमानस्य तद्दलकृतिभ्याम् ।
विक्षेपकृतिं प्रोह्य पदे तिथिवत् स्थितिविमर्दार्धे ॥ ८ ॥

पदे तिथिवत् । अर्थात् पदे षष्टिगुणे रविचन्द्रगत्यन्तरेण हृते स्थितिविमर्दार्धे भवतः । शेषं स्पष्टार्थम् ।

अत्रोपपत्तिः । 'मानार्धयोगान्तरयोः' कृतिभ्यामित्यादिभास्कर-विधिना स्फुटा ॥ ८ ॥

इदानीमसकृद्विधिना स्थितिविमर्ददलयोः स्फुटीकरणमाह ।

षष्ट्या विभाजिता स्थितिविमर्ददलनाडिकागुणा स्वगतिः ।
आदौ रवीन्दुपातेष्वृणमसकृत् तेषु धनमन्ते ॥ ९ ॥

स्पष्टार्थम् ।

अत्रोपपत्तिः । 'स्थित्यर्धनाडीगुणिता स्वभुक्ति' रित्यादिना 'एवं विमर्दार्धफलोनयुक्ते' त्यादिना च भास्करविधिना स्फुटा ॥ ९ ॥

इदानीं निमीलनोन्मीलनकालानयनमाह ।

स्पर्शान्निमीलनं स्थितिदले विमर्दार्धहीनिते पश्चात् ।
मोक्षादर्वागुन्मीलनं विमर्दस्तदैक्यार्धः ॥ १० ॥

स्थितिदले स्पर्शस्थित्यर्धे विमर्दार्धहीनिते काले स्पर्शात् पश्चात् निमीलनं भवति । एवं मोक्षस्थित्यर्धे उन्मीलनविमर्दार्धहीनिते काले मोक्षादर्वाक् पूर्वमुन्मीलनं भवति । तयोर्निमीलनोन्मीलनयोः कालयोर्योगार्धो विमर्दः । अर्थाद्योगार्धकालपर्यन्तमेव छादकबिम्बे छाद्यबिम्बस्य निमज्जनं भवति ।

अत्रोपपत्तिः । स्थित्यर्धविमर्दार्धपरिभाषातः स्फुटा ॥ १० ॥

इदानीमिष्टग्रासानयनमाह ।

भुक्त्यन्तरमिष्टोनस्थितिदलघटिकागुणं हृतं षष्ट्या ।
बाहुः प्राग्वत् तत्फलहीनयुतैः सूर्यशशिपातैः ॥ ११ ॥
तात्कालिकविक्षेपः कोटिस्तद्वर्गयुतिपदं कर्णः ।
मानैक्यार्धात् कर्णं विशोध्य तात्कालिको ग्रासः ॥ १२ ॥

इष्टं स्पार्शिकादिकं तत् सजातीयं स्थितिदलं च गृहीत्वान्तरं कर्त्तव्यम् । शेषं स्पष्टार्थम् ।

अत्रोपपत्त्यर्थं भास्करभुजानयनं द्रष्टव्यम् । (ग्र· ग· चन्द्रग्र· श्लो· १५–१६ ॥) ॥ ११–१२ ॥

इदानीमिष्टग्रासात् कालानयनमाह ।

असकृद्ग्रासकलोनप्रमाणयुतिदलकृतेर्विशोध्य कृतिम् ।
तात्कालिकविक्षेपस्य शेषमूलं कृतं तिथिवत् ॥ १३ ॥
प्रग्रहणस्थित्यर्धात् प्रोह्य प्रग्रहणतो भवेत्* कालः ।

* भवति—इति पाठान्तरम् ।

मौक्षं विशोध्य मोक्षस्थित्यर्धात् प्राग् भवेन्मोक्षात् ॥ १४ ॥

ग्रासकलोनप्रमाणयुतिदलकृतेर्ग्रासोनमानैक्यार्धवर्गात् तात्कालिकशरस्य कृतिं विशोध्य शेषमूलं तिथिवद्दसकृत् कृतम्। अर्थात् शेषमूलं षष्ट्या गुणं रविचन्द्रगत्यन्तरहृतं फलकालेन रविचन्द्रपातान् प्रचाल्य तात्कालिकविक्षेपं प्रसाध्य तस्मात् पुनर्ग्रासकलोनप्रमाणेत्यादिनाऽसकृद्यः शेषमूलकालः स्थिरीभवति तं प्रग्रहणस्थित्यर्धात् स्पार्शिकस्थित्यर्धात् प्रोह्य हित्वा ग्रहणतः स्पर्शादनन्तरं कालो भवेदर्थात् स्पर्शानन्तरमेतावतीष्टकाले तावानिष्टग्रासो भवति। एवं तमेव कालं मौक्षं मोक्षसंबन्धिनं मोक्षस्थित्यर्धाद्विशोध्य शेषं मोक्षात् प्रागेवेष्टकालो भवेत्। अर्थात् मोक्षात् प्राक् तावतीष्टकाले तावानेवेष्टग्रासो भवेत्। एवमिष्टग्रासाद् द्विधेष्टकाल उत्पद्यते। एकः स्पर्शानन्तरमन्यो मोक्षात् प्रागिति।

अत्रोपपत्तिः। तत्कालशरस्याज्ञानान्मध्यकालिकशरात् कर्म कृतमतोऽसकृद्विधिना स्फुटकालसाधनमुचितम्। शेषोपपत्ति 'ग्रासोनमानैक्यदलस्य वर्गाद्विक्षेपकृत्या रहिता' दित्यादिभास्करविधिना स्फुटा ॥ १३–१४ ॥

इदानीं स्पर्शादिव्यवस्थितिमाह।

स्फुटतिथ्यन्ते मध्यं प्रग्रहणं स्थितिदलोनकेऽभ्यधिके।
मोक्षो निमीलनोन्मीलने विमर्दार्धहीनयुते ॥ १५ ॥

स्पष्टार्थमुपपत्तिश्च स्फुटा। 'मध्यग्रहः पर्वविरामकाले' इति भास्करोक्तमेतदनुरूपमेव ॥ १५ ॥

इदानीमक्षवलनसाधनमाह।

प्राक् पश्चान्नतविषुवज्ज्ययोर्वधात् त्रिज्ययाप्तचापांशैः।
उत्तरयाम्ये पूर्वा विषुवद्वृत्तात् त्रिभे ग्राह्या ॥ १६ ॥

प्राक् प्राक्कपाले पश्चात् पश्चिमकपाले यो नतः सममण्डलीया नतभागास्तेषां या ज्या। या च विषुवज्ज्याऽक्षज्या तयोर्वधात् त्रिज्यया यदाप्तं तस्य चापांशैस्त्रिभे ग्रहाद्राशित्रयान्तरे उत्तरयाम्ये प्राक्पश्चाच-

तत्क्रमेण याम्या याम्यवृत्तीया विषुवद्वृत्तस्य पूर्वा भवति सममण्डलादित्यग्रेण सहान्वयः ।

अत्रोपपत्तिः । 'तेषां क्रमज्या पलशिञ्जिनीघ्नी भक्ता द्युमौर्व्या' इत्यादिभास्करविधिना स्फुटा । आचार्येण द्युज्यास्थाने त्रिज्या स्थूला गृहीता । नतशब्देन यद्यहोरात्रे नतकालो गृह्यते तदा वलनवासनयाऽत्यन्तं स्थूलमाचार्योक्तमक्षवलनं भवेदिति चापीयत्रिकोणमित्या वलनानयनेन स्फुटम् ॥ १६ ॥

इदानीमायनं वलनमाह ।

सममण्डलाद्विषुवतो ग्राह्यात् त्रिगृहाधिकादुदग्याम्यैः ।
क्रान्त्यंशैरपमण्डलपूर्वास्याश्चन्द्रविक्षेपः ॥ १७ ॥

सममण्डलादिति पूर्वेण श्लोकेन सहान्वयः । ग्राह्याच्चन्द्रग्रहे चन्द्रात् सूर्यग्रहे सूर्यात् किंविशिष्टात् त्रिगृहाधिकात् राशित्रयसहिताद्ये क्रान्त्यंशास्तैरुदग्याम्यैर्विषुवतो नाडीवृत्तात् त्रिभान्तरेऽपमण्डलपूर्वा क्रान्तिमण्डलीया तात्कालिकी पूर्वा स्यादिति । अस्याः क्रान्तिवृत्तपूर्वायाः सकाशाद्याम्योत्तरश्चन्द्रविक्षेपो भवति—इति प्रसिद्धोऽर्थः ।

अत्रोपपत्तिः । सत्रिभग्रहक्रान्तिज्या द्युज्यावृत्तेऽयनवलनं भवति । आचार्येण स्थूलाद्द्युज्या त्रिज्यामिता गृहीता । अतः क्रान्तिज्यैवायनं वलनम् । तच्चापांशाः सत्रिभग्रहदिक्का उत्तरयाम्या अयनवलनांशा भवन्तीति सर्वं भास्करीयवलनवासनातः स्फुटम् ॥ १७ ॥

इदानीं स्पष्टवलनमाह ।

एकान्यदिशोर्युतिवियुतेर्ज्या प्रग्रहणमध्यमोक्षेषु ।
वलनं निमीलनोन्मीलनेष्टकालेष्वतोऽन्यदिशाम् ॥ १८ ॥

एकदिशोरक्षजायनवलनचापयोर्युतेरन्यदिशोर्वियुतेर्ज्या स्पर्शमध्यमोक्षकालेषु वलनं स्फुटं भवति । एवं निमीलनोन्मीलनेष्टकालेषु स्फुटं वलनं साध्यम् । अतोऽस्माद्वलनादन्यदिशामानयनं कार्यम् । अर्थादेकस्माद्वृत्ताद्यावद्भिरंशैरन्यवृत्तस्य पूर्वा चलति तावद्भिरंशैरन्या दिशश्च चलन्तीति तासामानयनं सुगमम् ।

अत्रोपपत्तिः । 'तयोः पलोत्थायनयोः समाश्रयो' रित्यादिभास्करविधिना स्फुटा । तत्र भास्करेण मानैक्यार्धवृत्ते स्फुटं वलनं परिणाम्यते । आचार्येण च त्रिज्यावृत्ते यथागतं तथैव स्थापितमिति । इदं स्फुटं वलनं परिलेखार्थमुपयुक्तम् । परिलेखविधिं चाग्रे वक्ष्यत्याचार्यः ॥ १८ ॥

इदानीं ग्रहणे वर्णमाह ।

आद्यन्तयोः स धूम्रः कृष्णः खण्डग्रहेऽर्धतोऽभ्यधिके ।
ग्रासे स कृष्णताम्रः सर्वग्रहणे कपिलवर्णः ॥ १९ ॥

आद्यन्तयोश्चन्द्रः स धूम्रो वर्णो भवति । अर्थाद्ग्रहणादौ ग्रहणान्ते च चन्द्रो धूम्रवर्णो भवति । कृष्णताम्रः कृष्णरक्तो भिन्नाञ्जनच्छविरित्यर्थः । शेषं स्पष्टार्थम् । स्वल्पच्छन्ने धूम्रवर्णः सुधांशो' रित्यादिभास्करोक्तमेतदनुरूपमेव ॥ १९ ॥

इदानीमस्याध्यायस्योपसंहारमाह ।

मानविमर्दस्थितिदलवलनेष्टग्राससमकलाद्येषु ।
चन्द्रग्रहणाध्यायो विंशतिरार्याश्चतुर्थोऽयम् ॥ २० ॥

इति श्रीब्राह्मस्फुटसिद्धान्ते चन्द्रग्रहणाधिकारश्चतुर्थः ॥४॥

समकलः पूर्णान्तकालो मध्यग्रहसमयः । शेषं स्पष्टार्थम् ॥ २० ॥

मधुसूदनसूनुनोदितो यस्तिलकः श्रीपृथुनेह जिष्णुजोक्ते ।
हृदि तं विनिधाय नूतनोऽयं रचितश्चन्द्रयुतौ सुधाकरेण ॥

इति श्रीकृपालुदत्तसूनुसुधाकरद्विवेदिविरचिते ब्राह्मस्फुटसिद्धान्तनूतनतिलके चन्द्रग्रहणाधिकारश्चतुर्थः ॥ ४ ॥

अथ सूर्यग्रहणाधिकारः ।

तत्रादौ तदारम्भप्रयोजनमाह ।

दृग्गणितैक्यं न भवति यस्मात् पञ्चज्यया रविग्रहणे ।
तस्माद्यथा तदैक्यं तथा प्रवक्ष्यामि तिथ्यन्ते ॥ १ ॥

उदयज्या=अग्रा । मध्यज्या=खलग्ननतांशज्या । दृत्रिशङ्कुः । दृग्गतिः=वित्रिभशङ्कुः । दृक्क्षेपः=वित्रिभनतांशज्या । एवमार्यभटादिभिः पञ्चज्यया रविग्रहणे यदानयनमुपनिबद्धं तद्यस्माद्दृग्गणितैक्यं न भवति तस्माद्यथा तयोर्दृग्गणितयोरैक्यं स्यात् तथाऽऽनयनमहं प्रवक्ष्यामीति । तिथ्यन्ते इत्यस्याग्रे संबन्धः । संप्रति प्रसिद्धसूर्यसिद्धान्तेऽपि पूर्वोक्तपञ्चज्ययैवार्कग्रहणानयनम् । पौलिशे च चन्द्रस्यापि पृथक् सूर्यग्रहणे पञ्चज्याः साधिता इति दशज्याविधानेन तत्र रविग्रहणमुपनिबद्धम् ।

तथा च स्वटीकायां चतुर्वेदाचार्यः ।

'पञ्चज्यया पञ्चज्याविधानेन रविग्रहणं यदाचार्यैरुपनिबद्धम् । तद्यथा । उदयज्या, मध्यज्या, शङ्कुज्या, दृग्गतिज्या, दृक्क्षेपज्या च । एताभिरार्यभटादिभिस्तथा पौलिशतन्त्रे पञ्चज्याश्चन्द्रमसः स्वदिनगतशेषचरदलक्रान्त्यादिभिः कल्पिताः । एवं तत्र दशज्याविधानेन रविग्रहणं यदुपनिबद्धं तादृशममान्ते भवति । ये च तत्र दोषास्तानाचार्य एव वक्ष्यति तन्त्रपरीक्षाध्याये वयमपि तत्रैव व्याख्यास्यामः' ।

इदानीं लम्बनावनत्योर्भावाभावमाह ।

वित्रिभलग्नसमेऽर्के न लम्बनं तदधिकोनके भवति ।
तस्य क्रान्तिज्योदक् यदाक्षजीवासमा न तदा ॥ २ ॥

अवनतिरतोऽन्यथा भवति सम्भवे तदुदयैर्विलग्नसमम् ।
कृत्वा तदुदितघटिकास्तच्छङ्कुस्तच्चरप्राणैः ॥ ३ ॥

तिथ्यन्ते गणितागतदर्शान्तकाले पूर्वविधिना त्रिप्रश्नोक्तेन लग्नं कृत्वा वित्रिभं कार्यम् । तेन वित्रिभलग्नेन समेऽर्के रवौ सति लम्बनं न भवति । तस्माद्वित्रिभादधिके वोने रवौ लम्बनं भवतीत्यर्थेत एव सिध्यति । एवं तस्य वित्रिभस्योत्तरा क्रान्तिज्या यदा स्वदेशाक्षजीवासमा तदाऽवनतिर्न भवति अतोऽन्यथा चावनतिर्भवति । लम्बनावनत्योः सम्भवे च तदुदयैः स्वदेशीयराश्युदयैर्विलग्नसमं कृत्वाऽर्थादूनस्य भोग्योऽधिकभुक्तयुक्तो मध्योदयाढ्य इति त्रिप्रश्नोक्तविधिं कृत्वा तदुदितघटिकास्तस्य वित्रिभस्य गता घटिकाः साध्याः । ततस्तच्चरप्राणैर्वित्रिभचरासुभिस्तच्छङ्कुर्वित्रिभशङ्कु 'दिनगतशेषाल्पस्य' इत्यादिविधिना साध्यः ।

अत्रोपपत्तिः । लम्बनाभावे 'न लम्बनं वित्रिभलग्नतुल्ये रवा'-वित्यादिभास्करविधिना स्फुटा । एवमवनतेरानयनस्य दृक्क्षेपाधीनत्वाद्यदा दृक्क्षेपाभावस्तदाऽवनतेरभावः । आचार्येण स्वल्पाक्षदेशे याम्योत्तरवृत्त एव स्वल्पान्तराद्वित्रिभस्थितिं प्रकल्प्य तस्य द्युदलवत् क्रान्त्यक्षसंस्कारेण नतांशाभावस्थानमानीतमुत्तरक्रान्तिसमेऽक्षे । वित्रिभोदितघटिकादिज्ञानं च त्रिप्रश्नोक्त्या सुगमम् ॥ २–३ ॥

इदानीं लम्बनानयनमाह ।

त्रिज्याकृतेश्चतुर्गुणशङ्कुहृतायाः फलेन भक्तायाः ।
तात्कालिकार्कराशित्रयोनलग्नान्तरज्यायाः ॥ ४ ॥
लम्बनघटिका लब्धं लग्नात् तात्कालिकात् त्रिराश्यूनात् ।
ऋणमधिकेऽर्के हीने धनमसकृत् पञ्चदश्यन्ते ॥ ५ ॥

स्पष्टार्थमार्याद्वयम् ।

अत्रोपपत्तिः । 'त्रिभोनलग्नं तरणिं प्रकल्प्ये' त्यादि भास्करविधिना स्फुटा । वास्तवलम्बनादिज्ञानाय मदीयं ग्रहणकरणं विलोकनीयम् ॥ ५ ॥

इदानीं प्रकारान्तरेण लम्बनमाह ।

कर्णगुणाद्व्यासार्धाद्वसुवेदविभाजितात् फलविभक्ता ।
लम्बननाड्यो भास्करवित्रिभलग्नान्तरज्या वा ॥ ६ ॥

thing must be understood the *immediate* cause alone: because (he argues) in no case has the means or process of knowledge been found also to bring an object into existence, and because it is logically simpler to postulate the recognition of similarity as the sole cause of adhyāsa. Nor again will the opponent admit the view that just as a dark colour is surmised falsely, in the case of pure lustrous water even as it lies in a pitcher of pure bright gold, but is not surmised in the case of the pearl shell, such being the nature of these things; so it must be due simply to the nature of things, and not to any recognition of similarity, that silver is erroneously predicated of mother-of-pearl only and not of a piece of charcoal. He argues that although a mere piece of canvass is never mistaken for a lotus bud, yet the mistake does arise when the canvass has been cut so as to resemble the flower; and hence induction establishes the fact that adhyāsa is due not to the nature of things *per se* but to the presence or absence of a recognition of similarity in the two things. On the other hand, if the cause of adhyāsa lies in the very nature of things (अन्यथा), adhyāsa of a lotus flower in a piece of canvass should occur even before the latter has been cut so as to resemble the shape of the former (अन्यदा).

Page 40.

To all this argumentation Nṛsiṃhabhaṭṭa would reply as follows:[1] Even if it be held that a recognition of similarity is the cause of adhyāsa, its causal activity must be limited to such cases as that of silver and mother-of-pearl, in all of which the adhyāsa is prevented from taking place, if the points of difference between the

1. धर्मिज्ञानस्य कारणत्वमावश्यकमिति पूर्वपक्षं कवितार्किकमतानुवर्ती निराकरोति "उच्यते" इत्यादिना "न तु" इति । Ṭi.

two things have been perceived; it cannot be held to operate in such cases as that of the *yellow* conch shell &c., in all of which the adhyāsa continues to occur, although points of difference between the two things have been perceived—(the white shell continues to appear yellow, and the water in a well continues to appear dark in colour) —for in such cases no real similarity is possible.[1] And since obstructive power in regard to the former kind of adhyāsa must belong exclusively to the means of knowledge as that which obstructs the adhyāsa, it follows that the sum total of conditions which make up what is termed perception of points of difference must be the cause obstructive[2] of this kind of adhyāsa; and since the rationale of the whole matter lies in the *obstructive cause* being this *perception of differences*, it is unnecessary to assume that recognition of similarity is a cause of adhyāsa. And so this writer would go on to explain that silver is not predicated of a piece of charcoal, because when the eye is in contact with the charcoal there are present all the conditions necessary for a perception of the peculiarities of the charcoal e. g. its dark colour &c; and, again, silver is not predicated even of mother-of-pearl shell when the eye is in contact with the dark outer surface of the shell, because the conditions for a judgment of difference are present; whereas when the eye is in contact only with that portion of the pearl shell which resembles silver in its brightness, then silver is falsely predicated of the shell, because the conditions for a judgment of difference are no longer present.

1. असम्भवादिति । वस्तुतस्सादृश्यस्य तत्रासम्भवात् । Ṭī.
2. प्रतिबन्धकेति ज्ञानविशेषणम् । Ṭī.

But it may be objected that no adhyāsa of silver should occur even when the eye is in contact with only that portion of the oyster shell which resembles silver in its brightness; because there are present all the conditions necessary for a perception of the special character of the object, i. e. its character as an oyster shell. To this the Bhaṭṭa would reply[1] that since this distinctive perception of the oyster shell as such does not exist when silver is falsely predicated of the shell, the opponent (त्वयापि)[2] must also admit that, previous to the false predication of the silver, the conditions necessary for a distinctive perception of the object as oyster shell did not exist.

The opponent may rejoin that for his part (मम)[3] he admits that these conditions did not exist at that time, because they were obstructed by the defect, viz. recognition of similarity, which is the cause of the adhyāsa of silver; whereas for our author (तव)[4] to make this admission is to place himself in the helpless position of the man who to escape paying toll at a ferry wanders through the night and in the morning finds himself back at the ferry, (i. e. Nṛsiṃha Bhaṭṭa has at last to admit recognition of similarity as a cause of adhyāsa). But this objection the Bhaṭṭa rejects.[5] For after coming near to the given object one perceives that the glitter, which is the point of similarity, belongs really to the oyster

1. अनध्यासप्रसङ्गपरिहर्त्तुमुभयसंमतमर्थं धर्मिज्ञानापलापो दर्शयति "न" इत्यादिना । Ṭi.

2. त्वयापीति । सादृश्यज्ञानकारणतावादिनापीत्यर्थः । Ṭi.

3. धर्मिज्ञानवादी स्वाभिसन्धिमुद्घाटयन्नाशङ्कते 'मम' इति । Ṭi.

4. तवेति । धर्मिज्ञानापलापे प्रवृत्तस्य कवितार्किकमतानुवर्त्तिन इत्यर्थः । Ṭi.

5. धर्मिज्ञानापलापवाद्यपि स्वाभिसन्धिमुद्घाटयन्ननध्यासप्रसङ्गं परिहरति न' इत्यादिना । Ṭi.

shell; hence the recognition of similarity is not a cause obstructive of the conditions necessary for a distinctive perception of the object as being an oyster shell; and hence also the absence of all such necessary conditions must be explained as due either to an obstruction in the form of some such defect as excessive distance of the object from the sense-organ, or to some want of adjustment on the part of the sense-organ, whose function it is to catch all the essential features (vyañjaka) of the oyster shell, viz. its dark-coloured outer surface &c. as well as its glittering inner surface.

A similar explanation (continues our author) will apply to the false presentation of a dark-coloured, flat, rocky surface in the place of the bright-coloured stream of ocean; for here too are absent the necessary conditions for a distinctive perception of the object, i. e. as having a bright-colour and as being the ocean or a mass of water; and the absence of these conditions is due both to some defect which causes dark colour to appear falsely in the water of the ocean, invariably, i. e. whether the ocean be near the observer or at a distance, and also to some lack of adjustment on the part of the sense-organ to the ocean when seen at a distance, so that the eye fails to catch the essential features of the water, viz. its wavy surface &c. Similarly, when the necessary conditions are present for a perception of the definite form i. e. the outspreadness of a piece of canvass, then the form of a lotus flower is not falsely predicated of the canvass; whereas when those conditions are absent—the canvass having been cut into the shape of a lotus flower—then such false predication does occur.

Here it may be asked by way of objection why silver is not falsely predicated of a piece of iron held covered in the hand; for in this case the necessary conditions for a distinctive visual perception of the dark colour of the iron are absent; and, in the Bhaṭṭa's view, recognition of similarity is not a cause of adhyāsa? The reply is that the false predication of silver does take place in this case (under certain circumstances); on the other hand, a false predication of copper or gold &c. may also take place, because here also are absent the necessary conditions for a visual perception of those special qualities of iron which distinguish it from copper &c. Thus, in cases where several predicates are possible, the adhyāsa assumes the form of a doubt, e. g. Is the thing in my hand a piece of silver or a piece of copper? Again silver, and only silver, is predicated of the iron, if the observer at the time happens to be inside a Treasury which he believes to be full of silver. In other cases, again, no adhyāsa of silver occurs, but this fact does not overthrow our author's view; for his opponent has to admit that even when the similarity between silver and the oyster shell has been recognised it sometimes happens that no adhyāsa of the silver occurs owing to the fact that the sense-organ is free from defect at that time.

Page 41.

Hence (concludes the Bhaṭṭa) the existence of a vṛtti in the bare form of the object that is present to the senses cannot be inferred from the existence of effect, viz. false predication, nor from the existence of the cause, viz. unobstructed contact of sense-organ with the object.

And for this reason (says he) we have held that when a vṛtti in the form of the real object has

indeed come into existence, it can make known the false silver which was produced contemporaneously with the vṛtti (sva)[1]—the vṛtti being a material product of the Nescience which was stirred into activity by the contact of a defective sense-organ with the real object (which is also a material product of that Nescience). And in the case of adhyāsa (तत्र च), the cognisability of the false silver by the eye can be explained as due to the contact of the eye and the real object with which the false silver has been identified; although there could no be contact prior to the false presentation of the silver, for this silver is something whose coming into being is strictly contemporaneous with the presentation of it and whose existence does not extend beyond that presentation. And as a matter of fact our consciousness, expressed in the words 'I see the silver with my eyes,' testifies that the merely apparent (prātibhāsika) silver is an object of visual perception, although it is not in contact with the eye.

Nor will the Bhaṭṭa admit the following objections: that the unreal silver is *not* an object of visual perception, because the simple fact of its not being in contact with the eye excludes the possibility of its being such an object: further, that the silver, which is alleged to have been produced contemporaneously with the vṛtti, cannot have been produced by the contact of a defective sense-organ with the real object; for this contact of sense-organ and object can produce a knowledge of the object but not the object itself: that, on the contrary, the false silver is produced by the vṛtti in the form of the real object and

1. To note ‡ p. 41. Text, add the following :—स्वपदं वृत्तिपरम् । धर्मिज्ञानपक्षे इदमाकारवृत्तिरविद्याक्षोभिका । तदभावपक्षे धर्मिज्ञानहेतुसंप्रयोगो ऽविद्याक्षोभकः । इति विभागः ॥ Ṭī.

follows it in time-order;[1] and that it is *illumined* by the Witness,[2] which is disclosed by the vṛtti (tat) and which is the ultimate reality of which the unreal silver is predicated: that our consciousness of the silver as a visible object may be explained as due, but only secondarily, to the eye which brings about the vṛtti in the form of the real object, this vṛtti again being that which *discloses* the Intelligence that *illumines* the real mother-of-pearl and the unreal silver (sva).[3]

Our author replies: If the opponent's view be admitted, (viz. that only the real thing is an object of sense-perception, whereas the unreal thing is an object illumined by the Witness [4]), then the eye will not be a necessary factor in the case of the *yellow conch shell;* for since the bare shell cannot be seen without its real whiteness, the eye is not necessary as regards the shell: nor is the eye necessary for the perception of the unreal yellowness,

1. The Ṭīka sums up the opponent's position: इन्द्रियसंप्रयोगादिदमर्थमात्रगोचरा वृत्तिरुदेति तया चाध्यासं प्रति निमित्तकारणभूतया क्षुब्धा सती ऽविद्या रजताकारेण परिणमते। रजतस्य च इदमाकारवृत्त्यभिव्यक्तमिदमर्थावच्छिन्नचैतन्यमधिष्ठानम्। तथा च रजतस्वगोचरवृत्तिं विनैव चैतन्यभास्यमहङ्कारादिवदित्यर्थः।

2. तद्भास्यमिति साक्षिभास्यमित्यर्थः। न च वाह्यचैतन्यावभास्यस्य शुक्तिरूप्यादेरहङ्कारादिवत् कथं साक्षिभास्यत्वमिति वाच्यम्। स्वगोचरज्ञानरूपवृत्त्यनुपहितचैतन्यभास्यस्यैव साक्षिभास्यशब्दार्थत्वात्। तथा च यथा अविद्याहङ्कारतद्धर्माणामवभासकचैतन्यमविद्यादिगोचरया ज्ञानात्मकवृत्त्या उपहितं न भवति एवं शुक्तिरजतादिकभासकचैतन्यमपि शुक्तिरजतादिगोचरज्ञानात्मकवृत्त्युपहितं न भवतीति तस्य साक्षिभास्यत्वमुक्तमिति मन्तव्यम्॥ Ṭi.

3. स्वं शुक्तिरजतम्। तद्भासकस्य इदमंशावच्छिन्नचैतन्यस्याभिव्यञ्जकामिदंवृत्तिं प्रति चक्षुषो जनकत्वेन शुक्तिरजतस्य चक्षुरपेक्षा वर्तते। सा चापेक्षा परंपरयैव स्वाधिष्ठानगोचरवृत्त्यर्थमपेक्षितत्वान्न तु साक्षात् स्वगोचरवृत्त्यर्थमनपेक्षितत्वाद् यथा कथं चिच्चक्षुरपेक्षामात्रेण तत्र चाक्षुषत्वानुभव उपपद्यत एव इत्यक्षरार्थः। Ṭi.

4. प्रातिभासिकरजतादेः साक्षिभास्यत्वमेव न तु ऐन्द्रियकत्वमिति मतं दुषयति 'तथा सति' इति। अधिष्ठानस्यैन्द्रियकत्वलाभायैवेन्द्रियापेक्षा न तु आरोप्यस्य तदर्थमिन्द्रयापेक्षा इत्युपगमे सति इत्यर्थः। Ṭi.

for the opponent himself does not admit that an unreal thing is an object of sense-perception (aindriyakatva). Nor against this can it be argued that the eye is necessary for a presentation of the yellow colour, on the ground that, though the yellowness *per se* is not falsely predicated, what is thus predicated is a bare relation between the conch shell and the perceived yellowness of the bile in the diseased organ of vision. For if it be granted that what is perceived by the eye is the yellow bile in the eye, then it must follow that the shell and its relation with the yellow bile are not objects of vision; since these two are not in relation with, and cannot therefore be illumined by, the Witness which was disclosed by the vṛtti that had taken the form of the yellow bile located in the eye: and the opponent (it must be added) does not allow that in such a case of adhyāsa there is but *one* vṛtti uniting the shell and the yellow colour. Nor again can it be argued that what is falsely predicated in this case is not a relation between the shell and the yellowness of the bile located in the eye—a relation due to some defect in the eye—but is a relation between the shell and the bile that moving outwards along with the rays from the eye pervades the shell, just as a thing coloured with saffron is said to have that colour; and thus a relation is possible between the shell and the Witness, which (underlying the shell) is disclosed by the vṛtti that has taken the form of the yellow bile. For if it be admitted that the bile has coloured the shell yellow, then eyes that are not disordered by bile should also perceive the shell as of a golden colour. And by way of meeting this last point it cannot be said that the yellow colour becomes visible at a distance, i. e. in the shell, if it was first seen at close

Page 42.

96. The fruit of performing prescribed rites is not the mere removal of impediments,[1] but other rewards also are directly mentioned, for example, in the *Āmra-smriti.*[2]

97. The passages in the *Smriti* of *Apastamba* "The mango being the cause, etc." declare that even prescribed (*nitya*) rites produce results.

98. The consequences of doubt have already been indicated.[3] It can now be affirmed with certainty that *sakti*, as long as it lasts, will be producing some result or other.

99. For, in the absence of result, the cause itself will be non-existent. Of the effect and its cause, neither will exist independent of the other.

100. Thus, by understanding the Supreme Self (*antarātman*) to be of the nature of doer and enjoyer, there will be, in the light of the arguments heretofore advanced, no hope of liberation at all.

101. Since man is liable to err, liberation, according to your theory, will be a matter of doubt for the twice-born, but one of certainty for the donkey, etc.[4]

102. But was it not said[5] that knowledge is a

---

[1] Hence the opponent argues that *nitya* rites will not stand in the way of liberation by bringing about further births.

[2] आम्रे फलार्थे निमित्तेछायागन्धावनूत्पद्येते। एवं धर्मं चर्यमाणमर्था अनूत्पद्यन्ते नोचेदनूत्पद्यन्ते न धर्महानिर्भवति ॥
This is summarised in the next verse.

[3] See stanza 80.

[4] Since the liability to err and hence the danger of sin are only for the *adhikṛita*, and not in the least for the *anadhikṛita* or unauthorised beings like the donkey.

[5] See stanza 45.

mere department of ritual, and that the soul is a doer of sacrifices? It is not so, since this kind of knowledge that is dependent on ritual, is not what is required (for liberation).

103. For, even without any reference to sacrifices, the soul is undoubtedly the doer, for it is the doer of all actions without exception. Hence what you say is unsound.

104. It cannot be said that without a knowledge of the Self, it would be impossible to perform rituals, in the same way as it would be impossible to use the sacrificial ladle without a knowledge of the *parna* wood.

105. But (it may be said that) a prudent person will not perform rites to secure a higher world, without first satisfying himself that there is a soul (separate from the body) as the basis of a future bodily life.[1]

106. Thus, then; the knowledge of *Ātman* cannot be a part of ritual, since a doer[2] is the only thing necessary for rites (*ishṭa*), as in the case of one desirous of fruit (*phalārthivat*).[3] Further such a knowledge is not prescribed as essential for rites.

[1] For, the aim of rites is the enjoyment of heaven, etc. for which bodies like those of gods and other superhuman beings are necessary, though the same soul will continue to dwell in them.

[2] That is, only a doer is necessary and not a knowledge of the doer. Verse 103 shows that the soul is the doer not only of sacrifices but of all actions in general. As an example of the general not being part of the particular, the *phalārthin* is brought in. The desire of fruit is the incentive to every action, and the necessity for understanding it is not therefore confined to Vedic rites alone.

[3] फलार्थी रागी फलमर्थो विषयोऽस्येति व्युत्पत्तेः । सहिकर्तुः सर्वप्रवृत्तिहेतुरपिन कर्माङ्गं साधारणात्तथाकर्तृज्ञानमित्यर्थः ॥ Anandagiri.

107. 'But, even so, the knowledge of *Ātman* must enter into every rite by reason of its compatibility (*sāmarthyāt*),[1] thought not by virtue of any injunction.'

108. It is not so; for, only he is directed (or authorised) to perform rites, who has not grasped the truth (*tattva*) and who is characterised by what is called not-self.[2]

109. The existence of the *Ātman* in its natural state (*svarūpē*) is spoken of by the wise as liberation (*niṣ-ṣrēyasa*); and the contact of the *Ātman* with any other condition is the result of nescience (*ajṇāna* or *avidyā*).

110 and 111. The *Ātman* may itself be conscious of its impending condition of not-self. But it does not follow therefrom that, for a liberated soul in its natural state, the character of doer, enjoyer, etc., rites and the enjoyment of their fruit, and the external organs of sense, can result from any other cause than ignorance of the self (*pratyag*).

112 and 113. The same is the cause of the external (physical) body, of caste that is inherent therein (*samavāyinī*), of old age, death and birth, whose seat is the body (*dēhādhikaraṇāni*), and of wife, child, riches, etc. which are external to the body, all of which tend to fit the soul, by itself unauthorised (*svatah anadhikārinah*), for the performance of rites.

114 and 115. It is thought that these things differentiate the undifferentiated soul by reason of nescience;

[1] For, without such knowledge, there will be no doing of rites. See verse 105.

[2] There is no *adhikāra* without a limitation of the soul by a body or bodies (*avachchheda*), and every limitation is the result of ignorance (*ajṇāna*).

for nothing in the world has been seen to be the attribute or condition (*viśēshanam svarūpam vā*)[1] of another except through ignorance, but it is seen to be so in every instance through ignorance. The unknowing man does not say 'the thief is staring at me' and attribute the qualities of a thief to the post, except in darkness.

116. 'But there are instances of one thing being the attribute of another even in the absence of ignorance, e. g., *aupagava* (son of *Upagu*), *nṛipahaya* (the king's horse), *śyēnachit* (performer of hawk-sacrifice),[2] etc.'

117. It is not so; for, in none of these cases is the attribute identically related (*pratyaktayā sambandhah*) to the thing qualified, as in the example "I am lean."[3]

118. For instance, the meaning of the stem, *upagu*, 'the father,' qualifies an entirely different idea, namely the meaning of the suffix 'son of—' in *aupagava*; and so on, in the other cases also.

119. Not so does a person think of the attributes beginning from that of doer and ending with the body, and the attributes of caste etc. inherent in the body, as essentially distinct from the *Ātman* itself.[4]

120. For, he applies these attributes to the attributeless soul as though they refer to the soul itself; e.g.

[1] This is technically known as *adhyāsa* whose only source is *avidyā*.

[2] *Upagu* qualifies the suffix meaning 'son of—', *nṛipa* qualifies *haya*, and *syēna* qualifies *chit*. Now, the ignorance of the speaker or hearer is not an essential condition of the attributive relation in these examples.

[3] Here, it is the ego itself that is supposed to be lean. But in the instances cited by the opponent the thing which qualifies was entirely different from the thing qualified.

[4] For the list referred to, see verses 111, 112 and 113.

'*I* do,' '*I* am blind,' '*I* am a twice-born,' '*I* am a child,' '*I* am burnt,' '*I* am cut,' etc.

121. The relation of the qualifying and the qualified cannot exist between them except by reason of nescience. And it must be known that this alone is the reason of the soul being obliged (or privileged) to perform rites.

122. Further, it is because those only who are ignorant of the unity of self are authorised to perform rites, that qualifications are laid down for persons officiating at the *Bṛihaspati*-sacrifice, etc.[1]

123, 124, 125. The knowledge, derived from Vedantic study, of the real nature of the supreme self (*pratyag*) whose existence is proved by the Vedas etc., puts an end to all action (rites), by destroying the nescience that is its root; for, knowledge is known only to remove ignorance.[2] But knowledge does not prompt us to action. Hence the passage prescribing fruits cannot be said to be merely explanatory,[3] though it is rightly so in the case of the *parna* wood, which is part of ritual.

126. This answers your argument[4] whereby you asked me to admit these passages to be explanatory remarks though I was unwilling to admit that knowledge was the subject of injunction.

127. I concede that it is an explanatory passage in

---

1 Otherwise everyone will be qualified for everything and no qualifications are needed at all.

2 And therefore indirectly terminates *karman*.

3 See verses 44 and 45.

4 Suresvara repeats the argument of his opponent contained in verse 45.

so far as it is dependent on another passage;[1] but it is not a passage that contains an untruth (*abhūtārthavāda*), since it states only what is recited in Scripture (*sruti*).

128. This is like the passage "The new moon and full moon sacrifices are performed for attaining heaven (*svarga*)."[2] But it cannot be said to contain an untruth merely because there is no passage punishing with sin the non-doing thereof (*pāpaslōkāṣrutēh*).

129. 'How is the reward to be inferred?[3]' The fruit derived from the knowledge of the Self is an object of direct perception (*pratyaksham avagamyatē*); and therefore knowledge is not included in ritual.

130. Since performance of rites (*pravṛitti*) is an obstacle to, and, therefore, inconsistent with, liberation, the duty (*adhikāra*) of the aspirant for liberation is to renounce all action (*nivṛittau sarvakarmaṇām*).

131 and 132. No wise man will under any circumstances, desire to return to worldly life (*pravṛitti*) after the destruction of the very sources of such worldly life (such as, greed etc.), like a bewildered traveller who pursues the wrong track, abandoning the easy and safe route that leads to his destination, with water and food accessible throughout, and devoid of all danger.

133, 134 and 135. Having soon realised the divine changeless Self, which is without the properties of doer etc. that are the result of nescience, unprompted to action,

---

[1] The passage must be either अर्थवाद or अभूतार्थवाद. Suresvara admits it is the former, because it is subsidiary to the महावाक्य which proclaims the unity of the Self.

[2] So a passage can be both अर्थवाद and भूतार्थवाद at the same time.

[3] That is, there is no other passage to corroborate or confirm the same.

bestower of all the *purushārthas*, and knowable by self-intuition, and knowing that the desired fruit which is eternal and independent of all external means, is dependent on such knowledge alone, how can an all-knowing individual turn his mind, even in jest, to the performance of rituals, with rewards of a different character, dependent on external means, where there are innumerable causes to prompt one to action?

136. Further, for one whose entire ignorance is exterminated by sound knowledge, it is impossible to pursue once more, as formerly, the path of non-knowledge (ritual etc.), because there is nothing to prompt him to action.

137 and 138. Since a wise one who desires as reward a knowledge of the Reality which is gathered from a correct understanding of the Scriptures, never longs for the performance of rites which is an impediment to him, therefore the injunction of rituals, shunned by all aspirants to liberation, is only for the ignorant soul with the qualities of doer etc. which belong to the non-self.

139. The nature of doer etc. is to be abandoned, because knowledge and nescience (*mōha*) are opposed to each other both in their nature and in their effects, and because it is productive of evil, like illness etc.

140, 141, and 142. It is infant's babble to say that the function of doer etc. is the very nature of the soul (that desires to abandon such function); for, if the soul that is directly perceived to be of the nature of non-doer, be said to be of the nature of doer, it is opposed to the knowledge derived from direct perception etc. and even final liberation would become impossible.[1]

[1] This is to meet the argument that, because the soul is of the nature of doer, etc., it can never shake off its nature. Such an argument leads to a fallacy. If the soul loses its nature, it becomes

'Well, then,[1] let there be no possibility of liberation since the soul (*driṣi*), being the enjoyer of fruits, is liable to change,[2] like fire. Or, if not, let the soul be non-existent like ether (*ākāsa*).' Not so; for, the soul is everlasting (*dhruva*) and, therefore, not susceptible of change.

143. How can any change affect the soul (*pratyag*) that is neither corporeal nor incorporeal? Enjoyment is nothing else than becoming conscious, and the soul is always endowed with such consciousness.

144 and 145. It is not liable to change like wind and fire, because it has not, like them, previous non-existence etc.[3] In the case of fire etc. which are composed of parts and which have the character of effects, it is proper that there should be manifestation (and change), whenever their nature is attacked by such mighty causes as the adding of fuel or the churning of wood.

146. But, since the soul has no parts, and since it is self-existent, the two chief changes, namely, manifestation and disappearance, can never happen to it.

147. Manifestation, even if conceded, does not necessarily imply change in the thing to be manifested; and, so also, non-manifestation. This is common to all schools of reasoning.

148. Hence, the nature of doer etc. as applied to the soul, must be understood solely to result from the nescience of those who do not admit the possibility of liberation. It is not, however, the real truth.

non-existent, and since there is nothing to be liberated, there can be no liberation. If it retains its nature as doer, then too there can be no liberation by reason of that very nature.

[1] This is the argument of the *lokāyata* or atheist.

[2] For, enjoyment necessarily means change.

[3] प्रागभावं, प्रध्वंसाभाव, अत्यन्ताभाव, and अन्योन्याभाव; change presupposes some or all of these.

अथेन्द्रियार्थसन्निकर्षो न प्रत्यक्षहेतुरन्वयव्यभिचारात् तथाहि भिन्नविषयकानुमितिसामग्रीसत्त्वे सत्यपीन्द्रियार्थसन्निकर्षे प्रत्यक्षानुत्पत्तेः । एवं चाक्षुषादिकं प्रत्यपि न चक्षुःसन्निकर्षस्य हेतुत्वं व्यभिचारात् तथाहि गीतादिशुश्रूषायां चक्षुःसन्निकर्षाच्चाक्षुषाजननात् । तथा च तदानीं यद्विरहात् प्रत्यक्षाद्यनुत्पादस्तस्यैव हेतुत्वं युक्तं कृतं सन्निकर्षहेतुत्वेनेत्याह ।

व्याहतत्वादहेतुः[1] ॥ २७ ॥

इन्द्रियार्थसन्निकर्षो न हेतुः व्याहतत्वात् तत्सत्त्वेऽपि प्रत्यक्षानुत्पादादित्यर्थः ॥ २७ ॥

समाधत्ते ।

नार्थविशेषप्राबल्यात्[2] ॥ २८ ॥

इन्द्रियसन्निकर्षो नाहेतुः प्रत्यक्षहेतुरेव । अर्थविशेषप्राबल्यात् सामग्रीविशेषप्रतिरुद्धकार्यकत्वात् सामग्रीविशेषविरहादिरूपकारणसहितस्य तस्य कार्योपधायकत्वनियमादिति यावत् । तथा च सामग्रीक्षणस्यैव कार्योत्पत्तिप्राक्क्षणत्वनियमात् केवलसन्निकर्षेऽन्वयव्यभिचारो न दूषणमिति भावः । यद्वा इन्द्रियार्थसन्निकर्षो न हेतुः व्याहतत्वादाकाशादौ तत्सत्त्वेऽपि तत्प्रत्यक्षाजननात् । समाधानमाह । नार्थविशेषप्राबल्यात् । अर्थविशे-

(१) वार्त्तिके तु व्याहतत्वादित्यनेन त्रिसूत्रीं प्रत्याचष्ट इति लिखितम् । तात्पर्यटीकायां नार्थविशेषप्राबल्यादितिसूत्रस्थभाष्यव्याख्यानन्तरं व्याहतत्वादिति पूर्वपक्षसूत्रम् । अस्य तात्पर्यमाह वार्त्तिककारः । अनेनेतीति लिखितम् ।

(२) परिहारसूत्रम् । नार्थ-त् । इति तात्पर्यटीकायाम् । एतद्व्याख्यानावसरे अत्र नार्थविशेषप्राबल्यादिति सूत्रेणेति न्यायतत्त्वालोकीयवाचस्पतिमिश्रलेखेऽपि दृश्यते ।

षेष्वेव प्राबल्यात् प्रत्यक्षजनकत्वान्न सर्वत्र सन्निकर्षस्य प्रत्यक्षाजनकत्वमिति भावः ॥ २८ ॥

नन्विन्द्रियसन्निकर्षाधीनं ज्ञानं न प्रत्यक्षरूपविजातीयप्रमा किं तु तदनुमितिरेवेति कथं प्रमाणचतुष्टयविभाग इत्याशङ्कते ।

प्रत्यक्षमनुमानमेकदेशग्रहणादुपलब्धेः(१) **॥ २९ ॥**

प्रत्यक्षं प्रत्यक्षत्वेनाभिमतमिन्द्रियसन्निकर्षाधीनवृक्षादिज्ञानमिति यावत् । अनुमानमनुमितिः एकदेशस्य पुरोवर्त्त्यवयवभागस्य ग्रहणादिन्द्रियसन्निकर्षादुपलब्धेरवयविनो वृक्षस्योपलब्धेः । तादात्म्येन हेतुता बोध्या । तथा चेन्द्रियसन्निकर्षस्यार्थनिष्ठतया हेतुता वाच्या अन्यथाऽतिप्रसङ्गादित्यवयवसन्निकर्षादवयविनो वृक्षादेः प्रत्यक्षमिति वक्तुं न शक्यमेवं शब्दस्याश्रवणान्न शाब्दबोधः सादृश्यज्ञानादेरभावाच्च नोपमितिः शक्त्यविषयकत्वाच्चेति परिशेषात् तादृशज्ञानमनुमितिरित्यर्थः । न चानुमितौ व्याप्त्यादिज्ञानस्य हेतुत्वात् तद्विरहदशायां कथं वृक्षादेरनुमितिविषयतेति वाच्यम् । अवयवसन्निकर्षानन्तरमयं वृक्षो वृक्षावयवसमवेतत्वादित्याद्यनुमानसम्भवादिति भावः ॥ २९ ॥

वृक्षज्ञानस्य प्रत्यक्षत्वासम्भवे ऽपि तदेकदेशस्य भवतापि प्रत्यक्षेण ग्रहान्न प्रत्यक्षसामान्यविलोप इति न विभागव्याघात इति सुकरतया समाधत्ते ।

(१) पूर्वपक्षसूत्रम् । प्रत्यक्षमनुमानमेकदेशग्रहणादुपलब्धेरिति न्यायतत्त्वालोके वाचस्पतिमिश्राः । पूर्वपक्षसूत्रम् । प्रत्यक्षमनुमानमित्यादि न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः ।

न प्रत्यक्षेण यावत्तावदुपलम्भात्[1] ॥ ३० ॥

न इन्द्रियसन्निकर्षाधीनज्ञानमात्रस्य न प्रत्यक्षत्वनिरासः । प्रत्यक्षेणेन्द्रियेण यावत्तावदुपलम्भाद् यस्य कस्यचिद् भागस्योपलम्भात् । अनुमित्यादिविजातीयप्रत्यक्षस्य भवतापि स्वीकारादन्यथानुभवविरोध इति भावः । इदमुपलक्षणम् । शब्दगन्धादिप्रत्यक्षस्यानिरासान्न प्रत्यक्षमात्रनिरास इति बोध्यम् ॥ ३० ॥

वृक्षादेरपि ज्ञानं प्रत्यक्षतः सम्भवतीतिसिद्धान्तमाह ।

न चैकदेशोपलब्धिरवयविसद्भावात्[2] ॥ ३१ ॥

न च न वेत्यर्थः । एकदेशस्यावयवमात्रस्येन्द्रियेणोपलब्धिः अवयविनोऽपि तदानीं तथोपलब्धेः । अवयविसद्भावादवयविन्यपीन्द्रियसन्निकर्षसत्त्वादवयवसंयोगस्यावयविसंयोगहेतुत्वात् । न ह्यर्थे समुदायावयवावच्छेदेनेन्द्रियसंयोगस्य प्रत्यक्षहेतुत्वमुच्यते येन तदसम्भवेन प्रत्यक्षं वृक्षादेर्न स्यादिति भावः ॥ ३१ ॥

समाप्तं प्रत्यक्षपरीक्षाप्रकरणम् ॥

---

(१) न प्र-त् । इतिसूत्रप्रतीकं धृत्वा व्याख्याय भाष्यं व्याख्याय तदेतत् सूत्रं वार्त्तिककारो व्याचष्ट इति तात्पर्यटीकाकृद्भिरुक्तम् । न प्रत्यक्षेण यावत्तावदप्युपलम्भात् । अर्वाग्भागस्याप्यन्ततस्त्वया प्रत्यक्षत्वेनेष्टत्वात् तथा च बाधो दोष इति सूत्रार्थ इति न्यायतत्त्वालोके वाचस्पतिमिश्राः । न प्रत्यक्षेण यावत्तावदप्युपलम्भादिति सूत्रस्यार्थं विवेचयतीति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः । तावदप्युपलम्भादिति पाठोऽन्यत्र सर्वत्र दृश्यते ।

(२) अवयविप्रकरणारम्भे अथावयविसद्भावादितिसूत्रेणेत्यादिर्न्यायतत्त्वालोकीयवाचस्पतिमिश्रलेखो दृश्यते । न्यायसूचीनिबन्धे चास्योल्लेखो न दृश्यते । तात्पर्यटीकायां तु न चैकदेशोपलब्धिरिति । तदेतद्भाष्यमनुभाष्य वार्त्तिककारो व्याचष्ट इति लेखो दृश्यते । एवं च न चैकदेशोपलब्धिरिति भाष्यमवयविसद्भावादित्येतावन्मात्रं सूत्रमिति सम्भाव्यते । अत एव क्वचिदवयविसद्भावादित्येव पाठो दृश्यते ।

अवयविसद्भावादिति यदुक्तं तदवयविसत्त्व एव सम्भवतीत्युपोद्घातसङ्गत्यावयविनं परीक्षयितुमाह ।

साध्यत्वादवयविनि सन्देहः(१) ॥ ३२ ॥

अत्र चावयविनि सन्देहः साध्यत्वादनुमितिविधेयत्वादित्यर्थो न सङ्गच्छते वह्न्यादौ व्यभिचारादिति किं तु अवयविनि साध्यत्वात् सन्देहात् । सन्देहोऽवयविसन्निकर्षरूपप्रागुक्तहेताविति शेषः । तत्रावयविसन्देहो द्रव्यत्वमणुत्वव्याप्यं न वेत्यादिरूपः । सन्निकर्षसन्देहश्च वृक्षपदवाच्य इन्द्रियसन्निकृष्टो न वेत्यादिरूपः । परमते परमाणुसमुदायस्यैव वृक्षपदवाच्यत्वात् तत्र चेन्द्रियसन्निकर्षस्यैकदाऽसम्भवेन प्रत्यक्षासम्भव इति भावः । एवमेकोऽवयवी न सम्भवति सकम्पत्वाकम्पत्वरक्तत्वारक्तत्वावृतत्वानावृतत्वादिलक्षणविरुद्धधर्माध्यासात् । तथाहि शाखावच्छेदेन कम्पो मूलावच्छेदेन तदभाव एकस्मिन् वृक्षे एकदा न सम्भवति भावाभावयोर्विरोधात् । एवं महारजनरक्तैकदेशस्यांशुकस्य देशान्तरावच्छेदेनारक्तत्वोपलम्भात् तदुभयमेकस्य न सम्भवति । तथाऽऽवृतपृष्ठादेरनावृतत्वोपलम्भात् तदुभयमेकस्य न सम्भवति । किं तु परमाणुसमुदाय एव वृक्षादिपदवाच्यस्तदेकदेशानामेव सकम्पत्वादिकं नानुपपन्नं वृक्षः सकम्प इत्यादिव्यवहारश्च वृक्षैकदेशविषय एवेति परमतम् । स्वमते ऽवच्छेदकभेदेन भावाभावयोरेकत्र समावेशान्नावयविबाध इति । यद्वा साध्यत्वात् प्रात्यक्षासिद्धत्वादवयविनि सन्देहः । अनुमानादिकं च सन्दिग्धाप्रामाण्यकमिति भावः ॥ ३२ ॥

(१) पूर्वपक्षसूत्रम् । साध्यत्वादवयविनि सन्देह इति न्यायतत्त्वालोके वाचस्पतिमिश्राः । साध्यत्वादिति यथाश्रुतं सूत्रं गृहीत्वा वार्त्तिककारो विकल्प्याक्षिपति किं पुनरत्रेतीति तात्पर्यटीका ।

सिद्धान्तयति ।

सर्वाग्रहणमवयव्यसिद्धेः(१) ॥ ३३ ॥

अवयविनोऽसिद्धौ सर्वेषां परमाणूनां तदन्तर्गतगुणकर्मादीनां चाग्रहणं भवेदित्यर्थः । प्रत्यक्षे महत्त्वस्य हेतुत्वादन्यथा प्रत्येकं परमाणूनां तद्गतधर्माणां च प्रत्यक्षापत्तेः । तथा च भवदभिमतस्यानुमित्यादिविजातीयैकदेशप्रत्यक्षस्य तद्गतरूपादीनां कम्पादिक्रियाणां च प्रत्यक्षस्य चानुपपत्त्या तथा व्यवहारो न स्यात् । तथा भागैकसन्निकर्षानन्तरोत्पन्नज्ञाने वृक्षं साक्षात्करोमीत्यनुव्यवसायो न स्यात् समुदायस्यासन्निकृष्टत्वादेकदेशस्य च वृक्षत्वाभावादिति भावः ॥ ३३ ॥

समाधानान्तरमाह ।

धारणाकर्षणोपपत्तेश्च(२) ॥ ३४ ॥

परमाणुपुञ्जातिरिक्तोऽवयवी स्वीकार्यस्तथा सति धारणाकर्षणयोरुपपत्तेः अन्यथैकदेशधारणेन समुदायधारणमेकदेशाकर्षणेन समुदायाकर्षणं च न स्यादिति । न च नौकाकर्षणेन नौकास्थाकर्षणवत् कुण्डधारणेन कुण्डस्थदधिधारणवच्चैकादेशाकर्षादिना तद्विजातीयसंयोगाश्रयापरभागाकर्षणादिसम्भव इति वाच्यम् । नौकानौकास्थाद्योराधाराधेयभावापन्नतया आधाराकर्षणादिना आधेयाकर्षणादिसम्भवे ऽप्याधाराधेयभावानापन्नानां परमाणूनां

(१) संशयापाकरणार्थं सूत्रम् । सर्वाग्रहणमवयव्यसिद्धेरितीति तदिदं सूत्रमवयव्यनभ्युपगमे विरोधप्रदर्शनपरमिति च वार्त्तिकम् । सिद्धान्तसूत्रम् । सर्वाग्रहणमित्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

(२) प्रत्यनुमानप्रदर्शनाय सूत्रम् । धारणाकर्षणोपपत्तेश्चेति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

पुञ्जघटकानामेकाकर्षणे ऽपराकर्षणस्यासम्भवात् तथादृष्टान्ताभावादिति । यदि च कथञ्चिद्विजातीयसंयुक्तद्रव्याणामेकाकर्षणे ऽपरस्याकर्षणं सम्भाव्यते तथापि पूर्वोक्तसमाधानमेव सम्यगिति ॥ ३४ ॥

तत्रैव परोक्तमाशङ्क्य निराचष्टे ।

सेनावनादिवदिति चेन्नातीन्द्रियत्वादणूनाम्[१] ॥ ३५ ॥

सेनावनादिवत् परमाणुपुञ्जोऽपि घटादिपदवाच्यः प्रत्यक्षः । तथाहि दूरस्थसेनावनादिघटकप्रत्येकस्य मनुष्यवृक्षादेरप्रत्यक्षत्वे ऽपि तत्समुदायात्मकसेनावनादेः प्रत्यक्षत्ववत् प्रत्येकं परमाणूनामप्रत्यक्षत्वे ऽपि तत्समुदायरूपघटस्य प्रत्यक्षत्वसम्भव इति चेन्नाणूनामतीन्द्रियत्वात् महत्त्वाभावेन प्रत्यक्षस्वरूपायोग्यत्वात् । मनुष्यवृक्षादेश्च प्रत्येकं महत्त्वेन प्रत्यक्षत्वात् तथा प्रत्यक्षस्य दूरत्वादिदोषेण प्रतिबन्धादनुत्पत्तिः समुदायत्वेन प्रत्यक्षे च तद्दोषस्य प्रतिबन्धकत्वाकल्पनात् तथा प्रत्यक्षं जायते ॥ ३५ ॥

समाप्तमवयविपरीक्षाप्रकरणम् ॥

अवसरसङ्गत्या क्रमप्राप्तमनुमानं परीक्षयितुं पूर्वपक्षयति ।

रोधोपघातसादृश्येभ्यो व्यभिचारादनुमानमप्रमाणम्[२] ॥ ३६ ॥

---

(१) इदं तावत् सूत्रं साधनपक्षे दृष्टान्तमात्रार्थत्वादसम्बद्धमित्येतत्सूत्रव्याख्यानावसरे वार्त्तिकम् । आशङ्कात इतरसूत्रम् । सेना–नाम् । इति तात्पर्यटीका । सेनावनादिवद्ग्रहणमिति चेदिति पाठोऽन्यत्र दृश्यते । सेनावनवद्ग्रहणमित्यपि क्वचित् ।

(२) उदाहरणव्यभिचारद्वारकं सूत्रम् । रोधोपघातसादृश्येभ्यो व्यभिचारादनुमानमप्रमाणमितीति वार्त्तिकम् । पूर्वपक्षसूत्रम् । रोधोपघातेत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

अनुमानमनुमानत्वेन भवदभिमतं नदीवृद्ध्यादिज्ञानम् । एतेनाशङ्कितुश्चार्वाकस्यानुमितेरसिद्धा तत्करणत्वेन पक्षत्वासम्भव इति निरस्तम् । तत्राभिमतान्तं स्वरूपकीर्तनं नदीवृद्ध्यादिज्ञानत्वेनैव पक्षत्वात् । यद्वा परैरसत्ख्यात्यङ्गीकारादसत्येव पदानां शक्तिस्वीकाराच्चानुमानपदेनासतोऽनुमितिकरणत्वावच्छिन्नस्य पक्षतया लाभः । न प्रमाणमिति साध्यम् । प्रमाकरणतावच्छेदकरूपशून्यत्वादिति हेतुरूह्यः । ननु व्याप्तिनिश्चयत्वमेवं प्रमाकरणतावच्छेदकरूपं तत्रास्तीति चार्वाकोक्तहेतुरसिद्ध इत्यत आह । रोधेत्यादि । रोधजनदीवृद्ध्युपघातजपिपीलिकाण्डसञ्चारमयूररुतसदृशरुतेषु व्यभिचारदर्शनादिति तदर्थः । अयं भावः । वृष्टिविरहे ऽपि रोधनिमित्तकनदीवृद्धिदर्शनाद्व्यभिचारग्रहेण नदीवृद्ध्यादौ वृष्टिव्याप्तिनिश्चयासम्भवात् । इदं कार्यलिङ्गकमनुमानम् । तथोपघातेनाश्रयनाशेन यः पिपीलिकाण्डसञ्चारस्तेन वृष्टिव्यभिचारदर्शनात् पिपीलिकाण्डसञ्चारत्वावच्छिन्नस्य वृष्टिव्याप्यत्वेनानिश्चयान्न तेन वृष्ट्यनुमानम् । इदमनुमानं कारणलिङ्गकम् । पिपीलिकाण्डसञ्चारस्य वृष्टिहेतुत्वात् । यद्वा पिपीलिकाण्डसञ्चारस्यात्यन्तोष्मानुमापकत्वं ततश्च महाभूतक्षोभानुमानं तस्य वृष्टिहेतुत्वात् तेन वृष्ट्यनुमानम् । एवं च पिपीलिकाण्डसञ्चारस्य व्यभिचारेणात्यन्तोष्माननुमापकत्वे तेन महाभूतक्षोभस्यापि नानुमानं ततश्च महाभूतक्षोभस्य चाज्ञाततया न तेन हेतुना वृष्ट्यनुमानमिति न कारणलिङ्गकं वृष्ट्यनुमानमिति । तथा मनुष्यादिकर्तृकमयूररुतसदृशेन व्यभिचारग्रहान्मयूररुते वृष्टिव्याप्तिनिश्चयासम्भवान्न तेन वृष्ट्यनुमानम् । यद्यपि मनुष्यादिरुते मयूररुतत्वं नास्तीति मयूररुते न व्यभिचारस्तथापि सादृश्यलक्षणदो-

षवशात् तत्र मयूररुतत्वभ्रमसम्भवेन व्यभिचारग्रहान्न व्याप्तिनिश्चयसम्भव इति। इदं कार्यकारणभिन्नलिङ्गकमनुमानमितिरीत्या पूर्ववदित्यादिना प्रागुक्तं त्रिविधमनुमानमेवमप्रमाणमिति। एवमन्यत्राप्ययोग्योपाधिसंशयाद्यधीनव्यभिचारसंशयेन व्याप्तिनिश्चयासम्भवादनुमानमात्रोच्छेद इत्यपि बोध्यम्। अथवा पूर्वकालीनसाध्यानुमानमुत्तरकालीनसाध्यानुमानं वर्तमानसाध्यानुमानमिति त्रिविधमेवानुमानं पूर्ववदित्यादिप्रागुक्तलक्षणसूत्रनिर्दिष्टं व्यभिचारान्न प्रमाणमित्यर्थः ॥ ३६ ॥

सिद्धान्तयति।

नैकदेशत्रासंसादृश्येभ्योऽर्थान्तरभावात्[१] ॥ ३७ ॥

अनुमानाप्रामाण्यं न युक्तमेकदेशरोधजनदीवृद्धित्रासजपिपीलिकाण्डसञ्चारमयूररुतसदृशरुतेभ्यो लिङ्गस्यार्थान्तरभावादर्थान्तरत्वाद् भिन्नत्वादिति यावत्। तथा च रोधजभिन्ननदीवृद्धित्रासजाद्यतिरिक्तपिपीलिकाण्डसञ्चारमयूररुतानां लिङ्गानां व्यभिचाराभावेन तैर्वृष्ट्यनुमानसम्भवः। भ्रमस्तु न सर्वेषां सार्वदिको व्यभिचारसंशयस्यापि न सर्वदा सम्भवोऽनुकूलतर्कादितस्तन्निवृत्तिसम्भवादिति भावः ॥ ३७ ॥

समाप्तमनुमानपरीक्षाप्रकरणम् ॥

अथ वर्तमानकालो वृष्टिमान् मयूररुतवत्त्वादित्यनु-

(१) नैकदेशत्रासेति सूत्रपाठोऽन्यत्र। यान्यप्येतान्युदाहरणानि व्यभिचारीणीत्युच्यन्ते तेष्वपि व्यभिचारो नास्तीत्यसिद्धतोद्भावनद्वारकं सूत्रम्। नैकदेशत्राससादृश्येभ्योऽर्थान्तरभावादिति वार्त्तिकम्। सिद्धान्तसूत्रम्। नैकदेशत्रासेत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः।

माने पक्षाप्रसिद्धिः । एवमनुमितेः प्रमात्वं वर्तमानसाध्यविषयकत्वं वर्तमानत्वं च वर्तमानकालवृत्तित्वं तत्र वर्तमानकालाभावे ऽनुमितेर्न प्रमात्वमिति तत्करणस्यानुमानस्य न प्रामाण्यमित्याशङ्कते ।

वर्तमानाभावः पततः पतितपतितव्यकालोपपत्तेः(१) ॥ ३८ ॥

वर्तमानाभावः वर्तमानकालाभावः वर्तमानकालस्यासत्त्वं अतीतानागतकालभिन्ने कालत्वाभाव इति यावत् । एतेन प्रतियोगिसिद्ध्यसिद्धिभ्यां न निषेधासिद्धिरिति । तत्र कालत्वे मानाभावादिति हेतुरूह्यः । ननु घटादेः कथं कालसम्बन्धित्वरूपसत्त्वेन व्यवहार इत्यत आह । पतत इति । वस्तुनो घटादेरित्यर्थः । पतितपतितव्यकालाभ्यामतीतानागतकालाभ्यामेव सत्त्वोपपत्तेः । घटो जातो घटो भविष्यतीत्यादिप्रतीतेरिति भावः । वर्तत इत्यादिप्रयोगस्तु वृत्तितामात्रं बोधयति । यद्वा पततो वस्तुनो वर्तमानाभावो वर्तमानत्वाभावोऽतीतानागतकालभिन्नवृत्तित्वाभावः । कालवृत्तित्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताक इत्यादिः । अथवा पततः पततीत्यादिप्रयोगविषयीभूतस्य घटादेर्वर्तमानाभावः प्रयोगाधिकरणकालवृत्तित्वाभावः पततीत्यादिप्रयोगेण तथाकालवृत्तित्वानवगाहनात् । ननु तदा सत्त्वमेव कुत इत्यत आह । पतितेत्यादि । पूर्ववदिदानीं घट इत्यादिप्रत्ययस्याप्यतीतानागतकालवृत्तित्वविषयकत्वोपपत्तेः । इदानीं

(१) एवमुपपादितः कालः । तस्योपपन्नस्य वर्तमानकालप्रतिषेधार्थं सूत्रम् । वर्तमानाभाव इत्यादि वार्त्तिकम् । पूर्वपक्षसूत्रम् । वर्तमानाभाव इत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

घटो जात इदानीं घटो भविष्यतीत्यादिप्रत्ययवदिति तदर्थः ॥ ३८ ॥

अत्र समाधत्ते ।

तयोरप्यभावो वर्तमानाभावे तदपेक्षत्वात्(१) **॥ ३९ ॥**

वर्तमानकालाभावे तयोरतीतानागतकालयोरप्यभावः स्यात् तदपेक्षत्वात् तद्ग्रहसापेक्षग्रहकत्वात् । वर्तमानध्वंसप्रतियोगित्वस्यातीतत्वरूपत्वाद् वर्तमानप्रागभावप्रतियोगित्वस्य चानागतत्वरूपत्वादिति भावः । यद्वा वर्तमानकालवृत्तित्वाभावे तयोरप्यतीतानागतकालवृत्तित्वयोरप्येकस्मिन्न सम्भवः तदपेक्षत्वान्मध्यकालवृत्तित्वं विना पूर्वापरकालवृत्तित्वानुपगमादिति भावः ॥ ३९ ॥

ननु भविष्यन्निष्ठध्वंसप्रतियोगित्वमतीतत्वमतीतनिष्ठप्रागभावप्रतियोगित्वं भविष्यत्त्वमतो न तत्र वर्तमानकालापेक्षा । यद्वा मध्यकालवृत्तित्वं विनापि पूर्वापरकालवृत्तित्वस्वीकारे का क्षतिरित्यत आह ।

नातीतानागतयोरितरेतरापेक्षा सिद्धिः(२) **॥ ४० ॥**

नेतरेतरापेक्षया सिद्धिरन्योन्याश्रयाद् वर्तमानस्यातीतत्वभविष्यत्त्वप्रसङ्गाच्चेति भावः । यद्वा न वस्तुनो वर्तमानकालावृत्तित्वं तथा सत्यतीतानागतकालवृत्ति-

(१) वर्तमानः कालो नास्तीति ब्रुवन्नभ्युपगतौ कालौ बाधते । एतदनुज्ञापनार्थं सूत्रम् । तयोरप्यभावो वर्तमानाभावे तदपेक्षत्वादिति वार्त्तिकम् । सिद्धान्तसूत्रम् । तयोरप्यभाव इत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

(२) एतत्प्रतिषेधार्थं सूत्रम् । नातीतानागतयोरितरेतरापेक्षा सिद्धिरितीति वार्त्तिकम् । एतन्निराकरणाय सूत्रम् । नाती–द्धिः । परस्परापेक्षासिद्धेर्हि वर्तमानाभावः सैव तु नास्तीति सूत्रार्थं इति तात्पर्यटीका ।

त्वयोरपीतरेतरापेक्षेण तत्प्रमाणेनासिद्धिः स्यात् । गृहे ऽयं घटो नासात् न स्थास्यति इदानीं वर्तत इतिप्रत्ययेन वर्तमानकालवृत्तित्वानवगाहने घट आसीद् घटो भविष्यतीत्यादिप्रत्ययेनाप्यतीतानागतकालवृत्तित्वं नावगाह्यतामिति भावः ॥ ४० ॥

समाधानान्तरमाह ।

वर्तमानाभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः[1] ॥ ४१ ॥

वर्तमानाभावे वर्तमानकालस्यासत्त्वे तदानीं वस्तुनोऽसत्त्वप्रसङ्गेन सर्वेषां वस्तूनामग्रहणं ज्ञानं न स्यात् । प्रत्यक्षानुपपत्तेः । तत्काले सत एव वस्तुनः प्रत्यक्षाङ्गीकारात् प्रत्यक्षासम्भवे इतरज्ञानमपि न सम्भवति तदधीनत्वादिति भावः ॥ ४१ ॥

नन्वतीतत्वं यदि वर्तमानध्वंसप्रतियोगित्वं तदाऽयं घटः श्याम आसीदित्यादिप्रयोगानुपपत्तिः एतद्घटेऽतीतत्वबाधात् । एवमयं घटो रक्तो भविष्यतीतिप्रयोगानुपपत्तिर्वर्तमानप्रागभावप्रतियोगित्वस्य भविष्यत्त्वस्य वर्तमानघटे बाधादित्यत आह ।

कृतताकर्तव्यतोपपत्तेरुभयथा ग्रहणम्[2] ॥ ४२ ॥

कृतता अतीतत्वं कर्तव्यता भविष्यत्त्वं तयोर्वर्तमानघटेऽप्युपपत्तेरुभयथा ग्रहणमासीद्भविष्यतीत्यादिप्रयोगविषयत्वेन वर्तमानघटस्यापि ग्रहणम् । तथा चायं घटः

---

(१) वर्तमानाभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः सूत्रार्थाविरोध इति वार्त्तिकम् ।

(२) यच्चेदं पच्यमानं छिद्यमानं च तत् क्रियमाणं तस्मिन् क्रियमाणे कृतताकर्तव्यतोपपत्तेस्तूभयथा ग्रहणम् । इति भाष्यग्रन्थपङ्क्तिः । छिद्यमानं पच्यमानं चेत्यादिवार्त्तिकपङ्क्तिः । तद्धेतुकं द्वैविध्यमितिप्रतिपादनपरं सूत्रमवतारयति तस्मिन् क्रियमाण इति तात्पर्यटीका । कृतताकर्तव्यतोपपत्तेस्तूभयथेति पाठोऽन्यत्र दृश्यते ।

श्याम आसीदित्यादावतीतत्वस्य श्यामत्वघटितपरम्परा-सम्बन्धेन घटादावन्वयः। अयं घटो रक्तो भविष्यतीत्यादौ च रक्तत्वादिघटितपरम्परासम्बन्धेन भविष्यत्त्वान्वय इति भावः। केचित्तु अनुमानस्य त्रिकालविषयत्वमभिहितं तन्न युक्तं वर्तमानाभावेन तदधीनज्ञानयोरतीतानागतयो-रप्यभावेन कालत्रयात्मकविषयाभावादित्याशयेन वर्त-मानपरीक्षामारभमाणो वर्तमानमाक्षिपति। वर्तमाना-भावः पततः पतितपतितव्यकालोपपत्तेः। वर्तमाना-भावोऽतीतानागतभिन्ने कालत्वाभावः। व्युत्पादयति। पतत इति। पततः फलादेर्वृन्तावधिकः कश्चन देशः पति-ताध्वा भूम्यवधिकः कश्चन देशः पतितव्याध्वा न तु वर्तमानस्य प्रसङ्गोऽपीति भावः। समाधत्ते। तयोरप्य-भावो वर्तमानाभावे तदपेक्षत्वात्। वर्तमानाभावे तयोरतीतानागतयोरप्यभावः स्यात् तयोस्तदपेक्षत्वाद् वर्तमानध्वंसप्रतियोगित्वमतीतत्वं वर्तमानप्रागभावप्र-तियोगित्वमनागतत्वमिति भावः। यद्वा वर्तमानाभावे ऽतीतानागतयोरप्यभाव इत्याह। तयोरप्यभावो वर्तमा-नाभावे तदपेक्षत्वात्। इत्थं च कालत्रयाभाव इति पर्य-वसितम्। ननु तयोः परस्परापेक्षयैव सिद्धेर्न वर्तमाना-पेक्षेत्यत आह। नातीतानागतयोरितरेतरापेक्षा सिद्धिः। अन्योन्याश्रयादिति भावः। तयोरप्यभावे का क्षतिरिति युक्त्यन्तरमाह। वर्तमानाभावे सर्वाग्रहणं प्रत्यक्षानुप-पत्तेः। यद्वाकल्पे कालत्रयाभावे पूर्वपक्षिते पर्यवसिते वर्त-मानसिद्धावपरयोरपि सिद्धिः सुघटेति वर्तमानं साध-यति। तयोरप्यभाव इति सूत्रम्। तदर्थश्च वर्तमानाभावे प्रत्यक्षं नोपपद्यते प्रत्यक्षस्य वर्तमानविषयत्वात्। अत एवाहुः। सम्बद्धं वर्तमानं च गृह्यते चक्षुरादिनेति। प्रत्यक्षा-

भावे सर्वमेव ग्रहणं ज्ञानं न स्यात् प्रत्यक्षमूलकत्वादितरज्ञानानामिति भावः । ननु यदि वर्तमानध्वंसप्रतियोगित्वमतीतत्वं वर्तमानप्रागभावप्रतियोगित्वं भविष्यत्त्वं तदा वर्तमान एव घटे कथं श्याम आसीद्रक्तो भविष्यतीति धीरत आह । कृतताकर्तव्यतोपपत्तेरुभयथा ग्रहणम् । वर्तमानस्यापि घटादेः श्यामरक्तरूपादीनां कृतताकर्तव्यतयोरतीतत्वभविष्यत्त्वयोरुपपत्तेर्घटादेरप्यतीतानागतत्वेन व्यवहारः परम्परासम्बन्धादिति भाव इति प्राहुः ॥ ४२ ॥

समाप्तं वर्तमानपरीक्षाप्रकरणम् ॥

अवसरसङ्गत्या क्रमप्राप्तमुपमानं परीक्षयितुमाह ।

अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिः[(१)] ॥ ४३ ॥

उपमानमुपमितित्वेनाभिमतं ज्ञानम् । तस्य प्रसिद्धसाधर्म्याद् या सिद्धिरुत्पत्तिः सा न सम्भवति यतोऽत्यन्तप्रायैकदेशसाधर्म्यान्न सिद्धिः । तथा च प्रसिद्धसाधर्म्यप्रयुक्तोत्पत्तिकत्वसामान्याभावः साध्यः । प्रसिद्धपदं ज्ञातपरम् । अत्यन्तज्ञातसाधर्म्यादिप्रयुक्तोत्पत्तिकत्वाभावकूटस्य हेतुत्वं विशेषाभावकूटस्य सामान्याभावसाधकत्वं सर्वसिद्धमिति । तत्रात्यन्तसाधर्म्यं तद्गतयावद्धर्मवत्त्वं तद्भिन्नत्वमपि तत्र न देयमप्रसिद्ध्यापत्तेः । तस्य नोपमानत्वं गोसाधर्म्येण गोरुपमित्यभावाद् गवये गोगतयावद्धर्माभावेन गवयपदवाच्यत्वोपमित्यनुपपत्तेश्च । प्रायसाधर्म्यं तद्भिन्नत्वे सति तद्गतबहुतरधर्मवत्त्वं तस्य च नोपमानत्वं गोसाधर्म्येण महिषे महिषपदवाच्यत्वानुपमितेः । अत एव तद्भिन्नत्वे सति तद्गतयत्किञ्चिद्धर्मवत्त्वरूपस्यैकदेशसाधर्म्यस्य

(१) पूर्वपक्षसूत्रम् । अत्यन्तप्रायैकदेशेत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

नोपमानत्वं सर्षपसाधर्म्येण मेरोरुपमित्यभावाच्च । एवं वैधर्म्यस्यापि नोपमानत्वमित्यपि बोध्यम् ॥ ४३ ॥

प्रसिद्धपदं न ज्ञातमात्रपरमित्यभिप्रायेण समाधत्ते ।

प्रसिद्धसाधर्म्यादुपमानसिद्धेर्यथोक्तदोषानुपपत्तिः[1] ॥ ४४ ॥

प्रसिद्धं प्रकर्षेण महिषादिधर्मव्यावृत्तरूपेण सिद्धं ज्ञातं यत् साधर्म्यं तस्मादुपमितिस्वीकारात् तत्र यथोक्तदोषानुपपत्तिः यथोक्तव्यभिचाराभाव इति । तादृशं च साधर्म्यं प्रकरणवशादवगम्यमिति ॥ ४४ ॥

नोपमानं मानान्तरमित्याशङ्कते ।

प्रत्यक्षेणाप्रत्यक्षसिद्धेः[2] ॥ ४५ ॥

प्रत्यक्षेण प्रत्यक्षविषयीभूतेन गोसाधर्म्येण हेतुना अप्रत्यक्षस्य गवयपदवाच्यत्वस्य सिद्धेरनुमितिस्वीकारात् । नोपमानं मानान्तरमिति शेषः ॥ ४५ ॥

समाधत्ते ।

नाप्रत्यक्षेण गवये प्रामाणार्थमुपमानस्य पश्यामः[3] ॥ ४६ ॥

नोपमानमनुमानान्तर्गतं यतोऽप्रत्यक्षेण गवयपदवाच्यत्वेन रूपेण । गवये गवयस्य यत् प्रमाणं प्रमां तद्रूपमर्थं फलमुपमानस्य ज्ञातसाधर्म्यस्य पश्याम इत्यर्थः ।

(१) सिद्धान्तसूत्रम् । प्रसिद्धसाधर्म्यादित्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

(२) पूर्वपक्षी आह प्रत्यक्षेणाप्रत्यक्षसिद्धेः । इति धृत्वा व्याख्यावसरे नोपमानं पृथगिति सूत्रार्थ इत्याहुर्न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

(३) समाधिसूत्रम् । नाप्रत्यक्षे गवय इत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः । नाप्रत्यक्षे गवय इति त्वन्यत्र पाठः ।

तथा च साधर्म्यज्ञानाधीना या मितिस्तस्या उपमिनोमि नानुमिनोमीत्याद्यनुव्यवसायसिद्धाया विजातीयप्रमायाः करणत्वेनोपमानस्य मानान्तरत्वं सिद्धमिति भावः । अप्रत्यक्षेणेत्युक्त्या प्रत्यक्षासम्भवो दर्शितः ॥ ४६ ॥

अनुव्यवसाये विवदमानं प्रत्याह ।

तथेत्युपसंहारादुपमानसिद्धेर्नाविशेषः(१) ॥ ४७ ॥

अनुमानादुपमानस्य नाविशेषस्तथेत्युपसंहाराद् यथा गौस्तथा गवय इतिव्याप्तिज्ञाननिरपेक्षसाधर्म्यज्ञानादुपमानसिद्धेरुपमित्युत्पत्तेरित्यर्थः । तथा च व्याप्तिज्ञानपूर्वकत्वाभावेन तादृशप्रमाया नानुमितित्वमिति परिशेषादुपमितिः प्रमान्तरमिति भावः ॥ ४७ ॥

समाप्तमुपमानप्रामाण्यपरीक्षाप्रकरणम् ॥

अवसरसङ्गत्या क्रमप्राप्तं शब्दं प्रमाणत्वेन परीक्षयितुमाह ।

शब्दोऽनुमानमर्थस्यानुपलब्धेरनुमेयत्वात्(२) ॥ ४८ ॥

शब्दो ज्ञातशब्दः शब्दज्ञानं वा । अनुमानमनुमितिकरणम् । तदर्थस्यानुपलब्धेरनुमेयत्वात् प्रत्यक्षाविषयत्वे सति ज्ञेयत्वेन हेतुनानुमेयत्वादित्यर्थः । एवं च प्रत्यक्षोपमित्यकरणत्वे सति ज्ञानकरणत्वमेवानुमानत्वसाधकहेतुरिति तात्पर्यम् । शब्दः शब्दाधीनं ज्ञानमनुमानमनुमितिः अर्थस्य तदर्थस्यानुपलब्धेरप्रत्यक्षत्वाद्धेतोरनुमेयत्वात् । तथा

(१) अनुमानवैधर्म्यप्रदर्शनाय सूत्रम् । तथेत्युपसंहारादित्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

(२) इतश्चानुमानं शब्दोऽर्थस्यानुपलब्धेः । प्रत्यक्षेणानुपलभ्यमानार्थविषयत्वादिति सूत्रार्थ इति वार्त्तिकम् । पूर्वपक्षसूत्रम् । शब्दोऽनुमानमित्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

चाप्रत्यक्षविषयकत्वं प्रत्यक्षान्यत्वं वानुमितित्वसाधकं लिङ्गमिति भावः ॥ ४८ ॥

नन्विदमप्रयोजकमित्यत आह ।

उपलब्धेरद्विप्रवृत्तिकत्वात्(१) ॥ ४९ ॥

उपलब्धेः शब्दाधीनज्ञानस्य । अद्विप्रवृत्तिकत्वादनुमितिकरणलिङ्गज्ञानातिरिक्ताकरणकत्वात् । तथा चातिरिक्तकार्यकारणभावसत्त्व एव तज्जन्यतावच्छेदकतया शाब्दत्वजातिसिद्धिः स्यात् स एव नास्ति प्रत्युत व्याप्त्यवच्छिन्नशब्दज्ञानजन्यतयानुमितित्वं तत्रास्तीति भावः ॥ ४९ ॥

ननु शब्दस्यार्थव्याप्यत्व एवानुमापकत्वं तदेव नास्तीत्यत आह ।

सम्बन्धाच्चेति(२) ॥ ५० ॥

सम्बन्धाद् व्याप्तिसम्बन्धात् । इत्थं चार्थव्याप्यतया गृहीतशब्दादेव बोधो जायते न त्वन्यथा स च बोधोऽनुमितिरेव तत्सामग्रीनियम्यत्वादिति भावः ॥५०॥

समाधत्ते ।

आप्तोपदेशसामर्थ्याच्छब्दादर्थे सम्प्रत्ययः(३) ॥ ५१ ॥

(१) हेत्वन्तरम् । उपलब्धेरद्विप्रवृत्तित्वादिति धृत्वा व्याख्याशेषे इति सूत्रार्थ इति लिखितं न्यायतत्त्वालोके वाचस्पतिमिश्रैः । अन्यत्राद्विप्रवृत्तित्वादिति पाठः ।

(२) अर्द्धेतिरहितः सूत्रपाठोऽन्यत्र । सम्बन्धाच्च । सम्बद्धार्थप्रतिपादकत्वाच्चेति सूत्रार्थ इति वार्त्तिकम् । न्यायतत्त्वालोके ऽपि एतत्सूत्रव्याख्यावसाने इति सूत्रार्थ इति लिखितं वाचस्पतिमिश्रैः ।

(३) प्रत्यायनाङ्गान्वयव्यतिरेकज्ञानं तु अन्यादृशं शब्दे ऽन्यादृशं त्वनुमाने तद्धि पक्षधर्मतापेक्षमनुमाने शब्दे तु तदनपेक्षमित्यत्र सूत्रं भवति । आप्तो-यः । इति तात्पर्यटीका । सिद्धान्तसूत्रम् । आप्तोपदेशेत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः । आप्तोपदेशसामर्थ्याच्छब्दादर्थे सम्प्रत्यय इति सूत्रस्यायमर्थ इति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः । आप्तोपदेशसामर्थ्याच्छब्दार्थसम्प्रत्यय इति क्वचित् शब्दादर्थसम्प्रत्यय इति च क्वचित् पाठः ।

वेशादिना ऽतीताशेषजन्मजं पापं
ति ।

अतीताशेषजन्मजपापलयोपगमे
ष्टा दशहरातिथौ । दशजन्मार्जितैः
शय इत्यादीनि वचनानि निर्विषयाणि
ापनाशात् । अतः प्रवेशादेतज्जन्मज-
त्लिङ्गादिदर्शनादिना तु प्राग्जन्मीय-
यन्ते ।

न्मान्तरसहस्रेष्वित्यादिप्रागुदाहृतैः प्रवेशा-
मजपापध्वंसबोधकवचोभिर्विरोधापत्तेस्त-
ा पापादिशब्दलक्षिताः पापवासना अने-
यन्ते प्रवेशात्त्वशेषपापनाश एव न च वास-
ते काशीप्रविष्टानां प्रवृत्यभावापत्तेरित्यन्ये ।
यः । पापस्य द्वे शक्ती । एष एवासाधु कर्म
यमेभ्यो ऽधो निनीषत इति श्रुतिसिद्धनरक-
िका प्रथमा पापः पापेन कर्मणेति श्रुतिसि-
च्छेदिका द्वितीया । तत्र सर्वेषां पापा-
शादिना नाश्यते । द्वितीया तु वास-
नादिना तत्तन्माहात्म्योक्तक्रमे-

 पापादिशब्द शक्तिलक्षणापत्तिः
ात्वापत्तिश्च दोषः । वासनानाशे च
पे प्रवृत्त्यनुपपत्तिः न च ततः प्राची-
 तदुपपत्तिः । कृत्तिवासविश्वेशा-
वंसोक्तेः । तद्वचनस्याखिलवासना-
वृत्त्यनुपपत्तेर्दुष्परिहरत्वात् । अतः प्रवे-

शादखिलमेव पापं नश्यति काशी
एकद्वयादिजन्मजपापक्षयोक्तिस्तु ये
तिशयेन काश्यां जातास्तद्विषयेति
च तेषामपि लिङ्गदेहस्य क्षेत्रप्रविष्टत
शङ्क्यम् । षाष्ठतिर्यगधिकरणन्यायात्
मनुष्याणामधिक्रिया अतः पशुपिशाच
मता इति पाद्माच्च मनुष्याधिकारित्वा
पापनाशायोगात् । या तु पिशाचमोच
स्यापि तत्स्नानात्पैशाच्यनाशोक्तिः सा
वद्यावद्वचनं वाचनिकमिति न्यायात्तन्म
च लिङ्गस्य काशीप्रवेशात्पापनाशे वचो ऽस्ति
त्पन्नविषयाणि तत्तल्लिङ्गदर्शनादिनैकद्वय
बोधकानि वचांसीत्याहुः ।

अपरे तु काशीस्मरणगमनदर्शनतत्तत्
ल्लिङ्गदर्शनादीनां नियतक्रमाणां फलावैलक्षण्ये
नर्थक्यापातात् प्रत्येकं सर्वपापनाशश्रवणाश्र
वैलक्षण्याभावे कायिकवाचिकमानस
सकृदावृत्तात्यन्तावृत्तमहापातकोपपात
तवैलक्षण्यासंभवात् पापे च सर्व
व्यवच्छेदेनैव संकुचद्वृत्त्या ...
दर्शपूर्णमासौ सर्वेभ्यः ...तुर्मास्य
नादौ प्रत्येकमशेष...पक्षये ऽपि न
तथा च प्रवेशाद्यज्जातीयाशेषपापं
द्वयादिजन्मीयं तत्तत्तीर्थस्नानादिना

काशीप्रवेशेन कायिकादिभेद
सवासनानां सर्वेषां पापानां निवृत्ति
काशीस्थानां पापे प्रवृत्तिर्न स्यात् । प्र

तवत्पापप्रवृत्तेरपि संभवात्। तत्तत्तीर्थस्नानादिनैकद्धा-
जन्मीयपापनाशबोधकं तु शास्त्रं यावता पुण्येन तन्न-
रति तावत्पुण्योदयपरम्। यद्वा यथा काश्यां कृतमल्प-
पि पुण्यं बहु भवति तथा पापमपीति स्पष्टं पुराणादौ।
था च काश्यां कृतं यावत्पापमेकद्ध्यादिजन्मीयसमं भवति
त्तीर्थस्नानादिना तावन्नश्यतीत्यर्थकं तच्छास्त्रम्। स्मर-
गमनत्तेत्रविश्वेशकृत्तिवासेशदर्शनादिना सर्वपापनाश-
ाधकशास्त्रस्याप्येषैव गतिः। यत्तु तत्र ब्रह्मेश्वरं दृष्ट्वा
ह्मलोके महीयत इति ब्रह्मलोकादिफलं यच्च क चिन्मु-
त्यादिफलं तदपि यात्रां कृत्वा देशान्तरमृतविषयम्।

ननु काशीप्रवेशात्प्रवेशावधिकाशेषपापत्तये कृत-
शीयात्रस्याकृतकाश्यघस्य बहिर्गमनानन्तरमेव मरणे
ायस्वर्गोपपत्तिः केवलपुण्येन मर्त्यत्वासंभवात्। न च
यान्तं यावत्स्वर्गभोगानन्तरं मुक्तिरेव तस्येति युक्तम्।
श्रवणादिजन्यज्ञानाभावे तदयोगादिति चेन्न। तस्यापि
मार्गस्थजन्तुमरणादिजन्याज्ञातपापोपपत्तेः ... त्याघ्रादि-
भिर्हनने दुर्मृत्युजपापसंभवात् दुष्टेनारब्धकर्मणाऽन्ते
दुष्टमतिसंभवेनान्ते या मतिः सा गतिरिति न्याये-
नापि मर्त्यजन्मसंभवात्। अन्येषामभावेऽप्यविमुक्तमेव
निषेवेताविमुक्तं न विमुञ्चेदित्यविमुक्ते प्रविष्टस्य तत्र
मरणान्तवासविधिवत्त्यागनिषेधातिक्रमप्रयुक्तपापस्याव-
श्यकत्वाच्च। परं तु तस्योदयः देहत्तयश्चात्रैव भवतीत्य-
न्यदेतत्। अतः काशीप्रवेशादशेषपापलयेऽपि न का चि-
दनुपपत्तिरिति तु नवीनतमाः।

अत्र परीत्तकैर्विचार्य युक्तः पत्तो ग्राह्यः। आरब्धानां
च भोगेन नाशे शुद्धचित्तो जीवो गौरीशानुग्रहाच्छमादि-

साधनसंपत्तिं लभते स्वयं च जद्गुरुः स परमकृपया ब्र
ह्मात्मैक्यबोधसाधनं तारकमुपदिशतीति न श्रवणस्या
ज्ञानं प्रति व्यभिचारः । तथा च जाबालोपनिषद्याम्नाय
अविमुक्तं वै देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनम्
अत्र हि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्या
चष्टे येनामृती भूत्वा मोक्षी भवतीत्यादि । स्मर्यते च पुरा
णेषु तत्र तावत्कौर्मे । यत्र साक्षान्महादेवो देहान्ते स्व
यमीश्वरः । आचष्टे तारकं ब्रह्म तदेवमतिमुक्तदम् । काशी
खण्डे च । ब्रह्मज्ञानेन मुच्यन्ते नान्यथा जन्तवः क्वचित्
ब्रह्मज्ञानं तदेवाहं काशीसंस्थितिभागिनाम् । दिशामि ता
रकं प्रान्ते मुच्यन्ते ते तु तत्क्षणात् । पाद्मे ऽपि निर्वा
पदमेवैतद्यदधिष्ठामि नित्यशः । म्रियमाणस्य जन्तो
वाक्यं कर्णे समुच्चरन् । विना वाक्योपदेशेन ब्रह्मात्मैक्यं
भासते । ब्रह्मात्मैकत्वविज्ञानादृतेमुक्तिर्न जायते । ए
मन्यत्रापि । तारकं किमिति चेत्प्रणव इत्यवेहि । तदुक्त
काशीखण्डे । न वर्ण्यते कैः किल काशिकेयं जन्तोः स्थित-
... पक्वेलिमैः प्राक्तनपुण्यभारैरोंकार-
मोंकारयतीन्दुमौलिः अन्यत्रापि प्रणवं तारकं ब्रूते काश्यां
देवो महेश्वरः ।

ननु प्रणवेन कथं ब्रह्मात्मैक्यबोधः । शृणु अकारो-
कारमकारवाच्यान्विश्ववैश्वानरतैजससूत्रात्मप्राज्ञेश्वरा
ज्ञात्वा प्रथमं विश्वं वैश्वानरत्वेनाहमेव वैश्वानरो ऽस्मी
विभाव्य ततस्तैजसं सूत्रात्मत्वेनाहमेव सूत्रात्मा ऽस्मीति
विभाव्य पश्चात्प्राज्ञमीश्वरत्वेनाहमेवेश्वरो ऽस्मीति विभा-
व्यानन्तरं समष्टिव्यष्टिस्थूलसूक्ष्मकारणोपाधिकमोंकारवा-
च्यं परं ब्रह्माहमस्मीति सर्वात्मत्वेन विभाव्य पश्चान्मन-
स्येकाग्रतामापन्ने स्थूलसूक्ष्मादि सर्वं जगत्सोपानावरोहण-

न्यायोक्तक्रमेण निर्विशेषे ब्रह्मणि विलाप्यैकाग्रेण मनसा स्वस्य ब्रह्मत्वं साक्षात्करोतीति।

यद्वा तयोः ऽहं सो ऽसौ योऽसौ सो ऽहमित्यत्र सशब्देन परमात्मोच्यते। अहंशब्देन प्रत्यगात्मा ऽवगम्यते। ततश्च समानाधिकरणयोः सो ऽहमित्यनयोः परमात्मा ऽहमित्यर्थस्तथा प्रणवस्यापि। सो ऽहमित्यस्यैव प्रणवत्वेन [illegible] तथा हि। सो ऽहमित्यस्य पृषोदरादित्वेन निपातनात्सकारहकारलोपे कृते परिशिष्टयोरोऽमित्यनयोरेङः पदान्तादतीति पूर्वरूपैकादेशात्मकं संधिं कृत्वोच्चारणे ओमिति शब्दो निष्पन्नः तदुक्तम्। सकारं च हकारं च लोपयित्वा प्रयोजयेत्। संधिं च पूर्वरूपाख्यं ततो ऽसौ प्रणवो भवेदिति। एवं चोमित्यस्य परमात्मा ऽहमित्यर्थ इति सिद्धम्।

अत्र कश्चिदाह। काश्यादिकक्षाभेदेन चतुर्विधे क्षेत्रे मणिकर्ण्यां जाह्नव्युदके भूमौ विश्वेशाभिमुख्येन कालतो.. मृतस्य द्विजमात्रस्य भैरवयातनादिजनकपापहीनस्य विश्वेशभक्तस्य काशीमरणान्मुक्तिर्भवति न वेति संशयरहितस्य सद्यः परब्रह्मसायुज्यं भवति द्विजेतरस्यापापस्य नरमात्रस्य द्विजस्यापि कस्य चिदपापत्वे ऽपि विश्वेशाभक्तस्य तद्भक्तत्वे ऽप्यपापत्वे ऽप्युक्तप्रकारात्प्रकारान्तरेण मृतस्य चतुर्विधे क्षेत्रे यत्र क्वापि मरणे क्षेत्रावान्तरभेदतारतम्येन जीवतारतम्येन मरणस्य बुद्धिपूर्वकत्वाबुद्धिपूर्वकत्वप्रयुक्ततारतम्येन कर्मादितारतम्येन च सालोक्यादिप्रसिद्धारा कैवल्यं भवति। पापिनस्तु नरमात्रस्य चतुर्विधे ऽत्र क्षेत्रे यत्र क्वापि येन केनापि प्रकारेण मृतस्य भैरवयातनानुभवानन्तरं मोक्षः। नन्वत्र हि जन्तोः प्राणेषूत्क्रम-

माणेष्विति जन्तुमात्रस्य श्रवणात्कथं त्रैवर्णिकस्यैव सायुज्यमिति चेन्न रुद्रस्तारकं ब्रह्म व्याचष्टइत्यनेनैकवाक्यतया प्रणवाख्यतारकव्याख्याने योग्यत्रैवर्णिकमात्रपरत्वाज्जन्तुपदस्य । अथोत्क्रान्त्यनन्तरं देहाभिमानाभावाज्जन्तुमात्रस्य प्रणवाधिकार उपपद्यत इति चेन्न उत्क्रममाणेष्विति वर्त्तमानप्रत्ययदर्शनेनोत्क्रमदशायामेवोपदेशस्वीकारात् उत्क्रमानन्तरमदेहस्योपदेशायोगाच्च । कर्णमूलगतो हर इत्यादिवचनविरोधाच्च विदेहस्य कर्णाभावात् । एवं पुराणगतजन्तुशब्दस्यापि त्रैवर्णिकमात्रपरतैव । तस्मात्काष्ठपाषाणभूतस्तु जान्हवीजलमध्यगः अविमुक्तोन्मुखस्तस्य कर्णमूलगतो हर इति वचनात् । मुमूर्षोर्मणिकर्ण्यन्तरर्द्धोदकनिवासिन इत्युक्तेश्चार्द्धजले मणिकर्ण्यां विश्वेशाभिमुखस्य । कालेनोपरतो यातीत्युक्तेः आत्मरक्षा ऽत्र कर्त्तव्या महाश्रेयोऽभिवृद्धये । अत्रात्मत्यजनोपायं मनसापि न चिन्तयेदिति वचनाच्च कालान्न तु बलात् । अविमुक्तइत्यादि[illegible]नां त्रैवर्णिका[illegible]पापत्वाद् द्विजत्वाच्च तदैव तारकोपदेशयोग्यानां मद्भक्ताः कृतनिश्चय इत्युक्तेर्विश्वेशभक्तानां काशीमरणं मोक्षदं वेति संदेहशून्यानां च विश्वगुरुश्रीविश्वेशोपदिष्टतारकोदितब्रह्मबोधात्सद्यस्तत्सायुज्यं भवतीति सिद्धम् ।

ननु ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा ये वर्णसंस्थिताः । स्त्रियो म्लेच्छाश्च ये चान्ये संकीर्णा वर्णजातयः । कीटाः पिपीलिकाश्चैव ये चान्ये पक्षिणस्तथा । कालेन निधनं प्राप्ता अविमुक्ते वरानने । चन्द्रार्द्धमौलयस्त्र्यक्षा महावृषभवाहनाः । शैवे मम पुरे देवि जायन्ते तत्र मानवाः मानवा इति ब्राह्मणश्रमणन्यायेन ये भक्ता वरदं देवमविमुक्तं परं पदम् । ते विशन्ति महादेवमाज्याहुति-

रिवानलम्। अकामो वा सकामो वा तिर्यग्योनिगतो ऽपि वा। अविमुक्ते त्यजन्प्राणान्मम लोके महीयते। गृहस्थाश्चैव यतयस्तस्मिंस्तीर्थउपासकाः। एकदण्डास्त्रिदण्डाश्च हंसव्रतधराश्चये। कर्मभेदेन तेषां तु सर्वेषामास्थितो ह्यहम्। विभजामि परं स्थानं यच्छन्मोक्षपदं शुभमित्यादिनानापुराणवचनैः काश्यां मृतानां क्षेत्रावान्तरभेदतारतम्यात्सारूप्यादिसंभवे ऽपि विदेहकैवल्यं कथं स्यादिति चेदुच्यते। तदुपर्यपि हि बादरायणः संभवादिति व्याससूत्राद्देवानामपि ब्रह्मविद्याधिकारे सिद्धे ते विशन्ति महादेवमित्यादिवचनशतेभ्यः शिवलोकं गतानां महेशात्तत्त्वावबोधलाभे कैवल्यं भवतीति।

अन्यस्त्वाह यद्यपि पुराणेषु सारूप्याद्यविशेषेण मोक्षो मरणफलतया ऽवगम्यते तथा ऽप्यधिकारितारतम्येन निष्पापानामीशार्पितकर्मणां मरणादेव मुक्तिः। ततो निष्ठानामग्निप्रवेशादिकृतां शंभुसामीप्यम्। न चात्र निषद्धेच्छया मरणात्कथमीशसामीप्यम्। अग्निप्रवेशं ये कुर्युरविमुक्ते विधानतः। प्रविशन्ति मुखं ते मे निःसंदिग्धं वरानने। कुर्वन्त्यनशनं ये तु मद्भक्ताः कृतनिश्चयाः। न तेषां पुनरावृत्तिः कल्पकोटिशतैरपीत्यादिमात्स्यादिवचनैरग्निप्रवशप्रायोपवेशयोरभ्यनुज्ञानेन निषेधस्येतो ऽन्यत्र संकोचात्। तिर्यक्प्रभृतीनामत्यन्तं पापीयसां च सारूप्यम्। ततो ऽप्यधमानां सालोक्यमिति। किं च चतुर्विधे क्षेत्रे यथा यथा योगपीठाद्विप्रकर्षस्तथा तथा मरणफलापकर्ष इत्यप्याह। तदपरे न क्षमन्ते। तमेव विदित्वेत्यादिश्रुतिविरोधान्मरणान्मोक्षायोगात्। ननु मरणादेव मोक्षबोधकनानापुराणबलात्तमेवेति श्रुतिरन्यत्र सावकाशेति चेन्मैवम्। पुराणेन वेदसंकोचायोगात्। काशीमरणस्य

जाबालोपनिषदा तारकोपदेशद्वारा ज्ञानजनकत्वबोधना-
चेति । यश्चाह काशीमरणस्य चित्तशुद्धावुपयोगः । वारा-
णसीस्थतीर्थानामवगाहनतः पराम् । अन्तःकरणसंशुद्धि-
मामुयाद्विजितेन्द्रिय इत्यादिवाक्यैस्तस्याः पूर्वमेव सिद्ध-
त्वात् । किं तु बोधद्वारा मुक्तावेव । यो ऽपि प्रथमः पक्षः ।
मूमूर्षोर्मणिकर्ण्यन्तरङ्गोदकनिवासिन इत्यादिपूर्वोक्तवि
शेषणवतस्त्रैवर्णिकस्यैव साक्षात्कैवल्यमन्यस्य तूक्तसालो-
क्यादिद्वारेति । सो ऽप्ययुक्तः । जन्त्वादिसाधारणपदश्र-
वणात् । तथा हि अत्र हि जन्तोः प्राणेषूत्क्रममाणेष्वित्या-
दिश्रुतौ कीटाः पतङ्गा मशकाश्च वृक्षा जले स्थले वा विच-
रन्ति मर्त्याः मण्डूकमत्स्याः कृमयो ऽपि काश्यां त्यक्त्वा
शरीरं शिवमाप्नुवन्ति अविमुक्तरहस्यज्ञा मुच्यन्ते ज्ञानिन..
नराः । अज्ञानिनो ऽपि मुच्यन्ते क्षेत्रे ऽस्मिंस्ते त्वकल्मषाः ।
सर्वान् जन्तून्मोचयेदन्तकाले विश्वेशो ऽत्र श्रोत्रमन्त्रोपदे-
शात् । आब्रह्मस्तम्बपर्यंतं यत्किंचिज्जन्तुसंज्ञितम् । चत्
भूतग्रामेषु काश्यां तन्मुक्तिमाप्स्यतीत्यादि काशीखण्
एवमन्येष्वपि श्रुतिस्मृतिपुराणादिषु जीवसामान्यपर
न्त्वादिपदश्रवणेन कृमिपर्यन्तानां साक्षाद्ग्रहणेन च जन्
पदस्य त्रैवर्णिकमात्रपरत्वकल्पनस्यानुचितत्वात् । प्रण
श्रवणे द्विजात्यतिरिक्तस्य कथमधिकार इति चेत्सत्यमस्म
दाद्युपदिष्टप्रणवश्रवणे तदितरस्यानधिकारः । अपारजन्म
र्जितपुण्यपुञ्जप्रसादितपरमेश्वरोपदिष्टप्रणवश्रवणे तु ...
माहात्म्यसोमपरमेश्वरसाक्षात्काराभ्यां ध्वस्ताशेषक...
षस्य प्राणिमात्रस्याधिकारः । अत एव ब्रह्मवैवर्त्ते तीर्था-
न्तरात्काश्या विशेष उक्तः । जितेन्द्रियाः पापविवर्जिताश्च
शान्ता महान्तो मधूसूदनाश्रयाः । अन्येषु तीर्थेषु हि मु
क्तिभाजो भवन्ति काश्यामपि को विशेष इति शिष्यप्रश्न

गुरुणोत्तरितम् विशेषं शृणु वक्ष्यामि काश्याः कथयतो मम । कृतानि साधनान्यत्र स्वल्पान्यपि महामते । भवन्ति काशीमाहात्म्यात्सिद्धान्येव न संशयः । अन्यत्र साधुसुकृतैः कृतैर्मुच्येत वा न वा । अत्र साधनवैकल्ये काशी पूर्णं प्रकल्पयेत् । तथा कलिकालस्त्वयं तीक्ष्णः क्व नयः क्व परात्मदृक् । काश्येव शरणं तेषां शुद्धिदा मलिनां नृणाम् । कलौ विनष्टव्रतधैर्यवीर्या गच्छन्तु काशीं परमार्थराशिम् । तथा ये वा द्विजाग्र्याः श्वपचाश्च निन्द्या ये चक्रवर्त्तिष्वपि धर्मरूपाः । ये वा दरिद्राः परिमार्त्तिभाजः समानरूपां गतिमाप्नुवन्ति । काशीखण्डे च संसारभयभीता ये ये बद्धाः कर्मबन्धनैः । येषां क्वापि गतिर्नास्ति तेषां वाराणसी गतिः । श्रुतिस्मृतिविहीना ये शौचाचारविवर्जिताः । येषामित्यादि पूर्ववत् तथा सौभाग्यभाग्यभूर्या वै विख्याता मणिकर्णिका । ददामि तस्यां सर्वस्वमग्रजायान्त्यजाय चेति । अत एव पाद्मे ऽधिकारसंपादनमुक्तम् । पुमांसं ...कलुषं शंकरस्तारकं वचः । श्रावयामास त्रिभिन्नसं...ध्याधिकृतिं परामिति । इदं चाधिकारसंपादनं नीचेष्वधिकारिष्वेव । जातिकर्मभ्यामुत्तमानां स्वत एवाधिकारसत्त्वेन संपादनानर्थक्यात् यतस्तत्रैवोक्तम् । गणयति न कथं चिच्छंकरः काशिकायां किमुत मम सुभक्तो ब्राह्मणः पुल्कसो वा । उपदिशति सदा ऽन्ते वाक्यमेकात्मनिष्ठं द्विजकुलनिरपेक्षो भाव्य तत्राधिकारमिति । यत्तु भूमौ मृतानामेव मुक्तिरिति । तदपि न । भूमौ जले ऽन्तरिक्षे वा यत्र क्वापि मृतो द्विजः ब्रह्मात्मैकत्वमाप्नोति काशीशक्तिमुपाहितः । सूच्यग्रमात्रमपि नास्ति ममास्पदे ऽस्मिन्स्थानं सुरेश्वरि मृतस्य न यत्र मुक्तिः भूमौ जले मध्यतो वा ऽन्तरिक्षे सर्पाग्निदस्युपविभिर्निहतस्य जन्तोरित्यादिव-

चनात् । अनेन दुर्मृत्युजदोषो ऽप्यत्र नास्तीत्युक्तम् । न चात्र कालकृतो ऽपि विशेषो ऽस्ति । उत्तरं दक्षिणं वा ऽपि अयनं न विचारयेत् । सर्वो ऽप्यस्य शुभः कालो ह्यविमुक्ते म्रियेत य इति काशीखण्डात् । तस्मात्सर्वस्यापि काश्यां यत्र क्वापि कथं चिन्मृतस्य मोक्ष इति सिद्धम् । क चिद्धि शिवशिवेत्युपदिशाम्यहमिति द्विरावृत्तः शिवशब्दस्तारकतयोक्तः रामतापनीये । मुमूर्षोर्दक्षिणे कर्णे यस्य कस्यापि वा स्वयम् । उपदेक्ष्यसि सन्मन्त्रं स मुक्तो भविता शिवेति । पाद्मे तु श्रीरामरामेति एतत्तारकमुच्यते इति श्रीशब्दपूर्वकस्त्रिरावृत्तो रामशब्दस्तारकतयोक्तः । अनेन षडक्षरमन्त्रोपलक्षणाच्छ्रीशब्दप्रयोगस्य भक्त्यतिशयार्थत्वान्न पाद्मतापनीययोर्भिन्नार्थत्वम् । तथा च प्रणवाधिकारिणां सर्वेषां प्रणवोपदेश एव तदनधिकारिषु शैवानां शिवमन्त्रोपदेशः । वैष्णवानां तु राममन्त्रोपदेशः शिवमद्वैतं चतुर्थं मन्यन्तइति श्रुतेः शिवेतिशब्दस्य रमन्ते योगिनो ऽस्मिन्निति निर्वचनेन रामशब्दस्यापि चा[illegible] यप्रत्यगभिन्नब्रह्मबोधकत्वान्न ताभ्यां मोक्षफलकतद्बोधा[illegible] नुपपत्तिशङ्कापीत्यपि के चित् । अस्मिन्मते ऽपि क्षुद्र[illegible] जन्तूनामधिकारोपपत्तिरीशाधीनैव । तेषां फलोन्मुखे[illegible] केन चिददृष्टेन कर्मणा क्षुद्रजन्मोपपत्तिः । अनादिभवसञ्चितासंख्यपुण्यैः काश्यां मरणे मुक्तिश्चेति बोध्यम् । यत्तु क चित्क्षेत्रभेदादधिकारिभेदाच्च सामीप्यादिफलकीर्त्तनम् । तन्निर्विषयमोक्षभीरूणां तन्माहात्म्यानभिज्ञानां सन्तोषार्थं ज्ञेयम् । काश्यां स्वर्गादिकमुद्दिश्य यागाद्यनुष्ठाता ऽपि वाटिकान्वेषणे प्रवृत्तश्चिन्तामणिं लब्धवानिति वासिष्ठोक्ताभाणकन्यायेन मोक्षमेव लभते । अत्र के चिदाहुः । स्वस्वधर्मनिरतस्यापापस्य सर्वस्याप्यनन्त-

रमेव मोक्षः। तद्विलक्षणस्य तु यातनातो ऽधिकारसंपादनेन। तदुक्तम्। स्वे स्वे कर्मणि निष्णातानुत्तमाधममध्यमान्। अधमानपि मार्गस्थान्नयामि परमां गतिम्। केवलं धर्मसापेक्षः कर्णे जपति तद्वचः। अधर्मिष्ठस्य तत्क्षेत्रे यातनान्ते दिशेन्मतिमित्यादीनि। अन्ये तु सर्वत्र तारकोपदेशे वर्त्तमानतानिर्देशात्। कर्णजापोक्तेश्च देहे सत्येवोपदेशो ज्ञानं च देहापाये तु कैवल्यमेव। तथा च धर्ममर्यादास्थापनार्थं भैरवयातनोक्ती रुद्ररोदनादिवदर्थवादः यदि तु सा प्रामाणिकी तदा प्रारब्धवज्ज्ञेया ज्ञानं तु तदैव भवतीति मन्यन्ते। ननु मृतिकाले कफाद्यवरुद्धकण्ठस्यौदर्यवाताभिघातेन विदीर्यमाणाशेषमर्मणो व्याकुलबाह्यान्तरिन्द्रियस्य प्रणवात्मकशब्दस्य श्रावणसाक्षात्कार एव दुर्लभः। [illegible] पि तस्मिंस्तदर्थो दुरवगमः तस्मिन्नपि [illegible] दान्तानां चाद्वितीये तात्पर्यनिर्धार[illegible] कस्य ताद[illegible]तात्पर्यविशिष्टशब्दज्ञाना[illegible] श्रवणस्य श्रुतस्यार्थस्य युक्तिभिरनु[illegible] [illegible]रीतभावनानिवृत्तिफलकप्रमेयतत्त्वावधारणानुकूलतर्कानुसंधानात्मकस्य वा मननस्यासंभवः। अत एवा[illegible]भावनाविपरीतभावनयोस्तत्त्वसाक्षात्कारप्रतिबन्धक[illegible]रभावे च शब्दप्रमाणादुत्पन्नो ऽपि ब्रह्मसाक्षात्कारः पुरुषापराधासंभावनादिप्रतिबद्धत्वान्नाविद्यानिवर्तनक्षमः। तदनिवृत्तौ च तन्मूलकसंसारानिवृत्तेः कथं मोक्षः तस्मात्काशीमरणान्मुक्तिप्रतिपादकवचनजातं तद्द्वारा विध्येकवाक्यतया तदर्थवाद एवेति चेन्मैवम्। वृन्दारकवृन्दवन्दितपादारविन्दोमासहायाचिन्त्यशक्त्यपरिमेयमहिमश्रीशङ्करकृपया श्रीकृष्णकृपया भीष्मस्य शरतल्पजवेदनानिवृत्तिवत्काश्यां मुमूर्षोः सकलवेदनानिवृत्त्या चित्तप्र-

सादकरणपाटवादिसंभवेन श्रवणादिसंभवात् । अत एव मात्स्ये अन्तकाले मनुष्याणां छिद्यमानेषु मर्मसु । वायुना प्रेर्यमाणानां स्मृतिर्नैवोपपद्यत इति क्षेत्रान्तरमरणप्रकारमुक्त्वा । अविमुक्ते त्वन्तकाले भक्तानामीश्वरः स्वयम् । कर्मभिः प्रेर्यमाणानां कर्णजापं प्रयच्छति । ईश्वरप्रेरितो याति दुष्प्रापमकृतात्मभिरिति तुशब्देन क्षेत्रान्तरापेक्षया विशेषो ऽभिहितः स च मरणकाले स्मृत्युपपत्तिरूप एव । गारुडे च । मरणावसरे सकलश्रमनिवृत्तिः सहेतुकोक्ता अनिलो मृगनाभिरेणुगन्धैरधिकाशि प्रणवोपदेशकाले । हरते मरणश्रमं नराणां हरवामाङ्कुचोत्तरीयजन्मेति ।

केचित्तु यथा स्वप्ने दृष्टेरेव सृष्टित्वेनेन्द्रियाणां चातीन्द्रियत्वेन तत्सृष्टेरभावे ऽपि श्रव[illegible]व्यवहारस्तथा जागरे ऽपि दीर्घस्वप्ने बाह्येन्द्रियाभा[illegible] श्रवणादिव्यवहार इति स्थिते ऽत्र मर[illegible] पेक्षामन्तरेण मनसैव श्रवणाद्युपपत्तौ काशीम[illegible] शुद्धस्य श्रीचन्द्रशेखरसाक्षात्कारान्नष्टाशेषसंताप[illegible] हाच्च सर्वविक्षेपापगमेन प्रत्यगभिन्नब्रह्मनिमग्नचित्तस्य अ[illegible] एव संजाततत्साक्षात्कारस्य क्षणेनैवासंभावनादेः समू[illegible] स्यात्यन्तिको बाध उपपद्यतएव । ननु दीर्घकालनैरन्तर्य[illegible] रैरनुष्ठितश्रवणमनननिदिध्यासनादिकं विना शोधिततत्त्वपदार्थसाक्षात्काराभावात् तादृशतत्पदार्थज्ञानासंभवाच्च न वाक्यार्थसाक्षात्कारोत्पत्तिः पदार्थबुद्धेर्वाक्यार्थबुद्धौ हेतुत्वादिति चेन्न । चिरत्वविशेषणवैयर्थ्यात् उत्तमाधिकारिषु शीघ्रमेव सवसंभवात् । न चावृत्तिरसकृदुपदेशादिति सूत्रविरोधः तस्य मध्यमाधमाधिकारिविषयत्वात् । न च काश्यां म्रियमाणानां सर्वेषां कथमुत्तमत्वमिति शङ्क्यम् ।

[अ]तः स्थावराणां कृम्यादीनां च तत्त्वावबोधाधिकारं संपादयितुर्विश्वेशस्य सर्वेषामुत्तमाधिकारित्वसंपादने न कश्चित् प्रयत्नः । स्मर्यते हि मार्कण्डेये परमेश्वरानुगृहीतमहर्षिवरप्रभावेन पक्षिणामुत्तमाधिकारित्वलाभेन बाल्यएवातिशीघ्रमेव तत्त्वसाक्षात्कारलाभः जैमिनिं प्रति पुराणवक्तृत्वं च । वासिष्ठे च श्रीसरस्वतीकरमकलस्पर्शप्रभावेण भुशुण्डप्रमुखानां काकानां तत्त्वसाक्षात्कारः तत्र भुशुण्डस्य श्रीवसिष्ठं प्रति वक्तृत्वं च स्मर्यते । एवं च परमेश्वरानुगृहीतानां किं किं न संभाव्यते । न चैवं श्रवणादेः साक्षात्कारं प्रति व्यभिचारः । भगवतीकृपया वामदेवादिवत्पूर्वजन्मश्रवणादिकमनुष्ठितमेव । तदुक्तं पाराशरीये । अत्रैव मरणं सम्यग्यस्य सिद्ध्यति देहिनः । विज्ञानसाधनं तेन सर्वं पूर्वमनुष्ठितमिति । तस्माच्छ्रीशंभुमुखचन्द्रनिःसृतप्र[ण]वामृतस्य [illegible] श्रोत्रेणु पानादेवाविद्याविषनिवृत्तिसिद्धेः [का]शीमरणा[त्]ान् मुक्तिरित्यादिवाक्यानां नार्थवादतेति [illegible] ।

[illegible]तेन मरणात्साधनचतुष्टयसंपत्तेः प्रायेणानुपलम्भा[न्न्]ायोपदेशोपगमे ऽथातो ब्रह्मजिज्ञासेतिसूत्रे ऽथश[ब्देन सा]धनचतुष्टयसंपत्त्यानन्तर्योक्तेः तत्संपन्नमेवाधिका[री]ति वेदान्तशास्त्रारम्भो न स्यात् तद्वतामपि श्रव[णादि]परिहारेण काशीमरणायैव प्रयासापत्तिश्चेति परा[स्त]म् । बहुजन्मार्जितपुण्यपुञ्जप्रसादितमेश्वरकृपया मरणा[त्पू]र्वएव साधनसंपत्तिस्वीकारात् । जीवदवस्थायामेव [सुलभ]ं मोक्षप्रदविज्ञानोपायं श्रवणादिकं हस्तगतं त्यक्त्वे[न्द्रियस]ंहितकामादिदशविघ्नवत्यां काश्यां मृतिकालिकवि[ज्ञानोप]ाय प्रवृत्त्यसंभवाच्च । कौर्मे उपायान्तरमभिधाय वसेद्वा [म]रणाद्विप्रो वाराणस्यां समाहित इति वदता महेश्वरे-

एव वाशब्दबलात्काश्या बहिर्विज्ञानसंपादनाशक्तस्यैव काशीवासावश्यकत्वाङ्गीकाराच्च। काश्यां शतवर्षजीविनामप्यन्ते प्रारब्धेन बहिर्मरणदर्शनाच्च शास्त्राधिकारिणां सर्वेषां सिद्धसुरासुरयक्षगन्धर्वकिन्नरनरादीनां कश्यां मातुमशक्यत्वाच्च काशीमरणस्य मोक्षं प्रति साक्षाद्धेतुत्वाभावात्तत्र कस्यापि मुमुक्षोः प्रवृत्तिर्न स्यादित्यपि न च शङ्क्यम्। परंपराहेतावपि प्रवृत्तिसंभवात्। अन्यथा मुमुक्षोः शास्त्रेऽपि प्रवृत्तिर्न स्यात्तथा चानिर्मोक्षप्रसङ्गः। न स्याच्च बुभुक्षोर्भोजनजन्यतृप्त्यर्थिनस्तण्डुलक्रयणादौ स्वर्गकामस्य स्वर्गसाधनयागसाधनपुरोडाशानुकूलव्रीहिक्रयणादौ च प्रवृत्तिरिति वैदिकलौकिकसर्वव्यवहारोच्छेदप्रसङ्गः। तस्मात्काशीमरणान्मुक्तिरिति श्रुत्या यद्यत्साधनमन्तरेण मुक्त्यनुपपत्तिस्तत्सर्वं संगृहीतं भवतीति युक्तमस्या वृद्धकुमारीवाक्यन्यायोदाहरणत्वम्। तथा [illegible]सिते सरिते यत्र संगते तत्राप्लुतासो [illegible]दिवमुत्पतन्ति ये वै त[illegible]न्वं [illegible] जन्त्यत्र धीरास्ते वै जनासो अमृतत्वं भजन्तइति वाक्यं दुष्कृतो ऽपि दुराचारो ब्रह्महत्यादिपातक[illegible] ध्यात्वा त्यजेद्देहं प्रयागे मुक्तिभाग्भवेदित्यादिपुराण[illegible] च यदन्तरेण मोक्षो ऽनुपपन्नस्तत्सर्वमनेन न्यायेन [illegible] यति। तत्र तावत्तमेव विदित्वेत्यादिश्रुतिविरो[illegible] ध्यायतो मुमुक्षोः प्रयागमरणावसरे तत्त्वज्ञानं भव[illegible] कल्प्यते। ज्ञानं प्रति श्रवणादेर्व्यभिचारवारणायाव्यव[illegible] तोत्तरत्वनिवेशप्रयुक्तगौरवनिरासाय च जन्मान्तरीय[illegible] वणादिस्मरणं वामदेवादिवत्कल्प्यते काश्यामिव प्र[illegible] ऽपि मृतिकालउपदेशो भवतीत्यश्रवणात्। तथा च प्र[illegible] गमाहात्म्ये विना ज्ञानेन मुच्यन्तइत्यादिवचनं तज्ज[illegible] नुष्ठितश्रवणादिजन्यज्ञानं विना न मुच्यन्तइत्यर्थपर[illegible]

नेयम् । चित्तशुद्धिस्तु क्षेत्रगमनदर्शनप्रवेशमुण्डनस्नानश्राद्धलिङ्गदर्शनादिभिर्भवतीति बोध्यम् तद्वचनानि ग्रन्थविस्तरभयान्नेह लिख्यन्ते । चित्तशुद्धौ च शमादयोऽपीशानुग्रहात्सिध्यन्तीति सर्वं पूर्ववज्ज्ञेयम् । इयांस्तु विशेषः यत्काश्यां मृतस्य जन्तुमात्रस्य मोक्षः प्रयागे तु स्वयं कालेन वा मृतस्य मुमुक्षोरेव मोक्षः । अन्येषां तु यत्प्राप्तीच्छया यो मृतस्तत्प्राप्तिरेव तस्य भवतीति । स च विशेषस्तिष्ठतु नाम उदाहृतश्रुत्यादेरेतन्न्यायोदाहरणत्वे तु न काऽपि क्षतिः । इति वृद्धकुमारीवाक्यन्या० । अयमेव कैश्चित् वृद्धकुमारीवरन्यायत्वेनोदाह्रियते ३४ । ७९ ।

अत्रापि प्रसङ्गात्पठितं न्यायत्रयम् । अन्ते या मतिः सा गतिरिति न्या० । ३५ । ८० ।

ब्राह्मणश्रमणन्या० । श्रमणो बौद्धयतिः यथा तस्याशास्त्रीयविधिना त्यक्तशिखासूत्रकक्षादेस्त्यक्तनित्यादिकर्मणश्चेदानीं ब्राह्मणत्वाभावेऽपि भूतपूर्वेण ब्राह्मणत्वेन निर्देशस्तथा शिवसारूप्यं प्राप्तानामपि प्राक्तनया मानवसंज्ञया निर्देश इत्युदाहरणसंगतिः । एवं विज्ञातारमरे केन विजानीयादिति मुक्तजीवपरतया वृद्धैर्विवृतायां श्रुतौ विज्ञातृत्वोक्तिर्निरुपाधिके तस्मिंस्तदसंभवादनेन न्यायेन भूतपूर्वगत्यैव संगच्छतइति बोध्यम् । ३६ । ८१ ।

यत्र तु भाविसंज्ञया निर्देशो यथा नारुद्रो वसेत्काश्यामित्यत्र तत्र सूत्रशाटिकान्यायावतारः । सूत्रस्य शाटिकां वापयतीत्यत्र यथा सूत्रावस्थायां भाविन्या शाटिकेति संज्ञया निर्देशस्तथा दार्ष्टान्तिकेऽपीति बोध्यम् । ३७ । ८२ ।

अत्राजातपुत्रनामोत्कीर्त्तनन्यायोऽप्यवतरति ३८ । ८३ ।

आभाणकन्या० । आभाणकं लौकिकी गाथा । न्यायो ऽयं तत्रैवाख्यातविषयः । ३९ । ८४ ।

कुमारीन्यायविषय एव जलानयनन्यायो ऽप्यवतरति तद्यथा जलमानीयतामित्युक्ते ऽचोदितमपि पात्रानयनं जलानयने ऽन्तर्भवति एवमिहापि बोध्यम् । ४० । ८५ ।

एतेनाग्न्यानयनन्यायो व्याख्यातः । ४१ । ८६ ।

इक्षुरसन्या० व्याख्यातोऽयम् । ४२ । ८७ ।

इक्षुविकारन्यायो ऽप्येतद्विषये प्रवर्त्तते । इक्षूणां विकारेष्वपि हि रसगुडशर्करासितासु मालिन्यापगमतारतम्यादेव विभिन्नरूपत्वं दृश्यते तथा सत्त्वादिष्वपीति बोध्यम् । ४३ । ८८ ।

व्रीहिबीजन्या० व्याख्यातः ४४ । ८९ ।

राजसं तामसं चेति न्यायः । ४५ । ९० ।

यः करुते स भुङ्क्ते इति न्यायश्च स्पष्टः ४६ । ९१

कीटभृङ्गन्या० । कीटो यथा भृङ्गेण गृहीतस्तद्भयात्तमभिध्यायंस्तत्स्वरूपतामेति तथा हरिहरौ प्रेम्णा ऽन्योन्यध्यानादन्योन्यात्मकतां प्राप्तावित्यर्थः । ४७ । ९२ ।

अश्मलोष्टन्या० । यथा तूलाद्यपेक्षयाऽतिकठिनस्यापि लोष्टस्याश्मापेक्षया मृदुत्वं तथा प्रकृते ऽपीत्यर्थः ४८ । ९३ ।

अयं वैषम्याधिक्यविवक्षायां स्वल्पवैषम्यविवक्षायां तु पाषाणेष्टिकान्या० । ४९ । ९४ ।

बिल्वखल्वाटन्या० । अयं केन चित्पद्येन निबद्धः । तद्यथा । खल्वाटो दिवसेश्वरस्य किरणैः संतापितो मस्तके वाञ्छन्देशमनातपं विधिवशाद्बिल्वस्य मूलं गतः । तत्रा-

व्यासार्धात् कर्णगुणाद्वित्रिभच्छायाकर्णगुणात् तस्माद्वसुवेद-४८ भाजिताद्यत् फलं तेन विभक्ता भास्करवित्रिभलग्नान्तरज्या फलं वा लम्बननाड्यः स्युः ।

अत्रोपपत्तिः । पूर्वविधिना लम्बननाड्यः= $\frac{\text{४ ज्या (र} \sim \text{वि)}}{\text{त्रि}} \cdot \frac{\text{विशं}}{\text{त्रि}}$

$$= \frac{\text{४} \times \text{१२ ज्या (र} \sim \text{वि)}}{\frac{\text{१२ त्रि}}{\text{विशं}} \cdot \text{त्रि}} = \frac{\text{४८ ज्या (र} \sim \text{वि)}}{\text{विछाक} \cdot \text{त्रि}} = \frac{\text{ज्या (र} \sim \text{वि)}}{\frac{\text{विछाक} \cdot \text{त्रि}}{\text{४८}}}.$$

अत उपपन्नम् ॥ ६ ॥

इदानीं स्पष्टदर्शान्ते रविशशिपातानां चालनान्याह ।

रविशशिपातगतिकला लम्बनघटिकागुणा हृताः षष्ट्या ।
यदि लम्बनमृणमूना धनमधिकाः स्वफललिप्ताभिः ॥ ७ ॥

स्पष्टार्थाऽऽर्या ॥ ७ ॥

इदानीं वित्रिभनतांशदिक्साधनमाह ।

अक्षज्याया वित्रिभलग्नात् स्वक्रान्तिरुत्तराऽर्कस्य ।
इन्दोर्वा यद्यधिकाऽवनतिः सौम्याऽन्यथा याम्या ॥ ८ ॥

वित्रिभलग्नाद्या स्वक्रान्तिरर्थाद्वित्रिभक्रान्तिज्योत्तरा सा यद्यक्षज्याया अधिका तदाऽर्कस्य वा चन्द्रस्यावनतिर्वित्रिभनतज्या सौम्या ज्ञेयाऽन्यथा सदा याम्या ज्ञेया ।

अत्रोपपत्तिः । 'सौम्येऽपमे वित्रिभजेऽधिकेऽक्षा'दित्यादिभास्करविधिना स्फुटा ॥ ८ ॥

इदानीं रविचन्द्रयोर्दृग्गतिसाधनमाह ।

वित्रिभलग्नादुत्तरदक्षिणविक्षेपहीनसंयुक्तम् ।
शङ्कुधनुरुत्तरायामधिकोनं दक्षिणावनतौ ॥ ९ ॥
तज्ज्येन्दुशङ्कुराद्यः सवितुर्दृक्क्षेपमण्डले युक्ते ।
अपमण्डलेन भानोश्चन्द्रस्य विमण्डलेन युते ॥ १० ॥

उत्तरायां वित्रिभावनतौ वित्रिभलग्नाद्य उत्तरो वा दक्षिणो विक्षेपस्तेन शङ्कुधनुर्वित्रिभलग्नशङ्कुचापं क्रमेण हीनं संयुक्तं च कार्यम् ।

दक्षिणावनतौ च तदेव शङ्कुचापमुत्तरेण विक्षेपेणाधिकं दक्षिणेनोनं कार्यम् । एवं संस्कृतं चापं यत् तज्ज्या इन्दोः शङ्कुरर्थाच्चन्द्रस्य वित्रिभशङ्कुर्दृग्गतिरित्यर्थः । सवितुः सूर्यस्याद्यः पूर्वसाधितो वित्रिभशङ्कुरेव दृग्गतिरिति ।

दृक्क्षेपमण्डले वित्रिभलग्नदृङ्मण्डलेऽपमण्डलेन युक्ते भानोर्दृग्गतिर्विमण्डलेन युते चन्द्रस्य दृग्गतिरिति । अत्रैतदुक्तं भवति । दृक्क्षेपमण्डलं यत्र क्रान्तिमण्डले लग्नं तस्य विन्दोर्वित्रिभलग्नस्य शङ्कुः सूर्यस्य दृग्गतिः । तदेव दृक्क्षेपमण्डलं यत्र चन्द्रविमण्डले लग्नं तस्य विन्दोः शङ्कुश्चन्द्रस्य दृग्गतिः ।

अत्रोपपत्तिः । क्रान्तिवृत्ते यत्र दृक्क्षेपमण्डलं लग्नं तस्माद्विमण्डलावधि दृक्क्षेपमण्डले चापांशाः स्वल्पान्तराद्वित्रिभलग्नशरसमाः । अत उत्तरायां वित्रिभावनतावुत्तरे वित्रिभशरे द्वयोर्योगेन दृक्क्षेपमण्डले खार्धाद्विमण्डलावधि चापांशाश्चन्द्रदृक्क्षेपचापांशाः = विन + विश । एते नवतेश्च्युताश्चन्द्रदृग्गतिचापांशाः = ९० − विन − विश = विशंचा − विश । एवं दक्षिणे वित्रिभशरे चन्द्रदृक्क्षेपचापांशाः = विन − विश । दृग्गतिः = ९० − विन + विश = विशंचा + विश । दक्षिणावनतौ च विपरीतसंस्कारः स्फुटः । अत उपपन्नं चन्द्रदृग्गतिसाधनम् । दृक्क्षेपमण्डलं क्रान्तिवृत्ते लम्बरूपं न विमण्डले । अतश्चन्द्रदृक्क्षेपतो या चन्द्रनतिः सा न कदम्बप्रोतेऽतस्तत्संस्कारेण न स्फुटा नतिरिति सिद्धान्तविदां स्फुटमेव । भास्करेणापि प्रथममेतन्मतानुसारेण 'दृग्ज्यैव या वित्रिभलग्नशङ्को'रित्यादिविधिना चन्द्रदृक्क्षेपं प्रसाध्य तद्वशात् स्फुटां नतिं कृत्वा पश्चात् सूर्यग्रहणाधिकारान्ते 'शशिदृक्क्षेपार्थं यद्वित्रिभलग्नेषुणाऽत्र संस्करणम्'—इत्यादिनेदमानयनं खण्डितम् ॥ ९–१० ॥

इदानीं स्पष्टां नतिमाह ।

त्रिज्यावर्गावूनौ स्वशङ्कुवर्गेण तत्पदे दृग्ज्ये ।
रविशशिमध्यगतिगुणे तिथिगुणितव्यासदलभक्ते ॥ ११ ॥

तच्छायागुणिते वा मध्यगती तिथिगुणस्वकर्णहृते ।
फलयोर्दिक्साम्येऽन्तरमवनतिरैक्यं दिगन्यत्वे ॥ १२ ॥

दृग्ज्ये रविचन्द्रयोर्दृक्क्षेपौ स्वस्वमध्यगतिगुणे तिथिगुणितत्र्या-सदलेन पञ्चदशगुणितत्रिज्यया भक्ते हृते पृथक् पृथक् रविचन्द्रयोर्नती भवतः। वा तयोर्मध्यगती तयोर्दृक्क्षेपसमदृग्ज्ययोर्ये छाये ताभ्यां गुणिते तिथिगुणस्वस्वच्छायाकर्णहृते तयोर्नती भवतः । शेषं स्पष्टार्थम् ।

अत्रोपपत्तिः । प्रथमानयनस्य 'दृक्क्षेप इन्दोर्निजमध्यभुक्तितिथ्यंशनिघ्ना'वित्यादिभास्करविधिना स्फुटा ।

$$\text{प्रथमप्रकारेण नतिः} = \frac{\text{दृक्षे} \cdot \text{मग}}{\text{१५ त्रि}} = \frac{\frac{\text{१२ दृक्षे}}{\text{विश}} \times \text{मग}}{\text{१५} \times \frac{\text{१२ त्रि}}{\text{विश}}} = \frac{\text{विछा} \cdot \text{मग}}{\text{१५. विछाक}}\text{।}$$

अनेन द्वितीयः प्रकार उपपद्यते । तयोर्नत्योर्दिक्साम्येऽन्तरं दिग्भेदे चैक्यं लम्बितरवेर्लम्बितचन्द्रस्य दक्षिणोत्तरमन्तरमवनतिसंज्ञं गोलविदां स्फुटम् ॥ ११–१२ ॥

इदानीं स्फुटशरसाधनं स्थित्यर्धसाधनं चाह ।

संयोगान्तरमवनतिशशाङ्कविक्षेपयोः समान्यदिशोः ।
स्फुटविक्षेपः शशिवत् स्थित्यर्धविमर्ददलनाड्यः ॥ १३ ॥

स्पष्टार्थमुपपत्तिश्च 'स्पष्टोऽत्र बाणो नतिसंस्कृतोऽस्मा'दित्यादि-भास्करविधिना स्फुटा ॥ १३ ॥

इदानीं स्फुटस्थितिविमर्दार्धसाधनमाह ।

प्राग्वल्लम्बनमसकृत् तिथ्यन्तात् स्थितिदलेन हीनयुतात् ।
अधिकोनं तन्मध्यादृणयोरूनाधिकं धनयोः १४ ॥
यद्यधिकं स्थित्यर्धं तदान्तरेणान्यथोनमृणमेकम् ।
अन्यद्धनं तदैक्येनाधिकमेवं विमर्दार्धे ॥ १५ ॥

तिथ्यन्तात् स्पष्टदर्शान्तात् चन्द्रग्रहणवदागतेन स्थितिदलेन हीन-युतात् प्राग्वदसकृद्विधिना लम्बनं कार्यं यावदविशेषः । अत्रैतदुक्तं भवति

स्पर्शकालज्ञानाय तिथ्यन्तात् स्थितिदलेनोनात् मोक्षकालज्ञानार्थं च स्थितिदलेन सहितात् तिथ्यन्तादसकृद्विधिना लम्बनं स्थिरं कार्यम् । तल्लम्बनं यदि मध्याद्दर्शान्तकालिकाल्लम्बनादधिकोनं भवेदर्थात् स्पार्शिकं मध्यकालिकादधिकं मौक्षिकं चोनं भवेत् तथा मध्यस्पर्शकालभवे मध्यमोक्षकालभवे च द्वे लम्बने ऋणे भवतस्तदा तयोर्ऋणयोरन्तरेण पूर्वसाधितं स्थित्यर्धमधिकं कार्यम् । यदि मध्याल्लम्बनात् स्पर्शभवमूनं मोक्षभवमधिकं तथा मध्यस्पर्शभवे मध्यमोक्षभवे च द्वे लम्बने धने भवतस्तदाऽपि तयोर्धनयोरन्तरेण स्थित्यर्धमधिकं कार्यम् । ऋणयोर्धनयोश्च यद्यन्यथा भवेत् अर्थादृणयोर्मध्यादूनाधिकं स्पर्शमोक्षभवं धनयोरधिकोनं स्पर्शमोक्षभवं मध्यात् तदा तयोरन्तरेण स्थित्यर्धमूनं कार्यम् । अथ यदि एकं लम्बनमृणमन्यद्धनं भवेत् तदा तयोरैक्येन स्थित्यर्धमधिकं कार्यम् । एवं स्पार्शिकं मौक्षिकं च स्थित्यर्धं भवति । एवं द्वे संमीलनोन्मीलनकालिके विमर्दार्धे च स्फुटे भवतः । अर्थाद्यथा शशिवत् स्थित्यर्धं गृहीत्वा स्फुटस्थित्यर्धं साधितं तथैव स्थित्यर्धस्थाने शशिवन्मर्दार्धं गृहीत्वा स्फुटं मर्दार्धद्वयं साध्यमिति ।

अत्रोपपत्तिः । कल्प्यते स्थिरीभूतानि स्पर्शमध्यमोक्षकालिकानि लम्बनानि क्रमेण $ल_1$, $ल_2$, $ल_3$, ऋणानि । मध्यमं स्थित्यर्धम् = स्थि । गणितागतदर्शान्तकालः = द, तदा

$$स्फुटस्पर्शकालः = द - स्थि - ल_1 = स्प$$
$$स्फुटमध्यकालः = द - ल_2 \quad = म$$
$$स्फुटमोक्षकालः = द + स्थि - ल_3 = मो$$

अतः स्पार्शिकं स्फुटस्थित्यर्धम् = स्पास्फुस्थि = म − स्प = स्थि + $ल_1$ − $ल_2$

मौक्षिकं स्फुटस्थित्यर्धम् = मौस्फुस्थि = मो − म = स्थि + $ल_2$ − $ल_3$

अतो यदि $ल_1 > ल_2$ तथा $ल_2 > ल_3$ तदा $ल_1 - ल_2$, $ल_2 - ल_3$ एतद्द्वयं धनम् । यदि तानि लम्बनानि धनानि तदा पूर्वविधिना $ल_1 - ल_2$, $ल_2 - ल_3$ अनयोर्माने $ल_2 - ल_1$, $ल_3 - ल_2$ भविष्यतः । अतस्तदा

यदि ल$_2$ > लं$_1$ तथा ल$_3$ > लं$_2$ तदा लं$_2$ − ल$_1$, लं$_3$ − ल$_2$ एतद्द्वयं धनमन्यथा ऋणमिति स्पष्टम् ।


अथ विनिभतः प्राक् स्पर्शः पश्चान्मध्यकालस्तदा ल$_1$ ऋणं ल$_2$ धनम् । तदा लं$_1$ − लं$_2$ मानं ल$_1$ + ल$_2$ इदं धनं भविष्यति । स्पार्शि-कलम्बने धने वित्रिभतः पश्चिमस्थे रवौ ततोऽप्यग्रे मध्यकालस्य स्थिते-र्मध्यकालिकं लम्बनं सर्वदा धनमेवातस्तत्र धनत्वस्थितिर्न । अथैवं वित्रिभतः प्राग्यदि मध्यकालः पश्चान्मोक्षस्तदा ल$_2$ ऋणं ल$_3$ धनम् । तदा पूर्वविधिना ल$_2$ − ल$_3$ अस्य ल$_2$ + लं$_3$ एतादृशी स्थितिः सर्वदा धनात्मिका स्यादतो यद्येकमृणमन्यद्धनं तदा सर्वदा तदैक्येनाधिकं स्थित्यर्धं स्फुटं स्थित्यर्धं भवतीति मदीयो विचारः सुधीभिर्भृशं विचि-न्तनीयो येनाचार्योक्तं स्पष्टमुपपद्यते ॥ स्फुटस्पर्शमोक्षकालाज्ञानात् प्रथमं ल$_1$, ल$_3$ स्थाने स्थूलं ल$_2$ गृहीतम् । तेन स्प = द − स्थि − ल$_2$ = द − ल$_2$ − स्थि = स्पष्टदर्शान्त − स्थि । एवं स्थूलमोक्षकालः = स्पष्टदर्शान्त + स्थि । अतः स्पष्टतिथ्यन्तात् स्थितिदलोनाधिकात् प्रथमं लम्बनानयनमुचितं स्थितिदलं च स्फुटं स्पर्शमोक्षकालिकशरवशात् तात्कालिकमुचितम् । इह तु मध्यकालिकस्पष्टशरवशात् स्थितिदलं स्थिरं गृहीत्वाऽऽनयनं कृतमत इदं स्थूलं सूक्ष्मार्थमग्रे प्रकारान्तरं वक्ष्यत्याचार्यः ॥ १४–१५ ॥

इदानीं प्रकारान्तरेण स्फुटस्थितिमर्दार्धानयनमाह ।

स्फुटतिथ्यन्ताल्लम्बनमसकृत् स्थित्यर्धहीनयुक्ताद्वा ।
तत्स्फुटविक्षेपकृतस्थित्यर्धोनयुततिथ्यन्तात् ॥ १६ ॥
तत्स्पष्टतिथिच्छेदान्तरे स्फुटे स्थितिदले विहीनयुतात् ।
स्वविमर्दार्धेनासकृदेवं स्पष्टे विमर्दार्धे ॥ १७ ॥

प्रथमं स्थित्यर्धोनयुतात् स्फुटतिथ्यन्तात् स्पष्टदर्शान्ताल्लम्बन-मानेयम् । पुनस्तत्स्फुटविक्षेपकृतस्थित्यर्धोनयुततिथ्यन्ताल्लम्बनमानेय-मेवमसकृत् । अत्रैतदुक्तं भवति । यथा स्पर्शकालज्ञानाय प्रथमं मध्यका-लिकस्पष्टशरवशात् स्थित्यर्धं साध्यं तदूनात् स्फुटतिथ्यन्ताल्लम्बनं नतिश्च साध्या । तात्कालिकसपातचन्द्रवशात् शरः साध्यः । नतिशर-

संस्कारेण स्पष्टविक्षेपः साध्यस्तस्माच्छशिग्रहणवत् स्थित्यर्धं साध्यं तदूनात् तिथ्यन्ताद्गणितागतात् पुनर्लम्बनं, नतिः, स्पष्टशरः, स्फुटस्थित्यर्धं च सवमानेयं यावदविशेषः । अविशेषे यल्लम्बनं तत् तात्कालिकस्फुटविक्षेपजनितस्थित्यर्धोनगणितागतदर्शान्ते यथागतं धनं वा ऋणं संस्कार्यम् । एवं स्फुटः स्पर्शकालः । एवं स्थित्यर्धयुक्तात् तिथ्यन्तात् स्फुटमोक्षकालो भवति। तत्स्फुटतिथिच्छेदान्तरे स्फुटे स्थितिदले भवतः । अर्थात् तत्स्फुटस्पर्शकालस्य वा स्फुटमोक्षकालस्य स्पष्टतिथिच्छेदस्य स्पष्टदर्शान्तकालस्य चान्तरे स्पर्शमौक्षिके स्पष्टे स्थितिखण्डे भवेताम् । एवं यथा स्थित्यर्धेन स्पष्टे स्थितिखण्डे साधिते तथैवासकृत्कर्मणा स्वविमर्दार्धेन स्पष्टे विमर्दार्धे साध्ये। अर्थात् पूर्ववदसकृद्विधिना स्फुटौ संमीलनोन्मीलनकालौ प्रसाध्य तन्मध्यकालान्तरयोः समाने स्पष्टे विमर्दखण्डे ज्ञेये । 'तिथ्यन्ताद्गणितागतात् स्थितिदलेनोनाधिकाल्लम्बन' मित्यादिभास्करोक्तमेतदनुरूपम् । इहाचार्येण प्रथमं मध्यकाललम्बनमेव स्थूलात् स्पर्शे मोक्षे च कल्पितमित्यनेनासकृत्कर्मणि न काचिद्धानिरिति ज्योतिर्विदां प्रसिद्धमिति ।



अत्रोपपत्तिः ।

गर्भक्षितिजात् कियतीष्टघटिकासु पृष्ठाभिप्रायेण स्पर्शकालो भवतीति किलापेक्षितम् । कल्प्यते यदा पृष्ठाभिप्रायेण स्पर्शोऽभूत् तदा वि = रविकेन्द्रम् = रविस्थानम् । वि$_1$ = चन्द्रबिम्बकेन्द्रम् । च = चन्द्रस्थानम् । चच′र = क्रान्तिवृत्तखण्डम् । ख = खस्वस्तिकम् । खवि$_1$वि′$_1$ = चन्द्रदृङ्मण्डलम् । ख वि वि′ = रविदृङ्मण्डलम् । वि′$_1$ = लम्बितचन्द्रबिम्बकेन्द्रम् । वि′ = लम्बितरविबिम्बकेन्द्रम् । वि′$_1$च′ = चन्द्रस्य स्फुटशरः । वि′ र′ = रविनतिसमो रवेः स्पष्टशरः ।

वि′स = क्रान्तिवृत्तसमानान्तरवृत्तम् ।

वि′$_1$ स = स्फुटस्पर्शकाले स्पष्टशरः ।

वि॑ व॑$_1$ = मानैक्यार्धम् । एतानि चापानि लघुत्वात् सरलरेखाकाराण्याचार्यैः कल्पितानि । अतो विवि॑$_1$स जात्ये वि॑ व॑$_1$, वि॑$_1$ स वर्गान्तरपदसमाः स्फुटस्थित्यर्धकलाः = वि॑स = र॑ च॑ = स्फुस्थिक । चच॑ = चन्द्रलम्बनकलाः = चलंक । वि = र॑रविलम्बनकलाः = रलंक । अनयो रविचन्द्रलम्बनयोरन्तरकलाः (= ल$_1$ क) षष्टिगुणा रविचन्द्रगत्यन्तरकलाहृता आचार्यसाधिताः स्पर्शे लम्बननाडयः = ल$_1$ । तथा स्फुटस्थित्यर्धकलाः (= स्फुस्थिक) षष्टिगुणा गत्यन्तरहृता आचार्योक्तं स्फुटं स्थित्यर्धं घटिकात्मकम् = स्फुस्थि । अथैतस्मिन् स्पर्शकाले गर्भाभिप्रायेण रविचन्द्रान्तरकलाः = चवि = चर॑ − विर॑ = च॑र॑ + च च॑ − विर॑

= स्फुस्थिक + चलक − रलक = स्फुस्थिक + ल$_1$ क । एतद्घटिकाः = स्फुस्थि + ल$_1$ । गणितागतदर्शान्ते गर्भाभिप्रायेण रविचन्द्रान्तराभावः स्पर्शकाले च ततः प्रागानीतान्तरं तयोः स्फुस्थि + ल$_1$ एतावती घटिकासु । अतो गणितागतदर्शान्तकालादागता इष्टघटिका विशोध्य स्फुटस्पर्शकालः

= द − स्फुस्थि − ल$_1$ । स्फुटस्पर्शकाले स्पष्टस्थितिदललम्बनयोरज्ञानादसकृत्कर्मोचितमेव । एवं मोक्षसंमीलनोन्मीलनेष्वपि क्षेत्रसंस्थया स्फुटा वासना । अनया मत्क्षेत्रयुक्त्या भास्करोक्तं च सर्वं स्फुटमुपपद्यते । शेषवासना स्फुटा ॥ १६–१७ ॥

इदानीं विशेषमाह ।


शशिवद्राहुः स्फुटविक्षेपकृतस्थितिदलेन सङ्गुणितः ।
स्पष्टस्थित्यर्धहृतो भवति भुजः पूर्ववच्छेषम् ॥ १८ ॥

ग्रासात् कालः शशिवत्
स्पष्टस्थितिदलगुणोऽसकृद्भक्तः ।
स्फुटविक्षेपकृतस्थिति-
दलेन शोध्यः स्थितिदलात् स्यात् ॥ १९ ॥

ग्रासात् शशिवत् कालः 'शेषमूलं कृतं तिथिवं'दित्यनेन चन्द्रग्र-

हणविधिना यः कालः स ज्ञेयः । शेषव्याख्या 'शेषं शशाङ्कग्रहणोक्तमत्रे'-त्यादिभास्करविधिना स्फुटा । (सूय० श्लो० १८–१९) ।

कल्प्यते विचिभतः प्राक् स्पष्टस्पर्शकालादनन्तरमिष्टकाले इ, समे इष्टग्रासोऽपेक्षितः । तत्क्षेत्रसंस्था चेयम् । अत्रापि स्पष्टस्थित्यर्धोपपत्ति-लिखितक्षेत्रसङ्केतानि बोध्यानि ।



अत्र विं$_1$ स = इष्टकाले स्पष्टशरः । विंस = इष्टकाले भुजकला यज्ज्ञानमत्रापेक्षितमस्ति । ततः क्षेत्रयुक्त्या भुजकला = विंस = चचं = चवि + विरं − चचं = चवि − इलं ∴ चवि = भुक + इलं । अत्र चचं − विरं = इष्टकालिकलम्बनकला । चवि = इष्टकाले गर्भाभिप्रायेण रविचन्द्रान्तरांशाः । ततः पूर्ववद्गर्भक्षितिजादिष्टग्रासे इष्टकालः

= द − भुघ − इलंघ ।

पूर्वसाधितस्पष्टस्पर्शकालः = द − स्फुस्थि − लं$_1$

स्पर्शादनन्तरमिष्टग्रासे इष्टकालः

= (द − भुघ − इलंघ) − (द − स्फुस्थि − लं$_1$)

= स्फुस्थि + लं$_1$ − इलंघ − भुघ = इ

∴ भुघ = स्फुस्थि + लं$_1$ − इलंघ − इ …… (१)

अथ पूर्वसाधितः

स्पष्टदर्शान्तकालः = द − लं$_2$

स्पष्टस्पर्शकालः = द − स्फुस्थि − लं$_1$

द्वयोरन्तरेण स्पार्शिकं स्पष्टस्थितिदलम्

= स्फुस्थि + लं$_1$ − लं$_2$ = स्पस्थि। अथ यदि स्पष्टस्थितिदलेन लं$_1$ − लं$_2$ इदं लम्बनान्तरं तदा स्पर्शादनन्तरं इमितेन कालेन किमित्यनुपातेन यदि

वास्तवमान − (लं$_1$ − इलंघ) मस्येदं $\frac{\text{इ (लं}_1\text{ − लं}_2\text{)}}{\text{स्पस्थि}}$ कल्प्यते तदा-ऽस्या (१) स्मिन्नुत्थापनेन

$$\text{भुघ} = \text{स्फुस्थि} - \text{इ} + \frac{\text{इ (लं}_1 - \text{लं}_2)}{\text{स्पस्थि}}$$

$$= \frac{\text{स्फुस्थि· स्पस्थि} - \text{इ} \{\text{स्पस्थि} - (\text{लं}_1 - \text{लं}_2)\}}{\text{स्पस्थि}}$$

$$= \frac{\text{स्फुस्थि· स्पस्थि} - \text{इ· स्फुस्थि}}{\text{स्पस्थि}} = \frac{\text{स्फुस्थि (स्पस्थि} - \text{इ)}}{\text{स्पस्थि}}$$

भुजघटिका गत्यन्तरकलागुणा षष्टिभक्ता जाता भुजकलाः

$$= \text{भुक} = \frac{\text{स्फुस्थि}}{\text{स्पस्थि}} \cdot \frac{\text{गअं (स्पस्थि} - \text{इ)}}{\text{स्पस्थि ६०}} = \frac{\text{स्फुस्थि} \times \text{चन्द्रग्रहणावद्भुज}}{\text{स्पस्थि}}$$

अनेन भुजकलानयनमुपपद्यते। एवमतो व्यस्तविधिना भुजघटीतो वीष्ट-स्पष्टस्थितिदलमानम् = स्पस्थि − इ = $\frac{\text{भुघ· स्पस्थि}}{\text{स्फुस्थि}}$। इष्टग्रासकालिकस्पष्ट-शरज्ञानान्मध्यकालिकस्पष्टशरतः कर्म कृतमतोऽसकृत्कर्म युक्तमेव यत-स्तात्कालिकशराज्ञानात् स्फुटस्थितिदलादिकस्याज्ञानमिति। एवं स्पष्ट-स्थितिदलानुपाततो यदि लं$_1$ − इलंघ अस्य मानमानीयते तदा भुजा-दिसाधनं सूक्ष्ममाचार्योक्तम्। अनुपातस्य नियतैकरूपत्वात् तादृशानु-पातेन लम्बनान्तरं न सूक्ष्ममायात्यत आचार्योक्तं स्थूलमानयनम्। तदेव भास्करस्यापि स्थूलमानयनमतो मदीयं सूत्रम्।

चेत् स्पष्टस्थितिखण्डकेन जनितं तत्कालमध्येऽन्तरं
स्पष्टं लम्बनयोरिदं भवति किं तर्हीष्टकालेन चेत्।
सूक्ष्मं स्यादनुपातजातमनिशं दोरादिकं कोविद
श्रीमद्भास्करसत्प्रकारविलसत् सत् स्यात् तदाऽर्कग्रहे॥

इदं युक्तमेवेति सिद्धान्तविद्भिर्भृशं विचिन्त्यनीयम् ॥

एवं मौक्तिकेष्टेऽपि दृक्संस्थया स्फुटा वासना ॥ १८–१९ ॥

इदानीमादेश्यानादेश्यानाह ।

वलनादि शशिवदन्यद्ग्रहणं तैक्ष्ण्याद्रवेरनादेश्यम् ।
द्वादशभागादूनं स्वच्छत्वात् षोडशादिन्दोः ॥ २० ॥

षोडशात् षोडशभागात् । शेषं स्पष्टार्थम् । चन्द्रग्रहणाधिकारे 'इन्दोर्भागः षोडशः खण्डितोऽपि' इत्यादिभास्करोक्तमेतदनुरूपमेव (च॰ ग्र॰ श्लो॰ ३७) ॥ २० ॥

इदानीमात्मप्रशंसामाह ।

न स्फुटमार्यभटादिष्वर्कग्रहणं यतस्ततः स्पष्टम् ।
शङ्कुज्यया कृतं लघु लघुतरमेवं रवेर्ग्रहणम् ॥ २१ ॥

शङ्कुज्यया वित्रिभशङ्कुना मया लघु कृतमित्याचार्याशयः । एवमग्रे वक्ष्यमाणप्रकारेण रवेर्ग्रहणं रविग्रहणसाधनं लघुतरं च भवति । शेषं स्फुटार्थम् ॥ २१ ॥

इदानीं लघुक्रमेण लम्बननतिसाधनमाह ।

लग्नात् त्रिराशिहीनादपक्रमाक्षांशयुतिविशेषोनात् ।
भत्रितयाज्ज्या छेदस्त्रिज्यार्धकृतेः फलेन हृता ॥ २२ ॥
वित्रिभलग्नार्कान्तरजीवा घटिकादि लम्बनं लब्धम् ।
वित्रिभलग्नापक्रमविक्षेपाक्षांशयुतिवियुतेः ॥ २३ ॥
जीवा शशाङ्कभास्करमध्यमभुक्त्यन्तरेण सङ्गुणिता ।
पञ्चदशभिर्गुणितया विभाजिता त्रिज्ययाऽवनतिः ॥२४॥

त्रिराशिहीनाल्लग्नाद्वित्रिभात् क्रान्त्यंशा ये तेषामक्षांशानां चैकदिशां युतिर्विभिन्नदिशां विशेषः स्वल्पान्तरे देशे वित्रिभस्य याम्योत्तरवृत्तासन्ने स्थितत्वाद्वित्रिभनतांशा भवन्ति । तदूनाद्भत्रितयाद्राशित्रयाज्ज्या वित्रिभशङ्कुस्त्रिज्यार्धकृतेश्छेदो भवति । छेदात् त्रिज्यार्धकृतेर्यत् फलं

तेन वित्रिभलग्नार्कान्तरज्या हृता लब्धं घटिकादि वा लम्बनं भवेत् । वित्रिभलग्नापमांशानां वित्रिभशरांशानामक्षांशानां चैकदिशां युतेर्विभिन्नदिशां वियुतेर्जीवा चन्द्रदृक्क्षेपः । सा रविचन्द्रमध्यगत्यन्तरेण सङ्गुणिता पञ्चदशभिर्गुणितया त्रिज्यया विभाजिताऽवनतिः स्यात् ।

अत्रोपपत्तिः । याम्योत्तरवृत्त एव सुखार्थं वित्रिभं प्रकल्प्य दिनार्धवत् तन्नतांशा उन्नतांशाश्च साधिताः । उन्नतांशजीवा वित्रिभशङ्कुः प्रसिद्धस्ततः पूर्वविधिना लम्बनघटिकाः $= \frac{४ \text{ ज्या } (र \backsim वि)}{त्रि} \cdot \frac{वि\text{शं}}{त्रि} = \frac{\text{ज्या } (र \backsim वि)}{\dfrac{त्रि^{२}}{४ \text{ विशं}}}$

अनेन लम्बनानयनमुपपद्यते ।

अथ पूर्वसाधितवित्रिभनतांशेषु वित्रिभशरं संस्कृत्य विमण्डलावधि चन्द्रदृक्क्षेपचापांशाः साधिताः सुखार्थं तत्समा रविदृक्क्षेपचापांशाः स्थूला अङ्गीकृताः । अतस्तयोर्दृक्क्षेपौ समौ जातौ । ततो 'रविशशिमध्यगतिगुणो' इत्यादिविधिना पृथक् पृथक् नती प्रसाध्य तयोरन्तरं कृतमिति सुगमा वासना ॥ २२–२४ ॥

इदानीं विशेषमाह ।

पूर्ववदन्यत् स्पष्टं ब्रह्मोक्तस्पष्टसूर्यशशिपातैः ।
नार्यभटादिभिरुक्तं यतोऽस्फुटास्ते ततोऽस्पष्टम् ॥ २५ ॥

अन्यदवशिष्टं स्थित्यर्धादिसाधनं पूर्ववत् । एवं ब्रह्मोक्तस्पष्टसूर्यशशिपातैर्ग्रहणं स्पष्टं दृग्योग्यं भवति । यत आर्यभटादिभिर्ये स्पष्टसूर्यशशिपाता उक्तास्ते ऽस्फुटा न दृष्टियोग्यास्ततस्तदुक्तै रविशशिपातैर्ग्रहणमस्पष्टं न दृष्टियोग्यमित्यर्थः ॥ २५ ॥

इदानीं ग्रहणे वर्णमाह ।

अङ्गुलमात्रे विरते रक्तः शशिमण्डले भवेद्वर्णः ।
भानोस्तु पुनः कृष्णो वर्णः सर्वत्र निर्दिष्टः ॥ २६ ॥

शशिमण्डले चन्द्रबिम्बेऽङ्गुलमात्रे विरते विरामतां गते भानोर्वर्णो रक्तो भवेत् । अर्थाद्रविग्रहणे चन्द्रबिम्बस्य छादकत्वादङ्गुलमात्रेऽपि

विरते यत्र ग्रासाभावोऽर्थाच्चन्द्रबिम्बमवशिष्टं तद्वृत्तमेव भवति । अवशिष्टमङ्गुलमात्रं वा यथेच्छं ततोऽप्यल्पं भवेत् । अन्यत्र सर्वत्र तु पुनः कृष्णवर्णो गणकैर्निर्दिष्टः कथितः । अर्थाद्ग्रस्तं रविबिम्बमङ्गुलाल्पं वा यथेच्छं ततोऽप्यधिकं सर्वदा कृष्णमेव भवतीत्यर्थः ॥ २६ ॥

इदानीमुपसंहारमाह ।

इष्टग्रासविमर्दस्थित्यर्धावनतिलम्बनाद्येषु ।
आर्याषड्विंशत्याऽर्कग्रहणं पञ्चमोऽध्यायः ॥ २७ ॥

इति श्रीब्राह्मस्फुटसिद्धान्ते रविग्रहणाध्यायः पञ्चमः ॥ ५ ॥

स्पष्टार्थम् ॥ २७ ॥

मधूसूदनसूनुनोदितो यस्तिलकः श्रीपृथुनेह जिष्णुजोक्ते ।
हृदि तं विनिधाय नूतनोऽयं रचितः सूर्ययुतौ सुधाकरेण ॥

इति श्रीकृपालुदत्तसूनुसुधाकरद्विवेदिविरचिते ब्राह्मस्फुटसिद्धान्त-नूतनतिलके सूर्यग्रहणाधिकारः पञ्चमः ॥ ५ ॥

अथोदयास्ताधिकारः ।

तत्रादौ तदारम्भप्रयोजनमाह ।

ग्रहभास्करान्तरैः प्राक् पश्चादर्कग्रहान्तरैर्यस्मात् ।
स्वांशैर्दृश्यादृश्यास्तस्माद्ब्रूये तदानयनम् ॥ १ ॥

प्राक् पूर्वक्षितिजे ग्रहभास्करान्तरैः स्वांशैः स्वकालांशैः पश्चात् पश्चिमक्षितिजेऽर्कग्रहान्तरैः स्वकालांशैर्यतो यथासङ्ख्यं ग्रहा दृश्यादृश्या भवन्ति तस्मात् तदानयनं ग्रहार्कान्तरानयनं वक्ष्येऽहमिति । अर्थात् प्राक्क्षितिजे यस्मिन् दिने ग्रहोदयादनन्तरं कालांशघटीभी रवेरुदयस्तस्मिन् दिने ग्रहो रात्रिशेषे दृश्यो भवति । एवं यस्मिन् दिने पश्चिमक्षितिजे रव्यस्तानन्तरं कालांशघटीभिर्ग्रहस्यास्तमयस्तस्मिन् दिने सायंकाले ग्रहस्यादृश्यत्वम् । अत उदयास्तज्ञानं ग्रहार्कान्तरघटिकाधीनं तदानयनायायमध्यायोऽवश्यमारम्भणीय इति ॥ १ ॥

इदानीमिनासन्नभावेन ग्रहाणां दृश्यादृश्यत्व[illegible] ।

प्रागूनभुक्तिरूनो दृश्योऽदृश्योऽन्यथा रवितः ।
दृश्योऽधिकगतिरधिकोऽदृश्यः पश्चाद् ग्रहोऽल्पगतिः ॥ २ ॥

रवित ऊनो रवेरूनभुक्तिर्ग्रहो प्राक् प्राच्यां दिशि रात्रिशेषे रवितः कालांशान्तरितो दृश्यो भवति । अन्यथा रवेरधिकगतिर्ग्रहो रवित ऊनः प्राच्यां दिशि रात्रिशेषे रवितः कालांशान्तरितोऽदृश्यो भवति । एवमधिकगतिर्ग्रहो रवितोऽधिकः कालांशान्तरितः पश्चात् पश्चिमायां दिशि दृश्यो भवति । अल्पगतिश्च रवितोऽधिकः कालांशान्तरितस्तत्रैवादृश्यो भवति ॥

अत्रोपपत्तिः । 'रवेरूनभुक्तिर्ग्रहः प्रागुदेतीत्यादिभास्करविधिना स्फुटा (ग्र· ग· उ· अ· श्लो· ४) ॥

इदानीं ग्रहबिम्बोदयास्तलग्नसाधनार्थमायनदृक्कर्मसाधनमाह ।

विक्षेपसत्रिराशिक्रान्तिवधो व्याससदलहृतो लिप्ताः ।

शोध्यास्तयोः समदिशोर्यन्यदिशोस्तयोः क्षेप्याः ॥ ३ ॥

सत्रिराशिक्रान्तिः सत्रिभग्रहक्रान्तिज्या द्युज्यावृत्ते आयनवलनमाचार्यमते स्थूलां द्युज्यां त्रिज्यामितां प्रकल्प्य तदेवायनं वलनम् । तयोर्विक्षेपायनवलनयोः । शेषं स्पष्टार्थम् ।

अत्रोपपत्तिः । 'आयनं वलनमस्फुटेषुणा सङ्गुणं द्युगुणभाजितं हृतम्' इत्यादिभास्करविधिना द्युज्यां त्रिज्यासमां राश्युदयासून् राशिकलामितान् १८०० प्रकल्प्य स्फुटा ज्ञेया । वस्तुतो बिम्बीयद्युज्ययाऽऽय नदृक्कर्म सूक्ष्मं भवति, भास्करेणापि स्थानीयद्युज्यां गृहीत्वा स्थूलमेवेदमानीतमिति सिद्धान्तविदां स्फुटम् ॥ ३ ॥

इदानीमक्षजं दृक्कर्माह ।

विषुवच्छायागुणिताद्विक्षेपाद्द्वादशोद्धृतात् सौम्यात् ।
फलमृणधनं धनमृणं याम्यादुदयास्तमयलग्ने ॥ ४ ॥

सौम्यात् शरात् फलमुदयलग्नसाधने फलं कलात्मकमृणमस्तलग्नसाधने च धनं याम्याद्विक्षेपाच्च फलं क्रमेण धनमृणं ज्ञेयं पूर्वसाधितायनदृक्कर्मसंस्कृतग्रहे तदोदयास्तलग्ने भवतः ।

अत्रोपपत्तिः । क्षितिजे स्थूलादक्षज्यासममक्षवलनं कदम्बाभिमुखं गणितागतशरं च स्वल्पान्तराद्ध्रुवाभिमुखं स्पष्टशरं च प्रकल्प्य 'लम्बज्ययाऽक्षजं चेत् स्याद्वलनं किं स्फुटेषुणा' इत्यादिभास्करविधिना त्रिज्यासमां द्युज्यां राश्युदयासून् खखाष्टेन्दुसमान् प्रकल्प्याक्षजदृक्कर्मकला $= \frac{\text{ज्याअ}\cdot\text{श}}{\text{ज्यालं}} = \frac{\text{वि}\cdot\text{श}}{१२}$ । 'अथ तैः शरे तु याम्योत्तरे क्रमविलोमविधानलग्न'मित्यादिभास्करोक्तेन उत्तरे शरेऽक्षजदृक्कर्मकलाभिरूनो दक्षिणे शरे युतः कृतायनफलः खेट उदयाख्यलग्नं भवति । अस्तलग्नसाधने तु सौम्ये शरेऽक्षजदृक्कर्मकलासहितो याम्ये रहितः सषड्भः कृतायनफलः खेटो ग्रहे पश्चिमक्षितिजेऽस्तं गते प्राक्क्षितिजे यल्लग्नं तदस्तलग्नं भास्करमते । इहाचार्येण तस्मात् षड्राशिं विशोध्य पश्चिमक्षितिजे ग्रहेऽस्तंगते यदस्तलग्नं तदेव ग्रहास्तलग्नं कल्पितमिति ॥ ४ ॥

इदानीं ग्रहार्कान्तरघटिकाज्ञानमाह ।

प्रागूनमाद्यमधिकं पश्चाल्लग्नाद्ग्रहोदयोऽस्तमयः ।
षड्भयुतमन्यदुदयैर्घटिकाः कृत्वोनमधिकसमम् ॥ ५ ॥

प्राक्क्षितिजे आद्यमुदयलग्नं लग्नाद्वा सूर्यादूनं तदा ग्रहोदयो भवति । पश्चात् क्षितिजे लग्नाद्वा सूर्यात् षड्भयुतं षड्राशिसहितमन्यदस्तलग्नमधिकं तदा ग्रहास्तमयो भवति । अत्रोनमधिकसमं कृत्वाऽर्यादूनस्य भोग्योऽधिकभुक्तयुक्तो मध्योदयाढ्य इत्यादिभास्करविधिना उदयैः स्वदेशोदयैर्लग्नग्रहान्तरे वेनासन्नभावेन ग्रहोदयज्ञानार्थं रविग्रहोदयलग्नान्तरेऽस्तज्ञानाय सषड्भार्कास्तलग्नान्तरे घटिकाः साध्या इत्याचार्याभिप्रायः ।

अत्रोपपत्तिः । 'प्राग्दृग्ग्रहः स्यादुदयाख्यलग्न' मित्यादिभास्करविधिना स्फुटा ॥ ५ ॥

इदानीं कालांशानाह ।

द्वादशभिः शीतांशुः सितजीवज्ञशनिभूमिजा नवभिः ।
द्व्युत्तरवृद्धैरन्तरघटिकाषड्गुणितकालांशैः ॥ ६ ॥

शीतांशुर्द्वादशभिः कालांशैः । शुक्रगुरुबुधशनिभौमा द्व्युत्तरवृद्धैर्नवभिः कालांशैर्दृश्यादृश्या भवन्ति । अर्थात् शुक्रस्य नव ९ । गुरोः ९ + २ = ११ । बुधस्य ११ + २ = १३ । शनेः १३ + २ = १५ । भौमस्य १५ + २ = १७ । पूर्वं या ग्रहार्कान्तरघटिकाः साधितास्ताः षड्गुणिताः कालांशा इष्टा भवन्ति तैरिष्टैः कालांशैरित्यग्रे संबन्धः ।

अत्रोपपत्तिः । कालांशसाधने आगमप्रमाणम् । वस्तुतो ग्रहाणां नीचोच्चवशाद्रविग्रहान्तरसूत्रवैलक्षण्याच्च वेधेनापि गोलयुक्त्या स्थिराः कालांशा असम्भवा एवेति कमलाकरमतं तत्त्वविवेके तथ्यमेवेति ज्योतिर्विद्भिश्चिन्त्यम् । 'दसेन्दवः शैलभुवश्च शक्रा' इत्यादिभास्करविधिना चन्द्रादीनां कालांशाः ।

च० १२ । भौ० १७ । बु० १४ । गु० ११ । शु० १० । श० १५ ।
आचार्योक्ताः च० १२ । भौ० १७ । बु० १३ । गु० ११ । शु० ९ । श० १५ ।

द्वयोर्मतयोर्बुधशुक्रकालांशयोरैक्यमन्तरम् ॥ ६ ॥

इदानीमुदयास्तयोर्गतैष्यदिनसाधनमाह ।

'दृश्यादृश्यैर्युतिवद्ग्रहार्कभुक्त्यन्तरैक्यलब्धदिनैः ।
ऊनाधिकलिप्ताभ्यां प्राग्वत् तात्कालिकैरसकृत् ॥ ७ ॥

पूर्वसाधितैरिष्टकालांशैर्दृश्याद्दृश्यैः पठितकालांशैश्च ऊनाधिकलिप्ताभ्यां ग्रहार्कभुक्त्यन्तरैक्यलब्धदिनैस्तात्कालिकैरिष्टकालांशैः प्राग्वद्-ग्रहयुतिविधिना युतिवद्ग्रहयुतिवदुदयास्तयोर्गतैष्यदिनसाधनं कार्यमित्यर्थः । अत्रेतदुक्तं भवति । पठितेष्टकालांशान्तरकला ग्रहार्कगत्यन्तरभक्ता ग्रहे वक्रिणि तु ग्रहार्कगतियोगभक्ता लब्धा पठितकालांशेभ्य इष्टाधिके उदये गता इष्टाल्पे एष्या दिवसा ज्ञेयाः । एवमस्तविचारे पठितकालांशेभ्य इष्टाल्पे गता इष्टाधिके चैष्या दिवसा ज्ञेयाः । लब्धदिनैस्तात्कालिकाभ्यां दृग्ग्रहार्काभ्यां पुनस्तात्कालिका इष्टकालांशाः साध्यास्तैः प्राग्वत् पुनर्गतैष्या दिवसा एवमसकृद्यावदविशेषः ।

अत्रोपपत्तिः । 'उक्तेभ्य ऊनाभ्यधिका यदीष्टाः खेटोदयो गम्यगतस्तदा स्यादि'त्यादिभास्करविधिना स्फुटा । इहाचार्येण च स्थूला राश्युदयासवः खाभ्राष्टभूकलामिता अङ्गीकृता इति ॥ ७ ॥

इदानीं नित्योदयास्तसाधनमाह ।

प्रतिदिनमुदयास्तमयावसकृत् तात्कालिकग्रहविलग्नैः ।
सूर्यास्तमयौदयिकौ शीतांशोः पूर्णिमास्यन्तः ॥ ८ ॥

तात्कालिकग्रहविलग्नैरसकृत् प्रतिदिनमुदयास्तमयौ साध्यौ । अर्थाद्यस्मिन् काले ग्रहोदितघटीज्ञानमपेक्षितं तदा तात्कालिकं लग्नं ग्रहोदयलग्नं च कृत्वा पूर्ववत् तयोरन्तरे घटिकाः प्रसाध्य ताभिर्ग्रहं प्रचाल्य तस्य पुनरुदयलग्नं प्रसाध्य तात्कालिकात् स्थिरलग्नात् पुनरिष्टघटिकाः साध्याः । एवमसकृत् । एवमस्तकालज्ञानार्थमस्तलग्नात् सषड्भात् कर्म कर्त्तव्यम् । एवं पूर्णिमास्यन्तः प्रथमचन्द्रदर्शनदिनात् पूर्णिमापर्यन्तमभीष्टदिने शीतांशोश्चन्द्रस्य सूर्यास्तमयौदयिकौ सूर्यास्ताद्वा सूर्योदया-

ण्याशु महाफलेन पतता भग्नं सशब्दं शिरः प्रायो गच्छति यत्र भाग्यरहितस्तत्रापदां भाजनमिति । ५० । ६५ ।

कोशपानन्या० । कोशपानं दिव्यविशेषस्तस्य न्यायः तत्प्रकारश्चेत्थं दुर्गादीनुग्रान्देवान्पूजयित्वा तत्स्नानोदकं चाहृत्य तोय त्वं प्राणिनां प्राण इत्यादिमन्त्रेण प्राड्विवाकस्तत्तोयं संश्राव्य शोध्येन च तत्तोयं पात्रान्तरे कृत्वा सत्येन मा ऽभिरक्षेत्यनेनाभिमन्त्रितं प्रसृतित्रयं पाययेत् । एवं कृते चतुर्दशाहदिनात्प्राग्यस्य राजनिमित्तं दैवं वा घोरं दुःखं न जायते स शुद्धः अशुद्धो ऽन्यः । तथा च सर्वदिव्यसाधारणपूर्वदिनोपवासवतश्चौरस्य तत्पानकाले सुखं भवति शास्त्रनिर्दिष्टावधिकाले तु महत् दुःखं यथा तथा हरिहरादिष्वेकत्र भक्तिव्याजेनेतरनिन्दां कुर्वतो निन्दाव्यसनिनो यद्यपि तत्काले स्यात्किंचित्सुखं तथा ऽपि निन्दाजन्याघपरिपाककाले ऽतिघोरं नरकादिदुःखं भवतीति न्यायसंगतिः । ५१ । ६६ ।

यदा त्वीशकोपाच्छीघ्रमेव निन्दकस्य दुःखं स्यात्तदा तण्डुलभक्षणन्यायप्रवृत्तिः इदमपि दिव्यम् । एवमग्रे ऽपि दिव्यम् । एवमग्रे ऽपि षट्सु न्यायेषु बोध्यम् । तच्चेत्थं शुक्लाञ्छालितण्डुलानादित्याग्रे मृत्पात्रे धृत्वा स्नानोदकेन संमिश्रान् रात्रौ तत्रैव वासयेत् प्रातः स्नातं प्राङ्मुखमुपोषितं भक्षयित्वा पिप्पलपत्रे निष्ठीवयेत् । एवं कृते यस्य हनुर्लोहितं दृश्यते तालु च शीर्यते कम्पते च गात्रं सो ऽशुद्धः शुद्धो ऽन्य इति । ५२ । ६७ ।

विषभक्षणन्यायो ऽपीह बोध्यः । तद्यथा कृतोपवासः प्राड्विवाकः शंभुं संपूज्य तदग्रे विषं संस्थाप्य त्वं विष ब्रह्मणा सृष्टमित्यादिना ऽभिमन्त्र्य त्रिंशद्गुणेन घृतेन

द्वयोर्मतयोर्बुधशुक्रकालांशयोरैक्यमन्तरम् ॥ ६ ॥

इदानीमुदयास्तयोर्गतैष्यदिनसाधनमाह ।

दृश्यादृश्यैर्युतिवद् ग्रहार्कभुक्त्यन्तरैक्यलब्धदिनैः ।
ऊनाधिकलिप्ताभ्यां प्राग्वत् तात्कालिकैरसकृत् ॥ ७ ॥

पूर्वसाधितैरिष्टकालांशैर्दृश्याद्दृश्यैः पठितकालांशैश्च ऊनाधिकलिप्ताभ्यां ग्रहार्कभुक्त्यन्तरैक्यलब्धदिनैस्तात्कालिकैरिष्टकालांशैः प्राग्वद्-सकृद्विधिना युतिवद्ग्रहयुतिवदुदयास्तयोर्गतैष्यदिनसाधनं कार्यमित्यर्थः । अत्रैतदुक्तं भवति । पठितेष्टकालांशान्तरकला ग्रहार्कगत्यन्तरभक्ता ग्रहे वक्रिणि तु ग्रहार्कगतियोगभक्ता लब्धा पठितकालांशेभ्य इष्टाधिके उदये गता इष्टाल्पे एष्या दिवसा ज्ञेयाः । एवमस्तविचारे पठितकालांशेभ्य इष्टाल्पे गता इष्टाधिके चैष्या दिवसा ज्ञेयाः । लब्धदिनैस्तात्कालिकाभ्यां दृग्ग्रहार्काभ्यां पुनस्तात्कालिका इष्टकालांशाः साध्यास्तैः प्राग्वत् पुनर्गतैष्या दिवसा एवमसकृद्यावदविशेषः ।

अत्रोपपत्तिः । 'उक्तेभ्य ऊनाभ्यधिका यदीष्टाः खेटोदयो गम्यगतस्तदा स्यादि'त्यादिभास्करविधिना स्फुटा । इहाचार्येण च स्थूला राश्युदयासवः खाभ्राष्टभूकलामिता अङ्गीकृता इति ॥ ७ ॥

इदानीं नित्योदयास्तसाधनमाह ।

प्रतिदिनमुदयास्तमयावसकृत् तात्कालिकग्रहविलग्नैः ।
सूर्यास्तमयौदयिकौ शीतांशोः पूर्णिमास्यन्तः ॥ ८ ॥

तात्कालिकग्रहविलग्नैरसकृत् प्रतिदिनमुदयास्तमयौ साध्यौ । अर्थाद्यस्मिन् काले ग्रहोदितघटीज्ञानमपेक्षितं तदा तात्कालिकं लग्नं ग्रहोदयलग्नं च कृत्वा पूर्ववत् तयोरन्तरे घटिकाः प्रसाध्य ताभिर्ग्रहं प्रचाल्य तस्य पुनरुदयलग्नं प्रसाध्य तात्कालिकात् स्थिरलग्नात् पुनरिष्टघटिकाः साध्याः । एवमसकृत् । एवमस्तकालज्ञानार्थमस्तलग्नात् सषड्भात् कर्म कर्त्तव्यम् । एवं पूर्णिमास्यन्तः प्रथमचन्द्रदर्शनदिनात् पूर्णिमापर्यन्तमभीष्टदिने शीतांशोश्चन्द्रस्य सूर्यास्तमयौदयिकौ सूर्यास्ताद्वा सूर्योदया-

प्याशु महाफलेन पतता भग्नं सशब्दं शिरः प्रायो गच्छति यत्र भाग्यरहितस्तत्रापदां भाजनमिति। ५०। ९५।

कोशपानन्या०। कोशपानं दिव्यविशेषस्तस्य न्यायः तत्प्रकारश्चेत्थं दुर्गादीनुग्रान्देवान्पूजयित्वा तत्स्नानोदकं चाहृत्य तोय त्वं प्राणिनां प्राण इत्यादिमन्त्रेण प्राड्विवाकस्तत्तोयं संश्राव्य शोध्येन च तत्तोयं पात्रान्तरे कृत्वा सत्येन मा ऽभिरक्षेत्यनेनाभिमन्त्रितं प्रसृतित्रयं पाययेत्। एवं कृते चतुर्दशाहिनात्प्राग्यस्य राजनिमित्तं दैवं वा घोरं दुःखं न जायते स शुद्धः अशुद्धो ऽन्यः। तथा च सर्वदिव्यसाधारणपूर्वदिनोपवासव्रतश्चौरस्य तत्पानकाले सुखं भवति शास्त्रनिर्दिष्टावधिकाले तु महत् दुःखं यथा तथा हरिहरादिष्वेकत्र भक्तिव्याजेनेतरनिन्दां कुर्वतो निन्दाव्यसनिनो यद्यपि तत्काले स्यात्किंचित्सुखं तथा ऽपि निन्दाजन्याघपरिपाककाले ऽतिघोरं नरकादिदुःखं भवतीति न्यायसंगतिः। ५१। ९६।

यदा त्वीशकोपाच्छीघ्रमेव निन्दकस्य दुःखं स्यात्तदा तण्डुलभक्षणन्यायप्रवृत्तिः इदमपि दिव्यम्। एवमग्रे ऽपि दिव्यम्। एवमग्रे ऽपि षट्सु न्यायेषु बोध्यम्। तच्चेत्थं शुक्लाच्छालितण्डुलानादित्याग्रे मृत्पात्रे धृत्वा स्नानोदकेन संमिश्रान् रात्रौ तत्रैव वासयेत् प्रातः स्नातं प्राङ्मुखमुपोषितं भक्षयित्वा पिप्पलपत्रे निष्ठीवयेत्। एवं कृते यस्य हनुर्लोहितं दृश्यते तालु च शीर्यते कम्पते च गात्रं सो ऽशुद्धः शुद्धो ऽन्य इति। ५२। ९७।

विषभक्षणन्यायो ऽपीह बोध्यः। तद्यथा कृतोपवासः प्राड्विवाकः शंभुं संपूज्य तदग्रे विषं संस्थाप्य त्वं विष ब्रह्मणा सृष्टमित्यादिना ऽभिमन्त्र्य त्रिंशद्गुणेन घृतेन

संयोज्य च दक्षिणाभिमुखाय शीतलदेशे निविष्टाय दद्यात्। एवं कृते आकरतालिकाशतपञ्चकं यो निर्विकारः स शुद्धः। अनन्तरं चिकित्सनीयः। अशुद्धो ऽन्यः। ५३। ९८।

सत्याभिसंधस्य मोक्षो बन्धो ऽन्यस्येति विवक्षायां तप्तपरशुग्रहणन्यायो ऽवतरति। अयं सोदाहरणं श्रुत्योपपादितः। पुरुषं सोम्योत हस्तगृहीतमानयन्ति अपहार्षीत्स्तेयमकार्षीत्परशुमस्मै तपतेति। स यदि तस्य कर्त्ता भवति तत एवानृतमात्मानं कुरुते। सो ऽनृताभिसंधो ऽनृतेनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स दह्यते ऽथ हन्यते। अथ यदि तस्याकर्त्ता भवति तत एव सत्यमात्मानं कुरुते सत्याभिसंधः सत्येनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स न दह्यते ऽथ मुच्यते स यथा तत्र न दह्यते तथैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति। ५४। ९९।

घटारोहणन्यायो धर्माधर्मन्यायस्तप्तमाषिकोद्धरणन्याय उदकनिमज्जनन्यायश्चापीह प्रवर्त्तते। तत्र तावद्घटारोहणप्रकार उच्यते सर्वदिव्यसाधारणधर्मानुष्ठानानन्तरं प्राड्विवाको घटं घट त्वं ब्रह्मणा सृष्ट इत्यादिमन्त्रैरामन्त्रयते शोध्यस्तु त्वं तुलेत्यादिना मन्त्रेण घटापरनामधेयां तुलामामन्त्रयते। अनन्तरं प्राड्विवाकः शोध्यं तुलामारोपयति आरोपितं च विनाडीपञ्चकं यावत्तथैवावस्थापयति। दशगुर्वक्षरोच्चारणकालः प्राणः षट्प्राणा विनाडी शुद्ध्यशुद्धिनिर्णयकारणं चोक्तम्। तुलितो यदि वर्द्धेत स शुद्धः स्यान्न संशयः। समो वा हीयमानो वा न विशुद्धो भवेन्नर इति। ५५। १००।

धर्माधर्मदिव्यविधिः राजतं कारयेद्धर्ममधर्मं सीसकायसम्। लिखेद्भूर्जे पटे वापि धर्माधर्मौ सितासितौ।

अभ्युक्ष्य पञ्चगव्येन गन्धमाल्यैः समर्चयेत् । सितपुष्पस्तु धर्मः स्यादधर्मो ऽसितपुष्पभृत् । एवंविधावुपालिख्य पिण्डयोस्तौ निधापयेत् । गोमयेन मृदा वापि पिण्डौ कार्यौ समन्ततः । मृद्भाण्डके ऽनुपहते स्थाप्यौ चानुपलक्षितौ । उपलिप्ते शुचौ देशे देवब्राह्मणसंनिधौ । आवाहयेत्ततो देवांल्लोकपालांश्च पूर्ववत् । धर्मावाहनपूर्वं तु प्रतिज्ञापत्रकं लिखेत् । ततः यदि पापविमुक्तो ऽहं धर्मस्त्वायातु मे करे इत्यभिशस्तोऽभिमन्त्रयेत् । अभियुक्तस्तयोश्चैकं प्रगृह्णीताविलम्बितः । धर्मे गृहीते शुद्धिः स्यादधर्मे तु स हीयते इत्यादिना पितामहेनोक्तः । ५६ । १०१ ।

एवमतितप्ततैलादेः सौवर्णमाषकोद्धरणेन शोध्यस्य करे स्फोटाद्यभावे शुद्धिः अन्यथा त्वशुद्धिः । ५७ । १०२ ।

शोध्यस्य निमज्जनसमये तत्स्थानान्निक्षिप्तं शरमादाय तत्पतनस्थाने स्थितो नरो यद्यतिवेगेन शोध्यस्थानमागत्य तच्छिरोतिरिक्तं मुखनासिकादिरूपं तदवयवं न पश्यति तदा स शुद्ध इतरथा त्वशुद्ध इति । एते ऽग्रापि न्यायाः परंशुग्रहणन्यायविषये प्रवर्त्तन्ते घटन्यायश्च कोशपानविषये तण्डुलभक्षणविषये ऽपि च वर्त्तते इति बोध्यम् । ५८ । १०३ ।

त्याज्या दुस्तटिनीति न्या० । ५९ । १०४ ।

चौरापराधान्माण्डव्यनिग्रह इति न्या० । ६० । १०५ ।

काकदधिघातकन्या० यथा काकेभ्यो दधि रक्ष्यतामित्यत्र काकपदं दधिघातकलक्षकं तथा प्रकृते ऽपीत्यर्थः । ६१ । १०६ ।

गणपतिन्या० । ६२ । १०७ ।

तिलतण्डुलन्या० । ६३ । १०८ ।

नीरक्षीरन्या० । ६४ । १०९ ।

वेण्याकाशन्या० । इदं न्यायचतुष्टयं स्वस्थाने व्याख्यातम् । ६५ । ११० ।

येनोपक्रम्यते येन चोपसंह्रियते स वाक्यार्थ इति न्या० इदं परार्थानुमाने प्रसिद्धम् । यत्स्वयं धूमादग्निमनुमाय परं प्रति बोधयितुं पञ्चावयववाक्यं प्रयुज्यते तत्परार्थानुमानं पञ्चावयवाश्च प्रतिज्ञाहेतूदाहरणोपनयनिगमनरूपाः तत्र गिरिरग्निमानिति प्रतिज्ञा धूमादिति हेतुः यो यो धूमवान्सो ऽग्निमान्यथा महानस इत्युदाहरणम् । धूमवांश्चायमित्युपनयः । तस्मादग्निमानिति निगमनमिति । साध्यवत्तया पक्षवचनं प्रतिज्ञा पञ्चम्यन्तलिङ्गप्रतिपादकं हेतुः व्याप्तिप्रतिपादकमुदाहरणं पक्षधर्मताज्ञानार्थमुपनयः हेतुसाध्यवत्तया पक्षप्रतिपादकं वचनं निगमनम् । तथा च यथा ऽत्र पक्षस्य साध्यवत्तयोपक्रमस्तत्त्वेनैव चोपसंहार इति तदेव वाक्यार्थस्तथा प्रकृते ऽपीति बोध्यम् । ६६ । १११ ।

संभवत्येकवाक्यत्व इति न्या० । ६७ । ११२ ।

एकवाक्यतापन्नानामितिन्या० । ६८ । ११३ ।

अपन्थानं तु गच्छन्तमिति न्या० । ६९ । ११४ ।

वध्यतां वध्यतामेवेति । ७० । ११५ ।

विषवृक्षो ऽपीति न्या० । ७१ । ११६ ।

यत्प्राये श्रूयतइति । ७२ । ११७ ।

इदं न्यायषट्कं स्वस्थाने संदंशन्यायेन स्पष्टतया प्रतीयते स्वभावतो ऽपि स्पष्टार्थं चेति नेह व्याख्यातम् । ७३ । ११८ ।

तात्स्थ्यात्ताच्छब्द्यमिति न्या० मुद्रिकयोष्ट्रः क्रीतः ।

33